॥ श्री शंखेश्वरपार्श्वनाथाय नमः ॥

॥ आचार्यदेवश्रीमद्विजयप्रेमसूरीश्वरग्रन्थमालाया पुष्पमिदम् ॥

श्रीमद्देवभद्रान्तिषच्छ्रीमत्सिद्धसेनसूरिसूत्रित तत्त्वज्ञानविकाशिनीटीकाविभूषितः

श्रीमन्नेमिचन्द्रसूरिप्रवरविनिर्मितः

❀ प्रवचनसारोद्धारः ❀

[प्रथम खण्डः]

प्रकाशिका—भारतीय प्राच्यतत्त्व प्रकाशन समिति, पिंडवाड़ा ।

प्राप्तिस्थान-

१. भारतीय प्राच्यतत्त्व प्रकाशन समिति
C/o रमणलाल लालचंद
१३५/१३७ झवेरी बाजार
मुंबई-४०००००२

२. भारतीय-प्राच्य तत्त्वप्रकाशन समिति
C/o शा. समरथमल रायचन्दजी
पिंडवाड़ा-३०७०२२
स्टे.-सिरोहीरोड राज.)

३. भारतीय-प्राच्यतत्त्व प्रकाशन समिति
शा. रमणलाल बजेचन्द
C/o दिलिपकुमार रमणलाल
मस्कती मार्केट
अमदाबाद-३८०००२

रूप्यकाणि मूल्यम् प्रतिसंख्या-५०० } ४०

- द्रव्य सहायक: -
श्री श्रीपालनगर संघ ज्ञानखातु (मुंबई)

वीर संवत् २५०६
विक्रम संवत् २०३६
ईस्वी सन् १९७९

—:: संपादकौ ::—

मुनि पद्मसेनविजयः
मुनि मुनिचन्द्रविजयः

मुद्रकः-ज्ञानोदय प्रिन्टिंग प्रेस, पिंडवाड़ा-३०७०२२ (राजस्थान)

॥ अर्हम् ॥

॥ श्री शङ्खेश्वरपार्श्वनाथभगवते नमः ॥

॥ पिंडवाडामंडनश्रीमहावीरस्वामिने नमः ॥

॥ पूज्यपादसद्गुरुदेव श्रीमद्विजयसिद्धिसूरीश्वरेभ्यो नमः ॥

॥ पूज्यपादसद्गुरुदेव श्रीमद्विजयभद्रसूरीश्वरेभ्यो नमः ॥

॥ पूज्यपादसद्गुरुदेव श्रीमद्विजयप्रेमसूरीश्वरेभ्यो नमः ॥


* प्राक्कथनम् *

परमकृपालोः परमात्मनः सद्गुरुदेवानां च निःसीमकृपया, बृहद्गच्छीयाचार्यनेमिचन्द्रसूरीश्वरैर्विरचितस्य श्रीचन्द्रगच्छीयाचार्यसिद्धसेनसूरीश्वरकृततत्त्वज्ञानविकाशिनीटीकोपेतस्य यथार्थाभिधानस्य श्रीप्रवचनसारोद्धारग्रन्थरत्नस्य ९७ द्वारात्मकः प्रथमः खण्डः प्राचीनहस्तलिखितादर्शादिविविधसामग्र्यनुसारेण संशोध्य सम्पाद्य च विदुषां पुरत उपन्यस्यते ।

ग्रन्थकृतां परिचयः

ग्रन्थकृतां श्रीनेमिचन्द्रसूरीश्वराणां जीवनवृत्तं नोपलभ्यते कुत्रचित् । गुरुपरम्परा सत्ताकालश्च ज्ञायते श्रीमद्भिरेव विरचितस्य 'अनन्तनाथचरित' ग्रन्थस्य प्रशस्तितः । [1]'गुरुपरम्परा चेत्थम्—

१ इयं गुरुपरम्परा पण्डित अमृतलाल मोहनलाल भोजक महाशयेन लिखितात्, 'आख्यानकमणि कोश'-ग्रन्थस्य प्राक्कथनात् उद्धृता ।



अनन्तनाथचरितग्रन्थस्य प्रशस्तिरेवम्—

अत्थि समुन्नयसाहो सव्वुत्तमपत्तविरइयच्छाओ । सुकइजुओ बहुसउणो सिरिवडगच्छो वरतरुव्व ॥१॥
सुमणसमुणिंदसंसेवियक्कमो नायनिहियमणवित्ती । तम्मि पहू उप्पन्नो गुरु व्व सिरिदेवसूरि त्ति ॥२॥
तस्सऽन्नयम्मि जाओ निग्गंथसिरोमणी सुवित्तो वि । सिरिअजियदेवसूरी कयंतबुद्धी वि कारुणिओ ॥३॥

तो संजाया आणंदसूरिणो जणियजणमणाणंदा । तत्तो य तिन्नि जाया मुणीसरा भुवणविक्खाया ॥४॥
सिरिनेमिचंदसूरी पढमो तेसिं न केवलाणं पि । अवराण वि समयरहस्सदेसयाणं मुणिंदाणं ॥५॥
जेण लहुवीरचरियं रइयं तह उत्तरज्झयणवित्ति । अक्खाणयमणिकोसो य रयणचूडो य ललियपओ ।
बीओ बीयसमुग्गयचंदकलानिक्कलंकतणुजट्ठी । सिरिपज्जोयणसूरी तिव्वतवच्चरणकरणरओ ॥७॥
तइया य अमयरसवरिससरिसमदेसणा जणाणंदा । जिणचंदसूरिपहुणो ससहरकरसरिसजसपसरा ॥८॥
गुरुतुच्छ-गुरुत्त-गहीरयाहिं लीलाए जेहिं निज्जिणिया । फलिहमणि-गयणवित्थर-दुद्धोदहिणो गुरुतरा वि ॥९॥
तो तेहिं दुन्नि विहिया नियपए सूरिणो भुवणग (म) हिया । सरला विलसिरचित्ता समुन्नया दंतिदंत व्व ॥१०॥
सिरिअम्मएवसूरि पढमो तेसिं समस्सिरीभवणं । गुरुरयणरोहणगिरी सरस्सईवासवरकमलं ॥११॥
जो अक्खाणयमणिकोसवित्ति वियरणकयत्थकयलोओ । सव्वोदारजणाणं चूडारयणत्तमुव्वहइ ॥१२॥
तह बीओ सिरिसिरिचंदसूरिनामो मुणीसरो संतो । संतोसपरो स-परोवयारकरणेक्कमणवित्ती ॥१३॥
सिरिअम्मएवसूरीहिं नियपए सूरिणो कया चउरो । हरिभद्दसूरिनामो सिग्घकई पढमओ तेसिं ॥१४॥
सिरिविजयसेणसूरी बीओ ससितेयकित्तिभरभूरी । एगंतरोववासी तक्का-ऽलंकार-समयन्नू ॥१५॥
उद्दामदेसणज्झुणिपडिबोहियसव्वभव्वविसरस्स । तस्स कणिट्ठो सिरिनेमिचंदसूरी वि मंदमई ॥१६॥
ताण तुरिओ जसदेवसूरि नामो मुणीसरो महयं । लक्खण-छंदा-ऽलंकार-तक्क-साहित्त-समयन्नू ॥१७॥
सिरिविजयसेण मुणिवइपयम्मि सिरिनेमिचंदसूरिहिं । ठविओ समंतभद्दाभिहाणसूरि गुणावासो ॥१८॥

.....

तो अम्मएवमुणिवइविणेयसिरिनेमिचंदसूरिहिं । अब्भुदयकरं रइयं चरियमिणमणंतजिणरन्नो ॥४७॥

संसोहियं च ससमय-परसमयन्नूहिं विउसतिलएहिं । **जसदेवसूरिमुणिवइ-समंतभद्दाभिहाणेहिं** ॥४८॥
पढमायरसे लिहियं **मेहकुमाराभिहाणविउसेण** तह पुत्थयंमि गुज्जरवं सुब्भवचंदुएणमिमं ॥४९॥
रसचंदसूरसंखेवरिसे विक्कमनिवाओ वट्टंते । वइसाहसामवारसि तिहीए वारंमि सोमस्स ॥५०॥
रिक्खंमि पुव्वभद्दवयनामगे इंदजोगजुत्तंमि । पालंते रज्जसिरिं **कुमारपाले** महीनाहे ॥५१॥
सिरि वद्धमाणपुरट्ठियविसिट्ठ चरणगवसहि पारंभा । धवलक्ककयंमि देवयघरंमि वरिसेण निप्पन्नं ॥५२॥
पहुपासपसाएणं तह सूरिक्कमाणुभावेण । अंबासन्नेज्झणयकयमेयमि(म)णंतजिणचरियं ॥५३॥
पन्चक्खरगणणाए सिलोयमाणेण बारससहस्सा । संपुन्नुचिय जाया चरियंमि अणंतजिणरन्नो ॥५४॥
महमंदत्तेण मए रइयं ता जमिह किं पि उस्सुत्तं । तं नाउं कयकरुणा गीयत्था इह विसोहंतु ॥५५॥
जा विजइ रयणायररविससिधरणीसुमेरु तह विंदं । ता वक्खाणिज्जतं नंदउ चरियं अणंतस्स ॥५६॥

ग्रंथाग्रं १२००० ॥छ॥ श्रीअनन्तजिनचरितं समाप्तमिति ॥छ॥ संवत् १४६७ वर्षे कार्तिक शुदि ४ रवौ मंत्रि कुंपा लेखि ॥छ॥ शुभं भवतु ॥ कल्याणमस्तु ॥ श्री ॥...

समय [1]अन्यग्रन्थाश्च

श्रीमद्भिः नेमिचन्द्रसूरीश्वरैः १२१६ तमे वैक्रमेऽब्दे 'अनन्तनाथचरितम्' विरचितम्, अतस्तेषां सत्ताकालो द्वादशं त्रयोदशं च शतकम् ।

१ यद्यपि, देवचन्द्र लालभाई पुस्तकोद्धारफण्डसंस्करणे आगमोद्धारकैः पूज्यपादश्रीमदानन्दसागरसूरीश्वरलिखित प्रवचनसारोद्धारस्य उपोद्घाते लिखितं यत् "पूज्यपादविहितावचैते ग्रन्था उपलभ्यन्ते-१ उत्तराध्ययनस्य—

श्रीमद्भिर्निर्मितं 'जीवकुलकम्' अत्रैव २१४ तमे द्वारे निवेशितमस्ति । अन्यच्च, उपदेशमाला-वृत्तिप्रशस्तितो (प्रशस्तिसङ्ग्रह, पृ. २६), ज्ञायते यत् श्रीमद्भिः द्वे जिनचरिते रचिते आस्ताम्, तयोरेकं 'अनन्तनाथचरितम्' (प्राकृतभाषाबद्धम्, अद्यावधि अमुद्रितम्) उपलभ्यते, द्वितीयं तु नोपलभ्यते ।

टीकाकारपरिचयः

तत्त्वप्रकाशिनीनाम्न्या अतिविशदस्फुटतमाया वृत्तेर्विधातारः श्रीमन्तः सिद्धसेनसूरयश्चन्द्रगच्छमलङ्चक्रुः । गुरुपरम्परा तु श्रीमद्भिरेव वृत्तिप्रान्ते दर्शिता, सा चैवम्–"श्रीचन्द्रगच्छगगने.....श्रीमदभयदेवसूरिरविः...तदनु धनेश्वरसूरिः...श्रीमदजितसिंहसूरिः.....श्री वर्धमानसूरिः.....श्रीचन्द्रप्रभमुनिपतिः .....श्री भद्रेश्वरसूरय.....श्रीमदजितसिंह सूरयः.....श्रीदेवप्रभसूरिः.....श्री सिद्धसेनसूरिः ।"

वृत्तिरचनाकालस्तु प्रान्ते एवं दर्शितः–"करिसागररविसङ्ख्ये (१२४८) श्रीविक्रमनृपतिवत्सरे चैत्रे । पुष्यार्क दिने शुक्लाष्टम्यां वृत्तिः समाप्ताऽसौ" ।- "जैनपरम्परानो इतिहास' (भा. २) नाम्नि ग्रन्थे (पृ. २९, पृ. ४१७) तु १२७८ तमे वर्षे इति लिखितमस्ति । अत्रेदं ज्ञेयं सागरशब्दः तत्पर्यायाश्च ४-७ द्वयोरङ्कयोरुपयुज्यन्ते (जैनचित्रकल्पद्रुम, पृ. ६७-६८) ।

जे. सि. प्रत्योस्तु 'करसागररवि'.....इति पाठः, तदनुसारं 'जेसलमेरुभाण्डागारस्थग्रन्थानां

सुखबोधावृत्तिः,२ श्रीमहावीरचरित्रम्" ..... किन्तु, 'अनन्तनाथचरितग्रन्थप्रशस्तितः स्पष्टं ज्ञायते यद् उत्तराध्ययन-वृत्त्यादिकर्तारः श्री नेमिचन्द्रसूरयः प्रवचनसारोद्धार कर्तृभ्यः श्री नेमिचन्द्रसूरिभ्यो भिन्नाः पूर्ववर्तिनश्च ।'

१ यद्यपि, अस्मिन्नेव ग्रन्थे एकत्र (पृ. ७७१) 'सं. ११४८ अथवा सं. ११७८.....' इति लिखितमस्ति, किन्तु तद् भ्रान्त्या लिखितं ज्ञायते, यतः रव्यादि सूर्यपर्यायशब्दाङ्का द्वादशात्मकमङ्कमेव सूचयन्ति ।

नूतना सूचिः' इति पुस्तके (पृ. ७२) १२४२ तमं वर्षं दर्शितम् । अतो वृत्तिकारस्य सत्ताकालो वैक्रमीयं त्रयोदशं शतकमिति निश्चीयते ।

अन्य ग्रन्थाः—

अत्रैव वृत्तौ वृत्तिकारनिर्मितानामन्येषां त्रयाणां ग्रन्थानामुल्लेखा दृश्यन्ते, यथा–१"तथा चावोचाम स्तुतिषु....." (प्र. आ. १८७ तमं पत्रम्), २ "तथा चाचक्ष्महि श्रीपद्मप्रभचरित्रे.....(प्र.आ. ४४० तमं पत्रम्), ३ "अस्मदुपरचिता सामाचारी निरीक्षणीया" (४४३ तमं पत्रम्) । नोपलभ्यन्त इदानीमेते ग्रन्थाः ।

ग्रन्थस्य वृत्तयः—

अस्य प्रवचनसारोद्धारग्रन्थरत्नस्यान्या अपि वृत्तय उपलभ्यन्ते । तासां परिचय इत्थम् , (जैन साहित्य का बृहद् इतिहास, भा. ४, पृ. १७९ इत्येतद् ग्रन्थस्यानुसारेण)—

१ पूज्यपादरविप्रभशिष्येण आचार्योदयप्रभेण ३२०३ श्लोकप्रमाणा 'विषमपदव्याख्या' रचिता ।

२ अज्ञातकर्तृका ३३०३ श्लोकप्रमाणा 'विषमपदपर्याय व्याख्या'ऽप्युपलभ्यते ।

३ अतो भिन्नाप्येकाऽज्ञातकर्तृका वृत्तिः प्राप्यते ।

४ पद्ममन्दिरगणिविरचितो बालावबोधोऽप्युपलभ्यते ।

एताः सर्वा अपि वृत्तयोऽद्यावधि न मुद्रिताः ।

जैन परम्परानो इतिहास नामक ग्रन्थेन ज्ञायते (भा. २, पृ.२८) यत् प्रस्तुततत्त्वज्ञानविकाशिनी-वृत्तिकार श्रीसिद्धसेनसूरीश्वराणां गुरुवर्यैः श्रीदेवभद्रसूरिभिरपि प्रवचनसारोद्धारस्य वृत्तिर्निर्मिताऽऽसीत् ।

सम्पादनोपयुक्तहस्तलिखिताः प्रतयः

(१) जे[1] =

पत्राणि–४३८, आयाम–पृथुत्वे ३२॥ × २॥॥ इंच । द्वितीये पत्रे भगवतो महावीरस्य पारिपार्श्वक-सहितं चित्रमस्ति, ४३६ तमे पत्रे देव्याः चित्रम् , ४३७ तमे पत्रे आचार्यः शिष्येभ्यो वाचनां ददातीति चित्रं चित्रितं वर्तते । त्रीण्यपि चित्राण्यति सुन्दराणि ।

प्रान्ते लेखनप्रशस्तिरित्थम्–: श्री प्रवचनसारोद्धारवृत्तिः समाप्ता ॥ छ ॥ छ ॥ छ ॥ इषुग्रहरवि-सङ्ख्ये [१२९५] श्री विक्रमनृपतिवत्सरे पौषे शुक्लाष्टम्यां गुरुवारे लिखिताऽसौ प्रतापसिंहेन ॥ छ ॥ छ ॥ शुभं भवतु महा श्रीः ॥ छ ॥ छ ॥ शिवमस्तु ॥ छ ॥

---

१ आगमप्रभाकरमुनिवर्य श्री पुण्यविजयमहाराजैः जेसलमेरुस्थानां विविधहस्तप्रतीनां पाठान्तराणि ग्राहितानि, तासां विवरणं 'जेसलमेरुस्थ ग्रन्थानां नूतना सूची' नामकग्रन्थे उपलभ्यते । तदनुसारेण ज्ञायते यत्तैः श्री जेसलमेरुदुर्गस्थस्य खरतरगच्छीययुगप्रधानाचार्यश्री जिनभद्रसूरिसंस्थापितस्य ताडपत्रीयजैनग्रन्थभाण्डागार-स्थस्य २०६ क्रमाङ्कयुक्तायाः प्रतेरपि पाठान्तराणि ग्राहितानि ।

इयं च पाठान्तरयुता प्रतिः लालभाई दलपतभाई भारतीय संस्कृति विद्या मन्दिर' तः पण्डितवर्याणां दलसुखभाई मालवणिया महाशयानां पं. नगीनभाई अध्यक्ष महोदयानां च सहकारेणास्माभिः प्राप्ता ।

यद्यपि, अस्यां पाठान्तरयुतायां प्रतौ जे, जे १, जे २ इत्येवं तिसृणां प्रतीनां पाठान्तराणि दत्तानि सन्ति, तथापि जे १ जे २ प्रत्योर्विवरणाभावे तयोः पाठान्तराणां च विरलत्वेऽस्माभिः प्रायः जे. संज्ञयैव पाठान्तराणि दत्तानि । अस्यामस्माभिरुपयुक्तायां पाठान्तरसहितायां प्रतौ यस्याः पाठान्तराणि सन्ति तस्याः जे. संज्ञकायाः प्रतेः परिचयः 'जेसलमेरुस्थ ग्रन्थानां नूतना सूची' नामकग्रन्थानुसारेणोपरिदत्तः ।

इतोऽग्रे विस्तृता प्रशस्तिग्रन्थस्य लेखयितुर्दत्ताऽस्ति, सा तु जिज्ञासुना 'ग्रन्थानां नूतना सूची' ग्रन्थतः (पृ. ७१) द्रष्टव्या ।

तत् पश्चात् गृहीतृप्रशस्तिरित्थम्–संवत् १४८४ वर्षे प्रथमाषाढसुदिदशमी दिने श्रीस्तम्भतीर्थे ठ. विजयसिंहसत्पुत्रेण ठ. वल्लालसुश्रावकेण श्रीप्रवचनसारोद्धारवृत्तिपुस्तकं मूल्येनगृहीतम् ॥

(२) ता=

इयं प्रतिः श्रीसङ्घवीपाडा जैन भण्डारसत्का तालपत्रीया प्रतिः (श्रीहेमचन्द्राचार्य जैन ज्ञानमन्दिर, पाटण,) तत्रस्थ सूच्यनुसारेण अस्याः क्रमाङ्कः १५० वर्तते ।

पत्राणि १–२६६, (१८४–२६६ पत्रेषु प्रवचनसारोद्धारग्रन्थः मूलमात्रः अस्ति)
दैर्घ्य-पृथुलते १४×१$\frac{3}{4}$ इंच प्रतिपत्रं द्वयोः पार्श्वयोः ५-७ पङ्क्तयः, प्रतिपङ्क्ति प्रायः ७२ अक्षराणि ।

(३) पा=

इयं प्रतिः संघवीना पाडानो भंडार सत्का (हेमचन्द्राचार्य जैन ज्ञानमंदिर पाटण) तालपत्रीया अपूर्णा प्रतिः । अस्याः पाठभेदाः प्रायः परिशिष्टे एव दत्ताः सन्ति ।

(४) सि=

इयं प्रतिः आचार्यश्रीमद्विजयसिद्धिसूरीश्वरजीशास्त्रसङ्ग्रहसत्का (जैन विद्याशाला, दोशीवाडानी

पोल, अमदावाद) । क्रमाङ्कम् ७९६, पत्राणि ३०५, प्रतिपत्रं पङ्क्तयः प्रायः १७, प्रतिपङ्क्ति अक्षराणि प्रायः ५६ ।

दैर्घ्य-पृथुलते–१$\frac{1}{2}$×४$\frac{1}{2}$ इंच

अन्ते लेखनप्रशस्तिः–"संवत् १५ आषाढादि ५१ वर्षे आषाढ शुदि १ बुधे श्रीखरतरगच्छे श्रीजिनभद्रसूरीणां विजयराज्ये प्रवचनसारोद्धारवृत्तिर्लिखिता...।"

प्रतिरियं विदुषा संशोधकेन संशोधिता, शुद्धप्राया च । कागदपत्रोपरिलिखिता ।

(५) वि=

इयं प्रतिरपि आचार्यश्रीमद् विजयसिद्धिसूरीश्वरजीशास्त्रसङ्ग्रहसत्का (जैन विद्याशाला, दोशीवाडानी पोल, अमदावाद) कागदपत्रोपरिलिखिता ।

क्रमाङ्कम् ७९५, पत्राणि ३६२,

दैर्घ्य-पृथुलते १०$\frac{1}{2}$×४$\frac{1}{2}$ इंच

ग्रन्थलेखनप्रशस्तिः–"संवत् १५६३ वर्षे उत्तरायने ग्रीष्मऋतौ वैशाखमासे शुक्लपक्षे पूर्णिमायां तिथौ गुरुवासरे श्री स्तंभतीर्थे श्री श्री श्री हेमविमलसूरिराज्ये पं० श्रुतसमुद्रगणि योग्यं लिखापितं "...

इयं प्रतिरपि संशोधिता शुद्धप्राया च ।

(६) त्रि=

इयं प्रतिरपि आचार्यश्रीमद् विजयसिद्धिसूरीश्वरजी शास्त्रसङ्ग्रहसत्का, कागदपत्रोपरि त्रिपाठपद्धत्या लिखिता ।

क्रमाङ्कम् ७९४, पत्राणि ३५०

दैर्घ्यपृथुलते १४½×४½ इंच

लेखनप्रशस्तिः–"...॥ संवत् १६०८ वर्षे मीती चैत्र सुदी १२ रवौ लषीतं समाप्त ॥..."

(७) पो =

इयं प्रतिः श्री जैन पोरवाल पंच जैनज्ञानभण्डार सत्का (पाडीव, राजस्थान), कागदपत्रोपरिलिखिता ।

क्रमाङ्कम् ४२, पत्राणि ३४५

दैर्घ्य-पृथुलते १०½×४½ इंच

लेखनप्रशस्तिः–"संवत् १६४५ वर्ष भाद्रवा वदि १ गुरुवासरे लिष्यतं ।"

(८) सं =

इयं प्रतिः संवेगीउपाश्रयसत्का (हाजापटेलनीपोल, अमदाबाद) कागदपत्रोपरिलिखिता ।

क्रमाङ्कम् २२०३, पत्राणि ४१९, २२९ क्रमाङ्के द्वे पत्रे विद्येते ।

दैर्घ्य-पृथुलते :– १०½×४½ इंच

लेखनसमयः–१६६२ वर्षे अषाढ सुद्ध ९.

(९) वि. प.=(विषमपद.)

प्रतिरियं खम्भातस्थित शान्तिनाथ जैनज्ञानभाण्डागारसत्का, तालपत्रीया ।
दैर्घ्य-पृथुलते – १७×२ इंच ।

३२०३ श्लोकप्रमाणात्मकं श्रीउदयप्रभसूरिनिर्मितं विषमपदार्थावबोधाख्यमेतद् टिप्पनकमद्यावधि न प्रकाशितमस्ति । अस्माभिरस्योपयोगो यत्र तत्र टिप्पण्यां (पृ.२५३ । टि.२; पृ.२५४। टि.१,२,३,४ इत्यादि) पाठभेदादिनिदर्शनार्थं कृतोऽस्ति ।

सं. प्रत्या अस्माभिः पूर्ण उपयोगः कृतः, अन्यासां यथासम्भवमांशिक उपयोगः कृतः ।

प्रस्तुतसम्पादनम्

अत्यन्तोपयोगिनोऽस्य ग्रन्थरत्नस्य मुद्रणं प्राक् जामनगरवास्तव्यैः पं. हीरालाल हंसराजमहोदयैः कारापितमासीत् । ततः श्रीमदानन्दसागरसूरिवर्यलिखितोपोद्घातयुक्तमेतदेव ग्रन्थरत्नं देवचन्द्र लालभाई जैन पुस्तकोद्धारसंस्थया प्राकाश्यं नीतम् ।

अधुना दुर्लभतरस्यैतस्य ग्रन्थस्य पुनः सम्पादनयुक्तं प्रकाशनमतीवावश्यकमिति मत्वा पूज्यपाद-पंन्यासप्रवराणां श्रीमतां जयघोषविजयमहाराजानां प्रेरणया भारतीय-प्राच्यतत्त्व-प्रकाशन-समितिनिश्रया प्राकाश्यं नीयते; अतस्तेषां श्रुतभक्तिभ्यो भूयो धन्यवादमर्हति ।

उपकृतिस्मृतिः

पूज्यपादशासनप्रभावकाचार्यदेवेशानां श्रीमतां विजय-ओङ्कारसूरीश्वराणां जिनागमतत्त्ववित्-पंन्यास-प्रवर श्रीमद् जयघोषविजयगणिवराणां च प्रेरणया तेषामाशीर्वादपुरस्सरमावाभ्यामेतत्सम्पादनकार्यं प्रारब्ध-मतस्ते विशेषत उपकारिणः ।

मुनिराजश्री भुवनविजयान्तेवासिभिर्दर्शनशास्त्रविशारदैरमु[illegible]निराजश्री जम्बूविजयमहाराजैरनेकशो मार्ग-दर्शनप्रदानेन निराकृता अनेका क्षतय उपकृतौ चावाम् ।

धन्यवादार्हाः

सम्पादनकार्योपयोगिहस्तलिखितप्रतयो यासां संस्थानां सन्ति तासां कार्यवाहकैरेतादृशकार्ये स्वकीय-कर्त्तव्यमनुस्मरद्भिरतीवप्रेम्णा ता दत्ता अतस्ते न्यूनधन्यवादार्हा नेति ।

सप्रणामं महयावश्चरमतीर्थेशमेतत्सम्पादितकृतिकुसुमेनेत्याऽऽवेदयतः ।

पूज्यपादाचार्यदेवेशश्रीमद्विजयभुवन-
भानुसूरीश्वराणां शिष्यरत्नः
मुनिः पद्मसेनविजयः

पूज्यपादाचार्यदेवेशश्रीमद्विजयभद्रसूरी-
श्वराणां शिष्यरत्नमुनिराजश्रीजिनचन्द्र-
विजयानां विनेयाणुः
मुनिः मुनिचन्द्रविजयः

卐

* विषयानुक्रमः *

विषयः		पत्रम्
	प्राक्कथनम्	१
	विषयानुक्रमः	१३
	विशिष्टानि टिप्पणानि	१८
	विशिष्टाः पाठभेदाः	१९
	शुद्धिपत्रकं	
	प्रकाशकीय	
	मङ्गलाभिधेयादि	१
	द्वारनिर्देशः	६
१	चैत्यवन्दनम्	३३-५४
	दशत्रिकाणि	३३
	सम्पदादि	४२
	द्वादशाधिकाराः	४८
	सप्तवेलाचैत्यवन्दनम् , जघन्यादिभेदाः	५२
२	गुरुवन्दनम्	५४-१०३
	१९२ स्थानानि	५४
	मुखवस्त्रिका-देहपञ्चविंशतिः	५६
	आवश्यकपञ्चविंशतिः	५७
६	स्थानानि	५६
६	गुणाः	६०
६	गुरुवचनानि	६२
५	अधिकारिणः	६३
५	अनधिकारिणः पार्श्वस्थादयः	६४
५	प्रतिषेधाः	७२
	अवग्रहः	७४
५	अभिधानानि	७५
५	उदाहरणानि	७६
३३	आशातनाः	८३
३२	दोषाः	९१
३	प्रतिक्रमणम्	१०३-११३
	देवसीप्रतिक्रमणविधिः	१०५
	प्रभातिकप्रतिक्रमणविधिः	१०७

विषयः	पत्रम्
पाक्षिकादिप्रतिक्रमणविधिः	११०
वंदनिकादिषु कायोत्सर्गाः	१११
क्षमणकानि	११३
४ प्रत्याख्यानम्	११४-१५४
दशविधप्रत्याख्यानानि	११४
अद्धाप्रत्याख्यानभेदाः	१२१
नमस्कारादिप्रत्याख्यानेषु आकाराः	१२४
अशनादिस्वरूपम्	१३२
कारणस्वरूपम्	१३५
विकृतिस्वरूपम्	१३८
विशेषवस्तूनि	१४१
विकृतिगतानि	१४३
३२ अनन्तकायिकानि	१४६
२२ अभक्ष्याणि	१५३
५ कायोत्सर्गद्वारम्	१५४
६ १२४ गृहिप्रतिक्रमणातिचाराः	१६१-२१४
५ संलेखनाः	१६१
१५ कर्मादानानि	१६३

विषयः	पत्रम्
२४ ज्ञान-दर्शन-चारित्राचाराः	१६८
१२ तपांसि	१७१
५ सम्यक्त्वातिचाराः	१८५
५ प्रथमाणुव्रतातिचाराः	१८८
५ द्वितीयाणुव्रतातिचाराः	१९२
५ तृतीयाणुव्रतातिचाराः	१९४
५ चतुर्थाणुव्रतातिचाराः	१९५
५ पञ्चमाणुव्रतातिचाराः	१९९
५ प्रथमगुणव्रतातिचाराः	२०२
५ द्वितीयगुणव्रतातिचाराः	२०४
५ तृतीयगुणव्रतातिचाराः	२०६
२० शिक्षाव्रतातिचाराः	२०८
७ भरतैरवतजिननामानि	२१५-२२०
भरतत्रिकालजिननामानि	२१५
ऐरवतवार्तमानिकजिननामानि	२१८
८ आदिमगणधरनामानि	२२१
९ प्रवर्तिनीनामानि	२२१
१० २० स्थानकानि	२२२

	विषय:	पत्रम्
११	जिनजननीजनकनामानि	२२७
१२	जिनजननीजनकगतिः	२२९
१३	विहरमानजिनउत्कृष्टजघन्यसङ्ख्या	२३०
१४	जन्मसमये जिनानामुत्कृष्टजघन्यसङ्ख्या	२३०
१५	जिनानां गणधरसङ्ख्या	२३३
१६	" मुनिसङ्ख्या	२३४
१७	" साध्वी सङ्ख्या	२३६
१८	" वैक्रियलब्धिमतां संख्या	२३८
१९	" वादिसंख्या	२३९
२०	" अवधिज्ञानिसंख्या	२४१
२१	" केवलिसङ्ख्या	२४३
२२	" मनःपर्यविसङ्ख्या	२४५
२३	" चतुर्दशपूर्विसंख्या	२४६
२४	" श्रावकसंख्या	२४८
२५	" श्राविकासंख्या	२५०
२६	" यक्षाः	२५२
२७	" यक्षिण्यः	२५५
२८	" तनुमानम्	२५९
२९	" लाञ्छनानि	२६०

	विषय:	पत्रम्
३०	जिनानां वर्णाः	२६१
३१	" व्रतपरिवारः	२६२
३२	" सर्वायुः	२६३
३३	" शिवगमनपरिवारः	२६४
३४	" निर्वाणगमनस्थानम्	२६५
३५	" अन्तरविधिः	२६६
	त्रिषष्टिशलाकान्तरादि	२७३
३६	तीर्थव्यवच्छेदः	२८१
३७	१० आशातनाः	२८३
३८	८४ "	२८३
	चैत्ये यत्यवस्थानकालः	२८९
३९	८ महाप्रातिहार्याणि	२९०
४०	३४ अतिशयाः	२९५
४१	१८ दोषाः	३०१
४२	जिनचतुष्कम्	३०२
४३	जिनानां निष्क्रमणतपः	३०२
४४	" ज्ञानतपः	३०३
४५	" निर्वाणतपः	३०४
४६	भाविजिनेश्वरजीवाः	३०४

विषय:	पत्रम्
४७ ऊर्ध्वादिसिद्धसङ्ख्या	३०८
४८ एकसमयसिद्धसंख्या	३०९
४९ सिद्धभेदा:	३१०
५० सिद्धावगाहना:	३१२
५१ गृहिलिङ्गादिसङ्ख्या	३१३
५२ द्वात्रिंशदादिसिद्धसङ्ख्या	३१४
५३ स्त्र्यादिसिद्धसंख्या	३१५
५४ सिद्धानां संस्थानम्	३१६
५५ सिद्धानामवस्थिति:	३२०
५६ सिद्धानाम् उत्कृष्टावगाहना	३२२
५७ " मध्यमावगाहना	३२३
५८ " जघन्यावगाहना	३२४
५९ शाश्वतजिनप्रतिमानामानि	३२४
६० जिनकल्पिनाम् उपकरणसङ्ख्या	३२५
६१ स्थविरकल्पिनां उपकरणादिनि स्वयम्बुद्ध-प्रत्येकबुद्धस्वरूपम्	३२६
६२ साध्वीनाम् उपकरणानि	३४९
६३ एकवसतिजिनकल्पिकसंख्या	३५६
६४ ३६ सूरिगुणा:	३६८

विषय:	पत्रम्
६५ ४२ विनयभेदा:	३८०
६६ चरणसप्तति	३८१
६७ करणसप्तति	३९३-४८८
१६ उद्गमदोषा:	३९५
१६ उत्पादनदोषा:	४१६
१० एषणादोषा:	४३१
पिण्डविशुद्धे: सवेसङ्ग्रह:	४४६
कोटिनवकम्	४५०
५ समितय:	४५२
१२ भावना:	४५५
१२ भिक्षुप्रतिमा:	४६७
५ इन्द्रियनिरोध:	४८१
प्रतिलेखना:	४८२
३ गुप्तय:	४८५
अभिग्रहा:	४८७
६८ जङ्घा-विद्याचारणगमनशक्ति:	४८८
६९ परिहारविशुद्धितप:	४९१
७० यथालन्दिकस्वरूपम्	५०२
७१ ४८ निर्यामका:	५१३

	विषयः	पत्रम्
७२	२५ महाव्रतभावनाः	५१७
७३	२५ अशुभभावनाः	५२२
७४	महाव्रतसंख्या	५३५
७५	कृतिकर्मसङ्ख्या	५३७
७६	क्षेत्रे चारित्रसङ्ख्या	५३८
७७	स्थितकल्पः	५३८
७८	अस्थितकल्पः	५४०
७९	चैत्यपञ्चकम्	५४७
८०	पुस्तकपञ्चकम्	५५०
८१	दण्डपञ्चकम्	५५२
८२	तृणपञ्चकम्	५५५
८३	चर्मपञ्चकम्	५५६
८४	दूष्यपञ्चकम्	५५७
८५	अवग्रहपञ्चकम्	५५६
८६	२२ परिषहाः	५६२
८७	७ मण्डल्यः	५७२
८८	१० स्थानव्यवच्छेदः	५७३
८९	क्षपकश्रेणिः	५७४
९०	उपशमश्रेणिः	५८५-५९४
९१	१०२४ स्थण्डिलभेदाः	५९४-६०३
९२	पूर्वाणां नामादि	६०४-६०८
९३	निर्ग्रन्थपञ्चकम्	६०९-६१९
९४	श्रमणपञ्चकम्	६२०
९५	ग्रासैषणापञ्चकम्	६२०-६२६
९६	पिण्डग्रानैषणासप्तकम्	६२७-६३०
९७	भिक्षाचर्याष्टकम्	६३६-६४३
	सम्यादनोपयुक्तग्रन्थसूचिः	२५

विशिष्टानि टिप्पणानि

१	पृ. ३५	पं. १४	तत्र-तुलना-योगशास्त्रवृत्तिः ३ । १२४ ॥
२	पृ ४७	पं. १	प्रथमोल्लिङ्गन- =“चितरवाना पद जाणवा” इति सि. प्रतौ पार्श्वभागे ॥
३	पृ. ५७	पं. १२	दुओणयं-तुलना योगशास्त्रवृत्तिः ३ । १३०, प. २३५ तः ॥
४	पृ. ८०	पं. १०	पायनीघटिका-“वस्त्रगालघटस्यान्तः” इति त्रिशष्टि श. पु. चरित्रे (८ । १० । २२४) ॥ पउजणघडियाए- इति आवश्यकहारिभद्र्याम् पृ. ५१४ B ॥
५	पृ. ८५	पं. १५	पुरओ-तुलना-योगशास्त्रवृत्तिः ३।१३०, प. २४२ तः, तत्र क्वचित् क्रमभेदो दृश्यते ॥
६	पृ. ८८	पं. १०	अन्यत्र योगशास्त्रवृत्त्यादौ ३ । १३०, प. २४२ B) इति ध्येयम् ॥
७	पृ. ९१	पं. ७	अणाढियं-तुलना-योगशास्त्रवृत्तिः ३ । १३०, प. २३६ तः ॥
८	पृ. १०३	पं. ७	तुलना-योगशास्त्रवृत्तिः ३ । १३०, प. २४७ तः ॥
९	पृ. १०६	पं. २	इदं च-इतः श्रयणायेत्यर्थः’ (प. ३) इति एतावत्पाठः धर्मसङ्ग्रहवृत्तौ (प. २१२) उद्धृतोऽस्ति॥
१०	पृ. १११	पं. १	सम्म-योगशास्त्रवृत्तौ तु ‘ संबुद्धाखामणं ति पण सत्त साहूण जहसंखं ।” इति पाठो दृश्यते ॥
११	पृ. ११४	पं. ३	प्रतीति-तुलना-योगशास्त्रवृत्तिः ३ । १३०, प. २५१ ॥
१२	पृ. १२२	पं. ६	अद्धाशब्देन-तुलना-योगशास्त्रवृत्तिः प. २५१ तः ॥
१३	पृ. १२३	पं. ४	नन्वेका०-तुलना-योगशास्त्रवृत्तिः ३ । १३० प. २५२ तः ॥
१४	पृ. १३५	पं. ६-७	जीरकं-“जीरकं स्वभाष्यप्रवचनसारोद्धाराभिप्रायेण खाद्यं कल्पवृत्त्यभिप्रायेण तु खाद्यम्, अजमकं खाद्यमिति केचित् ।” इति धर्मसङ्ग्रहवृत्तिः भा. १ । प. १८५ B ॥
१५	पृ. १३७	पं. १	उचिते-इतः “तथा स्पष्टं भवतीति” (पं. ६) पर्यन्तः पाठः धर्मसङ्ग्रहवृत्तौ (भा. १, प. १२५) उद्धृतोऽस्ति ॥

१६ पृ. १६१ पं. ३ यदा-तुलना-योगशास्त्रवृत्तिः ३।१२४, प. २१५ ॥
१७ पृ. २८६ पं. ६ तिन्नि वा-"तिन्नि वा ——.....इत्येतां करुपभाष्यगाथाम्" इति पञ्चाशकवृत्तिः ३।२, प. ५३ ॥
१८ पृ. ३२६ पं. १३ चिलिमि० "=चरवली" इति सि. प्रतौ पार्श्वभागे अर्थनिर्देशकं टिप्पणम् ॥

॥ विशिष्टाः पाठभेदाः ॥

पृ.	प.	
४	६	विशेष्ये विशेष्य प्रतिपत्तिः-जे. सि. । विशेष्ये विशेष प्रतिपत्तिः-पा. ॥
४	१०	०शास्त्रस्यादौ-जे. सि. ॥
४	१६	०रमणीवर्गविभवो० पा. ॥
५	१	०किरणकिरणनिकर० जे. वि. । ०किरणकरनिकर० पा. ॥
५	१०	श्यामशुभ० पा. ॥
६	२	विस्तृततरविस्तृततम० जे. ॥
८	१	अवगाहणाए-जे. २ । अवगाहणाये-जे. ॥ अवगाहणाइ-त्रि. ॥
८	३	अट्ठअहिय. जे. त्रि. ॥
९	२	पणुवीस-जे. ॥
९	७	खवगसेढी य उवसमसेढी-जे. ॥
१०	१	जे. प्रतौ 'दसहा उ' इति पाठं संमार्ज्य 'चक्कवालंमि' इति पाठः कृतः ॥
१०	८	जेहु-जे. ॥
११	२	०दायगन्नेसा-जे. त्रि. ॥
१६	१२	आयरिया सिद्धे० जे. ॥
१८	१४	०जघन्यिका-जे. त्रि. ॥
१९	४	केवलिनश्चेति-पा. सि. ॥
१९	६	तेनचरंती-पा. ॥
२३	११	साधुविशेषत्वम् एकजीवस्य पञ्चवारान्-पा. त्रि. सि. ॥
२४	११	तिरश्च्यस्तिर्यग्भ्यो मानव्यो मानुषेभ्यः देव्यश्च देवेभ्यः-पा. सि. त्रि. । सि. प्रतौ मुद्रितपाठः पाठान्तररूपेण उपरितनभागे दर्शितः ॥

पृ.	प.	
२६	१३	धान्यानामजीवत्वं-सि. । "अन्यत्राबीजत्वम् इति पाठः" इति सि. प्रतौ पार्श्वभागे ॥
२७	१३	परमाधार्मिकाः-सि. सं.
२७	१६	उद्वर्तमानानामे० पा. ॥
२८	५	इंदियविसउअत्ति इन्द्रियाणि विषयाश्च तेषामेव वाच्या-सि. वि. ॥
२८	६	विषयाश्च यावत्क्षेत्रस्थितशब्दादिग्रहणलक्षणो वाच्यः १८८-पा. ॥
२८	१५	तथाऽवधिज्ञानमानं-पा. सि. ॥
३०	११	त्रिपञ्चाशत्तम० पा. ॥
३२	३	विषया-सि. । "विधेया इत्यन्यत्र पाठः इति सि. प्रतौ पार्श्वभागे ॥
३५	१६	प्रावृताङ्गो-जे. सि. ॥
३६	१	पञ्चविधाभिगमेन-पा. सि. ॥
३६	१४	निसोहितिगं-जे. । निसेहतिगं-सि. [३।१२४] पञ्चाशके[४।१४] च ॥
३७	१४	०दोवएहि-पा. सि. वि. त्रि. योगशास्त्रवृत्तौ
३७	१६	कयाण-लट्ठ०सि. वि.। सिया ण-योग०वृत्तौ ३/१२४. प. २११ ॥

पृ.	प.	
३८	१	ध्यानादेश० पा. ॥
३९	५	वरचूवगंध० पा. सि. ॥
४०	१६	देवान्-जे. पा. ॥
४२	२	पादयोरुत्सर्गोत्तरं-पा. ॥
४२	१५	सव्व-जे. ॥
४२	१६	सक्कथय० जे. ॥
४३	६	तत्राप्यु० पा. ॥
४३	७	परिहारायेति शेषः-पा. सि. ॥
४३	११	विश्रम्यते गलमेतेत्विति-पा. ॥
४४	१५	नवकारु-पा. ॥
४५	६	ऐर्यापथिक्या-पा. ॥
४५	९	तस्स मिच्छामि दुक्कडं इति-पा. ॥
४५	१०	दृश्यन्ते-सि. पाठा. ॥
४६	१४	इयं चात्मतुल्यपरफलकर्तृ० जे. पा. नास्ति ॥
४७	२	जे य अईया-जे. ॥
४७	७	सम्पदस्तासां चाद्यपद० पा. ॥
४७	१६	अट्ठावीसे-जे. ॥

पृ	प.	
५२	१३	भवंतीत्याह–पा. ॥
५३	८	इत्यादि पदेन–पा. ॥
५३	१५	स्थापनार्हंतस्त०पा. ॥
५४	३	अन्ये पुनः शक्रस्तवपञ्चकेन निर्मिता शक्रस्तवपञ्चक० जे. पा. ॥
५४	७	सुसवृताङ्गोपाङ्गो-जे. ॥
५६	१२	वधूटकद्वयं–जे. पा. ॥
५६	१४	मिलिता अष्टादशपूर्वभणितैकालोकेन पुरिमषट्कसहिता मुखा० पा. । मिलिता-ष्टादशपूर्वभणितैकालोकेन पुरिमषट् रहिता मुखा० जे.
५७	२	०वधूटकया–पा. ॥
५८	४	तदव्यतिरेकाच्चवन्दनकमपि–पा. ॥
६०	९	क्षमणाऽपि–पा. ॥
६१	८	पज्जुवासमाणस्स वा वदणा-पा. ॥
६६	२	तंमि य–जे. ॥
७१	१	स्त्रीलक्षणादीनि लक्षणानि आवि० पा. ॥
७१	१५	०रागद्वेषमोहैः–पा. ॥
७५	१०	०सम्यग्दृष्टेर्वा, भावत–जे. ॥
७५	१३	रजोहरणादिकर्म भावतस्तु–जे. पा. ॥

पृ.	प.	
७५	१३	०रजोहरादयुपधिक्रिया तथा-जे. पा. ॥
७६	९	०समुच्छलबतुच्छतरस्फुरद० पा. ॥
७६	१२	तत्र तावत् शीतलको० जे. पा. ॥
७७	१	०वैराग्यरङ्गितः–जे. ॥
७७	४	वत्सास्त्वदीय एवैकः–जे. ॥
७७	६	एवं च फलमग्राहि संसार० जे. पा. ॥
७७	६	संसारस्य यथाऽमुना–जे. ॥
७८	२	ध्रुवस्थप्रतिपातिनः–जे. ॥
७९	५	सुराष्ट्रा मण्डले–पा. ॥
७९	५	द्वारवत्या० जे. ॥
८०	४	मा पतन्त्वन्या–पा. जे. ॥
८०	९	पायनघटिका० पा. सि. ॥ पायनाघटिका० सं. ॥
८१	१	च तिष्ठति–पा. सं. ॥
८१	१३	हरिः । नाथ ! नेत्थमहं भ्रान्तः सषष्टि-त्रिशतैर्युधैः–पा.मु.पाठा. सं. प्रतौ पार्श्वभागे च पाठः ॥
८१	१३	षष्टैः–जे. । षष्टिः सं. ॥
८७	१२	'खद्धाययण' त्ति–सं. ॥

पृ.	प.	
८७	१३	आशातनाया यद् विवरणं-पा. सं. ॥
८७	१४	'खद्धाययणत्ति'- सं. ॥
८६	४	चाऽऽशातना सं. ॥
८६	७	चेहि-पा. जे. ॥
८६	१३	शिक्षापरगुरुवचनेन एव गुरु'—जे. २, पा. मु. पाठा. ॥
८६	१३	प्रति भणने—जे. ॥
८६	१५	एवं गुरौ धर्मकथां—पा. ॥
६२	६	भजन् मैत्रीं गौरवकारणात् मंत्रीं.—जे. ॥
६२	१३	गाथायां पञ्चममगाथा—जे. ॥
६७	१	शयनप्रयो० स. ॥
६७	५	यत्र बन्धते—पा. ॥
६८	७	निर्यूहण—जे. ॥
६८	१०	स्मर्तव्यं—पा. ॥
१०२	५	चुडुलिधित्ति—जे. ॥
१०३	१४	तद्विज्ञेयं-योगशास्त्रवृत्तिः ३।१३०, प. १४७ ॥
१०६	६	मुखपोतिकायाः—जे. ॥
१०८	१०	यत्कर्तुं—पा. ॥
१०६	५	सम्यग् न निशातिचारानशेषानापि स्मर्तुं—पा. ॥
११०	५	मुहपोत्ती० सं. ॥
११०	७	पाक्षियमुहपत्ती पडिलेहेहं ...पडिलेहिस्सि पा. सं. ॥
११०	८	क्षमणकं विदधते-पं. ॥
११०	१०	गुरुनिरोधाद्० पा. सं. ॥
१११	३	भवन जे. ॥
१११	७	पणुवीस—जे. ॥
११३	१२	क्षम्यन्ते—पा. ॥
११४	४	ख्यानं कथनं—जे. ॥ ख्यानं प्रकथनं-इति योगशास्त्रवृत्तौ ३।१३०, प. २५१ ॥
११५	६	अभत्तट्ठं—जे. ॥
११६	३	०मणगारं—जे. ॥
११८	४	इदानीं नियन्त्रितमाह—'हट्ठेण'—जे. पा. सं. ॥
११८	१४	अतिशय तरतमपाविति तरप् महo सं. ॥
११६	१३	ब्रव्यैर्यद् —पा. ॥

पृ.	प.	
११६	१४	द्वितीया दन्तिरेव—सं. ॥
१२०	२	०देकत्रिंशता—पा. ॥
१२०	२	०सप्तविंशत्या—पा. ॥
१२०	७	इति इमपि—जे. ॥
१२१	७	छोटयामीत्यादि—पा. ॥
१२२	१३	अत्र भीमसेनन्यायेन—पा. सं. ॥
१२२	१६	एकस्थानविषये च तथा—पा. जे. सं. सि. ॥
१२३	१	आचामाम्लं० सं. । (एवमग्रेऽपि आचाम्ल-स्थाने पाठः (आचामाम्ल' इति सं. प्रतौ विद्यते)
१२३	१	तथा चरमे चरमविषये तथा—जे. पा सं.सि.॥
१२४	२	नन्वत्र – जे. पा. ॥
१२४	१०	०मानकालं – स. योगशास्त्रवृत्तौ (प. २५१ A) च ॥
१२४	११	सूरे उग्गए—पा. सं ॥
१२५	१६	न पूर्णा पौरुषीति तु ज्ञाते भु० जे. सं. ॥
१२६	८	समाधिमरणे—सं. ॥
१२६	१४	'महत्तरागारेणं' ति-पा. सं. ॥
१२७	८	अगारेण—जे. ॥
१२७	१०	प्रवचनात्माद्यु० पा. सं. ॥

पृ	प.	
१२७	१३	प्रतीक्षतेऽथ स्थिर० जे. पा. सं. ॥ योगशास्त्रवृत्तौ (प. २५४ A) च ॥
१२७	१४	गृहस्थस्य तु येन पा. सं. । योगशास्त्रवृत्तौ (प. २५४ A) च ॥
१२८	३	पारिट्ठावणिया० जे. ॥
१२८	४	तदेवाकारः पारिष्ठापनिकाकारस्तस्मा० पा. सं योगशास्त्रवृत्तौ (प.२५४ A) च ॥
१२८	१०	लेवालेवेणं उक्खित्तविवेगेणं गिहि-संसट्ठेणं पारि० जे. पा. ॥
१२९	३	यत्तूत्क्षेप्तुं न शक्यते—स. । योगशास्त्र-वृत्तौ (प. २५४ B) च ॥
१३२	४	विकृतिके – पा. ॥
१३२	१२	दिमच् दिमचि – पा. मि. सं. ॥
१३२	१३	दिमचि—पा. ॥
१३३	८	भेदा दृश्यंते—पा. सि. ॥
१३३	१०	०कल्पना ज्यायसीति—जे. पा. सि. सं. ॥
१३४	४	महुगुलविगई–जे. ॥
१३४	९	०कुल्लुरिका० पा. ॥
१३४	१०	'पाण'मित्यादि–सं. ॥

पृ.	प.	
१३५	१	०दन्तपवनादि—पा. पञ्चाशकवृत्तौ (५।२६) च ॥
१३५	२	०दक्षोटवाइमादि० जे. पा. वि. ॥
१३५	५	०पवन–जे पा पञ्चाशकवृत्तौ(५।३०) च
१३५	५	०पूगफलादिरूप–जे. पा. स. ॥
१३५	६	पिण्डार्थकः—पा. सं. वि. पञ्चाशकवृत्तौ (५/३०) च ॥
१३५	१२	०प्येतैः कारणैः सुविशुद्धं—जे. ॥
१३७	४	०ज्ञात्रस्य गीतार्थस्य गुरोः—पा. सं. धर्मसंग्रहवृत्युद्धृतपाठश्च (भा. १। प. १२५)
१३७	४	रागादिरहितः–जे. पा. धर्मसंग्रहवृत्युद्धृत-पाठश्च (भा. १। प. १२५) ॥
१३७	५	लघुतरशब्दो गुरु० पा. सं. धर्मसंग्रहो-द्धृतपाठश्च (भा १।प. १२५) ॥
१३९	३	तंलमेव गुडमद्य गुडश्च—पा. ॥
१३९	६	छगलिकानां—पा. सं. ॥
१४०	४	मांसत्रैविध्य मासं चर्म जे. सि. ॥
१४०	५	मांस सशोणितं चर्म शोणितं चेति–पा. ॥
१४१	२	चटितं फाणितं भवति–पा. ॥
१४२	६	धर्मतस्स—जे. ॥
१४३	२	मांसचर्मशोणित० जे. पा. ॥

पृ.	प.	
१४४	१३	केषाञ्चित् किमपि—जे. पा. सं. ॥
१४५	७	दुग्धाटी—पा. ॥
१४६	४	तिल्लमलो—जे. ॥
१४९	१०	लोढा—जे. ॥
१४९	१३	विरुहा तह टक्क० जे ॥
१५२	६	गृहाद्यानीतं—जे. पा. ॥
१५२	१०	तत् मूला० जे. ॥
१५६	१	ऊद्धिका—बाह्योद्धि . रोद्धि—जे. ॥ उद्धिका बाह्योद्धि .. रोद्धि...सि. ॥
१५६	३	०द्धिकादोषो--जे.। ०द्धिकादोषो—सि. ॥
१५६	५	शकटोद्धि०–जे. । शकटोद्धि० सि. ॥
१६५	१३	सक्कूडगाइणं—सं. । संकुरुडमा० वि.सि.। सकुरुडडमाईणा—त्रि.॥
१६१	७	तथा चौरसंभ्रमे राजसंभ्रमे--पा. सं. योग-शास्त्रवृत्तौ च ३।१२४, प. २१५ ॥
१६४	१५	रिक्तो: द्विषो:—जे. ॥
२०६	८	०वृत्यद्रव्योपयोगो—सि. ॥
३२६	११	पात्रं प्रतिग्रहः सि.। पात्रं पतद्ग्रहः—सि. पाठा. ॥
३४५	४	अध्यात्मे—सि. ॥

❀ सम्पादनोपयुक्तग्रन्थसूचिः ❀

अभिधान चिन्तामणिः
आख्यानकमणिकोषः (नेमिचन्द्रसूरिकृतवृत्तियुतः, प्र. प्राकृत ग्रन्थ परिषद् वि. सं. २०१८)
आवश्यकचूर्णिः (प्र.ऋषभदेव केशरीमल वि.सं.१९८४)
आवश्यक टिप्पनकम्
आव. हा. टी. [1]आवश्यकसूत्रम् (आवश्यकनिर्युक्ति-हरिभद्रसूरिकृतवृत्तियुतम्, आगमोदयसमिति वि. सं. १९७२-३)
आव. मलय. आवश्यकसूत्रम् (मलयगिरिसूरिविवरणयुतम्, प्र. आगमोदयसमिति वि. सं १९८४-९२)
अभिधानराजेन्द्रः
उत्तराध्ययनसूत्रम् (शान्तिसूरिवृत्तियुतम्, प्र. देवचन्द्र लालभाइ वि. स. १९७२-३)
ओघनिर्युक्तिः (द्रोणाचार्यकृतवृत्तियुता, प्र. आगमोदयसमिति, वि. सं. १९७५)
औपपातिकसूत्रम् (अभयदेवसूरिकृतिवृत्तियुतम् प्र. आगमोदयसमिति, ई. स. १९१६)
कर्मग्रन्थः) देवेन्द्रसूरिकृतस्वोपज्ञटीकायुतः, वि. सं. १९९० कर्मग्रन्थ १-४, प्र. जैन आत्मानन्दसभा)
कर्मग्रन्थः (भा. २, कर्मग्रन्थ ५-६, जैनधर्मप्रसारकसभा वि. सं. १९६८)
कर्मप्रकृतिः (मलयगिरिसूरिविरचितटीकायुता प्र० जैन धर्मप्रचारकसभा वि. सं० १९६९)
कर्मप्रकृतिः (यशोविजयजीउपाध्यायकृतटीकायुता प्र. जैन धर्मप्रसारकसभा, वि. सं. १९७३)
कल्पसूत्रम् (संपा. देवेन्द्रमुनि शास्त्री)
खवगसेढी (प्र. भारतीय-प्राच्यतत्त्व-प्रकाशन-समिति पिंडवाडा. वि सं. २०२२)
गुरुगुणषट्त्रिंशत् षट्त्रिंशिका कुलकम् (कर्ता-रत्नशेखरसूरिः, प्र. आत्मानन्द सभा, वि. सं. १९७७)
ग्रन्थानां नूतना सूची(जेसलमेरुदुर्गस्थसङ्ग्रहगतानां सूची प्र. लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर, ई. स. १९७२)
जइ जीयकप्पो (साधुरत्नसूरिवृत्तियुतः, प्र. आगमोद्धारक ग्रन्थमाला, वि. सं. २०२८)
जैन परपरानो इतिहास (प्र.चारित्रस्मारकग्रंथमाला वि. सं. २०१६)

[1] इदं तु ध्येयम् आवश्यकनिर्युक्तिगाथाङ्कानि एतद्संस्करणानुसारेण दत्तानि ॥

जैनसाहित्यका बृहद् इतिहास (भा.४, प्र. पार्श्वनाथ-विद्याश्रम वाराणसी ई.स. १९६८)
जैनेन्द्रसिद्धान्त कोश (प्र. भारतीयज्ञानपीठ वि.सं २०२७-२०३०)
ज्ञाताधर्मकथा
तत्त्वार्थभाष्यम्
तत्त्वार्थसूत्रम् (राजवार्तिकटीकासंयुतम, प्र. भारतीय ज्ञानपीठ)
तत्त्वार्थसूत्रम् (सर्वार्थसिद्धिटीकायुतम् प्र. भारतीयज्ञान-पीठ)
तत्त्वार्थसूत्रम् (सिद्धसेनगणिटीकायुतम्)
तन्दुलवैचारिकम् (वृत्त्यवचूरिसहितम, प्र. देवचन्द्र लालभाई वि.सं. १९७८)
दसकालियसुत्तम् (अगस्त्यसिंहसूरिरचितचूर्णियुतम, प्र. प्राकृतटेक्ष्ट सोसायटी)
दशवैकालिकसूत्रम् (जिनदासगणिरचितचूर्णियुतम, प्र. ऋषभदेव केशरीमल)
दशवैकालिकसूत्रम् (हरिभद्रसूरिरचितवृत्तियुतम, प्र. देवचन्द्र लालभाई)
धातुपारायणम् (प्र. गिरधरनगर जैन संघ अमदावाद)
धर्मबिन्दुप्रकरणम्
धर्मरत्नप्रकरणम् (देवेन्द्रसूरिरचितवृत्तियुतम, बोधा वि.सं.१९९२)
धर्मसङ्ग्रहः (स्वोपज्ञवृत्तियुतः प्र. देवचन्द्र लालभाइ भा. १-२, वि.सं. १९७१-४)
नन्दिसूत्रम् (हरिभद्रसूरिरचितवृत्तियुतम, प्र. प्राकृत टेक्ष्टसोसायटी)
निर्वाणकलिका (संशोधक-मोहनलाल झवेरी, वि. स. १९८२)
निशीथसूत्रम् (भाष्य-चूर्णियुतम, प्र. सन्मतिज्ञानपीठ आगरा वि. सं. २०१४-२०१६)
पञ्चनिर्ग्रन्थी प्रकरणम् (प्र. गांधी मफतलाल झवेरचंद ई. स. १९३४)
पञ्चवस्तुकः (स्वोपज्ञवृत्तियुतः, प्र. देवचन्द्र लालभाइ-वि सं १९८३)
पञ्चसग्रहः (स्वोपज्ञ-मलयगिरिवृत्तियुतः, प्र. मुक्ताबाइ-ज्ञानमन्दिर, वि.स.१९९३)
पञ्चाशकप्रकरणम् (अभयदेवसूरिकृतवृत्तियुतम, प्र. जैनधर्म प्रसारकसभा वि.सं. १९६९)
प्रतिक्रमणप्रबोधटीका (प्र. जैन साहित्य विकास मण्डल)
प्रवचनसारः (कुन्दकुन्दाचार्यरचितः)

श्री प्रशस्तिसङ्ग्रहः (प्र. देशविरति धर्माराधक समाज, वि.सं. १९९३)

प्रशमरतिप्रकरणम्

पिण्डनिर्युक्तिः (मलयगिरिसूरिरचितटीकायुता, प्र. देवचन्द्र लालभाई वि.सं. १९७४)

पिण्डविशुद्धिः (वृत्तियुता-प्र. आ. श्रीमद्विजयदानसूरीश्वरजी जैन ग्रन्थमाला वि.सं. १९९५)

बृहत्कल्पसूत्रम् (निर्युक्ति-भाष्य-वृत्तियुतम्, प्र. जैन आत्मानन्दसभा वि.सं. १९८९-९८)

बृहत्सङ्ग्रहणी (जिनभद्रक्षमाश्रमणकृता मलयगिरिसूरिटीकायुता, प्र. जैन आत्मानन्दसभा वि. सं.१९७३)

बृहत्सङ्ग्रहणी (चन्द्रमहर्षिप्रणिता)

भगवतीसूत्रम् (अभयदेवसूरिवृत्तियुतम्, प्र. आगमोदय समिति, वि.सं. १९७४ ७७)

योगशास्त्रम् (स्वोपज्ञवृत्तियुतम्, सम्पादक-जम्बूविजयजी, प्र. जैनसाहित्यविकासमण्डल, वि.सं. २०३२)

योगशास्त्रम् (स्वोपज्ञवृत्तियुतम्, प्र. जैनधर्मप्रसारकसभा-वि. सं. १९८२)

लोकप्रकाशः

विचारसारः

विषमपदार्थावबोधः (प्रवचसारोद्धारस्य टिप्पनकम्)

व्यवहारसूत्रम् (भाष्य-वृत्तियुतम्, प्र. वकिल त्रिकमलाल उगरचन्द्र अमदावाद, वि.सं. १९८४)

श्राद्धविधिः (स्वोपज्ञवृत्तियुता, प्र. जैन आत्मानन्द सभा वि.सं. १९७४)

सप्ततिशतस्थानप्रकरणम् (प्र. जैन आत्मानन्दसभा वि.सं. १९७५)

समवायाङ्गसूत्रम् (अभयदेवसूरिकृतटीकायुतम्, आगमोदयसमिति)

सम्बोधप्रकरणम्

सिद्धप्राभृतम् (सटीकम्, प्र. जैन आत्मानन्दसभा, वि.सं १९७७)

सिद्धहेमव्याकरणम् (बृहद्वृत्तियुतम. लघुवृत्तियुतम्)

स्थानाङ्गसूत्रम् (अभयदेवसूरिकृतटीकायुतम्, आगमोदयसमिति, वि.सं. १९७५-६)

卐

शुद्धिपत्रकम्

पृष्ठ	पङ्क्ति	
१	११	०कायमकवद्
३	१	०न्वोरन्
३	२	०प्रवृत्तौ
३	४	नमिऊण
३	९	०पूरणं
३	१०	क्षोवं
५	१	पदुतरोज्जम्म०
७	२	तेसिं
८	११	सूरिगुणा
९	८	अहिओ
११	६	उसिणस्स
११	१०	मेया
११	११	सन्नाओ
११	११	चउरो
१४	५	कम्माइं
१५	३	पावठाणगाइंपि
१५	७	०जोए
१६	५	०वुड्ढि०
१७	६	०वताशेला०
१७	५	चित्तस्य
१८	४	आइम
२१	३	०द्व्युत्तर०
२२	५	'अहालंद'त्ति
२२	९	वन्दनकानां
२३	२	सहस्रो०
२३	११	निर्ग्रन्थत्व
२५	८	उष्णं
२७	१५	नरकादुद्धृतानां
२७	१६	उद्वर्तमानानामे० (पा०)
३०	२	योगाश्च पञ्चवश
३०	१०	भङ्गा—भेदा
३०	११	त्रिपञ्चाशत्तम० (पा.)
३४	२	पुप्फक्खयत्थुईहि
३४	४	०लंबणओ

इदं तु ध्येयम्—येऽशुद्धयः देवचन्द्र-लालभाई संस्करणेऽपि आसन् तेषां संशोधनार्थमुपयुक्तप्रतीनां निर्देश ईदृशो ( ) कोषके दत्तोऽस्ति ॥

पृष्ठ	पं.	
३५	१०	राजादि०
३५	१२	०वचनात्
३६	६	०चिह्नानि
३६	१०	चिह्नानि०
३६	१४	निसीहितिगं (जे.)
३७	५	कर्तव्यः
३७	६	०सम्मुखं
३७	१६	सयाग-(त्रि. पञ्चाशके[४।१६]. धर्मसङ्ग्रहे[मा.२।प. १३०] च)
३८	१	सर्वौषधि०
३९	१	०मालिङ्ग्य
४०	५	०प्रतिहतं
४१	१	०शुक्ति०
४१	६	श्रीजिन ! प्रसाद०
४३	११	अस्या एव
४४	७	कश्चिद्विशेषः
४५	१२	सम्पद्
४८	४	पंचेव
४९	५	३ख्य
५०	४	०कर्तव्या०
५१	२	षष्ठे

पृष्ठ	पं.	
५१	५	०विशिष्टाष्ट०
५१	९	०स्थापित०
५२	१२	तिस्रः
५३	१५	मध्यमा
५४	७	सुसंवृताङ्गो० (जे.)
५५	६	स्थानानि
५७	१५	'इच्छामि
५८	१२	संफासनमणे
५९	४	जस्स
५९	७	०स्थापना०
६२	५	०युक्तस्तवा
६२	१२	उत्सर्पति
६३	३	कायव्वं
६५	१६	किंचिच्छुभए
६६	५	पडिबद्धो
६६	६	०गिहिसंकि०
६८	१	०थू दुर्बाधस्थामे
६८	३	ततश्चैते०
६९	३	ता—
७०	९	कुलाद्याजीवी
७०	१२	०नादिकं

पृष्ठ	पं.	
७२	३	गृहिसंक्लिष्टः
७२	८	सूत्रादुद्धर्व०
७२	१२	विकल्पित
७३	८	स्वमनो०
७४	६	क्रोधनिद्रा०
७६	६	०पुञ्ज०
७७	१०	तत्स्वरूपं
७६	८	अप्राप्नुवन्
८३	५	तज्जाय
८४	१३	नेहवज्जियं
८५	११	सेज्जं
८६	७	सहोच्चारभूमि ग०
८७	३	शातना०
८७	१३	आशातनाया यद् विवरणं (पा. सं.)
८८	१५	१४१
९१	६	बत्तीसं
९२	७	तंजितव
९३	१	तव्विवरीयं
९४	६	धमधमंतो

पृष्ठ	पं.	
९४	१३	वंदई
९६	१०	तावतांशेन
९८	७	निर्यूहणं (जे.)
१०२	१५	०मापृच्छ्यैव
१०५	४	दंसण०
१०७	३	वंदण
१०८	१३	राओ
१११	६	पक्खंमि
११२	१३	चाष्टोच्छ्वा० (जे.)
११४	५	०मणुव्रतानि (सं.)
११५	७	अणागयं
११६	११	०थिबुग०
११७	४	रूपमिदं
११६	९	नाऽऽसाद्यते
१२०	५	मोदन—(सं.)
१२२	१५	पौरुषीविषये
१२३	१४	दण्डक०
१२४	४	०सत्यमन्दा० (जे.पा. सं.)
१२५	५	व्युत्सृजति

पृष्ठ	पं.	
१२५	१०	द्वितोया
१२६	७	०तुरस्य
१२६	८	मरणे
१२७	१३	स्थिरस्तदा
१२८	१	गुरोरभ्यु० (जे. पा.)
१२८	१०	लेवा वेणं उक्खित्तविवेगेणं गिहत्थसंसट्ठेणं सं.)
१३०	१४	आदित्योद्गमान्तं ज्ञेयं—पा.सं. योग.वृत्तौ २५५ B च)
१३१	२	द्वयस्यापरि० (जे. सं योगवृत्तौ प. २५५ च)
१३१	१६	०परिमाणप्रत्या० (जे. सं. योग. वृ प. २५० A च)
१३३	१२	संडग०
१३४	१३	०द्राक्षाचिञ्चिणिका० (सं.)
१३७	२	चैत्य०
१४०	१७	अयोग०
१४२	११	श्रुत्वा य
१४३	३	भृतायां
१४४	११	स्यादि द्रव्यैः—कलम० (जे.पा.)
१४६	२	०विशेषः

पृष्ठ	पं.	
१४६	८	तुच्छफलं
१५३	१४	(३।४२)
१५९	१२	सोसंमि
१६५	१४	विक्रयात् कणानां
१७६	९	संलीणया
१८६	५	कत्थय
१९८	१५	यात्च तथा-जे.
१९९	१४	सङ्घा०
२००	१५	३५५
२०२	८	पञ्चातिचाराः
२०६	३	दुष्पक्वा०
२०६	६	पिष्टत्वा०
२०६	१५	२ मद्यादयभिस्पन्दि०
२०७	६	कुङ्कुम
२०८	६	प्रवृत्तौ
२१४	५	०खण्ड-घृत०
२१६	७	वार्तमानिक-भवि०
२१८	१३	२-३ आगमेस्सेण-मु. । आग०
२३२	२	तथा
२४०	४	षड्भिः

पृष्ठ	पं.	
२४७	१	अट्ठेव
२५४	५	श्यामवर्णः
२५६	२	निर्वाण०
२७०	३	तदनन्तरं
२७२	१०	अर्धाष्टम०
२७४	७	धणूणि
२८६	१६	०सङ्ग्रहवृत्तौ
२८८	१४	सं. ॥ २ बालानां
२९१	१२	०विलुप्यमान०
२९६	९	गंधोवयस्स
२९६	९	पंचवन्नाणं
२९७	१०	शबराश्चापि
२९९	३	पश्चापि
३०१	१	०विज्ञेयानीति
३०४	१४	सव्वाणुभूइ०
३०५	९	पनरसमं
३०५	१४	०वंदे
३०९	१०	संखाउ०
३११	१३	कालं
३१६	१३	सिद्धो
३२०	२	भवगत०
३२३	१२	सिद्धिरूपता
३२६	१३	तदुपसंदर्श०
३३०	४	गंठिमि
३३२	९	हुवंति
३३४	२	अतिरिक्ततरं
३३७	४	प्रदक्षिणा०
३४१	४	दव्वग्गहणं
३४१	१६	बाऽनयो०
३४२	१३	०परिभोग
३५१	५	खंधगरणो
३७१	१५	देवेन्द्र०
३७६	१४	परसमयवित्
३८१	पार्श्वभागे	प्र. आ. १३२
३८३	५	हुवंति
३६४	६	पिण्डविशुद्धि०
३६८	१५	०मानाघाकर्मावियवसंमि०
४२२	१०	सम्यक्कुर्वन्

पृष्ठ	पं.	
४३०	६	तद्व्यापारेण
४४०	७	बहिःक्षेपणे
४४१	७	[illegible]
४४३	६	चनकादीन्
४५३	१	दगमट्टीयं
४६३	२	सत्पुरुष
४६५	५	०दीप्तिभिः
४६५	६	सर्वार्थसिद्धाद्
४६८	६	संचलइ
४७७	६	०पुततयोपविष्टः
४८७	४	विणिहट्ठा
४८८	८	नंदिसर
४८८	१३	बीउ
४९०	७	पादोत्क्षेप०
४९२	११	परिहरणं
४९८	१५	पूर्वाधीतं
५०१	१२	नापनयति
५०४	५	चेत्तु
५०६	२	षड्भि०

पृष्ठ	पं.	
५०६	४	ग्रामेषु
५०८	३	कल्पं
५०८	५	गृहणन्ति
५१६	१	सवेगसमु०
५१६	३	०प्रवीणाः
५१७	१२	०मभावे
५२९	१३	०ननुवृत्तयः
५३७	३	परिग्रह०
५३८	५	पंचविदेहेसुं
५४३	पार्श्वभागे	अस्थितकल्पः
५४४	११	विदंडओ
५५५	१०	०पणगं
५६०	८	[illegible]इह
५६२	१३	जिणंमि
५७०	६	सत्कारपुरस्कारपरिषह
५७०	१४	बावीसं
५७०	१४	लुप्तनिर्वि०
५७२	१२	संथारे
५७५	पार्श्वभागे	क्षपकश्रेणिः

पृष्ठ	पं.	
५७७	१२	षोडशापि
५७७	१६	प्रकृतिरपि
५८०	२	अस्यां
५८१	७	प्राक्षप्रत्वात्
५८६	५	पसमंतो
५८६	५	संखेयलोहखंडाइं
५८८	११	०कालमानां
५८६	१३	तत्राद्ययो०
५८६	१५	वेदयते च
५६०	१७	उपशमना
५९७	५	अधिकरण०
६०७	१२	०कोटय
६०७	१३	दृश्यते

पृष्ठ	पं.	
६०९	५	पंच
६०६	७	गंथो
६१३	१३	लङ्घ्या
६२१	८	संजमट्ठाए
६३०	१५	०वीहीण०
६३२	२	०गृहपङ्क्तौ
६	१७	वृत्तिर्मिता०
८	४	गृहीतम्
९	१३	पं०
१२	५	०विशारदै०
१३	१६	दैवसिकप्रति०
१३	१७	प्राभातिक०

पृ.	पं.	शुद्धपाठः
६	१७	निर्मिता
८	×	गृहीतम्
९	१३	पं
१०	५	विशारदै
४	६	h विशेष्य
५	९	जन्म
१५	३	गाईपि
१६	५	वुडिढ
१८	४	आइम
२१	३	दुव्युत्तर
२२	५	अहालंद
२२	६	वन्दन
२३	२	सहस्रो
२३	११	निर्ग्रन्थ
२५	८	इच्छं
२७	१३	परमा
२७	१५	दुष्कृतानां
२७	१६	मानानामे
३०	१०	भङ्गा-भेदा

पृ	पं.	शुद्धपाठः
३०	११	त्रिपञ्चाशत्तम
३५	८	व्याख्या
३५	१०	राजादि
३५	१२	वचनात्
३६	६	चिह्नानि
३६	१०	चिह्नानि
३७	५	कर्त्तव्याः
३७	६	सम्मुख
३७	१६	सया णं
३८	१	सर्वो
४०	५	प्रतिहतं
४१	६	श्रीजिन ! प्रसाद
४४	७	कश्चिद्विशेषः
४८	४	पंचेव
४९	५	द्रव्यं
४७	१६	अट्ठावीसे
५०	४	कर्तृणा
५१	२	षष्ठे
५१	५	विशिष्टाष्ट

पृ.	पं.	शुद्धपाठः
५१	६	स्थापित
५३	१५	मध्यमा
५४	७	सुसंवृताङ्गो
५५	६	स्थानानि
५७	१५	इच्छामि
५८	१२	संफासनमणे
५९	४	जत्त
५९	७	स्थापना
६०	६	क्षमणा
६२	५	युक्तस्तदा
६२	१५	उत्सर्पति
६३	३	कायव्वं
६५	१५	किंचिच्छुभए
६६	५	पडिबद्धो
६६	६	गिहिसंकिलिट्ठो
६८	१	ऋ्ध्वा
६९	३	सा-
७०	१२	नादिकं
७२	३	गृहिसंक्लिष्टः

पृ.	पं.	शुद्धपाठः
७५	८	दुर्द्ध्वमुत्तीर्णं
७२	१२	विकल्पितं
७३	८	स्वमनी
७४	६	क्रोधनिद्रा
७६	१	पुञ्ज
७७	१०	तत्स्वरूपं
७१	८	अप्राप्नुवन्
८३	५	तज्जाय
८४	१३	वज्जियं
८५	११	सेज्जं
८७	३	शातना
८७	१३	आशातनाया यद् विव
८८	१५	१४१
९१	६	बत्तीसं
९३	१	तच्चिवरीयं
९४	६	घमघर्मतो
९४	१३	बंधई
९६	१०	तावतांशेन
९८	७	निर्यूहणं

पृ.	पं.	शुद्धपाठः
१०२	१५	मापृच्छ्यैव
१०५	४	दंसण
१०७	३	वंदण
१०८	१३	राओ
१११	९	पक्खंमि
११२	१३	चाष्टोच्छ्वास
११४	५	मणव्रतानि
११५	७	अणागयं
११६	११	थिबुग
११७	४	रूपमिदं
११९	९	नाऽऽसाद्यते
१२०	५	मोदन
१२२	१५	पौरुषी
१२३	१४	दण्डक
१२४	४	सत्यमन्दा
१२५	५	व्युत्सृजति
१२८	१	गुरोरभ्यु
१२८	१०	[2]गिहिसंसट्ठेणं [1]उक्खित्त विवेगेणं

पृ.	पं.	शुद्धपाठः
१३०	१४	आदित्योद्गमन्तं
१३१	२	द्वयस्याऽपरि
१३१	१६	परिमाणप्रत्या
१३३	३	मंडग
१३४	१३	द्राक्षाचिञ्चिणिका
१३७	३	चैत्य
१४०	३	अयोग०
१४२	११	श्रुत्वा
१४३	३	भृतायां
१४४	११	स्यादि द्रव्यैः--कलम
१४६	२	विशेषः
१५३	८	तुच्छफलं
१५९	१२	'सीसंमि'
१६५	१४	कणानां
१७६	९	संलीणया
१८६	५	कत्थय
१९८	१५	दाऊण
२००	१५	॥१५५॥
२०२	८	पञ्चातिचाराः

पृ.	पं.	शुद्धपाठः
२०६	३	दुष्पक्वा०
२०६	६	पिष्ट०
२०६	१५	मध्वाद्यभिष्यन्दि०
२०७	६	कुङ्कुम
२१८	१४	२ आगमेस्से०
२१८	१५	३ आगमस्से०
२३२	२	तथा
२४०	४	षड्भिः
२४७	१	अट्ठेव
२५४	५	श्यामवर्णः
२५९	२	निर्वाणकलिका०
२७०	३	तदनन्तरं
२७२	१०	अर्धाष्टम०
२७४	७	धणूणि
२८६	१६	धर्मसङ्ग्रहवृत्तौ
२८८	१४	वालानां
२९१	१२	किरणावलिवलु०
२९७	१०	शबराश्चापि
२९९	३	पञ्चापि
३०१	१	सर्वज्ञविज्ञेयानि
३०४	१४	सत्त्वाणुभूइ
३०५	१४	विजयमभिवंदे
३०९	१०	संखाउय०
३१९	१३	कालं
३१९	१३	सिद्धो
३२०	२	भगवत०
३२३	१२	सिद्धिगकता
३२५	१३	पञ्चविहोऽपि
३२९	१३	तद्रूपसं०
३३०	४	गंठिमि
३३२	९	हवंति
३३३	७	चाङ्गुलानि
३३३	१३	जं
३३४	२	अतिरिक्ततरं
३३७	४	प्रदक्षिणा०
३४१	४	दव्वगहणं
३४१	१६	वाऽनयो०
३४२	१३	०परिभोगो

पृ.	पं.	शुद्धपाठः
३५१	५	खंधगरणी
३७९	१४	परसमयवित
३८१ हांसिया में		१४वीं पंक्ति- १३२
३८३	५	हवंति
३९४	९	पिण्डविशुद्धि०
३९८	१५	संमिश्र०
४०२	१०	सम्यक्कुर्वन्
४३०	६	तद्व्यापारणेन
४४०	७	बहिः क्षपणे
४४१	७	दधाति
४४३	६	चनकादीन्
४५३	१	दगमट्टियं
४६५	५	०द भिभिः
४६५	६	सर्वार्थसिद्धाद्
४६८	६	संचलइ
४७७	६	पुततयो०
४८७	४	विणिहिट्ठा
४९०	७	पादोत्क्षेप
४९२	११	परिहरणं

पृ.	पं.	शुद्धपाठः
५०१	१२	नापनयति
५०४	५	चेत्तुं
५०६	२	षड्भि०
५०६	४	ग्रामेषु
५०८	५	गृह्णन्ति
५१६	१	संवेगसमु०
५१६	३	प्रमाणप्रवीणाः
५१७	१२	०मभावे०
५२६	१३	०नुवृत्तयः
५३७	३	परिग्रह
५४१-हांसियामें पंक्ति-२ अस्थितकल्प		
५४४	११	मासाव०
५४५	१२	मध्यम०
५५५	१०	तणपणगं
५६०	८	*इह
५६२	१३	जिणंमि
५७०	६	सत्कार पुरस्कारप०
५७०	१४	बावीसं
५७५ हांसियामे ३ पंक्ति-श्रेणि-		

पृ	पं.	शुद्धपाठः
५७१	१२	षोडशापि
५७७	१६	प्रकृतिरपि
५८३	५	पसमंतो
५८६	५	संखेयलोह
५८६	५	खंडादुं
५८१	१३	तत्राश्रयो०
५८१	१५	वेदयते

पृ.	पं.	शुद्धपाठः
६०७	१३	दृश्यते
६०९	५	पंच
६०९	७	गंथो
६१३	१३	लब्ध्या युतो
६३०	१५	०यरियावीहीण०
६३२	९	०स्थितगृह०



प्रकाशकीय

अनंत उपकारी ज्ञानी भगवंतोओ मानव जन्मनी जे महत्ता बतावी छे तेनुं मुख्य कारण आ मनुष्यजन्ममां ज सम्यग्दर्शन ज्ञान-चारित्रनी आराधना सविशेषपणे शक्य छे. ते छे 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' तथा 'ज्ञानक्रियाभ्यां मोक्षः' आदि सूत्रो द्वारा सम्यग्ज्ञाननुं महत्त्व पण शास्त्रोमां स्थाने स्थाने बतावायुं आवेल छे शास्त्रग्रन्थोना आ रहस्यामृतनुं आकंठपान करनार स्व० परमपूज्य परमोपकारी सिद्धांतमहोदधि कर्मसाहित्य-निष्णात आचार्यदेव श्रीमद् विजय प्रेमसूरीश्वरजी महाराजानी परमकृपादृष्टिथी अने तेओश्रीनी ज परम-पावनमयी निश्रामां मूलग्रंथ-प्राकृतभाषामां अने विवेचनग्रंथ-संस्कृतभाषामां लाखो श्लोक प्रमाण कर्मसाहित्यनुं निर्माण थइ चुक्युं छे अने हजी पण आगल सर्जन चालु छे. जेना १४ महाग्रंथ अमारी संस्था द्वारा प्रगट कर्या छे. ते सिवाय पण बंधशतकम्, प्राचीन चत्वारः कर्मग्रंथाः, नव्यकर्मग्रंथा, सूक्ष्मार्थविचारसारप्रकरण, स्याद्वादरहस्य, उपमितिभवप्रपंचाकथा-भाग २, शतार्थवीथो, वादमाला वगेरे प्राचीन अप्रगट अप्राप्य होय तेवा ग्रन्थो पण प्रकाशित कर्या छे. आ ग्रन्थ पण अमारी संस्था द्वारा प्रकाशीत करता आनंद थाय छे.

आ दरेकना प्राणभूत पू. स्वर्गीय आचार्यदेवेश विजय प्रेमसूरीश्वरजी महाराज साहेब छे. तेओनो अमारा उपर अत्यंत उपकार छे जे कदी पण भूली शकाय तेम नथी. तेथी तेओश्रीना अत्यंत ऋणी छीओ.

आ ग्रन्थरत्ननां प्रकाशन माटे अमने पू० वर्धमानतपोनिधि प्रभावक प्रवचनकार पू० आचार्यदेव श्री विजय भुवनभानुसूरीश्वरजी महाराजना प्रशिष्यरत्न जिनागमतत्त्वविद् पंन्यासप्रवर श्री जयघोषविजयजी महाराजे प्रोत्साहित करवा साथे संपादन माटे पू. आचार्यदेव श्री विजय भुवनभानुसूरीश्वरजी महाराजना शिष्यरत्न मुनिश्री पद्मसेनविजयजी महाराजने तथा स्व० युगमहर्षि पू. आचार्यदेव श्री विजयभद्रसूरीश्वरजी

म. ना शिष्यरत्न मुनिराज श्री जिनचंद्रविजयजी म. ना विनेय शिष्यरत्न मुनिश्री मुनिचंद्र विजयजी महाराजने प्रेरणा करी. ते बन्ने संपादक मुनिवर्योए पू. आ. श्री भुवनभानुसूरीश्वरजी म. तथा पू. आ. श्री ओंकारसूरीश्वरजी म. ना आशीर्वादथी आ कार्य उपाडी लीधुं. एना फलस्वरुपे आजे आ ग्रन्थ तमारी समक्ष मूकी रह्या छीए। तेथी ते बन्ने पू. आचार्यभगवंतो तथा संपादकमुनिराजोना उपकारना पण अमे ऋणी छीओ.

प्रस्तुत ग्रंथरत्नना संपूर्ण मुद्रणव्ययअंगे श्री श्रीपालनगर जैन संघ ज्ञाननिधि (मुंबई) तरफथी श्रुतभक्तिनो लाभ लीधेल छे तेथी संघना ट्रस्टीगणनो पण अमे आभार मानीए छीए. तथा ज्ञानोदय प्रिन्टिंग प्रेस, पिंडवाडाना व्यवस्थापक श्री विजयराजजी मोदी (बी. ए. बी. एड) तथा श्री शंकरदासजी आदि कर्मचारिगणनो सहयोग पण प्रशंसनीय छे. प्रत्यक्ष या परोक्षरीते प्रकाशनमां सहाय करी होय ते बधा प्रत्ये कृतज्ञता दर्शावीए छीओ.

अंतमां टुंक समयमां बीजा नवा ग्रंथोना प्रकाशननी आशामां आपना सेवको—

(१) शेठ रमणलाल दलसुखभाई (प्रमुख) खंभात
(२) शेठ माणेकलाल चुनीलाल मुम्बई
(३) शा. खूबचंद अचलदासजी पिंडवाडा
(४) शा. समरथमल रायचंदजी (मंत्री) पिंडवाडा
(५) शा. लालचंद छगनलालजी (मंत्री) पिंडवाडा
(६) शेठ रमणलाल वजेचन्द (मंत्री) अहमदाबाद
(७) शा. हिम्मतमल रुगनाथजी बेडा
(८) शेठ जेठालाल चुनीलाल घीवाला मुम्बई

—भारतीय-प्राच्य-तत्त्व प्रकाशन समिति

॥ श्री जिनाय नमः ॥

श्रीमद्देवभद्रान्वयविच्छ्रीमत्सिद्धसेनसूरिसूत्रितटीकाविभूषितः

श्रीमन्नेमिचन्द्रसूरिप्रवरविनिर्मितः

❀ प्रवचनसारोद्धारः ❀

(ग्रन्थकृन्मङ्गलं)

नमिऊण जुगाइजिणं वोच्छं भव्वाण जाणणनिमित्तं ।
पवयणसारुद्धारं गुरूवएसा समासेणं ॥ १ ॥

(टीकाकृन्मङ्गलं)

सप्तद्वैरपि यत्तमोभिरखिलैर्न स्पृश्यते कुत्रचिच्छश्वत्कालकलाभिरप्यनुकलं यन्नीयते न क्षयम् ।
तेजोभिः स्फुरितैः परैरपि हठादाक्रम्यते यन्न तज्जैनं सर्वजगत्प्रकाशनपटु ज्योतिः परं नन्दतु ॥ १ ॥
यो ध्यानेन निमूलकाषमकषद् द्वेषादिविद्वेषिणो, यस्त्रैलोक्यविलोकनैकरसिकं ज्योतिः किमप्यातनोत् ।
यः सद्भूतमशेषमर्थमवदत् दुर्वादिविध्वंसकृद्देवार्च्यः शिवतातिरस्तु स विभुः श्रीवर्धमानः सताम् ॥ २ ॥
स्वगुरूणामादेशं चिन्तामणिसोदरं समासाद्य । श्रेयस्कृते करोमि प्रवचनसारस्य वृत्तिमिमाम् ॥ ३ ॥

इह हि शिष्टाः क्वचिदभीष्टे शास्त्रप्रकरणादिवस्तुनि प्रवर्तमानाः श्रेयस्काम्यया विशिष्टाभीष्टदेवतानमस्कारपुरस्कारेणैव प्रवर्तन्ते, स च यद्यपि कायमनोभ्यामपि क्रियमाणो निखिलविघ्नविनाशकत्वेन प्रारिप्सितशास्त्रप्रकरणादिपरिसमाप्तये सम्पनीपद्यते तथापि शास्त्रादौ श्रोतारः सर्वेऽपि शास्त्रादिश्रवणरसिकान्तःकरणाः सकलविघ्नसङ्घातविधातनिमित्तमवश्यमभिमतदेवतास्तवाभिधानपूर्वमेव प्रवर्तन्तामिति श्रोतृणामभीष्टदेवतास्तवविषयमनीपोन्मेषपरिग्रहार्थमादाविष्टदेवतास्तवोऽभिधेयः, तथा यत्किमपि शास्त्रं प्रकरणादि वा कर्तुमिष्यते तत्रावश्यमादौ प्रेक्षावतां प्रवृत्त्यर्थमभिधेयमभिधातव्यं इतरथा किमत्र शास्त्रे प्रकरणादौ वाऽभिधेयमिति संशयाना न तत्र ते प्रवर्तेरन् , वदेयुश्च यथा–नाऽऽरब्धव्यमिदं शास्त्रं प्रकरणादि वा अभिधेयशून्यत्वात् काकदन्तपरीक्षावदिति, यदाहुः–

"श्रुत्वाऽभिधेयं शास्त्रादौ, पुरुषार्थोपकारकम् । श्रवणादौ प्रवर्तन्ते, तज्जिज्ञासादिनोदिताः ॥१॥
नाऽश्रुत्वा विपरीतं वा, श्रुत्वाऽऽलोचितकारिणः । काकदन्तपरीक्षादौ, प्रवर्तन्ते कदाचन ॥२॥"

इत्यादि, तथा अभिहितेऽप्यभिधेये न प्रयोजनश्रवणमन्तरेण सहृदयास्तदाद्रियन्ते, प्रेक्षावत्ताक्षतिप्रसङ्गात् , यदाहुः–

प्रयोजनमनुद्दिश्य, न मन्दोऽपि प्रवर्तते । एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत् ? ॥१॥"

अभिदध्युश्च ते यथा–नाऽऽरम्भणीयमिदं शास्त्रं प्रयोजनशून्यत्वात्कण्टकशाखामर्दनवदिति, ततः शास्त्रप्रकरणादिप्रारम्भप्रयासनिष्फलताशङ्काशङ्कुसमुद्धरणाय शास्त्रप्रकरणादौ प्रयोजनमपि वक्तव्यं, तथा प्रयोजने दर्शितेऽपि न परम्परया सर्वज्ञमूलताऽवगतिमन्तरेण विविधातीन्द्रियार्थसार्थप्रतिपादके

शास्त्रादौ सुधियः प्रवृत्तिमातन्वीरन् , प्रतिपादयेयुश्च ते यथा–नारम्भणीयमिदं शास्त्रादि सम्बन्धवन्ध्यत्वात् स्वेच्छाविरचितशास्त्रवदिति, ततस्तेषां शास्त्रप्रकरणादिप्रवृत्तौ विशिष्टादरनिमित्तं परम्परयाऽर्हन्मूलनाख्यापनार्थमादौ गुरुपर्वक्रमलक्षणः सम्बन्धोऽपि वक्तव्य इत्यादि परिभाव्य प्रेक्षावतां प्रवृत्त्यर्थं पूर्वप्रयुक्तप्रयोगाणां चासिद्धतादिदोषोद्भावनार्थमिमामादिगाथामाह—**नमिउण०**

अत्र च नरिनृत्यमानमानसवृत्तयः **सौगताः** सङ्किरन्ते–नन्विदं भवतां गेहेनर्दितमिव प्रतिभासते, यतः सर्वमेवेदं भवद्भिः कथ्यमानं शोभते यदि शब्दार्थयोः कश्चित्सम्बन्धो भवेत् , न चासौ विचार्यमाणश्चारिमाणमञ्चति, द्विविधो हि सम्बन्धः–तादात्म्यलक्षणस्तदुत्पत्तिलक्षणश्च, तत्र न तावच्छब्दार्थयोस्तादात्म्यलक्षणः सम्बन्धः, स हि य एवार्थः स एव शब्दो, य एव शब्दः स एवार्थ इत्येवं भवेत् , एवं च मोदकादिशब्दोच्चारणे मोदकादिना मुखपूरणं भवेत् क्षुरिकादिशब्दोच्चारणे च वदनपाटनादिकं सम्पद्येत, ततस्तावदसौ शब्दार्थयोर्न घटामटाट्यते, न तदुत्पत्तिलक्षणोऽपि सम्बन्धः क्षोदं क्षमते, तथाहि–किं शब्दादर्थ उत्पद्यते ? अर्थाद्वा शब्द इति ? तत्र न तावच्छब्दादर्थ उत्पद्यते, घटादयो हि मृदादिभ्य एवोत्पद्यमाना वीक्ष्यन्ते, न शब्दादिति। यदि तु शब्दादपि घटादयो भावा भवेयुस्तदा न मृदादिपरिशीलनक्लेशमनुभवेयुः कुम्भकारादयः। नाप्यर्थाच्छब्दोत्पत्तिः, तालुोष्ठपुटदन्तादिभ्यः पुरुषप्रयत्नसहितेभ्य एव शब्दोत्पत्तिदर्शनात्, ततः शब्दार्थयोस्तादात्म्यतदुत्पत्तिलक्षणसम्बन्धद्वयाभावेनाऽऽदिवाक्यमभिधेयादिसूचकं निरर्थकमेवेति। **तत्र ब्रूमः**–अनभ्युपगतोपालम्भेन कण्ठशोषक्लेशमनुभवद्भिर्भवद्भिरेवमात्मा निरर्थकमेव कदर्थितः, न खल्वस्माभिः शब्दार्थयोस्तादात्म्यतदुत्पत्तिलक्षणः सम्बन्ध इष्यते, किन्तु सर्वस-

हृदयसम्मतो वाच्यवाचकभावलक्षण एव, तत्र च न किञ्चिद्विरुध्यते, यदि च शब्दस्य प्रामाण्यं नाभ्युपगम्यते तदा शब्दप्रामाण्यमूलानामखिलव्यवहाराणामुच्छेदः स्यात्, उक्तं हि—

लौकिकव्यवहारोऽपि, न यस्मिन्नवतिष्ठते । तत्र साधुत्वविज्ञानं, व्यामोहोपनिबन्धनम् ॥ १ ॥

इति, अत्र च बहु वक्तव्यं तत्तु नोच्यते ग्रन्थगौरवभयादिति । तत्र **'नमिऊण'** नत्वा **'युगादिजिनं'** युगं-एतदवसर्पिणीरूपः कालविशेषस्तत्र आदीयत इत्यादिः-प्रथमः स चासौ जिनश्च-रागद्वेषादिदुर्जयारातिजेता तं ऋषभदेवस्वामिनमित्यर्थः, भवति हि प्रौढविशेषणादनुक्तेऽपि विशेष्ये प्रतिपत्तिः, यथा—"ध्यानैकतानमनसो विगतप्रचाराः, पश्यन्ति यं कमपि निर्मलमद्वितीयम्" इत्यत्र ध्यानैकतानमनसो विगतप्रचारा इति प्रौढविशेषणसामर्थ्याद्योगिन इति विशेष्यस्यानुक्तस्यापि प्रतिपत्तिस्तथाऽत्रापि नाभेयदेवस्येति, **'वोच्छं'** वक्ष्ये **'भव्वाणं'** निर्मलनिजगुणनिकरमाहात्म्येन सिद्धिगमनयोग्यानां प्राणिनां **ज्ञाननिमित्तं प्रवचनस्य**-द्वादशाङ्ग्यादिशासनस्य **सारोद्धारं**-प्रधानकतिपयपदार्थोद्धारं **'गुरूपदेशाद्'** गुरुकथनात् **'समासेन'** संक्षेपेणेति गाथापदार्थः । तत्र **'नमिऊण जुगाइजिणं'** इत्यनेन युगादिदेवस्य नमस्कारकरणेन विवक्षितशास्त्रादौ सकलकल्याणमूलं भावमङ्गलं **'वक्ष्ये प्रवचनसारोद्धार'** मित्यनेनाभिधेयं **'भव्यानां ज्ञाननिमित्त'** मित्यनेन प्रयोजनं च प्रत्यपादि, तच्च द्वेधा-प्रकरणकर्तुः श्रोतुश्च, एकैकमपि द्विविधं-अनन्तरं परम्परं च, तत्र प्रकरणकर्तुरनन्तरं प्रयोजनं प्रवचनसारभूतकतिपयपदार्थान् प्रतिपादयतः सत्त्वानुग्रहः, परम्परं तु परमपदावाप्तिः, भव्यसत्त्वानुग्रहप्रवृत्तो हि निरवकरसुखनिकरप्राज्यसाम्राज्यनिसर्गरमणीयरमणीवर्गवैभवोद्भासितस्वर्गप्राप्त्यादिपरम्परया परमपदमवश्यमवाप्नोत्येव, यत उक्तम्—

सर्वज्ञोक्तोपदेशेन, यः सत्त्वानामनुग्रहम् । करोति दुःखतप्तानां, स प्राप्नोत्यचिराच्छिवम् ॥ १ ॥"

श्रोतॄणां पुनरनन्तरप्रयोजनं यथावत्प्रवचनसारभूतकतिपयपदार्थपरिज्ञानं, परम्परप्रयोजनं तु तेषामपि परमपदप्राप्तिरेव, तथाहि–ते यथावद्विज्ञातप्रवचनसारभूतकतिपयपदार्थाः प्रकृत्यसारात्संसाराद्विरज्यन्ते ततः परमपदावाप्तये निःसपत्नं प्रयत्नमाचरन्ति ततो निखिलश्रेयस्कारकं निःश्रेयसमासादयन्ति, यत उक्तम्-"सम्यग्भावपरिज्ञानाद्विरक्ता भवतो जनाः । क्रियाऽऽसक्ता ह्यविघ्नेन, गच्छन्ति परमां गतिम् ॥१॥ इति ।

सम्बन्धस्तु द्विधा–उपायोपेयलक्षणो गुरुपर्वक्रमलक्षणश्च, तत्र प्रथमस्तर्कानुसारिणः प्रति, स चायं–वचनरूपापन्नं शास्त्रमिदमुपायः, उपेयं सम्यगेतच्छास्त्रार्थपरिज्ञानं मुक्तिपदं वा, तस्याप्यतः पारम्पर्येण प्राप्तेः, श्रद्धानुसारिणस्तु प्रति गुरुपर्वक्रमलक्षणसम्बन्धः, तत्क्रमश्चायं–प्रथमं हि घनाघनघनपटल इवातिप्रसारिणि पटुतरोज्जृम्भमाणस्वरकिरणनिकरप्रकाशसङ्काशकमनीयकेवलालोकन्यक्कारिणि घनघातिकर्मनिचये प्रचण्डप्रभञ्जनप्रसारिणेवाध्यामलशुभध्यानेन प्रलयमापादिते निःशेषयथावस्थितजीवाजीवादिपदार्थसार्थावभासिनि निःसपत्ने समुत्पन्ने केवलज्ञानालोके नाकिनगरगुरुतरविशुद्धसमृद्धिसम्भारतिरस्कारकारिण्यामपापायां नगर्यां सकललोकलोचनामन्दानन्दोत्सवकारिनिरुपमप्राकारत्रयोद्भासितसमवसरणमध्यभागव्यवस्थापितविचित्ररत्नखण्डखचितसिंहासनोपविष्टेन विशिष्टमहाप्रातिहार्यादिपरमार्हन्त्यसमृद्धिमहिम्ना भगवता श्रीमन्महावीरेण सुरासुरकिन्नरनरेश्वरनिकरपरिकरितायां परिषदि प्रवचनसारभूताः सर्वेऽपि पदार्था अर्थतो निवेदिताः तदनु प्रवचनाधिपतिना **सुधर्मस्वामिना** त एव सूत्रतो रचिताः **'अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं'** इत्यार्षवचनात्, तदनु **जम्बूस्वामिप्रभव-**

शय्यम्भवयशोभद्रसम्भूतविजयभद्रबाहुस्थूलभद्रमहागिरिसुहस्तिउमास्वातिश्यामार्यप्रभृतिभिः सूरिभिः स्वकीयस्वकीयसूत्रेषु विस्तृततमविस्तृततरविस्तृतेषूपनिबध्यमाना भव्यजनेभ्यश्च प्रकाश्यमाना एतावतीं भूमिकां यावदानीताः, ततस्तेभ्योऽपि सूत्रेभ्य ऐदंयुगीनमन्दमेधसामवबोधाय सङ्क्षिप्यास्मिन् प्रकरणे **'अन्योपकारकरणं धर्माय महोदये च भवतो'** त्यधिगतपरमार्थानामविवादो वादिनामत्रेति परोपकाररसिकान्तःकरणप्राक्कालिकश्रुतधराभिहितश्रुतमनुस्मरता मया समुद्विधन्ते इत्येवं परम्परया सर्वविन्मूलमिदं प्रकरणमर्थमाश्रित्य न पुनर्मया नूतनं किञ्चिदत्र सूत्र्यते इत्यवदातबुद्धीनां भव्यानामिदमुपादेयं भवतीति ॥ इदानीं प्रवचनसारभूता ये विवक्षिता पदार्थास्तेषां षट्सप्तत्यधिकद्विशतीमङ्क्यानि द्वाराणि (२७६) गाथाचतुःषष्ट्या सुखावबोधार्थमुपदिशन्नाह —

चिइवंदण[1] वंदणयं पडिक्कमणं[2] पच्चखाणमुस्सग्गो[3] [4] [5] ।
चउवीससमहियसयं गिहिपडिक्कमाइयाराणं[6] ॥ २ ॥
भरहंमि भूयसंपइभविस्सतित्थंकराण नामाइं ।
एरवयंमिवि ताइं जिणाण संपइभविस्साणं[7] ॥ ३ ॥
उसहाइजिणिंदाणं आइमगणहरपवित्तिणी[8] नामा[9] ।
अरिहंतऽज्जणठाणा[10] जिणजणणीजणयनाम-गई[11] [12] ॥ ४ ॥

उक्किट्ठजहण्णेहिं[13] संखा विहरंततित्थनाहाणं ।
जम्मसमएऽवि[14] संखा उक्किट्ठजहण्णिया तेसिं ॥ ५ ॥
जिणगणहर[15] मुणि[16] समणी[17] वेउव्विय[18] वाइ[19] अवहि[20] केवलिणो[21] ।
मणनाणि[22] चउदसपुव्वि[23] सङ्घ[24] सङ्घाण[25] संखा उ ॥ ६ ॥
जिणजक्खा[26] देवीओ[27] तणुमाणं[28] लंछणाणि[29] वन्ना[30] य ।
वयपरिवारो[31] सव्वाउयं[32] च सिवगमणपरिवारो[33] ॥ ७ ॥
निव्वाणगमणठाणं[34] जिणंतराइं[35] च तित्थवुच्छेओ[36] ।
दस[37] चुलसी[38] वा आसायणाउ[39] तह पाडिहेराइं ॥ ८ ॥
चउतीसाइसयाणं[40] दोसा अट्ठारसारिहचउक्कं[41][42] ।
निक्खमणे[43] नाणंमि[44] य निव्वाणंमि[45] य जिणाणतवो[46] ॥ ९ ॥
भाविजिणेसरजीवा[47] संखा उड्ढाहतिरियसिद्धाणं ।
तह एक्कसमयसिद्धाण[48] ते य पन्नरसभेएहिं[49] ॥ १० ॥

[50]अवगाहणाय सिद्धा उक्किट्ठजहन्नमज्झिमाए य ।
[51]गिहिलिंगअन्नलिंगस्सलिंगसिद्धाण संखा उ ॥ ११ ॥
वीसाईं सिज्झंति अविरयं जाव अट्ठहीयसयं ।
[52]अट्ठसमएहिं एक्केक्कूणं जावेक्कसमयंतं ॥ १२ ॥
थीवेए पुंवेए नपुंसए [53]सिज्झमाणपरिसंखा ।
[54]सिद्धाणं [55]संठाणं अवट्ठिइठाणं च सिद्धाणं ॥ १३ ॥
[56]अवगाहणा य [57]तेसिं [58]उक्कोसा मज्झिमा जहन्ना य ।
[59]नाऊण चउण्हंपि हु सासयजिणनाहपडिमाणं ॥ १४ ॥
[60]उवगरणाणं संखा जिणाण थविराण [61]साहुणीणं [62]च ।
[63]जिणकप्पियाण संखा उक्किट्ठा एगवसहीए ॥ १५ ॥
छत्तीसं [64]सूरिगुणा विणओ [65]बावन्नभेयपडिभिन्नो ।
[66]चरणं [67]करणं जंघाविज्जाचारणगमणसत्ती [68] ॥ १६ ॥

परिहारविसुद्धि[69] अहालंदा[70] निज्जामयाण[71] अडयाला ।
पणवीस भावणाओ सुहाउ[72] असुहाउ[73] पणवीसं ॥ १७ ॥
संखा महव्वयाणं[74] किइकम्माण[75] य दिगे तहा खित्ते ।
चारित्ताणं[76] संखा ठियकप्पो[77] अठियकप्पो[78] य ॥ १८ ॥
चेइय[79] पुत्थय[80] दंडय[81] तण[82] चम्म[83] दुसाइ[84] पंच पत्तेयं ।
पंच अवग्गहभेया[85] परीसहा[86] मंडली[87] सत्त ॥ १९ ॥
दसठाणवव[88]च्छेओ खवगस्सेढी[89] य उवसमस्सेढी[90] ।
थंडिल्लाण सहस्सो अहिआ चउसहियवीसाए[91] ॥ २० ॥
पुव्वाणं नामाइं पयसंखासंजुयाइं चउदसवि[92] ।
निग्गंथा समणावि[93] य[94] पत्तेयं पंच पंचेव ॥ २१ ॥
गासेसणाण[95] पणगं पिंडे पाणे य एसणा[96] सत्त ।
भिक्खारिया[97] वीहीणमट्ठगं पायछित्ताणं[98] ॥ २२ ॥

सामायारी[99] ओहंमि[100] पयविभागंमि[101] तह य दसहा उ (चक्कवालंमि) ।
निग्गंथत्तं जीवस्स पंचवाराओ भववासे[102] ॥ २३ ॥
साहुविहारसरूवं[103] अप्पडिबद्धो य सो विहेयव्वो[104] ।
जायाअजायकप्पो[105] परिठवणुच्चारकरणदिसा[106] ॥ २४ ॥
अट्ठारस पुरिसेसु[107] वीसं इत्थीसु[108] दस नपुंसेसु[109] ।
पव्वावणाअणरिहा तह वियलंगस्सरूवा य[110] ॥ २५ ॥
जं मुल्लं जइकप्पं वत्थं सेज्जायरस्स पिंडो[111] य[112] ।
जत्तिय सुत्ते सम्मं जह निग्गंथावि चउगइया[113] ॥ २६ ॥
खित्ते[114] मग्गे[115] काले[116] तहा पमाणे[117] अईयमकप्पं[118] ।
दुहसुहसेज्जचउक्कं[119] तेरस किरियाण ठाणाइं[120] ॥ २७ ॥
एगंमि बहुभवेसु य आगरिसा चउव्विहेऽवि[121] सामइए[122] ।
सीलंगाणऽट्ठारस[123] सहस्स[124] नयसत्तगं चेव ॥ २८ ॥

वत्थग्गहणविहाणं[125] ववहारा[126] पंच तह अहाजायं[127] ।
निसिजागरणंमि[128] विही आलोयणदायगऽन्नेसा[129] ॥ २९ ॥
गुरुपमुहाणं[130] कीरइ असुद्धसुद्धेहिं जत्तियं कालं ।
उवहोधोयणकालो[131] भोयणभाया[132] वसहि[133]सुद्धो ॥ ३० ॥
संलेहणा[134] दुवालस वरिसे वसहेण वसहि[135]संगहणं ।
उसिणस्स फासुयस्सवि[136] जलस्स सबित्तया कालो ॥ ३१ ॥
तिरिइत्थीओ तिरियाण माणवीओ नराण देवीओ ।
देवाण जग्गुणाओ[137] जत्तियमेत्तेण अहियाओ ॥ ३२ ॥
अच्छेरयाण[138] दसगं चउरो भासा उ[139] वयणसोलसगं[140] ।
मासाण[141] पंच भेया भेया वरिसाण[142] पंचेव ॥ ३३ ॥
लोगसरूवं सन्नाओ[143] तिन्नि[144] चउरो[145] व[146] दस व[147] पनरस वा ।
तह सत्तसट्ठिलक्खणभेअविसुद्धं च सम्मत्तं[148] ॥ ३४ ॥

एगविह दुविह तिविहं चउहा पंचविह दसविहं सम्मं ।
दव्वाइकारगाईउवसमभेएहिं वा[149] सम्मं ॥ ३५ ॥

कुलकोडीणं[150] संखा जीवाणं जोणिलक्ख[151] चुलसीई ।
तेक्कालाईविन्नत्थविवरणं[152] मद्दवपडिमाउ[153] ॥ ३६ ॥

धन्नाणमबीयत्तं[154] खेत्ताईयाण[155] तह अचित्तत्तं ।
धन्नाइ[156] चउवीसं मरणं[157] सत्तरसभेयं च ॥ ३७ ॥

पलिओवम[158] अयर[159]ओसप्पिणीण[160] उस्सप्पिणीणवि[161] सव्वं ।
दव्वे खेत्ते काले भावे पोग्गलपरावट्टो[162] ॥ ३८ ॥

पन्नरस[163] कम्मभूमी अकम्मभूमीउ[164] तीस[165] अट्ठ मया ।
दोन्नि सया तेयाला[166] भेया पाणाइवायस्स ॥ ३९ ॥

परिणामाणं[167] अट्ठोत्तरसयं[168] बंभमट्ठदसभेयं ।
कामाण[169] चउव्वीसा दस[170] पाणा दस य[171] कप्पदुमा ॥ ४० ॥

नरया[172] नेरइयाणं आवासा[173] वेयणा[174] उ[175]उत्तणुमाणं[176] ।
उप्पत्तिनास[177]विरहो लेसा[178]ऽवहि[179] परमहम्मा[180] य ॥ ४१ ॥
नरयुव्वट्टाणं लद्धि[181]संभवो तेसु जेसि उववाओ[182] ।
संखा[183] उप्पज्जंताण तह य उव्वट्टमाणाणं[184] ॥ ४२ ॥
काय[185]ठिई भव[186]ठिइओ एगिंदियविगलसन्निजोवाणं ।
तणुमाण[187]मेसि इंदिय[188]सरूवविसया य लेसाओ[189] ॥ ४३ ॥
एयाण[190] जत्थ गई जत्तो ठाणेहि[191] आगई एसिं ।
उप्पत्ति[192]मरण[193]विरहो जायंतमरंतसंखा य ॥ ४४ ॥
भवणवइवाणमंतरजोइसवेमाणवासिदेवाणं ।
ठिइ[194] भवण[195] देह[196]माणं लेसा[197]ओ ओहि[198]नाणं च ॥ ४५ ॥
उप्पत्तीए[199] तह[200]चुवट्टणाय विरहो इमाण संखा[201] य ।
जम्मि य एयाण गई[202] जत्तो वा आगई[203] एसिं ॥ ४६ ॥

विरहो[204] सिद्धिगईए[205] जीवाणाहारगहणऊसासा ।
तिन्नि[206] सया तेसट्ठा पासंडीणऽट्ठ[207] य पमाया ॥ ४७ ॥
भरहाहिवा[208] हलहरा[209] हरिणो[210] पडिवासुदेवराया[211]णो ।
रयणाइ[212] चउद्दस[213] नवनिहीओ तह जीवसंखाओ[214] ॥ ४८ ॥
अम्भाइं[215] अट्ठ तेसिं उत्तरपयडीण[216] अट्ठवन्नसयं ।
बंधोदयाणुदीरण[217]सत्ताण य किंपि हु सव्वं ॥ ४९ ॥
कम्मट्ठिइ[218] साबाहा बायालीसा उ पुण्णपयडीओ[219] ।
बासीय[220] पावपयडीओ भावलक्कं सपडिभेयं[221] ॥ ५० ॥
जीवाण[222] अजीवाण[223] य गुणाण[224] तह मग्गणाण[225] पत्तेयं ।
चउदसगं उवओगा[226] बारस जोगा[227] य पण्णरस ॥ ५१ ॥
परलोगगई[228] गुणठाणएसु तह ताण[229] कालपरिमाणं ।
नरयतिरिनरसुराणं उक्कोसविउव्वणाकालो[230] ॥ ५२ ॥

सत्तेव [231] समुग्घाया [232] छप्पज्जत्तीओऽणहारया [233] चउरो ।
सत्त [234] भयट्ठाणाइं [235] छब्भासा अप्पसत्थाओ ॥ ५३ ॥
भंगा [236] गिहिव्वयाणं अट्ठारस [237] पावठाणगाइंपि ।
[238] मुणिगुण सत्तावीसा इगवीसा [239] सावयगुणाणं ॥ ५४ ॥
[240] नेरिच्छीणुक्किट्ठा गब्भठिई तह य सा [241] मणुस्सीणं ।
[242] गब्भस्स य कायठिई [243] गब्भट्ठियजीवआहारो ॥ ५५ ॥
[244] रिउरुहिरसुक्कजोए जत्तियकालेण गब्भसंभूई ।
[245] जत्तियपुत्ता गब्भे जत्तिय पियरो य [246] पुत्तस्स ॥ ५६ ॥
महिला गब्भअजोगा जेत्तियकालेणऽबीयओ [247] पुरिसो ।
[248] सुक्काईण सरीरट्ठियाण सव्वाण परिमाणं ॥ ५७ ॥
सम्मत्ताईणुत्तमगुणाण लाहंतरं [249] जमुक्कोसं ।
न लहंति माणुसत्तं सत्ता जेऽणंतरुव्वट्टा [250] ॥ ५८ ॥

पुव्वंगपरीमाणं[251] माणं पुव्वस्स[252] लवणसिहमाणं[253] ।
उस्सेहआयअंगुलपमाणअंगुलपमाणाइं[254] ॥ ५९ ॥
तमकायसरूवमणंतलक्कगं[255] अट्ठगं[256] निमित्ताणं[257] ।
माणुम्माणपमाणं[258] अट्ठारस भक्खभोज्जाइं[259] ॥ ६० ॥
छट्ठाणवुड्ढिहाणी[260] अवट्ठिदं[261] जाव नेव तोरंति ।
अंतरदीवा[262] जीवाजीवाणं अप्पबहुयं[263] च ॥ ६१ ॥
संखा निस्सेसजुगप्पहाणसूरीण वीरजिणतित्थे[264] ।
ओसप्पिणिअन्तिमजिणतित्थअविच्छेयमाणं[265] च ॥ ६२ ॥
देवाणं[266] पवियारो सरूवमट्ठण्ह कण्हराईणं[267] ।
सज्झायस्स[268] अकरणं नंदीसरदीवठिइभणणं[269] ॥ ६३ ॥
लद्धीओ[270] नव[271] पायालकलस[272] आहारगस्ससरूवं[273] च ।
देसा[274] अणायरिया आरिया[275] य सिद्धेगतीसगुणा[276] ॥६४॥ तेसट्ठीदारगाहाओ ॥

	विषयः	पत्रम्
७२ २५	महाव्रतभावनाः	५१७
७३ २५	अशुभभावनाः	५२२
७४	महाव्रतसंख्या	५३५
७५	कृतिकर्मसङ्ख्या	५३७
७६	क्षेत्रे चारित्रसङ्ख्या	५३८
७७	स्थितकल्पः	५३८
७८	अस्थितकल्पः	५४०
७९	चैत्यपञ्चकम्	५४७
८०	पुस्तकपञ्चकम्	५५०
८१	दण्डपञ्चकम्	५५२
८२	तृणपञ्चकम्	५५५
८३	चर्मपञ्चकम्	५५६
८४	दूष्यपञ्चकम्	५५७
८५	अवग्रहपञ्चकम्	५५९
८६	२२ परिषहाः	५६२
८७	७ मण्डल्यः	५७२
८८	१० स्थानव्यवच्छेदः	५७३
८९	क्षपकश्रेणिः	५७४
९०	उपशमश्रेणिः	५८५-५९४
९१	१०२४ स्थण्डिलभेदाः	५९४-६०३
९२	पूर्वाणां नामादि	६०४-६०८
९३	निर्ग्रन्थपञ्चकम्	६०९-६१९
९४	श्रमणपञ्चकम्	६२०
९५	ग्रासैषणापञ्चकम्	६२०-६२६
९६	पिण्डपानैषणासप्तकम्	६२७-६३०
९७	भिक्षाचर्याष्टकम्	६३६-६४३
	सम्पादनोपयुक्तग्रन्थसूचिः	२५

卐

विशिष्टानि टिप्पणानि

१	पृ. ३५	पं. १४	तत्र-तुलना-योगशास्त्रवृत्तिः ३ । १२४ ॥
२	पृ. ४७	पं. १	प्रथमोल्लिङ्गन- ="चितरवाना पद जाणवा" इति सि. प्रतौ पार्श्वभागे ॥
३	पृ. ५७	पं. १२	दुओणय-तुलना योगशास्त्रवृत्तिः ३ । १३०, प. २३५ तः ॥
४	पृ. ८०	पं. १०	पायनीचटिका-"वस्त्रयातचटस्यान्तः" इति त्रिशष्टि श. पु. चरित्रे (८ । १० । २२४) ॥ पञ्चमणघडियाए- इति आवश्यकहारिभद्रीयम् पृ. ५१४ B ॥
५	पृ. ८५	पं. १५	पुरओ-तुलना-योगशास्त्रवृत्तिः ३।१३०, प. २४२ तः, तत्र क्वचित् क्रमभेदो दृश्यते ॥
६	पृ. ८८	पं. १०	अन्यत्र-योगशास्त्रवृत्त्यादौ (३ । १३०, प. २४२ B) इति ध्येयम् ॥
७	पृ. ९१	पं. ७	अणाढियं-तुलना-योगशास्त्रवृत्तिः ३ । १३०, प. २३६ तः ॥
८	पृ. १०३	पं ७	तुलना-योगशास्त्रवृत्तिः ३ । १३०, प. २४७ तः ॥
९	पृ. १०६	पं. २	इदं च-इतः अयणायेत्यर्थः' (प. ३) इति एतावत्पाठः धर्मसङ्ग्रहवृत्तौ (प. २१२) उद्धृतोऽस्ति॥
१०	पृ. १११	पं. १	सन्न-योगशास्त्रवृत्तौ तु ' संबुद्धास्वामणं ति पण सत्त साहूण जहसंखं ।" इति पाठो दृश्यते ॥
११	पृ. ११४	पं. ३	प्रतीति-तुलना-योगशास्त्रवृत्तिः ३ । १३०, प. २५१ ॥
१२	पृ. १२२	पं. ९	अद्धाशब्देन-तुलना-योगशास्त्रवृत्तिः प. २५१ तः ॥
१३	पृ. १२३	पं. ४	नन्वेका०-तुलना-योगशास्त्रवृत्तिः ३ । १३० प. २५२ तः ॥
१४	पृ. १३५	पं. ६-७	जीरकं-"जीरकं स्वभाष्यप्रवचनसारोद्धाराभिप्रायेण स्वाद्यं कल्पवृत्त्यभिप्रायेण तु खाद्यम्, अजमकं खाद्यमिति केचित् ।" इति धर्मसङ्ग्रहवृत्तिः भा. १ । प. १८५ B ॥
१५	पृ. १३७	पं. १	उचिते-इतः "तदा स्पष्टं भवतीति" (पं. ६) पर्यन्तः पाठः धर्मसङ्ग्रहवृत्तौ (भा. १, प. १२५) उद्धृतोऽस्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१६ पृ. १६१ पं. ३ यदा-तुलना-योगशास्त्रवृत्तिः ३।१२४, प. २१५ ॥
१७ पृ. २८६ पं. ६ तिन्नि वा-"तिन्नि वा .....इत्येतां कल्पभाष्यगाथाम्" इति पञ्चाशकवृत्तिः ३।२, प. ५३ ॥
१८ पृ. ३२६ पं. १३ चिलिमि० "=चरवली" इति सि. प्रतौ पार्श्वभागे अर्थनिर्देशकं टिप्पणम् ॥

॥ विशिष्टाः पाठभेदाः ॥

पृ.	प.	
४	६	विशेष्ये विशेष्य प्रतिपत्तिः-जे. सि. । विशेष्ये विशेष प्रतिपत्तिः-पा. ॥
४	१२	०शास्त्रस्यादौ-जे. सि. ॥
४	१६	०रमणीवर्गविभवो० पा. ॥
५	९	०किरणकिरणनिकर० जे. वि. । ०किरणकरनिकर० पा. ॥
५	१०	ध्याममशुभ० पा. ॥
६	२	विस्तृततरविस्तृततम० जे. ॥
८	१	अवगाहणाए-जे. २ । अवगाहणाये-जे. ॥ अवगाहणाइ-त्रि. ॥
८	३	अहुअहिय. जे. त्रि. ॥
९	२	पणुवीस-जे. ॥
९	७	खवगसेढी य उवसमसेढी-जे. ॥

पृ.	प.	
१०	१	जे. प्रतौ 'दसहा उ' इति पाठं संमार्ज्य 'चक्कवालंमि' इति पाठः कृतः ॥
१०	८	जेहु-जे. ॥
११	२	०दायगन्नेसा-जे. त्रि. ॥
१६	१२	आयरिया सिद्धे० जे. ॥
१८	१४	०अधन्यिका-जे. त्रि. ॥
१९	४	केवलिनश्चेति-पा. सि. ॥
१९	६	तेनचरंतो-पा. ॥
२३	११	साधुविशेषत्वम् एकजीवस्य पञ्चवारान्-पा. त्रि. सि. ॥
२५	११	तिरश्च्यस्तिर्यग्भ्यो मानुष्यो मानुषेभ्यः देव्यश्च देवेभ्यः-पा. सि. त्रि. । सि. प्रतौ मुद्रित-पाठः पाठान्तररूपेण उपरितनभागे दर्शितः ॥

पृ. प.

२६ १३ धान्यानामजीवत्वं-सि. । "अन्यत्राबीजत्वम् इति पाठः" इति सि. प्रतौ पार्श्वभागे ॥
२७ १३ परमाधार्मिकाः-सि. सं.
२७ १६ उद्वर्तमानानामे० पा. ॥
२८ ५ इंदियविसउअत्ति इन्द्रियाणि विषयाश्च तेषामेव वाक्या-सि. त्रि. ॥
२८ ६ विषयाश्च यावत्क्षेत्रस्थितशब्दादिग्रहणलक्षणो वाक्यः १८८-पा. ॥
२८ १५ तथाऽवधिज्ञानमानं-पा. सि. ॥
३० ११ त्रिपञ्चाशत्तम० पा. ॥
३२ ३ विषया-सि. । "विषेया इत्यन्यत्र पाठः इति सि. प्रतौ पार्श्वभागे ॥
३५ १६ प्रावृताङ्गी-जे. सि. ॥
३६ १ पञ्चविधाभिगमेन-पा. सि. ॥
३६ १४ निसीहितिगं-जे. । निसेहतिगं-सि. [३।१२५] पञ्चाशके[४।१४] च ॥
३७ १४ ०दीवएहि-पा. सि. वि. त्रि. योगशास्त्रवृत्तौ
३७ १६ कयाण-लट्ठ०सि. वि. । सिया ण-योग०वृत्तौ ३/१२४, प. २११ ॥

पृ. प.

३८ ९ ध्यानादेश० पा. ॥
३९ ५ वरधूवगंध० पा. सि. ॥
४० १६ देवान्-जे. पा. ॥
४२ २ पादयोरुत्सर्गोत्तरं-पा. ॥
४२ १५ सव्व-जे. ।
४२ १६ सक्कथय० जे. ।
४३ ६ तत्राप्यु० पा. ॥
४३ ७ परिहारार्थेति शेषः-पा. सि. ।
४३ ११ विश्रम्यते गलमेतेष्विति-पा. ॥
४४ १५ नवकारु-पा. ॥
४५ ६ ऐर्यापथिक्या-पा. ॥
४५ ९ तस्स मिच्छामि दुक्कडं इति-पा. ॥
४५ १० दृश्यन्ते-सि. पाठा. ।
४६ १४ इयं चात्मतुल्यपरफलकर्तृ० जे. पा. नास्ति ॥
४७ २ जे य अईया-जे. ।
४७ ७ सम्पदस्तासां चाद्यपद० पा. ॥
४७ १६ अट्ठावीसे-जे. ॥

गृहिलिङ्गे-गृहस्थलिङ्गे अन्यलिङ्गे-जटाधराद्यन्यतीर्थिकलिङ्गे स्वलिङ्गे च-रजोहरणादिलिङ्गे एकसमयेन सिद्धयतां सङ्ख्या भणनीया ५१ इति दशमगाथायां पञ्चाशत्तमैकपञ्चाशत्तमे द्वे द्वारे अभिहिते ॥११॥

द्वात्रिंशदादयः आदिशब्दादष्टचत्वारिंशत्षष्टिद्विसप्ततिचतुरशीतिषण्णवतिद्व्युत्तरशताष्टोत्तरशतानि गृह्यन्ते, ततश्चैकद्व्यादयो द्वात्रिंशदाद्यन्ताः सिद्धयन्ति निरन्तरं यावदष्टभिरधिकं शतं अष्टभिः समयैरेकैकोनैर्यावदेकसमयान्तं, अयमर्थः-एकस्मिन समये एको द्वौ वा यावद् द्वात्रिंशत्सिद्धयन्ति एवं द्वितीयादिष्वपि समयेषु अष्टमान्तेषु ततोऽवश्यमन्तरं, तथा पूर्ववत् त्रयस्त्रिंशदादय एकादयो वा सप्त समयान यावन्निरन्तरं सिद्धयन्ति ततोऽवश्यमन्तरमित्यादि स्वरूपं भणनीयं ५२ इत्येकादशगाथायां द्विपञ्चाशमेकं द्वारं ॥१२॥

स्त्रीवेदे पुंवेदे नपुंसकवेदे च सिद्धयतां सङ्ख्या वाच्या ५३, तथा सिद्धानां संस्थानं ५४, तथा अवस्थितिस्थानं च सिद्धानां कथनीयं ५५, इत्यस्यां द्वादशगाथायां त्रिपञ्चाशचतुष्पञ्चाशत्पञ्चपञ्चाशद्रूपाणित्रीणि द्वाराणि ॥१३॥

अवगाहना-तनुः चः समुच्चये तेषां-सिद्धानामुत्कृष्टा ५६ तथा मध्यमा ५७ तथा जघन्या वाच्या ५८, तथा नामानि-अभिधानानि चतसृणामपि हुशब्दः प्राकट्ये शाश्वतजिननाथप्रतिमानां ५९ इति त्रयोदशगाथायां षट्पञ्चाशादीनि एकोनषष्ट्यन्तानि चत्वारि द्वाराणि ॥१४॥

उपकरणानां सङ्ख्या जिनानां-जिनकल्पिकानां ६० तथा स्थविराणां-गच्छवासिव्रतिनां ६१ तथा साध्वीनां च वाच्या ६२, चः समुच्चये, तथा जिनकल्पिकानां सङ्ख्योत्कृष्टा एकस्यां समयौ वाच्या ६३ इति चतुर्दशगाथायां षष्टितमादीनि त्रिषष्ट्यन्तानि चत्वारि द्वाराणि ॥१५॥

षट्त्रिंशत् सूरीणां-आचार्याणां गुणा वक्तव्याः ६४; तथा विनयो द्विप्रकारद्वैदशविधो वाच्यः ६५, तथा चर्म सप्तविधं वाच्यं ६६, तथा कल्पं सप्तविधं वाच्यं ६७, तथा ब्रह्मचर्याणां *विद्याचारणानां च गमनशक्तिरूपविषया ६८ इति पञ्चदशगाथायां चतुःषष्ट्यादीनि अष्टषष्ट्यन्तानि पञ्च द्वाराणि ॥१६॥

परिहारविशुद्धिकानां परिहारविशुद्धितपसो वा स्वरूपं मननीयं ६९, तथा 'अहालंदि'त्ति यथा-लन्दकल्पकारिणो वाच्याः ७०, तथा प्रतिपद्यानशनस्य मार्गोपे निर्यामका-आराधनाकारकास्तेषामष्ट-चत्वारिंशद्गणनीया ७१, तथा पञ्चविंशतिर्भावना: शुभाः ७२ तथा अशुभाः पञ्चविंशतिर्वाच्याः ७३ इति षोडशगाथायामेकोनसप्ततिमादीनि त्रिसप्तत्यन्तानि पञ्च द्वाराणि ॥१७॥

सङ्ख्या महाव्रतानां-प्राणातिपातविरमणादीनां ७४, तथा कृतिकर्मणां-वन्दनकानां दिनमध्ये सङ्ख्या ७५, च: समुच्चये, तथा क्षेत्रे-भरतादौ चारित्राणां-सामायिकादीनां सङ्ख्या ७६, तथा स्थितकल्पः ७७, तथाऽस्थितकल्पो वाच्यः ७८, च: समुच्चये, इति सप्तदशगाथायां चतुःसप्तत्यादीनि अष्टसप्तत्यन्तानि पञ्च द्वाराण्यर्थविदितानि ॥१८॥

चैत्यानि-प्रतिमाल्पाणि ७९ तथा पुस्तकानि ८० तथा दण्डकाः ८१ तृणानि ८२ तथा चर्माणि ८३ तथा दूष्याणि-वस्त्राणि ८४ एतानि पञ्च पञ्च प्रत्येकं वक्तव्यानि तथा पञ्चावग्रहभेदाः ८५, तथा परि-सहनः सह्यन्ते मोक्षार्थिभिरिति परीषहाः ८६, तथा मण्डल्यः सप्त वाच्याः ८७ इत्यष्टादशगाथा-यामेकोनाशीत्यादीनि सप्ताशीत्यन्तानि नव द्वाराणि भणितानि ॥१९॥

दशानां स्थानानां व्यवच्छेदः, ८८, तथा क्षपकश्रेणिः ८९, तथोपशमश्रेणिः ९०, तथा स्थण्डिलानां–साधुयोग्यभूविशेषाणां सहस्रोऽधिकश्चतुःसहितविंशत्या चतुर्विंशत्यधिकसहस्र इत्यर्थः ९१ इत्येकोनविंशतितमगाथायां अष्टाशीत्यादीनि एकनवत्यन्तानि चत्वारि द्वाराणि ॥२०॥

पूर्वाणां नामानि पदसङ्ख्यया संयुतानि–युक्तानि चतुर्दशापि कथनीयानि ९२, तथा निर्ग्रन्थाः–साधवः ९३ तथा श्रमणा–भिक्षुकाः ९४ प्रत्येकं पञ्च पञ्चैव वक्तव्या, इति विंशतितमगाथायां द्विनवतित्रिनवतिचतुर्नवतिद्वाराणि त्रीणि ॥२१॥

ग्रासैषणानां पञ्चकं ९५, तथा पिण्डे पाने च एषणाः सप्त ९६, तथा भिक्षाचर्याविषये वीथीनां–मार्गाणामष्टकं ९७, तथा प्रायश्चित्तानि वाच्यानि ९८ इत्येकविंशतितमगाथायां पञ्चनवत्यादीनि अष्टनवत्यन्तानि चत्वारि द्वाराणि ॥२२॥

समाचारी ओघे–सामान्ये ९९ तथा पदविभागे–छेदग्रंथोक्तस्वरूपे १०० तथा दशविधचक्रवाले प्रतिदिनकरणीयसमाचारे संख्या वाच्या १०१, तथा निर्ग्रन्थत्वं–साधुविशेषत्वं पञ्चवारान् भववासे–संसारावस्थाने १०२ इति द्वाविंशतितमगाथायां नवनवत्यादीनि द्व्यधिकशततमान्तानि चत्वारि द्वाराणि ॥२३॥

साधूनां विहारस्वरूपं १०३, तथा अप्रतिबद्धश्च स विहारो विधातव्यः १०४, तथा जातकल्पोऽजातकल्पश्च वक्तव्यः, जाताः–गीतार्था भण्यन्ते अजाताश्च–अगीतार्थाः १०५, तथा परिष्ठापनोच्चारकरणयोर्दिक् १०६ इति त्रयोविंशतितमगाथायां त्र्यधिकशततमादिनि षडुत्तरशततमान्तानि द्वाराणि चत्वारि ॥२४॥

अष्टादश पुरुषेषु १०७ तथा विंशतिः स्त्रीषु १०८ तथा दश नपुंसकेषु प्रव्राजनानर्हाः १०९ तथा विकलाङ्गरूपाश्च ११० इति चतुर्विंशतिकगाथायां सप्तोत्तरशततमादीनि दशोत्तरशततमान्तानि द्वाराणि चत्वारि ।२५॥

यत् मूल्यं यस्य तत् यन्मूल्यं यतीनां–मुनीनां कल्प्यं–कल्पनीयं–वस्त्रं १११, तथा शय्यातरस्य पिण्डश्च कल्प्योऽकल्प्यो वेति ११२ तथा यावति सूत्रे सति सम्यक्त्वमवश्यम्भावि ११३, तथा निर्ग्रन्था अपि चतुर्गतिका भवन्ति, चतस्रो नरकादयो गतयो येषां ते चतुर्गतिकाः ११४ इति पञ्चविंशतितमगाथायामेकादशोत्तरशततमादीनि चतुर्दशोत्तरशततमान्तानि चत्वारि द्वाराणि ॥२६॥

क्षेत्रे तथा मार्गे तथा काले तथा प्रमाणे चातीतं–भणितप्रमाणात् क्षेत्रादेरतिक्रान्तं अकल्प्यं यत् तद्भणनीयं ११५–११६–११७–११८, तथा दुःखशय्याचतुष्कं ११९, तथा सुखशय्याचतुष्कं १२०, तथा त्रयोदश क्रियास्थानानि १२१ इति षड्विंशतितमगाथायां पञ्चदशोत्तरशततमादीनि एकविंशत्युत्तरशततमान्तानि सप्त द्वाराणि ॥२७॥

एकस्मिन् भवे बहुषु च भवेषु आकर्षा—विरूपाध्यवसायविशेषाश्चतुर्विधेऽपि सामायिके श्रुतसामायिक—सम्यक्त्वसामायिक–देशविरति०–सर्वविरति० लक्षणे कियन्तो भवन्ति ? १२२, तथा शीलस्याङ्गभूताः–कारणभूता ये पदार्थास्तेषामष्टादशसहस्रा वाच्याः १२३, तथा नयानां–नैगमादीनां सप्तकं च १२४ इति सप्तविंशतितमगाथायां द्वाविंशत्युत्तरत्रयोविंशत्युत्तरचतुर्विंशत्युत्तरशततमानि त्रीणि द्वाराणि ॥२८॥

वस्त्रग्रहणस्य विधानं १२५, तथा व्यवहारा–आगमादयः पञ्च १२६, तथा यथाजातं–चोलपट्ट-कादि १२७, तथा निशि जागरणे विधिः १२८, तथा आलोचनादायकस्य गुरोरन्वेषा–अन्वेषणा १२९ इत्यष्टाविंशतितमगाथायां पञ्चविंशत्युत्तरशततमादीनि एकोनत्रिंशदुत्तरशततमान्तानि पञ्च द्वाराणि ॥२९॥

गुरुप्रमुखाणां क्रियतेऽशुद्धैः शुद्धैश्च वस्तुभिर्यावन्तं कालं प्रतिजागरणमिति शेषः १३० तथा उपधेर्धावनकालः–प्रक्षालनप्रस्तावः १३१, तथा भोजनस्य भागाः १३२, तथा वसतिशुद्धिः १३३ इत्येकोनत्रिंशत्तमगाथायां त्रिंशदुत्तरशततमादीनि त्रयस्त्रिंशदुत्तरशततमान्तानि चत्वारि द्वाराणि ॥३०॥

संलेखना–शरीरशोषणा द्वादश वर्षाणि १३४, तथा वृषभेण–बलीवर्देन कल्पितेन वसतेर्ग्रहणं १३५, तथोष्णस्य प्रासुकस्यापि जलस्य सचित्तताकालः १३६, उष्णं–प्रासुकमपि जलं जातं कियता कालेन पुनः सचित्तं भवतीत्यर्थः, इति त्रिंशत्तमगाथायां चतुस्त्रिंशदुत्तरपञ्चत्रिंशदुत्तरषट्त्रिंशदुत्तरशततमानि त्रीणि द्वाराणि ॥३१॥

इह षष्ठ्याः पञ्चम्यर्थत्वात् तिरश्च्यो तिरश्चां मानव्यो मानवानां देव्यो देवानां यद्गुणाः, यो गुणो-गुणकारो यासां ताः तथा, यावता गुणकारेण तिर्यक्पुरुषादिभ्योऽधिकास्तिरश्च्यादय इत्यर्थः, यावन्मात्रेणा-धिकाश्च सर्वाः स्त्रियो गुणकारादप्युद्धरिताः १३७ इत्येकत्रिंशत्तमगाथायां सप्तत्रिंशदुत्तरशततममेकं द्वारम् ॥३२॥

आश्चर्याणां दशकं १३८, तथा चतस्रो भाषाः १३९, तथा वचनानां षोडशकं १४०, तथा

मासानां पञ्च भेदाः १४१, तथा भेदाः- प्रकारा वर्षाणां पञ्चैव १४२ इति द्वात्रिंशत्तमगाथायामष्टत्रिंशदुत्तरशततमादीनि द्विचत्वारिंशदुत्तरशततमान्तानि पञ्च द्वाराणि ॥३३॥

लोकस्वरूपं १४३, तथा संज्ञास्तिस्रः १४४ नव चत्स्रो वा १४५ तथा दश वा १४६ पञ्चदश वा १४७. तथा सप्तषष्टिलक्षणभेदविशुद्धं च सम्यक्त्वम् १४८ इति त्रयस्त्रिंशत्तमगाथायां त्रिचत्वारिंशदुत्तरशततमादीनि अष्टचत्वारिंशदुत्तरशततमान्तानि षड् द्वाराणि ॥३४॥

एकविधमग्रन्थितसम्यक्त्वशब्दसम्बन्धात्सम्यक्त्वं, प्राकृतशैल्या प्रथमैकवचनमत्राग्रेतनपदेषु च लुप्तं द्रष्टव्यं, तथा द्विविधं त्रिविधं चतुर्धा पञ्चविधं दशविधं द्रव्यादिकारकादिउपशमभेदैर्वा सम्यक्त्वं वाच्यं १४९, इति चतुस्त्रिंशत्तमगाथायामेकोनपञ्चाशदुत्तरशततममेकं द्वारम् ॥३५॥

कुलकोटीनां सङ्ख्या जीवानां सम्बन्धिनी भणनीया १५०, तथा जीवानामेव सम्बन्धिनी योनिलक्षचतुरशीतिः १५१, तथा "त्रैकाल्यं द्रव्यषट्क"मित्यादिवृत्तस्य योऽर्थस्तस्य विवरणं १५२, तथा श्राद्धानां-श्रावकाणां प्रतिमा १५३ इति पञ्चत्रिंशत्तमगाथायां पञ्चाशदुत्तरशततमादीनि त्रिपञ्चाशदुत्तरशततमान्तानि चत्वारि द्वाराणि ॥३६॥

धान्यानामबीजत्वं १५४, तथा क्षेत्रातीतानामचित्तत्वं १५५, तथा धान्यानां चतुर्विंशतिर्नामतः कथ्या १५६, तथा मरणं सप्तदशभेदं १५७, चः समुच्चये, इति षट्त्रिंशत्तमगाथायां चतुष्पञ्चाशदुत्तरशततमादीनि सप्तपञ्चाशदुत्तरशततमान्तानि चत्वारि द्वाराणि ॥३७॥

पल्योपमस्य १५८ तथा न तरीतुं शक्यत इत्यतरः--सागरः एकदेशेन समुदायावगमात् सागरोपमं तस्य १५९ तथा अवसर्पिण्याः स्वरूपं १६० तथा उत्सर्पिण्याः स्वरूपं १६१ तथा द्रव्ये क्षेत्रे काले भावे च पुद्गलपरावर्तो भणनीयः १६२ इति सप्तत्रिंशत्तमगाथायामष्टपञ्चाशदुत्तरशततमादीनि द्विषष्ट्युत्तरशततमान्तानि पञ्च द्वाराणि ॥३८॥

पञ्चदश कर्मभूमयो यत्र तीर्थंकरादय उत्पद्यन्ते १६३, तथा अकर्मभूमयस्त्रिंशद् यत्र धर्मादिकं न किञ्चिद् ज्ञायते १६४, तथा अष्टौ मदाः १६५, तथा द्वे शते त्रिचत्वारिंशदधिके भेदाः प्राणातिपातस्य १६६ इत्यष्टत्रिंशत्तमगाथायां त्रिषष्टयुत्तरशततमादीनि षट्षष्ट्युत्तरशततमान्तानि चत्वारि द्वाराणि ॥३९॥

परिणामानाम्--अध्यवसायविशेषाणामष्टोत्तरशतं १६७, तथा ब्रह्मचर्यमष्टादशभेदं १६८, तथा कामानां चतुर्विंशतिः १६९, तथा दश प्राणाः १७०, तथा दश च कल्पद्रुमाः १७१ इत्येकोनचत्वारिंशत्तमगाथायां सप्तषष्ट्युत्तरशततमादीनि एकसप्तत्युत्तरशततमान्तानि पञ्च द्वाराणि ॥४०॥

नरकास्तथा नारकाणामावासाः १७२--१७३, तथा वेदना नारकाणां १७४, तथा तेषामेवायुः १७५, तथा तेषामेव तनुमानं १७६, तथा तेषामेवोत्पत्तिनाशयोर्विरहः १७७, तथा तेषामेव लेश्याः १७८, तथा तेषामेवावधिः १७९, तथा परमाधर्म्माः--परमाधार्मिकाः १८०, चः समुच्चये, इति चत्वारिंशत्तमगाथायां द्विसप्तत्युत्तरशततमादीनि अशीत्युत्तरशततमान्तानि नव द्वाराणि ॥४१॥

नरकादुद्धृतानां लब्धेः--तीर्थकरत्वादेः सम्भवः १८१, तथा तेषु नरकेषु येषां जीवानामुपपातः--उत्पादः १८२ तथा सङ्ख्योत्पद्यमानानामेकस्मिन् समये नरकेषु १८३, तथा सैव नरकेभ्य उद्वर्तमानानामे-

कस्मिन् समये १८४, इत्येकचत्वारिंशत्तमगाथायामेकाशीत्युत्तरशततमादीनि चतुरशीत्युत्तरशततमान्तानि चत्वारि द्वाराणि ॥४२॥

कायस्थितिः तथा भवस्थितिरेकेन्द्रियाणां–पृथिव्यप्तेजोवायुवनस्पतीनां 'विगल' त्ति 'एकदेशे समुदायोपचारात्' विकलेन्द्रियाणां-द्वित्रिचतुरिन्द्रियाणां संज्ञिनामसञ्ज्ञिनां च जीवानां १८५–१८६, तथैतेषामेव तनुप्रमाणं–शरीरप्रमाणं १८७, तथा 'इंदियसरूवविसय' त्ति इन्द्रियाणां स्वरूपं–आकारविशेषादिलक्षणं विषयाश्च तेषामेव वाच्याः; अत्र च समाहारैकत्वेऽपि प्राकृतत्वात्पुंसा निर्देशः१८८, तथा लेश्याश्चैतेषाम् १८९ इति द्विचत्वारिंशत्तमगाथायां पञ्चाशीत्युत्तरशततमादीनि एकोननवत्युत्तरशततमान्तानि पञ्च द्वाराणि ॥४३॥

एतेषामेकेन्द्रियविकलेन्द्रियसंज्ञिजीवानां यत्र स्थाने गतिः १९०, तथा येभ्यः स्थानेभ्य आगतिरेतेषां १९१, तथा एतेषामेवोत्पत्तिमरणयोर्विरहः–अन्तरमेकस्मिन्नुत्पन्ने मृते वा सति भूयः कियता कालेनान्य उत्पद्यते म्रियते वेत्येवंलक्षणं १९२, तथैतेषामेकसमयेन जायमानानां म्रियमाणानां च सङ्ख्या १९३ चः समुच्चये, इति त्रिचत्वारिंशत्तमगाथायां नवत्युत्तरशततमादीनि त्रिनवत्युत्तरशततमान्तानि चत्वारि द्वाराणि ॥४४॥

भवनपतिव्यन्तरज्योतिष्कविमानवासिदेवानां स्थितिः १९४, तथा भवनानि १९५, तथा देहप्रमाणं १९६, तथा लेश्या १९७, तथाऽवधिज्ञानं १९८, चः समुच्चये, इति चतुश्चत्वारिंशत्तमगाथायां चतुर्नवत्युत्तरशततमादीनि अष्टनवत्युत्तरशततमान्तानि पञ्च द्वाराणि ॥४५॥

एतेषां भवनपत्यादीनामुत्पद्यमानानां विरहः १९९, तथोद्वर्तमानानां विरहः २००, तथा एतेषामेकसमयेन उत्पद्यमानानां उद्वर्तमानानां च सङ्ख्या २०१, तथैतेषामुद्धृतानां यस्मिन स्थाने गतिः २०२, तथा यतः स्थानादागतिरेतेषाम् २०३ इति पञ्चचत्वारिंशत्तमगाथायां नवनवत्युत्तरशततमादीनि त्र्युत्तरद्विशततमान्तानि पञ्च द्वाराणि ॥४६॥

विरहः—अन्तरं सिद्धिगतेः २०४, तथा जीवानामाहारग्रहणोच्छ्वासाः २०५, तथा त्रीणि शतानि त्रिषष्टानि पाखण्डिनां २०६, तथाऽष्टौ प्रमादाः २०७, इति षट्चत्वारिंशत्तमगाथायां चतुरुत्तरद्विशततमादीनि सप्तोत्तरद्विशततमान्तानि चत्वारि द्वाराणि ॥४७॥

भरतक्षेत्रस्याधिपाः २०८, तथा हलधरा—बलदेवाः २०९, तथा हरयो—वासुदेवाः २१०, तथा प्रतिवासुदेवाः २११, तथा रत्नानि चतुर्दश २१२, तथा नव निधयः २१३, तथा जीवानां सङ्ख्या २१४, इति सप्तचत्वारिंशत्तमगाथायामष्टोत्तरद्विशततमादीनि चतुर्दशोत्तरद्विशततमान्तानि सप्त द्वाराणि ॥४८॥

कर्माण्यष्टौ २१५, तथा तेषां कर्मणामुत्तरप्रकृतीनामष्टपञ्चाशदुत्तरं शतं २१६, तथा कर्मणां बन्धोदययोरुदीरणासत्तयोश्च किमपि स्वरूपम् २१७ इत्यष्टचत्वारिंशत्तमगाथायां पञ्चदशोत्तरषोडशोत्तरसप्तदशोत्तरद्विशततमादीनि त्रीणि द्वाराणि ॥४९॥

कर्मणां स्थितिः साबाधा—अबाधा—अनुदयकालः सह अबाधया साबाधा २१८, तथा द्विचत्वारिंशत्पुण्यप्रकृतयः २१९, तथा द्व्यशीतिः पापप्रकृतयः २२०, तथा भावषट्कं सप्रतिभेदम् २२१ इत्येकोनपञ्चाशत्तमगाथायामष्टादशोत्तरद्विशततमादीनि एकविंशत्युत्तरद्विशततमान्तानि चत्वारि द्वाराणि ॥५०॥

जीवानां तथा अजीवानां तथा गुणानां–गुणस्थानानां तथा मार्गणास्थानानां प्रत्येकं चतुर्दशकं २२२–२२३–२२४–२२५, तथा उपयोगा द्वादश २२६, तथा योगाश्च [पञ्चदश वाच्याः २२७ इति पञ्चाशत्तमगाथायां द्वाविंशत्युत्तरद्विशततमादीनि सप्तविंशत्युत्तरद्विशततमान्तानि षट् द्वाराणि ॥५१॥

परलोके गतिगुणस्थानकेषु मिथ्यात्वादिषु सत्सु २२८, तथा तेषां--गुणस्थानकानां कालपरिमाणं २२९. तथा नारकतिर्यग्नरसुराणामुत्कृष्टो विकुर्वणाकालः २३० इत्येकपञ्चाशत्तमगाथायामष्टाविंशत्युत्तरैकोनत्रिंशदुत्तरद्विशततमानि त्रीणि द्वाराणि ॥५२॥

सप्त समुद्घाताः २३१, तथा षट् पर्याप्तयः २३२, तथाऽनाहारकाश्चत्वारः २३३, तथा सप्त भयस्थानानि २३४, तथा षट् भाषा अप्रशस्ताः २३५, इति द्विपञ्चाशत्तमगाथायामेकत्रिंशदुत्तरद्विशततमादीनि पञ्चत्रिंशदुत्तरद्विशततमान्तानि पञ्च द्वाराणि ॥५३॥

भङ्गाभेदा गृहिव्रतानां २३६, तथा अष्टादश पापस्थानान्यपि २३७, तथा मुनिगुणानां सप्तविंशतिः २३८, तथा एकविंशतिः श्रावकगुणानां २३९ इति त्रिपञ्चाशत्तमगाथायां षट्त्रिंशदुत्तरद्विशततमादीनि एकोनचत्वारिंशदुत्तरद्विशततमान्तानि चत्वारि द्वाराणि ॥५४॥

तिरश्चीनामुत्कृष्टा गर्भस्थितिः २४०, तथा मानुषीणामुत्कृष्टा गर्भस्थितिः २४१, तथा गर्भस्य च कायस्थितिः--कायस्यावस्थानं २४२. तथा गर्भस्थितजीवस्याहारः २४३, इति चतुष्पञ्चाशत्तमगाथायां चत्वारिंशदुत्तरद्विशततमादीनि त्रिचत्वारिंशदुत्तरद्विशततमान्तानि चत्वारि द्वाराणि ॥५५॥

स्त्रीसम्बन्धि यदृतुसमये रुधिरं पुरुषसम्बन्धि च शुक्रं तयोर्योगे--मीलने सति यावता कालेन गर्भसम्भूतिस्तद्वाच्यं २४४, तथा यावन्तश्च पुत्रा गर्भे २४५, तथा यावन्तः पितरश्च एकस्य पुत्रस्योत्पादने इति शेषः २४६ एवं पञ्चपञ्चाशत्तमगाथायां चतुश्चत्वारिंशत्पञ्चचत्वारिंशत्षट्चत्वारिंशदुत्तरद्विशततमानि त्रीणि द्वाराणि ॥५६॥

महिला गर्भस्थायोग्या यावता कालेन भवति, अबीजश्च--अवीर्यश्च पुरुषो यावता कालेन सम्पद्यते, तथा शुक्ररुधिरौजःपृष्ठकरण्डकपांशुलिकादीनां सर्वेषामपि शरीरस्थितानां परिमाणं वक्तव्यं २४७-२४८, इति षट्पञ्चाशत्तमगाथायां सप्तचत्वारिंशदुत्तराष्टचत्वारिंशदुत्तरद्विशततमे द्वे द्वारे ॥५७॥]

सम्यक्त्वचारित्रादीनामुत्तमगुणानामेकदा प्राप्तानां परिपतितानां सतां पुनर्लाभेऽन्तरं कियदुत्कृष्टं भवति ? तथा न लभन्ते मानुषत्वं सत्त्वा-जीवा येऽनन्तरमुद्धृताः २४९-२५० इति सप्तपञ्चाशत्तमगाथायामेकोनपञ्चाशदुत्तरपञ्चाशदुत्तरद्विशततमे द्वे द्वारे ॥५८॥

पूर्वाङ्गस्य-सङ्ख्याविशेषस्य परिमाणं २५१, तथा पूर्वस्य परिमाणं २५२, तथा लवणस्य-एकदेशेन समुदायावगमाल्लवणसमुद्रस्य सम्बन्धिनी या शिखा मध्ये ऊर्ध्वं वर्तते तस्या मानं २५३, तथा उत्सेधाङ्गुलाऽऽत्माङ्गुलप्रमाणाङ्गुलानां प्रमाणानि २५४, इत्यष्टपञ्चाशत्तमगाथायामेकपञ्चाशदुत्तरद्विशततमादीनि चतुष्पञ्चाशदुत्तरद्विशततमान्तानि चत्वारि द्वाराणि ॥५९॥

तमस्कायस्य स्वरूपं २५५, तथाऽनन्तानां षट्कं २५६, तथाऽष्टकं निमित्तानां २५७ तथा मानं चोन्मानं च प्रमाणं च वाच्यं २५८, तथाऽष्टादश भक्ष्यभोज्यानि, भक्ष्यन्त इति भक्ष्याणि-

गुडधानादीनि भुज्यन्त इति भोज्यानि–शाल्योदनादीनि २५९ इत्येकोनषष्टितमगाथायां पञ्चपञ्चाशदुत्तर-द्विशततमादीनि एकोनषष्ट्युत्तरद्विशततमान्तानि पञ्च द्वाराणि ॥६०॥

षट्स्थानेषु वृद्धिर्हानिश्च वस्तूनां विधेया २६०, तथाऽपहर्तुं–अन्यत्र देशान्तरे नेतुं देवादिभिर्यानि न शक्यन्ते २६१, तथा अन्तरद्वीपा वक्तव्याः २६२, तथा जीवाजीवानामल्पबहुत्वं २६३ च समुच्चये, इति षष्टितमगाथायां षष्ट्युत्तरद्विशततमादीनि त्रिषष्ट्युत्तरद्विशततमान्तानि चत्वारि द्वाराणि ॥६१॥

सङ्ख्या युगप्रधानसूरीणां श्रीवीरजिनस्य तीर्थे, तथा उत्सर्पिण्यामन्तिमजिनसम्बन्धितीर्थस्याविच्छेद-मानं २६४–२६५ च समुच्चये, इत्येकषष्टितमगाथायां चतुःषष्टिपञ्चषष्ट्युत्तरद्विशततमे द्वे द्वारे ॥६२॥

देवानां प्रविचारः–अब्रह्मसेवा २६६, तथा स्वरूपमष्टानां कृष्णराजीनां भणनीयं २६७, तथा स्वा-ध्यायस्याकरणं कदेति शेषः २६८, तथा नन्दीश्वराभिधानस्याष्टमद्वीपस्य सम्बन्धिन्याः स्थितेर्भणनं २६९, इति द्वाषष्टितमगाथायां षट्षष्ट्युत्तरद्विशततमादीन्येकोनसप्तत्युत्तरद्विशततमान्तानि चत्वारि द्वाराणि ॥६३॥

लब्धयः–आमर्षौषध्यादयः २७०, तथा तपांसि–इन्द्रियजयादीनि, पुंसा निर्देशः प्राकृतत्वेन २७१, तथा पातालकलशाः समुद्रमध्यवर्तिनः २७२ तथा आहारकशरीरस्वरूपं च २७३, तथा देशा अनार्याः २७४, तथा त एवाऽऽर्याः २७५, तथा सिद्धानामेकत्रिंशद्गुणाः २७६, इति त्रिषष्टितमगाथायां सप्तत्यु-त्तरद्विशततमादीनि षट्सप्तत्युत्तरद्विशततमान्तानि सप्त द्वाराणि ॥६४॥

समयात्–सिद्धान्तात्समुद्धृतानामाशास्त्रसमाप्तिं–शास्त्रसमाप्तिं यावदेषां द्वाराणां नामोत्कीर्तनपूर्वा एतद्द्वारविषया विचारणा–विवरणरूपा ज्ञेयेति ॥६५॥

तत्र 'चिइवंदण' त्ति प्रथमद्वारं विवरीतुमाह —

[सोलस पुण आगारा दोसा एगूणवीस उस्सग्गे ।
छच्चिय निमित्त हुंति य पंचेव य हेयवो भणिया ॥१॥
अहिगारा पुण बारस दंडा पंचेव होंति नायव्वा ।
तिन्नेव वंदणिज्जा थुइओ पुण होंति चत्तारि ॥ २ ॥
तिन्नि निसीहीएमाइ तीस तह संपयाओ सत्तेव ।
चिइवंदणंमि नेयं सत्तेवऊसयं तु ठाणाणं । ३ ।
अगणीओ छिंदिज्ज व बोहीखोहाइदीहडक्को वा ।
इय एवमाइएहि अब्भग्गो होज्ज उस्सग्गो ॥ ४ ॥]

तिन्नि निसीहिय तिन्नि य पयाहिणा तिन्नि चेव य पणामा ।
तिविहा पूया य तहा अवत्थतियभावणं चेव ॥ ६६ ।
तिदिसिनिरिक्खणविरई तिविहं भूमीपमज्जणं चेव ।
वन्नाइतियं मुद्दातियं च तिविहं च पणिहाणं ॥६७॥
इय दहतियसंजुत्तं वंदणयं जो जिणाण निक्काले ।
कुणइ नरो उवउत्तो सो पावइ निज्जरं विउलं ॥६८।

घरजिणहरजिणपूया वावारच्चायओ निसीहितिगं ।
पुप्फक्खयत्थुईहिं तिविहा पूया मुणेयव्वा ॥६९॥

होइ [1]छउमत्थ[2]केवलि[3]सिद्धत्तेहिं जिणे अवत्थतिगं ।
[1]वण्ण[2]त्थाऽऽल[3]क्खणओ वण्णाइतियं वियाणिज्जा ॥७०॥

जिणमुद्दा जोगमुद्दा मुत्तासुत्ती उ तिन्नि मुद्दाओ ।
कायमणोवयणनिरोहणं च तिविहं च पणिहाणं ॥७१॥

पंचंगो पणिवाओ थयपाढो होइ जोगमुद्दाए ।
वंदण जिणमुद्दाए पणिहाणं मुत्तसुत्तीए ॥७२॥

दो जाणु दुन्नि करा पंचमगं होइ उत्तमंगं तु ।
समं संपणिवाओ नेओ पंचंगपणिवाओ ॥७३॥

अन्नोऽन्नंतरअंगुलि कोसागारेहिं दोहिं हत्थेहिं ।
पेट्टोवरिकुप्परसंठिएहिं तह जोगमुद्दत्ति ॥७४॥

चत्तारि अंगुलाइं पुरओ ऊणाइं जत्थ पच्छिमओ ।
पायाणं उस्सग्गे एसा पुण होइ जिणमुद्दा ॥७५॥

मुत्तासुत्तीमुद्दा समा जहिं दोवि गब्भिया हत्था ।
ते पुण निलाडदेसे लग्गा अण्णे अलग्गंति ॥७६॥

'तिन्निनिसीहि' त्यादि गाथात्रयं, अत्रैतद्गाथात्रयप्रतिपादितानि दश च नानि त्रिकाणि च तैः संयुक्तं, 'तिगदुगसंजुत्त' मिति पाठे त्रिकाणां दशकं तेन संयुक्तमिति व्याख्येयं. वन्दनकं यः कश्चिद्भव्यो जिनानां–तीर्थकृतां त्रिकालं त्रिसन्ध्यं करोति उपयुक्तः–सोपयोगः सन् स प्राप्नोति सर्वकर्मक्षयकरीं मोक्ष-लक्ष्मीविधायिनीं च निर्जरां विपुलामिति. कुत्रापि **'सो पावइ सासयं ठाणं'** इति पाठः, तत्रापि शाश्व-तं स्थानं–मोक्षमित्यर्थः, इति गाथात्रयसमुदायार्थः. विस्तरार्थस्तु प्रतिपदमासां कथयिष्यते । अत्र च चैत्य-वन्दनं कीदृशेन विधिना विधेयमिति विधिस्वरूपमेव निरूपयिष्यते न पुनश्चैत्यवन्दनसूत्रव्याख्यां करिष्यतेऽतिविस्तरभयात्, सा च **ललितविस्तरादिभ्यो** बुद्धिमद्भिर्बोद्धव्या, एवमन्यत्रापि वन्दन-कसूत्रादौ प्रायेण यथास्थानं विज्ञेयं । तत्र चैत्यानि वन्दितुकामः कश्चिन्महर्धिको राजादिर्भवेत् सामान्य-विभवो वा, तत्र यदि राजादिस्तदा **सव्वाए इड्ढीए सव्वाए दित्तीए सव्वाए जुईए सव्वबलेणं सव्वपोरिसेणं'** [सर्वया ऋद्ध्या सर्वया दीप्त्या सर्वया युक्त्या सर्वबलेन सर्वपौरुषेण] इत्यादिवचनात् शासनप्रभावनानिमित्तं महद्ध्या चैत्यादिषु याति. अथ सामान्यविभवस्तदौद्धत्यादिपरिहारेण लोकोपहासं परिहरन् व्रजतीति । **तत्र चैत्यप्रवेशेऽयं विधिः**–पुष्पताम्बूलादिसचित्तद्रव्याणां परिहारेण कटककुण्डल-केयूरहाराद्युचिताचित्तद्रव्याणामपरिहारेण एकवस्त्रपरिधानः एकेन चोपरितनवस्त्रेण कृतोत्तरासङ्गः, एतच्च पुरुषं प्रति द्रष्टव्यं स्त्री तु सविशेषं प्रावृत्ताङ्गी विनयादवनततनुलतेति, जिनप्रतिमादर्शने शिरस्यञ्जलिकरणेन

मनस एकाग्रताकरणेन चेति पञ्चविधाभिगमनेन नैषेधिकीपूर्वकं प्रविशति, यदुक्तं भगवत्यां—"सचित्ताणं दव्वाणं विउसरणयाए[1] अचित्ताणं दव्वाणं अविउसरणयाए[2] एगसाडिएणं उत्तरासङ्गेणं[3] चक्खुफासे अंजलिपग्गहेणं[4] मणसो एगत्तीकरणेणं[5]" ति, [सचित्तानां द्रव्याणां व्युत्सर्जनेन अचित्तानां द्रव्याणामव्युत्सर्जनेन एकशाटकेनोत्तरासङ्गकरणेन चक्षुःस्पर्शेऽञ्जलिप्रग्रहेण मनस एकत्वीकरणेन] क्वचित् 'अचित्ताणं दव्वाणं विउसरणयाए' इति पाठः, अत्र अचित्तानां द्रव्याणां—छत्रादीनां व्यवसरणेन—व्युत्सर्जनेन परिहारेणेत्यर्थः, यस्तु राजादिश्चैत्यं प्रविशति स तत्काले राजचिह्नानि मुकुटचामरादीनि परिहरति; तथा च सिद्धान्तः—"अवहट्टु रायककुहाइं पंच वरराययककुहरूवाइं। खग्गं छत्तोपाणह मउडं तह चामराओ य ॥ १ ॥" [त्यक्त्वा राजचिह्नानि पञ्च वरराजचिह्नरूपाणि। खड्गः छत्रं उपानही मुकुटः तथा चामरांश्च ॥ १ ॥] इत्यादि,

'अवहट्टु'त्ति मुक्त्वा राजककुदानि—राजचिह्नानीत्यर्थः। चैत्यगृहे च प्रविशन् नैषेधिकीत्रयं करोति—जिनगृहस्य द्वारभागे मध्यप्रदेशे गर्भगृहदेशे च, तत्र प्रथमा गृहादिविषये कायकार्याणां व्यापाराणां निषेधेन निर्वृत्ता नैषेधिकी, द्वितीया तद्विषय एव वचनव्यापारविधेयानां कार्याणां निषेधेन निर्वृत्ता, तृतीया तु गृहादिविषय एव मनसा चिन्तनीयानां कार्याणां निषेधेन निर्वृत्तेति सम्प्रदायः, सूत्रकारेण तु नैषेधिकीत्रितयं विभुञ्जता—'घरजिणहरजिणपूयावावारच्चायओ निसीहत्तिगं' इत्युक्तं, तत्राप्ययमर्थः—प्रथमनैषेधिक्यां गृहादिगतसकलसावद्यव्यापारपरम्पराप्रतिषेधः प्रतिपादितः, द्वितीयनैषेधिक्यां जिनगृहविष-

यणपाणादिघटापनप्रभृतिसर्वसावद्यव्यापारपूरः प्रत्यपेधि, तृतीयनैषेधिक्यां तु पुष्पफलपानीयप्रदीपप्रमुखपदार्थमार्यसमानयनादिरूपो जिनपूजाविषयोऽपि सावद्यव्यापारश्चैत्यवन्दनावसरे प्रत्यषेध्यत, जिनपूजां कृत्वा तृतीया नैषेधिकी विधीयत इति भावः । तथा **सर्वत्रिकाणि** सूत्रकारेण न विवृतानि किंतु विषमतराणि कानिचिदेव अस्माभिश्चाविवृतानामपि संक्षेपेण स्वरूपं निरूप्यते १, यथा **तिस्रः प्रदक्षिणा** ज्ञानादित्रयाराधनाय जिनप्रतिमादेर्दक्षिणभागादारभ्य सृष्टिक्रमेणैव कर्तव्याः, सर्वं हि प्रायेणोत्कृष्टं वस्तु कल्याणकामैर्दक्षिणभाग एव विधेयमिति २, तदनन्तरं प्रतिमादिसम्मुखं भक्त्यतिशयख्यापनाय शिरसा भूमिपीठस्पर्शनरूपास्त्रयः **प्रणामा** विधेयाः ३. **'तिविहापूय'त्ति** सूत्रकृद्विवृणोति --**'पुप्फक्खयगंधुईहिं तिविहा पूया सुणेयव्वा'** इति पुष्पैर्विचित्रैः सुगन्धिभिः अक्षतैः शालितण्डुलादिभिः स्तुतिभिश्च-लोकोत्तरसद्भूततीर्थकृद्गुणवर्णनपराभिः संवेगजनिकाभिस्त्रिविधा पूजा ज्ञातव्येति । अत्र च गाथायां पुष्पादीन्युपलक्षणभूतान्येव श्रीभगवतः पूजाविधौ प्रतिपादितानि, ततो निःसपत्नरत्नसुवर्णमुक्ताभरणादिभिरलङ्करणं विचित्रपवित्रवस्त्रादिभिः परिधापनं पुरतश्च सिद्धार्थकशालितण्डुलादिभिरष्टमाङ्गलिकालेखनं तथा प्रवरबलिजलमङ्गलदीपदधिघृतप्रभृतिपदार्थढौकनं भगवतश्च भालतले गोरोचनामृगमदादिभिस्तिलककरणं तत आरात्रिकाद्युत्तारणं, यदाहुः **पूर्वगणभृतः**

"गंधवरधूयसव्वोसहीहिं उदगाइएहिं चित्तेहिं । सुरहिविलेवणवरकुसुमदामवल्लिदीवणेहिं च ॥ १ ॥
सिद्धत्थयदहिअक्खयगोरोयणमाइएहिं जहलाभं । कंचणमुत्तियरयणाइदामएहिं च विविहेहिं ॥ २ ॥
पवरेहि साहणेहिं पायं भावोऽवि जायए पवरो । न य अन्नो उवओगो एएसि सया य लट्ठयरो ॥ ३ ॥ इति ।

[गन्धवरधूपसर्वोषधिभिरुदकादिकैश्चित्रैः । सुरभिविलेपनवरकुसुमदामबलिदीपैश्च ॥ १ ॥
सिद्धार्थकदध्यक्षतगोरोचनादिभिर्यथालाभं । काञ्चनमौक्तिकरत्नादिदामभिश्च विविधैः ॥२॥
प्रवरैः साधनैः प्रायो भावोऽपि जायते प्रवरः । न चान्य उपयोग एतेषां सकाशाच्च लघुतरः ॥३॥]

एवं भगवन्तं पूजयित्वा ऐर्यापथिकीप्रतिक्रमणपूर्वकं शक्रस्तवादिदण्डकैश्चैत्यवन्दनं विधाय स्तोत्रै-रुत्तमैरुत्तमकविविरचितैर्भगवतो गुणोत्कीर्तनं कुर्यात् , स्तोत्राणां चोत्तमत्वमेवमभिहितं, यथा–

"दण्डक्रियागुणगतैर्गम्भीरैर्विविधवर्णसंयुक्तैः । आशयविशुद्धिजनकैः संवेगपरायणैः पुण्यैः ॥१॥
पापनिवेदनगर्भैः प्रणिधानपुरस्सरैर्विचित्रार्थैः । अस्खलितादिगुणयुतैः स्तोत्रैश्च महामतिग्रथितैः॥२॥" इति,

यथा–"नानन्दोदकलेशलम्पटपुटं स्निग्धेऽपि बन्धौ जने, न क्रोधारुणिमास्पदं कृतबहुक्लेशेऽपि शत्रौ क्वचित् ।
ध्यानावेशविलोकिताखिलजगल्लक्ष्मीं क्रियाद्वश्चिरं, चक्षुर्युग्ममयुग्मबाणजयिनः श्रीवर्धमानप्रभोः ॥१॥
कृत्वा हाटककोटिभिर्जगदमद्दारिद्र्यमुद्राकथं, हृत्वा गर्भशयादपि स्फुटमरीन्मोहादिवंशोद्भवान् ।
तप्त्वा दुष्करमस्पृहेण मनसा कैवल्यहेतुं तपस्त्रेधा वीर्यशो दधद्विजयतां वीरस्त्रिलोकीगुरुः ॥२॥

यथा वा–संसारमारवपथे पतितेन नाथ !, मीमन्तिनीमरुमरीचिविमोहितेन ।
दृष्टः कृपारसनिधिस्त्वमतः कुरुष्व, तृष्णापनोदवशतो जिन ! निर्वृतिं मे ॥३॥"

इत्यादिस्वरूपैः स्तोत्रैर्गुणोत्कीर्तनरूपा पूजा श्रीभगवतो विधेया, न पुनर्व्रीडामङ्गलातङ्कदायिभिरेवंविधैर्यथा–

"उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा, धृत्वा चान्येन वासो विगलितकबरीभारमंशं वहन्त्याः ।

भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः, शश्वन्मालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥१॥

तथा–शश्वत्यै वोऽस्तु कल्पद्रुम जगति पत्युर्यदीयां लिपिं, क्वापि क्वापि गणाः पठन्ति पदशोनातिप्रसिद्धाक्षराम्।
विश्वं स्रक्ष्यति रक्ष्यति क्षितिमपामीशिष्यते शिष्यते, नागैरागिषु रंस्यतेऽत्स्यति जगन्निर्वेक्ष्यति द्यामिति ॥२॥

उपलक्षणत्वाच्च त्रिविधपूजायां अष्टप्रकाराऽपि सकलजनानन्ददायिनी अर्हतां पूजा विज्ञेयेति, यदुक्तम्-

"वरगंधधूपचोक्खक्खएहिं कुसुमेहिं पवरदीवेहिं। नेवेज्जफलजलेहि य जिणपूआ अट्ठहा होइ ॥१॥"

[वरगन्धधूपचोक्षाक्षतैः कुसुमैः प्रवरदीपैः। नैवेद्यफलजलैश्च जिनपूजाऽष्टधा भवति ॥१॥] ४ इति।

"अवस्थात्रिकभावणं चेवं" त्ति व्याचष्टे– **होई**'त्यादि, जिने छद्मस्थकेवलिसिद्धत्वलक्षणमवस्थात्रितयं यथास्वरूपं भावनीयमिति भावः, तत्र **छद्मस्थावस्थैवं** भगवतो भावनीया।

यथा–'विस्फूर्जन्मदवारिवारणघटं रङ्गत्तुरङ्गोद्भटं, हर्षोन्मासिविलासिनीव्यतिकरं निःसीमसम्पद्धरम्।
राज्यं राज्यसुखं विमुच्य भगवान्निःसङ्गतां योऽग्रहीद्वन्द्यैरेष जनैरचिन्त्यमहिमा विश्वप्रभुर्वीक्ष्यते ॥१॥

धर्मध्याननिबद्धबुद्धिरसुहृद्भवतेष्वभिन्नाशयो, जाग्रद्ज्ञानचतुष्टयस्तृणमणिस्वर्णोपलादौ समक्।
निःसङ्गं विहरन्निदानरहितं कुर्वन् विचित्रं तपः, सत्पुण्यैरवलोकयते त्रिजगतीनाथः प्रशान्ताकृतिः ॥२॥

इत्यादि, **कैवल्यावस्था** पुनरेवं भावनीया, यथा–'रागाद्युत्कटशत्रुसंहतिकरं यद्विक्रमक्रीडितं,

लोकालोकविलोकनैकरसिकं यद् ज्ञानविस्फूर्जितम् । मूलोन्मूलितविश्वसंशयशतं यद्भारतीवल्गितं, धन्यैरेव जनैर्जगत्त्रयगुरुः सोऽयं सदाराध्यते ॥ १ ॥

अहो विहितसंमदा त्रिभुवने विभूतिर्विभोरहो कृतमहोत्सवा त्रिजगतीदृशामाकृतिः ।
अहो वचनचातुरी मुषितकल्मषा देहिनामहो वशितविष्टपं सुगुणवेष्टितं चेष्टितम् ॥ २ ॥

सिद्धावस्थाप्येवं त्रिजगतीपतेर्भावनीया, यथा—'यस्य ज्ञानमनन्तमप्रतिहतं ज्ञेयस्थितौ दर्शनं, दोषत्यक्तमनन्तमुत्तमतमोऽनन्तः सुखानां चयः । वीर्यस्यानुपमः स कोऽपि महिमाऽनन्तस्त्रिलोकाद्भुतः, सिद्धत्वे प्रथितः प्रभुः स भगवान् धन्यैः सदा ध्यायते ॥ १ ॥' ५।

तथा **त्रिदिग्निरीक्षणविरतिः** यस्यां दिशि तीर्थकृत्प्रतिमा तन्मम्मुखमेव निरीक्षणं विधेयं न पुनरन्यदिक्त्रयसम्मुखं, चैत्यवन्दनस्यानादरतादिदोषप्रसङ्गात् ६ ।

तथा चैत्यवन्दनं कर्तुकामेन सत्त्वादिरक्षणनिमित्तं सम्यक् चक्षुषा निरीक्ष्य निजचरणनिक्षेपभूमेः **प्रमार्जनं त्रिवारं** विधेयं, तच्च गृहिणा वस्त्राञ्चलेन यतिना तु रजोहरणेनेति ७ ।

'वन्नाइतिय'मिति विवृणोति—**'वन्नत्थालंबणओ वन्नाइतियं वियाणेज्ज'**त्ति वर्णा—अकारककारादयः अर्थः—शब्दाभिधेयं आलम्बनं—प्रतिमादिरूपं एतस्मिंस्त्रितयेऽप्युपयुक्तेन भवितव्यं, तत्रालम्बनं यथा—'अष्टाभिः प्रातिहार्यैः कृतसकलजगद्विस्मयः कान्तकान्तिः, सिञ्चन् पीयूषपूरैरिव सदसि जनं स्मेरदृष्टिप्रपातैः । निःशेषश्रीनिदानं निखिलनरसुरैः सेव्यमानः प्रमोदादर्हन्नालम्बनीयः स्फुरदुरुमहिमा वन्द्यमानेन देवः ॥ १ ॥' ८ इत्यादि ।

'मुद्रातिग' चेति व्याचष्टे-जिनमुद्रा योगमुद्रा मुक्ताशुक्तिमुद्रा चेति मुद्रात्रयं ज्ञातव्यं ६ ।

'तिविहं च पणिहाणं' इति विवृणोति-'**कायमणोवयणनिरोहणं च तिविहं च पणिहाणं**' इति कायमनोवचनानामकुशलरूपाणां निरोधनं-नियन्त्रणं शुभानां च तेषां करणमिति, तत्र कायं सुसंवृतं कृत्वा विहितकरकुड्मलकोशो मनसि तमेवाचिन्त्यचिन्तामणिचारुचरितं वंद्यमानमर्हन्तं निवेश्य निजमधुरिमाधरीकृतमधुमाधुर्यया वाचैवं प्रणिधानमाधत्ते ।

यथा—'जय **त्रिजगतीपते** शरण ! देहिनां श्रीजिनप्रसादवशतस्तव स्फुरतु मे विवेकः परः । भवेद्भवविरागिता भवतु संयमे निर्वृतिः, परार्थकरणोद्यमः सह गुणार्जनैर्जायताम् ॥१॥' इत्यादि १०।

तत्र मुद्रात्रयमध्ये यस्या यत्र व्यापारस्तां तत्र दर्शयति-'**पंचंगे**'त्यादि पञ्चाङ्गानि-अवयवा विवक्षितव्यापारवन्ति यत्र स पञ्चाङ्गः प्रणिपातः-प्रणिपातदण्डकपाठस्यादाववसाने च प्रणामो भवति कर्तव्य इति शेषः, यद्यपीह पञ्चाङ्गः प्रणिपात इत्युक्तं तथापि पञ्चाङ्गमुद्रया प्रणिपात इति द्रष्टव्यं, मुद्राणामेवाधिकृतत्वात्, युक्तं च पञ्चाङ्ग्या अपि मुद्रात्वमङ्गविन्यासविशेषरूपत्वाद्योगमुद्रावदिति । तथा स्तवपाठः शक्रस्तवादिरूपो भवति योगमुद्रया, वन्दनं-चैत्यवन्दनं '**अरहंतचेइयाणं**' इत्यादिकं जिनमुद्रया, अनुस्वारश्चात्र लुप्तो द्रष्टव्यः, इयं च पादाश्रिता योगमुद्रा हस्ताश्रितेत्युभयोरपि चैत्यवन्दने व्यापारः, प्रणिधानं '**जय वीयराये**'त्यादिकं मुक्ताशुक्तिमुद्रयेति । अथ पञ्चाङ्गप्रणिपातलक्षणनिरूपणापूर्वकं एतासामेव मुद्राणां लक्षणं दर्शयति-'**दो जाणू**'इत्यादि, तत्र पञ्चभिरङ्गैः सम्यक्-समीचीनतया प्रकर्षेण निपतनं-संप्रणिपातो ज्ञेयः पञ्चाङ्गप्रणिपातः, तत्र कानि पञ्चाङ्गानीति दर्शयति-द्वे जानुनी द्वौ करौ पञ्चमकं भवत्युत्तमाङ्गं च,

तुशब्दः समुच्चयार्थश्चशब्दार्थः, तथा योगमुद्रा अन्योऽन्यान्तरप्रविष्टाभिरङ्गुलीभिः कृत्वा पद्मकोशाकाराभ्यां द्वाभ्यां हस्ताभ्यामुदरोपरिसंस्थापितकूर्पराभ्यां भवतीति, एषा पुनर्भवति जिनमुद्रा यत्र पादयोरुत्सर्गेऽन्तरं भवति चत्वार्यङ्गुलानि पुरतः-अग्रभागे न्यूनानि च तानि पश्चिमभागे इति, मुक्ताशुक्तिमुद्रा भवति यत्र समौ मिलितौ द्वावपि गर्भितौ-उभयतोऽपि सोल्लासौ न पुनश्चिप्पटौ हस्तौ भवतः, तौ पुनर्ललाटदेशे लग्नौ कार्यावित्येके सूरयः प्रतिपादयन्ति, अन्ये पुनस्तत्रालग्नावेव वदन्ति, नेत्रमध्यभागवर्त्याकाशगतावित्यर्थः ॥७६॥ पुनर्विधिविशेषमाह—

दाहिणबाहमंगठिओ नरनारिगणोऽभिवंदए देवे ।
उक्किट्ठ सट्ठिहत्थुग्गहे जहन्नेण करनवगे ॥ ७७ ॥
अट्ठट्ठनवट्ठ य अट्ठवीस सोलस य वीस वीसामा ।
मंगलइरियावहिया सक्कत्थयपमुहदंडेसु ॥ ७८ ॥
पंचपरमेट्ठिमंते पए पए सत्त संपया कमसो ।
पञ्जन्तसत्तरक्खरपरिमाणा अट्ठमी भणिआ ॥ ७९ ॥
इच्छ १ गम २ पाण ३ ओसा ४ जे मे ५ एगिंदि ६ अभिहया ७ तस्स ८।
इरियाविस्सामेसुं पढमपया हुंति दट्ठव्वा ॥ ८० ॥
अरिहं १ आइग २ पुरिसो ३ लोगो ४ भय ५ धम्म ६ अप्प ७ जिण ८ सव्वा ९।
सक्कत्थयसंपयाणं पढमुच्चिंगणपया नेया ॥ ८१ ॥

अरिहं १ वंदण २ सद्धा ३ अण्णत्थू ४ सुहुम ५ एव ६ जा ७ताव ८ ।
अरिहंतचेइयथए विस्सामाणं पया पढमा ॥ ८२ ॥
अट्ठावीसा सोलस वीसा य जहक्कमेण निद्दिट्ठा ।
नामजिणट्ठवणाइसु वीसामा पायमाणेणं ॥ ८३ ॥

'दाहिण'त्ति प्रतिमाया दाक्षिणभागे स्थितः पुरुषप्राधान्याच्चरगणोऽभिवन्दते देवान् नारीगणश्च वामपार्श्वे स्थितः, तथाप्युत्कृष्टतःषष्टिहस्तप्रमितेऽवग्रहे–देशविशेषे स्थितः सन् वन्दते जघन्यतस्तु करनवके–नवहस्तप्रमिते देशे, उच्छ्वासनिःश्वासादिजनिताऽऽशातना परिहारायेति ॥७७॥

इदानीं पञ्चमङ्गलैर्यापथिकीशक्रस्तवादीनां सम्पत्प्रमाणलक्षणं विधिविशेषमाह–'अट्ठे'त्यादि पञ्चमङ्गले–नमस्कारेऽष्टौ सम्पदः, ऐर्यापथिक्यामष्टौ, शक्रस्तवे नव, **'अरिहंतचेइयाणं'** इत्यादिदण्डकेऽष्टौ, **'लोगस्सुज्जोयगरे'** इत्यस्मिन् दण्डकेऽष्टाविंशतिः, **'पुक्खरवरदीवड्ढे'** इत्यत्र षोडश, **'सिद्धाणं बुद्धाणं'** इत्यस्मिंश्च दण्डके विंशतिः सम्पदः, अन्या एव पर्यायमाह–**'वीसामा'** इति विश्राम्यते–विरम्यते एष्विति विश्रामाः–सम्पदो विश्रमणस्थानानीतियावत् ॥ ७८ ॥

तत्र **पञ्चपरमेष्ठी**त्यादि, पञ्चपरमेष्ठिमन्त्रे पदे पदे–विवक्षिताभिधेययुक्ते **'नमो अरहंताणं'** इत्यादिके, न पुनः सुप्तिङ्युक्ते· सप्त सम्पदः क्रमशो विज्ञेयाः, अष्टमी पुनः पर्यन्ते सप्तदशाक्षरप्रमाणा **'मंगलाणं च सव्वेसिं पढमं हवइ मंगलं'** इतिस्वरूपा भणिता गणधरादिभिः, अन्ये तु पर्यन्तवर्तिनीस्तिस्रः

सम्पद एवं मन्यन्ते, यथा—'**एसो पंच नमुक्कारो सव्वपावप्पणासणो**' इति षोडशाक्षरप्रमाणा षष्ठी सम्पत्, '**मंगलाणं च सव्वेसिं**' इत्यष्टाक्षरघटिता सप्तमी सम्पत्, '**पढमं हवइ मंगलं**' इति नवाक्षरनिष्पन्ना अष्टमी सम्पत्, यदुक्तं—'**अंतिमचूलाइ तियं सोलसअट्ठनवक्खरजुयं चेव । जो पढइ भत्तिजुत्तो सो पावइ सासयं ठाणं ॥७६॥**"

[अन्त्यचूलिकायां त्रिकं षोडशाष्टनवाक्षरयुतं चैव । यः पठति भक्तियुक्तः स प्राप्नोति शाश्वतं स्थानं ॥१॥] इति, एवमैर्यापथिकयादिष्वपि सम्पद्विषये यथायथं मतान्तराणि मतिमद्भिर्मन्तव्यानीति । अत्र च यद्यपि '**हवइ होइ**' इत्यनयोरर्थं प्रति न कश्चिद्विशेषः '**होइ मंगलं**' इति च पाठे श्लोको नाधिकाक्षरो भवति तथापि '**हवइ**' इत्येव पठितव्यं, यतो **नमस्कारवलयकादिग्रन्थेषु** सर्वमन्त्ररत्नानामुत्पत्त्याकरस्य प्रथमस्य कल्पितपदार्थकरणैककल्पद्रुमस्य विषविषधरशाकिनीडाकिनीयाकिन्यादिनिग्रहनिरवग्रहस्वभावस्य सकलजगद्वशीकरणाकृष्ट्याद्यव्यभिचारिप्रौढप्रभावस्य चतुर्दशपूर्वाणां सारभूतस्य पञ्चपरमेष्ठिनमस्कारस्य व्याख्यायां प्रस्तुतायां तथाविधप्रयोजनोद्देशेन यन्त्रपद्मादिविरचनायां प्रकृतायां यदा द्वात्रिंशद्दलं पद्ममालिख्यते प्रतिदलं च श्लोकसम्बन्ध्येकैकमक्षरं निवेश्यते तदा नाभौ त्रयस्त्रिंशत्तममक्षरमवश्यं निवेश्यं अन्यथा नाभिभागः शून्य एव स्यात्, मात्रयापि च हीने यन्त्रपद्मादौ निवेश्यमाने महामन्त्रे तत्साध्यविशिष्टाभीष्टपरिपूर्णफलानवाप्तेरिति '**हवइ**' इत्ययमेव पाठो युक्तः, तथा चैतत्**संवादिपूर्वाचार्यकृतप्रकरणवचनं**—"**अट्ठसट्ठिअक्खरपरिमाणु, जिणसासणि नवकार पहाणू । अंतिमचूला तिन्नि पसिद्धा, सोलसअट्ठनवक्खररिद्धा ॥ १ ॥**"

[अष्टषष्ट्यक्षरप्रमाणो जिनशासने नमस्कारः प्रधानः ।
अन्त्यास्तिस्रश्चूलाः प्रसिद्धाः षोडशाष्टनवाक्षरसमृद्धाः ॥ १ ॥]

इत्यादि, ततो नात्राभिमाननर्तनं केनापि कृतमिति विमर्शनीयं निर्मत्सरैरिति । तथा प्रथमपदेषु ज्ञातेषु यस्यां सम्पदि यावन्ति पदानि भवन्ति तस्यां तावन्ति सुखेनैव ज्ञायन्त इत्यत ऐर्यापथिकीसम्पदामष्टानामपि प्रथमपदानि दर्शयति–'इच्छे'त्यादि, अस्या गाथाया अर्थो लिख्यते, यथा–'भीमो भीमसेन' इति न्यायेन ईर्यायाः–ईर्यापथिक्याः विश्रामेषु संपत्सु एतानि इच्छागमादीनि प्रथमपदानि द्रष्टव्यानि, अत्र च प्राकृतत्वात्पुंसा निर्देशः, एवं च **इच्छामि पडिक्कमिउं'** इत्याद्येका सम्पत् , द्वितीया **'गमणागमणे'** इति, तृतीया **'पाणक्कमणे'** इत्यादि, चतुर्थी **ओसाउत्तिंग'** इत्यादि, पञ्चमी **'जे मे जीवा विराहिया'** इति, षष्ठी **'एगिंदिया'** इत्यादि, सप्तमी **'अभिहया'** इत्यादि, अष्टमी **'तस्स उत्तरीकरणेणं'** इत्यादि **'ठामि काउस्सग्गं'** इति पर्यन्तं ॥८०॥

इदानीं शक्रस्तवसम्पदामादिपदानि दर्शयन्ते—**'अरिह'**मित्यादि, अत्र च नव सम्पदो भवन्ति, तत्र प्रथमपदं कर्तृक्रियाप्रतिपादकमेव न तत् सम्पद्ग्रहणेण गृह्यते, ततोऽरिहमित्यनेन पदद्वयं सूचितं, अनेन स्तोतव्यसम्पत्प्रथमा प्रतिपादिता, यतोऽर्हतां भगवतां च स्तोतव्यत्वमुचितं, **'आइगे'**त्यनेनाक्षरत्रयेणाऽऽद्यपदसूचितपदत्रयनिष्पन्ना द्वितीया सम्पद्गणिता, एषा च स्तोतव्यसम्पद एव प्रधानसाधारणासाधारणगुणरूपा हेतुसम्पदिति, यत आदिकरणशीला एव तीर्थकरत्वेन स्वयंसम्बोधतश्चैते भवन्ति, **'पुरिसो'** इत्यनेन गाथावयवेन सूचिताद्यपदा चतुष्पदनिष्पन्ना तृतीया सम्पद्गणिता, एषा च स्तोतव्यसम्पद एवासा-

धारणगुणरूपा हेतुसम्पत्कथिता, पुरुषोत्तमानामेव सिंहपुण्डरीकगन्धहस्तिधर्मभाक्त्वेन स्तोतव्यतोपपत्तेः, 'लोगो' इत्यनेन गाथाक्षरद्वयेन प्रकटिताद्यपदा पञ्चपदनिर्मिता चतुर्थी सम्पदभिहिता, एषा च स्तोतव्यसम्पद एव सामान्येन सर्वजनोपकारित्वलक्षणेनोपयोगसम्पत्, लोकोत्तमत्वलोकनाथत्वलोकहितत्वलोकप्रदीपत्वलोकप्रद्योतकरत्वानां परार्थत्वादिति, 'अभय' इत्यनेन तु गाथावयवेनाभिव्यक्तादिपदा पञ्चाऽऽलापकपरिमाणा पञ्चमी सम्पद्विज्ञेया, एषा चास्या एवोपयोगसम्पदो हेतुसम्पद् ज्ञातव्या, अभयदानश्चक्षुर्दानमार्गदानशरणदानबोधिदानैः परार्थसिद्धेरिति । 'धम्म'त्ति गाथावयवेन ज्ञापिताद्यपदा पञ्चपदघटिता षष्ठी सम्पन्निवेदिता, एषा च स्तोतव्यसम्पद एव विशेषेणोपयोगसम्पद्वोद्धव्या, धर्मदत्वधर्मदेशकत्वधर्मनायकत्वधर्मसारथित्वधर्मवरचातुरन्तचक्रवर्तित्वेभ्य एव तस्याः स्तोतव्यसंपदो विशेषेणोपयोगात्, 'अप्प'त्तिगाथाक्षरद्वयेन निरूपिताद्यपदा आलापकद्वयनिष्पन्ना सप्तमी सम्पदभिहिता, एषा च स्तोतव्यसम्पद एव सकारणा स्वरूपसम्पद्, अप्रतिहतवरज्ञानदर्शनधरा व्यावृत्तच्छद्मानश्च यतोऽर्हन्तो भगवन्तश्च भवन्तीति, 'जिण'त्ति गाथालवेन प्रादुष्कृताद्यपदा आलापकचतुष्टयनिर्मिताऽष्टमी सम्पन्निवेदिता, इयं चात्मतुल्यपरफलकर्तृत्वसम्पत्प्रतिपादिता, जिनज्ञापकत्वतीर्णतारकत्वबुद्धबोधकत्वमुक्तमोचकत्वानामेवंविधस्वरूपत्वादिति, 'सव्व'त्ति गाथाक्षरद्वयेन संसूचिताद्यपदा आलापकत्रयनिर्मिता 'जिणभयाणं' इति पर्यन्ता नवमी सम्पद्, इयं च प्रधानगुणापरिक्षयप्रधानफलप्राप्त्या अभयसम्पदभिहिता, इयं चात्मतुल्यपरफलकर्तृसर्वज्ञसर्वदर्शिनामेव शिवाचलादिस्थानप्राप्तौ जितभयत्वोपपत्तेरिति । एताश्च सम्पदोऽनन्तधर्माध्यासिते वस्तुनि मुख्ये सति मुख्यवृत्त्या सम्भवन्त्येव, न चानन्तधर्मात्मकत्वं वस्तुनोऽनुपपन्नमिति वाच्यं, तस्यान्यत्रास्मद्गुरुप्रणीत-

प्रमाणप्रकाशवादमहार्णवादिमहातर्कग्रन्थेषु विस्तरेण साधितत्वादिति शक्रस्तवसम्पदां प्रथमोल्लिङ्गनपदानि ज्ञेयानि, पुल्लिङ्गनिर्देशश्च प्राकृतत्वाददुष्टः, आलापकाश्चात्र त्रयस्त्रिंशद्विज्ञातव्याः। या च 'जे अईया सिद्धा' इति गाथा साऽप्यवश्यं भणनीया, शक्रस्तवान्ते पूर्वैर्महाश्रुतधरैरभिहितत्वात्, न पुनरौपपातिकादिषु 'नमो जिणाणं जियभयाणं' इति पर्यन्तस्य शक्रस्तवस्य पठितत्वाच्चेयं गाथाऽस्माभिः स्वयं भण्यत इति कुबोधाऽऽग्रहग्रस्तमानसैर्नवनवानल्पविकल्पकल्पनाकुशलैराधुनिकैरिव कैश्चिन्न पठनीया, प्राक्तनैरशठैरनभिमानैर्गीतार्थैः सूरिभिराद्दतस्य पक्षस्यादरणीयत्वादिति ॥८१॥

'अरिहंतचेइयाणं' इति दण्डकेऽष्टौ सम्पदस्तासामाद्यपदनिरूपणार्थमाह—'अरिहं वंदणे'त्यादि तत्रार्हमित्यनेन सूचिताद्यपदा पदद्वयनिष्पन्ना प्रथमा सम्पत्, 'वंदण'मित्यनेन सूचिताद्यपदा पदषट्कनिष्पन्ना द्वितीया सम्पत्, 'सद्धे'ति गाथावयवेन निवेदिताद्यपदा पदसप्तकनिर्मिता तृतीया सम्पत्, 'अन्नत्थू' इति गाथाक्षरत्रयेण निर्मिताद्यपदा पदनवकनिर्मिता चतुर्थी सम्पत्, 'सुहुमेति' गाथावयवेन सूचिताद्यपदा पदत्रयनिष्पन्ना पञ्चमी सम्पत्, 'एवे'ति गाथाक्षरद्वयेन प्रकटीकृताद्यपदा पदषट्कनिष्पन्ना षष्ठी सम्पत्, 'जे'-ति गाथाक्षरेण सूचिताद्यपदा पदचतुष्टयनिष्पन्ना सप्तमी सम्पत्, 'नावे'तिगाथाक्षराभ्यां सूचिताद्यपदा पदषट्कनिष्पन्ना अष्टमी सम्पदिति अर्हच्चैत्यस्तवे विश्रामाणां प्रथमानि पदानि, आद्यानां च पदानां परिज्ञाने मध्यमानि पदानि सुगमान्येवेति ॥८२॥

इदानीं चतुर्विंशतिस्तवदण्डके ज्ञानस्तवदण्डके सिद्धस्तवदण्डके चैकयैव गाथया सम्पत्परिमाणमाह—'अट्ठावीसे'त्यादि, अष्टाविंशतिः षोडश विंशतिश्च यथाक्रमेण—यथासङ्ख्येन निर्दिष्टा—निवेदिता नामजिन-

स्तवनादिषु–'लोगस्सुज्जोयगरे' इत्यादिषु त्रिषु दण्डकेषु विश्रामाः पादमानेन–श्लोकादिचतुर्थभागसङ्ख्ये-येति ॥८३॥

इदानीमस्यां चैत्यवन्दनायां द्वादशाधिकारास्तान् यथायथं दर्शयन्नाह–

दुण्णे गं दुण्णि दुगं पंचेवं कमेण हुंति अहिगारा ।
सक्कत्थयाइसु इहं थोयव्वविसेसविसया उ ॥८४॥
पढमं नमोऽत्थु १ जे अइयसिद्ध २ अरहंतचेइयाणंति ३ ।
लोगस्स ४ सव्वलोए ५ पुक्खर ६ तमतिमिर ७ सिद्धाणं ८ ॥८५॥
जो देवाणवि ९ उज्जिन सेल १० चत्तारि अट्ठ दस दो य ११ ।
वेयावच्चगराण य १२ अहिगारुल्लिंगणपयाइं ॥८६॥
पढमे छट्ठे नवमे दसमे एक्कारसे य भावजिणे ।
तइयंमि पंचमंमि य ठवणजिणे सत्तमे नाणं ॥८७॥
अट्ठमबीयचउत्थेसु सिद्धदव्वारिहंतनामजिणे ।
वेयावच्चगरसुरे सरेमि बारसमअहिगारे ॥८८॥

'दुन्नेग'मित्यादि द्वावधिकारौ शक्रस्तवे, एकोऽर्हच्चैत्यस्तवे, द्वौ चतुर्विंशतिस्तवे, द्वौ श्रुतस्तवे, पञ्चैव सिद्धस्तवदण्डके भवन्त्यधिकाराः, अधिक्रियन्ते–समाश्रीयन्ते इत्यधिकाराः–प्रस्तावविशेषाः, तानाश्रित्य चैत्यवन्दनं विधीयत इति शक्रस्तवादिष्विह स्तोतव्यविशेषविषया इति ॥८४॥

तत्र यथायथं तान्येव दर्शयति–'पढमं नमोऽत्थु'इत्यादि 'नमोऽत्थुणं' इत्यारभ्य 'जियभयाणं' इतिपर्यन्तेन सिद्धिप्राप्तानां भावार्हतां सद्भूतगुणोत्कीर्तनरूपः प्रथमोऽधिकारः, भावार्हन्तोऽत्र स्तुता इत्यर्थः। 'जे अईया सिद्धा' इत्यनेनोपलक्षितया गाथया द्वितीयोऽधिकारः कथितः, अत्र च द्रव्यार्हतां वन्दना विधीयते, द्रव्यभूता अर्हन्तो द्रव्यार्हन्तो येऽर्हत्त्वं–चतुस्त्रिंशदतिशयवत्त्वं प्राप्य सिद्धा ये च तत्प्राप्स्यन्ति क्रमेण तेऽत्र वन्द्यन्ते, यतः—'भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके। तद् द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं प्रोक्तम् ॥१॥'

इति गणधरैर्द्रव्यलक्षणमुक्तं, न च वक्तव्यं–द्रव्यार्हन्तोऽप्यर्हद्भावापन्ना एव वन्दनीयत्वेनाभिमतास्ततः प्रथमाधिकारेणैव भावार्हतां वन्दितत्वात् 'जे य अईया सिद्ध'त्ति पुनरुक्तमिति, यतो वर्तमाना भविष्यन्तश्च जिनाः प्राप्तार्हद्भावा एव वन्दनीयाः न नरकादिभववर्तिनः इत्यस्यार्थस्य ख्यापनार्थमुक्तत्वादेतस्य पदस्येति एष द्रव्यार्हद्वन्दनो द्वितीयोऽधिकारः। तथा येषां देवगृहादौ स्थापितानां जिनबिम्बानां वन्दनं कर्तुमारब्धं तान्यनेन 'अरहंतचेइयाणं' इतिदण्डकेन वन्द्यन्ते इति स्थापनार्हद्वन्दनो नामाऽयं तृतीयोऽधिकारः, 'लोगस्स'त्ति 'लोगस्सुज्जोयगरे' इतिदण्डकेनास्यामवसर्पिण्यामेकक्षेत्रनिवासिनां भव्यजनस्य भवभाविसकलक्लेशापहारकत्वेनामत्रवर्तिनां चतुर्विंशतेरपि तीर्थकृतां नामोत्कीर्तनपुरस्सरं स्तवः क्रियते इति जिननामोत्कीर्तनो नाम चतुर्थोऽधिकारः, 'सव्वलोए' इतिगाथावयवसूचितः 'सव्वलोए अरिहंतचेइयाणं' इत्यादिनोर्ध्वाधोलोकमर्त्यलोकस्थितशाश्वताशाश्वतदेवगृहस्थापितानां श्रीजिनबिम्बानां वन्दनं क्रियते इति सर्वलोकदेवगृहजिनस्थापनास्तवोऽयं पञ्चमोऽधिकारः, तथा 'पुक्खर'त्ति गाथाक्षरत्रयेण निवेदितः 'पुक्ख-

रवरदीवड्ढे' इत्यादिपरिपूर्णगाथाकेन पुष्करवरद्वीपार्धधातकीखण्डजम्बूद्वीपवर्तिनामर्हतां स्तवः क्रियते इति अर्धतृतीयद्वीपवर्तिभावार्हत्स्तवोऽयं षष्ठोऽधिकारः, ननु श्रुतस्तवाधिकार एवेदानीं प्रस्तुतः तत्कथमप्रस्तुतस्तीर्थकृतां स्तवः क्रियते ? इति, सत्यमेतत् , तथापि श्रुतस्य कारणं भगवन्तस्तीर्थकरा एव, तैरेव प्रवर्तितत्वात् , **'अत्थं भासइ अरिहा'** इत्यागमवचनात् , गणधराणामपि सूत्रकर्तृणामर्थस्य तीर्थकरैरेव कथितत्वादिति. अन्यच्च एतदेव श्रुतस्तवे प्रस्तुतेऽपि तीर्थकरस्तवकरणं ज्ञापयति यत्किञ्चित्कार्यजातं क्रियते श्रेयोऽर्थिभिस्तत्सर्वं तीर्थकृन्नमस्कारपुरस्सरमेव करणीयं, इत्थमेव सर्वकल्याणप्राप्तेरिति, **'नमतिमिर'** इतिगाथाक्षरैः सूचिताग्रेतनसूत्रैः श्रुतं स्तूयत इति श्रुतस्तवोऽयं सप्तमोऽधिकारः, **'सिद्धाणं'** इत्यनेन निवेदितसकलगाथाकेन सिद्धस्तुत्यभिधानोऽष्टमोऽधिकारः ॥८५॥

'जो देवाणवि'त्ति गाथाक्षरैः सूचितेन गाथाद्वयेन एतत्तीर्थस्य प्रवर्तकत्वादासन्नतरतया महोपकारकारित्वाद्भगवतो महावीरस्य स्तवस्तन्नमस्कारफलप्रकटनपरो विधीयत इति वीरस्तवो नामायं नवमोऽधिकारः, **'उज्जितसेल'**त्ति अनेनापि पदावयवेन सूचितसकलगाथाकेन सकलत्रिलोकीतिलकायमानस्य भगवतः श्रीनेमिनाथस्य स्तवो विधीयते इति श्रीनेमिनाथस्तवोऽयं दशमोऽधिकारः, **'चत्तारि अट्ठदस दो य'**त्ति अनयाऽपि गाथया चतुर्विंशतेरपि जिनानामाशंसाकरणपूर्वं प्रणिधानं कृतमिति एकादशोऽधिकारः, **'वेयावच्चगराण'**त्ति–अनेनापि सूचित**'वेयावच्चगराणं संतिगराणं'**इत्यादिकायोत्सर्गकरणतदीयस्तुतिदानपर्यन्तेन द्वादशोऽधिकारः कथितः, एतानि **'नमोऽत्थु'** इत्यादीन्यधिकारोल्लिङ्गनपदानि ज्ञेयानीति गाथाद्वयतात्पर्यार्थः ॥८६॥

इदानीं यस्मिन्नधिकारे ये जिनादयो वन्द्यन्ते तान् स्वयमेव सूत्रकारो दर्शयति—'**पढमे लद्धे**'त्यादि गाथाद्वयं, तत्र प्रथमेऽधिकारे शक्रस्तवरूपे '**जियभयाणं**' इतिपर्यन्ते तथा षष्ठे '**पुक्खरवरदीवड्ढे**' इत्यादिरूपे तथा नवमेऽधिकारे '**जो देवाणवि देवो**' इत्यादिरूपे तथा दशमेऽधिकारे '**उज्जिंतसेलसिहरे**' इत्यादिरूपे तथैकादशेऽधिकारे '**चत्तारि अट्ठदस**' इतिस्वरूपे भावजिनान् द्वितीयगाथान्ते '**सरेमि**' इतिक्रियापदकरणात् स्मरामि वन्दनीयतयेति, भावजिनाश्च सकलत्रैलोक्यातिशायिनीमशोकादिविशिष्टाष्टप्रातिहार्यरूपामार्यजनहृदयनयननलिनानां परमोत्सवयामानामपारसंसारपारावारनिमज्जज्जनतोत्तारणतरीकल्पामविकल्पकल्पद्रुमचिन्तारत्नादिभ्योऽप्यसमानमहिमानमुन्मीलन्निर्मलकेवलालोकबलपरिकलितलोकालोककामद्भुतां विभूतिमनुभवन्तस्तीर्थकराः । तथा '**अरिहंतचेइयाणं**' इत्यादिके तृतीयेऽधिकारे '**सव्वलोए अरहंतचेइयाणं**' इत्यादिरूपे पञ्चमे च यथाक्रमं साक्षाद्विवन्दिषितदेवगृहस्थापितप्रतिमारूपान् भवनपतिव्यन्तरज्योतिष्कवैमानिकनन्दीश्वरमन्दरकुलाचलाष्टापदसम्मेतशैलशिखरशत्रुञ्जयोज्जयन्तादिसर्वलोकस्थितशाश्वताशाश्वतदेवगृहस्थापितजिनेन्द्रबिम्बरूपांश्च जिनान् स्मरामीति ॥८७॥

तथा '**तमतिमिरपडल**' इत्यादिके सप्तमेऽधिकारे निखिलकुमतितिमिरनिकरापहारकारि ज्ञानं स्मरामीति, तथा अष्टमे '**सिद्धाणं बुद्धाणं**' इत्यादिरूपे द्वितीये '**जे य अईया सिद्धा**' इतिरूपे चतुर्थे '**लोगस्स उज्जोयगरे**' इत्यादिरूपे च यथासङ्ख्यं सिद्धान् द्रव्यजिनान् नामजिनांश्च स्मरामीति, तथा '**वेयावच्चगराणं करेमि काउस्सग्गं**' इत्यादिरूपे द्वादशेऽधिकारे वैयावृत्यकरसुरान् स्मरामीति ॥८८॥

ननु ज्ञातस्तावच्चारुचैत्यवन्दनविधिः, परमेवंविधविधिविशुद्धं चैत्यवन्दनमहोरात्रमध्ये साधुभिः श्राव-
कैश्च कियतीवारा विधीयत इति ?, तत्राह--

साहूण सत्त वारा होइ अहोरत्तमज्झयारंमि ।
गिहिणो पुण चिइवंदण तिय पंच य सत्त वा वारा ॥८९॥

पडिक्कमणे चेइहरे भोयणसमयंमि तह य संवरणे ।
पडिक्कमण सुयण पडिबोहकालियं सत्तहा जइणो ॥९०॥
पडिक्कमओ गिहिणोवि हु सत्तविहं पंचहा व इयरस्स ।
होइ जहण्णेण पुणो तीसुवि संझासु इय तिविहं ॥९१॥
नवकारेण जहन्ना दंडकथुइजुयलमज्झिमा नेया ।
उक्कोसा विहिपुव्वगसक्कत्थयपंचनिम्माया ॥९२॥

'साहूण सत्त वारे'त्यादि, साधूनां सप्त वारा अहोरात्रमध्ये भवति चैत्यवन्दनं, गृहिणः-श्रावकस्य पुनश्चैत्यवन्दनं प्राकृतत्वाल्लुप्तप्रथमैकवचनानन्तमेतत् तिस्रः पञ्च सप्त वा वारा इति ॥८९॥

तत्र साधूनामहोरात्रमध्ये कथं तत्सप्त वारा भवतीत्याह--'पडिक्कमणे'त्यादि, प्राभातिकप्रतिक्रम-णपर्यन्ते १ ततश्चैत्यगृहे २ तदनु भोजनसमये ३ तथाचेति समुच्चये भोजनानन्तरं च संवरणे-संवरणनि-मित्तं प्रत्याख्यानं हि पूर्वमेव चैत्यवन्दने कृते विधीयते ४, तथा सन्ध्यायां प्रतिक्रमणप्रारम्भे ५ तथा

स्वःषसमये ६ तथा निद्रामोचनरूपप्रतिबोधकालिकं च ७ सप्तधा चैत्यवन्दनं भवति, यतेर्जातिनिर्देशादेकवचनं यतीनामित्यर्थः ॥९०॥

गृहिणः कथं सप्त पञ्च तिस्रो वा वारांश्चैत्यवन्दनमित्याह–'**पडिक्कमओ**'त्ति, द्विसन्ध्यं प्रतिक्रमतो गृहस्थस्यापि यतेरिव सप्तवेलं चैत्यवन्दनं भवति, यः पुनः प्रतिक्रमणं न विधत्ते तस्य पञ्चवेलं, जघन्येन तिसृष्वपि सन्ध्यासु चैत्यवन्दनमिति त्रिविधम् ॥९१॥

नन्वेतस्याश्चैत्यवन्दनायाः किमेक एव प्रकारः ? किं वा जघन्यादिकृतं प्रकारान्तरमप्यस्ति ?. बाढमस्तीत्याह—'**नवकारेणे**'त्यादि, जघन्यमध्यमोत्कृष्टभेदेन त्रिविधं तावच्चैत्यवन्दनं, तत्रैकेन '**नमो अरिहंताणं**' इत्यादिना यदिवा–,पायान्नेमिर्जिनः स यस्य रुचिभिः श्यामीकृताङ्गस्थितावग्रे रूपदिदृक्षया स्थितवति प्रीते सुराणां प्रभौ । काये भागवते च नेत्रनिकरैर्बृंहद्विषो लाञ्छिते, सम्भ्रातास्त्रिदशाङ्गनाः कथमपि ज्ञात्वा स्तवं चक्रिरे ॥१॥

इत्यादिरूपेण स्तवेन जघन्या चैत्यवन्दना, अन्ये पुनः प्रणाममात्ररूपां जघन्यां चैत्यवन्दनां वदन्ति, प्रणामस्तु पञ्चधा भवति, यथा–एकाङ्गः शिरसो नामे, द्व्यङ्गश्च करयोर्द्वयोः । त्रयाणां नमने त्र्यङ्गः, करयोः शिरसस्तथा ॥१॥

चतुर्णां करयोर्जान्वोर्नमने चतुरङ्गकः । शिरसः करयोर्जान्वोः, पञ्चाङ्गः पञ्चमो मतः ॥२॥

इति, मध्यमा तु स्थापनार्हत्स्तवदण्डकैकस्तुतिरूपेण युगलेन भवति, अन्ये त्वेवं व्याख्यानयन्ति-

दण्डकानां–शक्रस्तवादीनां पञ्चकं तथा स्तुतियुगलमिति–समयभाषया स्तुतिचतुष्टयं ताभ्यां या वन्दना सा मध्यमा, साम्प्रतरूढ्या एकवारवन्दनेत्यर्थः, उत्कृष्टा तु विधिपूर्वकशक्रस्तवोपलक्षितपञ्चदण्डकनिर्मिता **'जय वीयराय'** इत्यादिप्रणिधानपर्यन्ता चैत्यवन्दना भवतीति, अन्ये पुनः शक्रस्तवपञ्चकभणनेनोत्कृष्ट-चैत्यवन्दना भवतीति व्याचक्षते, एवं च शक्रस्तवपञ्चकं भवति–उत्कृष्टचैत्यवन्दनया वन्दितुकामः साधु श्रावको वा चैत्यगृहादौ गत्वा यथोचितं प्रतिलेखितप्रमार्जितस्थण्डिलस्त्रैलोक्यगुरौ विनिवेशितनयनमानसः संवेगदैराग्यभरोज्जृम्भमाणरोमाञ्चकञ्चुकितगात्रः प्राप्तप्रकर्षहर्षवशविसर्पद्बाष्पपूरपूर्णनयननलिनः सुदुर्लभं भगवच्चरणारविन्दवन्दनमिति बहुमन्यमानः सुसंवृत्ताङ्गोपाङ्गो योगमुद्रया जिनसम्मुखं शक्रस्तवमस्खलितादिगुणोपेतं पठति, तदनु ऐर्यापथिकीप्रतिक्रमणं करोति, ततः पञ्चविंशत्युच्छ्वासमानं कायोत्सर्गं कृत्वा पारयित्वा **'लोगस्सुज्जोयगरे'** इत्यादि परिपूर्णं भणित्वा जानुनी च भूमौ निवेश्य योजितकरकुड्मलशेखरस्तथाविधसुकविकृतजिननमस्कारभणनपूर्वं शक्रस्तवादिभिः पञ्चभिर्दण्डकैर्जिनमभिवन्दते, चतुर्थस्तुतिपर्यन्ते पुनः शक्रस्तवमभिधाय द्वितीयवेलं तेनैव क्रमेण वन्दते, तदनु चतुर्थशक्रस्तवभणनानन्तरं स्तोत्रं पवित्रं भणित्वा **'जय वीयराय'** इत्यादिकं च प्रणिधानं कृत्वा पुनः शक्रस्तवमभिधत्ते इति, एषा चोत्कृष्टा चैत्यवन्दना ऐर्यापथिकीप्रतिक्रमणपूर्विकैव भवति, जघन्यमध्यमे तु चैत्यवन्दने ऐर्यापथिकीप्रतिक्रमणमन्तरेणापि भवत इति ॥९२॥ **'चंदणयं'** ति द्वितीयं द्वारमधुना व्याख्यायते, तत्राह—

मुहणंतयदेहा[२४]ऽऽवस्सएसु[२५] पणवीस[२६] हुंति पत्तेयं ।
छट्ठाणा[६] छच्च गुणा[६] छच्चेव[६] हवंति गुरुवयणा ॥९३॥

अहिगारिणो य पंच य इयरे पंचेव पंच पडिसेहा ।
एक्कोऽवग्गह पंचाभिहाण पंचेव आहरणा ॥ ९४ ॥
आसायण तेत्तीसं दोसा बत्तीस कारणा अट्ठ ।
बाणउयसयं ठाणाण वंदणे होइ नायव्वं ॥ ९५ ॥

'मुहणंत' इत्यादि गाथात्रयं. मुखस्यानन्तकं-वस्त्रं मुखानन्तकं-मुखवस्त्रिका तच्च देहश्च-कायः आवश्यकानि च द्वयवनतादीनि तेषु प्रत्येकं पञ्चविंशतिः स्थानानि, तथा षट् स्थानानि 'इच्छा यें'-त्यादीनि, तथा षड् गुणाः 'विणओवयारे'त्यादिकाः, तथा पडेव भवन्ति गुरोर्वचनानि 'छंदेणे'-त्यादिनि, प्राकृते लिङ्गमनन्त्रमिति सूत्रे पुंसा निर्देशः ॥ ९३ ॥

तथाऽधिकारिणो येषां वन्दनकं दीयन्ते 'आयरियउवज्झाए' इत्यादयः पञ्च, तथा येषां न दीयते वन्दनकं तेऽपीतरे अनधिकारिणः पञ्चैव 'पासत्थो ओसन्नो' इत्यादयः, तथा पञ्च प्रतिषेधाः 'वक्खित्तपराहुत्ते' इत्यादयः, तथैकोऽवग्रहः 'आयप्पमाणमेत्तो' इत्यादिना भणिष्यमाणस्वरूपः, तथा वन्दनकस्य पञ्चाभिधानानि-'चंदणविइकिइकम्मं' इत्यादीनि पर्याया इत्यर्थः, तथा पञ्चैवोदाहरणानि 'सीयले खुड्डए' इत्यादीनि ॥ ९४॥

तथाऽऽशातनास्त्रयस्त्रिंशत् 'पुरओ पक्खासन्ने' इत्यादिकाः, 'अणाढियं च थद्धं च'

इत्यादयो द्वात्रिंशद्दोषाः, 'पडिक्कमणे सज्झाए' इत्यादीन्यष्टौ कारणानि, एवं सर्वेषु मीलितेषु द्विनवतं शतं १९२ स्थानानां वन्दनके भवति ज्ञातव्यमिति प्रतिद्वारगाथात्रयार्थः ॥९५॥

दिट्ठिपडिलेहणेगा नव अक्खोडा नवेव पक्खोडा ।
पुरिमिल्ला छच्च भवे मुहपुत्ती होइ पणवीसा ॥ ९६ ॥
बाहुसिरमुहहियये पाएसु अ हुंति तिन्नि पत्तेयं ।
पिट्ठीइ हुंति चउरो इस्सा पुण देहपणवीसा ॥ ९७ ॥

'दिट्ठी'त्यादि, इह च मुखानन्तकपञ्चविंशतिः कायपञ्चविंशतिश्च सुप्रतीतत्वान्मूलवृत्तिकृता न व्याख्याता, वयं तु विनेयजनानुग्रहाय किञ्चिद्वितन्महे, तत्र मुखानन्तकस्य-मुखवस्त्रिकायाः पञ्चविंशतिरेवं-यथा वन्दनकं दातुकामः कश्चिद्भव्यः क्षमाश्रमणदानपूर्वं गुरोरनुज्ञां मार्गयित्वा उत्कटिकासनः सन् मुखवस्त्रिकां प्रमार्य तदर्वाग्भागं चक्षुषा निरीक्षेत इदमेकमालोकनं, ततस्तां परावर्त्य निरूप्य च त्रयः पुरिमाः-प्रस्फोटनरूपाः कर्तव्याः, तदनु तां परावर्त्य निरीक्ष्य च पुनरपरे त्रयः पुरिमाः, एवमेते षट् ततो दक्षिणकराङ्गुल्यन्तरे वधूटिकद्वयं त्रयं वा कृत्वा द्वयोर्जङ्घयोर्मध्ये प्रसारितवामकरतलोपरि त्रयस्त्रयः करप्रमार्जनारूपप्रस्फोटकानां त्रयेण त्रयेणान्तरिता आस्फोटकाः-कर्तव्याः, अत्र आस्फोटा-अखोडा इति प्रसिद्धा नव, प्रमार्जनारूपाश्च प्रस्फोटाः-पखोडा इति प्रसिद्धा नव, एवमेते मिलिता मुखानन्तकपञ्चविंशतिः ॥९६॥

तथा **देहपञ्चविंशतिरेवं**-यथा दक्षिणपाणिस्थितवधूटकीकृतमुखवस्त्रिकया वामबाहोर्मध्यद-

क्षिणवामभागानां क्रमेण प्रमार्जनमित्येकं त्रिकं, ततो वामकरे तथैव मुखवस्त्रिकां विधाय दक्षिणबाहोर्वाम-बाहुयुग्प्रमार्जनमिति द्वितीयं त्रिकं, ततः समुत्सारितवधूटिकया कन्द्वयगृहीतप्रान्तया मुखवस्त्रिकया शिरसो मध्यदक्षिणवामभागानां क्रमेण प्रमार्जनमिति तृतीयं त्रिकं, ततः शिरोवन्मुखवक्षसोरपि प्रमार्जनमिति चतुर्थ-पञ्चमे त्रिके, तदनु दक्षिणकरकलितया मुखपोतिकया दक्षिणस्कन्धदेशोपरि क्षिप्तया पृष्ठदक्षिणभागप्रमार्जनं ततो वामकरस्थितया तया तथैवं पृष्ठवामभागप्रमार्जनं, तदनु वामकरस्थितयैव तया दक्षिणकक्षाधस्तान्नि-क्षिप्तया दक्षिणपृष्ठाधस्तनप्रदेशस्य प्रमार्जनं, ततो दक्षिणकरस्थितया तया तथैव वामपृष्ठाधस्तनप्रदेशप्रमा-र्जनं, तदनु दक्षिणकरस्थितया वधूटकीकृतया मुखपोतिकया प्रत्येकं दक्षिणवामपादयोः क्रमेण मध्यदक्षिण-वामप्रदेशप्रमार्जनं, अत्र च पञ्चभिस्त्रिकैः पञ्चदश पृष्ठप्रमार्जनाश्चतुष्टयं दक्षिणवामचरणप्रमार्जनात्रिकद्वयं चेति सर्वमीलने देहप्रमार्जनाः पञ्चविंशतिः, इयं च देहपञ्चविंशतिः पुरुषानाश्रित्य विज्ञेया, स्त्रीणां तु गोप्यावयव-विलोकनरक्षणाय हस्तद्वयवदनपादद्वयानां प्रत्येकं तिस्रः प्रमार्जना इति पञ्चदशैव भवन्तीति ॥ ९७ ॥

अथाऽऽवश्यकपञ्चविंशतिं सूत्रकृदेव विवृणोति —

दुओणयं[२] अहाजायं[१], किइकम्मं बारसावयं[१२] ।
चउस्सिरं[४] तिगुत्तं[३] च, दुपवेसं[२] एगनिक्खमणं[१] ॥ ९८ ॥

'दुओणय' मित्यादि, अवनमनमवनतमुत्तमाङ्गेन प्रणमनमित्यर्थः द्वे अवनते यत्र तद् द्व्यवनतं, एकं यदा प्रथममेव 'इच्छामि खमासमणो ! वन्दिउं जावणिज्जाए निसीहियाए' इत्यभिधाय

छन्दोऽनुज्ञापनायैवावनमति, द्वितीयं पुनर्यदा कृतावग्रहो निष्क्रान्त इच्छामीत्यादिसूत्रमभिधाय छन्दोऽनुज्ञाप-नायैवावनमति, यथाजातं यथाजन्मेत्यर्थः, जन्म च श्रमणत्वं योनिनिष्क्रमणं चाश्रित्य विज्ञेयं, तत्र रजोहरणमुखवस्त्रिकाचोलपट्टकमात्रया श्रमणो जातो भालतलघटितकरसम्पुटतस्तु योन्या निर्गतः एवम्भूत एव च वन्दकं ददाति तदव्यतिरेकाद्वन्दनकमपि यथाजातमभिधीयते, कृतिकर्म-वन्दनकं द्वादश आवर्ताः—सूत्राभिधानगर्भाः कायव्यापारा यस्मिंस्तद् द्वादशावर्तं, इह च प्रथमप्रविष्टस्य 'अहो १ कायं २ काय-संफासं ३ खमणिज्जो मे किलामो अप्पकिलंताणं बहुसुभेण मे दिवसो वइक्कंतो ?, जत्ता मे ४ जवणि ५ ज्जं च मे ६' इति सूत्रगर्भा गुरुचरणकमलन्यस्तहस्तशिरःस्थापनरूपाः षट् आवर्ताः भवन्ति, निष्क्रम्य पुनः प्रविष्टस्याप्येत एव पठिति मिलिता द्वादश **'चउस्सिरं'**ति चत्वारि शिरांसि—उपचाराच्छिरोऽवनमनानि यत्र तच्चतुःशिरो वन्दनकं, तत्र प्रथमप्रविष्टस्य **'खामेमि खमासमणो । देवसियं वइक्कमं'** इति भणतः शिष्यस्य एकं शिरः **'अहमवि खामेमि तुमे'** इति वदत आचार्यस्य द्वितीयं शिरः पुनरपि निष्क्रम्य प्रविष्टस्य क्षामणाकाले एवमेव शिरोद्वयं ज्ञेयमिति चतुःशिरो वन्दनकं, अन्यत्र पुनरेवं दृश्यते—"संफासमणे एगं खामणानमणे सीसस्स बीयं, एवं बीयपवेसेवि दोन्नि" इति [संस्पर्शनमने एकं क्षामणानमने शिष्यस्य द्वितीयं, एवं द्वितीयप्रवेशेऽपि द्वे] **'तिगुत्तं'**त्ति तिस्रो गुप्तयो यत्र तत् त्रिगुप्तं, मनसा सम्यक् प्रणिहितः वाचाऽस्खलितान्यक्षराण्युच्चारयन् कायेनाऽऽवर्तानविराधयन् वन्दनकं करोति, चशब्दोऽवधारणे, **'दुपवेसं'**ति द्वौ प्रवेशौ यस्मिन् तद् द्विप्रवेशं, प्रथमो गुरुमनुज्ञाप्य प्रविशतः द्वितीयः पुन-

निर्गत्य प्रविशत इति, 'एगनिक्खमणं'ति एकं निष्क्रमणं गुरोरवग्रहादावश्यिक्या निर्गच्छतो यत्र तत्तथा इत्यावश्यकपञ्चविंशतिः ॥९८॥

'छट्ठाणे'ति द्वारमधुना—

इच्छा य अणुण्णवणा अव्वाबाहं च जत्तं जवणा य ।
अवराहखामणावि य छट्ठाणा हुंति वंदणए ॥९९॥

'इच्छा य अणुण्णवणे'त्यादि, इच्छा चानुज्ञापना अव्याबाधं च यात्रा च यापना चापराधक्षामणा अपि च षट् स्थानानि भवन्ति वन्दनके इति गाथासंस्कारः । तत्रेच्छा नामस्थापनद्रव्यक्षेत्रकालभावभेदैः षड्विधा, तत्र नामस्थापने क्षुण्णे, द्रव्येच्छा सचित्तादिद्रव्याभिलाषोऽनुपयुक्तस्य वेच्छामीत्येवं भणतः, क्षेत्रेच्छा मगधादिक्षेत्राभिलाषः, कालेच्छा रजन्यादिकालाभिलाषः, यथा–"रयणीमभिसारिआओ चोरा परदारिया य इच्छंति । तालायरा सुभिक्खं बहुधन्ना केइ दुब्भिक्खं ॥१॥"
[रजनीमभिसरिकाः चौराः पारदारिकाश्चेच्छन्ति । तालाचराः सुभिक्षं बहुधान्याः केचिद् दुर्भिक्षम् ॥ १ ॥]

भावे इच्छा प्रशस्तेतरभेदाद्द्विधा, प्रशस्ता ज्ञानाद्यभिलाषः अप्रशस्ता कामिन्याद्यनुरागाभिलाषः, अत्र च प्रशस्तभावेच्छयाऽधिकारः । इदानीमनुज्ञापना, साऽपि नामादिभिः षड्भेदा, तत्र नामस्थापने सुगमे, द्रव्यानुज्ञापना त्रिधा–लौकिकी लोकोत्तरा कुप्रावचनिकी च, तत्र लौकिकी सचित्ताचित्तमिश्रभेदैस्त्रिधा अश्वाद्यनुज्ञापना प्रथमा मुक्ताफलवैडूर्याद्यनुज्ञापना द्वितीया विविधाऽऽभरणविभूषितवनिताद्यनुज्ञापना तृती-

या, लोकोत्तराऽपि सचित्तादिभेदैस्त्रिविधा—शिष्याद्यनुज्ञा प्रथमा वस्त्राद्यनुज्ञा द्वितीया परिहितवस्त्रादिशिष्याद्यनुज्ञा तृतीया, एवं कुप्रावचनिक्यपि त्रेधाऽवगन्तव्या; क्षेत्रानुज्ञापना यावतः क्षेत्रस्यानुज्ञापनं विधीयते यस्मिन् क्षेत्रेऽनुज्ञा व्याख्यायते क्रियते वा, एवं कालानुज्ञापनापि, भावानुज्ञापना आचाराद्यनुज्ञापना, एषा चात्र ग्राह्या । 'अव्वाबाहं'ति न विद्यते व्याबाधा यत्र तदव्याबाधं वन्दनं, सा च व्याबाधा द्रव्यतो भावतश्च, द्रव्यतः लकुटादिभिराक्रुष्टस्य भावतो मिथ्यात्वादिकृता, सा द्विरूपाऽपि न विद्यते यत्रेति, एतच्च 'बहुसुभेण भे' इत्यादिना कथितं, 'जत्त'त्ति यात्रा द्विविधा—द्रव्यतो भावतश्च, द्रव्यतस्तापसादीनां मिथ्यादृशां स्वक्रियोत्सर्पणं भावतः साधूनामिति । 'जवणाय'त्ति यापनाऽपि द्विधा—द्रव्यतो भावतश्च, द्रव्यतः शर्कराद्राक्षादिसदौषधैः कायस्य समाहितत्वं, भावतस्तु इन्द्रियनोइन्द्रियोपशान्तत्वेन शरीरस्य समाहितत्वं । **क्षामणाऽपि** द्रव्यतो भावतश्च, द्रव्यतः कलुषाशयस्य इहलोकापायभीरोः भावतस्तु संविग्नचित्तस्य संसारभीरोरिति, एवं षट् स्थानानि वन्दनके भवंति ॥ ९९॥

'छच्च गुण' त्ति द्वारमधुना, तत्र कश्चित्पृच्छति—को गुणोऽनेन वन्दनकेन दीयमानेन सम्पद्यते यदर्थमीदृशः क्लेशः क्रियते ? तत आह—

विणओवयार[१] माणस्स[२] भंजणा पूअणा[३] गुरुजणस्स ।
तित्थयराण य[४] आणा[५] सुयधम्मारा[६]हणाऽकिरिया ॥ १०० ॥

'विणओ' इत्यादि, विनयति-विनाशयति सकलक्लेशकारकमष्टप्रकारमपि कर्म यः स विनयः स एवोपचारः-आराधनाप्रकारो गुरोर्विनयोपचारः, तथा मानस्य-अहङ्कारस्य भञ्जना-विनाशः कृतो भवति, जात्यादिमदाध्माता हि न मन्यन्ते देवं न वन्दन्ते गुरून् न श्लाघन्ते परं, वन्दनके च दीयमाने एवंविधानर्थ-निबन्धनमभिमानो नाशितो भवतीति, अत एव गुरुपूजाऽप्येवं भावतः कृता भवति, तथा सकलकल्याणमूला तीर्थकराणामप्येवमाज्ञा परिपालिता भवति, यतो भगवद्भिर्विनयमूल एव धर्मः प्रत्यपादि, तथा श्रुतधर्मा-राधना च कृता भवति, यतो वन्दनकपूर्वमेव श्रुतग्रहणं क्रियते, तथा पारम्पर्येण वन्दनकादक्रिया भवति, यतोऽक्रियः सिद्ध एव भवति, स च पारम्पर्येण वन्दनकलक्षणाद्विनयादेव सम्पद्यते, उक्तं च परमर्षिभिः-"तहारूवं णं भंते ! समणं वा माहणं वा वंदमाणस्स वा पज्जुवासमाणस्स वंदणा पज्जुवासणा य किंफला पन्नत्ता ?, गोअमा ! सवणफला, से णं सवणे किंफले पन्नत्ते ?, गोअमा ! नाणफले, से णं नाणे किंफले ?, गोअमा ! विन्नाणफले, विन्नाणे पच्चक्खाणफले, पच्चक्खाणे संजमफले, संजमे अणण्हयफले, अणण्हए तव-फले, तवे वोदाणफले, वोदाणे अकिरियाफले, अकिरिया सिद्धिगइगमणफल"त्ति [तथारूपं भदन्त ! श्रमणं वा माहनं वा वन्दमानस्य पर्युपासीनस्य वा वन्दना पर्युपासना च किंफला प्रज्ञप्ता ?, गौतम ! श्रवण-फला, तत् श्रवणं किंफलं ?, गौतम ! ज्ञानफलं, तत् ज्ञानं किंफलं ?, गौतम ! विज्ञानफलं, विज्ञानं प्रत्याख्या-नफलं प्रत्याख्यानं संयमफलं संयमोऽनाश्रवफलः अनाश्रवः तपःफलः तपो व्यवदानफलं व्यवदानमक्रिया-फलं अक्रिया सिद्धिगतिगमनफला] इत्यादि, तत्र 'अणण्हए' इति अनाश्रवो नवकर्मानादानमित्यर्थः, 'वोदाण' त्ति व्यवदानं-विशुद्धिः पूर्वक्षपणमित्यर्थः ॥ १०० ॥

छच्चेव हवंति गुरुवयण'त्ति द्वारं, तत्राह—

छंदेण ऽणुजाणामि तहत्ति तुब्भंपि वट्टए एवं ।
अहमवि खामेमि तुमे वयणाइं वंदणऽरिहस्स ॥१०१॥

'छंदेणे'त्यादि. इह हि शिष्येण गुरोः वन्दनकं दातुकामेन 'इच्छामि खमासमणो ! वंदिउं जावणिज्जाए निस्सीहियाए इत्युक्ते गुरुर्यदि व्याक्षेपबाधायुक्तस्ततदा भणति—प्रतीक्षस्वेति, तच्च बाधादिकारणं यदि कथनयोग्यं भवति तदा कथयति अन्यथा तु नेति चूर्णिकारमतं, वृत्तिकारस्य तु मतं त्रिविधेनेति भणति, मनसा वचसा कायेन निषिद्धोऽसीत्यर्थः, ततः शिष्यः सङ्क्षेपवन्दनं करोति, व्याक्षेपादिरहितश्चेद्गुरुस्तदा वन्दनकमनुज्ञातुकामश्छन्देनेति वदति, छन्देन-अभिप्रायेण ममाप्यभिप्रेतमेतदित्यर्थः, ततः शिष्येण 'अणुजाणह मे मिउग्गह'मित्युक्ते गुरुराह—अनुजानामीति अनुज्ञातस्त्वं, प्रविश ममावग्रहमित्यर्थः, ततः शिष्येण 'निस्सीहीयादि दिवसो वइक्कंतो' इति पर्यन्ते सूत्रे भणिते गुरुराह—तथेति यथा भवान् ब्रवीति, अस्माकं शुभेन दिवसो व्यतिक्रान्त इत्यर्थः, ततः शिष्येण 'जत्ता भे' इत्युक्ते गुरुर्वदति—युष्माकमपि वर्तते ? इति. मम तावत् संयमनपोनियमादिलक्षणा यात्रा उत्सर्पति, भवतामप्युत्सर्पतीत्यर्थः, ततः पुनरपि विनेयेन 'जवणिज्जं च भे' इत्युक्ते गुरुर्भणति—'एव'मिति इन्द्रियनोइन्द्रियोपशमादिना प्रकारेणाबाधितं वर्तते मम शरीरमित्यर्थः, ततो भूयोऽपि शिष्येण 'खामेमि खमासमणो ! देवसियं वइक्कम'मित्युक्ते गुरुर्वक्ति—अहमपि क्षमयामि त्वामिति, दैवसिकं व्यतिक्रमं प्रमादोद्भवमहमपि

स्वां क्षमयामीत्यर्थः, एवं वचनानि-आलापकाः षट् वन्दनार्हस्य-वन्दनकयोग्यस्य भवन्तीति ॥ १०१ ॥

अथ 'अहिगारिणो य पंच उ'त्ति द्वारं, तत्राह—

आयरिय उवज्झाए पवत्ति थेरे तहेव रायणिए । एएसिं किइकम्मं कायव्वं निज्जरट्ठाए ॥१०२॥

'आयरिये' त्यादि; अधिकारिणो-वन्दनकस्य योग्याः पञ्च-आचार्य उपाध्यायः प्रवर्तकः स्थविरस्तथैव रत्नाधिकः, एतेषां पञ्चानां कृतिकर्म-वन्दनकं कर्तव्यं निर्जरार्थं, तत्राऽऽचार्यते-सेव्यते कल्याणकामैरित्याचार्यः-सूत्रार्थोभयवेत्ता प्रशस्तसमस्तलक्षणलक्षितक्षेत्रो गाम्भीर्यस्थैर्यधैर्यादिगुणगणमणिभूषितश्च, उपसमीपे समागत्याधीयते-पठ्यते यस्मादसावुपाध्यायः, तथा चैतत्स्वरूपम्—"सम्मत्तनाणसंजमजुत्तो सुत्तत्थतदुभयविहिन्नू । आयरियठाणजोगो सुत्तं वाएउवज्झाओ ॥ १ ॥" इति ।

[सम्यक्त्वज्ञानसंयमयुक्तः सूत्रार्थतदुभयविधिज्ञः । आचार्यस्थानयोग्यः सूत्रं वाचयत्युपाध्यायः ॥ १ ॥]

यथोचितं प्रशस्तयोगेषु साधून् प्रवर्तयतीति प्रवर्तकः, यदुक्तम्—"तवसंजमजोगेसुं जो जोगो तत्थ तं पवत्तेइ । असहं च नियत्तेइ गणतत्तिल्लो पवत्तीओ ॥१॥"

[तपःसंयमयोगेषु यो योग्यस्तत्र तं प्रवर्तयति । असमर्थं च निवर्त्तयति गणतप्तिपरः प्रवर्त्तकः ॥ १ ॥]

तथा सीदतः साधून् ज्ञानादिषु ऐहिकामुष्मिकापायदर्शनतः स्थिरीकरोतीति स्थविरः, उक्तं च—"थिरकरणा पुण थेरो पवत्तिवावारिएसु अन्नेसुं । जो जत्थ सीयइ जई संतबलो तं थिरं कुणइ ॥ १ ॥"

[स्थिरकरणात् पुनः स्थविरः प्रवर्त्तकव्यापारितेष्वर्थेषु ।
यो यत्र सीदति यतिः विद्यमानबलस्तं स्थिरं करोति ॥ १ ॥]
रत्नाधिकः—पर्यायज्येष्ठः, एतेषां कृतिकर्म विधेयं ॥ १०२ ॥

अथ 'इयरे पंचेव'त्ति द्वारं, तत्राऽऽह—

पासत्थो १ ओसन्नो २ होइ कुसीलो ३ तहेव संसत्तो ४ ।
अहछंदोवि ५ अ एए अवंदणिज्जा जिणमयंमि ॥ १०३ ॥
सो पासत्थो दुविहो सव्वे देसे य होइ नायव्वो ।
सव्वंमि नाणदंसणचरणाणं जो उ पासंमि ॥ १०४ ॥
देसंमि य पासत्थो सेज्जायरऽभिहडरायपिण्डं च ।
नीयं च अग्गपिण्डं भुंजइ निक्कारणे चेव ॥ १०५ ॥
ओसन्नोवि य दुविहो सव्वे देसे य तत्थ सव्वंमि ।
अवबद्धपीढफलगो ठवियगभोई य नायव्वो ॥ १०६ ॥
आवस्सयसज्झाए पडिलेहणभिक्खभाणमत्तट्ठे ।
आगमणे निग्गमणे ठाणे य निसीयणतुयट्टे ॥ १०७ ॥
आवस्सयाइयाइं न करेइ अहवा विहीणमहियाइं ।
गुरुवयणवला य तहा भणिओ देसावसन्नोत्ति ॥ १०८ ॥

तिविहो होइ कुसीलो नाणे तह दंसणे चरित्ते य ।
एसो अवंदणिज्जो पन्नत्तो वीयरागेहिं ॥ १०९ ॥
नाणे नाणायारं जो उ विराहेइ कालमाईयं ।
दंसण दंसणयारं चरणकुसीलो इमो होइ ॥ ११० ॥
[1]कोउय [2]भूई[3]कम्मे [4]पसिणा[5]पसिणे निमित्तमाजीवी ।
[6]कक्क[7]करुयाइ [8]लक्खण उवजीवइ विज्जमंताई ॥ १११ ॥
सोहग्गाइनिमित्तं परेसि ण्हवणाइ कोउयं भणियं ।
जरियाइभूइदाणं भूईकम्मं विणिद्दिट्ठं ॥ ११२ ॥
सुविणगविज्जाकहियं आइक्खणघंटियाइकहणं वा ।
जं सासइ अन्नेसिं पसिणापसिणं हवइ एयं ॥ ११३ ॥
तीयाइभावकहणं होइ निमित्तं इमं तु आजीवं ।
जाइकुलसिप्पकम्मे तवगण सुत्ताइ सत्तविहं ॥ ११४ ॥
कक्कुरुया य माया नियडीए डंभणंति जं भणियं ।
थोलक्खणाइ लक्खण विज्जामंताइया पयडा ॥ ११५ ॥
संसत्तो उ इयाणिं सो पुण गोभत्तलंदए चेव ।
उच्छिट्ठमणुच्छिट्ठं जं किंचिच्छुब्भए सव्वं ॥ ११६ ॥

एमेव मूलुत्तरदोसा य गुणा य जत्तिया केई ।
ते तंमी(म) सल्लिहिया संसत्तो भण्णए तम्हा ॥ ११७ ॥
सो दुविगप्पो भणिओ जिणेहिं जियरागदोसमोहेहिं ।
एगो उ संकिलिट्ठो असंकिलिट्ठो तहा अन्नो ॥ ११८ ॥
पंचासवप्पसत्तो जो खलु तिहिं गारवेहिं पडिबद्धो ।
इत्थिगिहिसंकिलिट्ठो संसत्तो संकिलिट्ठो उ ॥ ११९ ॥
पासत्थाईएसुं संविग्गेसुं च जत्थ मिलई उ ।
तहि तारिसओ होई पियधम्मो अहव इयरो उ ॥ १२० ॥
उस्सुत्तमायरंतो उस्सुत्तं चेव पन्नवेमाणो ।
एसो उ अहाछंदो इच्छाछंदोत्ति एगट्ठा ॥ १२१ ॥
उस्सुत्तमणुवइट्ठं सच्छंदविगप्पियं अणणुवाई ।
परतत्तिपवत्तो तिंतिणो य इणमो अहाच्छंदो ॥ १२२ ॥
सच्छंदमइविगप्पिय किंची सुहसायविगइपडिबद्धो ।
तिहिं गारवेहिं मज्जइ तं जाणाही अहाछंदं ॥ १२३ ॥

'पासत्थो'इत्यादि पार्श्वस्थः अवसन्नो भवति कुशीलस्तथैव संसक्तः यथाछन्दोऽपि च एते अवन्दनीया जिनमते, तत्र पार्श्वे–तटे ज्ञानादीनां यस्तिष्ठति स पार्श्वस्थः, अथवा मिथ्यात्वादयो बन्धहेतवः पाशा

इव पार्श्वे तिष्ठतीति पार्श्वस्थः, स च द्विभेदः-सर्वतो देशतश्च. तत्र सर्वतो यः केवलवेषधारी सम्यग्ज्ञान-दर्शनचारित्रेभ्यः पृथक् तिष्ठति, देशतः पुनः पार्श्वस्थः स यः काण्यं तथाविधमन्तरेण शय्यातराभ्याहृतं नृपतिपिण्डं नैत्यिकमग्रपिण्डं वा भुङ्क्ते तथा मर्मवैतानि कुलान्याभाव्यानि नान्यस्येति यः कुलनिश्रया विहरति तथा गुर्वादीनां योग्यानि स्थापनाकुलानि यः काण्यमन्तरेणैव प्रविशति ॥ १०३ ॥

तदेवाह-**'सो पासे'**त्यादि-व्याख्यातोऽर्थः नवरं प्रतिदिनं तावन्मात्रं दास्यामि मद्गृहे नित्य-मागन्तव्यमिति निमन्त्रितस्य नित्यं गृह्णतो नित्यपिण्डः तत्क्षणोत्तीर्णौदनादिस्थाल्या अध्यापान्तिमा या शिखा-उपरितनभागलक्षणा सोऽग्रपिण्डः ॥ १०४-१०५ ॥

अवसन्नमाह-'ओसन्नो'इत्यादि, सामाचारीविषयेऽवसीदति-प्रमाद्यति यः सोऽवसन्नः, सोऽपि द्विविधः-सर्वतो देशतश्च, तत्रावबद्धपीठफलकः स्थापनाभोजी च सर्वावसन्नो ज्ञातव्यः ॥१०६॥

तत्रैककाष्ठनिष्पन्नसंस्तारकालाभे बहुभिरपि वंशादिकाष्ठखण्डैर्देवरकादिबन्धान् दत्त्वा वर्षासु संस्तारकः क्रियते, स च पञ्चसन्ध्यादिषु बन्धानपनीय प्रत्युपेक्षणीय इति जिनाज्ञा, यस्त्वेवं न प्रत्युपेक्षते सोऽवबद्ध-पीठफलकोऽभिधीयते, अथवा पुनः पुनः शयनादिनिमित्तं नित्यमास्तीर्णसंस्तारक एव एकान्तानास्तीर्ण-संस्तारक एव वा य आस्ते स एवमभिधीयते, स्थापनादोषदुष्टप्राभृतिकाभोजी च-स्थापितकभोजी । **देशा-वसन्नमाह-'आवे'**त्यादि, आवश्यकं-प्रतिक्रमणादि, स्वाध्यायः-वाचनादिः आवश्यकं च स्वाध्यायश्चेति समाहारस्तस्मिन्, **मुखवस्त्रिकादेः** प्रत्युपेक्षणायां **भिक्षायां**-गोचरचर्यायां **ध्याने**-धर्मध्यानादिलक्षणे **भक्तार्थे**-भोजने भोजनमण्डल्यामितियावत् **आगमने**-बहिर्भागादुपाश्रयप्रवेशलक्षणे **निर्गमने**-प्रयोजना-

पेक्षया उपाश्रयाद्बहिर्गमनस्वरूपे स्थाने-कायोत्सर्गाद्यूर्द्ध्वावस्थाने निषीदने-उपवेशने त्वग्वर्तने-शयने इति सर्वत्र सप्तमी निर्देशो द्रष्टव्यः ॥ १०७ ॥

ततश्चैतेष्वावश्यकादिषु विषये देशावसन्नो भवतीति शेषः, कदेत्याह—'आवे'त्यादि, यदैतान्यावश्यकस्वाध्यायादीनि स्थानानि सर्वथा न करोत्यथवा हीनाधिकानि करोति प्रतिषिद्धकालकरणादिदोषदुष्टानि वा करोति तदा देशावसन्नो भवतीत्यर्थः, इदमत्र तात्पर्यं—यः प्रतिक्रमणाद्यावश्यकं न करोति हीनाधिकयादिदोषदुष्टं वा करोति स्वाध्यायं न करोति प्रतिषिद्धकालकरणादिदोषदुष्टं वा करोति प्रत्युपेक्षणमपि न करोति दोषदुष्टं वा करोति आलस्यवश्यः सुखलिप्सुर्भिक्षायां न पर्यटति अनुपयुक्तो वा पर्यटति अनेषणीयं वा गृह्णाति, ध्यानं शुभं यथा—"किं मे कडं किं च मे किच्चसेसं, किं सक्कणिज्जं न समायरामि" ॥ [किं मया कृतं किं च मे कृत्यं शेषं किं शक्यं न समाचरामि] इत्यादिलक्षणं पूर्वापररात्रकाले न ध्यायति अशुभं वा ध्यायति भक्तार्थे मण्डल्यां न भुङ्क्ते कदाचिद्वा भुङ्क्ते काकशृगालादिभक्षितं वा करोति मण्डलीसम्बन्धिसंयोजनादिदोषदुष्टं वा भुङ्क्ते, अन्ये त्वाहुः—'अ०भत्तट्ठ'त्ति अभक्तार्थग्रहणं सकलप्रत्याख्यानोपलक्षणं, ततोऽयमर्थः--प्रत्याख्यानं न करोति गुरुणा वा भणितो गुरुसम्मुखं किंचिदनिष्टमुक्त्वा करोति आगमने नैषेधिक्यादिसामाचारीं न करोति निर्गमनेऽप्यावश्यकादिसामाचारीं न करोति कायोत्सर्गं गमनागमनादिषु न करोति दोषदुष्टं वा करोति निषदनशयनयोः सन्दंशकभूप्रमार्जनादिसामाचारीं न करोति, 'गुरुवयण'त्ति सामाचारीवितथाचरणादिकरणेष्वावश्यकवेलादौ सम्यगालोचय प्रायश्चित्तं प्रतिपद्यस्वेत्यादि

गुरुणा भणितः सन् तद्वचनं प्रतिबलति–सम्मुखीभूयानिष्टं किञ्चिज्जल्पति न तु गुरुवचस्तथैवानुतिष्ठति भणितः स एष देशावसन्नः, उपलक्षणं चेदं, ततः स्खलितेषु मिथ्यादुष्कृतं न दत्ते गुरवे वैयावृत्यं न करोति संवरणादिषु वन्दनकं न दत्ते आदाननिक्षेपणादिषु प्रत्युपेक्षणाप्रमार्जने न करोति इत्याद्यन्यदपि सामाचारीविपरीताचरणं देशपार्श्वस्थतादिकारणमिति ॥ १०८ ॥

अथ कुशीलमाह – **'तिविहो होई'**त्यादि, कुत्सितं शीलमस्येति कुशीलः, स त्रिविधो भवति–ज्ञानविषये दर्शनविषये चारित्रविषये च, एषोऽवन्दनीयो– वन्दनानर्हः प्रज्ञप्तो वीतरागैः–अर्हद्भिः ॥१०९॥

तत्र **ज्ञानकुशीलदर्शनकुशीलौ** लक्षणतः प्राह – **'नाणे'** इत्यादि ज्ञानाचारं—**'काले विणए'** इत्यादिकमष्टप्रकारं यो विराधयति न सम्यगनुतिष्ठति स ज्ञाने--ज्ञानविषये कुशीलो भवति, दर्शनाचारं 'निस्संकिय निक्कंखिय' इत्यादिकमष्टप्रकारं यो विराधयति स दर्शने–दर्शनविषये कुशीलः, **चरणकुशीलः** पुनरयं–वक्ष्यमाणलक्षणो भवति ॥११०॥

तमेवाह–**'कोउय भूई'**त्यादि दारगाहा, कौतुकभूतिकर्मणी प्रश्नाप्रश्नौ निमित्तं आजीविकां कल्ककुरुकां चः समुच्चये लक्षणं विद्यामन्त्रादिकं च य उपजीवति स चरणकुशीलः ॥१११॥

एतानि पदानि स्वयमेव व्याचष्टे–**'सोहग्गाइनिमित्तं'** इत्यादि, सौभाग्यं–जनमान्यताऽपत्यादिनिमित्तं परेषां–योषिदादीनां त्रिकचतुष्कचत्वरादिषु विविधौषधीमिश्रितजलस्नानमूलिकाबन्धनादि यत् क्रियते तत्कौतुकं भणितं, यद्वा कौतुकं नाम आश्चर्यम्, यथा मायाकारको मुखे गोलकान् प्रक्षिप्य कर्णेन

नाशिकया वा निष्काशयति तथा मुखादग्निं निःसारयतीत्यादि तत्कुर्वन्नसौ चरणकुशीलो भवतीति द्रष्टव्यं, एवमुत्तरत्राऽपि, ज्वरितादीनामभिमन्त्रितरक्षाप्रदानं शय्यादीनां चतुर्दिशं भूतिकर्म विनिर्दिष्टम् ॥ ११२ ॥

'सुविणगे'त्यादि, केनापि स्वाभिमतं वस्तुपृष्टमपृष्टं वा स्वप्ने विद्यया जपितया कथितं 'आइंखण'त्ति कर्णपिशाचिकया घण्टिकादिभिर्वा मन्त्राभिषिक्ताभिः कथितं यत्कथ्यते अन्येषां प्रश्नाप्रश्नं भवत्येतत् ॥ ११३ ॥

'तीयाई' त्यादि, अतीतवर्तमानभविष्यत्कालत्रयवर्तिलाभालाभादिभावकथनं भवति निमित्तं, इदं तु वक्ष्यमाणमाजीव्यत इत्याजीवं जात्यादिसम्बन्धि, यथा कश्चन **भिल्लमालादिजातियमीश्वरं** दृष्ट्वा ब्राह-अहमपि भिल्लमालादिजातियः, स चैकजातिसम्बन्धानस्य भिक्षादानादिकां प्रतिपत्तिं करोति इति **जात्युपजीवी**, एवं वयं भवन्तश्चैककुलशिल्पकर्मतपोगणवर्तिन इत्यादिवचनविरचनया **कुलाद्याजीवी**, आहारादिगृद्ध्यै व तपःसूत्राभ्यासप्रकटनं कुर्वाणश्च **तपःसूत्राजीवी**, तत्र कुलं-उग्रादिकं पितृसमुत्थं वा शिल्पं-विज्ञानमाचार्यशिक्षाकृतं कर्म-स्वयंशिक्षितं "साचार्यकं शिल्पम् अनाचार्यकं कर्मे"ति वचनात्, तपोऽनशनादिकं, गणो मल्लगणादिः, 'गुण' इति च पाठोऽशुद्ध इव लक्ष्यते **निशीथादिभिर्व्यभिचारात्**, सूत्रं-कालिकादि, आदिशब्दः स्वगतानेकभेदसंसूचकः ॥ ११४ ॥

कल्ककुरुका पुनः काऽभिधीयते इत्याह--'**कक्कुरुके**'ति माया, अत्रैव तात्पर्यमाह—निकृत्या-शाठ्येन परेषां दम्भनं-वञ्चनमिति यदुक्तं भवति, अन्ये तु कल्ककुरुकाशब्दार्थमित्थमाचक्षते—यथा **कल्को** नाम प्रस्तुत्यादिषु रोगेषु क्षारपातनं अथवाऽऽत्मनः शरीरस्य देशतः सर्वतो वा लोध्रादिभिरुद्वर्तनं,

तथा कुरुका देशतः सर्वतो वा शरीरस्य प्रक्षालनमिति, स्त्रीलक्षणादीनि आदिशब्दात् पुरुषलक्षणादिपरिग्रहस्तेषां कथनं, यथा —"अस्थिष्वर्थाः सुखं मांसे, त्वचि भोगाः स्त्रियोऽक्षिषु । गतौ यानं स्वरे चाज्ञा, सर्वं सत्त्वे प्रतिष्ठितम् ॥१॥" इत्यादि**सामुद्रिकलक्षण**कथनं, विद्यामन्त्रादयः प्रकटाः, तत्र देव्यधिष्ठायिका विद्याः देवाधिष्ठायकस्तु मन्त्रः समाधना वा विद्या निःसाधनस्तु मन्त्र इति, आदिशब्दान्मूलकर्मचूर्णादिपरिग्रहः, तत्र मूलकर्म पुरुषद्वेषिण्याः सत्या अपुरुषद्वेषिणीकरणं अपुरुषद्वेषिण्याः सत्याः पुरुषद्वेषिणीकरणं गर्भोत्पादनं गर्भपातनमित्यादि, चूर्णयोगादयस्तु प्रकटाः, उपलक्षणमात्रं चैतत् अतः शेषमपि शरीरविभूषादिकं चरणमालिन्यजनकं कुर्वाणश्चरणकुशील इत्यर्थः ॥ ११५ ।

इदानीं **संसक्त**माह —**'संसत्तो उ'** इत्यादि, गुणैर्दोषैश्च संसज्यते—मिश्रीभवतीति संसक्तः, तुशब्दोऽप्यर्थः, ततो यथा पार्श्वस्थावसन्नकुशीला वन्दनकार्हा न भवन्ति तथा संसक्तोऽपीत्यर्थः, स पुनरित्थं ज्ञातव्यो यथा गवादीनां खादनकलिन्दके उच्छिष्टमनुच्छिष्टं वा भक्तखलकर्पासादिकं क्षिप्तं सत् सर्वं प्राप्यते ॥ ११६ ॥

'एमेवे'त्यादि, **एवमेव**—कलिन्दकक्षिप्तभक्तखलादिवत् प्राणातिपातनिवृत्त्यादिस्वरूपमूलगुणाः पिण्डविशुद्ध्यादिस्वरूपोत्तरगुणाश्च बहवो दोषाश्च तद्व्यतिरिक्तास्ते सर्वेऽपि तस्मिन् सन्निहिताः प्राप्यन्ते संसक्तो भण्यते तस्मात् ॥ ११७ ॥

'सो दुविगप्पो'इत्यादि, संसक्तो द्विविकल्पो भणितो जिनैर्जितरागदोषमोहैः एकश्च संक्लिष्टोऽसंक्लिष्टस्तथा अन्यः ॥ ११८ ॥

तत्र **संक्लिष्टमाह**–'पंचासवे'त्यादि, **पञ्चाश्रवाः**–प्राणातिपातादयस्तेषु प्रवृत्तो यः **खलु** त्रिषु गौरवेषु–ऋद्धिगौरवादिषु प्रतिबद्धः **'इत्थीगिहिसंकिलिट्ठो'**त्ति स्त्रीसंक्लिष्टो गृहिसंक्लिष्टश्च, तत्र स्त्रीप्रतिसेवी स्त्रीसंक्लिष्टः गृहिसम्बन्धिनां द्विपदचतुष्पदधनधान्यादीनां तु तत्करणप्रवृत्तो गृहीसंक्लिष्टः, स संसक्तः संक्लिष्टः ॥ ११९ ॥

असंक्लिष्टमाह–**'पासत्थाइ'** इत्यादि, पार्श्वस्थादिषु मिलितस्तद्रूपतां भजते, संविग्नेषु मिलितः संविग्नमिवात्मानं दर्शयति, तत्र तत्र तादृशो भवतीत्यर्थः, स च प्रियधर्माऽथवा इतरस्तु–अप्रियधर्मो भवतीति ॥ १२० ॥

इदानीं **यथाछन्दमाह**–**'उस्सुत्त'**मित्यादि. सूत्रादुद्धमुत्तीर्णं परिभ्रष्टमित्यर्थः उत्सूत्रं तदाचरन्–स्वयं सेवमानः उत्सूत्रमेव च यः परेभ्यः प्रज्ञापयन् वर्तते एष यथाछन्दः, एतस्यैव पर्यायमाह—**'इच्छाछंद''** इति एकार्थं नामेति ॥ १२१ ॥

अत्र च **किमिदमुत्सूत्रमि**ति परिप्रश्ने सत्याह- **'उस्सुत्त'**मित्यादि, उत्सूत्रं यज्जिनादिभिरनुपदिष्टं स्वच्छन्देन–स्वाभिप्रायेण विकल्पितं–उत्प्रेक्षितं अत एव सिद्धान्तानुपाति–स्वकीयबुद्धिरचितत्वेन जैनागमानुयायि न भवतीत्यर्थः; यथाछन्दस्यैव गुणान्तरमाह–परतन्त्रिषु–गृहस्थप्रयोजनेषु करणकारणानुमतिभिः प्रवृत्तः परतन्त्रप्रवृत्तः, तथा **निंतिणो** नाम यः स्वल्पेऽपि केनचित्साधुनाऽपराद्धे पुनः पुनरनवरतं **झषन्नास्ते** एष यथाछन्दः ॥ १२२ ॥

तथा—'सच्छंदे'त्यादि, स्वच्छन्दा-आगमनिरपेक्षा याऽसौ मतिस्तया विकल्प्य किञ्चिदालम्बनमध्ययनादिकं ततः सुखमास्वादयतीति सुखास्वादः स चासौ विकृतिप्रतिबद्धश्च स तथा, अपुष्टालम्बनं किंचिद्विकल्प्य यः सुखलिप्सुर्विकृतिप्रतिबद्धो भवतीत्यर्थः, तथा त्रिभिर्गौरवैः-ऋद्धिरसशातलक्षणैर्यो माद्यति तं जानीहि यथाछन्दमिति ॥ १२३ ॥

अत्र च पार्श्वस्थं सर्वथैवाचारित्रिणं केचिन्मन्यन्ते, तच्च न युक्तियुक्तं प्रतिभासते सहृदयानां, यतो यद्येकान्तेनैव पार्श्वस्थोऽचारित्री भवेत् तर्हि सर्वतो देशतश्च इति विकल्पद्वयकल्पनमसङ्गतं भवेत्, चारित्राभावस्योभयत्रापि तुल्यत्वात्, तस्मादेव भेदद्वयकल्पनाद् ज्ञायते सातिचारचारित्रसत्तापि पार्श्वस्थस्य, न चेदं स्वमनीषिकयोच्यते, यतो निशीथचूर्णावप्येवं दृश्यते—"पासत्थो अच्छइ सुत्तपोरिसिं अत्थपोरिसिं च नो करेइ, दंसणाइयारेसु वट्टइ, चारित्ते न वट्टइ, अइयारे वा न वज्जेइ, एवं सत्थो अच्छइ पासत्थो"त्ति [पार्श्वस्थस्तिष्ठति सूत्रपौरुषीं अर्थपौरुषीं च न करोति, दर्शनातिचारेषु वर्त्तते चारित्रे न वर्त्तते अतिचारान् वा न वर्जयति एवं स्वस्थस्तिष्ठति पार्श्वस्थः] अनेन ग्रन्थेन सर्वथाऽस्य पार्श्वस्थस्य न चारित्राभावोऽवसीयते, किंतु शबलितचारित्रयुक्ततापीति ।

"पंचेव पडिसेहेत्ति" द्वारमधुना, तत्राह—

वक्खित्तपराहुत्ते[1] पमत्ते[2] मा कयाइ वंदिज्जा ।
आहारं[3] व करिंते नीहारं[4] वा जइ करेइ ॥ १२४ ॥

पसंते आसणत्थे य, उवसंते उवट्ठिए ।
अणुन्नविंतु मेहावी, किइकम्मं पउंजए ॥ १२५ ॥
आयप्पमाणमित्तो चउदिसिं होइ उग्गहो गुरुणो ।
अणणुन्नायस्स सया न कप्पए तत्थ पविसेउं ॥ १२६ ॥

'वक्खित्ते'त्यादि, व्याक्षिप्तं अनेकभविकलोकसङ्कुलायां सभायां देशनाकरणादिना व्यग्रं १, पराहूतमिति–केनापि कारणेन पराङ्मुखं २, प्रमत्तं क्रोधनिद्रादिप्रमादेन मा कदाचिद्वन्देत ३, आहारं वा कुर्वाणं ४ नीहारं उच्चारं वा यदि करोति ५ तदा न वन्देतेति सम्बन्धः ॥ १२४ ॥

इह च धर्मान्तरायानवधारणप्रकोपाहारान्तरायलज्जावशपुरीषानिर्गमनादयो दोषा यथासङ्ख्यं न ज्ञातव्याः, एतद्विपक्षस्त्वत्रानुक्तोऽपि विज्ञेयः, यथा–'पसंते'त्यादि, तत्र प्रशान्तो–व्याक्षेपविरहितः आसनस्थो-निषद्यास्थितः उपशान्तः–क्रोधादिप्रमादरहितः उपस्थितः–छन्देनेत्यादिवचनमुच्चारयन्, शेषं सुगमम् ॥ १२५ ॥

अथ 'एक्कोवग्गह'त्ति द्वारं तत्राह–'आयप्पमाणे'त्यादि, आत्मप्रमाणमात्रः-सार्धहस्तत्रयप्रमाणश्चतुर्दिशं भवत्यवग्रहो गुरोः, अननुज्ञातस्य गुरुणा न कल्पते तन्मध्ये प्रवेष्टुं, तत्रावग्रहणमवग्रहः, स च नामस्थापनाद्रव्यक्षेत्रकालभावभेदैः षड्विधः, नामस्थापने सुगमे, द्रव्यस्य मुक्ताफलादेरवग्रहणं द्रव्यावग्रहः, यो यत्क्षेत्रमवगृह्णाति स क्षेत्रावग्रहः स च समन्ततः सक्रोशं योजनमेकस्मिन् क्षेत्रेऽवगृहीते सतीति, कालावग्रहो यो यं कालमवगृह्णाति, यथा, ऋतुबद्धे मासमेकं वर्षासु चतुरो मासानीति, भावावग्रहो द्वेधा–प्रशस्तोऽ-

प्रशस्तश्च, प्रशस्तो ज्ञानादीनामवग्रहः, अप्रशस्तश्च क्रोधादीनां, अथवाऽवग्रहः पंचधा— 'देविंदरायगहवइ' [देवेन्द्रराजगृहपति] इत्यादिगाथया वक्ष्यमाणस्वरूपः ॥ १२६ ॥

अत्र च क्षेत्रावग्रहेण प्रशस्तभावावग्रहेण चाधिकारः । अथ 'पंचाभिहाण'त्ति द्वारमाह—

वंदणचिइकिइकम्मं पूयाकम्मं च विणयकम्मं च ।
वंदणयस्स इमाइं हवंति नामाइं पंचेव ॥ १२७ ॥
सोयले १ खुडुए २ कण्हे ३, सेवए ४ पालए ५ तहा ।
पंचेए दिट्ठंता, किइकम्मे हुंति नायव्वा ॥ १२८ ॥

इह कर्मशब्दः क्रियावचनः प्रत्येकं योज्यते, 'वंदणे'त्यादि, तत्र 'वदि अभिवादनस्तुत्योः' इत्यस्य वन्द्यते—स्तूयतेऽनेन प्रशस्तमनोवाक्कायव्यापारनिकरेण गुरुरिति वन्दनं तदेव कर्म वन्दनकर्म, तद् द्विधा—द्रव्यतो भावतश्च, द्रव्यतो मिथ्यादृष्टेरनुपयुक्तसम्यग्दृष्टेश्च, भावत उपयुक्तसम्यग्दृष्टेः, तथा चिञ् चयने इत्यस्य चयनं—कुशलकर्मणः उपचयकरणं चितिः सैव कर्म चितिकर्म, कारणे कार्योपचारात् कुशलकर्मोपचयकरणं रजोहरणाद्युपधिसंहतिः, तदपि द्वेधा—द्रव्यतो भावतश्च, द्रव्यतस्तापसादिलिङ्गग्रहणकर्म अनुपयुक्तसम्यग्दृष्टि-रजोहरणाद्युपधिक्रिया च, भावतस्तु उपयुक्तसम्यग्दृष्टिरजोहरणादिकर्म, तथा करणं कृतिः—अवनामादिक्रिया सैव कर्म कृतिकर्म, तच्च द्वेधा—द्रव्यतो भावतश्च, द्रव्यतो निह्नवादीनामवनामादिकरणमनुपयुक्तसम्यग्दृष्टीनां वा, भावत उपयुक्तसम्यग्दृष्टीनां, तथा पूजनं पूजा—प्रशस्तमनोवाक्कायचेष्टा सैव कर्म पूजाकर्म, तदपि द्वेधा

द्रव्यतो भावतश्च, द्रव्यतो निह्नवादीनामनुपयुक्तसम्यग्दृशां वा भावत उपयुक्तसम्यग्दृष्टीनां, तथा विनयनं विनयः, विनीयते विनाश्यते वाष्टप्रकारं कर्मानेनेति विनयः स एव कर्म विनयकर्म, तदपि द्वेधा—द्रव्यतो भावतश्च, द्रव्यतो निह्नवादीनामनुपयुक्तसम्यग्दृष्टीनां वा, भावत उपयुक्तसम्यग्दृष्टीनामिति । वन्दनकस्य इमानि भवन्ति पञ्चैव नामानीति ॥ १२७ ॥

'पंचेव आहरण'त्ति द्वारं—'सीयले'त्यादि । **शीतलको** नृपतिः परित्यक्तराज्यसमृद्धिर्गृहीतसर्वज्ञदीक्षोऽक्षुण्णेन तदीयगुणगणेन प्रमोदमानमानसैर्निजगुरुभिर्विश्राणितश्रमणानन्ददायिसूरिपदो द्रव्यभावभेदभिन्ने वन्दनके उदाहरणं, तथा द्रव्यभावस्वरूपे चितिकर्मणि स्थविरैर्निजगुरुभिर्गुरुपदस्थापितक्षुल्लक उदाहरणं, तथा तथाभूत एव कृतिकर्मणि प्रणमदनेकमहाप्रचण्डमण्डलेश्वरमण्डलीमौलिमण्डनमुकुटकोटिनिविष्टविशिष्टमाणिक्यमालातलसमुच्छलदनवरतस्फुरदरुणकिरणपुञ्जपिञ्जरितचरणकमलः शालापतिर्वीरकः कलितः कृष्णो दृष्टान्तः, तथा पूजाकर्मणि द्रव्यभावभेदभिन्ने **सेवकद्वयमुदाहरणं**, तथा विनयकर्मणि द्विविध एव **पालकशाम्बावुदाहरणं**. पञ्चैते दृष्टान्ताः कृतिकर्मणि—सामान्यतो वन्दनके भवन्ति ज्ञातव्याः ॥१२८॥

उदाहरणानि चैतानि सङ्क्षेपतः कथ्यन्ते, तत्र भावतः **शीतलकोदाहरणं यथा**—

अवनीवनितामालतिलके श्रीपुरे पुरे । प्रतापाक्रान्तदिक्चक्रः, क्षमापालः **शीतलोऽजनि** ॥ १ ॥
सर्वज्ञशासनक्षीरनीरधौ सद्गतिस्तुतः । शुद्धपक्षद्वयो राजहंसः क्रीडति यः सदा ॥ २ ॥
तस्याभूद्भगिनी भाग्यसौभाग्यैकनिकेतनम् । सद्धर्मकर्मनिर्माणपरा **शृङ्गारमञ्जरी** ॥ ३ ॥
सा च **विक्रमसिंहस्य**, राज्ञी जाता जगत्पतेः सल्लक्षणं क्रमात्पुत्रचतुष्टयमजीजनत् ॥ ४ ॥

शीतलश्च महीपालश्चारुवैराग्यरञ्जितः । श्रीधर्मघोषसूरीणामन्तिके व्रतमग्रहीत् ॥ ५ ॥
तं च विज्ञातसिद्धान्ततत्त्वं गीतार्थशेखरम् । गुरवस्तद्गुणैस्तुष्टाः, स्वपदेऽथ न्यवीविशन् ॥६॥
अन्येद्युर्निजपुत्राणां, कलाकौशलशालिनाम् । शृङ्गारमञ्जरी राज्ञी, रहस्येवमवोचत ॥ ७ ॥
वत्सा ! यौष्माक एवैकः, श्लाघ्यो जगति मातुलः । येन साम्राज्यमुत्सृज्य, जगृहे व्रतमुत्तमम् ॥ ८ ॥
यश्च निःशेषशास्त्राब्धिपारदृश्वा मुनीश्वरः । निस्सङ्गं विहरन्नित्यं, प्रबोधयति देहिनः ॥ ९ ॥
पत्रेलिमं यथाऽग्राहि, संसारस्यामुना फलम् । तथा वत्सास्तदादातुं, भवतामपि युज्यते ॥ १० ॥
यतः–कोटिशो विषयाः प्राप्ताः, संपदश्च सहस्रशः । राज्यं च शतशो जीवैर्न च धर्मः कदाचन ॥११॥
इत्थं मातुर्वचः श्रुत्वा, संविग्ना जनकं निजम् । तेऽनुज्ञाप्यार्हतीं दीक्षां, जगृहुः स्थविरान्तिके ॥ १२ ॥
सञ्जातास्ते च गीतार्था, वन्दितुं निजमातुलम् । अवन्त्यां च गताः सायं, तद्बाह्यायामवस्थिताः॥१३॥
अथ गन्ता पुरीमध्ये, श्रावकः कोऽपि तद्गिरा । श्रीशीतलमुनीन्द्राय, तत्स्वरूपं न्यवेदयत् ॥१४॥
इतश्च–शुभेनाध्यवसायेन, तेन तेन महात्मनाम् । तेषां निशि समुत्पन्नं, चतुर्णामपि केवलम् ॥१५॥
ततश्च कृतकृत्यत्वाद्यावत्तत्रैव ते स्थिताः । प्रभाते नागमंस्तावदुत्कः श्रीशीतलोऽजनि ॥१६॥
यामादूर्ध्वं स्वयं तेषामन्तिकेऽसौ गतस्ततः । अनादरपरांस्तांश्च, वीक्ष्य संस्थाप्य दण्डकम् ॥१७॥
ऐर्यापथीं प्रतिक्रम्य, समालोच्यैवमभ्यधात् । कुतोऽहं भवतो वन्दे, तेऽप्यूचुस्ते यतो मतम् ? ॥१८॥
अहो दुष्टा अमी शैक्षा, निर्लज्जा इत्यवेत्य सः । क्रोधाध्मातो ददौ तेषां, चतुर्णामपि वन्दनम् ॥१९॥
कषायकण्डकारूढं, तमुचुस्ते त्वया पुरा । द्रव्यतो वन्दनं दत्तमिदानीं देहि भावतः ॥२०॥

किमेतदपि जानन्ति, भवन्त इति सोऽब्रवीत् । तेऽपि तं प्रत्यवोचन्त, जानीमो नितरामिदम् ॥२१॥
आचार्यः कथमित्याह, तेऽप्याहुर्ज्ञानतः स च । ब्रवीति कीदृशात् ते च, ब्रुवन्त्यप्रतिपातितः ॥२२॥
पापेनाशातिता एते, मया केवलिनो हहा । इत्थं निन्दन्निवृत्तोऽसौ, कण्डकस्थानतस्ततः ॥२३॥
क्रमात्तेषु चतुर्थाय. ददतस्तस्य वन्दनम् । केवलज्ञानमुत्पन्नमपूर्वकरणादिना ॥२४॥
द्रव्यतो वन्दनं पूर्वं, कषायोपेतचेतसः । जज्ञे पश्चाच्च तत् तस्य, शान्तस्वान्तस्य भावतः ॥२५॥

इदानीं चितिकर्मणि तादृशमेव **क्षुल्लकोदाहरणमुच्यते**—

तथाहि—गच्छे गरीयसि क्वापि, **गुणसुन्दरसूरिभिः**। दिवं यियासुभिर्वृद्धैः, शुभलक्षणलक्षितः ॥ १ ॥
स्वपदे क्षुल्लकः कोऽपि, स्थापितः सङ्घसम्मतः। तस्य च व्रतिनः सर्वे, कुर्वन्त्याज्ञामहर्निशम् ॥ २ ॥(युग्मम्)
गीतार्थैस्थविराभ्यर्णे, नानाग्रन्थान् पठत्यसौ । अन्यदा मोहनीयेन, मोहितो मुनिमण्डले ॥ ३ ॥
भिक्षाकृते गते साधुमेकमादाय सत्वरम् । शरीरचिन्ताव्याजेन, व्रतं मोक्तुमना बहिः ॥ ४ ॥
गतस्तिरोहिते वृक्षैः, साधावुद्भावितस्ततः । एकस्मिन् वनखण्डे च, फलपुष्पाकुलद्रुमे ॥ ५ ॥
विश्रान्तोऽसौ शमीवृक्षं, नीरसं बद्धपीठकम्। पथिकैः पूज्यमानं च, विलोक्येति व्यचिन्तयत्॥६॥चतुर्भिःकलापकं
अर्च्यते यदसौ लोकैर्बकुलादिषु सत्स्वपि । चिरन्तनैः कृतस्यास्य, तत्पीठस्य विजृम्भितम् ॥ ७ ॥
तन्नीरसः शमीवृक्षो, यादृशस्तादृशोऽस्म्यहम् । गीतार्थेषु कुलीनेषु, सत्स्वप्यन्येषु साधुषु ॥ ८ ॥
यन्निःशेषजनेभ्योऽहं, लभे पूजामनेकधा । सर्वं गुर्वासनादीनां, तन्माहात्म्यं विजृम्भते ॥ ९ ॥
ततस्तारुण्यमत्तेन, मयेदं धिग् विधित्सितम् । विचिन्त्येति निवृत्तोऽसौ, निजां वसतिमागतः ॥ १० ॥

बहिर्गतानामस्माकमाकस्मिकमजायत । शूलं वेला ततो लग्ना, साध्वादीनित्युवाच सः ॥ ११ ॥
प्रशमामृतमग्नोऽसौ, गीतार्थेभ्यो रहस्यदः । सम्यक् सकलमालोच्य, प्रायश्चित्तं प्रपन्नवान् ॥ १२ ॥
द्रव्यतश्चिनिकर्माभूत्, पुरा रागाढ्यचेतसः । प्रशान्तस्य पुनस्तस्य, भावतस्तदजायत ॥ १३ ॥

इदानीं कृतिकर्मणि कृष्णोदाहरणं—

यथा—सुराष्ट्रमण्डले श्रीमद्द्वारमत्याममभूत्पुरि । निःसीमविक्रमावासो, वासुदेवो महीपतिः ॥ १ ॥
तस्य शालापतिर्भक्तो, वीरको नाम सेवकः । वासुदेवमनालोक्य, यो न भुङ्क्ते कदाचन ॥ २ ॥
वासुदेवो न वर्षासु, कुरुते राजपाटिकाम् । बहवो हि विपद्यन्ते, जीवास्तस्यां तदा किल ॥ ३ ॥
अन्तरन्तःपुरं किन्तु, कृष्णः क्रीडति संततम् । अप्राप्नुवन् प्रवेशं च, द्वाःस्थतो द्वारि वीरकः ॥ ४ ॥
गोमयालेपिकां कृत्वा, पुष्पैरभ्यर्च्य चात्रजत् । नित्यं नाभुङ्क्त न श्मश्रुनखशुद्धिं व्यधापयत् ॥ ५ ॥
निवृत्तास्वथ वर्षासु, विधातुं राजपाटिकाम् । निर्गच्छन्तं नृपाः सर्वे, श्रीकान्तमुपतस्थिरे ॥ ६ ॥
मुदिते वीरकेऽथैत्य, प्रणते वेत्रिणं हरिः । पप्रच्छ किमयं जज्ञे, कृशो विच्छायविग्रहः ? ॥ ७ ॥
देवपादेष्वदृष्टेषु, नाकार्षीद्भोजनादिकम् । तेनायमीदृशो जात, इति वेत्री व्यजिज्ञपत् ॥ ८ ॥
तुष्टः प्रसादात् कृष्णोऽथ, समभाषिष्ट वीरकम् । अवारितप्रवेशं च, तं सर्वत्राप्यचीकरत् ॥ ९ ॥
इतश्च—कृष्णोऽपि किल निःशेषाः, विवाहसमये निजाः । प्रणन्तुमागताः पादानिति पृच्छति पुत्रिकाः ॥ १० ॥
स्वामिन्यः किमु दास्यो वा, वत्सा ! यूयं भविष्यथ ? । ताश्च प्राहुर्भविष्यामः, स्वामिन्यस्त्वत्प्रसादतः ॥ ११ ॥
कृष्णोऽप्युवाच यद्येवं, वत्सानां सम्मतं तदा । सन्निधौ नेमिनाथस्य गृह्णीत व्रतमुत्तमम् ॥ १२ ॥

समस्तास्तास्ततस्तेन कृतनिष्क्रमणोत्सवाः । (ग्रन्थाग्रं १०००) प्रव्रज्यां प्रत्यपद्यन्त,
श्रीमन्नेमिजिनान्तिके ॥१३॥

अन्येद्युरेकया राज्ञ्या, शिक्षिता निजपुत्रिका । अहं दासी भविष्यामीत्येवं वाच्यस्त्वया पिता ॥१४॥
ततो विहितदुष्टज्ञा, जनन्या प्रेषिता सती । पृष्टा कृष्णेन पुत्री सा, ददौ शिक्षितमुत्तरम् ॥१५॥
संसारे मा भ्रमन्त्वन्या, अप्यसाविव मे सुताः । शिक्षये कथमेतां तत्, कृष्ण एवं व्यचिन्तयत् ॥१६॥
लब्धोपायश्च पप्रच्छ, वीरकं स रहस्यदः । अरे पूर्वं त्वया किञ्चित्, कर्म निर्मितमद्भुतम् ? ॥१७॥
पुरतो निजनाथस्य, नर्मनिर्मितिहेतवे । अमन्दानन्दसन्दोहः, सोऽप्येवमवदत्ततः ॥१८॥
शरीरचिन्तां कुर्वाणो, बदरीशिखरस्थितम् । सरटं लेष्टुनाऽऽहत्य, भूमौ पातितवानहम् ॥१९॥
चक्रोत्खातं वहन्नीरं, वर्षासु शकटाध्वना । धारितं वामपादेन प्रतिश्रोतश्च तद्गतम् ॥ २० ॥
पायनीघटिकामध्ये, प्रविष्टो मक्षिकागणः । कुर्वन् गुमगुमारावं, कराभ्यामस्मि रुद्धवान् ॥२१॥
हरिर्नृपसहस्राणामपरेद्युः सदस्यदः । अब्रवीद्वीरकस्यास्य, शृणुतान्वयकर्मणी ॥२२॥
येन रक्तस्फटो नागो, निवसन् बदरीवने । पातितो क्षितिशस्त्रेण, क्षत्रियः सैष वेमवान् ॥२३॥
येन चक्रोत्क्षता गङ्गा, वहन्ती कलुषोदकम् । धारिता वामपादेन, क्षत्रियः सैष वेमवान् ॥२४॥
येन घोषवती सेना, वसन्ती कलशीपुरे । धारिता वामहस्तेन, क्षत्रियः सैष वेमवान् ॥२५॥
निर्व्याजक्षत्रियोऽप्येष, जात उत्तरकर्मणा । तन्तुवायस्तदेतस्य, दास्यामि तनयां निजाम् ॥२६॥
तेनाथ वीरकोऽभाणि, ददामि तव पुत्रिकाम् । सोऽप्यनिच्छन्नयोग्यत्वाद्, भृकुट्या विनिवारितः ॥२७॥

विवाह्य वीरकेणासौ, गृहे नीता प्रतिष्ठति । पल्यङ्के स्वामिपुत्रीति, भणित चास्याः करोत्यसौ ॥२८॥
राज्ञाऽथ वीरकः पृष्टः, करोति वचनं तव । मम पुत्रीति सोऽप्याह, स्वामिन्या अस्मि किङ्करः ॥२९॥
अवोचद्वीरकं विष्णुर्यदि कारयसे न हि । सर्वं स्वकर्म तन्मूर्ध्नि, पातयिष्याम्यहं तव ॥३०॥
ज्ञात्वा विष्णोरभिप्रायं, वीरकोऽपि गृहं गतः । तां निष्ठुरमिदं प्राहोत्तिष्ठ पायनिकां कुरु ॥३१॥
सा रुष्टा कोलिकात्मानं, न जानासीत्यजल्पत । तेन रज्ज्वाऽऽहता कृष्णं, रुदती सुदती ययौ ॥३२॥
पादौ प्रणम्य कृष्णस्य, सा जगाद सगद्गदम् । तेनाहमाहता तात !, कोलिकेन दुरात्मना ॥३३॥
अवादीत्केशवो वत्से !, तेन त्वं भणिता मया । स्वामिनी भव दासत्वं, त्वं पुनर्याचसे ननु ॥३४
साऽथ व्यजिज्ञपत्तात !, नास्य गेहे वसाम्यहम् । स्वामिन्येव भविष्यामि, सम्प्रति स्वत्प्रसादतः ॥३५॥
वीरकं समनुज्ञाप्य, ततः **श्रीनेमिसन्निधौ** । तां प्रव्रज्यां प्रबन्धेन, ग्राहयामास केशवः ॥३६॥
विहृत्यान्यत्र संप्राप्ते, **श्रीरैवतक**मन्यदा । श्रीनेमौ सपरिवारो, वन्दनाय ययौ हरिः ॥३७॥
अष्टादश सहस्राणि, यतीनज्ञानागुणोत्तरान् । सानन्दं वन्दते विष्णुर्द्वादशावर्तवन्दनैः ॥३८॥
परिश्रान्ता नृपास्तस्थुर्वीरकस्तु तथैव हि । यतींस्तदनुवृत्त्यैव, वन्दते विष्णुना सह ॥३९॥
प्रस्वेदक्लिन्नगात्रश्च, श्रीनेमिं पृष्टवान् हरिः । त्रिभिः षष्टिशतैर्नाथ !, नाहमेवं श्रमं गतः ॥४०॥
अवोचद्भगवानेवं, कृष्ण ! भक्त्याऽनया त्वया । सम्यक्त्वं क्षायिकं प्राप्तं, तीर्थकृत्कर्म चार्जितम्॥४१॥
सप्तमपृथ्वीयोग्यं यच्चयाऽऽयुःकर्म निर्मितम् । आनीतं तच्चतीयायां, वन्दनं ददता त्वया ॥४२॥
तदत्र कृष्णस्य भावतः कृतिकर्म, वीरकस्य तु तदनुवृत्त्या द्रव्यत इति ।

इदानीं **सेवकोदाहरणं**, तथाहि–

एकस्य भूमिपालस्य, सेवकौ द्वौ बभूवतुः । आसन्नग्रामयोः सीमाविवादश्च तयोरभूत् ॥१॥
विवादमपनेतुं च, गच्छद्भ्यां नृपसन्निधौ । ताभ्यां सम्मुखमागच्छन् , मुनिर्मार्गे व्यलोक्यत ॥२॥
साधुदर्शनतः सिद्धिर्ध्रुवेत्येकोऽवदत्तयोः । भक्त्या प्रदक्षिणीकृत्य, प्रणिपत्य च तं ययौ ॥३॥
उद्घाटकं द्वितीयोऽपि, तदीयं विदधत्ततः तं तथैव नमस्कृत्य, तदेवोदीर्य चाव्रजत् ॥४॥
विवादे कथिते ताभ्यां, मध्याह्नः प्रणतो ययौ । महीभुजा जयो दत्तोऽपरस्य तु पराजयः ॥५॥
अत्र च प्रथमस्य भावतः पूजाकर्म, द्वितीयस्य च द्रव्यत इति ।

इदानीं **विनयकर्मणि पालकोदाहरणं**, तथाहि–

द्वारवत्यामभूत्पुर्यां, **वासुदेवो** महीपतिः । तस्य **पालकशाम्बाद्या**, बभुवुर्बहवः सुताः ॥१॥
अन्येद्युरागते तत्र, **श्रीमन्नेमिजिनेश्वरे** । **वासुदेवो** जगादेत्थं, कुमारान्निखिलानपि ॥२॥
यः कल्ये वन्दते पूर्वं, स्वामिनः पादपङ्कजम् । यद्याचते स तत्तस्मै, ददाम्यखिलमप्यहम् ॥३॥
ततश्च–स्वमन्दिरस्थितेनैव, शाम्बेन शयनीयतः । प्रातरुत्थाय सद्भक्त्या, नेमिप्रभुरवन्द्यत ॥४॥
दुष्टबुद्धिरभव्यश्च, राज्यलोभेन सत्वरम् । पालकोऽप्यश्वरत्नेन, गत्वा प्रभूनवन्दत ॥५॥
कृष्णोऽपि तत्र गत्वाऽथ, प्रभुं नत्वा च पृष्टवान् । शाम्बपालकयोः केन, यूयमद्य नताः पुरा ? ॥६॥
ततः प्रभुरपि प्राह, कृष्ण ! शाम्बेन भावतः । वयं नमस्कृताः पूर्वं, द्रव्यतः पालकेन तु ॥७॥
केशवोऽपि प्रसादेन, वाजिरत्नं वितीर्णवान् । स्फुरद्गुणकदम्बाय, शाम्बाय विशदात्मने ॥८॥
अत्र च पालकस्य द्रव्यतो विनयकर्म शाम्बस्य तु भावत इति ।

अथ 'आसायण तेत्तीस' त्ति द्वारं, तत्राह—

पुरओ पक्खासन्ने [1][2][3][4][5][6][7][8][9][10] गंताचिट्ठणनिसीयणायमणे ।
आलोयणऽपडिसुणणे [11][12][13][14] पुव्वालवणे य आलोए ॥१२९॥

तह उवदंस निमंतण [15][16][17][18][19] खद्धा अयणे तहा अपडिसुणणे ।
[20][21][22][23][24][25] खद्धत्तिय तत्थगए किं तुम तजाय नोसुमणे ॥१३०॥

[26][27][28][29] नो सरसि कहं छिन्ना परिसं भित्ता अणुट्ठियाइ कहे ।
[30][31][32][33] संथारपायघट्टण चिट्ठोच्चसमासणे यावि ॥१३१॥

पुरओ अग्गपएसे पक्खे पासंमि[34]पच्छ आसन्ने ।
गमणेण तिन्नि ठाणेण तिन्नि तिण्णि य निसीयणए ॥१३२॥

विणयब्भंसाइगदूसणाउ आसायणाओ नव एया ।
सेहस्स वियारगमे रायणियपुव्वमायमणे ॥१३३॥

पुव्वं गमणागमणालोए सेहस्स आगयस्स तओ ।
राओ सुत्तेसु जागरस्स गुरुभणियऽपडिसुणणा ॥१३४॥

आलवणाए अरिहं पुव्वं सेहस्स आलवेंतस्स ।
रायणियाओ एसा नेरसमाऽऽसायणा होइ ॥१३५॥
असणाईयं लद्धुं पुव्वि सेहे तओ य रायणिए ।
आलोए चउदसमो एवं उवदंसणे नवरं ॥१३६॥
एवं निमंतणेऽवि य लद्धुं रयणाहिगेण तह सद्धिं ।
असणाइ अपुच्छाए खद्धंति बहुं दलंतस्स ॥१३७॥
संगहगाहाए जो न खद्धसद्दो निरूविओ वीसुं ।
तं खद्धाइयणपए खद्धंति विभज्ज जोएज्जा ॥१३८॥
एवं खद्धाइयणे खद्ध बहुयंति अयणमसणंति ।
आईसद्दा डायं होइ पुणो पत्तसागंतं ॥१३९॥
वन्नाइजुयं उसढं रसियं पुण दाडिमंबगाइयं ।
मणाईट्ठं तु मणुण्णं मन्नइ मणसा मणामं तं ॥१४०॥
निद्धं नेहवगाढं रुक्खं पुण नेहवज्जियं जाण ।
एवं अप्पडिसुणणे नवरिमिणं दिवसविसयंमि ॥१४१॥
खद्धंति बहु भणंते खरकक्कसगुरुसरेण रायणियं ।
आसायणा उ सेहे तत्थ गए होइमा चउण्णा ॥१४२॥

सेहो गुरुणा भणिओ तत्थ गओ सुणइ देइ उल्लावं ।
एवं किंति च भणई न मत्थएणं तु वंदामि ॥१४३॥
एवं तुमंति भणई कोऽसि तुमं मज्झ चोयणाए उ ?।
एवं तज्जाएणं पडिभणणाऽऽसायणा सेहे ॥१४४॥
अज्जो ! किं न गिलाणं पडिजग्गसि पडिभणाइ किं न तुमं ? ।
रायणिए य कहंते कहं च एवं असुमणत्ते ॥१४५॥
एवं नो सरसि तुमं एसो अत्थो न होइ एवंति ।
एवं कहमच्छिदिय सयमेव कहेउमारभइ ॥१४६॥
तह परिसं चिय भिंदइ तह किंची भणइ जह न सा मिलइ ।
ताए अणुट्ठियाए गुरुभणिअ सवित्थरं भणइ ॥१४७॥
सेज्जं संथारं वा गुरुणो संघट्टिऊण पाएहिं ।
खामेइ न जो सेहो एसा आसायणा तस्स ॥१४८॥
गुरुसेज्जसंथारगचिट्ठणनिसियणतुयट्टणेऽहऽवरा ।
गुरुउच्चसमासणचिट्ठणाइकरणेण दो चरिमा ॥१४९॥

'पुरओ' इत्यादिगाथात्रयं १२९-१३०-१३१ एतद्गाथाव्याख्यागाथाश्च 'पुरओ अग्गपएसे' इत्यादिकाः, 'करणेण दो चरिमा' इत्यन्ता अष्टादश व्याख्यायन्ते, तत्र गुरोः पुरतः-अग्रतः कारणमन्तरेण

गन्ता—गमनं करोति शिष्यो विनयभङ्गादिहेतुत्वादाशातना मार्गदर्शनादिके तु कारणे न दोषः १, गुरोः पार्श्वाभ्यामपि गमने आशातना २, पृष्ठतोऽप्यासन्नगमने आशातना निःश्वासक्षुत्श्लेष्मपातादिदोषप्रसङ्गात्, ततश्च यावता भूभागेन गच्छत आशातना न भवति तावता गन्तव्यमिति ३, एवं पुरतः पार्श्वतः पृष्ठतश्च स्थाने—ऊर्द्ध्वरूपे शिष्यस्याऽऽशातनात्रयं ३, पुरतः पार्श्वतः पृष्ठतश्च निषदने आशातनात्रयं ३, कारणे तु तथाविधेऽत्रापि न दोषः, एवं नव ९, अत्र च गन्ता आशातनेति तुल्याधिकरणत्वं न घटते तस्माल्लुप्तमत्वर्थीयमिदं पदं विधेयं ततो गन्ता आशातनावान् भवतीत्यर्थः, एवमन्यत्रापि स्वबुद्ध्या पदाक्षरघटना विधेया सूचापरत्वात्सूत्रस्येति, 'आयमणे' त्ति आचार्येण सहोच्चार भूमिगतस्याऽऽचार्यात्प्रथममेवाचमनं कुर्वञ्शातनावान् शिष्यो भवतीति १० ॥१३२-१३३॥

'आलोयण'त्ति उच्चारादिबहिर्देशादागतवति गुरौ शिष्यः पूर्वमेव गमनाऽऽगमनविषयामालोचनां करोति गुरुस्तु पश्चादिति शिष्य आशातनावान् भवतीति ११, 'अप्पडिसुणणे'त्ति रत्नाधिकस्य रात्रौ व्याहरतः—कः सुप्तः? को जागर्तीति?' तत्र जाग्रदपि अप्रतिश्रोता भवतीत्याशातनावान् शिष्यो भवतीति १२ ॥१३४॥

'पुव्वालवणे य'त्ति गुरोरालपनीयस्य कस्यचिद्विनेयेन पूर्वमेवालपने आशातनावान् भवतीति १३ ॥१३५॥

'आलोए'त्ति भिक्षामशनपानखादिमस्वादिमरूपामानीय प्रथममेव कस्यापि शिष्यस्य पुरत आलोचयति पश्चादुगुरोरिति शिष्यस्याशातना १४, 'तह उवदंस'त्ति तथा—तेनैव प्रकारेणाऽऽशातनेत्यर्थः अश-

नादि ४ भिक्षामानीय प्रथमं कस्यचित् शैक्षस्योपदर्शयति पश्चाद्गुरोरिति शिष्यस्याशातना १५ ॥१३६॥

'**निमंतण**'त्ति अशनादि ४ भिक्षामानीय गुरुमनापृच्छ्य पूर्वमेव शैक्षमुपनिमन्त्रयति पश्चात्सूरिमित्याशातनावान् शिष्यो भवतीति १६, '**खद्ध**'त्ति अशनादि ४ भिक्षामानीय सूरिभिः समं प्रतिगृह्य सूरिमनापृच्छ्य यस्य यस्य प्रतिभाति तस्य तस्य खद्धं खद्धं-प्रचुरं प्रचुरं ददातीति शिष्ये आशातना, खद्धशब्देन सैद्धान्तिकेन प्रचुरमभिधीयते ॥१३७॥

'संगहगे'त्यादि' ननु संग्रहगाथायां 'खद्ध'त्ति पृथक्पदं नोपात्तं तत्कथमयमनुपात्तो दोषो भवद्भिर्व्याख्यायते ?, अत्रोच्यते, यद्यप्यत्राऽऽहृत्य 'खद्ध' शब्दो द्वारगाथायां नोक्तः तथाप्यग्रेतनेऽष्टादशे 'खद्धाययण' लक्षणे दोषे 'खद्ध' शब्दो विद्यते स एवात्र विभज्य सप्तदशदोषरूपतया व्याख्यात इति न सङ्ग्रहकारस्य कश्चिद्दोषः, विचित्ररचनानि सूत्राणि भवन्तीति, अत एवाऽऽह विवरणगाथायां सूत्रकारः—"संगहगाहाए जो न खद्धसद्दो निरूविओ वीसुं । तं खद्धाययणपए खद्धंति विभज्ज जोएज्जा ॥१॥" 'वीसुं'ति विष्वग् पृथगित्यर्थः, शेषं व्याख्यातमेव १७ ॥१३८॥

इदानीमष्टादशीमाशातनामाह—'**खद्धाइयण**' त्ति 'खद्धाद्यदनं प्रचुरादिभक्षणमित्यर्थः, एतस्याश्च यदाशातनाविवरणं गाथाभिर्व्याख्यातं तदशाश्रुतस्कन्धसूत्राऽपेक्षया द्रष्टव्यम् , तथा च तत्रैवं सूत्रम्—'**खद्धाइयण**' त्ति सेहे असणं वा ४ रायणिएण सद्धिं भुंजमाणे तत्थ सेहे खद्धं २ डायं २ ओसढं २ रसियं २ मणुन्नं २ मणामं २ निद्धं २ लुक्खं २ आहारित्ता भवइ **आसायणा सेहस्स**' त्ति एतत्सूत्रानुसारेणेदं द्वारं स्वयमेव विवृणोति—'**खद्धाययणे**' त्यादि खद्धाद्यदने इत्यत्र पदे खद्धशब्देन बहु

भण्यते 'अयणत्ति' अदनमशनमित्यर्थः, ततः खद्धं–बहु आदिर्यस्य तत् खद्धादि अदनं बहुवड्डेहिं लंबणेहिं खादनमित्यर्थः, आदिशब्दात् डाकादिपरिग्रहः, अत एवाह–'**आइसद्दा डायं होइ पुणो पत्तसागंतं**' वृन्ताकचिर्भटिकाचणकादयः सुसंस्कृताः पत्रशाकान्ता डाकशब्देन भण्यन्ते, तं गृहीत्वा गृहीत्वा '**वण्णाइजुयं उसढं**' मित्यादि शुभवर्णगन्धादियुक्तम्–ऊसढम्–उच्छ्रितमित्यर्थः '**रसियं पुण दाडिमम्बगाईयं**' रसितं पुनर्दाडिमाम्रफलादिकं केनापि प्रकारेणाचित्तीकृतमाकृष्याऽऽकृष्य भुङ्क्ते, '**मणइट्ठं तु मणुन्नं**' 'मनस इष्टं–प्रियं मनोज्ञं, तदपि तथैव '**मन्नइ मणसा मणामं तं**'ति मन्यते मनसा मनाममिति निरुक्तिवशाद्भव्यमभव्यं वा यन्मन्यते तत् खादतीत्यर्थः ॥१३९–१४०॥

'निद्धं नेहवगाढं'ति स्निग्धं स्नेहेन–घृतादिना अवगाढं मिश्रितं तदपि तथैव भुङ्क्ते । '**लुक्खं पुण नेहवज्जियं जाण**' त्ति रूक्षं पुनः स्नेहवर्जितं जानीहि, तदपि तथैव भुङ्क्ते इत्याशातना गुरुं प्रति शिष्यस्येति, अन्यत्र पुनरियमेवं व्याख्याता–शिष्येण भिक्षामानीयाऽऽचार्याय यत्किञ्चिदस्वा स्वयं स्निग्धमधुरमनोज्ञान्नशाकादीनां वर्णगन्धरसस्पर्शवतां च द्रव्याणामुपभोग इति १८ । **इदानीमेकोनविंशतितमीमाह**—'**एवं अप्पडिसुणणे**'त्ति सूरेः शब्दं कुर्वतोऽप्रतिश्रवणं आशातना, नन्वियं 'अप्पडिसुणणे' त्ति द्वारे पूर्वव्याख्यातैव किमर्थं पुनर्भण्यते ? इत्यत्राह—'**नवरमिणं दिवसविसयं**' ति इदमप्रतिश्रवणं दिवसे सामान्येनोक्तं, पाश्चात्यं तु विलसदन्धकारायां रात्रौ न कोऽपि जाग्रतं सुप्तं वा मां ज्ञास्यतीत्यप्रतिश्रवणमिति द्वयोरनयोर्भेदः १९ ॥११४॥

विंशतितमीमाह—'खद्धंति बहु भणंति' इत्यादि, खरम्—अत्यर्थं कर्कशेन—परुषेण बृहता च स्वरेण खद्धं—बहु प्रचुरमित्यर्थः रत्नाधिकं भाषमाणं शिष्ये आशातना २०, 'तत्थ गए होइमा चउन्न'त्ति शिष्यो रत्नाधिकेन व्याहृतो यत्रास्ते तत्रस्थ एवोल्लापं ददाति, न पुनः समीपमागत्योत्तरं ददातीति, इयं चान्याऽऽशातना शिष्यस्य ॥१४२॥

अत एवाह—'सेहो गुरुणा भणिओ तत्थ गओ सुणइ देइ उल्लावं' इति व्याख्यातार्थम् २१, एवं 'किंति च भणइ'त्ति शिष्यः सूरिणा व्याहृतः किमित्येवं वक्ता, किं भणसीत्यर्थः, एवमाशातना शिष्यस्य, मस्तकेन वन्दे इति चेह वक्तव्यमिति २२ ॥१४३॥

एवं 'तुमंति भणइ'त्ति शिष्यो रत्नाधिकं त्वमिति एकवचनान्तेन वक्ता भवति, 'कोऽसि तुमं मज्झ चोयणाए उ'त्ति कस्त्वं मम प्रेरणायामित्यादीनि शिष्यस्याशातना, शिष्यैः श्रीभगवन्तः श्रीपूज्या यूयमित्यादिभिरेव वचनैर्गुरवो भाषणीया इति २३, एवं 'तज्जाएणं पडिभणणाऽऽसाहणा सेहे'त्ति शिष्यो रत्नाधिकं तज्जातेन-तैरेव गुरूक्तवचनैः प्रतिभणिता भवति, कोऽर्थः ?—सूरिणा शिष्य उक्तो-'अज्जो किं न गिलाण'न्ति ग्लानस्य किमिति किञ्चिन्न करोषि ?, स ब्रूते—त्वं किमिति न करोषि ?, तथा सूरिर्वदति—त्वमालस्यवान्, स वदति—भवानेवालस्यवानित्यादिस्वरूपेण तज्जातेन गुरुं प्रति भणिते भवत्याशातना शिष्यस्येति २४ ॥१४४॥

'नो सुमण'त्ति इत्यस्य व्याख्या—'रायणिए य कहंते कहं च एवं असुमण'त्ति एवं धर्मगुरौ कथां कथयति असुमनस्त्वे सति शिष्यस्याऽऽशातना, अहो एवमिदं शोभनं कथितं पूज्यैरपीति सुमना

नोपकृंहयतीत्यर्थः २५ ॥१४५॥

'एवं नो सरसि तुमं एसो अत्थो न होइ एव'ंति एवं–अनेनैव प्रकारेणान्याऽऽशातना भवति गुरोः कथां कथयतो न भवन्तः स्मरन्ति एषोऽर्थ एवं न भवतीति यदा शिष्यो भाषते २६, इदानीं 'कहं छित्त'त्ति तत्राह– **एवं कहमच्छिदिय सयमेव कहेउमारभइ'** इति गुरौ धर्मकथां कथयति अहं भवतां कथां कथयिष्यामीति गुरुकथाछेदेन शिष्यस्याऽऽशातना २७ ॥१४६॥

'**परिसं भित्त**' त्ति इदानीं, तत्राह–'**तह परिसं चिय भिंदइ तह किंचि भणइ जह न सा मिलइ**' इति, गुरौ कथां कथयति शृण्वत्यां च प्रमुदितायां पर्षदि शिष्यो वदति–इयं भिक्षावेला भोजनवेला सूत्रपौरुषीवेला वेत्यादि, एवं पर्षद्भेदेन आशातना तस्य २८, '**इदानीं अणुट्ठियाए कहे**'-त्ति तत्राऽऽह–'ताए अणुट्ठियाए गुरुभणियं सवित्थरं भणइ' इति गुरुभिर्धर्मकथायां कृतायामनुत्थितायामेव तस्यां पर्षदि स्वस्य पाटवादिज्ञापनाय गुरुभणितमेवार्थं चर्वयित्वा पुनः पुनः सविस्तरं कथयतः शिष्यस्याऽऽशातना २९ ॥१४७॥

'**संथारपायघट्टणे**' त्ति इदानीं तत्राऽऽह–'सेज्जं संथारं वे'ति गुरोः शय्यां संस्तारादिकं वा पादैर्घट्टयित्वाऽननुज्ञाप्य करैर्वा स्पृष्ट्वा न यः क्षमयति तस्याऽऽशातना, तथा चागमः–"संघट्टयित्ता पाएणं, तहा उवहिणामवि । खमेह अवराहं मे, वइज्ज न पुणत्तिय ॥१॥" इति [पादाभ्यां संघट्टयोपधिमपि क्षमयध्वं ममापराधं तथा वदेत् न पुनरिति ॥१॥] तत्र शय्या–सर्वाङ्गीणा संस्तारकस्तु सार्धहस्तद्वयप्रमाण इति ३० ॥१४८॥

अथ 'चिट्ठत्ति' तत्राह–'गुरुसेज्जसंथारगचिट्ठण निसीयण तुयट्टणेऽहऽवग' इति गुरूणां शय्यायां संस्तारके वाऽवस्थाने निषदने त्वग्वर्तने वा क्रियमाणेऽथाऽपरा शिष्यस्याऽऽशातना ३१, 'उच्चसमासणे यावि' त्ति तत्राह—'गुरुउच्चसमासणचिट्ठणाइकरणेण दो चरिमा' इति, तत्र गुरोः पुरत उच्चे आसने उपवेशनादि कुर्वत आशातना ३२, एवं गुरोः पुरतः समे आसने उपवेशनादि विदधत आशातना ३३, अनेन गाथोत्तरार्धेन चरमाऽऽशातनाद्वयं गृहीतमिति त्रयस्त्रिंशदाशातनाः ॥१४९॥

साम्प्रतं **'दोसा बत्तीस'** त्ति द्वारं तत्राह—

अणाढियं च थद्धं च, पविद्धं परिपिंडियं ।
टोलगइ अंकुसं चेव, तहा कच्छवरिंगियं ॥१५०॥
मच्छुव्वत्तं मणसा पउट्ठं तह य वेइयाबद्धं ।
भयसा चेव भयंतं मित्ती गारव कारणा ॥१५१॥
तेणियं पडिणीयं च, रुट्ठं तज्जियमेव य ।
सट्ठं च हिलियं चेव, तहा विप्पलिउंचियं ॥१५२॥
दिट्ठमदिट्ठं च तहा, सिंगं च कर मोयणं ।
आलिट्ठमणालिट्ठं, ऊणं उत्तरचूलियं ॥१५३॥

३० ३१ ३२
मूयं च ढड्ढरं चेव, चुडुलीयं च अपच्छिमं ।
बत्तीसदोसपरिसुद्धं, किइकम्मं पउंजए ॥१५४॥

'अनादृतं चेत्यादि गाथापञ्चकव्याख्या—अनादृतं स्तब्धं प्रविद्धं परिपिण्डितं टोलगतिं अंकुशं चैव तथा कच्छपरिङ्गितमिति प्रथमगाथायां सप्त दोषाः ७ ॥१५०॥

मत्स्योद्वृत्तं मनसा प्रदुष्टं तथा च वेदिकाबद्धं 'भयसा चेव'त्ति भयेनैव 'भयंत'ति भजमानो वन्दनकमपि भजन् मैत्रीं गौरवं कारणं चाश्रित्य वन्दनकमिति द्वितीयगाथायामष्टौ दोषाः १५ ॥१५१॥

स्तैन्येन—चौर्येण कृतं वन्दनमपि स्तैन्यं प्रत्यनीकवन्दनं रुष्टं वन्दनं तर्जयन् वन्दत इति तर्जितवन्दनं शठवन्दनं चशब्दः समुच्चये हीलितवन्दनं तथा विपरिकुञ्चितमिति तृतीयगाथायां सप्त दोषाः २२॥१५२॥

तथा दृष्टादृष्टं तथा शृङ्गं चः समुच्चये कर(रो)मोचनं आश्लिष्टाऽनाश्लिष्टं न्यूनं उत्तरचूलिकमिति चतुर्थगाथायां सप्त दोषाः २९ ॥१५३॥

मूकं चः समुच्चये ढड्ढरं चैव तथैव चूडलिकं च पूर्ववत् अपच्छिमं' ति अभद्रमुखो मद्रमुख इतिवदपश्चिमं पश्चिमं पर्यन्तवर्ति इति पञ्चमगाथार्धे त्रयो दोषाः ३२ ॥१५४॥

एवं द्वात्रिंशद्दोषपरिशुद्धं कृतिकर्म प्रयुञ्जीत साधुरिति दोषनामोत्कीर्तनगाथापञ्चकार्थः ॥

इदानीं तानेव यथाक्रमं व्याचष्टे—

आयरकरणं आढा तव्विरीयं अणाढियं होइ ।
दव्वे भावे थद्धो चउभंगो दव्वओ भइओ ॥१५५॥
पविद्धमणुवयारं जं अप्पितो णिज्जंतिओ होइ ।
जत्थ व तत्थ व उज्झइ कियकिच्चोवक्खरं चेव ॥१५६॥
संपिंडिए व वंदइ परिपिंडियवयणकरणओ, वावि ।
टोलोव्व उप्फिडंतो ओस्सक्कहिसक्कणे कुणइ ॥१५७॥
उवगरणे हत्थंमि व घेत्तु निवेसेइ अंकुसं विंति ।
ठिउविद्धरिंगणं जं तं कच्छभरिंगियं जाण ॥१५८॥
उद्विननिवेसिंतो उव्वत्तइ मच्छउव्व जलमज्झे ।
वंदिउकामो वऽन्नं झसो व परियत्तए तुरियं ॥१५९॥
अप्पपरपत्तिएणं मणप्पओसो य वेइयापणगं ।
तं पुण जाणूवरि १ जाणुहिट्ठाओ २ जाणुबाहिं ३ वा ॥१६०॥
कुणइ करे जाणुं वा एगयरं ठवइ करजुयलमज्झे ४ ।
उच्छंगे करइ करे ५ भयं तु निज्जूहणाईयं ॥१६१॥
भयइ व भयिस्सइत्ति य इअ वंदइ पहोरयं निवेसंतो ।
एमेव य मित्तीए गारव सिक्खाविणीओऽहं ॥१६२॥

नाणाइतिगं मोत्तुं कारणमिहलोयसाहयं होइ ।
पूयागारवहेऊं नाणग्गहणेवि एमेव ॥१६३॥
हाउं परस्स दिट्ठिं वंदंते तेणियं हवइ एयं ।
तेणोविव अप्पाणं गूहइ ओभावणा मा मे ॥१६४॥
आहारस्स उ काले नीहारस्सावि होइ पडिणीयं ।
रोसेण धमधमंतो जं वंदइ रुट्ठमेयं तु ॥१६५॥
नवि कुप्पसि न पसीयसि कट्ठसिवो चेव तज्जियं एयं ।
सोसंगुलिमाईहिं य तज्जेइ गुरुं पणिवयंतो ॥१६६॥
वीसंभट्ठाणमिणं सब्भावजढे सढं भवइ एयं ।
कवडंति कइयवंति य सढयावि य हुंति एगट्ठा ॥१६७॥
गणिवायगजिट्ठज्जत्ति हीलिउं किं तुमे पणमिऊण ?।
दरवंदियंमिवि कहं करेइ पलिउंचियं एयं ॥१६८॥
अंतरिओ तमसे वा न वंदई वंदइ उ वीसंतो ।
एयं दिट्ठमदिट्ठं सिंगं पुण सुद्धपासेहिं ॥१६९॥
करमिव मन्नइ दिंतो वंदणयं आरहंतियकरोत्ति ।
लोइयकराउ मुक्का न मुच्चिमो वंदणकरस्स ॥१७०॥

आलिद्धमणालिद्धं रयहरणसिरेहिं होइ चउभंगो ।
वयणक्खरेहिं ऊणं जहन्नकालेवि सेसेहिं ॥१७१॥
दाऊण वंदणं मत्थएण वंदामि चूलिया एसा ।
मूयन्व सद्दरहिओ जं वंदइ मूयगं तं तु ॥१७२॥
ढड्ढरसरेण जो पुण सुत्तं घोसेइ ढड्ढरं तमिह ।
चुडलिं व गिण्हिऊणं रयहरणं होइ चुडलिं तु ॥१७३॥
पडिक्कमणे सज्झाए काउस्सग्गेऽवराह-पाहुणए ।
आलोयणसंवरणे उत्तमट्ठे य वंदणयं ॥१७४॥

'आयरकरण'मिति आदरः—सम्भ्रमस्तत्करणमादृतं आर्षत्वादाढा तद्विपरीतं—तद्रहितमनादृतं भवति १, जात्यादिमदस्तब्धेन क्रियमाणं वन्दनकमपि स्तब्धं, स्तब्धश्च द्रव्यतो भावतश्च भवति, तत्र चतुर्भङ्गिका, यथा—द्रव्यतः स्तब्धो न भावतः भावतः स्तब्धो न द्रव्यतः अपरो द्रव्यतोऽपि भावतोऽपि च चतुर्थो न द्रव्यतो न भावतः, तत्र द्रव्यतो वातादिपरिगृहीतं कस्यापि शरीरं न नमति भावतस्तु अस्तब्ध एवेत्याद्यो भङ्गः, द्वितीये तु भावः—चित्ताध्यवसायलक्षणः स्तब्धः शरीरं त्वस्तब्धमिति, तृतीये तु द्वयमपि स्तब्धं, चतुर्थे तु द्वयमपि न स्तब्धं, अयं च शुद्धो भङ्गः, शेषभङ्गकेष्वपि भावतः स्तब्धोऽशुद्ध एव, द्रव्यतस्तु भजनीयः—शुद्धोऽशुद्धश्च, तत्र उदरपृष्ठशूलव्यथादिबाधितोऽवनामं कर्तुमशक्तः कारणतः

स्तब्धोऽपि शुद्धो, निष्कारणस्त्वशुद्धः, अत एवाह—'दव्वओ भइओ' त्ति द्रव्यतो भाज्यो—भजनीयो, न दुष्ट एव, भावतस्तु स्तब्धो दुष्ट एवेति तात्पर्यम् २ ॥१५५॥

तृतीयदोषमाह—'पविद्धमणुवयारं' ति प्रविद्धं नाम यदुपचाररहितं, एतदेव व्याचष्टे—यद्वन्दनकं गुरुभ्योऽर्पयन्—ददत् अनियन्त्रितो भवति, अनवस्थित इत्यर्थः, अनवस्थितत्वेन च यत्र वा तत्र वा स्थाने प्रथमप्रवेशादिलक्षणेऽसमाप्तमपि वन्दनकमुज्झित्वा नश्यति, क इव यथा किमुज्झतीत्याह—'कियकिच्चोवक्खरं चेव' त्ति, एतदुक्तं भवति-केनचिद् भाटकिना कुतश्चिन्नगरान्नगरान्तरेऽवस्करं—भाण्डमुपनीतं, अवस्करस्वामिना च स भाटकी भणितः—प्रतिक्षस्व किञ्चित्कालं, यावदस्यावस्करस्यावतारणाय स्थानं किञ्चिदन्वेषयामि कुत्रापीति, स प्राह—मयाऽस्मिन्नेव नगरे समानेतव्यमिदमित्येवोक्तं, अतः कृतकृत्यस्त्वान्नातः प्रतीक्षेऽहमित्युक्त्वाऽस्थाने एव तद्भाण्डमुज्झित्वा गच्छति, एवं साधुरप्यस्थाने एव वन्दनकं परित्यज्य नश्यतीत्येतावताऽताशेनशेन दृष्टान्त इति गाथार्थः ३ ॥१५६॥

चतुर्थं दोषमाह—'संपिंडिए व' त्ति यत्र सम्पिण्डितान् एकत्र मिलितानाचार्यादीनेकवन्दनकेनैव वन्दते न पृथक् पृथक् तत्परिपिण्डितं वन्दनकमुच्यते, अथवा वचनानि—सूत्रोच्चारणरूपाणि करणानि—करचरणादीनि सम्पिण्डितानि—अव्यवच्छिन्नानि वचनकरणानि यस्य स तथा, ऊर्वोरुपरि हस्तौ परिस्थाप्य संपिण्डितकरचरणोऽव्यक्तसूत्रोच्चारणपुरस्सरं यद्वन्दते तत्परिपिण्डितमिति भावः ४, पञ्चमं दोषमाह—'टोलोव्व' त्ति अवष्वष्कणं पश्चाद्गमनमभिष्वष्कणं—अभिमुखगमनं ते अवष्वष्कणाभिष्वष्कणे टोलोव्वतिट्टवदुत्प्लवमानः करोति यत्र तट्टोलगतिवन्दनकमित्यर्थः ५ ॥१५७॥

षष्ठं दोषमाह–'उवगरणे' ति यत्राङ्कुशेन गजमिव शिष्यः सूरिमूर्ध्वस्थितं शयितं प्रयोजनान्तरव्यग्रं वोपगरणे–चोलपट्टककल्पादौ हस्ते वाऽवज्ञया समाकृष्य वन्दनकदानार्थमासने उपवेशयति तदङ्कुशवन्दनकमुच्यते, न हि श्रीपूज्याः कदाचनाप्युपकरणाद्याकर्षणमर्हन्त्यविनयत्वात्, किन्तु प्रणामं कृत्वा कृताञ्जलिपुटैर्विनयपूर्वकमिदमभिधीयते–उपविशन्तु भगवन्तो येन वन्दनकं प्रयच्छामीत्यतो दोषदुष्टमिदमिति, आवश्यकवृत्तौ तु रजोहरणमङ्कुशवत् करद्वयेन गृहीत्वा यद्वन्द्यते तदंकुशमिति व्याख्यातं, अन्ये तु अङ्कुशाक्रान्तस्य हस्तिन इव शिरोऽवनमनोन्नमने कुर्वाणस्य यद्वन्दनं तदङ्कुशमित्याहुः, एतच्च द्वयमपि सूत्रानुयायि न भवति, तत्त्वं पुनर्बहुश्रुता जानन्ति ६, **सप्तमं दोषमाह–'ठिउविट्ठरी'** ति स्थितस्योर्ध्वस्थानेन **'तितीसन्नयरा'** इत्यादिसूत्रमुच्चारयतः उपविष्टस्य–आसीनस्य **'अहो कायं काय'** इत्यादि सूत्रं भणतः कच्छपस्येव–जलचरजीवविशेषस्येव रिङ्गणं–अग्रतोऽभिमुखं पश्चादभिमुखं च यत् किञ्चिच्चलनं तच्च यत्र करोति शिष्यस्तत्कच्छपरिङ्गितं जानीहि ७ ॥१५८॥

अष्टमं दोषमाह–'उट्ठिनिवेसिंतो' त्ति उत्तिष्ठन्निविशमानो वा जलमध्ये मत्स्य इव उद्वर्तते–उद्वेल्लति यत्र तन्मत्स्योद्वृत्तं अथवा एकमाचार्यादिकं वन्दित्वा तत्समीप एवापरं वन्दनार्हं कञ्चन वन्दितुमिच्छंस्तत्समीपं जिगमिषुरुपविष्ट एव झष इव–मत्स्य इव त्वरितमङ्गं परावृत्य यद्गच्छति तन्मत्स्योद्वृत्तं, इत्थं च यदङ्गपरावर्तनं तज्झषावर्तमित्यभिधीयते ८ ॥१५९॥

नवममाह—'अप्पपरपच्चएणं' ति मनसः प्रद्वेषोऽनेकनिमित्तो भवति, स च सर्वोऽप्यात्मप्रत्ययेन परप्रत्ययेन वा स्यात्, तत्राऽऽत्मप्रत्ययेन यदा शिष्य एव गुरुणा किञ्चित्परुषमभिहितो भवतीति,

परप्रत्ययेन तु यदा तस्यैव शिष्यस्य सम्बन्धिनः सुहृदादेः सम्मुखं सूरिणा किमप्यप्रियमुक्तं भवतीत्येवं-प्रकारैरपरैरपि स्वपरप्रत्ययैः कारणान्तरैर्मनःप्रद्वेषो भवति यत्र तन्मनःप्रद्विष्टमुच्यते, 'अप्पपरपत्तिएणं' ति यदा पाठस्तदा आत्माऽप्रीतिकेन पराऽप्रीतिकेन च मनःप्रदुष्टं भवति, भावना पूर्ववत् ९। **दशमं दोषमाह**—'वेइयापणगंति' जानुनोरुपरि **हस्तौ** निवेश्य अधो वा पार्श्वयोर्वा उत्सङ्गे वा एकं वा जानु दक्षिणं वा वामं वा करद्वयान्तः कृत्वा **यत्र** वन्दनकं विधत्ते तद्वेदिकापञ्चकदोषदुष्टवन्दनकमिति १० ॥१६०॥

एकादशं दोषमाह—'भयंति निज्जूहणाईयं'ति—निर्यूहनं गच्छान्निष्काशनं तदादिकं यद्भयं तेन यद्वन्दते तद्भयवन्दनकमाख्यायते इति यथासम्भवं साध्याहारा सर्वत्र व्याख्या कर्तव्या, सूचा-मात्रत्वात् सूत्रस्येति ११ ॥१६१॥

द्वादशं दोषमाह—'भयइ व भइस्सइ वत्ति' भर्तव्यं, भो आचार्य भवन्तं वन्दमाना वयं तिष्ठाम इत्येवं निहोरकं निवेशयन् वन्दते, किमर्थं ?—भजते वा मां भजनं वा मे करिष्यतीतिहेतोः, किमुक्तं भवति ?—एष तावद्भजते—अनुवर्तते मां सेवायां पतितो वर्तते ममेत्यर्थः, अग्रे च मम भजनं करिष्यत्यसौ, ततश्चाहमपि वन्दनकमत्कं निहोरकं निवेशयामीत्यभिप्रायेण वा यत्र वन्दते तद्भजमानवन्दनकमभिधीयते इति १२। **त्रयोदशं दोषमाह**—'एवमेवेति मित्तीए'त्ति एवमेवेति कोऽर्थः ?—यथा निहोरकदोषा-दिदुष्टं वन्दते तथा मैत्र्याऽपि—मैत्रीमाश्रित्य कश्चिद्वन्दते, आचार्येण सह मैत्रीं—प्रीतिमिच्छन् वन्दत इत्यर्थः, तदिदं मैत्रीवन्दनकमुच्यते १३। **चतुर्दशं दोषमाह**—'गारव सिक्खाविणीओऽहं' ति 'गारव'त्ति

गौरवनिमित्तं वन्दनकमिति, कथं ?, तदित्याह--'**सिक्खाविणीओऽहं**' ति शिक्षा-वन्दनकप्रदानादि-सामाचारीविषया तस्यां विनीतः-कुशलोऽहमित्यवगच्छंस्त्वमी सर्वेऽपि साधव इत्यभिप्रायवान् यथावदावर्ताद्याराधयन् यत्र वन्दते तद्गौरववन्दनकमित्यर्थः १४ ॥१६२॥

इदानीं **पञ्चदशं दोषमाह**-कारणलक्षणदोषमभिधित्सुः कारणस्यैव तावल्लक्षणमाह-'**नाणाइतियं**' ति ज्ञानदर्शनचारित्रत्रयं मुक्त्वा यत्किमप्यन्यदिहलोकसाधकं वस्त्रकम्बलादि वन्दनकदानात्साधुरभिलषति तत्कारणं भवतीति प्रतिपत्तव्यं तस्माद्वन्दनकं कारणवन्दनकमिति । ननु ज्ञानादिग्रहणार्थं यदा वन्दते तदा किमेकान्तेनैव कारणं न भवतीत्याह-'**पूये**'त्यादि, यदि पूजाशयेन गौरवाशयेन वा ज्ञानादिग्रहणेऽपि वन्दते तदा तदपि कारणवन्दनकं भवतीति, अत्र च '**नाणग्गहणेऽवि**' त्ति उपलक्षणत्वाद्दर्शनचारित्रग्रहणेऽपीति १५ ॥१६३॥

षोडशं दोषमाह-'**हाउं परस्से**' ति परस्य-आत्मव्यतिरिक्तस्य साधुश्रावकादेर्दृष्टिं हित्वा-वञ्चयित्वा वन्दमाने सति शिष्ये स्तैन्यवन्दनकं भवति, एतदेवोत्तरार्धेन स्पष्टतरं व्याचष्टे-स्तेन इव-तस्कर इवान्यसाध्वाद्यन्तर्धानेनात्मानं गूहयति-स्थगयति, कस्मादित्याह-'**ओभावणा मा मे**' त्ति नन्वसावप्यतिविद्वान् किमन्येषां वन्दनकं प्रयच्छतीत्येवंरूपाऽपभ्राजना मम मा भूदित्यर्थः १६ ॥१६४॥

सप्तदशं दोषमाह-'**आहारस्स उ**' इत्यादि, आहारस्य नीहारस्य वा-उच्चारादेः काले वन्दमानस्य भवति प्रत्यनीकवन्दनकमिति १७ । **अष्टादशं दोषमाह**-'**रोसेण**' त्ति रोषेण केनापि स्वविकल्पजनितेन '**धमधमिंतो**'त्ति जाज्वल्यमानो यद् वन्दते तद् रुष्टवन्दनकमिति ॥१८ ॥१६५॥

एकोनविंशं दोषमाह--'**नवि कुप्पसी**' ति काष्ठघटितशिवदेवताविशेष इवावन्द्यमानो न कुप्यसि, तथा वन्द्यमानोऽप्यविशेषज्ञतया न प्रसीदसीत्येवं तर्जयन्-निर्भर्त्सयन् यद् वन्दते तत्तर्जितमुच्यते, यदिवा 'लोकमध्ये वन्दनकं मां दापयन् त्वं तिष्ठसि सूरे ! परं ज्ञास्यते तवैकाकिन' इत्यभिप्रायवान् यदा शीर्षेणाङ्गुल्या वा प्रदेशिनीलक्षणया आदिशब्दाद् भ्रूप्रभृतिभिर्गुरुं प्रणिपतन्-वन्दमानस्तर्जयति तदा तर्जितं भवतीति १९ ॥१६६॥

विंशतितमं दोषमाह-'**चीसंभट्ठाण**'मिति विश्रम्भः-विश्वासस्तस्य स्थानमिदं वन्दनकं, एतस्मिन् यथावद्दीयमाने श्रावकादयो विश्वसन्तीत्यभिप्रायेणैव '**सब्भावजड्ढे**'त्ति सद्भावरहिते अन्तर्वासनाशून्ये वन्दमाने सति शिष्ये शठमेतद्वन्दनकं भवतीति शठशब्दमेव पर्यायशब्दैर्व्याचष्टे कपटमिति कैतवमिति च शठताऽपि चेति भवन्त्येकार्थाः २० ॥१६७॥

एकविंशतितमं दोषमाह-'**गणिवायग**'त्ति गणिन् ! वाचक ? ज्येष्ठार्य ! किं त्वया वन्दितेनेत्यादि सोत्प्रासं हीलयित्वा यत्र वन्दते तद् हीलितवन्दनकमुच्यते २१ । **द्वाविंशं दोषमाह**-'**दरवंदियअंमि**'त्ति ईषद् वन्दितेऽपि देशादिका विकथा यत्र करोति तद्विपरिकुञ्चितमिति २२ ॥१६८॥

त्रयोविंशं दोषमाह--'**अंतरिउ**' त्ति बहुषु वन्दमानेषु साध्वादिना केनचिदन्तरितस्तमसि वा मान्धकारे प्रदेशे व्यवस्थितो मौनं विधाय उपविश्य वा आस्ते न तु वन्दते दृश्यमाणस्तु वन्दते, एतद् दृष्टादृष्टं वन्दनकमभिधीयते २३ । **चतुर्विंशं दोषमाह**-'**सिगं पुण मुद्धपासेहिं**' ति मूर्धशब्देनेह ललाटमुच्यते तस्य पार्श्वौ-वामदक्षिणभागौ ताभ्यां यद्ददाति वन्दनं तत् शृङ्गमुच्यते, इदमुक्तं भवति-

'अहो कायं काय' इत्यावर्तान कुर्वन् कराभ्यां न ललाटस्य मध्यदेशं स्पृशति, किन्तु ललाटस्य वाम-पार्श्वं दक्षिणपार्श्वं वा स्पृशतीति, क्वचित् 'सिगं पुण कुंभपासेहिं'ति पाठो दृश्यते, तत्रापि कुम्भशब्देन ललाटमेव भण्यत इति, शेषं पूर्ववदिति २४ ॥१६९॥

इदानीं पञ्चविंशं गाथायाः पूर्वार्धेन **करनामकं दोषं** उत्तरार्धेन तु **मोचनलक्षणं षड्विंशं दोषमाह** —'करमिवे' ति करमिव–राजदेयभागमिव मन्यते ददद्वन्दनकं आर्हतः करवन्दनक मिति २५। गृहीतव्रताश्च वयं लौकिककरान्मुक्तास्तावत् न मुच्यामहे तु वन्दनककरस्यार्हतस्येति मोचनवन्दनकमिति २६ ॥१७०॥

सप्तविंशं दोषमाह–'आलिट्ठमणालिट्ठमि' ति आश्लिष्टमनाश्लिष्टं चेति पदद्वयमाश्रित्य रजोहरण-शिरसोर्विषये चतुर्भङ्गिका भवति, सा च 'अहो कायं काय' इत्याद्यावर्तकाले सम्भवति, यथा रजोहरणं कराभ्यामाश्लिष्यति शिरश्चेन्येकः १ रजोहरणं श्लिष्यति न शिर इति द्वितीयः २ शिरः श्लिष्यति न रजोहरणमिति तृतीयः ३, न रजोहरणं न शिरश्च श्लिष्यतीति चतुर्थो भङ्ग ४ इति, अत्राऽऽद्यो भङ्गः शुद्धः, शेषभङ्गत्रये आश्लिष्टानाश्लिष्टदोषदुष्टं प्रकृतवन्दनकमवतरतीति २७। **अष्टाविंशं दोषमाह**–'वयण-क्खरेहिं' ति वचनं-वाक्यं क्रियान्ताक्षरसमूहात्मकं तेन अक्षरैर्वा एकद्व्यादिभिर्हीनं न्यूनमुच्यते, यदिवा 'जहन्नकाले व सेसेहिं'ति यदि पुनः कश्चिदत्युत्सुकः प्रमादितया जघन्येनैव–स्वल्पेनैव कालेन वन्दनकं समापयति तदा आस्तां वचनाक्षरैः शेषैरप्यवनामादिभिरावश्यकैन्यूनं भवतीत्यर्थः २८ ॥१७१॥

एकोनत्रिंशं दोषमाह—'दाऊणं'ति दत्त्वा वन्दनकं पश्चान्महता शब्देन 'मस्तकेनाहं वन्दे' इति यत्र वदति तदुत्तरचूडमिति २९ । त्रिंशत्तमं दोषमाह-'मूओव्व'त्ति आलापकाननुच्चारयन् यद् वन्दते तन्मूकमिति ३० ॥१७२॥

एकत्रिंशं दोषमाह—'ढड्ढरं' ति ढड्ढरेण-महता शब्देनोच्चारयन्नालापकान् यद्वन्दते ढड्ढरं तदिहेति ३१ । द्वात्रिंशं दोषमाह—'चुडुलियव्व'त्ति उल्कामिव-अलातमिव पर्यन्ते रजोहरणं गृहीत्वा भ्रमयन् यत्र वन्दते तच्चुडुलिकमिति द्वात्रिंशद्दोषाः ३२ ॥१७३॥

तथा अन्यहं नियतान्यनियतानि च वन्दनकानि भवन्ति, अत उभयस्थाननिदर्शनायाह—'पडिक्कमणे' त्ति, प्रतीपं क्रमणं प्रतिक्रमणं, अपराधस्थानेभ्यो गुणस्थानेषु निवर्तनमित्यर्थः तस्मिन् सामान्यतो वन्दनकं भवति १, तथा स्वाध्याये वाचनादिलक्षणे २, तथा कायोत्सर्गो यः किल विकृतिपरिभोगाय आचाम्लादिविसर्जनार्थं क्रियते ३, तथाऽपराधे—गुरुविनयोल्लङ्घनरूपे यतो वन्दनकं दत्त्वा तं क्षमयति ४, तथा प्राघूर्णके समागते सति वन्दनकं भवति, अयमर्थो—ज्येष्ठस्य प्राघूर्णकस्य समागतस्य लघवो वन्दनकं ददति, लघुनाऽपि प्राघूर्णकेन समागतेन वन्दनकं ज्येष्ठस्य दातव्यं, अत्र चायं विधिः—

संभोइयअसंभोइया य दुविहा हवंति पाहुणया । संभोए आयरियं आपुच्छित्ता उ वंदंति ॥१॥
इयरे पुण आयरियं वंदित्ता संदिसाविउं तह य । पच्छा वंदेइ जई गयमोहो अहव वंदावे ॥२॥ इति ।
सांभोगिका अन्यसांभोगिकाश्च द्विविधा भवन्ति प्राघूर्णकाः । सांभोगिकेषु आचार्यमापृच्छ्यैव वन्दते ॥१॥
इतरे पुनराचार्यं वन्दित्वा संदिश्य तथा च पश्चाद् वन्दते यतीन् गतमोहः अथवा वन्दयेत् ॥२॥] ५,

तथाऽऽलोचनायां—अपराधे सति विहारगमने च दीयमानायां वन्दनकं भवति, वन्दनकं दत्त्वा गुरूणामालोचना दीयते इत्यर्थः ६, तथा बहुभिराकारैर्गृहीतस्यैकाशनादिप्रत्याख्यानस्य भोजनानन्तरमाकारसङ्क्षेपणस्वरूपं संवरणं अथवा कृतनमस्कारसहितादिप्रत्याख्यानस्यापि पुनरजीर्णादिकारणतोऽभक्तार्थं गृह्णतः संवरणं तस्मिन्नपि वन्दनकं दत्त्वा यत् क्रियते इति ७, तथा उत्तमार्थे—अनशनसंल्लेखनायां वन्दनकं भवतीति एवं नियतानियतस्थानानि वन्दनकानि सामान्येन दर्शितानि ॥१७४॥

इति वन्दनकद्वारं 'पडिक्कमणं' ति तृतीयद्वारमधुना—

तत्र **'प्रतिक्रमण'**मिति प्रतीत्ययमुपसर्गः प्रतीपे प्रातिकूल्ये च वर्तते 'क्रमु पादविक्षेपे' इत्यस्य भावे ल्युट्प्रत्ययान्तस्य प्रतीपं प्रतिकूलं वा क्रमणं प्रतिक्रमणं, ततोऽयमर्थः—शुभयोगेभ्योऽशुभयोगान्तरं क्रान्तस्य शुभेष्वेव योगेषु क्रमणात्प्रतीपं क्रमणं, यदाह—"स्वस्थानाद्यत्परं स्थानं, प्रमादस्य वशाद्गतः । तत्रैव क्रमणं भूयः, प्रतिक्रमणमुच्यते ॥१॥"

प्रातिकूल्यं वा गमनं प्रतिक्रमणं, यदाहुः—"क्षायोपशमिकाद्भावादौदयिकवशं गतः । तत्रापि च स एवार्थः, प्रतिकूलगमात् स्मृतः ॥१॥"

वीप्सार्थे वा प्रतिशब्दः प्रति प्रति क्रमणं प्रतिक्रमणं, उक्तं च—"प्रति प्रति प्रवर्तनं वा शुभेषु योगेषु मोक्षफलदेषु । निःशल्यस्य यतेर्यत्तद्वा ज्ञेयं प्रतिक्रमणम् ॥१॥"

तच्चातीतानागतवर्तमानकालत्रयविषयं, ननु अतीतकालविषयमेव प्रतिक्रमणं युक्तं, यत उक्तम्—"अईयं पडिक्कमामि पडुपन्नं संवरेमि अणागयं पच्चक्खामी" ति [अतीतं प्रतिक्रामामि प्रत्युत्पन्नं संवृणोमि

अनागतं प्रत्याख्यामि] तत्कथं त्रिकालविषयता प्रतिपाद्यते ?, तत्रोच्यते, अत्र प्रतिक्रमणशब्दोऽशुभयोग-निवृत्तिमात्रार्थः, यदुक्तम्—"मिच्छत्तपडिक्कमणं तहेव असंजमे य पडिक्कमणं । कसायाण पडिक्कमणं जोगाण य अप्पसत्थाणं ॥१॥

[मिथ्यात्वप्रतिक्रमणं तथैवासंयमस्य प्रतिक्रमणं । कषायाणां प्रतिक्रमणं योगानां चाप्रशस्तानाम् ॥१॥

ततश्च निन्दाद्वारेणाशुभयोगनिवृत्तिरूपमतीतविषयं प्रतिक्रमणं प्रत्युत्पन्नविषयमपि संवरद्वारेणाशुभ-योगानामनागतमपि प्रत्याख्यानद्वारेणेति न कश्चिद्दोषः, तच्च दैवसिकादिभेदात्पञ्चविधं भवति, दिवस-स्यान्ते दैवसिकं रात्रेरन्ते रात्रिकं पक्षस्यान्ते पाक्षिकं चतुर्णां मासानामन्ते चातुर्मासिकं संवत्सरस्यान्ते सांवत्सरिकं, व्युत्पत्तिस्तु दिवसे भवमितीकणि दैवसिकमित्यादि, तत्पुनरपि द्विधा ध्रुवमध्रुवं च, तत्र ध्रुवं भरतैरावतेषु प्रथमचरमतीर्थकरतीर्थेषु अपराधो भवतु मा वा उभयकालं प्रतिक्रमणं, अध्रुवं पुनर्मध्यम-तीर्थकरतीर्थेषु महाविदेहेषु च, तेषां हि कारणजात एव समुत्पन्ने प्रतिक्रमणं, नान्यथा, यदाहुः—'सपडि-क्कमणो धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स । मज्झिमगाण जिणाणं कारणजाए पडिक्कमणं ॥१॥

[सप्रतिक्रमणो धर्मः पूर्वस्य च पश्चिमस्य च जिनस्य । मध्यगानां जिनानां कारणजाते प्रतिक्रमणं ॥१॥]

प्रतिक्रमणविधिश्चायं—"पञ्चविहायारविसुद्धिहेउमिह साहु । सावगो वाऽवि ।

पडिक्कमणं सह गुरुणा गुरुविरहे कुणइ एक्कोवि ॥१॥"

[पञ्चविधाचारविशुद्धिहेतोरिह साधुः श्रावको वाऽपि । प्रतिक्रमणं सह गुरुणा गुरुविरहे करोत्ये-कोऽपि ॥१॥]

तत्राह—दैवसिकप्रतिक्रमणविधिः ।

चिइवंदण उस्सग्गो पोत्तियपडिलेह वंदणालोए ।
सुत्तं वंदण खामण वंदणय चरित्तउस्सग्गो ॥ १७५ ॥
दसणनाणुस्सग्गो सुयदेवयखेत्तदेवयाणं च ।
पुत्तियवंदण थुइतिय सक्कथय थोत्त देवसिय ॥ १७६ ॥

'चिइवंदणे'त्यादि, त्रसस्थावरजन्तुरहिते प्रेक्षितप्रमार्जिते स्थण्डिले ईर्यापथिकीं प्रतिक्रम्य प्रथमं चैत्यवन्दनं विधेयं, तदनु आचार्यादीनां क्षमाश्रमणानि दत्त्वा भूमिनिहितशिराः सकलदैवसिकातिचाराणां मिथ्यादुष्कृतं दत्त्वा सामायिकपूर्वकं 'इच्छामि ठाइउं काउस्सग्गं' इत्यादिसूत्रं भणित्वा दैवसिकातिचारचिन्तनार्थं कायोत्सर्गं करोति, कायोत्सर्गे च बहुव्यापाराः साधवो यावदेकगुणान् दैवसिकातिचारांश्चिन्तयन्ति तावदल्पहिण्डनको गुरुर्द्विगुणं चिन्तयति, ततो गुरुणोत्सारिते कायोत्सर्गे साधव उत्सारयन्ति, ततः पारयित्वा 'लोगस्सुज्जोयगरे' इत्यादि भणित्वा उपविश्य 'पोत्तियपडिलेह'त्ति पोतिकाया—मुखपोत्तिकायाः प्रतिलेखः—प्रतिलेखनं, प्रथमैकवचनस्य प्राकृतत्वाल्लोपो यथायथं द्रष्टव्यः, तदनु 'वंदण'त्ति वन्दनकं दातव्यं, 'आलोए'त्ति तत आलोचनं कार्यं, कायोत्सर्गचिन्तितातिचारांश्च गुरोः कथयति, तदनूपविश्य 'सुत्त'ति सामायिकादिसूत्रं भणतिसाधुः स्वकीयं, श्रावकस्तु स्वकीयं, यावद् 'वंदामि जिणे चउवीसं' इति, 'वंदण'त्ति तदनु वन्दनकं ददाति, 'खामण'त्ति तदनु क्षामणकं कुरुते गुर्वादीनां, तत्र चायं विधिः—गुरुमादिं कृत्वा ज्येष्ठानुक्रमेण सर्वान् क्षामयति, आचीर्णे तु यदि पञ्चकादिर्गणो भवति

तदा त्रितयं क्षमयति, अथ पञ्चकमध्ये तदा ज्येष्ठमेवैकमिति, एवं प्राभातिकप्रतिक्रमणादिष्वपि, तदनु **'वंदणय'**त्ति वन्दनकं ददाति, चः समुच्चये, इदं च वन्दनकमल्लियावणवंदणयमित्युच्यते, आचार्यादीनामाश्रयणायेत्यर्थः **'चरित्तउस्सग्गो'** त्ति तदनु चारित्रविशुद्ध्यर्थं कायोत्सर्गः कार्यः, तत्रोद्योतकरद्वयं चिन्तनीयम् ॥१७५॥

'दंसणे' त्यादि, ततो दर्शनशुद्धिनिमित्तमुत्सर्गः, तत्रैकोद्योतकरचिन्तनं, तदनु ज्ञानशुद्धिनिमित्तमुत्सर्गः, तत्राप्येकोद्योतकरचिन्तनं **'सुयदेवयखेत्तदेवयाणं च'**त्ति तदनु श्रुतसमृद्धिनिमित्तं श्रुतदेवताया: कायोत्सर्गमेकनमस्कारचिन्तनं च कृत्वा तदीयां स्तुतिं ददाति अन्येन दीयमानां शृणोति वा, ततः सर्वविघ्ननिर्दलननिमित्तं क्षेत्रदेवताया: कायोत्सर्गः कार्यः एकनमस्कारचिन्तनं कृत्वा तदीयां स्तुतिं ददाति परेण दीयमानां वा शृणोति चः समुच्चये, तदनु नमस्कारमभिधायोपविश्य **'पुत्तिय'** त्ति मुखपोत्तिकायाः प्रत्युपेक्षणं, तदनु **'वंदण'**त्ति मङ्गलादिनिमित्तं वन्दनकं देयं, तदनु **'इच्छामो अणुसट्ठिं'** इति भणित्वा उपविश्य गुरुभिरेकस्यां स्तुतौ भणितायां **'थुइतिय'** त्ति प्रवर्धमानं स्तुतित्रयं प्रवर्धमानस्वरेण भणनीयं, तदनु **'सक्कथयं'** ति शक्रस्तवो भणनीयः **'थोत्तं'** ति तदनु स्तोत्रं भणनीयं, तदनु दिवसातिचारविशुद्धये कायोत्सर्गः करणीयः लोगस्योद्योतकरचतुष्टयं च चिन्तनीयं, इदं च गाथायामभणितमपि विज्ञेयं, **'देवसिय'**-ति इदं सन्ध्यायां दैवसिकं प्रतिक्रमणं विज्ञेयम् ॥१७६॥

अथ प्राभातिकप्रतिक्रमणमभिधीयते, तत्राह—

मिच्छादुक्कड पणिवायदंडयं काउसग्गनियकरणं ।
पुत्तिय वदण आलोय सुत्त वंदणय खामणयं ॥१७७॥
वंदणय गाहानियपाढो छम्मासियस्स उस्सग्गो ।
पुत्तिय वंदण नियमो थुइतिय चिइवंदणा राओ ॥१७८॥
णवर पढमो चरणे दंसणसुद्धीय बीय उस्सग्गो ।
सुअनाणस्स तईओ नवर चिंतेइ तत्थ इमं ॥१७९॥
तइए निसाइयार चिंतइ चरिमंमि किं तवं काहं ?
छम्मासा एगदिणाइ हाणि जा पोरिसि नमो वा ॥१८०॥

'मिच्छादुक्कड पणिवाये'त्यादि, तत्र भूमितलनिवेशितशिरःकमलः सकलनिशातिचाराणां मिथ्यादुष्कृतं दत्त्वा प्रणिपातदण्डकं—शक्रस्तवमभिधायोत्थाय सामायिकादिसूत्रं भणित्वा चारित्रशुद्धिनिमित्तं कायोत्सर्गं करोति एकोद्योतकरचिन्तनं, कृत्वा पारयित्वा च दर्शनशुद्धिनिमित्तं—'लोगस्सुज्जोयगरं' भणित्वा पुनः कायोत्सर्गं करोति, तत्राप्येकमुद्योतकरं चिन्तयति, पारयित्वा ज्ञानविशुद्धिनिमित्तं 'पुक्खरवरि' त्ति भणित्वा पुनः कायोत्सर्गं विधत्ते, तत्र च निशातिचारांश्चिन्तयति इति कायोत्सर्गत्रितयकरणं पारयित्वा सिद्धादिस्तुतिं पठित्वा उपविश्य 'पुत्तिय'त्ति मुखपोतिकां प्रत्युपेक्ष्य वन्दनकमालोचनं च कृत्वा उपविश्य नमस्कारपूर्वं सामायिकादिसूत्रं 'वंदामि जिणे चउव्वीसं' इति पर्यन्तं भणित्वा वन्दनकं ददाति, तदनु क्षामणं कुरुते ॥१७७॥

'वंदणय'मित्यादि, पुनर्वन्दनं 'आयरिय उवज्झाए' इत्यादिगाथात्रिकस्य पाठः, तदनु पूर्ववत्सामायिकादिसूत्रं भणित्वा षाण्मासिकतपश्चिन्तनाय कायोत्सर्गः, तत्र च—

'येन संयमयोगानां, हानिः काऽपि न जायते । तत्तपः प्रतिपद्येऽहमिति भावितमानसः ॥१॥
श्रीमहावीरतीर्थेऽस्मिन्नुपवासतपः किल । षण्मासान् यावदादिष्टमुत्कृष्टं गणधारिभिः ॥२॥'

ततो **जीव** ! शक्नोऽसि त्वं संयमयोगानाबाधया षाण्मासिकं तपः कर्तुम् ? इति विचिन्त्य न शक्नोमीति परिभावयति, एकदिनहीनान् षण्मासान् शक्नोषि कर्तुं ?, एकोनत्रिंशद्दिनानि पञ्चमासांश्चेत्यर्थः, न शक्नोमीति पूर्ववत्, पुनर्द्वात्रिंशद्दिनहीनान् यावदेकोनत्रिंशद्दिनहीनान् षण्मासानिति, एवं पञ्च मासान् चतुरो द्वौ चैकादिदिनहीनांश्च चिन्तयेत्, एकं च माममेकादिदिनहीनं यावत् त्रयोदशदिनहीनं, ततश्चतुस्त्रिंशद् द्वात्रिंशादिकं द्विकद्विकहान्या चिन्तयेत् यावच्चतुर्थं, तदनु आचाम्लनिर्विकृतिकपूर्वार्द्ध-एकाशनादिनमस्कारसहितान्तं यावत्कर्तुं शक्नोति तन्मनसि कृत्वा कायोत्सर्गं पारयति, चतुर्विंशतिस्तवं च भणित्वा उपविश्य 'पुत्तिय' त्ति मुखपोतिकां प्रत्युपेक्षते; 'वंदण'त्ति ततो वन्दनकं ददते, **'नियमो'**त्ति ततो नियमः प्रत्याख्यानं, **'थुइत्तिय'** त्ति ततः स्तुतित्रितयं प्रवर्धमानाक्षरं गुरुगोधिकादिसत्त्वोत्थापनपरिहारायाल्पस्वरेण भणति, **'चिइवंदण'**त्ति ततश्चैत्यवन्दनं विधत्ते **'राओ'**त्ति रात्रिप्रतिक्रमणे ॥१७८॥

'नवर'मित्यादि नवरं केवलं प्रथम उत्सर्गः **'चरणे'** ति चारित्रशुद्धिनिमित्तं, दर्शनशुद्धिनिमित्तं च द्वितीय उत्सर्ग एकैकोद्योतकरचिन्तनं, श्रुतज्ञानस्य शुद्धिकृते तृतीयः, नवरं—केवलं तत्रेदं—वक्ष्यमाणं चिन्तयति तदेवाह—॥१७९॥

'नइए निसे'त्यादि, तृतीये उत्सर्गे निशातिचारं चिन्तयति, चरिमे कायोत्सर्गे किं तपः करिष्यामीति १, षण्मासान् एकदिनादिहान्या यावत्यौरुषीं 'नमोर्हे'ति नमस्कारसहितं वा यावच्चिन्तयेदिति ॥१८०॥

ननु दैवसिकप्रतिक्रमणे प्रथमोत्सर्गेऽतिचारश्चिन्त्यन्ते द्वितीयादिकायोत्सर्गेषु च चारित्रादिशुद्धयः क्रियन्ते, प्राभातिकप्रतिक्रमणे च किमिति वैपरीत्येनोत्सर्गकरणमिति, अत्रोच्यते, प्राभातिकप्रतिक्रमणे प्रथमकायोत्सर्गे प्रबुद्धोऽप्यद्यापि निद्राघूर्णमानलोचनः किञ्चिदालम्यवश्यशरीरः सम्यग्निशातिचारानशेषानपि स्मरन्न पटूयते, निद्राघूर्णितत्वेन च परस्परं यतीनां संघट्टनादोषो भवति, उत्सर्गानन्तरं च कृतिकर्मादिकं क्रियमाणं नास्खलितं सम्पद्यते, चारित्रदर्शनशुद्धिविधायिनोः कायोत्सर्गयोः कृतयोर्निद्रामुद्रायां च लोचनयोरपगतायामालस्ये च शरीरादपगते सञ्जातपाटवः सुखेनैव सर्वान्निशातिचारान् ज्ञानशुद्धिहेतुतृतीयोत्सर्गे स्मरति साधूनां परस्परसंघट्टनां रक्षति कृतिकर्मादिकं चास्खलितं यथास्थितमनलसः करोतीति प्रथमतः प्राभातिकप्रतिक्रमणे चारित्रशुद्ध्यादिकायोत्सर्गः पश्चादतिचारकायोत्सर्ग इति । यदाहुः **समयवादिनः**—"निद्दामत्तो न सरइ अइयारे कायघट्टणऽन्नोन्ने । किइअकरणदोसा वा तोसाई तिन्नि उस्सग्गा" ॥१॥

[निद्रावान् न स्मरति अतीचारान् अन्योऽन्यं । कायसंघट्टना कृत्यकरणदोषा वा ततः प्रभाते आदौ त्रय उत्सर्गाः ॥१॥]

इति प्राभातिकप्रतिक्रमणविधिः ॥ इदानीं पाक्षिकप्रतिक्रमणविधिमाह—

मुहपोत्तीवंदणयं संबुद्धाखामणं तहालोए ।
वंदण पत्तेयं खामणाणि वंदणयसुत्तं च ॥१८१॥
सुत्तं अब्भुट्ठाणं उस्सग्गो पुत्तिवंदणं तह य ।
पज्जंते खामणयं एस विही पक्खियपडिक्कमणे ॥१८२॥

'मुहपुत्तीवंदणये'त्यादि, तत्र चतुर्दशीपर्वणि दैवसिकं प्रतिक्रमणं 'तिविहेण पडिक्कंतो वंदामि जिणे चउवीसं' इत्येतदन्तं विधाय 'देवसिय आलोइय पडिक्कंत इच्छाकारेण संदिसह भगवन् पक्खियमुहपत्ती पडिलेहुं ?' गुरुणा 'पडिलेह'त्ति भणिते क्षमाश्रमणं दत्त्वा मुखपोत्तिकां प्रत्युपेक्षते, तदनु वन्दनकं ददाति, ततः सम्बुद्धानां-गीतार्थानां पञ्चानां क्षामणकं विधत्ते, तथेति समुच्चये, तत आलोचनं कुर्वन्ति, तत्र च गुरुश्चतुर्थं दत्ते, चातुर्मासिकसंवत्सरयोश्च षष्ठाष्टमे, ततः पुनर्वन्दनकं, ततः प्रत्येकं यतीनां क्षामणानि कुर्वन्ति, ततः पुनर्वन्दनकं, ततः पाक्षिकसूत्रं त्रिशतं गुरोरादेशाद्ऊर्ध्वस्थितो भणत्येकः, शेषाश्चोर्ध्वस्थिता एव विकथादिरहिताः शृण्वन्ति, यदि च बालवृद्धादयो वा तावतीं वेलामूर्ध्वस्थिता न शक्नुवन्ति स्थातुं, तदा क्षमाश्रमणं दत्त्वा गुरूननुज्ञाप्योपविश्य निद्रादिरहिताः प्रवर्धमानशुभभावाः शृण्वन्ति ॥१८१॥

सूत्रसमाप्तौ पुनरुपविश्य 'सुत्तं'ति प्रतिक्रमणसूत्रं भणन्ति ततोऽभ्युत्थानं कृत्वा सामायिकादिसूत्रं च भणित्वा द्वादशोद्योतकरचिन्तनमुत्सर्गं करोति, पारयित्वा च 'पोत्ति'त्ति मुखपोतिकाप्रत्युपेक्षणं, ततो वन्दनकं, तथा चेति समुच्चये, 'पज्जंते'त्ति वन्दनकपर्यन्ते क्षामणकपञ्चकं कुर्वन्तीति पाक्षिकप्रतिक्रमणविधिः ॥१८२॥

चातुर्मासिके वार्षिकेऽपि च प्रतिक्रमणेऽयमेव विधिः, केवलमत्र सप्त सम्बुद्धक्षामणानि क्रियन्ते, महति च चातुर्मासिके कायोत्सर्गे विंशतिरुद्योतकराश्चिन्त्यन्ते, वार्षिके च चत्वारिंशदेको नमस्कारश्चेति, तदनु पूर्वप्रतिक्रान्तदैवसिकाच्छेषं प्रतिक्रमणं कुर्वन्ति, पाक्षिकादिषु त्रिषु श्रुतदेवताकायोत्सर्गस्थाने भुवनदेवताकायोत्सर्गः क्रियते, ननु दैवसिकप्रतिक्रमणादिषु कियन्तश्चतुर्विंशतिस्तवाश्चिन्त्यन्ते ? तत्राह—

चत्तारि दो दुवालस वीस चत्ता य हुंति उज्जोया ।
देसिय राइय पक्खिय चाउम्मासे य वरिसे य ॥१८३॥
पणवीस २५ अद्धतेरस १३½ सलोग पन्नत्तरी ७५ य बोद्धव्वा ।
सयमेगं पणवीसं १२५ बे बावण्णा य २५२ वरिसंमि ॥१८४॥
साय सयं गोसद्धं तिन्नेव सया हवंति पक्खमि ।
पंच य चाउम्मासे वरिसे अट्ठोत्तरसहस्सा ॥१८५॥
देवसियचाउमासियसंवच्छरिएसु पडिक्कमणमज्झे ।
मुणिणो खामिज्जंति तिन्नि तहा पंच सत्त कमा ॥१८६॥

'चत्तारी'त्यादि चत्वारो द्वौ द्वादश विंशतिश्चत्वारिंशत् चः समुच्चये भवन्त्युद्योता—लोकस्योद्योतकरा दैवसिके रात्रिके पाक्षिके चातुर्मासिके वार्षिके च प्रतिक्रमणे यथासङ्ख्येन चिन्त्यन्ते 'चंदेसु निम्मलयरा' इत्येतदन्ता इति ॥१८३॥

ननु ज्ञातमिदं दैवसिकादिप्रतिक्रमणकायोत्सर्गेष्वेतावन्त एवैतदन्ताश्चिन्त्यंत इति, परमेषु चतुरादिषु 'चंदेसु निम्मलयरा' इत्यन्तेषु लोकस्योद्योतकरेषु चिन्त्यमानेषु कुत्र कियन्तः श्लोका भवन्तीत्याह–'**पणवीस**'इत्यादि, दैवसिकप्रतिक्रमणे लोकस्योद्योतकरचतुष्टये चिन्त्यमाने पञ्चविंशतिः श्लोका भवन्ति, विद्वद्भाषया गाथादयोऽपि श्लोका भण्यन्ते, तत्रैकस्मिन्नुद्योतकरे षट् श्लोकाः, ते च चतुर्गुणाश्चतुर्विंशतिः, एकश्च पादश्चतुर्गुण एकः श्लोक इति मिलिताः पञ्चविंशतिः श्लोकाः प्राभातिकप्रतिक्रमणे उद्योतकरद्वये तथैव चिन्त्यमाने द्वादश श्लोकाः श्लोकार्धं च, षट् द्विगुणा द्वादश पादश्च द्विगुणस्तदर्धं भवन्त्यतः अर्धत्रयोदशेति, '**सिलोग पन्नरसरो य**' त्ति श्लोकानां पञ्चसप्ततिः पाक्षिकप्रतिक्रमणोद्योतेषु द्वादशसु तथैव चिन्त्यमानेषु, यतो द्वादश षड्गुणा द्विसप्ततिः, पादश्च द्वादशगुणितः श्लोकत्रयं, मिलिताश्च पञ्चसप्ततिर्बोद्धव्या। '**सयमेगं पन्नवीस**' ति चातुर्मासिकप्रतिक्रमणे विंशत्युद्योतकरेषु पञ्चविंशं श्लोकशतं भवति, यतो विंशतिः षड्भिर्गुणिता विंशं शतं, पादविंशतौ च पञ्च श्लोकाः, मिलिताः पञ्चविंशं शतमिति, '**चे बावन्ना य वरिसंमि**' त्ति द्वे शते द्विपञ्चाशदधिके श्लोकानां वार्षिकप्रतिक्रमणकायोत्सर्गे चत्वारिंशदुद्योतकराणामष्टोच्छ्वासनमस्कारस्य च चिन्तनेन भवत, चत्वारिंशतः षड्भिर्गुणने पादचत्वारिंशति च श्लोकदशकरूपायां क्षिप्तायां सार्धे द्वे शते, ततो भवतो नमस्कारस्य चाष्टोच्छ्वासस्य चिन्तने द्वौ श्लोकौ, मिलिताश्च द्वे शते द्विपञ्चाशदधिके भवत इति ॥१८४॥

ननु कस्मिन् कायोत्सर्गे कियन्तः पादा भवन्तीत्याह–'**सायसय**'मित्यादि, 'साये'त्यत्रानुस्वारलोपः प्राकृतत्वात्कृतः, ततः सायं–सन्ध्यायां प्रतिक्रमणे शतं पादानां, तत्र श्लोकस्य चतुष्पादरूपत्वात्

पञ्चविंशतिश्लोकानां चतुर्भिर्गुणने शतं पादानां भवति, 'गोसे'त्ति प्राभातिकोद्योतकरद्वयेऽर्धं शतस्य भवति, पादानां पञ्चाशदित्यर्थः, तिन्नेव सय'त्ति पाक्षिकप्रतिक्रमणकायोत्सर्गे द्वादशोद्योतकराणां शतत्रयं पादानां भवति, द्वादशानां पञ्चविंशत्या गुणने शतत्रयसम्भवादिति, 'पंच य चाउम्मासे'त्ति चातुर्मासिकप्रतिक्रमणोद्योतकरविंशतौ चिन्त्यमानायां पञ्च शतानि पादानां भवन्ति, विंशतेः पञ्चविंशत्या गुणने पञ्चशतसम्भवादिति, 'चरिसे'त्ति वार्षिकप्रतिक्रमणोत्सर्गोद्योतकरचत्वारिंशतो नमस्कारस्य च चिन्तने अष्टोत्तरसहस्रं पादानां भवति, चत्वारिंशतः पञ्चविंशत्या गुणने सहस्रसम्भवात्, नमस्कारस्य चाष्टपादरूपत्वाच्चेति, पदशब्देन चात्र पाद एव ज्ञातव्यः, प्राकृतत्वेन ह्रस्वकरणात्, यद्वा पादस्यैवायं पदशब्दः पर्यायो ज्ञेय इति ॥१८५॥

ननु कुत्र प्रतिक्रमणे कियन्ति क्षमणकानि भवन्तीत्याह–'देवसिये' त्यादि, इह दैवसिकग्रहणेन रात्रिकपाक्षिकयोरपि ग्रहणं, तुल्यवक्तव्यत्वात्, ततो दैवसिकरात्रिकपाक्षिकेषु चातुर्मासिके सांवत्सरिके च पर्वणि 'प्रतिक्रमणमध्ये' प्रतिक्रमणे क्रियमाणे 'मुनयः' साधवः क्षम्यन्ते, तत्र त्रयः पञ्च सप्त च 'क्रमात्' यथासङ्ख्येनेत्यर्थः, अयमभिप्रायः–दैवसिकरात्रिकयोस्त्रयः साधवः क्षाम्यन्ते, पाक्षिकेऽपि त्रयः, यदुक्तमावश्यकचूर्णौ पाक्षिकप्रतिक्रमणप्रस्तावे—'एवं जहन्नेणं तिन्नि, उक्कोसेणं सव्वेवि'त्ति [एवं जघन्येन त्रयः उत्कृष्टतः सर्वेऽपि:,] चातुर्मासिके पञ्च सांवत्सरिके च सप्तेति, वृद्धसमाचारी तु दैवसिकरात्रिकयोस्त्रयः पाक्षिके पञ्च चातुर्मासिकसांवत्सरिकयोस्तु सप्त, यदुक्तं पाक्षिकवृत्तौ सम्बुद्धक्षमणप्रस्तावे—'एवं जहन्नेणं तिन्नि वा पञ्च वा चाउम्मासिए संवच्छरिए य सत्त उक्कोसेणं तिसुवि ठाणेसु सव्वे खामिज्जंति'त्ति

[एवं जघन्येन त्रयो वा पञ्च वा चातुर्मासिके सांवत्सरिके च सप्त उत्कर्षेण त्रिष्वपि स्थानेषु सर्वे क्षाम्यन्ते] ॥१८६॥ इति तृतीयं प्रतिक्रमणद्वारं ।

चतुर्थं प्रत्याख्यानद्वारमिदानीं, तत्र च प्रतीति–अविरतिस्वरूपप्रभृतिप्रतिकूलतया आमर्यादया आकारकरणस्वरूपया आख्यानं–कथनं प्रत्याख्यानं, तद् द्वेधा–मूलगुणरूपमुत्तरगुणरूपं च, मूलगुणा यतीनां पञ्च महाव्रतानि श्रावकाणामनुव्रतानि, उत्तरगुणास्तु यतीनां पिण्डविशुद्धयादयः श्रावकाणां तु गुणव्रतशिक्षाव्रतानि. मूलगुणानां हि प्रत्याख्यानत्वं हिंसादिनिवृत्तिरूपत्वात्, उत्तरगुणानां तु पिण्डविशुद्धयादीनां दिग्व्रतादीनां च प्रतिपक्षनिवृत्तिरूपत्वात्, तत्र च स्वयं प्रत्याख्यानकाले विनयपुरस्सरं सम्यगुपयुक्तः श्रीगुरुवचनमनूच्चरन् प्रत्याख्यानं कुरुते, तत्र च प्रत्याख्याने चतुर्भङ्गी, यथा–स्वयं प्रत्याख्यानस्वरूपं जानन् ज्ञस्यैव गुरोः पार्श्वे करोतीति प्रथमो भङ्गः, गुरोर्ज्ञस्य स्वयमजानन् करोतीति द्वितीयः, शिष्यस्य ज्ञत्वे गुरोरज्ञत्वे तृतीयः, गुरोरज्ञत्वे शिष्यस्य चाज्ञत्वे चतुर्थः, न चेदं स्वमनीषिकयैवोच्यते, सिद्धान्तेऽभिहितत्वात् यदाह—**"जाणगो जाणगसगासे अजाणगो जाणगसगासे जाणगो अजाणगसगासे अजाणगो अजाणगसगासे'**, [ज्ञो ज्ञसकाशे अज्ञो ज्ञसकाशे ज्ञोऽज्ञसकाशे अज्ञोऽज्ञसकाशे] इत्यादि, तत्र प्रथमो भङ्गः शुद्धः, द्वयोरपि ज्ञायकत्वात्, द्वितीयोऽपि शुद्धो यदा गुरुर्जानानः स्वयमजानानं शिष्यं सङ्क्षेपतो बोधयित्वा प्रत्याख्यानं कारयति अन्यथा स्वशुद्ध एव, तृतीयोऽप्यशुद्धः, परमेषोऽपि तथाविधगुरोरप्राप्तौ गुरोर्बहुमानात् गुरोः सम्बन्धिनं पितृपितृव्यमातृमातुलकभ्रातृशिष्यादिकमज्ञमपि साक्षिणं कृत्वा यदा प्रत्याख्याति तदा शुद्धः, चतुर्थश्चाशुद्ध एवेति, तत्रोत्तरगुणप्रत्याख्यानं प्रतिदिनोपयोगित्वेन तावद् भण्यते, तच्च दशधा, तदाह–

भावि अईयं कोडीसहियं च नियंटियं च सागारं ।
विगयागारं परिमाणवं निरवसेसमट्ठमयं ॥१८७॥
साकेयं च तहऽद्धा पच्चक्खाणं च दसमयं ।
संकेयं अट्ठहा होइ, अद्धायं दसहा भवे ॥१८८।
होही पज्जोसवणा तत्थ य न तवो हवेज्ज काउं मे ।
गुरुगणगिलाणसिक्खगतवस्सिकज्जाउलत्तेण ॥१८९।
इअ चिंतिअ पुव्वं जो कुणइ तवं तं भणागयं बिंति।
नमइक्कंतं तेणेव हेउणा तवइ जं उट्ठं ॥१९०॥
गोसे अब्भत्तट्ठं जो काउं तं कुणइ बीयगोसेऽवि ।
इय कोडीदुगमिलणे कोडीसहियं तु नामेणं ॥१९१॥
हट्ठेण गिलाणेण व अमुगतवो अमुगदिणंमि नियमेणं ।
कायव्वोत्ति नियंटियपच्चक्खाणं जिणा बिंति ॥१९२॥
चउदसपुव्विसु जिणकप्पिएसु पढमंमि चेव संघयणे ।
एयं वोच्छिन्नं चिय थेरावि तथा करेसी य ॥१९३॥
महत्तरयागाराईआगारेहिं जुयं तु सागारं ।
आगारविरहियं पुण भणियमणागारनामंति ॥१९४॥

किंतु अणाभोगो इह सहसागारो अ दुन्नि भणिअव्वा ।
जेण तिणाइ खिविज्जा मुहंमि निवडिज्ज वा कहवि ॥१९५॥
इय कयआगारदुगंपि सेसआगाररहिअमणागारं ।
दुब्भिक्खवित्तिकंतारगाढरोगाइए कुज्जा ।१९६॥
दत्तीहि व कवलेहिव घरेहिं भिक्खाहिं अहव दव्वेहिं ।
जो भत्तपरिच्चायं करेइ परिमाणकडमेयं ॥१९७॥
सव्वं असणं सव्वं च पाणगं खाइमंपि सव्वंपि ।
वोसिरइ साइमंपि हु सव्वं जं निरवसेसं तं ॥१९८॥
केयं गिहंति सह तेण जे उ तेसिमिमं तु साकेयं ।
अहवा केयं चिंधं सकेयमेवाहु साकेयं ॥१९९॥
अंगुट्ठी[1] गंठी[2] मुट्ठी[3] घरसेयु[4]स्सास[5]थिवु[6]गजोइक्खे[7] ।
पच्चक्खाणविचाले किच्चमिणमभिग्गहेसुवि य ॥२००॥

'भावि अईयमि'त्यादि भावि-अनागतं अतीतं-पूर्वकालकरणीयं कोटिसहितं चः समुच्चये नियन्त्रितं चः पूर्ववत् साकारं-सहाकारैर्यद्वर्तते अनाकारं विगताऽऽकारमाकाररहितं परिमाणवत् निरवशेषमष्टमकम् ॥१८७॥

'साकेय'मित्यादिसाकेतं च कृतसङ्केतं नवमं, तथाऽद्धाप्रत्याख्यानं दशमकमिति । तत्र यत्सङ्केत-प्रत्याख्यानं तदष्टधा भवति, यच्चाद्धाप्रत्याख्यानं तद्दशधा भवेदिति गाथासङ्क्षेपार्थः ॥१८८॥

इदानीं मूलतोऽपि सर्वाणि प्रत्याख्यानानि क्रमेण व्याख्यायन्ते, तत्र **भाविप्रत्याख्यानस्व-रूपमिद** 'होहीपज्जोसवणे'त्यादि सार्द्धगाथा, भविष्यति पर्युषणादिपर्व, तत्र चाष्टमादि तपोऽवश्यं समाराधनीयं, तत्र पर्युषणादौ न तपः अष्टमाद्यं भवेत् कर्तुं मे-मम, केन हेतुनेत्याह-'गुरुगणे'ति गुरूणां आचार्याणां गणस्य गच्छस्य ग्लानस्य-रोगाभिभूतस्य शैक्षकस्य-नूतनप्रव्राजितस्य तपस्विनो-विकृष्टादितपश्चरणकारिणो यत्कार्यं-विश्रामणाभक्तपानाऽऽनयनादिलक्षणं तेन यदाकुलत्वं तेन हेतुना ॥१८९॥

'इय चिंती'त्यादि-इति चिन्तयित्वा पूर्वमेव-पर्युषणादिपर्वणोऽर्वागेव यत्क्रियते तदनागतं तप इति 'बिन्ति'त्ति ब्रुवते १ । अतीतं पुनरिदं-'तमइक्कंतं' इति गाथोत्तरार्धं, तदतिक्रान्तमतीतमित्यर्थः, तेनैव हेतुना-गुरुगणादिकार्यव्याकुलतालक्षणेन तप्यते-तपः करोति यदूर्ध्वं पर्युषणादिपर्वणि निवृत्तेऽ-पीत्यर्थः २ ॥१९०॥

कोटीसहितमाह-'गोसे' त्ति, प्रभातेऽभक्तार्थं-उपवासं यः कृत्वा तं-उपवासं करोति द्वितीयप्रभा-तेऽपि इति कोटीद्विकमिलने पूर्वदिनकृतोपवासप्रत्याख्याननिष्ठापनालक्षणाया द्वितीयदिनप्रभातक्रियमाणो-पवासप्रस्थापनालक्षणायाश्च कोटेर्मिलने तस्य कोटीसहितमिति नाम्ना प्रत्याख्यानं, एवमष्टमादिषु एकतः कोटिद्वयं निष्ठापनारूपमन्यतश्च तृतीयोपवासस्य प्रस्थापनारूपं, अनयोर्मिलने कोटिसहितं, एवमाचाम्ल-निर्विकृतिकैकासनकैकस्थानेष्वपीति ३ ॥१९१॥

यदाहुर्गणभृतः—"पढुवणओ य दिवसो पच्चक्खाणस्स निट्ठवणओ य । जह्यिं समिति दोन्निवि तं भन्नइ कोडिसहियंति" ॥१॥ इति [प्रस्थापकश्च दिवसः प्रत्याख्यानस्य निष्ठापकश्च यत्र समितौ द्वावपि तद् भण्यते कोटीसहितमिति ॥१॥]

'**दुट्ठेण**' इत्यादि दुष्टेन—नीरोगेण ग्लानेन वा—सरोगेण वा अमुकं तपः—षष्ठाष्टमादि अमुकस्मिन् दिने '**नियमेन**' निश्चयेन मयेति शेषः '**कायव्वो**' त्ति कर्तव्यं, प्राकृतत्वात्पुंसा निर्देशः, नियन्त्रितमिदं प्रत्याख्यानं जिना ब्रुवते ४ ॥१९२॥

इदं च प्रत्याख्यानं न सर्वकालं क्रियते, किं तर्हि ?, नियतकालमेव, तथा चाह—'**चउदसे**'-त्यादि, चतुर्दशपूर्विषु—चतुर्दशपूर्वधरेषु जिनकल्पिकेषु प्रथम एव संहनने वज्रर्षभनाराचाभिधेये एतत्—नियन्त्रितं प्रत्याख्यानं व्यवच्छिन्नमेव, अत्राऽऽह—ननु तस्मिन्नपि काले चतुर्दशपूर्वधरादय एव कृतवन्तः स्थविरैस्तु न कृतमेवेदमित्याह—'**थेरावि तया करेसीय**' स्थविरा अपि तदा—पूर्वधरादिकाले अकार्षुः, चशब्दादन्येऽप्यस्थविराः प्रथमसंहननिन इति ॥१९३॥

साकारमिदानीमाह—'**महयरे**' त्यादि, आ-मर्यादया मर्यादाख्यापनार्थमित्यर्थः क्रियन्ते-विधीयन्ते इत्याकाराः अनाभोगसहसाकारमहत्तराकारादयः, अयं महान् अयं महानयमनयोरतिशयेन महान्महत्तरः, (अतिशये तरतमपाविति १-१-२२ पाणि०) महत्तर एवाकारो महत्तराकारः स आदिर्येषां ते च ते आकाराश्च तैर्युक्तं साकारमभिधीयते, कोऽर्थः ? —भुजिक्रिया प्रत्याख्यानेन मया निषिद्धा, परमन्यत्र महत्तराकारादिभिर्हेतुभूतैः एतेभ्योऽन्यत्रेत्यर्थः, एतेषु सत्सु भुजिक्रियामपि कुर्वतो न भङ्ग इति यत्र

भक्तपरित्यागं करोति तत् साकारमिति ५ । अनाकारमिदानीमाह—'आकार' इत्यादि, आकारैः—महत्तरादिभिर्यद्विरहितं पुनर्भणितमनाकारं नाम तत् ॥१९४॥

'किंतु' इत्यादि, किंच—केवलमिहानाकारेऽपि अनाभोगः सहसाकारश्च द्वावाकारौ भणितव्यौ येन कदाचिदनाभोगतः—अज्ञानतः सहसा वा—रभसेन तृणादि मुखे क्षिपेन्निपतेद्वा कुतोऽपि कथमपि ॥१९५॥

'इय कये' त्यादि, इति, कृताकारद्विकमपि शेषैर्महत्तराकारादिभिराकारै रहितमनाकारमभिधीयते, इदं चानाकारं कदा विधीयते ? तत्राह—'दुब्भिक्खे' त्यादि—'दुर्भिक्षे' मेघ वृष्ट्याद्यभावे हिण्डमानैरपि भिक्षा न लभ्यते, तत इदं प्रत्याख्यानं कृत्वा म्रियते, 'वृत्तिकान्तारे वा' वर्तते शरीरं यया सा वृत्तिः—भिक्षादिका तद्विषये कान्तारमिव कान्तारं तत्र, यथाऽटव्यां भिक्षा न लभ्यते तथा सिणवल्ल्यादिषु स्वभावाद् अदातृद्विजाकीर्णेषु शासनद्विष्टैर्वाऽधिष्ठितेषु भिक्षादि नाऽऽसाद्यते तदेदं प्रत्याख्यानं तथा वैद्याद्यप्रतिविधेये गाढतररोगे सति गृह्यते, आदिशब्दात्कान्तारे केसरिकिशोरादिजन्यमानायामापदि कुर्यादिति ६ ॥१९६॥

परिमाणपदिदानीमाह—'दत्तीहि वे'त्यादि, दत्तिभिर्वा कवलैर्वा गृहैर्वा भिक्षाभिरथवा द्रव्यैर्यो भक्तपरित्यागं करोति परिमाणकृतमेतत्, तत्र करस्थालादिभ्योऽव्यवच्छिन्नधारया या पतति भिक्षा सा दत्तिरभिधीयते, भिक्षाविच्छेदे च द्वितीया दत्तिः, सिक्थमात्रेऽपि पात्रे पतिते भिन्नैव दत्तिरिति, कुर्कुटाण्डकप्रमाणो बद्धोऽशनपिण्डः कवलोऽभिधीयते, अविकृतेन मुखेन वा यो ग्रहीतुं शक्यते तत्प्रमाणो वा, तत्र द्वात्रिंशत्कवलाः किल पुरुषस्याहारः, स्त्रीणामष्टाविंशतिः "बत्तीसं किर कवला आहारो

कुक्किपूरओ भणिओ । पुरिसस्स महिलियाए अट्ठावीसं मुणेयव्वा ॥१॥" इति वचनात्, ततश्च दत्तिभिरेकद्वित्र्यादिभिः कवलैश्चैकद्वित्र्यादिभिर्यावदेकत्रिंशत् पुरुषस्य स्त्रियाश्च यावत्सप्तविंशतिः, गृहैश्चैकद्वित्र्यादिभिर्भिक्षाभिः संसृष्टादिभिर्गृहस्थेन दीयमानादिभिरेकद्व्यादिभिर्द्रव्यैश्च पायसौदनमुद्गादिभिर्यत्र शेषाऽऽहारपरित्यागस्तत्परिमाणकृतं प्रत्याख्यानमित्यर्थः ७ ॥११७॥

इदानीं निरवशेषमाह–'सव्वं असण'मित्यादि–'अश भोजने' अश्यत इत्यशनमोदनं–मण्डकमोदकखज्जकादि पीयत इति पानं कर्मणि ल्युट् खर्जूरद्राक्षापानादि खादनं खादो भावे घञ् खादेन निर्वृत्तं खादिमं 'नालिकेरादिम' (पा०४-३-२० वा०) त्रिति इमनि खादिमं–नालिकेरफलादि गुडधानादिकं च स्वदनं स्वादस्तेनैव निर्वृत्तं तथैवेमनि स्वादिमं–एलाफलकर्पूरलवङ्गपूगीफलहरीतकीनागरादि ततश्च सर्वमशनं सर्वं पानकं खादिमं च सर्वमप्युत्सृजति-परित्यजति स्वादिममपि सर्वं यन्निरवशेषं तद्विज्ञेयमिति ८ ॥११८॥

साकेतमिदानीमाह–'केय'मित्यादि–'कित निवासे' इत्यस्य धातोः कित्यते-उष्यते अस्मिन्निति घञि केतो गृहमुच्यते सह तेन वर्तन्ते इति सहस्य स्वभावे सकेताः–गृहस्थास्तेषामिदं 'तस्येद' (पा०४-३-१२०) मित्यणि साकेतं प्रत्याख्यानं प्रायेण गृहस्थानामेवेदं भवतीति, अथवा केतं–चिह्नमुच्यते सह केतेन–चिह्नेन वर्तते इति सकेतं सकेतमेव प्रज्ञादित्वात्स्वार्थेऽणि साकेतमाहुर्मुनयः ९ ॥११९॥

तच्चैवं भवति–श्रावकः कोऽपि पौरुष्यादिप्रत्याख्यानं कृत्वा क्षेत्रादौ गतो गृहे वा तिष्ठन् पूर्णेऽपि पौरुष्यादौ प्रत्याख्याने यावदद्यापि भोजनसामग्री न भवति तावत्क्षणमपि प्रत्याख्यानरहितो मा

भूवमित्यङ्गुष्ठादिकं चिह्नं करोति यावदङ्गुष्ठं मुष्टिं ग्रन्थिं वा न मुञ्चामि गृहं वा प्रविशामि स्वेदबिन्दवो वा न शुष्यन्ति यावदेतावन्तो वा उच्छ्वासा न भवन्ति जलादिमञ्जिकायां यावदेते जलबिन्दवो वा न शुष्यन्ति दीपो वा यावन्न निर्वाति तावन्न भुञ्जेऽहमिति, एतदेवाह–'अगुंठी' इत्यादि, अङ्गुष्ठश्च ग्रन्थिश्च मुष्टिश्च गृहं च स्वेदश्च उच्छ्वासश्च स्तिबुकश्च जोइक्खश्चेति समाहारो द्वन्द्वः, जोइक्खशब्दश्च देश्यो दीपे वर्तते, तद्विषये क्रिया सर्वत्र यथोचिता योजनीया, प्रत्याख्यानविचाले कृत्यमिदं, 'अभिग्गहेसुवि य'त्ति केनचित्पौरुष्यादि न कृतं किन्तु केवल एवाभिग्रहः क्रियते यावद् ग्रन्थ्यादिकं न छोटयतीत्यादि तत्रापीदं भवतीत्यर्थः, तथा साधोरपीदं भवति, यथाऽद्यापि गुरवो मण्डल्यां नोपविशन्ति अन्यद्वा सागारिकादिकं किञ्चित्कारणमजनि ततः पूर्णेऽपि प्रत्याख्यानावधौ प्रत्याख्यानरहितो मा स्थामित्यङ्गुष्ठादीनि साधुरपि करोतीति ९ ॥२००॥

इदानीमद्धाप्रत्याख्यानमाह–

अद्धा कालो तस्स य पमाणमद्ध तु जं भवे तमिह ।
अद्धापच्चक्खाणं दसमं तं पुणं इमं भणियं ॥२०१॥

[1]नव[2]कार[3]पोरिसीए [4]पुरिमड्ढे[5]कासणेगठाणे य ।
[6]आय[7]बिल[8]भत्तट्ठे [9]चरिमे य [10]अभिग्गहे विगई ॥२०२॥

दो चेव नमोक्कारे आगारा छच्च पोरसीए उ ।
सत्तेव य पुरिमड्ढे एक्कासणगंमि अट्ठेव ॥२०३॥
सत्तेगट्ठाणस्स उ अट्ठेव य आयंबिलंमि आगारा ।
पंचेव अब्भत्तट्ठे छप्पाणे चरिम चत्तारि ॥२०४॥
पंच चउरो अभिग्गहि निव्विइए अट्ठ नव य आगारा ।
अप्पाउरणे पंच उ हवंति सेसेसु चत्तारि ॥२०५॥
नवणीओगाहिमगे अद्दवदहिपिसियघयगुडे चेव ।
नव आगारा एसिं सेसदवाणं च अट्ठेव ॥२०६॥

'अद्धा कालो' इत्यादि, अद्धाशब्देन कालस्तावदभिधीयते, तस्य च कालस्य मुहूर्तपौरुष्यादिकं प्रमाणमप्युपचारात् अद्धन्ति-अद्धां वदन्तीति शेषः, तुशब्दोऽप्यर्थो भिन्नक्रमे च स च यथास्थानं योजित एव, ततोऽद्धापरिमाणपरिच्छिन्नं यत्प्रत्याख्यानं भवेत्तदिह अद्धाप्रत्याख्यानं दशमं पूर्वोक्तभाव्यतीत-प्रत्याख्यानादीनां चरममित्यर्थः १० ॥२०१॥

तत्पुनरिदं वक्ष्यमाणं भणितं गणधरैरिति, तदेवाह-**'नवकारे'**त्यादि, अत्र भीमो भीमसेनभीम-न्यायेन नमस्कारशब्दात्परतः सहितशब्दो द्रष्टव्यः ततो नमस्कारश्च, कोऽर्थः १-नमस्कारसहितं च पौरुषी च नमस्कारपौरुष्यौ तस्मिन्, नमस्कारविषये पौरुषीविषये चेत्यर्थः, पूर्वार्धं च एकासनं च एकस्थानं चेति समाहारे सप्तम्येकवचने पूर्वार्धविषये एकासनविषये एकस्थानकविषये चरमे-चरमविषये च, तथा

आचाम्लं च अभक्तार्थश्च आचाम्लाभक्तार्थौ तत्र आचाम्लविषये उपवासविषये, तथा भवचरमे दिवसचरमे वेति तथा अभिग्रहे—अभिग्रहविषये, तथा 'विगइ'त्ति विकृतिविषये, सप्तम्येकवचनं लुप्तमत्र द्रष्टव्यमिति, दशभेदमिदमद्धाप्रत्याख्यानं ॥२०२॥

नन्वेकाशनादिप्रत्याख्यानं कथमद्धाप्रत्याख्यानं ?, न ह्यत्र कालनियमः श्रूयते, सत्यं, अद्धाप्रत्याख्यानपूर्वाणि सप्तेष्वेकाशनादीनि क्रियन्ते इत्यद्धाप्रत्याख्यानत्वेन भण्यन्ते इति, प्रत्याख्यानं चापवादरूपाकारसहितं कर्तव्यं, अन्यथा तु भङ्ग एव स्यात्, ततस्ते यावन्तो नमस्कारसहितादिषु भवन्ति तावत उपदर्शयन्नाह—'दो चेवे'त्यादि गाथात्रयं, द्वावेव नमस्कारे—नमस्कारसहिते 'आकारौ' विधीयमानप्रत्याख्यानापवादरूपौ, षट् च पौरुष्यां, तुः पुनरर्थः, सप्तैव च पूर्वार्धे एकाशनेऽष्टैव ॥२०३॥

सप्त एकस्थानस्य प्रत्याख्यानस्य, तुः समुच्चयार्थः, अष्टैव चाऽऽचाम्ले आकाराः पञ्चैव—चाभक्तार्थे उपवासे, षट् पानकप्रत्याख्याने, चरमे प्रत्याख्याने-दिवसचरमभवचरमरूपभेदद्वयस्वरूपे चत्वार आकाराः ॥२०४॥

पञ्च वा चत्वारो वा अभिग्रहे—अभिग्रहप्रत्याख्याने, निर्विकृतिकेऽष्टौ नव वा आकाराः, 'पंच चउरो अभिग्गहे'त्ति यदुक्तं तत्स्वयमेव विवृणोति—'अप्पाउरणे'त्यादि, अप्रावरणे-अप्रावरणाभिग्रहे प्रत्याख्याने पञ्चैव, तुशब्दस्यावधारणार्थत्वाद्भवन्ति शेषेष्वभिग्रहेषु-देशावकाशिकादिषु दण्डाकप्रमार्जनादिषु च चत्वार आकारा इति गाथात्रयाक्षरार्थः ॥२०५॥

भावार्थस्तु निवेद्यते—नमस्कारसहिते प्रत्याख्याने भङ्गपरिहारार्थमनाभोगसहसाकारलक्षणौ द्वावाकारौ ज्ञेयौ, ननु कालस्यानुच्यमानत्वात् सङ्केतप्रत्याख्यानमेवेदं प्रतिभाति तत्कथमद्धाप्रत्याख्यानमभिधीयते ?, सत्यं, सहितशब्देन मुहूर्तस्य विशेषितत्वाददोषः, अथ मुहूर्तशब्दोऽप्यत्र न श्रूयते तत्कथं तस्य विशेष्यत्वं ?, न खलु गगनारविन्देऽसत्येमन्दामोदसुन्दरमिदमित्यादीनि विशेषणानि तस्य सहृदयैर्विधीयन्ते, अत्र ब्रूमः—अद्धाप्रत्याख्यानमध्ये तावदस्य पाठात् पौरुषीप्रत्याख्यानस्य च वक्ष्यमाणत्वान्निश्चितं तदर्वाग् मुहूर्त्त एवावशिष्यते ततस्तस्य विशेष्यत्वं नानुपपन्नं, अथ मुहूर्तद्वयादिकमपि कस्मान्न लभ्यते ? यदेकमेव मुहूर्त्तं विशेष्यत इति, उच्यते, अल्पाकारत्वादस्य, पौरुष्यां हि षडाकाराः अस्मिंश्च प्रत्याख्याने आकारद्वयवति स्वल्प एव कालोऽवशिष्यते, स च नमस्कारसहितः पूर्णेऽपि काले नमस्कारपाठमन्तरेण प्रत्याख्यानस्यापूर्यमाणत्वात्, सत्यपि च नमस्कारपाठे मुहूर्त्ताभ्यन्तरे प्रत्याख्यानभङ्गात्, ततः सिद्धमेतत् मुहूर्त्तमानकालनमस्कारसहितं प्रत्याख्यानमिति, अथ प्रथम एव मुहूर्ते इति कुतो लभ्यते ?, उच्यते, सूत्रे 'सूरे उग्गए' इति वचनप्रामाण्यात्, पौरुषीप्रत्याख्यानवत्, सूत्रं चेदं—"**सूरिए उग्गए नमोक्कारसहियं पच्चक्खाइ चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं वोसिरइ**" अस्य च सूत्रस्याग्रेतनपौरुष्यादिसूत्राणां च विस्तारवती व्याख्या स्वस्थानादेव ज्ञातव्या, परमाकाराणां स्वरूपपरिज्ञानाय किंचिद्व्याख्यायते—सूर्ये उद्गते सूर्योद्गमादारभ्येत्यर्थः, 'नमस्कारेण' पञ्चपरमेष्ठिस्तवेन सहितं प्रत्याख्याति 'सर्वे धातवः करोत्यर्थेन व्याप्ता, इति भाष्यकारवचनान्नमस्कारसहितं प्रत्याख्यानं करोति, इदं गुरोर्वचनं शिष्यस्तु प्रत्याख्यामीत्येतदाह, एवं व्युत्सृजतीत्यत्रापि वाच्यं,

कथं प्रत्याख्याति ?, तत्राह—चतुर्विधमपि न पुनरेकविधादिकं, आहारं—अभ्यवहार्यं व्युत्सृजतीत्युत्तरेण संबन्धः इदं च चतुर्विधाहारस्यैव भवतीति वृद्धसम्प्रदायः, रात्रिभोजनप्रत्याख्यानव्रततीरणकल्पत्वादस्य, 'अशन'मित्यादिनाऽऽहारचतुर्विधकीर्तनं, अत्र नियमभङ्गभयादाकारानाह—'**अन्नत्थऽणाभोगेणं सहसागारेणं**'ति अत्र पञ्चम्यर्थे तृतीया, अन्यत्रानाभोगात् सहसाकाराच्च, एतौ वर्जयित्वेत्यर्थः, तत्राऽनाभोगः-अत्यन्तविस्मृतिः, सहसाकारः—अतिप्रवृत्तियोगान्निवर्त्तनं, '**व्युत्सृजति**' परिहरति । तथा पौरुष्यां षडाकाराः, तत्र चैवं सूत्रम्—

"**पोरिसिं पच्चक्खाइ उग्गए सूरे चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थऽणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणेणं सव्वसमाहिवत्तियागारेणं वोसिरइ**" पुरुषः प्रमाणमस्याः सा पौरुषी छाया तत्प्रमितकालोऽपि पौरुषी प्रहर इत्यर्थः, तां प्रत्याख्याति, अत्र च 'कालाध्वनोरत्यंतसंयोगे' इति (पा० २-३-५) द्वीतीया, ततः पौरुषीं यावत्प्रत्याख्यानं करोतीत्यर्थः एवमन्यत्रापि, कथं ? चतुर्विधमप्याहारमशनादिकं व्युत्सृजतीति, अन्यत्रानाभोगाद्याकारेभ्यः, तत्रानाभोगसहसाकारौ पूर्ववद् , अन्यत्र प्रच्छन्नकालात् दिग्मोहात् साधुवचनात् सर्वसमाधिप्रत्ययाकाराच्च, प्रच्छन्नता च कालस्य घनतरघनाघनपटलेन विस्फुरद्रजसा गुरुतरगिरिणा वाऽन्तरितत्वाद् दिवाकरो न दृश्यते, तत्र पौरुषीं पूर्णां ज्ञात्वा भुञ्जानस्यापूर्णायामपि पौरुष्यां न भङ्गः, ज्ञात्वा तु अर्धभुक्तेनापि तथैव स्थातव्यं यावत्पौरुषी पूर्णा भवति, पूर्णायां ततः परं भोक्तव्यं, अपूर्णां पौरुषीति ज्ञाते तु भुञ्जानस्य भङ्ग एवेति, दिग्मोहस्तु यदा पूर्वामपि पश्चिमेति जानाति

तदाऽपूर्णायामपि पौरुष्यां भुञ्जानस्य न भङ्गः, कथमपि मोहापगमे तु पूर्ववदर्धभुक्तेनापि स्थातव्यं अन्यथा तु भङ्ग एवेति, तथा साधुवचनम्–उद्घाटा पौरुषी इत्यादिकं विभ्रमकारणं तत् श्रुत्वा भुञ्जानस्य न भङ्गः, भुञ्जानेन तु ज्ञाते अन्येन वा केनापि निवेदिते पूर्ववत्तथैव स्थातव्यं, तथा कृतपौरुषीप्रत्याख्यानस्य सहसा समुत्तीव्रशूलादिदुःखतया समुत्पन्नयोरार्तरौद्रध्यानयोः सर्वथा निरासः सर्वसमाधिः स एव प्रत्ययः–कारणं स एवाकारः, प्रत्याख्यानापवादः सर्वसमाधिप्रत्ययाकारः, पौरुष्यामपूर्णायामप्यकस्मात् शूलादिव्यथायां समुत्पन्नायां तदुपशमनायौषधपथ्यादिकं भुञ्जानस्य न प्रत्याख्यानभङ्ग इति भावः, वैद्यादिर्वा कृतपौरुषीप्रत्याख्यानोऽन्यस्याऽऽतुरस्य समाधिनिमित्तं यदाऽपूर्णायामपि पौरुष्यां भुङ्क्ते तदा न भङ्गः, अर्धभुक्ते त्वातुरस्य समाधौ मग्ने वोत्पन्ने सति तथैव भोजनत्यागः, सार्धपौरुषीप्रत्याख्यानं पौरुषीवद्वाच्यं, तस्य तदन्तर्गतत्वादिति. पूर्वार्धप्रत्याख्याने त्वेवं सप्ताऽऽकाराः—

"सूरे उग्गए पुरिमड्ढं पच्चक्खाइ चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थऽणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ" अस्यार्थः–'पूर्वस्य पुरिम' इति (सि० हे० प्रा० ८-२-१३५) प्राकृतवचनेन पुरिमिति, एवमन्यत्रापि, ततः पूर्वं च तत् अर्धं च पूर्वार्धं–दिनस्याऽऽद्यप्रहरद्वयं प्रत्याख्याति–पूर्वार्धप्रत्याख्यानं करोति, तत्र षडाऽऽकाराः पूर्ववत्, 'महत्तरागारे' ति महत्तरं--प्रत्याख्यानवशाल्लभ्यनिर्जरापेक्षया बृहत्तरनिर्जरालाभहेतुभूतं पुरुषान्तरेण साधयितुमशक्यं ग्लानचैत्यसङ्घादिप्रयोजनं तदेवाकारः–प्रत्याख्यानापवादो महत्तराकारः तस्मादन्यत्रेति योगः, यच्चात्रैव महत्तराऽऽकारस्याभिधानं न

नमस्कारसहितादौ तत्र कालस्याल्पत्वं अन्यत्र तु महत्त्वं कारणमिति वृद्धा व्याचक्षते, अपार्धप्रत्याख्यानमपि प्रहरत्रयलक्षणं पूर्वार्धप्रत्याख्यानवद्भणनीयं ॥

अथैकाशनप्रत्याख्याने यथा अष्टाऽऽकारास्तथा कथ्यन्ते, तत्रेदं सूत्रम्— **"एकासणं पच्चक्खाइ तिविहंपि आहारं असणं खाइमं साइमं अन्नत्थऽणाभोगेणं सहसागारेणं सागारियागारेणं आउंटणपसारेणं गुरुअब्भुट्ठाणेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ"** । एकं सकृत् अशनं—भोजनं एकं वा आसनं—पुनाचलनतो यत्र प्रत्याख्याने तदेकाशनमेकासनं वा, प्राकृते द्वयोरपि एकासणमिति रूपं, तत् प्रत्याख्याति एकासनप्रत्याख्यानं करोतीतियावत्, अत्र द्वावाद्यौ अन्त्याश्चाकारौ च पूर्ववत्, **'सागारियागारेणं'**ति सह आगारेण—गृहेण वर्तत इति सागारः स एव सागारिको—गृहस्थः स एवाऽऽकारः—प्रत्याख्यानापवादः सागारिकाकारस्तस्मादन्यत्र, गृहस्थसमक्षं हि साधूनां भोक्तुं न कल्पते, प्रवचनाद्युपघातसम्भवात्, यत उक्तं—

"छक्कायदयावंतोऽवि संजओ दुल्लहं कुणइ बोहिं । आहारे नीहारे दुगंछिए पिंडगहणे य ॥ १ ॥"
[षट्कायदयावानपि संयतो दुर्लभां करोति बोधिं । आहारे नीहारे जुगुप्सिते पिण्डग्रहणे च ॥१॥]

ततश्च भुञ्जानस्य यदि सागारिकः कश्चिदायाति स च यदि चलस्तदा क्षणं प्रतीक्षते स्थिरस्तदा स्वाध्यायादिव्याघातो मा भूदिति ततः स्थानादन्यत्रोपविश्य भुञ्जानस्यापि नैकासनभङ्गः, गृहस्थस्यापि येन दृष्टं भोजनं न जीर्यति तत् प्रमुखः सागारिको ज्ञातव्यः, **'आउंटणपसारणेणं'**ति आकुञ्चनं—अङ्गादेः सङ्कोचनं प्रसारणं च—तस्यैव अङ्गादेराकुञ्चितस्य ऋजूकरणं आकुञ्चने प्रसारणे वाऽसहिष्णुतया

क्रियमाणे किञ्चिदासनं चलति ततोऽन्यत्र प्रत्याख्यानं **'गुरुअब्भुट्ठाणेणं'** ति गुरुरभ्युत्थानार्हस्याचार्यस्य ग्लानघूर्णकस्य वाऽभ्युत्थानं तमाश्रित्यासनत्यजनं गुर्वभ्युत्थानं ततोऽन्यत्र, गुरुणामभ्युत्थानार्हत्वादवश्यं श्रुज्ञानेनाप्युत्थानं कर्तव्यमिति न तत्र प्रत्याख्यानभङ्गः **'पारिठावणियागारेणं'**ति परिस्थापनं–सर्वथा त्यजनं प्रयोजनमस्य पारिष्ठापनिकं, तदेवाकारस्तस्मादन्यत्र, तत्र हि त्यज्यमाने बहुदोषसम्भवाश्रीयमाणे चागमिकन्यायेन गुणसम्भवाद्गुर्वाज्ञया पुनर्भुञ्जानस्यापि न भङ्गः, **'वोसिरइ'** व्युत्सृजत्यनेकाशनमशनाद्याहारं च परिहरति । तथा एकस्थाने सप्ताऽऽकारा भवन्ति, तस्येदं सूत्रं–**'एक्कासणं एगट्ठाणं पच्चक्खाइ'** इत्याद्येकाशनवदाकुञ्चनप्रसारणाऽऽकारवर्जं, एकं–अद्वितीयं स्थानं–अङ्गविन्यासरूपं यत्र तदेकस्थानप्रत्याख्यानं, तद् यथा भोजनकालेऽङ्गोपाङ्गं स्थापितं तस्मिंस्तथास्थित एव भोक्तव्यं, मुखस्य हस्तस्य चाशक्यपरिहारत्वाच्चलनमप्रतिषिद्धमिति । अथाऽऽचाम्ले अष्टावाकारास्तत्र सूत्रं—

"आयंबिलं पच्चक्खाइ अन्नत्थऽणाभोगेणं सहसागारेणं लेवालेवेणं गिहिसंसट्ठेणं उक्खित्तविवेगेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ"

अस्यार्थः–आचामः–अवश्रामणं अम्लं–चतुर्थो रसः ताभ्यां निर्वृत्तमित्यण्, एतच्च त्रिविधं उपाधिभेदात्, तद्यथा–ओदनं कुल्माषान् सक्थूंश्च अधिकृत्य भवति, तत्प्रत्याख्याति, आचामाम्लं प्रत्याख्यानं करोतीत्यर्थः, आद्यावन्त्याश्चाकाराश्चत्वारः पूर्ववत्, **'लेवालेवेणं'** ति लेपो–भोजनभाजनस्य विकृत्या तीमनादिना वाऽऽचामाम्लप्रत्याख्यातुरकल्पनीयेन लिप्तता–खरण्टनं विकृत्यादिना लिप्तपूर्वस्य भोजनभाजनस्यैव हस्तादिना संलेखनतोऽलेपोऽलिप्तता, ततश्च लेपश्च अलेपश्च लेपालेपं तस्मादन्यत्र, भाजने विकृत्याद्यवयवसङ्गा-

वेऽपि न भङ्ग इत्यर्थः, 'उक्खित्तविवेगेणं' ति शुष्कौदनादिभक्ते पतितपूर्वस्याऽऽचामाम्लप्रत्याख्यानवतामयोग्यस्याद्रवविकृत्यादिद्रव्यस्य उत्क्षिप्तस्य—उद्धृतस्य विवेको—निःशेषतया त्यागः उत्क्षिप्तविवेकस्तस्मादन्यत्र, भोक्तव्यद्रव्यस्याभोक्तव्यद्रव्यस्पर्शेनापि न भङ्ग इत्यर्थः, यत्तूत्क्षेप्तुं शक्यते तस्य भोजने भङ्ग एव, **'गिहत्थसंसट्ठेणं'** ति गृहस्थस्य—भक्तदायकस्य संबन्धि करोटिकादिभाजनं विकृत्यादिद्रव्येणोपलिप्तं गृहस्थसंसृष्टं तस्मादन्यत्र, विकृत्यादिसंसृष्टभाजनेन हि दीयमानं भक्तमकल्पनीयद्रव्यमिश्रं भवति तद् भुञ्जानस्यापि न भङ्ग इत्यर्थः, यद्यकल्पद्रव्यरसो बहु न ज्ञायत इति, **'वोसिरइ'** अनाचाम्लं व्युत्सृजति । तथा अभक्तार्थे पञ्चाकाराः, तत्रेदं सूत्रं—'सूरे उग्गए अब्भत्तट्ठं पच्चक्खाइ चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थऽणाभोगेणं सहसागारेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ'' अस्यार्थः—'सूरे उग्गए' सूर्योद्गमादारभ्य, अनेन भोजनानन्तरं प्रत्याख्यानस्य निषेध इति ब्रूते, भक्तेन—भोजनेनार्थः—प्रयोजनं भक्तार्थः, न भक्तार्थोऽभक्तार्थः अथवा न विद्यते भक्तार्थो यस्मिन् प्रत्याख्यानविशेषे सोऽभक्तार्थः, उपवास इत्यर्थः, आकाराः पूर्ववत्, नवरं पारिष्ठापनिकाकारे विशेषो—यदि त्रिविधाहारस्य प्रत्याख्याति तदा पारिष्ठापनिकं कल्पते, यदि तु चतुर्विधाहारस्य प्रत्याख्याति पानकं च नास्ति तदा न कल्पते पानके तूद्धरिते कल्पत एव, **'वोसिरइ'** भक्तार्थमशनादिवस्तु व्युत्सृजति । तथा पानकप्रत्याख्याने षडाकाराः, तत्र पौरुषीपूर्वार्धएकासनएकस्थानाचामाम्लाभक्तार्थप्रत्याख्यानेषु उत्सर्गतश्चतुर्विधाहारस्य प्रत्याख्यानं उक्तं, यदि तु त्रिविधाहारस्य प्रत्याख्यानं करोति तदा पानमाश्रित्य षडाकाराः, तथा च सूत्रं—

"पाणस्स लेवाडेण वा अलेवाडेण वा अच्छेण वा बहलेण वा ससित्थेण वा असित्थेण वा वोसिरइ" इहाप्यन्यत्रेत्यनुवृत्तेस्तृतीयायाः पञ्चम्यर्थत्वेन व्याख्यातत्वात् 'लेवाडेण वे'ति लेपकृताद्वा-पिच्छलत्वेन भाजनादीनामुपलेपकारकात् खर्जूरद्राक्षादिपानकादन्यत्र तन्मुक्तवेत्यर्थः, त्रिविधाहारं व्युत्सृजतीति सम्बन्धः, वाशब्दोऽत्रालेपकृतपानकापेक्षयाऽवर्जनीयत्वाविशेषद्योतनार्थः, अलेपकारिणेव वारिणा लेपकारिणाऽप्युपवासादेर्न भङ्ग इति हृदयं, एवमलेपकृताद्वा पिच्छलात्—सोवीरादेः अच्छात्—निर्मलाद्वा प्रासुकाद्वा वर्णान्तरिताद्वा अपिच्छलात् उष्णोदकादेर्बहलाद्—गडुलात्तिलतण्डुलयवधावनादेः ससिक्थाद्वा—भक्तपुलाकोपेतादवश्रावणादेः असिक्थाद्वा—सिक्थवर्जितात्पानकाऽऽहारादिति। तथा चरमो—दिवसस्य भवस्य च पाश्चात्यो भागः तत्र क्रियमाणं प्रत्याख्यानमपि दिवसचरिमं भवचरिमं चेति कथ्यते, तत्रेदं सूत्रं—"दिवसचरिमं पच्चक्खाइ चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थऽणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ" एवं भवचरिममपि, आकाराः पूर्वमेव व्याख्याताः, ननु दिवसचरिमं प्रत्याख्यानं निष्प्रयोजनं, एकासनादिप्रत्याख्यानेनैव गतार्थत्वादिति, नैतदेवं, एकाशनादिकं ह्यष्टाकारं एतच्च चतुराकारं अत आकाराणां सङ्क्षेपकरणात् सफलमेवेति, अत एव एकाशनादिकं दैवसिकमेव भवति, रात्रिभोजनस्य व्रतिभिस्त्रिविधं त्रिविधेन यावज्जीवं प्रत्याख्यातत्वादिति, गृहस्थापेक्षया पुनरिदं आ आदित्योद्गमाद् ज्ञेयं, दिवसस्याहोरात्रपर्यायतयाऽपि दर्शनात् यथा पञ्चभिर्दिनैर्वयमत्रागताः, पञ्चभिरहोरात्रैरित्यर्थः, तत्र यैर्यावज्जीवमपि रात्रिभोजननियमश्चके तेषामपीदं सार्थकमेवानुवादकत्वेन स्मारकत्वात्, भवचरिमं तु द्व्याकारमपि भवति, यदा जानाति महत्तरसर्वसमाधिप्रत्ययरूपाभ्या-

माकाराभ्यां न मम प्रयोजनं तदाऽनाभोगसहसाकारौ भवतः, अनाभोगतः सहसाकारतो वाऽङ्गुल्यादेर्मुखे प्रक्षेपसम्भवात्, अत एवेदमनाकारमपि भण्यते, एतत्याकारद्वयस्यापि परिहार्यत्वादिति। तथा पञ्च चत्वारो वाऽभिग्रहप्रत्याख्याने, तत्र दण्डकप्रमार्जनादिरूपेऽभिग्रहे चत्वार आकारा भवन्ति, यथा—"अन्नत्थऽणाभोगेणं **सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ**" एतद्व्याख्या पूर्ववत्, यदा त्वप्रावरणाभिग्रहं गृह्णाति तदा **'चोलपट्टागारेणं'**ति पञ्चम आकारो भवति, चोलपट्टकाकारादन्यत्र, सागारिकदर्शने चोलपट्टके गृह्यमाणेऽपि न भङ्ग इत्यर्थः। तथा निर्विकृतिके अष्टौ नव वा आकारा भवन्ति, यथा—"**निव्विगइयं पच्चक्खाइ अन्नत्थऽणाभोगेणं सहसागारेणं लेवालेवेणं गिहत्थसंसट्ठेणं उक्खित्तविवेगेणं पडुच्चमक्खिएणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ**" तत्र मनसो विकृतिहेतुत्वाद्विगतिहेतुत्वाद्वा विकृतयो विगतयो वा निर्गता विकृतयो विगतयो वा यत्र तन्निर्विकृतिकं निर्विगतिकं वा प्रत्याख्यातिं आकाराः पूर्ववद् व्याख्येयाः, नवरं **'पडुच्चमक्खिएणं'**ति प्रतीत्य-सर्वथा रूक्षं मण्डकादिकमपेक्ष्य अक्षितं-स्नेहितमीषत्सौकुमार्योत्पादनात् अक्षणकृतविशिष्टस्वादुतायाश्चाभावात् अक्षितमिव यद्वर्तते तत्प्रतीत्याक्षितं अक्षिताभासमित्यर्थः, इह चायं विधिः-यद्यङ्गुल्या घृतादि गृहीत्वा मण्डकादि अक्षितं तदा कल्पते निर्विकृतिकस्य धारया तु न कल्पत इति, व्युत्सृजति-विकृतीः परिहरति, इह च यासु विकृतिषु उत्क्षिप्तविवेकः संभवति तासु नवाकाराः, अन्यासु द्रवरूपासु अष्टौ, ननु निर्विकृतिक एवाकारा अभिहिताः विकृतिपरिहारप्रत्याख्याने तु कुत आकारा अवगम्यन्ते ?, उच्यते, निर्विकृतिकग्रहणे कृते सति

विकृतिपरिमाणप्रत्याख्यानस्यापि सङ्ग्रहो भवति, यतस्तत्रापि त एव तथैवाकारा भवन्ति, यथा एकासनकस्य पौरुष्याः पूर्वार्धस्य च सूत्रे आकारा अभिदधिरे परं द्व्यासनकस्य सार्धपौरुष्या अपरार्धस्य च प्रत्याख्यानस्य त एव भवन्तीति, प्रत्याख्यानं च सूत्रानभिहितमपि भवति, अप्रमादवृद्धेः सर्वत्र सम्भवादित्यदोषः ॥ ननु निर्विकृतिके विकृतिपरिमाणे वा प्रत्याख्याने कयाष्टौ कव वा नव आकारा भवन्तीत्याह—**'नवणीओ'** इत्यादि, नवनीते—म्रक्षणकेऽवगाहिमके च—पक्वान्नेऽद्रवदधिपिशितघृतगुडे चैव, अद्रवग्रहणं सर्वत्र सम्बन्धनीयं, नव आकाराः **'एसिं'**ति अमीषां विकृतिविशेषाणां भवन्ति, शेषाणां तु द्रवरूपाणामष्टावाकाराः, अयमभिप्रायः—यत्रोत्क्षिप्तविवेकोऽद्रवरूपाणां नवनीतगुडादीनां कर्तुं शक्यते तत्र नवाकाराः, द्रवरूपाणां तु विकृतीनामुद्धर्तुमशक्यानां अष्टावाकारा इति ॥२०६॥

इदानीमशनपानादीनां प्रत्याख्येयद्रव्याणां स्वरूपमुच्यते—तत्र 'अश भोजने' इत्यस्य 'कृत्यल्युटो बहुलमन्यत्रापी' (पा० ३-३-११३) ति वचनादृश्यते इति कर्मणि ल्युडन्तस्याशनमिति भवति, 'पा पाने' इत्यस्य पीयत इति तथैव पानमिति भवति, 'खाद भक्षणे' इत्यस्य खादनं खादस्तेन निर्वृत्तं 'भावादिमप्' (पा० ४-४-२०) इति वक्तव्यादिमपि खादिममिति भवति 'स्वद स्वाद ष्वदं आस्वादने' इत्यस्य स्वदनं स्वादस्तेन निर्वृत्तमिति पूर्ववदिमपि स्वादिममिति भवति, समयभाषया तु निरुक्तेनैषां व्युत्पत्तिः क्रियते—यथा आशु क्षुधां शमयतीत्यशनं, तथा प्राणानां—इन्द्रियादिलक्षणानां यदुपग्रहे—उपकारे वर्तते तत्पानं, तथा खमित्याकाशं तच्च मुखविवरमेव तस्मिन्मातीति खादिमं, तथा स्वादयति रसादीन् गुणान् गुडादिद्रव्यं कर्तृसंयमगुणान् वा यतस्ततः स्वादिमं, हेतुत्वेन तदेवाऽऽस्वादयतीत्यर्थः, अथवा सादयति-

विनाशयति स्वकीयगुणान् माधुर्यादीन् स्वाद्यमानमिति स्वादिमं, न चैतन्निरुक्तं कल्पनामात्रं स्वकीयमिति ज्ञेयं, भ्रमन् रौतीति भ्रमरः हिनस्तीति सिंह इत्यादीनां निरुक्तशब्दानां व्याकरणेषु 'धृषोदरादीनि यथोपदिष्ट'-मिति सूत्रेषु प्रसिद्धत्वादिति, न चेदमत्र वक्तव्यमेवंविधव्युत्पत्तौ भेदचतुष्टयी न युज्यते, तथाहि—यथौदनादिकमश्यते तथाऽऽरनालादिकमपि पीयतेऽश्यते इति तथा खर्जूरादिकमपि खाद्यतेऽश्यते इति तथा गुडादिकमपि स्वाद्यते, कोऽर्थः ? अश्यत इति, ततः परमार्थेन एकार्थिका एतेऽशब्दा इति भेदकल्पनमयुक्तं, एवं समयभणितनिरुक्तविधिनाऽप्येकार्थत्वमेवैषामिति, अत्र ब्रूमः, अस्त्येतत् परं बालतथाविधज्ञानविकलादीनां सुखावबोधाय विवक्षितद्रव्याणां सुखपरिहाराय च भेदकल्पनाऽपि नायुक्तेति, लोकेऽपि भक्ष्यत्वे तुल्येऽपि भेदो दृश्यते, तथा च वक्तारो भवन्ति—क्रूरखण्डमण्डकानेतान् भोजयत, एतान् पानीयं द्राक्षापानीयादिपानकं च पाययत, एतान् बालान् गुडधानाखर्जूरनालिकेरादिकां सुखादिकां खादयत, एतान् दुर्ललितान् ताम्बूलं च पञ्चसुगन्धं स्वादयत इत्यादि, तथाऽत्रापि भेदकल्पना न्याययुक्ती ॥

तत्र अशनमाह—

असणं ओयण सत्थुगमुग्गजगाराइ खज्जगविही य ।
खीराइ सूरणाई मडगपभिई य विन्नेयं ॥२०७॥
पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव ।
आउक्काओ सव्वो कक्कडगजलाइयं च तहा ॥२०८॥

भत्तोसं दंताई खज्जूरगनालिकेरदक्खाई । कक्कडिअंबगफणसाइ बहुविहं खाइमं नेयं ॥२०९॥
दंतवणं तंबोलं चित्तं तुलसीकुहेडगाईयं । महुपिप्पलिसुंठाई अणेगहा साइमं नेयं ॥२१०॥
पाणंमि सरयविगई खाइम पक्कन्नअंसओ भणिओ ।
साइमि गुलमहुविगई सेसाओ सत्त असणंमि ॥२११॥

'असण' मित्यादि, आदिशब्दः स्वगतानेकभेदसूचकः सर्वत्र सम्बध्यते, तत ओदनादि सक्तवादि मुद्गादि, जगार्यादि, जगारीशब्देन समयभाषया रूढ्या भण्यते, तथा खाद्यकविधिश्च खाद्यकमण्डिकामोदकसुकुमारिका-घृतपूरलपनश्रीखण्डशुक्तप्रभृतिपक्कान्नविधिः, तथा क्षीरादि, आदिशब्दादधिघृततक्रतीमनरसालादिपरिग्रहः, तथा सूरणादि, आदिशब्दादार्द्रकादिसकलवनस्पतिविकारव्यञ्जनपरिग्रहः, मण्डकप्रभृति च, मण्डकाः प्रभृतिर्यस्य ठोठिकाकुल्लरिकाचूरीयकहड्डुरिकाप्रमुखवस्तुजातस्य तन्मण्डकप्रभृति विज्ञेयं—ज्ञातव्यमशनमिति ॥२०७॥

सम्प्रति पानमाह—'पान'मित्यादि, सोवीरं—काञ्जिकं यवोदकादि—यवधावनमादिशब्दा-द्द्रोधूमपष्टिकादितण्डुलकोद्रवधावनादिपरिग्रहः, तथा 'चित्रं' नानाप्रकारं सुरादिकं चैव, आदिशब्दात्सर-कादिपरिग्रहः, तथाऽप्कायः 'सर्वः' सरःसरित्कूपादिस्थानसम्बन्धी, तथा कर्कटकजलादिकं च, कर्कटकानि-चिर्भटकानि तन्मध्यवर्ति जलं २ तदादिर्यस्य तत्कर्कटकजलादिकं, आदिशब्दात् खर्जूरद्राक्षादिचिञ्चिणि-कापानकेक्षुरसादिग्रहः, एतत्सर्वं पानं ॥२०८॥

सम्प्रति खादिममाह—'भत्तोस'मित्यादि, भक्तं च तद्भोजनमोषं च—दाह्यं भक्तौषं, रूढितः परिभ्रष्टचनकगोधूमादि, 'दन्त्यादि' दन्तेभ्यो हितं दन्त्यं—गुन्दादि, आदिशब्दाच्चारुकुलिकाखण्डे-

क्षुशर्करादिपरिग्रहः, यद्वा दन्तादि देशविशेषप्रसिद्धं गुडसंस्कृतदन्तपचनादि, तथा खर्जुरनालिकेरद्राक्षादिः, आदिशब्दादक्षोटकवदामादिपरिग्रहः, तथा कर्कटिकाम्रपनसादि, आदिशब्दात्कदल्यादिफलपटलपरिग्रहः, बहुविधं खादिमं ज्ञेयम् ॥२०९॥

स्वादिममाह–'दंतवण'मित्यादि, दन्ताः पूयन्ते–पवित्राः क्रियन्ते येन काष्ठखण्डेन तद्दन्तपावनं, ताम्बूलं– नागवल्लीपत्रपूगफलजातिफलादिरूपं, चित्रं–अनेकविधं, तुलसीकुहेडकादि, तुलसीपत्रिकाविशेषः कुहेडकः–पिण्डाद्रकः, आदिशब्दाज्जीरकहरितादिपरिग्रहः, मधुपिप्पलिशुण्ठ्यादि, आदिशब्दाद्गुडमरिचाजमोदजीरकहरीतकीविभीतकामलकीकटुभाण्डादिपरिग्रहः, अनेकधा स्वादिमं ज्ञेयम् ॥२१०॥

साम्प्रतं दशानां विकृतीनां मध्ये का कुत्राऽऽहारेऽवतरतीत्याह–'पाणंमी'त्यादि, पानाहारे सप्तविकृतिरवतरति, 'खादिमे' खादिमाहारे पक्वान्नांशको गुडधानादिषु पक्वगुन्दावयवादिको भणितः, स्वादिमे गुडमधुरूपादिविकृतिरवतरति, शेषाः–क्षीरदधिघृततैलपक्वान्ननवनीतमांसरूपाः सप्त विकृतयोऽशनरूपे आहारेऽवतरन्तीति ॥२११॥

प्रत्याख्यानं च कृतमप्येतैः सुकारणैः विशुद्धं भवतीत्याह—

फासियं पालियं चेव, सोहियं तीरियं तहा ।
किट्टियमाराहियं चेव, जएज्जा एरिसम्मि उ ॥२१२॥

उचिए काले विहिणा पत्तं जं फासियं तयं भणियं ।
तह पालियं च असइं सम्मं उवओगपडियरियं ॥२१३॥
गुरुदत्तसेसभोयणसेवणगाए य सोहियं जाण ।
पुण्णेवि थेवकालावत्थाणा तीरियं होइ ॥२१४॥
भोयणकाले अमुगं पच्चक्खायंत्ति भुंज कित्तीयं ।
आराहियं पयारेहिं सम्ममेएहिं निट्ठवियं ॥२१५॥
वयभंगे गुरुदोसो थेवस्सवि पालणा गुणकरी उ ।
गुरुलाघवं च नेयं धम्मंमि अओ उ आगारा ॥२१६॥

'फासिय'मित्यादि, स्पृष्टमित्यस्य स्थाने प्राकृते फासियमिति भवति, स्पर्शो वा सञ्जातोऽस्येति इतचि स्पर्शितमिति वा, तच्च प्रत्याख्यानग्रहणकाले विधिना प्राप्तं, पालितं चैव-पुनः पुनरुपयोगप्रतिजागरणेन रक्षितं, शोभितं-गुर्वादिप्रदत्तशेषभोजनाऽऽसेवनेन राजितं, तीरितं-पूर्णेऽपि प्रत्याख्यानकालावधौ किञ्चिदधिककालावस्थानेन तीरं नीतं, कीर्तितं-भोजनवेलायाममुकं मया प्रत्याख्यानं कृतं तत्पूर्णमधुना मोक्ष्ये इत्युच्चारणेन शब्दितं, आराधितं चैव-एभिरेव प्रकारैः सम्पूर्णं निष्ठां नीतं यस्मादेवम्भूतमेवैतदर्हदाज्ञापालनादप्रमादाच्च महत्कर्मक्षयकारणं तस्मादीदृशे प्रत्याख्याने यतेत एवंविध एव यत्नः कर्तव्य इति ॥२१२॥

अथ ग्रन्थकारः स्वयमेवैतानि पदानि विवृणोति–'उचिए' त्यादि गाथात्रयं, उचिते काले विधिना प्राप्तं यत् स्पृष्टं तद्भणितम्, इदमुक्तं भवति–साधुः श्रावको वा प्रत्याख्यानसूत्रार्थं सम्यगवबुध्यमानः सूर्येऽनुद्गते एव स्वमाक्षितया चैत्यस्थापनाचार्यसमक्षं वा स्वयं प्रतिपन्नविवक्षितप्रत्याख्यानः पश्चाच्चारित्र-पवित्रगात्रस्य गुरोः समीपे सूत्रोक्तविधिना कृतिकर्मादिविनयं विधाय रागद्वेषादिविकथादिरहितः सर्वत्रोपयुक्तः प्राञ्जलिपुटो लघुतरशब्देन गुरुवचनमनूच्चरन् यदा प्रत्याख्यानं प्रतिपद्यते तदा स्पृष्टं भवतीति, तथा पालितं चामकुक्षिरन्तरमुपयोगेन सम्यग् प्रतिजागरितम् ॥२१३॥

गुरुदत्तशेषभोजनाऽऽसेवनया च शोभितं जानीहि, पूर्णेऽपि प्रत्याख्यानकाले स्तोककालावस्थाना-त्तीरितं भवतीति ॥२१४॥

भोजनकालेऽमुकं प्रत्याख्यातमिति भणित्वा भुञ्जानस्य कीर्तितम्, आराधितं प्रकारैः सम्यगेतैः पूर्वोक्तैर्निष्ठां नीतमिति ॥२१५॥

प्रत्याख्यानं चापवादरूपाऽऽकारसहितं कर्तव्यम्, अन्यथा तु भङ्गः स्यात्, स च महते दोषायेति कथयन्नाह–'वयभंगे'त्यादि, व्रतभङ्गे–नियमभङ्गे गुरुः–महान् दोषो-दूषणमशुभकर्मबन्धादिरूपं भग-वदाज्ञाविराधनात्, तथा स्तोकस्यापि-अल्पस्यापि आस्तां महतः पालना-आराधना गुणकरी तु–कर्मनिर्जरा-लक्षणोपकारकारिण्येव, विशुद्धपरिणामरूपत्वात्, तथा गुरु च-सारं लघु च–असारं तयोर्भावो गुरुलाघवं तच्च ज्ञातव्यम्, कचेत्याह–धर्मे-चारित्रधर्मे, तथाहि–उपवासे कृतेऽपि सज्ज्ञातासमाधेरौषधादिदानतः

समाधिसम्पादने निर्जरागुणो गुरुर्भवति इतरथा पुनरल्प इति विमर्शनीयम्, एकान्ताग्रहस्य प्रभूतापकारित्वेनाशुभत्वात्, यत एवमत आकाराः प्रत्याख्याने क्रियन्ते इति ॥२१६॥

ननु प्रत्याख्याने विकृतयोऽभिहितास्ताः कियन्त्यो भवन्तीत्याह—

दुद्धं[1] दहि[2] नवणीयं[3] घयं[4] तहा तेल्लमेव[5] गुड[6]-मज्जं[7] ।
महु[8] मंसं[9] चेव तहा ओगाहिमगं[10] च विगईओ ॥२१७॥
गोमहिसुट्टीपसूणं एलग खीराणि पंच चत्तारि ।
दहिमाइयाइं जम्हा उट्टीणं ताणि नो हुंति ॥२१८॥
चत्तारि हुंति तेल्ला तिल-अयसि कुसुंभ-सरिसवाणं च ।
विगईओ सेसाणं डोलाईणं न विगईओ ॥२१९॥
दवगुडपिंडगुडा दो मज्जं पुण कट्ठपिट्ठनिप्फन्नं ।
मच्छिय-कुत्तिय-भामरभेयं च महुं तिहा होई ॥२२०॥
जल-थल-खहयरमंसं चम्मं वस सोणियं तिभेयं च ।
आइल्ल तिण्णि चलचल ओगाहिमगं च विगईओ ॥२२१॥
खीरदहीवियडाणं चत्तारि उ अंगुलाणि संसट्ठं ।
फाणियनिव्वयाणं अंगुलमेगं तु संसट्ठं ॥२२२॥

मद्दुपुग्गलरसयाणं अद्धइगुलयं तु होइ संसट्ठं ।
गुलपुग्गलनवणीए अद्धामलयं तु संसट्ठं ॥२२३॥

'दुद्ध'मित्यादि, दुग्धं दधि नवनीतं घृतं तथा तैलमेव गुडश्च मद्यं चेति गुडमद्यं मधु मांसं चैव तथाऽवगाहिमकं च-अवगाहेन कृतं-घृततैलबोलेन निर्वृत्तमवगाहिमं तदेव अवगाहिमकं च, एता दश विकृतयो, मनसो विकृतिहेतुत्वादिति ॥२१७॥

इदानीमेतासां यथास्वं भेदानाह-'गोमहिसु'इत्यादि, गवां महिषीणामुष्ट्रीणां पशूनां-छाग-लिकानां एलकानां गवादिक्षीरादीत्यर्थः सम्बन्धीनि क्षीराणि पञ्च विकृतयः, न शेषाणि मानुषीक्षीरादीनि, एलक इत्यत्र षष्ठीबहुवचनं लुप्तं द्रष्टव्यं, तथा चत्वारि-प्रत्येकं चतुर्भेदानि दध्यादीनि-दध्याधिनवनीतघृतानि, आह-कथं चत्वार्येव भवन्ति ? पञ्च कथं क्षीरवज्र भवन्ति ?, तत्राह-यस्मादुष्ट्रीणां दुग्धे तानि न भवन्ति, [1]सरटस्यैव भावादिति ॥२१८॥

'चत्तारी'त्यादि, उत्तरत्र स्थितस्य चस्यात्र सम्बन्धात्तैलानि च चत्वारि भवन्ति विकृतय इति सण्टङ्कः, केषां सम्बन्धीनि ?, तत्राह-तिल-अतसी-कुसुम्भ-सर्षपाणां, शेषाणां डोलादीनां मधुकफलादीनां आदिशब्दान्नालिकेरएरण्डशिंशपादीनां सम्बन्धीनि तैलानि न विकृतयः, अत्र च तेल्ला इति प्राकृतत्वात्पुंसा निर्देशः ॥२१९॥

'दवे'त्यादि, गुडे द्वौ भेदौ-द्रवगुडः पिण्डगुडश्च, तौ द्वावपि विकृती, तथा मद्ये द्वौ भेदौ एकं

१ 'सरढस्यैव' इति मु०।

काष्ठैः-इक्षुतालादिभिर्निष्पन्नम् , अपरं पिष्टैः-पष्टिकाकोद्रवादितण्डुलैर्निष्पन्नम् , तौ द्वावपि विकृती, तथा मधु त्रिभेदं-मक्षिकाकृतं कुक्षिकाकृतं भ्रमरकृतं चेति त्रिधा-त्रिप्रकारमपि विकृतिर्भवति ॥२२०॥

'जले'त्यादि, मांसं त्रिभेदम् , जलचराणां-मत्स्यादीनां सम्बन्धि, स्थलचराणां-अजमहिषशूकर-शशकहरिणादीनां सम्बन्धि, खचराणां-लावकचटिकादीनां सम्बन्धि, अथवा अन्यथा मांसत्रैविध्यं-चर्म वसा शोणितं चेति, एतच्च त्रिविधमपि विकृतिर्भवति, अवगाहिमकं पुनर्घृतेन वा तैलेन वा भृतायां तापिकायां चलचलेतिशब्दं कुर्वाणं सुकुमारिकादि यदा पच्यते तदैको घाणः, पुनस्तेनैव घृततैलेन द्वितीयः, पुनस्तेनैव तृतीयो विकृतिर्भवति, यदि पुनस्तेनैव घृतेन तैलेन वा चतुर्थो घाणः पच्यते तदाऽसौ विकृतिर्न भवति, [1]अयोगवाहिनां निर्विकृतिकप्रत्याख्यानेऽपि कल्पते, अथ तापिका एकेनैव पूपकेन खज्जकेन वा सकलाऽपि भृता तदा तत्रैव द्वितीयः पूपकादिः क्षिप्तो न विकृतिर्भवति, निर्विकृतिकानामपि कल्पत एव सः, परं यदि सम्यग् ज्ञायतेऽयं चतुर्थोऽयं द्वितीयो घाणः प्रथमक्षिप्तघृतादिना पक्व इति, यदा पुनर्द्वितीयादिघाणेषु तापिकायामपरं घृतादि प्रक्षिप्तं चतुर्थादिर्वा अयं घाण इति सम्यग् न ज्ञातं तदा न कल्पत एवेति ॥२२१॥

गृहस्थसंसृष्टस्याकारस्य विशेषतः स्वरूपमभिधीयते-गृहस्थैरोदनादिर्दध्यादिना स्वप्रयोजनाय संसृष्टः-संश्लेषित इति गृहस्थसंसृष्टः, तत्राऽऽह-'खीरदही'त्यादि, क्षीरदधिविकटानां चत्वार्यङ्गुलानि संसृष्टं न विकृतिर्भवति, अयमभिप्रायः-कूरः क्षीरमिश्रितः कृतः, तत्र कूरस्योपरि यदि चत्वार्यङ्गुलानि क्षीरं चटितं भवति तदा न विकृतिर्भवति, निर्विकृतिकानां कल्पते, यदा तु पञ्चमाङ्गुलारम्भो भवति तदा विकृतिरेव,

१ योगवा० इति मु० पाठः, स तु अशुद्धः भाति, पञ्चवस्तु-धर्मसङ्ग्रहादिषु योगशास्त्रटीका-प्रवचनसारोद्धार-टीकाग्रन्थयोः प्राचीनहस्तप्रतिषु अयोगः० इति पाठः ॥

न कल्पते निर्विकृतिकानामित्यर्थः, एवं दध्नो विकटस्य च वक्तव्यम्, तथा फाणितेन-द्रवगुडेन मिश्रिते कूरठोठिकादौ यद्येकमङ्गुलमुपरि चटितं भवति तदा न विकृतिः, एवं तैलघृतयोरपि वक्तव्यम् ॥२२२॥

'मद्दुपुग्गले'त्यादि. मधूनि च पुद्गलानि-मांसानि च तेषां रसैः संसृष्टम्-अङ्गुलस्यार्धं संसृष्टं भवति, अङ्गुलार्धात्परतो विकृतिरेवेति. गुलपुद्गलनवनीते-एतद्विषये एतैः संसृष्टमितियावत् आर्द्रामलकं तु. तुशब्दस्यावधारणार्थत्वादार्द्रामलकमेव न विकृतिर्भवति, आर्द्रामलकं तु शणवृक्षसम्बन्धी शुक्लः, अयमर्थः-गुडमांसनवनीतखण्डैरार्द्रामलकप्रमाणैर्बहुभिरपि संसृष्टमोदनादिकं न विकृतिर्भवति, एतदीयेनैकेनापि स्थूलखण्डेन संसृष्टं विकृतिरेवेति ॥२२३॥

इदानीं प्रत्याख्यानविषयाण्येव विशेषवस्तूनि कथयन्नाह-

विगई विगइगयाणि य अणंतकायाणि वज्जवत्थूणि ।
दस तीसं बत्तीसं बावीसं सुणह वन्नेमि ॥२२४॥
दुद्ध दहि तिल नवणीय घय गुड मद्दु मंस मज्ज पक्कं च ।
पण चउ चउ चउ चउ दुगतिग तिग दुग एगपडिभिन्नं ॥२२५॥

'विगई'त्यादि, विकृतीर्विकृतिगतानि चानन्तकायानि वर्जनीयवस्तूनि हे भव्यजनाः ! शृणुत वर्णयाम्यहं भवतामिति, तानि च कियद्भेदानि भवन्तीति यथासङ्ख्येनाह-दश त्रिंशत् द्वात्रि-

शत् द्वाविंशतिरितिसङ्ख्यानि, कोऽर्थः ? विकृतिर्दशभेदा, विकृतिगतानि त्रिंशत्सङ्ख्यानि, अनन्तकायानि द्वात्रिंशत् , वर्ज्यवस्तूनि द्वाविंशतिं वर्णयामीति ।

अत्र च शृणुतेति यदुक्तं तत्रायमभिप्रायः शृण्वतामुपस्थितानामेव भव्यानां सूरिभिर्धर्मः कथनीयः, नानुपस्थितानाम् , यदवाचि—

"अणुवट्ठियस्स धम्मं मा हु कहिज्जाहि सुट्ठुवि पियस्स । विच्छायं होइ मुहं विज्झायग्गिं धम्मंतस्स" ॥१॥ इति

[अनुपस्थिताय धर्मं मा चीकथः सुष्ठ्वपि प्रियाय । विच्छायं भवति मुखं विध्यातमग्निं धमतः ॥१॥]

वर्णयामीत्यस्यायमभिप्रायः—परोपकारनिरतैः सूरिभिः कथ्यमान एव जीवादितत्त्वे भव्यानां विवेकः समुल्लसति, यदाहुः—"सुच्चा जाणइ कल्लाणं सुच्चा जाणइ पावगं । उभयंपि जाणइ सुच्चा, जं छेयं तं समायरे ॥१॥" इति [दशवैकालिक ४११] ।

[श्रुत्वा जानाति विरतिं श्रुत्वा जानाति पापं । विरत्यविरती अपि जानाति श्रुत्वा य श्रेयः तत्समाचर ॥१॥] ॥२२४॥

तत्र विकृतीस्तावदाह—'दुद्धे'त्यादि, दुग्धदधितैलनवनीतघृतगुडमधुमांसमद्यपक्वं च, तत्र दुग्धं पञ्चभेदं-गोमहिषीकरभीछगलिकागड्डरिकासम्बन्धित्वेन, दधि चतुर्भेदं—गोमहिषीछगलिकागड्डरिकासम्बन्धित्वेन, उष्ट्रीदुग्धेन दधि न भवतीति, तैलमपि चतुर्भेदं—तिलअतसीकुसुम्भसर्षपसम्बन्धित्वेन, नवनीतमपि चतुर्भेदं—गोमहिषीछगलिकागड्डरिकादधिसम्भवित्वेन, घृतमपि चतुर्भेदं-गवादिसम्बन्धित्वेन, एवं गुडो

द्विभेदः—द्रवगुडपिण्डगुडभेदेन, मधु त्रिभेदं—मक्षिकाकुलिकाभ्रमरीजनितत्वेन, मांसं त्रिभेदं—जलचरस्थलचरखचरजीवसम्बन्धित्वेन चर्मवसाशोणितभेदेन वेति, मद्यं द्विभेदं—काष्ठपिष्टनिष्पन्नत्वेन, पक्वमेकभेदं—घृतेन तैलेन वा भृतायां तापिकायां चलचलेतिशब्देन पच्यमानस्य कणिकादेरेकत्वादिति ॥२२५॥

विकृतिगतानि साम्प्रतमाह—

दव्वहया विगइगयं विगई पुण तेण तं हयं दव्वं ।
उद्धरिए तत्तंमि य उक्किट्ठदवं हवं अन्ने ॥२२६॥
अह पेया[1] दुद्धट्ठी[2] दुद्धवलेही[3] य दुद्धसाडो[4] य ।
पंच य विगइगयाइं दुद्धंमि य खीरिसहियाइं[5] ॥२२७॥
अंबिलजुयंमि दुद्धे दुद्धट्ठी दक्खमीसरद्धंमि ।
पयसाडो तह तंडुलचुण्णयसिद्धंमि अवलेहो ॥२२८॥
दहिए विगइगयाइं घोलवडा[1] घोल[2] सिहरिणि करंबो[3] ।
लवणकणदहियमहियं[4] संगरिगाइंमि अप्पडिए ॥२२९॥
पक्कघयं घयकिट्टी[1] पक्कोसहि उवरि तरिय सप्पि[2] च ।
निम्भंजणवोसंदणगाइं[3] घयविगइविगइगया[4] ॥२३०॥

नेल्लमलो निल्लकुट्टो दद्धं नेल्लं तहोसहोव्वरियं ।
लक्खाइदव्वपक्कं नेल्लं नेल्लंमि पंचेव ॥२३१॥
अद्धकट्ठिइक्खुरसो गुलपाणीयं च सक्करा खंडं ।
पायगुलं च गुलविगई विगइगयाइं च पंचेव ॥२३२॥
एगं एगम्मुवरिं तिन्नोवरि बीयगं च जं पक्कं ।
तुप्पेण तेण चिय तइय गुलहाणियापभिई ॥२३३॥
चरुअं जलेण सित्था [illegible] पंचम तु पूयलिया ।
चोप्पडियनाविआए परिपक्कं तीस मीलिएसु ॥२३४॥
आवस्सयचुण्णीए परिभणियं एत्थ वण्णियं कहियं ।
कहियव्वं कुसलाणं पउंजियव्वं तु कारणिए ॥२३५॥

'दव्वहये'त्यादि. कलमशालितन्दुलादिभिः हता—भिक्षा निर्वीर्यीकृता सती विकृतिः पुनः क्षीरादिका विकृतिगतमित्युच्यते तेन कारणेन तन्दुलादिहतं क्षीरादिकं द्रव्यमेव भवति न तु विकृतिः, अत एव निर्विकृतिकप्रत्याख्यानवतामपि केषाञ्चित् त्यक्तमपि किमपि तत् कल्पत एव, तथा पाकभाजनात् सुकुमारिकादौ उद्धृते सति पश्चात् उद्धरितं यत् घृतादि तस्मिन् चुल्लीमस्तकस्थेऽग्निसंयोगात्तप्ते प्रक्षिप्तं यत्कणिकादि द्रव्यं तदिदमुत्कृष्टद्रव्यमेव, कोऽर्थः ? विकृतिगतमेव भवति, न तु विकृतिरित्यन्ये वदन्ति,

गीतार्थाभिप्रायस्तु चुल्लीमस्तकादुत्तारिते शीतले च जाते घृतादौ यदि कणिक्कादि प्रक्षिप्यते तदैव तथाविधपाकाभावात् विकृतिगतं, अन्यथा तु परिपक्वत्वाद्विकृतिरेवेति, इयं गाथा अस्माभिरित्थं तावद्व्याख्याता सुधिया तु यथाबोधमन्यथाऽपि व्याख्येया ॥२२६॥

इदानीं कस्यां विकृतौ कानि किंनामकानि कियन्ति विकृतिगतानि भवन्तीत्याह–'अह पेया' इत्यादि, अथ–अनन्तरं दुग्धे पञ्चैव च शब्दस्यावधारणार्थत्वाद्विकृतिगतानि भवन्ति, विकृतौ–क्षीरादौ गतानि–स्थितानि विकृतिगतानि–विकृत्याश्रितानि, न विकृतिरित्यर्थः, कानि तानीत्याह-पेया–दुग्धकाञ्जिकमित्यर्थः, तथा दुग्धाट्टी दुग्धावलेहिका दुग्धसाटिका च क्षीरसहिता इति–क्षीरेण्या–पायसेन सहितानि पूर्वोक्तानि चत्वारि, पञ्चमी च क्षीरेयीत्यर्थः, एतानि क्षीरे पञ्च विकृतिगतानीति ॥२२७॥

एतेषु स्वयमेव कानिचिद्विवृणोति–'अंबिले'त्यादि, अंबिलेन युक्ते दुग्धे दुग्धाटी–किलाटिकेत्यर्थः, अन्ये तु बलहिकामाहुः, तथा द्राक्षामिश्रे दुग्धे राद्धे पयःसाटी, पयो–दुग्धं सटति–गच्छतीति व्युत्पत्तेः, तथा तण्डुलचूर्णकसिद्धे दुग्धे अवलेहिका ॥२२८॥

दधिविकृतिगतान्याह–'दहिए'त्यादि, दधिन–दधिविषये विकृतिगतानि पञ्च, घोलवटकानि–घोलयुक्तवटकानि, तथा घोलो–वस्त्रगालितं दधि, तथा शिखरिणी–करमथितखण्डयुक्तदधिनिष्पन्ना, तथा करम्बको–दधियुक्तकूरनिष्पन्नः तथा लवणकणयुक्तं दधि च मथितं राजिकाखाटकमित्यर्थः, तच्च संगरिकादिकेऽपतितेऽपि विकृतिगतं भवति, संगरिकापुष्पफलशकलादौ पतिते पुनर्भवत्येव ॥२२९॥

घृतविकृतिगतान्याह–'पक्कघय'मित्यादि, औषधैः पक्वं घृतं सिद्धार्थकादि, तथा घृतकिट्टिका-

घृतमलं, तथा घृतपक्वौषधोपरि तन्निष्कास्यं यत्सर्पिस्तदपि विकृतिगतं, तथा निर्लेज्झनं–पक्वादोत्तीर्णं दग्धघृतमित्यर्थः, तथा [1]विष्यन्दनं–दधितक्रिकाकणिकानिष्पन्नद्रव्यविशेषः सपादलक्षदेशप्रसिद्धं, घृतविकृतिगतान्येतानि पञ्चापीत्यर्थः ॥२३०॥

तैलविकृतिगतान्याह–'तिलमल्ली'त्यादि, तैलमल्लिका तथा तिलकुट्टिः तथा दग्धं तैलं–निर्लेज्झनमित्यर्थः तथा तैलपक्वौषधोपरिभागे यद्घृतं, तथा लाक्षादिद्रव्यपक्वं च तैलं, एतानि तैलविकृतौ पञ्च विकृतिगतानि ॥२३१॥

गुडविकृतिगतान्याह—'भडे'त्यादि, अर्वाक्पथनेक्षुरसः तथा गुडपानीयं तथा शर्करा तथा खण्डं तथा पाकगुडो येन खज्जकादि क्रियते, गुडविकृतौ विकृतिगतानि एतानि पञ्चैव ॥२३२॥

एकान्ने विकृतिगतान्याह–'एग'मित्यादि, एकं विकृतिगतं तदेकस्य थालस्योपरि पच्यते, कोऽभिप्रायः ?–प्रक्षिप्तघृतादिके तापके एकेनैव पूपकेन सकले पूरिते द्वितीयपूपकादिस्तत्र क्षिप्तो विकृतिगतमेव भवति, यदवाचि–

"जेणेगेणं तवओ पूरिज्जइ पूयगेण तब्बीओ ।
अक्खवियनेहो पच्चइ जइ सो नय होइ तव्विगई ॥१॥"

[येनैकेन तापिका पूर्यते पूपेन तत्राक्षिप्ते स्नेहे द्वितीयः पच्यते यदि स न भवति तद्विकृतिः ॥१॥]

द्वितीयं विकृतिगतं, त्रयाणां थालानामुपरि अप्रक्षिप्तापरघृतं यत्तेनैव 'तुप्पेण'त्ति घृतेन पक्वं, तृतीयं गुडधानिकाप्रभृति ॥२३३॥

१ विष्यन्दनं 'अद्धनिट्ठियदधिमच्छद्धतंदुलविप्फन्नं' इति पञ्चवस्तु टीकायाम् (गा० ३७६) ॥

तथा "चउत्थ"मित्यादि, चतुर्थं समुत्सार्यते सुकुमारिकादौ पश्चादुद्धरितघृतादिखरण्टितायां तापिकायां जलेन सिक्ता लपनश्रीः, पञ्चमं पुनः स्नेहदिग्धतापिकायां परिपक्वा पूपिका, एवं च षड्विकृतिसम्बन्धीनि पञ्च पञ्च विकृतिगतानि मिलितानि त्रिंशद्भवन्तीति ॥२३४॥

इह च विकृतिगतानां स्वरूपं नाऽऽचार्येण स्वमनीषिकयाऽभिदधे, किन्तु सिद्धान्ताभिहितमेव, यदाह–'आवस्सये' त्यादि, आवश्यकचूर्णौ परिभणितं 'अत्र' ग्रन्थे 'वर्णितं' सामान्यद्वारेण 'कथितं' विशेषद्वारेणास्माभिः, एतच्च कथयितव्यं 'कुशलानां' बुद्धिमतां प्रयोक्तव्यं च कारणिके-कारणिकविषये।

अयमभिप्रायः–यद्यपि क्षीरेयीप्रमुखाणि साक्षाद्विकृतयो न भवन्ति, किन्तु विकृतिगतान्येव, निर्विकृतिकानामपि कल्पन्ते, तथापि उत्कृष्टानि एतानि द्रव्याणि भक्ष्यमाणान्यवश्यं मनोविकारमानयन्ति शान्तानामपि, न च कृतनिर्विकृतिकानामेतेषु भक्ष्यमाणेषु उत्कृष्टा निर्जराः सम्पद्यन्ते, तस्मादेतानि न गृह्यन्ते इति, यस्तु विविधतपःकरणक्षामकुक्षिरनुष्ठानं स्वाध्यायाध्ययनादिकं कर्तुं न शक्नोति स विकृतिगतान्युत्कृष्टान्यपि द्रव्याणि भुङ्क्ते न कश्चिद्दोषः, कर्मनिर्जराऽपि तस्य महती भवति, यदाहुः–

"नवरं इह परिभोगो निव्विइयाणंपि कारणावेक्खो। उक्कोसगदव्वाणं न उ अविसेसेण विन्नेओ ॥१॥
आवन्ननिव्विगईयस्स असहुणो जुज्जए परीभोगो। इंदियजयबुद्धीए विगईचायम्मि नो जुत्तो ॥२॥
जो पुण विगईचायं काऊणं खाइ निद्धमहुराइं। उक्कोसगदव्वाइं तुच्छफलो तस्स सो नेओ ॥३॥
दीसन्ति य केइ इहं पच्चक्खाएवि मंदधम्माणो। कारणियं पडिसेवं अकारणेणावि कुणमाणा ॥४॥

तिलमोयगतिलवट्टिं वरिसोलगनालिकेरखंडाइं । अइबहलघोलखीरिं घयपप्पुयवंजणाइं च ॥५॥
घयगुडमंडगाई दहिदुद्धकरंबपेयमाईयं । कुन्लुरिचूरिमपमुहं अकारणे केइ भुंजंति ॥६॥
न य तंपि इह पमाणं जहुत्तकारीण आगमन्नूणं । जरजम्ममरणभीसणभवन्नवुव्विग्गचित्ताणं ॥७॥
मोत्तुं जिणाणमाणं जियाण बहुदुहदवग्गितवियाणं । न हु अन्नो पडियारो कोइ इहं भववणे जेण ॥८॥
विगई परिणइधम्मो मोहो जमुदिज्जए उदिन्ने य । सुट्ठुवि चित्तजयपरो कहं अकज्जे न वट्टिहिई ? ॥९॥
दावानलमज्झगओ को तदुवसमट्ठयाए जलमाई । संतेवि न सेविज्जा मोहानलदीविए उवमा ॥१०॥
विगइं विगईभीओ विगइगयं जो य भुंजए साहु । विगई विगइसहावा विगइं विगई बला नेइ ॥११॥
इत्यादि [नवरमिह परिभोगो निर्विकृतिकानामपि कारणापेक्षः । उत्कृष्टद्रव्याणां न त्वविशेषेण विज्ञेयः ॥१॥
आपन्न(संतत)निर्विकृतिकस्याक्षमस्य युज्यते परिभोगः । इन्द्रियस्य जयबुद्धया विकृतित्यागे न युक्तः ॥२॥
यः पुनर्विकृतित्यागं कृत्वा खादति स्निग्धमधुराणि । उत्कृष्टद्रव्याणि तुच्छफलस्तस्य स ज्ञेयः ॥३॥
दृश्यन्ते च केचिदिह प्रत्याख्यायापि मन्दधर्माणः । कारणिकीं प्रतिषेवां अकारणेऽपि कुर्वाणाः ॥४॥
तिलमोदकतिलवर्त्यौ वर्षोलकनालिकेरखण्डादीनि । अतिबहलघोलं क्षीरेयीं घृतप्लुतव्यञ्जनानि च ॥५॥
घृतगुडमण्डकादीन् दधिदुग्धकरम्बपेयादि । कुल्लुरिचूरिमप्रमुखं अकारणे केचित् भुञ्जन्ति ॥६॥
न च तदपीह प्रमाणं यथोक्तकारिणामागमज्ञानां । जराजन्ममरणभीषणभवार्णवोद्विग्नचित्तानाम् ॥७॥
मुक्त्वा जिनानामाज्ञां जीवानां बहु दुःखदवाग्नितप्तानां । नैवान्यः प्रतीकारः कश्चिदिह भववने येन ॥८॥
विकृतिः परिणतिधर्मा विकारो यस्मादुदीर्यते उदीर्णे च मोहे सुष्ठ्वपि चित्तजयपरः कथमकार्ये न वर्तिष्यते ?॥९॥

दावानलमध्यगतः कस्तदुपशमनार्थं जलादीनि । सन्त्यपि न गृह्णीयात् मोहानलदीप्ते एषोपमा ॥१०॥ विगतिभीतो यस्तु साधुः विकृतिं विकृतिगतं च भुङ्क्ते तं विकारस्वभावात् विकृतिर्बलात्तु विगतिं नयति ॥११॥]

सुगमाश्चैताः, नवरमन्त्यगाथा किञ्चिद्विषमत्वाद्विवृण्यते–विगतेः–नरकादिकाया यो भीतः–त्रस्तः साधुर्विकृतिं क्षीरादिकां कथञ्चिदत्यागुक्तस्यापि दर्शनाद्विकृतिगतं च—क्षीरान्नादिकं यो भुङ्क्ते स दुर्गतिं यातीति शेषः, कस्मादित्याह–विकृतिर्बलाज्जीवमनिच्छन्तमपि विगतिं–नरकादिकां नयतीति, एतदपि कुत इत्याह–विकृतिर्यतो विकृतिस्वभावा–मनोविकारकारिस्वरूपेति ॥२३५॥ अधुना अनन्तकायिकान्याह–

सव्वा हु कंदजाई[1] सूरणकंदो[2] य वज्रकंदो य ।
अल्लहलिद्दा[3] य तहा अदं[4] तह अल्लकच्चूरो[5] ॥२३६॥
सत्तावरी[6] विराली[7] कुमारि[8] तह थोहरी[9] गलोई[10] य ।
लहसणं[11] वंसगरिल्ला[12] गज्जर[13] तह लोणओ[14] लोढो[15] ॥२३७॥
गिरिकन्नि[16] किसलपत्ता खरिंसुया[17] थेग[18] अल्लसुत्था[19] य ।
तह लोणरुक्खअल्लो[20] खेल्लुडो[21] अमयवल्ली[22] य ॥२३८॥
मूला[23] तह भूमिरुहा[24] विरूह[25] तह दक्कवत्थुलो[26] पदमो ।
सूयरवल्ली[27] य तहा पल्लंको[28] कोमलंबिलिया[29] ॥२३९॥

आलू तह पिंडालू[31][32] हवंति एए अणंतनामेहिं ।
अण्णमणंतं नेयं लक्खणजुत्तीइ समयाओ ॥२४०॥
घोसाडकरीरंकुरतिंदुयअइकोमलंबगाईणि ।
वंसकयइनिबगाईण अंकुराइं अणंताइं ॥२४१॥
गूढसिरसंधिपव्वं समभंगमहीरगं च छिन्नरुहं ।
साहारणं सरीरं तव्विवरीयं च पत्तेयं ॥२४२॥
चक्कं व भज्जमाणस्स जस्स गंठी हवेज्ज चुन्नघणो ।
तं पुढविसरिसभेयं अणंतजीवं वियाणाहि ॥२४३॥
गूढसिरागं पत्तं सच्छीरं जं च होइ निच्छीरं ।
जंपि य पयावसंधिं अणंतजीवं वियाणाहि ॥२४४॥

'सव्वा हु' इत्यादिगाथापञ्चकम्, हुशब्दोऽवधारणे ततः सर्वैव कन्दजातिरनन्तकायिका इति सम्बन्धः, कन्दो नाम भूमध्यगो वृक्षावयवः, ते चात्र कन्दा अशुष्का एव ग्राह्याः, शुष्काणां तु निर्जीवत्वादनन्तकायिकत्वं न सम्भवति, तानेव कांश्चित्कन्दान् व्याप्रियमाणत्वान्नामत आह—सूरणकन्दः-अर्शोघ्नः कन्दविशेषः १ वज्रकन्दोऽपि कन्दविशेष एव २ आर्द्रा-अशुष्का हरिद्रा प्रतीतैव ३ आर्द्रकं-शृङ्गवेरं ४ आर्द्रकर्चूरकः—तिक्तद्रव्यविशेषः प्रतीत एव ५ ॥२३६॥

सतावरीविरालिके वल्लीभेदौ ६-७ कुमारी-मांसलप्रणालाकारपत्रा प्रतीतैव ८, थोहरी स्नुहीतरुः ९ गडूची-वल्लीविशेषः प्रतीत एव १० लहसूनं-कन्दविशेषः ११ वंशकरिल्लानि-कोमलाभिनववंशावयवविशेषाः प्रसिद्धा एव १२ गर्जरकाणि सर्वजनविदितान्येव १३ लवणको-वनस्पतिविशेषः येन दग्धेन सर्जिका निष्पद्यते १४ लोढकः पद्मिनीकन्दः १५ ॥२३७॥

गिरिकर्णिका-वल्लीविशेषः १६ किसलयरूपाणि पत्राणि-प्रौढपत्रादर्वाक् बीजस्योच्छूनावस्थालक्षणानि सर्वाण्यप्यनन्तकायिकानि न तु कानिचिदेव १७ खरिंसुकाः-कन्दभेदाः १८ थेगोऽपि कन्दविशेष एव १९ आर्द्रा मुस्ता प्रतीता २० लवणनाम्नो वृक्षस्य छल्लिः-त्वक्, त्वगेव न त्वन्येऽवयवाः २१ खल्लूडकाः कन्दभेदाः २२ अमृतवल्ली-वल्लीविशेषः २३ ॥२३८॥

मूलको-लोकप्रतीतः २४ भूमिरुहाणि-छत्राकाराणि वर्षाकालभावीनि भूमिस्फोटकानीतिलोकप्रसिद्धानि २५ विरूढानि-अङ्कुरितानि द्विदलधान्यानि २६ ढकवास्तुलः-शाकविशेषः स च प्रथमः-प्रथमोद्गत एवानन्तकायिको भवति न पुनरिछन्नप्ररूढः २७ शूकरसञ्ज्ञितो वल्लः शूकरवल्लः स एवानन्तकायिको न तु धान्यवल्लः २८ पल्यङ्कः शाकभेदः २९ कोमलाऽऽम्लिका--अबद्धास्थिका चिञ्चिणिका ॥२३९॥

आलुक ३१ पिण्डालुकौ ३२ कन्दभेदौ, एते पूर्वोक्ताः पदार्था द्वात्रिंशत्सङ्ख्या अनन्तनामभिः-अनन्तकायिकसञ्ज्ञिता आर्यदेशप्रसिद्धा भवन्तीत्यर्थः, न चैतान्येवानन्तकायिकानि, किन्तु १, अन्यान्यपि, तथा चेह अन्यदपि पूर्वोक्तातिरिक्तमनन्तं-अनन्तकायिकं ज्ञेयं लक्षणयुक्तया-वक्ष्यमाणतद्गतलक्षणविचारणया **'समयात्'** सिद्धांतात् ॥२४०॥

तान्येव कानिचिदाह–घोसाडे'त्यादि, घोषातकीकरीरयोरङ्कुराः तथा अतिकोमलानि—अबद्धास्थिकानि तिन्दुकाम्रफलादीनि, तथा वरुणवटनिम्बादीनां तरुणमङ्कुरा अनन्तकायिकाः ॥२४१॥

अनन्तकायपरिज्ञानार्थं लक्षणयुक्तिमाह—'गूढसिरे'त्यादि, गूढानि—प्रकटवृत्त्या अज्ञायमानानि सिराः—सन्धयः पर्वाणि च यस्य पत्रकाण्डनालशाखादेस्तत्तथा, तथा यस्य भज्यमानस्य—शाखादेस्त्रोट्यमानस्य पत्रादेः समः—अदन्तुरो भङ्गः—छेदो भवति तत्समभङ्गं, तथा छिद्यमानस्यैव न विद्यन्ते हीरकाः—तन्तुलक्षणा मध्ये यस्य तदहीरकं, तथा छित्त्वा गृहादावानीतं शुष्कताद्यवस्थाप्राप्तमपि जलादिसामग्रीं प्राप्य गडूच्यादिवत् पुनरपि यत्प्ररोहति तच्छिन्नरुहं, तदेतैर्लक्षणैः साधारणं शरीरं ज्ञेयं, अनन्तकायिकमित्यर्थः । एतल्लक्षणव्यतिरिक्तं च प्रत्येकशरीरमिति ॥२४२॥

पुनरनन्तकायिकस्य लक्षणान्तरमाह–'चक्कं वे'त्यादि, चक्रमिव—अदन्तुरतया कुम्भकार-चक्राकारमेकान्तेन समं भङ्गस्थानं यस्य भज्यमानस्य मूलस्कन्धत्वक्शाखापत्रपुष्पादेः भवति तं मूलादि-कमनन्तजीवं विजानीहीति सम्बन्धः, तथा ग्रन्थिः—पर्व सामान्यतो भङ्गस्थानं वा स यस्य चूर्णघनो भवति, कोऽर्थः ?—यस्य भज्यमानस्य ग्रन्थेः शुभ्रो घनश्चूर्णो उड्डीयमानो दृश्यते स वनस्पतिरनन्त-जीवानां साधारणमेकं शरीरमित्यर्थः, कथं पुनरसौ समं भज्यत इत्यत्र दृष्टान्तमाह–पृथ्वीसदृशभेदं, अत्र पृथ्वी—केदाराद्युपरिवर्तिनी शुष्ककोप्पटिका श्लक्ष्णखटिकानिर्मितवर्तिका वा गृह्यते, यथा तस्या भज्यमा-नायाः समः—अदन्तुरो भेदो भवति एवं वनस्पतिरपि चक्राकारं समं यो भज्यत इति भावः ॥२४३॥

पुनर्लक्षणान्तरमनन्तकायिकस्याह—'गूढसिरे'त्यादि, यत्पत्रं सक्षीरं निःक्षीरं वा गूढसिराकं—

अलक्ष्यमाणसिराविशेषं भवति, यदपि च 'प्रतापसन्धि' प्रकृष्टस्तापः—उष्मा येषु एवं विधाः सन्धयो यस्य तत्प्रतापसन्धि, 'पणट्ठसंधि'त्ति पाठे तु प्रणष्टसन्धि—सर्वथाऽनुपलक्ष्यमाणपर्वार्धद्वयसन्धि यत् अनन्तजीवं तद्विजानीहीति ॥२४४॥

इदानीं वर्जनीयवस्तून्याह—

पंचुम्बरि चउविगई[10] हिम-विस-करगे[11][12] य सव्वमट्टी[13] य ।
रयणीभोयणगं[14] चिय बहुबीय-अणंत-संधाणं[15][16][17] ॥२४५॥
घोलवडा[18] दोभंगण अमुणियनामाणि[19] कुसुम-फलयाणि[20] ।
तुच्छफल[21] चलियरसं[22] चलह वज्जाणि बावीसं ॥२४६॥

'पंचुंबरी'त्यादि, पञ्चानामुदुम्बराणां समाहारः पञ्चोदुम्बरी—वट-[1]पिप्पलोदुम्बर-प्लक्ष-काकोदुम्बरीफलरूपा समयप्रसिद्धा, सा मशकाकारसूक्ष्मबहुजीवभृतत्वाद्वर्जनीया, तथा चतस्रो विकृतयो—मद्य-मांस-मधु-नवनीतरूपा वर्ज्याः, मद्य एव तत्र तद्वर्णनिकजीवसम्मूर्च्छनात्, तथा हिमं शुद्धासङ्ख्याप्कायरूपत्वात्, तथा विषं मन्त्रोपहतवीर्यमपि उदरान्तर्वर्तिगण्डोलकादिजीवविघातहेतुत्वात् मरणसमये महामोहोत्पादकत्वाच्च, तथा करका अप्यसङ्ख्याप्कायिकत्वात्, तथा सर्वापि मृत्तिका दर्दुरादिपञ्चेन्द्रिय-

१ °पिप्पल्यो° मु. । तुलना—योगशास्त्रटीका (३ ४२) ॥

प्राण्युत्पत्तिनिमित्तत्वात्, सर्वग्रहणं खटिकादितद्भेदपरिग्रहार्थम्, तद्भक्षणस्यापि आमाश्रयादिदोषजनकत्वात्, तथा रजनीभोजनं बहुविधजीवसम्पातसम्भवेन [1]ऐहलौकिक-पारलौकिकदोषदुष्टत्वात्, तथा बहुबीजं—पम्पोटकादि प्रतिबीजं जीवोपमर्दसम्भवात्, तथा अनन्तानि—अनन्तकायिकानि अनन्तजन्तुसन्ताननिर्घातननिमित्तत्वात्, तथा सन्धानम्—अस्त्यानकं बिल्वकादीनां जीवसंसक्तिहेतुत्वात् ॥२४५॥

तथा 'घोलवडे'त्यादि, घोलवटकानि उपलक्षणत्वादामगोरससम्पृक्तद्विदलानि च केवलिगम्यसूक्ष्मजीवसंसक्तिसम्भवात्, तथा वृन्ताकानि निद्राबाहुल्यमदनोद्दीपनादिदोषदुष्टत्वात्, तथा स्वयं परेण वा येषां नाम न ज्ञायते तान्यज्ञातनामानि पुष्पाणि फलानि, अज्ञानतो निषिद्धफलप्रवृत्तौ व्रतभङ्गसम्भवात् विषफले [2]तु प्रवृत्तौ जीवितविनाशात्, तथा तुच्छम्—असारं फलं—मधूकबिल्वादेः उपलक्षणत्वाच्च पुष्पमरणिशिग्रु-मधूकादेः, पत्रं प्रावृषि [3]तण्डुलीयकादेः बहुजीवसम्मिश्रत्वात्, यद्वा तुच्छफलम्-अर्धनिष्पन्नकोमलचवलक-शिम्यादिकम्, तद्भक्षणे हि तथाविधा तृप्तिरपि नोपजायते, दोषाश्च बहवः सम्भवन्ति, तथा चलितरसं—कुथितान्नम्, उपलक्षणत्वात् पुष्पितौदनादि, दिनद्वयातीतं च दधि वर्जनीयम्, जीवसंसक्त्या प्राणातिपातादिलक्षणदोषसम्भवात्, एतानि द्वाविंशतिसङ्ख्यानि वर्जनीयानि वस्तूनि कृपापरीतचेतसः सन्तो हे भव्यजना ! वर्जयत—परिहरतेति ॥२४६॥ इदानीम् **'उस्सग्गो'**त्ति **पञ्चमं द्वारमाह**—

घोडग[1] लया य[2] खम्भे[3] कुड्डे[4] माले य[5] सवरि[6] वहुनियले[7] ।

१ इह० मु० ॥ २ °पु-मु० ॥ ३ तण्डुलिकादेः-मु० ॥ तुलना—योगशास्त्रटीका (३।७२) ॥

लंबुत्तर[८] थण[९] उड्ढी[१०] संजय[११] खलिणे[१२] य वायस[१३] कविट्ठे[१४] १४ ॥२४७॥[आव.नि.१५४६]

सीसोकंपिय[१५] मूई[१६] अंगुलिभमुहा[१७] य वारुणी[१८] पेहा[१९] ।
एए काउस्सग्गे हवंति दोसा इगुणवीसं ॥२४८॥

आसोव्व[१] विसमपायं आउंटाविंतु ठाइ उस्सग्गे ।
कंपइ काउस्सग्गे लयव्व खरपवणसंगेणं[२] ॥२४९॥ ★

खंभे वा कुड्डे वा अवठंभिय कुणइ काउसग्गं तु[३] ।
माले य उत्तमंगं अवठंभिय कुणइ उस्सग्गं[४] ॥२५०॥

सबरी वसणविरहिया करेहि सागारिअं जह ठएइ ।
ठइऊण गुज्झदेसं करेहि इअ कुणइ उस्सग्गं[५] ॥२५१॥

अवणामिउत्तमंगो काउस्सग्गं जहा कुलवहुव्व[६] ।
×नियलियओ विव चरणे वित्थारिय अहव मेलविउं[७] ॥२५२॥

❀ उड्ढी-मु० ॥ ★ इमाः (२४९-२६२) गाथाः आवश्यकहारिभद्र्यां ७६८ तमपृष्ठे सन्ति । तत्र च किञ्चित् पाठभेदः दृश्यते ॥ × नियलियआ-मु० ॥

काऊण चोलपट्टं अविहीए नाहिमंडलस्सुवरिं ।
हेट्ठा य जाणुमेत्तं चिट्ठइ लंबुत्तरुस्सग्गं ॥२५३॥
पच्छाइऊण य थणे चोलगपट्टेण ठाइ उस्सग्गं ।
दंसाइरक्खणट्ठा अहवाऽणाभोगदोसेणं ॥२५४॥
मेलित्तु पण्हियाओ चलणे वित्थारिऊण बाहिरओ ।
काउस्सग्गं एसो [1]बाहिरउड्डी मुणेयव्वो ॥२५५॥
अंगुट्ठे मेलविउं वित्थारिय पण्हिआउ बाहिंति ।
काउस्सग्गं एसो भणिओ अब्भिंतरुड्डित्ति ॥२५६॥
कप्पं वा पट्टं वा पाउणिउं संजइव्व उस्सग्गं ।
ठाइ य खलिणं व जहा रयहरणं अग्गओ काउं ॥२५७॥
भामेइ तह य दिट्ठिं चलचित्तो वायसोव्व उस्सग्गे ।
छप्पइयाण भएणं कुणइ य पट्टं कविट्ठं व ॥२५८॥
सीसं पकंपमाणो जक्खाइट्ठोव्व कुणइ उस्सग्गं ।
मूउव्व हुहुयंतो तहेव लिज्जंतमाईसु ॥२५९॥

१ बाहिरउड्डी-मु० ॥

अंगुलिभमुहाओऽवि अ चालिंतो कुणइ तह य उस्सग्गं ।
आलावगगणणट्ठं[1] संठवणत्थं च जोगाणं[2] ॥२६०॥
काउस्सग्गंमि ठिओ सुरा जहा बुडबुडेइ[3] अव्वत्तं ।
अणुपेहंतो तह वानरोव्व चालेइ ओट्ठपुडे[4] ॥२६१॥
एए काउस्सग्गं कुणमाणेण विवुहेण दोसा उ ।
सम्मं परिहरियव्वा जिणपडिसिद्धत्तिकाऊणं ॥२६२॥

'घोडगे'त्यादि गाथाद्वयम्, तत्रैते कायोत्सर्गे भवन्ति दोषा एकोनविंशतिरिति सण्टङ्कः, कायस्य-शरीरस्य स्थान-मौन-ध्यान-क्रियाव्यतिरेकेणान्यत्रोच्छ्वसितादिभ्यः क्रियान्तराध्यासमाश्रित्य य उत्सर्गः-त्यागो 'नमोऽरिहंताण'मिति वचनात् पूर्वं स कायोत्सर्गः, स च द्वेधा-चेष्टायामभिभवे च, चेष्टायां-गमनागमनादौ ऐर्यापथिक्यादिप्रतिक्रमणभावी, अभिभवे च सुरादिविधीयमानोपसर्गजयार्थम्, यदुक्तम्-

" [2]सो उस्सग्गो दुविहो चेट्ठाइ अभिभवे य नायव्वो । भिक्खायरिआइ पढमो उवसग्गभिजुंजणे बीओ ॥१॥" त्ति

---

१ °गणणट्ठा-जै. सं० ॥
२ स उत्सर्गो द्विविधः चेष्टायामभिभवे च ज्ञातव्यः । भिक्षाचर्यादिषु प्रथमः उपसर्गाभियोजने द्वितीयः ॥१॥

स च दोषरहितो विधीयमानो निर्जराहेतुर्भवति, दोषाश्चैते—घोटक-लता-स्तम्भ-कुड्य-माल-शबरी-वधू-निगड—लम्बोत्तर-स्तनोद्भिका-संयती-खलीन-वायस-कपित्थ-शीर्षोत्कम्पित-मूक-अङ्गुली-भ्रूकुटि-वारुणी-प्रेक्षा इत्येकोनविंशतिः ॥२४७–२४८॥

इदानीं नामतोऽभिहितानेतान् स्वयमेव विवृणोति—'**आस**' इत्यादि, आकुञ्चितैक-पादस्य घोटकस्येव स्थानं घोटकदोषः १, कम्पते कायोत्सर्गे लतेव खरपवनसङ्गेनेति लतादोषः २ ॥२४९॥

'**खंभे**'इत्यादि, स्तम्भे वा कुड्ये वा अवष्टभ्य स्थानं स्तम्भकुड्यदोषः ३, तथा माले–उपरित-नभागे उत्तमाङ्गमवष्टभ्य करोत्युत्सर्गमिति मालदोषः ४ ॥२५०॥

'**सबरी**'त्यादि, शबरी–पुलिन्दिका वसनविरहिता कराभ्यां सागारिकं–गुह्यं यथा स्थगयति एवं स्थगयित्वा गुह्यदेशं कराभ्यां करोत्युत्सर्गमिति शबरीदोषः ५ ॥२५१॥

'**अवणे**' त्यादि, अवनामितोत्तमाङ्गः कुलवधूरिव तिष्ठन् करोत्युत्सर्गमिति वधूदोषः ६, निगड-नियन्त्रित इव चरणौ विस्तार्याथवा मीलयित्वा करोत्युत्सर्गमिति निगडदोषः ७ ॥२५२॥

'**काऊणे**'त्यादि, कृत्वा चोलपट्टमविधिना नाभिमण्डलस्योपरि अधस्ताच्च जानुमात्रं तिष्ठति कायोत्सर्गे इति लम्बोत्तरदोषः ८ ॥२५३॥

'**पच्छाई**'त्यादि, अवच्छाद्य–स्थगयित्वा स्तनौ चोलपट्टेन दंशादीनां रक्षणार्थम् अथवा अनाभोग-दोषेण अज्ञानदोषेण करोत्युत्सर्गमिति स्तनदोषः[1] ९ ॥२५४॥

१ 'धात्रीवद् बालार्थं स्तनावुन्नमय्य स्थानं वा' इत्येके, इत्यधिकं योगशास्त्रटीकायाम् (पृ० २५० B) ॥

ऊर्ध्वकादोषो द्विधा–बाह्योर्ध्वकादोषोऽभ्यन्तरोर्ध्वकादोषश्च, तत्र द्वावपि क्रमेण आह–**'मेलित्तु'** इत्यादि, मीलयित्वा पार्ष्णी चरणावग्रभागे विस्तार्य बाह्यतो–बहिर्मुखं तिष्ठत्युत्सर्गे एष बहिःशकटोर्ध्वकादोषो ज्ञातव्यः ॥२५५॥

तथा **'अंगुट्ठे'**त्यादि, अङ्गुष्ठौ द्वावपि [1]मीलयित्वा विस्तार्य पार्ष्णी तु बाह्यतस्तिष्ठत्युत्सर्गे एष भणितोऽभ्यन्तरशकटोर्ध्वकादोषः १० ॥२५६॥

'कप्पमि'त्यादि, कल्पं वा–[2]पटीं पट्टं वा–चोलपट्टं संयतीव स्कन्धदेशयोरुपरि प्रावृत्य तिष्ठत्युत्सर्गे इति संयतीदोषः ११, खलीनमिव-कविकमिव रजोहरणमग्रतः कृत्वा तिष्ठत्युत्सर्गे इति खलीनदोषः १२, वाऽत्र समुच्चये, अन्ये खलीनार्त्तवाजिवदूर्ध्वाधः शिरःकम्पनं खलीनदोषमाहुः ॥२५७॥

तथा **'भामेई'**त्यादि, दृष्टिं भ्रमयति चलचित्तो वायस इव इतस्ततो नयनगोलकभ्रमणं दिग्निरीक्षणं वा कुरुते उत्सर्गे इति वायसदोषः १३, यट्यदिकाभयेन कपित्थवद् वृत्ताकारत्वेन संवृत्य जङ्घादि मध्ये कृत्वा तिष्ठत्युत्सर्गे इति कपित्थदोषः १४, एवमेव मुष्टिं बद्ध्वा स्थानमित्यन्ये ॥२५८॥

'सीसमि'त्यादि, भूताविष्टस्येव शीर्षं कम्पयतः कायोत्सर्गकरणं शीर्षोत्कम्पितदोषः १५, [3]तथा छिद्यमानेषु केनचिद् गृहस्थादिना कायोत्सर्गव्यवस्थितप्रत्यासन्नप्रदेशवर्तिषु हरितादिषु तं निवारणार्थं मूक इव हुंहुमित्यव्यक्तं शब्दं कुर्वंस्तिष्ठत्युत्सर्गे इति मूकदोषः १६ ॥२५९॥

१ मेल° मु० ॥ २ पट्टीं मु० ॥ ३ तथा कायोत्सर्गे छि० मु० ।

'अंगुली'त्यादि, तथाऽऽलापकगणनार्थमङ्गुलीश्चालयन् तथा योगानां संस्थापनार्थं व्यापारान्तरनिरूपणार्थं भ्रुवौ चालयन् भ्रूसंज्ञां कुर्वन् चकारादेवमेव वा भ्रूनृत्तं कुर्वन्नुत्सर्गे तिष्ठति इति अङ्गुलिका-भ्रूदोषः १७ ॥२६०॥

तथा '**काउस्सग्गंमी**'त्यादि कायोत्सर्गस्थितो निष्पद्यमानसुरेव बुडबुडाशब्दम्-अव्यक्ताऽऽलापं [1]करोतीति वारुणीदोषः, वारुणीमत्तस्येव घूर्णमानस्य स्थानं वारुणीदोष इत्यन्ये १८, अनुप्रेक्षमाणो-नमस्कारादिकं चिन्तयन्नुत्सर्गस्थितो वानर इव चालयन्योष्ठपुटाविति प्रेक्षादोषः १९ इत्येकोनविंशतिः ॥२६१॥

[2]अन्ये त्वेकविंशतिं मन्यन्ते, तत्र स्तम्भकुड्यदोषेण स्तम्भदोषः कुड्यदोषश्चेति (ग्रन्थाग्रम् २०००) द्वौ विवक्षितौ, तथाऽङ्गुलिभ्रूदोषेणापि अङ्गुलिदोषो भ्रूदोषश्चेत्येवमेकविंशतिः, एके चान्यानपि कायोत्सर्गदोषानाहुः, यथा-

'निष्ठीवनं वपुःस्पर्शः, प्रपञ्चबहुला स्थितिः । सूत्रोदितविधेर्न्यूनो, वयोऽपेक्षाविवर्जनम् ॥१॥

कालापेक्षाव्यतिक्रान्तिर्व्याक्षेपासक्तचित्तता । लोभाकुलितचित्तत्वं, पापकार्योद्यमः परः ॥२॥

कृत्याकृत्यविमूढत्वम्, षड्जकाद्युपरिस्थितिः' । इति ॥ **इदानीमेतानुपसंहरन्नाह**-'एए' इत्यादि, एते-पूर्वभणिता दोषाः कायोत्सर्गं कुर्वता विबुधेन सम्यक् परिहर्तव्याः, जिनैः-तीर्थकरैः प्रतिषिद्धा-निवारिता इतिकृत्वा, जिनाज्राकरणं हि सर्वत्र श्रेयस्करमिति ॥२६२॥

१ करोतीति वारुणीमत्तस्येव-मु० ॥ २ हेमचन्द्रसूर्यादयः, योगशास्त्रटीका (पृ० २५०) द्रष्टव्या ॥

अयं च कायोत्सर्ग एतैर्ज्योतिःस्पर्शादिभिः कारणैश्चलनेऽपि न भज्यते, तथाहि—
'अगणिओ छिंदिज्ज व बोहीखोभाइ दीहडको वा । आगारेहि अभग्गो उस्सग्गो एवमाईहिं ॥१॥'

यदाऽग्नेर्विद्युतो वा ज्योतिः स्पृशति तदा प्रावरणायोपधिग्रहणेऽपि न भङ्गः, ननु नमस्कारमेवाभिधाय किमिति तद्ग्रहणं न करोति ?, उच्यते, नात्र नमस्कारेण पारणमेवाविशिष्टं कायोत्सर्गमानं क्रियते किन्तु यो यत्परिमाणः कायोत्सर्ग उक्तस्तावन्तं कालं प्रतीक्ष्य तत ऊर्ध्वं नमस्कारमभणित्वा पारयतो भङ्गः, अपरिसमाप्तौ च पठतोऽपि भङ्ग एव, तस्मात् यो यत्परिमाणः कायोत्सर्गस्तस्मिन् पूर्ण एव 'नमो अरहंताण'मिति वक्तव्यम्, तथा मार्जारमूषकादेः पुरोगमनेऽग्रतः सरतोऽपि न भङ्गः, तथा राजसम्भ्रमे चौरसंभ्रमे वाऽस्थानेऽपि नमस्कारमुच्चारयतो न भङ्गः, तथा सर्पदष्टे आत्मनि परे वा साध्वादौ सहसा उच्चारयतो न भङ्ग इति ॥

इदानीं 'चउवीससमहियसयं गिहिपडिक्कमणाइयाराण'मिति षष्ठं द्वारं विवृण्वन्नाह—

पण[५] संलेहण[५] पन्नरस कम्म[१५] नाणाइ[८] अट्ठ[८] पत्तेयं ।
बारस[१२] तव[१२] विरियतिगं[३] पण[५] समम्म[५]-चयाइं[५] पत्तेयं ॥२६३॥
इहपरलोया[१] संसप्पओग[२] मरणं[३] च जीविआसंसा[४] ।
कामे भोगे य[४] तहा मरणंते पंच अइआरा ॥२६४॥

'पणे'त्यादि, पञ्च संलेखनायाम् अतीचारा इति सर्वत्र योज्यम् , **पंचदश 'कम्म'** त्ति कर्मादानानि, ज्ञानादिषु–ज्ञान-दर्शन-चारित्रेषु अष्टौ प्रत्येकमित्यष्टकत्रयस्य मीलने चतुर्विंशतिः भवन्ति, त्रिंशतिक्षिप्तेषु जाताश्चत्वारिंशत् ४४, द्वादश तपसि–तपोविषये, लुप्तसप्तमीकमिदं द्रष्टव्यम् , चतुश्चत्वारिंशत्मध्ये द्वादशसु क्षिप्तेषु षट्पञ्चाशज्जातानि, वीर्यत्रिके–मनो-वचन-कायवीर्यलक्षणे, अत्र सप्तम्यर्थे प्रथमा, वीर्यत्रिके क्षिप्ते एकोनषष्टिः जाताः, तथा सम्यक्त्वे पञ्चातीचाराः, तथा व्रतानि–अणुव्रतादीनि द्वादश, तेषु प्रत्येकं पञ्च पञ्चातीचारा इति व्रतेषु षष्टिः, एते च सर्वे मिलिताश्चतुर्विंशत्यधिकं शतम् ॥ २६३॥

इदानीं क्रमेणैव सर्वानेतान् स्वयमेव व्याचष्टे— **'इहपरलोए'**त्यादि, आशंसनमाशंसा–अभिलाषः तस्याः प्रयोगो–व्यापारणं करणमाशंसाप्रयोगः, आशंसैव वा प्रयोगो–व्यापार आशंसाप्रयोगः, तत्र इह–अस्मिन् प्रज्ञापकमनुष्यापेक्षया मानुषत्वपर्याये यो वर्तते लोकः–प्राणिवर्गः स इहलोकः, तद्व्यतिरिक्तस्तु परलोकः, तत्रेहलोकं प्रति आशंसाप्रयोगो यथा–अनेनाऽऽराधनादिकष्टेन मृतः सन् मत्तद्विपघटोद्भटतरलतरतुरंगुरङ्गराजीविराजमानसुन्दरमन्दुराशतकान्तः काञ्चननिष्पन्नरत्नोद्दण्डमणिखण्डप्रमुखमहासमृद्धिसम्भारविनिर्जितवैश्रमणकोशः क्षितिपतिर्विशुद्धबुद्धिरमात्यो वा ज्येष्ठः श्रेष्ठी वा जन्मान्तरे अहं भवेयमित्येवं नरपत्यादिसमृद्धिप्रार्थना १, तथा परलोकाशंसाप्रयोगः–कमनीयकामिनीनयननलिननिपीयमानलसल्लावण्यपुण्यपीयूषः सुरपतिरहं स्यां देवो वा इत्यादिप्रार्थना २, तथा मरणं प्रत्याशंसाप्रयोगः तथाविधप्रान्तक्षेत्रप्रतिपन्नानशनो लोकैः क्रियमाणप्रभावनाकारिपूजाद्यभावे गाढतरोगपीडायां वा यद्यहं झटित्येव म्रिये तदा भव्यं भवेदिति प्रार्थना ३, तथा जीवितं–प्राणधारणं तदाशंसायाः–तदभिलाषस्य प्रयोगो,

यथा—बहुकालमहं जीवेयमिति, अयं हि कृतानशनः कथित् कर्पूर-श्रीचन्दन-वस्त्र-माल्य-धवलरासकादिविशिष्टपूजादर्शनाद् बहुपरिवारावलोकनाच्चिरन्तरागच्छदतुच्छजननिकरेण धन्योऽयं पुण्यवानित्यादिक्रियमाणश्लाघाश्रवणात् सङ्घादिधार्मिकजनोपबृंहणाच्चैवं मन्यते, यथा—प्रतिपन्नानशनस्यापि चिरतरं जीवितमेव मे श्रेयः, यत एवंविधा मदुद्देशेन शासनप्रभावना विभूतिश्च वर्तत इति ४, तथा कामौ—शब्द-रूपे भोगाः—गन्ध-रस-स्पर्शास्तेषामाशंसा, यद्यनेन कष्टाराधनाविधिना मम जन्मान्तरे विशिष्टाः कामभोगाः सम्पद्यन्ते तदा भव्यं भवतीत्यादिविकल्परूपाः, एते मरणान्ते पञ्चातीचाराः ५, एतैः समयविधिकृताऽप्याराधना दूष्यत इति न कर्तव्या एवंविधा आशंसाः, यत उक्तम्—

"आशंसया विनिर्मुक्तोऽनुष्ठानं सर्वमाचरेत् । मोक्षे भवे च सर्वत्र, निःस्पृहो मुनिसत्तमः ॥१॥"

'पन्नरस कम्म'त्ति व्याख्यायते, तत्राह—

भाडी[1] फोडी[2] साडी[3] वणअंगार[4]रसवकम्माइं[5] ।
वाणिज्जाणि अ विस[6]-लक्ख[7]-दंत[8]-रस[9]-केस[10]विसयाणि ॥२६५॥
दवदाण[11] जंतवाहण[12] निल्लंछण[13] असइपोस[14]सहियाणि ।
सजलासय[15]सोसाणि अ कम्माइं हवंति पन्नरस ॥२६६॥

'भाडी'त्यादि गाथाद्वयम्, तत्र भाटककर्म यत् स्वकीयगन्त्र्यादिना परकीयभाण्डं भाटकेन वहति अन्येषां वा बलीवर्द-शकटादीन् भाटकेनैवार्पयति, यदाहुः—

[1] निजकेनोपकरणेन परकीयं भाटकेन यो वहति । तत् भाटककर्म अथवा वृषभादिसमर्पणेऽन्येषाम् ॥१॥" इति ।

'फोडि'त्ति स्फोटनकर्म—वापी-कूप-तडागादिखननं यद्वा हलकुदालादिना भूमिविदारणं पाषाणादिघट्टनं वा, यवादिधान्यानां सक्त्वादिकरणेन विक्रयो वा, यदुक्तम्—

"[2] अव-चणया-गोहुम-मुग्ग-माष-करडिप्पभिइधन्नाणं । सत्तुय-दालि-कणिक्का-तंदुलकरणाइं फोडणयं ॥१॥
अहवा फोडीकम्मं सीरेणं भूमिफोडणं जं तु । उण्डत्तणयं च तहा तहा य सिलकुट्टयत्तं चे ॥२॥ ति"

'साडी'ति शकटकर्म, शकटानां तदङ्गानां च चक्रोध्यादीनां स्वयं परेण वा वृत्तिनिमित्तं निष्पादनं विक्रयो वाहनं वा, यदाहुः—

"शकटानां तदङ्गानां, घटनं खेटनं तथा । विक्रयश्चेति शकटजीविका परिकीर्तिता ॥१॥" [योगशास्त्र ३।१०४] ३ ॥

'वण'त्ति वनकर्म-यत् छिन्नानामच्छिन्नानां च तरुखण्डानां पत्राणां पुष्पाणां फलानां च विक्रयणं वृत्तिकृते तद्वनकर्म, यच्चात्र स्फोटकर्मत्वेनोक्तं मुद्गादिकणानां घरट्टादिना द्वैधीकरणं दाल्यादिरूपं गोधूमादीनां च घरट्ट-शिलापुत्रकादिना चूर्णीकरणं पिष्टकादिरूपं तदपि वनकर्मेति केचिन्मन्यन्ते, यदाहुः—

---

१ निजकेनोपकरणेन परकीयं भाटकेन यो वहति । तत् भाटककर्म अथवा वृषभादिसमर्पणेऽन्येषाम् ॥१॥

२ अव-चणक-गोधूम-मुद्ग-माष-करटिप्रभृतिधान्यानाम् । सक्तुक-दालि-कणिक्का-तन्दुलकरणानि स्फोटनकर्म ॥१॥ अथवा स्फोटनकर्म हलेन भूमिस्फोटनं यत्तु । सूडनं च तथा तथा च शैलकुट्टकत्वं च ॥२॥

"छिन्नाच्छिन्नवनपत्रप्रसूनफल[1]विक्रयः । कणानां दलनात्पेषात्, वृत्तिश्च वनजीविका ॥१॥" [यो. शा. ३।१०३] ४ ॥

'अंगार'त्ति अङ्गारकर्म—यदङ्गारकरणपूर्वकं तद्विक्रयः, एतच्चोपलक्षणम् अन्यदपि यदग्निसमारम्भपूर्वकमिष्टका-भाण्डादिपाकभ्राष्ट्रादिकरणेन जीवनं तदप्यङ्गारकर्म, यदाहुः—" [2]अङ्गारविकयं इट्टयाणं कुंभार-लोहगाराणं । सुन्नार-भाडभुंजाइयाण कम्मं तमिंगालं ॥१॥"

अतिचारता चैतेषां कृततत्प्रत्याख्यानस्य अनाभोगादिना अत्रैव प्रवृत्तेः, एवमन्यत्रापीति, एतत्स्वरूपाणि कर्माणि पञ्च, तथा वाणिज्यानि—क्रय-विक्रयस्वरूपाणि, चः समुच्चये, विष-लाक्षा-दन्त-रस-केश-विषयाणि, तत्र विषवाणिज्यम्, विषं—शृङ्गिकादि तच्चोपलक्षणमन्येषां जीवघातहेतूनामुपविषाणामस्त्रादीनां च तेषां विक्रयः, यदाहुः—

" [3]विसवाणिज्जं भन्नइ विस-लोह-प्पाणहणणविकिणणं । धणुह-सर-खग्ग-छुरिआ-परसुय-कुदालियाईणं ॥१॥"

तथा लाक्षावाणिज्यं बहुजीवजालकस्थानलाक्षादि विक्रयः, यदवाचि—

"[4]लक्खा-धायइ-गुलिया-मणसिल-हरिआल-वज्जलेवाणं । विकिणणं लक्खवणिज्जं तु यरीसकूडमाईणं ॥१॥"

---

१ विक्रयात् कण नां दलनोत्पेषात्—मु० ।

२ अङ्गारविक्रय इष्टकानां कुम्भकारलोहकाराणां । सुवर्णकारभ्राष्ट्रभुञ्जकादीनां कर्म तदङ्गारकर्म ॥१॥

३ विषवाणिज्यं भण्यते विषलोहप्राणघातकविक्रयणम् । धनुः-शर-खड्ग-क्षुरिका-पर्शू कुदालिकादीनाम् ॥१॥

४ लाक्षाधातकीगुग्गुलिकामनः-शिलहरितालवज्रलेपानाम् । विक्रयणं लाक्षावाणिज्यं तूरीकूटादीनाम् ॥१॥

तथा दन्तवाणिज्यं यत्र प्रथमत एव पुलिन्द्रादीनां हस्तिदन्त-शङ्ख पूतिश-चर्म-केशादीनामानयन-निमित्तं मूल्यं ददाति आकरे वा गत्वा स्वयं क्रीणाति, ततस्ते वनादौ गत्वा हस्त्यादीन् तदर्थं घ्नन्ति तद्विक्रयपूर्वं यदाजीवनं तद्दन्तवाणिज्यम्, यदवोचन्—

" [1]नह-दंत-चमर खल्ला-भेरि-कवड्डा य सिप्पि-संखा य। कत्थूरिय-पूइमयाइयं च इह दंतवाणिज्जं ॥१॥"

तथा रसवाणिज्यं मद्यादिविक्रयः, यदभ्यधायि—

" [2]महु-मज्ज-मंस-मक्खण चउण्ह विगईण जमिह निक्किणणं । रसवाणिज्जं तह दुद्ध-तिल्ल-घय-दहिअपमिईणं ॥१॥" ॥९॥

तथा केशवाणिज्यं यत्र दासीदासहस्त्यश्वगवोष्ट्रमहिषवालेयादिजीवान् गृहीत्वा तत्रान्यत्र वा विक्री-णीते जीविकानिमित्तं तत् केशवाणिज्यम्, यदाहुः—

"[3]मणुयाणं तिरियाणं विक्किणणं इत्थ अन्नदेसे वा। केसवणिज्जं भन्नइ गोगद्दहअस्समाईणं ॥१॥" ॥१०॥

सजीवानां विक्रये केशवाणिज्यम्, अजीवानां तु जीवाङ्गानां विक्रये दन्तवाणिज्यमिति विवेकः ॥२६४॥

तथा दवदानं यन्त्रवाहनं निर्लाञ्छनम्, असतीपोषः, एतैः सहितानि, सह जलाशयशोषेण वर्तन्ते सजलाशयशोषाणि, चः समुच्चये, कर्माणि भवन्ति पञ्चदश, तत्र 'दवदानं' दवस्य—दवाग्नेस्तृणादिदहननि-

---

१ नख-दन्त-चामर-खल्ला-भेरी-कपर्दकाः शुक्तिशङ्खाश्च। कस्तूरिका-पूतिशादिकं चेह दन्तवाणिज्यम् ॥१॥

२ मधु-मद्य-मांस-अक्षणानां चतसृणां विकृतीनां यदिह विक्रयणम्। रसवाणिज्यं तथा दुग्ध-तैल-घृत-दधिप्रभृतीनाम् १॥

३ मनुजानां तिरश्चां विक्रयणमत्रान्यदेशे वा। केशवाणिज्यं मण्यते गो-गर्दभाश्वादीनाम् ॥१॥

मित्तं दानं–वितरणं दवदानम् , तच्च द्विधा भवति–व्यसनात्–फलनिरपेक्षप्रवृत्तिरूपात् , यथा वनेचरा एवमेव तृणादावग्निं ज्वालयन्ति पुण्यबुद्ध्या वा–यथा मदीयमरणसमये इयन्तो मम श्रेयोऽर्थं धर्मदीपोत्सवाः करणीया इति, अथवा जीर्णतृणदाहे सति नवतृणाङ्कुरोद्भेदाद्भावश्चरन्तीति, क्षेत्रे वा शस्यसम्पत्तिनिमित्तमग्निं ज्वालयन्तीति, यदुक्तम्–" [1]वणदवदाणमरण्णे दव्वग्गिदाणं तु जीववहजणयं।" ॥११॥

'यन्त्रवाहन'मिति तिलेक्षु-सर्षपैरण्डफलादिपीलननिमित्तं तत्तद्यन्त्राणां-घाणकादीनाम् अरघट्टादिजलयन्त्राणां च वाहनं-व्यापारणं शिलोदूखलमुशलादीनां विक्रयणं वा यन्त्रवाहनम् यन्त्रपीलनकर्मेत्यर्थः, उक्तं च–"[2]सिल-उक्खल-मुसल-घरट्ट-कंकयाईण जमिह विक्किणणं। उच्छुत्तिलपीलणं वा तं बिंती जंतपीलणयं ॥१॥"

एतच्च पीलनीयतिलादिक्षोदात्तद्गतजीववधाच्च सदोषम् , यतो लौकिका अपि भाषन्ते–"दशसूनासमश्चक्री, दशचक्रिसमो ध्वजः। दशध्वजसमा वेश्या, दशवेश्यासमो नृपः ॥१॥" १२ इति।

'निर्लाञ्छन'मिति निरां लाञ्छनम्–अङ्गावयवच्छेदस्तेन कर्म–जीविका निर्लाञ्छनकर्म, तत्र गो-महिषोष्ट्रादीनां नासावेधो गवाश्वादीनामङ्कनं तेषामेव वर्धितकीकरणं करभाणां पृष्ठगालनं गवां च कर्णकम्बलच्छेदनादिकमिति, यदाहुः–"नासावेधोऽङ्कनं मुष्कच्छेदनं पृष्ठगालनम्। कर्णकम्बलविच्छेदो, निर्लाञ्छनमुदीरितम् ॥१।" [योगशास्त्र ३।११२] १३ इति ॥

---

१ अरण्ये वनदवदानं दवाग्निदानं जीववधजनकम् ॥१॥

२ शिलोदूखलमुशलघरट्टकंकटादीनां यदिह विक्रयणम् । इक्षुतिलपीडनं वा तत् ब्रुवते यन्त्रपीडनकर्म ॥१॥

३ सूनेति 'चूलो-घण्टी' त्यादीनि हिंसास्थानानि, चक्रीति भाषायां तेली, ध्वज इति भाषायां कलालः दशसूना समश्चक्रं०-सं० यो० टी. (३।१११) ॥

'असतीपोष' इति असत्यो–दुःशीलास्तासां दासी-सारिकादीनां पोषणं पोषोऽसतीपोषः, तत्र लिङ्ग–मतन्त्रं तेन शुक-श्वादीनामपि पुंसां पोषणमसतीपोषः, यदवाचि—"*मज्जार-मोर मक्कड कुक्कुड साल-हीअकुक्कुराईणं। दुट्ठित्थिनपुंसाईण पोसणं असइपोसणयं ॥१॥"इति एषां च पोषणं पापहेतुरेवेति १४ ॥

तथा 'जलाशयशोषो' जलाशयानां–सरःप्रभृतीनां शोषणमिति, तदुक्तम्–

"★सरदहतलायसोसो बहुजलथरजीवखयगारी" १५ ॥ एतानि च पञ्चदशापि कर्मादानानि प्रतिषिद्ध-षड्विधजीववधादिमहासावद्यहेतुत्वाद्वर्जनीयानि, उपलक्षणं चैतद्बहुसावद्यानां कर्मणामेवञ्जातियानां न पुनः परिगणनमिदमिति ॥२६६॥ 'नाणाइअट्ठ'त्ति ज्ञान-दर्शन चारित्राणां प्रत्येकमष्टावतीचारा–मालिन्य-लक्षणाः, ते च प्रतिपक्षे आचारलक्षणे ज्ञाते सति सुज्ञाना भवन्ति इत्यतस्तावद् ज्ञानाचारान् आह–

६ गृह्यति-चारद्वारे २४ अति-चाराः ज्ञानादी-नाम् २६७-२६९ प्र.आ.६३

काले विणए बहुमाणोवहाणे तहा अनिण्हवणे ।
वंजण अत्थ तदुभए अट्ठविहो नाणमायारो ॥२६७॥
निस्संकिय निक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य ।
उववूह-थिरीकरणे वच्छल्ल-पभावणे अट्ठ ॥२६८॥
पणिहाणजोगजुत्तो पंचहिं समिईहिं तीहिं गुत्तीहिं ।
चरणायारो विवरीययाई तिण्हंपि अइयारा ॥२६९॥

॥१६८॥

*मार्जारमयूरमर्कटकुर्कुटशुककुर्कुरादीनाम्। दुष्टस्त्रीनपुंसकादीनां पोषणमसतीपोषणम् ॥१॥★ सरो-ह्रद-तटाक-शोषो बहुजलचरजीवक्षयकारी।

❀ 'काले'इत्यादि, काले–कालविषये ज्ञानाचारो भवतीति सर्वत्र सम्बन्धः, तत्र यो यस्याङ्गप्रविष्टादेः श्रुतस्य काल उक्तस्तस्य तस्मिन्नेव स्वाध्यायः कार्यो नान्यदा प्रत्यवायसम्भवात्, दृश्यते च लोकेऽपि कृष्यादेः कालकरणे फलं विपर्यये तु विपर्यय इति, यत उक्तम्–

"★ कालंमि कीरमाणं किसिकम्मं बहुफलं जहा होइ। इय सव्वावि किरिया नियनियकालंमि विन्नेया ॥१॥" इति।

तथा 'विणए'त्ति विनये–विनयविषये, ज्ञानस्य ज्ञानिनां ज्ञानसाधनानां च पुस्तकादीनामुपचाररूपः, यतो विनयेन–आसनदानाऽऽदेशकरणादिना पठनीयं न पुनरविनयेन–आसनदानाद्यकरणेन २ । तथा 'बहुमाणे'त्ति बहुमानः–प्रीतिस्तद्विषये, यतो बहुमानेनैव-आन्तरचित्तप्रमोदलक्षणेन पठनादि विधेयं न पुनर्बहुमानाभावेनेति ३ । तथा 'उवहाणे'त्ति, उप–समीपे + धीयते–धियते सूत्रादिकं येन तपसा तदुपधानं तपोविशेषः तद्विषये, यतो यद्यस्य सूत्रस्य अध्ययनोद्देशकादेस्तप उक्तं तत्तपः कृत्वैव तस्य पाठादि विधेयं नान्यथेति ४ । तथा '[तहा]अनिण्हवणे'त्ति, तथाशब्दः समुच्चये, निह्नवनमपलपनं न निह्नवनमनिह्नवनं तद्विषये, यतोऽनिह्नवेनैव पाठादि सूत्रादेर्विधेयं न पुनर्मानादिवशतः आत्मनो लाघवाद्याशङ्कया श्रुतगुरूणां श्रुतस्य वाऽपलापेनेति ५ । तथा 'वंजण-अत्थ-तदुभये' इति व्यञ्जनानि–ककारादीनि, अर्थः–अभिधेयम्, तदुभयं च–व्यञ्जनार्थयोरुभयम्, ततः समाहारद्वन्द्वः, × तद्विषये, कोऽर्थः ?–व्यञ्जनविषयेऽर्थविषये तदुभय-

---

❀ 'काले'त्यादि-मु.॥

★ काले क्रियमाणं कृषिकर्म बहुफलं यथा भवति । एवं सर्वाऽपि च क्रिया निजनिजकाले विज्ञेया ॥१॥

+ विधीयते-क्रियते-जे. ॥ × तद्विषये-मु० नास्ति ॥

विषये च ज्ञानाचारत्रयं भवति, एतत्त्रयानन्यथाकरणेन सम्यगुपयोगेन च यतः सूत्रादि पठनीयं नान्यथा ६-७-८, अत्र व्यञ्जनग्रहणमुपलक्षणं स्वरा अपि द्रष्टव्याः । एवमष्टविधः—अष्टप्रकारो ज्ञानस्य—श्रुतज्ञानस्याचारो—ज्ञानाराधनतत्पराणां व्यवहार इति ॥२६७॥

अथ दर्शनाचारभेदानाह—'निस्संकिये'त्यादि, शङ्कितं शङ्का—सन्देहस्तस्याभावो निःशङ्कितं दर्शनस्य—सम्यक्त्वस्याचारः १ । इत्येवमन्यत्रापि, तथा काङ्क्षितं काङ्क्षा—अन्यान्यदर्शनग्रहः तदभावो निष्काङ्क्षितम् २ । तथा विचिकित्सा- मतिविभ्रम- युक्तस्यागमोपस्कोऽस्यर्थे फलं प्रति तस्कोहः, तदभावो निर्विचिकित्सम् , यद्वा विद्वज्जुगुप्सा-मलमलिना एते इत्यादिसाधुजुगुप्सा तदभावो निर्विद्वज्जुगुप्सम् , तत एतेषां द्वन्द्वः, पुँल्लिङ्गनिर्देशश्च प्राकृतत्वात् ३ । तथा अमूढा-तपो-विद्यातिशयादिकुतीर्थिकर्द्धिदर्शनेऽप्यमोहा—स्वभावादविचलिता सा च सा दृष्टिश्च—सम्यग्दर्शनम् अमूढदृष्टिः, अथवा निर्गताः शङ्कितादिभ्यो ये ते निःशङ्कित-निष्काङ्क्षित-निर्विचिकित्सा जीवाः, अमूढा दृष्टिरस्येत्येवममूढदृष्टिश्च जीव एव, तत एते धर्म-धर्मिणोरभेदोपचारादर्शनाचारभेदा भवन्तीति ४ । तथा उपबृंहणं उपबृंहा—समानधार्मिकाणां क्षपणावैयावृत्त्यादिसद्गुणप्रशंसनेन तत्तद्गुणवृद्धिकरणम् ५ । तथा स्थिरीकरणं तु धर्माद्विषीदतां तत्रैव चाटुवचनचातुर्यादवस्थापनम् , उपबृंहा च स्थिरीकरणं च उपबृंहा-स्थिरीकरणे ६ । तथा वात्सल्यं च प्रभावना च वात्सल्य-प्रभावने, तत्र वात्सल्यं—समानदेव-गुरु-धर्माणां भोजन-निवसन-दानोपकारादिभिः सम्माननम् ७ । प्रभावना—धर्मकथा-प्रतिवादिनिर्जय-दुष्करतपश्चरण-करणादिभिर्जिनप्रवचनप्रकाशनम् , यद्यपि च

प्रवचनं शाश्वतत्वात् तीर्थकरभाषितत्वाद्वा गुरासुरनमस्कृतत्वाद्वा स्वयमेव दीप्यते तथापि दर्शनशुद्धिमात्मनोऽभीप्सुर्यो येन गुणेनाधिकः स तेन तत्प्रवचनं प्रभावयति, यथा भगवदार्यवज्रस्वामिप्रभृतिक इति ८ ॥२६८॥ एतेऽष्टौ दर्शनाचाराः ।

साम्प्रतं चारित्राचारानाह--'पणिहाणजोगे'त्यादि, प्रणिधानं-चेतःस्वास्थ्यं तत्प्रधाना योगा—व्यापाराः प्रणिधानयोगाः तैर्युक्तः—समन्वितो यः साधुः पञ्चभिः समितिभिस्तिसृभिर्गुप्तिभिः कृत्वा, अथवा 'सुपां सुपो भवन्ती'ति वचनात् सप्तम्यर्थे तृतीया, ततः पञ्चसु समितिषु तिसृषु गुप्तिषु विषये-एता आश्रित्य प्रणिधानयोगयुक्तो यः स एष चरणाचारः, आचाराचारवतोः कथञ्चिदभेदादिति, ज्ञेय इति शेषः, एतेषां त्रयाणामपि ज्ञानाचारादिनां विपर्यस्ततायाम्-अकालाविनयादौ शङ्कितत्वादौ अप्रणिधानरूपायां च सत्यामतीचाराः—चित्तमालिन्यलक्षणा इति ॥२६९॥

६ गृह्यति-चारद्वारे १२ तपसां व्याख्या गाथा-२७०-२७२ प्र. आ.६४

'बारस तव'सि व्याख्यातुमाह—

अणसणमूणोअरिआ वित्तीसंखेवणं रसच्चाओ ।
कायकिलेसो संलीणया य बज्झो तवो होइ ॥२७०॥
पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।
झाणं उस्सग्गोऽवि य अब्भितरओ तवो होइ॥२७१॥[दशवै. निर्युक्ति ४७-४८]

॥१७१॥

सरूमाइकरणे बारस तवाइयारा तिगं तु चिरिअस्स ।
मणवयकाया पावपउत्ता चिरियतिगअइयारा ॥२७२॥

'अणसणे'त्यादि गाथाद्वयम्, तत्र अश्यत इति अशनं [1]न अशनम् अनशनमाहारत्याग इत्यर्थः, तत्पुनर्द्विधा—इत्वरं यावत्कथिकं च, तत्रेत्वरं—परिमितकालम्, तत्पुनः श्रीमहावीरतीर्थे नमस्कारसहितादि षण्मासान्तम्, श्रीनाभेयतीर्थे संवत्सरपर्यन्तम्, मध्यमतीर्थंकरतीर्थे [2]त्वष्टमासान् यावत्, यावत्कथिकं पुनराजन्मभावि, तत्पुनश्चेष्टाभेदोपाधिविशेषतस्त्रिधा, यथा पादपोपगमनम्, इङ्गितमरणम्, भक्तपरिज्ञा चेति, एतेषां त्रयाणामपि स्वरूपं सप्तपञ्चाशदधिकशततमद्वारादवसेयमिति ॥१॥

'ऊणोअरिय' त्ति ऊनमुदरम् ऊनोदरं तस्य करणं भावे वुञि ऊनोदरिका, व्युत्पत्तिरेवेयम्, अस्य प्रवृत्तिस्तूननामात्रे, सा द्विधा—द्रव्यतो भावतश्च, द्रव्यत उपकरण-भक्त-पानविषया, तत्र उपकरणविषयोनोदरिका जिनकल्पिकादीनां तदभ्यासपरायणानां वाऽवबोद्धव्या, न पुनरन्येषाम्, तेषामुपध्यभावे समग्रसंयमपालनाऽभावात्, अथवाऽन्येषामप्यतिरिक्तोपकरणाग्रहणतो भवत्येवोनोदरता, यत उक्तम्—

" [3]जं वट्टइ उवगारे उवगरणं तं च होइ उवगरणं । अइरित्तं अहिगरणं अजओ अजयं परिहरंतो ॥१॥" इति, 'परिहरंतो'त्ति आसेवमानः 'परिहारो परिभोगो' इति वचनात्, ततोऽयतश्च यत्परिभुञ्जानो भवतीत्यर्थः, भक्तपानोनोदरिका पुनरात्मीयाहारमानपरित्यागतो विज्ञेया, आहारमानं च—

१ तुलना-दशवै. हा. टी. (पृ. २६ त:) । अगस्त्यसिंहरचिता चूर्णिः (पृ-१२ त:) ॥ २ ० ष्वष्टौ मासान्-सं० ॥
३ यद्वर्त्तते उपकारे उपकरणं तदेव भवत्युपकरणम् । अतिरिक्तमधिकरणं अयतोऽयतं भुञ्जन् ॥१॥

"[1]बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ । पुरिसस्स महिलियाए अट्ठावीसं भवे कवला ॥१॥ [2]कवलस्स य परिमाणं कुक्कुडिअंडगपमाणमित्तं तु । जं वा अविगियवयणो वयणम्मि छुभिज्ज वीसंतो ॥२॥" इत्यादि ।

सा च अल्पाहारादिभेदतः पञ्चविधा भवति, यदाहुः—

"अप्पाहार १ अवड्ढा २ दुभाग ३ पत्ता ४ तहेव किंचूणा ५ ।
अट्ठ दुवालस सोलस चउवीस तहेकतीसा य ॥ १ ॥"

अयमत्र भावार्थः--अल्पाहारोनोदरिका नाम एककवलादारभ्य यावदष्टौ कवला इति, अत्र चैककवलमाना जघन्या अष्टकवलमाना पुनरुत्कृष्टा द्व्यादिकवलमानभेदा मध्यमा १ । एवं नवभ्यः कवलेभ्य आरभ्य यावद् द्वादश कवलास्तावदपार्धोनोदरिका, अत्रापि नवकवला जघन्या द्वादशकवलोत्कृष्टा शेषा तु मध्यमा २ । एवं त्रयोदशभ्य आरभ्य यावत् षोडश कवलाः तावद्विभागोनोदरिका, जघन्यादिभेदत्रयभावना पूर्ववत् ३ । एवं सप्तदशभ्य आरभ्य यावत् चतुर्विंशतिः कवलास्तावत् प्राप्तोनोदरिका, *जघन्यादित्रयभावना अत्रापि पूर्ववत् *४ । एवं पञ्चविंशतेरारभ्य यावदेकत्रिंशत्कवलास्तावत् किञ्चिदूनोदरिका,

---

१ द्वात्रिंशत् किल कवला आहारः कुक्षिपूरको मणितः । पुरुषस्य महीलाया अष्टाविंशतिः कवला भवेयुः ॥१॥
२ कवलस्य च प्रमाणं कुक्कुट्यण्डकप्रमाणमात्रमेव । यद्वा अविकृतवदनो वदने क्षिपेद्विश्वस्तः॥२॥]
* * चिह्नद्वयमध्यवर्ती पाठो जे. सं. नास्ति ॥

जघन्यादिभेदत्रयं पूर्ववद्भावनीयम् ५। एवमनेनानुसारेण पानेऽपि भणनीया, तथा स्त्रीणामप्येवं पुरुषानुसारेण द्रष्टव्या, भावत ऊनोदरिका क्रोधादिपरित्यागः, यत उक्तम्—

[1]"कोहाईणमणुदिणं चाओ जिणवयणभावणाओ य। भावेणोणोदरिआ पन्नत्ता वीयरागेहिं ॥१॥" ॥२॥

'वित्तीसंखेवणं'ति वर्तते अनयेति वृत्तिः—भैक्ष्यं तस्याः सङ्क्षेपणं—सङ्कोचः तच्च गोचराभिग्रहरूपम्, ते च गोचरविषया अभिग्रहा अनेकरूपाः, तद्यथा—द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतो मया अद्य भिक्षायां गतेन लेपकार्यायैव कुन्ताग्रादिसंस्थितमण्डकादि वा ग्राह्यमित्यादयः, क्षेत्रत एक-द्वित्र्यादिगृह-स्वग्राम-परग्राम-पेटार्धपेटादिलब्धं दायकेन देहली-जङ्घयोरन्तर्विधाय वा दत्तं गृहीष्यामीत्यादयः, कालतः पूर्वाह्णादौ सकलभिक्षाचरनिवर्त्तनावसरे वा पर्यटितव्यमित्यादयः, भावतो हसन-गान-रोदनादिक्रियाप्रवृत्तो बद्धो वा यदि प्रतिलाभयिष्यति ततोऽहमादास्ये न त्वन्यथेत्येवमादयः, उक्तं च—

[2]"लेवडमलेवडं वा अमुगं दव्वं च अज्ज घेच्छामि। अमुगेण व दव्वेणं अह दव्वाभिग्गहो नाम ॥१॥ [पञ्चवस्तु २९८]। 'अमुगेणं'ति चट्टुक-करोटिकादिना, ।

" [3]अट्ठ उ गोयरभूमी एलुयविक्खंभमित्तगहणं च।
[4]सग्गामे परग्गामे एवइअ घरा उ खेत्तंमि ॥२॥ [पञ्चवस्तु २९९]

१ क्रोधादीनामनुदिनं त्यागो जिनवचनभावनाश्च। भावेनोनोदरिका प्रज्ञप्ता वीतरागैः ॥१॥
२ लेपकृदलेपकृद्वाऽमुकं वा द्रव्यमद्य ग्रहीष्यामि। अमुकेन वा द्रव्येणैष द्रव्याभिग्रहो नाम ॥१॥
३ अष्टैव गोचरभूमयः एलुकविष्कम्भमात्रग्रहणं च। स्वग्रामे परग्रामे इयन्ति गृहाणि तु क्षेत्रे ॥२॥
४ सग्गामपरग्गामी—मु०। सग्गाम-परग्गामे—दशवै० हा० टी. (पृ. २८ A)। (२९९) पञ्चवस्तु॥

[1]उज्जुग १ गंतु[2] पच्चागई य २ गोमुत्तिआ ३ पयंगविही ४ ।
पेडा य ५ अद्धपेडा ६ अब्भिंतर ७ बाहिसंबुक्का ॥३॥
[3]काले अभिग्गहो पुण आई मज्झे तहेव अवसाणे। अप्पत्ते सइ काले आई बिति मज्झि तइयंते ॥४॥"
[पञ्चवस्तु ३००-३०१]

प्रतीतभिक्षावेलाया आदौ मध्येऽवसाने च कालविषयोऽभिग्रहः, [3]तथा चाह-"अप्राप्ते सति भिक्षाकाले अटत आदिः-प्रथमः, मध्ये-भिक्षाकाल एवाटतो द्वितीयः, अन्ते-भिक्षाकालावसानेऽटतस्तृतीयोऽभिग्रहः"

" [4]दित्तगपहिच्छगाणं हवेज्ज सुहुमंपि मा हु अचियत्तं। इइ अप्पत्ते अइए पवत्तणं मा [5]अओ मज्झे ॥१॥
उक्खित्तमाइचरगा भावजुया खलु अभिग्गहा हुंति। गायंतो व रुयन्तो जं देइ निसन्नमाइ वा ॥२॥"
[पञ्चवस्तु ३०२-३]

'उक्खित्तमाइचरग'त्ति उत्क्षिप्तादिचराः, उत्क्षिप्ते भाजनात् पिण्डे चरति-गच्छति यः स उत्क्षिप्तचरः, एवं निक्षिप्ते भाजनादाविति भावनीयम् ,

---

१ ऋजु गत्वाप्रत्यागतिश्च गोमूत्रिका पतङ्गवीथिः। पेटा अर्धपेटा अभ्यन्तरशम्बूका बाह्यशम्बूका ॥३॥
२ कालेऽभिग्रहः पुनरादौ मध्ये तथैवावसाने। अप्राप्ते सतिकाले आद्यः, द्वितीयो मध्ये, तृतीयोऽन्त्ये ॥४॥
३ तथा च अप्राप्ते-सं० ॥ तु० पञ्चवस्तुटीका (३०१) ॥
४ ददस्प्रतीच्छकयोः सूक्ष्मोऽप्यप्रीतिर्मा भूदिति अप्राप्तेऽतीते वा प्रवर्त्तनं पुरः-पश्चात्कर्मादि मा भूदतो मध्ये ॥१॥ उत्क्षिप्तादिचरकाः भावयुक्ताः खल्वभिग्रहा भवन्ति गायन् वा रुदन् वा यद्ददाति निषण्णादिर्वा ॥२॥
५ अ मज्झंमि-मु०। इतो मज्झे पंचव० ॥

" [1]ओसक्कण अहिसक्कण परंमुहालंकिएतरो वावि । [2]भावन्नतरेण य जुओ अह भावाभिग्गहो नाम ॥१॥" [पञ्चवस्तु ३०४] ॥३॥

'रसच्चाओ'त्ति, रसानां-मतुब्लोपाद्विशिष्टरसवतां विकारहेतूनां दुग्धादीनां त्यागो-वर्जनं रसत्यागः॥४॥

'कायकिलेसो' त्ति कायस्य-शरीरस्य क्लेशः-शास्त्राविरोधेन बाधनं कायक्लेशः, स च वीरासनाद्यासनकरणेन अप्रतिकर्मशरीरत्व-केशोल्लुञ्चनादिना च विचित्रः, यदवाचि—

" [3]वीरासणउक्कुडुगासणाइं लोयाइओ य विन्नेओ । कायकिलेसो संसारवासनिव्वेयहेउत्ति ॥१॥

[4]वीरासणाइसु गुणा कायनिरोहो दया य जीवेसु । परलोगमई य तहा बहुमाणो चेव अन्नेसिं ॥२॥

[5]निस्संगया अपच्छा-पुरकम्मविवज्जणं च लोयगुणा । दुक्खसहत्तं नरगाइभावणाए य निव्वेओ ॥३॥" ॥५॥

'संलीयणा य' त्ति, संलीनता-गुप्तता, सा चेन्द्रिय-कषाय-योगविषया विविक्तशयनासनता चेति चतुर्धा, यदुक्तम्—

---

१ अवष्वष्कणमभिष्वष्कणं पराङ्मुखोऽलङ्कृत इतरो वापि । भावान्यतरेण वा युक्त एष भावाभिग्रहो नाम ॥१॥

२ भावंतरेण मु० । भावण्णयरेण-पञ्चवस्तु ॥

३ विरासनोत्कटुकासनादि लोचादिकश्च विज्ञेयः । कायक्लेशः संसारवासनिर्वेदहेतुरिति ॥१॥

४ वीरासनादिषु गुणाः कायनिरोधो दया च जीवेषु । परलोकमतिश्च तथा बहुमानश्चैवान्येषाम् ॥२॥

५ निःसङ्गता च पश्चात्पुरः कर्मविवर्जनं च लोचगुणाः । दुःखसहत्वं नारकभावनया च निर्वेदः ॥३॥

" [1]इंदिय-कसाय-जोए पडुच्च संलीणया मुणेयव्वा । तह य विवित्ता चरिया पन्नत्ता [2]वीयराएहिं ॥१॥"
तत्र श्रवणेन्द्रियेण शब्देषु मधुरादिभेदेषु रागद्वेषाऽकरणं श्रवणेन्द्रियसंलीनता, यदाहुः-

" [3]सद्देसु य भद्दयपावएसु सोयविसयमुवगएसु । तुट्ठेण व रुट्ठेण व समणेण सया न होयव्वं ॥१॥"
[ज्ञाता धर्म० १७।१६]
एवं चक्षुरादीन्द्रियेष्वपि भावनीयम् , यथा—

" [4]रूवेसु य भद्दयपावएसु चक्खुविसयमुवगएसु तुट्ठेण व रुट्ठेण व समणेण सया न होयव्वं ॥१॥"
इत्याद्यभिलापेनेति, कषायसंलीनता च कषायाणामनुदीर्णानामुदयनिरोधेन उदीर्णानां च निष्फलीकरणेन विज्ञेया, यदभ्यधायि-

"[5]"उदयस्सेव [6]निरोहो उदयप्पत्ताण वाऽफलीकरणं । जं इत्थ कसायाणं कसायसंलीणया एसा ॥१॥"
योगसंलीनता पुनर्मनो-वाक्कायलक्षणयोगानामकुशलानां निरोधः कुशलानामुदीरणं च; यदवोचन्-

---

१ इन्द्रिय-कषाय योगान् प्रतीत्य संलीनता ज्ञातव्या । तथा विविक्ता चर्या प्रज्ञप्ता वीतरागैः ॥१॥
२ वीयरागेहिं-सं०, दशवै० हा० टी० (पृ० २९ A) ॥
३ शब्देषु च भद्रकपापकेषु श्रोत्रविषयमुपगतेषु । श्रमणेन सदा तुष्टेन रुष्टेन वा न भवितव्यम् ॥१॥
४ रूपेषु च भद्रकपापकेषु चक्षुर्विषय० ॥
५ उदयस्यैव निरोधः प्राप्तोदयानां वाऽफलीकरणम् । यदत्र कषायाणां कषायसंलीनतैषा ॥१॥
६ निसेहो-मु० ॥

[1]"अप्रशस्तानां निरोधो योगानामुदीरणं च कुसलानां। कार्ये च विधिगमनं योगे संलीणया भणिया ॥१॥" विविक्तशयनासनतारूपा पुनः संलीनता आरामादिषु स्त्री-पशु-पण्डकादिरहितेषु यदवस्थानम्, यदाहुर्महर्षयः— [2]"आरामुज्जाणाइसु थी-पसु-पंडगविवज्जिए ठाणं। फलगाईण य गहणं तह भणियं एसणिज्जाणं ॥१॥"॥६॥

चः समुच्चये, 'बज्झो तवो होइ'त्ति एतदनशनादिकं बाह्यं तपो भवति, बाह्यत्वं चास्य बाह्य-द्रव्याद्यपेक्षत्वात्, प्रायो बहिः शरीरस्य तापकत्वात् लौकिकैरपि तपस्तया ज्ञायमानत्वात् कुतीर्थिकैरपि स्वाभिप्रायेणासेव्यमानत्वाच्चेति ॥२७०॥

'पायच्छित्त' मित्यादि, इह चित्तं—जीवो भण्यते, ततः [3]प्रायो--बाहुल्येन चित्तं--जीवं विशोध-यति–मूलोत्तरगुणविषयातिचारजनितकर्ममलमलिनं निर्मलं करोतीति प्रायश्चित्तम्, तत् पुनरालोचनादिकं दशधा, यदाहुः—

[4]"आलोयण–पडिक्कमणे मीस–विवेगे तहा विउस्सग्गे। तव छेय-मूल-अणवट्ठया य पारंचिए चेव" ॥१॥ इति ७ ॥

---

१ अप्रशस्तानां योगानां निरोधः कुशलानां चोदीरणम्। कार्ये च विधिगमनं योगे संलीनता भणिता।
२ आरामोद्यानादिषु स्त्री-पशु-पण्डकविवर्जिते स्थानम्। तथा एषणीयानां फलकादीनां ग्रहणं भणितम् ॥१॥
३ तुलना–दशवै० हा० टी० (पृ० ३०A तः) ॥
४ आलोचना प्रतिक्रमणं मिश्रं विवेकस्तथोत्सर्गः। तपश्छेदो मूलमनवस्थाप्यं पाराञ्चिकं चैव ॥१॥

एतत्स्वरूपं चाष्टानवतितमद्वारे न्यक्षेण वक्ष्यते ।

'विणए' त्ति विनीयते–क्षिप्यते अष्टप्रकारं कर्मानेनेति विनयः, स च ज्ञान-दर्शनादिभेदात् सप्तधा, यदाहुः–

" [1]नाणे दंसण-चरणे मण-वय-काओवयारिओ विणओ । नाणे पंचपयारो मइनाणाईण सद्दहणं ॥१॥ [2]भत्ती तह बहुमाणो तदिट्ठत्थाण सम्ममावणया । विहिगहणब्भासोऽवि य एसो विणओ जिणाभिहिओ ॥२॥"

शुश्रूषणादिकश्च दर्शनविनयः, यदाहुः–

"★ सुस्सूसणा अणासायणा य विणओ उ दंसणे दुविहो । दंसणगुणाहिएसुं किज्जइ सुस्सूसणाविणओ ॥१॥ सक्कारब्भुट्ठाणं संमाणासणअभिग्गहो तह य । आसणअणुप्पयाणं किइकम्मं अंजलिग्गहो य ॥२॥ इंतस्सऽणुगच्छणया ठिअस्स तह पज्जुवासणा भणिया । गच्छंताणुव्वयणं एसो सुस्सूसणाविणओ ॥३॥"

६ गुरुप्रति-चारद्वारे १२ तपसां व्याख्या गाथा २७०-२७२ प्र.आ.६७

---

१ ज्ञाने दर्शने चारित्रे मनसि वाचि काये औपचारिको विनयः । ज्ञाने पञ्चप्रकारो मतिज्ञानादीनां श्रद्धानम् ॥१॥

२ भक्तिस्तथा बहुमानः तदृष्टार्थानां सम्यक्त्वभावना । विधिग्रहणमभ्यासोऽपि चैष विनयो जिनाभिहितः ॥२॥

★ शुश्रूषणा अनाशातना च विनयस्तु दर्शने द्विविधः । दर्शनगुणाधिकेषु क्रियते शुश्रूषणाविनयः ॥१॥ सत्कारोऽभ्युत्थानं सम्मानमासनाभिग्रहश्च तथा । आसनानुप्रदानं कृतिकर्माञ्जलिग्रहश्च ॥२॥ आयातोऽनुगमनं स्थितस्य तथा पर्युपासनं भणितम् । व्रजतोऽनुव्रजनमेष शुश्रूषणाविनयः ॥३॥

[1]सत्कारः-स्तवन-वन्दनादि, अभ्युत्थानं–विनयार्हस्य दर्शनादेवासनत्यजनम्, सन्मानो-वस्त्र-पात्रादिभिः पूजनम्, आसनाभिग्रहः पुनस्तिष्ठत एव गुरोरादरेणासनानयनपूर्वकमत्रोपविशतेति भणनम्, आसनानुप्रदानं—स्थानात्स्थानान्तरे आसनस्य सञ्चारणम्, कृतिकर्म—वन्दनकम्, अञ्जलिग्रहः-अञ्जलि-करणम्, शेषं प्रकटम्, अनाशातनाविनयः पुनः पञ्चदशविधः, तस्य चेदं स्वरूपम्-

" [2]तित्थयर-धम्म-आयरिअ-वायगे थेर-कुल-गणे संघे । संभोइअ-किरियाए मइनाणाईण य तहेव" ॥१॥

साम्भोगिकाः--एकसामाचारिकाः । क्रिया--आस्तिकता ।

" [3]कायव्वा पुण भत्ती बहुमाणो तह य वन्नवाओ य । अरहंतमाइयाणं केवलनाणावसाणाणं" ॥१॥

भक्तिः--बाह्या प्रतिपत्तिः, बहुमानः–आन्तरः प्रीतिविशेषः, वर्णवादो–गुणग्रहणम्, चारित्रविनयः पुनः–

" [4]सामाइयाइचरणस्स सद्दहाणं तहेव कायेणं । संफासणं परूवणमह पुरओ सव्वसत्ताणं ॥१॥" तथा–

[5]"मण-वय-काइयविणओ आयरियाईण सव्वकालम्मि । अकुसलमणाइरोहो कुसलाणमुदीरणं तह य ॥२॥"

६ गृह्णति-चारद्वारे १२ तपसां व्याख्या गाथा २७०-२७२ प्र.आ.६७

---

१ अगस्त्यसिंह स्थविरैस्तु दशवैकालिकचूर्णौ "सक्कार-सम्माणविशेषोऽयं अत्थादीहिं सक्कारो, थुणणादिणा सम्माणो ।" इति व्याख्यातम् (दशवै० अ० चू० पृ० १५) ॥

२ तीर्थंकरे धर्मे आचार्ये वाचके स्थविरे कुले गणे सङ्घे । साम्भोगिके क्रियायां च मतिज्ञानादीनां च तथैव ॥१॥

३ कर्त्तव्या पुनर्भक्तिर्बहुमानस्तथा वर्णवादश्च । अर्हदादीनां केवलज्ञानावसानानाम् ॥१॥

४ सामायिकादिचारित्राणां श्रद्धानं तथैव कायेन । संस्पर्शनं अथ च सर्वसत्त्वानां पुरतः प्ररूपणम् ॥१॥

५ मनो-वाक्कायविनय आचार्यादीनां सर्वकाले । अकुशलमनआदिरोधः कुशलानां तथोदीरणं च ॥२॥

तथा उपचारेण—सुखकारिक्रियाविशेषेण निर्वृत्त औपचारिकः स चासौ विनयश्च औपचारिकविनयः, स च सप्तधा—

"[1]अब्भासऽच्छणं छंदाणुवत्तणं कयपडिकिई तह य । कारिअनिमित्तकरणं दुक्खत्तगवेसणं तह य ॥१॥ [2]तह देसकालजाणण सव्वत्थेसु तह य अणुमई भणिया । उवयारिओ उ विणओ एसो भणिओ समासेणं ॥२॥"

तत्र 'अब्भासऽच्छणं'ति सूत्रार्थिना नित्यमेवाचार्यस्याभ्यासे—प्रत्यासन्ने स्थातव्यम्, तथा छन्दः—अभिप्रायो गुरूणामनुवर्तनीयः, तथा कृतप्रतिकृतिः—कृते भक्तादिना उपचारे प्रसन्ना गुरवः प्रतिकृतिं—प्रत्युपकारं सूत्रार्थादिदानतो मे करिष्यन्ति, न नामैकैव निर्जरेति भक्तादिदाने गुरोर्यतितव्यम्, तथा कार्यनिमित्तकारणम्, कार्यं—श्रुतप्रापणादिकम्, निमित्तं—हेतुं कृत्वा श्रुतं प्रापितोऽहमनेनेति हेतोरित्यर्थः, विशेषेण तस्य विनये वर्तितव्यम्, तदनुष्ठानं च कर्तव्यम्, यद्वाकारितेन—सम्यक्सूत्रार्थमध्यापितेन पुनस्तन्निमित्तं करणं—विनयस्य विधानं कारितनिमित्तकारणम्, गुरुणा सम्यक् सूत्रादिकं पाठितेन विनेयेन विशेषतो विनये वर्तितव्यं तदुक्तार्थानुष्ठानं च कर्त्तव्यमिति भावः, तथा दुःखार्त्तस्य—दुःखपीडितस्य गवेषणम्—औषधादिना प्रतिजागरणं दुःखार्त्तगवेषणम्, पीडितस्योपकारकरणमित्यर्थः, तथा देश-कालज्ञानमवसरज्ञते-

---

१ अभ्यासस्थानं छन्दोऽनुवर्त्तनं कृतप्रतिकृतिस्तथा च । कारितनिमित्तकरणं दुःखार्त्तगवेषणं च तथा ॥१॥
२ तथा देशकालज्ञानं तथा सर्वार्थेष्वनुमतिर्भणिता । औपचारिकस्तु विनय एष भणितः समासेनम् ॥२॥

स्यर्थः, तथा सर्वार्थेषु गुरुविषयेष्वनुमतिः—आनुकूल्यम्, [1]अथवा द्विपञ्चाशद्भेदो विनयः, स च पञ्चषष्टिद्वारे वक्ष्यते ८ ॥

वेयावच्च'मिति व्याप्रियते स्मेति व्याप्रृतः तस्य भावो वैयावृत्त्यम्, धर्मसाधनार्थमन्नादिदानमित्यर्थः, **यदाहुः**—

" [2]वेयावच्चं वावडभावो इह धम्मसाहणनिमित्तं । अन्नाइयाण विहिणा संपायणमेस भावत्थो ॥१॥" ९ ।

'तहेवसज्झाओ'त्ति सुष्ठु आ—मर्यादया कालवेलापरिहारेण पौरुष्यपेक्षया वा अध्यायः अध्ययनं स्वाध्यायः, स च पञ्चधा—वाचना-प्रच्छना-परावर्तना-ऽनुप्रेक्षा-धर्मकथाभेदात्, तत्र वाचना—शिष्याध्यापनम् १, गृहीतवाचनेनापि संशयोत्पत्तौ पुनः प्रष्टव्यमिति पूर्वाधीतस्य सूत्रादेः शङ्कितादौ प्रश्नः प्रच्छना २, प्रच्छनाविशोधितस्य सूत्रस्य मा भूद्विस्मरणमिति परावर्तना ३, सूत्रस्य घोषादिविशुद्धं गणनमित्यर्थः । सूत्रवदर्थेऽपि सम्भवति विस्मरणमतोऽनुप्रेक्षणम्, ग्रन्थार्थस्य मनसाऽभ्यासोऽनुप्रेक्षा चिन्तनिकेत्यर्थः ४, एवमभ्यस्तश्रुतेन धर्मकथा कर्तव्येति, धर्मस्य—श्रुतरूपस्य कथा—व्याख्या धर्मकथेति ५, ॥१०॥

'झाण'मिति ध्यायते—चिन्त्यते वस्त्वनेनेति ध्यातिर्वा ध्यानम्—अन्तर्मुहूर्तमात्रकालमेकाग्रचित्ताध्यवसानम्, **यदाहुः**—

---

१ "अथवा एस सव्वो चेव विणतो नाण-दंसण-चरित्ताण अव्वतिरित्तो त्ति तिविहो चेव ।" इति दशवै० चूर्णौ (पृ० १५) ॥

२ वैयावृत्त्यं व्याप्रृतभाव इह धर्मसाधननिमित्तम् । अन्नादीनां विधिना संपादनमेष भावार्थः ॥१॥

[1]"अंतोमुहुत्तमेत्तं चित्तावत्थाणमेगवत्थुंमि । छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु" ॥१॥

तच्चतुर्धा—आर्त्त-रौद्र-धर्म्य-शुक्लभेदात्, तत्र ऋतं—दुःखं तस्य निमित्तं तत्र वा भवं ऋते वा—पीडिते प्राणिनि भवमार्तम्, तच्चामनोज्ञानां शब्द-रूप-रस-स्पर्श-गन्धलक्षणानां विषयाणां तदाश्रयभूतवायसादिवस्तूनां वासमुपनतानां विप्रयोगप्रणिधानं भाविनां ❀चाऽसम्प्रयोगचिन्तनम् १ । एवं शूल-शिरोरोगादिवेदनाया अपि विप्रयोगाऽसंप्रयोगप्रार्थनम् २ । इष्टशब्दादिविषयाणां सातवेदनायाश्चाऽविप्रयोगसम्प्रयोगप्रार्थनम् ३ । देवेन्द्र-चक्रवर्तित्वादिप्रार्थनं च ४ । शोकाक्रन्दन-स्वदेहताडन-विलपनादिलक्षणलक्ष्यं तिर्यग्गतिगमनकारणं विज्ञेयम् १ । तथा रौद्रयत्यपरानिति रुद्रः—प्राणिवधादिपरिणत—आत्मैव, तस्येदं कर्म रौद्रम्, तदपि सत्त्वेषु वध-वेध-बन्धन-दहनाङ्कन-मारणादिप्रणिधानम् १ । पैशुन्यासभ्याभ्याख्यानघातादिवचनचिन्तनम् २ तीव्रकोप-लोभाकुलं भूतोपघातपरायणं परलोकापायनिरपेक्षं परद्रव्यहरणप्रणिधानम् ३ । सर्वाभिशङ्कनपरस्वापहारोपघातपरायणशब्दादिविषयसाधकद्रव्यसंरक्षणप्रणिधानं च ४ । [2]उत्सन्न—वधादिलिङ्गगम्यं नरकगति-

---

१ अन्तर्मुहूर्त्तमात्रं चित्तस्यैकवस्तुनि अवस्थानम् । छद्मस्थानां ध्यानं जिनानां तु योगनिरोधः ॥१॥ ❀ वा° मु० ॥

२ रुद्दस्स णं झाणस्स चत्तारि लक्खणा पं०, तं—ओसण्णदोसे, बहुदोसे, अन्नाणदोसे, आमरणंतदोसे । (ठाणांग सू० २४७ । अस्य अभयदेवसूरिकृता व्याख्या—

हिंसादीनामन्यतरस्मिन् ओसन्नं प्रवृत्तेः प्राचुर्यं बाहुल्यं यत्स एव दोषः, ... तथा बहुष्वपि—सर्वेष्वपि हिंसादिषु दोषः—प्रवृत्तिलक्षणो बहुदोषः, तथा अज्ञानात् कुशास्त्रसंस्कारात् हिंसादिष्वधर्मस्वरूपेषु नरकादिकारणेषु धर्मबुद्ध्याऽभ्युदयार्थं या प्रवृत्तिस्तल्लक्षणो दोषोऽज्ञानदोषः,..... तथा मरणमेवान्तो मरणान्तः आमरणान्तादामरणान्तम्"—तत्रैव टीकायाम् (पृ० १८६) ।

गमनकारणमवसेयम् २ । तथा धर्मः—क्षमादिदशलक्षणः तस्मादनपेतं धर्म्यम्, तच्च सर्वज्ञाऽऽज्ञानुचिन्तनम् १ राग-द्वेष-कषायेन्द्रियवशजन्तूनामपायविचिन्तनम् २ । ज्ञानावरणादिशुभाशुभकर्मविपाकसंस्मरणम् ३ । क्षिति-वलय-द्वीप-समुद्रप्रभृतिवस्तुसंस्थानादिधर्मालोचनात्मकम् ४ । [1]जिनप्रणीतभावश्रद्धानादिचिह्नगम्यं देवगत्यादिफलसाधकं ज्ञातव्यम् ३ । तथा शोधयत्यष्टप्रकारं कर्ममलं शुचं वा—शोकं क्लमयति-अपनयतीति निरुक्तविधिना [2]शुक्लम्, एतदपि पूर्वगत-श्रुतानुसारिनानानयमतैकद्रव्योत्पत्ति-स्थिति-भङ्गादिपर्यायानुस्मरणादिस्वरूपम् ४। [3]अवधा-सम्मोहादिलिङ्गगम्यं मोक्षादिफलप्रसाधकं विज्ञेयम् ४। अत्र च धर्म-शुक्ले एव तपसी निर्जरार्थत्वात्, नार्त-रौद्रे बन्धहेतुत्वादिति ११ ॥

'उस्सग्गोऽविय' त्ति उत्सर्जनीयस्य परित्याग उत्सर्गः, स द्विविधः—बाह्योऽभ्यन्तरश्च, तत्र बाह्यो द्वादशादिभेदस्योपधेरतिरिक्तस्यानेषणीयस्य संसक्तस्यान्नपानादेर्वा त्यागः, आभ्यन्तरः कषायाणां मृत्युकाले शरीरस्य च त्यागः, ननु उत्सर्गः प्रायश्चित्तमध्य एवोक्तस्तत् किं पुनरत्र भणनेन ?, सत्यम्, सोऽतिचारविशुद्ध्यर्थमुक्तः अयं तु सामान्येन निर्जरार्थमुक्त इत्यपौनरुक्त्यम् १२ ॥

---

१ धम्मस्स णं झाणस्स चत्तारि लक्खणा पं० तं—आणारुई, णिसग्गरुई, सुत्तरुई, ओगाढरुती। धम्मस्स णं झाणस्स चत्तारि आलंबणा पं०, तं वायणा, पडिपुच्छणा, परियट्टणा, अणुप्पेहा, धम्मस्स णं झाणस्स चत्तारि अणुप्पेहाओ पं०, तं—एगाणुप्पेहा, अणिच्चाणुप्पेहा, असरणाणुप्पेहा, संसाराणुप्पेहा (इति ठा० सू० २४७) ॥

२ पृथक्त्ववितर्कम्, एकत्ववितर्कम्, सूक्ष्मक्रियाप्रतिपाति; व्युपरतक्रियानिवृत्तीति चतुर्विधं शुक्लध्यानम्। तत्त्वार्थभाष्य (९।४१) ॥

३ 'सुक्कस्स' णं झाणस्स चत्तारि लक्खणा पं०, तं—अव्वहे असम्मोहे विवेगे विउस्सग्गे (ठा० सू० २४७) ॥

'अब्भिंतरओ तवो होइ'त्ति इदं प्रायश्चित्तादि व्युत्सर्गान्तमनुष्ठानं लौकिकैरनभिलक्ष्यत्वात् तन्त्रान्तरीयैश्च भावतोऽनासेव्यमानत्वात् मोक्षावाप्तावन्तरङ्गत्वादभ्यन्तरस्य कर्मणस्तापकत्वादभ्यन्तरैरेवान्तर्मुखैर्भगवद्भिर्ज्ञायमानत्वाच्चाभ्यन्तरं तपो भवतीति, ॥२७१॥ एतेषां च कथम् **अतिचार**त्वं* भवतीति आह—' 'सम्ममकरणे' इत्यादि, एतेषामनशनादीनां द्वादशानां तपोभेदानां सम्यगकरणे—विपरीततया न्यूनाधिकयेन यथावस्थितानुष्ठानरूपे अतिचारा अपि द्वादश भवन्तीति, अथ वीर्यत्रिकातिचारानाह—

तिगं तु विरिअस्स'त्ति वीर्यस्य त्रिकं पुनर्मनो-वाक्कायाः सूचकत्वात्सूत्रस्य मनो-वाक्काय-व्यापाराः ते च पापप्रयुक्ताः—पापविषये प्रवृत्ताः सन्तो वीर्यत्रिकातिचारा भवन्तीति ॥२७२॥

'पण सम्म' त्ति व्याख्यायते—

संका कंखा य तहा वितिगिच्छा अन्नतित्थियपसंसा ।
परतित्थिओवसेवणमइयारा पंच सम्मत्ते ॥२७३॥

'संका कंखे'त्यादि, शङ्का काङ्क्षा तथा विचिकित्सा अन्यतीर्थिकप्रशंसा परतीर्थिकोपसेवनं च अतीचाराः पञ्च सम्यक्त्वे भवन्तीति । तत्र शङ्का—भगवदर्हत्प्रणीतेषु पदार्थेषु धर्मास्तिकायादिष्वत्यन्तगहनेषु मतिदौर्बल्यात् सम्यगनवधार्यमाणेषु संशयः किमेवं स्यान्नैवमिति, यदाहुः-''संसयकरणं सङ्के'' ति, सा च शङ्का [2]द्विभेदा—देशशङ्का सर्वशङ्का च, देशशङ्का देशविषया जीवाद्यन्यतमपदार्थैकदेशगोचरेत्यर्थः,

* अतीचारः संभवतीति मु० ॥ १ 'सम्मे' त्यादि-मु० ॥ २ द्विविधा-मु० ॥

यथाऽस्ति जीवः केवलं सर्वगतोऽसर्वगतो वा ? सप्रदेशोऽप्रदेशो वेति, सर्वशङ्का सर्वविषया यथाऽस्ति धर्मो नास्ति वेति, इयं च द्विधाऽपि शङ्का भगवदर्हत्प्रणीतप्रवचनेऽप्रत्ययरूपा सम्यक्त्वं दूषयतीत्यतिचारः, केवलाऽऽगमगम्या अपि हि पदार्था अस्मदादिप्रमाणपरीक्षानिरपेक्षा आप्तप्रणेतृकत्वान्न सन्देग्धुं योग्याः, यत्रापि मतिदौर्बल्यादिभिर्मोहवशात् क्वचन संशयो भवति तत्राप्यप्रतिहतेयमर्गला, यथा--

△ कत्थइ मइदुब्बल्लेण तव्विहायरियविरहओ वावि । नेयगहणत्तणेण य नाणावरणोदयेणं च ॥१॥
हेऊदाहरणासंभवे य सइ सुट्ठु जं न बुज्झेज्जा । सव्वन्नुमयमवितहं तहावि तं चिंतए मइमं ॥२॥
अणुवकयपराणुग्गहपरायणा जं जिणा जुगप्पवरा । जियरागदोसमोहा य नन्नहावाइणो तेणं ॥३॥

यथा वा—"सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः । मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ॥१॥ एकस्मिन्नप्यर्थे संदिग्धे प्रत्ययोऽर्हति हि नष्टः । मिथ्या च दर्शनं तत् स चादिहेतुर्भवगतीनाम् ॥२॥" इत्यर्थः १ ।

काङ्क्षा—अन्यान्यदर्शनग्रहः, सापि सर्वविषया देशविषया च, तत्र सर्वविषया सर्वपाखण्डिधर्माकाङ्क्षारूपा, यथा परिव्राजक-भौतिक-ब्राह्मणादयोऽपि विषयसुखजुषोऽपि परलोकसुखेन युज्यन्त इति

△ कुत्रापि मतिदौर्बल्येन तद्विधाचार्यविरहतो वापि । ज्ञेयगहनत्वेन च ज्ञानावरणोदयेन च ॥१॥
हेतूदाहरणा संभवे च सति सुष्ठु यन्न बुध्येत । सर्वज्ञमतमवितथं तथापि तच्चिन्तयेत् मतिमान् ॥२॥
अनुपकृत-परानुग्रहपरायणा यत् जिना युगप्रवराः । जितराग-द्वेष-मोहाश्च नान्यथावादिनस्तेन ॥३॥

साधीयानेव तदीयोऽपि धर्मः, देशकाङ्क्षा त्वेकादिदर्शनविषया, यथा सुगतेन भगवता भिक्षूणामक्लेशकारी धर्म उपदिष्टः स्नानान्नपानाच्छादन-शयनादिषु सुखानुभवद्वारेण, यदाह—

"मृद्वी शय्या प्रातरुत्थाय पेया, भक्तं मध्ये पानकं चापराह्णे । द्राक्षा खण्डं शर्करा चार्धरात्रे, मोक्षश्चान्ते शाक्यसिंहेन उक्तः ॥१॥" इति, एतदपि घटमानकमेव, एवं च काङ्क्षापि परमार्थतो भगवदर्हत्प्रणीतागमानाश्वासरूपा सम्यक्त्वं दूषयतीत्यतिचारः २, विचिकित्सा—फलं प्रति सन्देहः, स च सत्यपि प्रमाणयुक्त्यागमोपपन्ने सर्वज्ञधर्मेऽस्य दुष्करतरस्य महतस्तपःक्लेशस्य मया विधीयमानस्य सिकताकणकवलनवन्निरास्वादस्यायत्यां फलसम्पत् काचिद्भविष्यति उत क्लेशमात्रमेवेदं निर्जराफलविकलमिति, द्विधाऽपि हि क्रिया वीक्ष्यन्ते सफला अफलाश्च कृषीवलादीनाम्, अत इयमपि क्रिया तथा सम्भाव्यते, न त्वेवं चिन्तयति, यथा—

* "पुव्वपुरिसा जहोदियमग्गचरा घडइ तेसि फलजोगो । अम्हेसु य धिइ-संघयणविरहओ न तहमेसि फलं ॥१॥" इति,

एषाऽपि विचिकित्सा क्रियमाणा भगवद्वचनानाश्वासरूपत्वेन सम्यक्त्वस्य दूषकत्वादतिचारः, न चेयं शङ्कातो न भिद्यते इति वाच्यम्, यतः शङ्का सकलासकलपदार्थमात्रत्वेन द्रव्यगुणविषया, इयं तु क्रियाफलविषयेति भेदः, भवतु वा एवं शङ्का, विचिकित्सा त्वन्यथा एव व्याख्यायते—विचिकित्सा—निन्दा,

* पूर्वपुरुषा यथोदितमार्गचराः घटते तेषां फलयोगः । अस्मासु च धृति-संहननविरहतोन तथैषां फलम् ॥१॥

सा च सदाचारसाधुविषया, यथाऽस्नानेन प्रस्वेदजलक्लिन्नमलत्वाद् दुर्गन्धिवपुष एते महानुभावाः, को दोषः स्याद् यदि प्रासुकजलेनाङ्गप्रक्षालनं कुर्वीरन्निति, एवंरूपाऽपि विचिकित्सा विधीयमाना भगवद्धर्मानाश्वासरूपत्वात् सम्यक्त्वं दूषयतीत्यतिचारः ३, तथा 'अन्यतीर्थिकप्रशंसा' अन्यतीर्थिकाः—सौगत-भौतिकादयः तेषां प्रशंसा—अहो एतेषां राजपूज्यत्वमहो एतेषां सर्वजनमान्यत्वमहोऽदृष्यवैदुष्यादिगुणसमृद्धिः एवमादि, तेषां प्रशंसा प्रतायमानाऽचिन्त्यचिन्तामणिकल्पं सम्यक्त्वं दूषयतीत्यतिचारः ४, तथा **'परतीर्थिकोपसेवनं'** परतीर्थिकैः सह एकत्र संवासात् परस्परालापादिजनितः परिचयः, तदपि सम्यक्त्वं दूषयतीत्यतिचारः, यत एकत्रवासे तत्प्रक्रियादर्शन-श्रवणाभ्यां दृढसम्यक्त्वस्यापि सम्यक्त्वह्रासः सम्भाव्यते, किमुत मन्दबुद्धेर्नवधर्मस्येति ५, ननु दर्शनाचारं प्रतिपादयता तद्विपक्षतया दर्शनस्याष्टावतिचाराः प्रतिपादिताः ततस्तत्रापि शङ्का-काङ्क्षा-विचिकित्साः अत्रापि चेति कथं न पौनरुक्त्यम् ?, तत्र ब्रूमः—पूर्वं निःशङ्कितत्वाद्यभावमात्रमतिचारतया प्रत्यपादि इह तु जीवादिविषयशङ्कादिसद्भाव इति न कश्चिद्दोषः, इह चातिचारो व्यवहारनयमताश्रयणेन सत्येव सम्यक्त्वे स्खलनामात्रम्, निश्चयनयमते तु सम्यक्त्वाभाव एव, तथा चोक्तम्—

"एकस्मिन्नप्यर्थे" इत्यादि ॥२७३॥

अथ **वयाइं**'ति वितन्यते, तत्राह—

पढमवये अइआरा नर-तिरिआणऽन्न-पाण-वोच्छेओ ।
बंधो वहो य अइभाररोवणं तह छविच्छेओ ॥२७४॥

'पढमवये'त्यादि, [1]प्रथमव्रते—प्राणातिपातविरमणलक्षणे नर-तिरश्चामन्न-पानव्यवच्छेदः तथा बन्धस्तथा वधस्तथाऽतिभारारोपणं तथा छविच्छेदः, एते पञ्चातिचारा—मालिन्यरूपा भवन्ति, तत्रान्नपानव्यवच्छेदो—भोजन-पानयोर्निषेधो द्विपद चतुष्पदानां क्रियमाणोऽतिचारः प्रथमव्रतस्य, ननु यद्येवं ज्वरादिरोगाक्रान्तानां पुत्रादीनां लङ्घनादिविधापने गृहीतहिंसाविरमणव्रतस्यातिचारो भविष्यति, तदयुक्तम्, सोपस्काराणि हि सूत्राणि भवन्ति, ततः क्रोधादिवशत इति सूत्रे अध्याहर्तव्यम्, ततः क्रोधादिदूषितमना यद्यन्नादिनिषेधं करोति तदाऽतिचारः, यदा तु हितबुद्ध्या रोगाद्यभिभूतानां पुत्रादीनामन्नादिनिषेधं करोति तदा नातिचार इति, एवमन्यत्रापि क्रोधादिवशत इति द्रष्टव्यम्, न चैतदनार्षम्, यतोऽन्यत्राभ्यधायि—"[2]बंध-वह-छविच्छेयं अइभारं भत्त-पाणवोच्छेयं। कोहाइदूसियमणो गोमणुयाईण नो कुणइ ॥१॥" इत्यादि,।

किं बहुना ?, यद्रोगाद्यभिभूतानां यच्चापठनादिपराणां पुत्रादीनां यच्च शान्तिकृते उपवासादिकारणं तन्नातिचार इत्यर्थः, तथा बन्धो—रज्ज्वादिना गोमनुष्यादीनां नियन्त्रणं स्वपुत्रादीनामपि विनयग्राहणार्थं क्रियते ततः क्रोधादिवशत इत्यत्रापि सम्बन्धनीयम्, अतः प्रबलकषायोदयाद् यो बन्धः सोऽतिचार इति, तथा वधो—लकुटादिना हननम्, कषायादेव वध इत्यन्ये, तथा 'अतिभारारोपणम्' अतिमात्रस्य—वोढुमशक्यस्य भारस्यारोपणं—गो-करभ-रासभ-[3]मनुष्यादेः स्कन्धे पृष्ठे शिरसि वा वहनायाधि-

१ तुलना-योगशास्त्रटीका (३।९०)। धर्मसङ्ग्रहः (भा १ पृ० १०० तः)॥ २ बन्ध-वध-च्छविच्छेदमतिभारं भक्त-पानव्यवच्छेदम् क्रोधादिदूषितमनाः गो-मनुजादीनां न करोति ॥१॥ ३ मनुष्यादीनां-मु०॥

रोपणम्, इहापि क्रोधाल्लोभाद्वा यदधिकभारारोपणं सोऽतिचार इति. तथा 'छविच्छेदः,' छविः—त्वक् तद्यो-गाच्छरीरमपि वा छविः तस्याश्छेदो—द्वैधीकरणम्, स च पादवल्मिकोपहतस्य पुत्रादेरपि क्रियते, ततः क्रोधादिवशत इत्यत्रापि दृश्यम्, अत्र चावश्यकचूर्ण्यादिभणितो विधिरयं—बन्धो द्विपदानां चतुष्पदानां वा स्यात्, सोऽपि सार्थकोऽनर्थको वा स्यात्, तत्रानर्थकस्तावद्विधातुं न युज्यते. सार्थकः पुनरयं द्विविधः—सापेक्षो निरपेक्षश्च, तत्र सापेक्षो यो दामग्रन्थिना शिथिलेन यश्चप्रदीपनादिषु मोचयितुं छेत्तुं वा शक्यते, निरपेक्षः पुनर्यन्निश्चलमत्यर्थं च बद्ध्यते एवं तावच्चतुष्पदानां बन्धः, द्विपदानामपि दास-दासी-चौर-पाठादिप्रमत्तपुत्रादीनां यदि बन्धस्तदा सविक्रमणा एव ते बन्धनीया रक्षणीयाश्च यथा ज्वलनभ-यादिषु न विनश्यन्ति, तथा द्विपदचतुष्पदाः श्रावकेण त एव सङ्ग्रहीतव्या ये अवद्या एवासत इति, तथा छविच्छेदोऽपि तथैव, नवरं निरपेक्षो हस्त-पाद-कर्ण नासिकादि यन्निर्दयं छिनत्ति, सापेक्षः पुनर्यद्दण्डं वाऽरुर्वा छिंद्याद्वा दहेद्वेति, तथाऽधिकभारोऽपि नारोपयितव्यः, प्रथममेव हि या द्विपदादिवाहनेन जीविका सा श्रावकेण मोक्तव्या, अथासावन्या न भवेत् तदा द्विपदो यं भारं स्वयमुत्क्षिपत्यवतारयति च एतावान् वाह्यते, चतुष्पदस्य तु यथोचितभारः किञ्चिदूनः क्रियते, हल-शकटादिषु पुनरुचितवेलायामसौ मुच्यत इति, तथा वधोऽपि प्रहाररूपस्तथैव, नवरं निरपेक्षप्रहारो निर्दयताडना, सापेक्षः पुनरेवं-यथा श्रावकेणादित एव भीतपर्षदा भवितव्यम्, यदि पुनः कोऽपि न करोति विनयं तदा तं मर्माणि मुक्त्वा लतया दवरकेण वा सकृद् द्विर्वा ताडयेदिति, तथा अन्नपानादिनिषेधः कस्यापि न करणीयः, तीक्ष्णबुभुक्षो ह्येवं म्रियेतापि, अतः स्वभोजनवेलायां ज्वरितादीन् विमुच्य नियमत एवान्यान् विधृतान् भोजयित्वा स्वयं भुञ्जीत,

अन्नादिनिरोधोऽपि सार्थकानर्थकादिभेदो बंधवद् द्रष्टव्यः, नवरं सापेक्षो रोगचिकित्सार्थं स्यात्, अपराधकारिणं च वाचैव वदेद्-अद्य ते भोजनादि न दास्यत इति, शान्तिनिमित्तं चोपवासादि कारयेत्, किं बहुना ?, मूलगुणस्याहिंसालक्षणस्यातिचारा यथा न भवन्ति तथा यतितव्यम्। ननु हिंसैव श्रावकेण प्रत्याख्याता ततो बन्धादिकरणेऽपि न कश्चिद् दोषः, हिंसाविरतेरखण्डितत्वात्, अथ बन्धादयोऽपि प्रत्याख्याताः तदा तत्करणे व्रतभङ्ग एव भवेत्, विरतेः खण्डनात्, अपरं च-बन्धादीनां प्रत्याख्येयत्वे विवक्षितव्रतेयत्ता विशीर्यते प्रतिव्रतमतिचारव्रतानामाधिक्यादिति, एवं च न बन्धादीनामतिचारतेति। अत्र ब्रूमः, सत्यम्, हिंसैव प्रत्याख्याता न बन्धादयः, केवलं तत्प्रत्याख्यानेऽर्थतस्तेऽपि प्रत्याख्याता द्रष्टव्याः, हिंसोपायत्वात्तेषाम्, न च बन्धादिकरणेऽपि च व्रतभङ्गः किंत्वतिचार एव, कथम् ? इह द्विविधं व्रतम्-अन्तर्वृत्त्या बहिर्वृत्त्या च, तत्र मारयामीति विकल्पाभावेन यदा कोपाद्यावेशात् परप्राणप्रहाणमविगणयन् बन्धादौ प्रवर्तते न च परो विपद्यते तदा निर्दयताविरत्यनपेक्षप्रवृत्तत्वेनाऽऽन्तरवृत्त्या व्रतस्य भङ्गो हिंसाया अभावाच्च बहिर्वृत्त्या पालनमिति, देशस्य भञ्जनात् देशस्य च पालनादतिचारव्यपदेशः प्रवर्तते, यदाहुः-

"न मारयामीति कृतव्रतस्य, विनैव मृत्युं क इहातिचारः ?।
निगद्यते यः कुपितो वधादीन्, करोत्यसौ स्यान्नियमेऽनपेक्षः ॥ १ ॥
मृत्योरभावान्नियमोऽस्ति तस्य, कोपाद्यधीनतया तु भग्नः ।
देशस्य भङ्गादनुपालनाच्च, पूज्या अतीचारमुदाहरन्ति ॥२॥" [योगशास्त्र टीका ३।९०]

१ तीचारतेति ब्रूमः-मु० ॥

यच्चोक्तं 'व्रतेयत्ता विशीर्यते' इति, तदयुक्तम्, विशुद्धाहिंसासद्भावे हि बन्धादीनामभाव एव, ततः सिद्धमेतद्--बन्धादयोऽतिचारा एव, बन्धादिग्रहणस्योपलक्षणत्वान्मन्त्र-तन्त्रप्रयोगादयोऽन्येऽप्यतिचारतया विज्ञेया इति ॥२७४॥

द्वितीयव्रतातिचारानाह—

सहसा कलंकणं १ रहसदूसणं २ दारमंतभेयं च ३ ।
तह कूडलेहकरणं ४ मुसोवएसो ५ [1]मुसादोसा ॥२७५॥

'**सहसे**'त्यादि, [2]सहसा-अनालोच्य कलङ्कनं-कलङ्कस्य करणमभ्याख्यानमसद्दोषस्यारोपणमित्यावत् चौरस्त्वं पारदारिकस्त्वमित्यादि प्रथमोऽतिचारः, ननु सहसा कलङ्कनमसद्दोषाभिधानरूपत्वेन प्रत्याख्यातत्वाद्भङ्ग एव न त्वतिचार इति, सत्यम्, किन्तु यदा परोपघातकमनाभोगादिनाऽभिधत्ते तदा सङ्क्लेशाभावेन व्रतसापेक्षत्वान्न भङ्गः परोपघातहेतुत्वाच्च भङ्ग इति भङ्गाभङ्गरूपोऽतिचारः, यदा तु तीव्रसङ्क्लेशादभ्याख्याति तदा भङ्ग एव व्रतनिरपेक्षत्वादिति, तथा रहः--एकान्तस्तत्र भवं रहस्यं—राजादिकार्यसम्बद्धं यदन्यस्मै न कथ्यते तस्य दूषणम्--अनधिकृतेनैवाकारेङ्गितादिभिर्ज्ञात्वा अन्यस्मै प्रकाशनं रहस्यदूषणम्, यथा रहसि मन्त्रयमाणान् कांश्चिदवलोक्य गृहीतमृषाव्रतः कश्चिद्वदति—एते हि राजापकारादिकारकमिदमिदं च मन्त्रयन्ते, यद्वा रहस्यदूषणं—पैशुन्यम्, यथा द्वयोः प्रीतौ सत्यामेकस्याकारादिनोपलभ्याभिप्रायमितरस्य तथा कथयति यथा प्रीतिस्तयोः प्रणश्यति इति द्वितीयोऽतिचारः, तथा दाराणां—कलत्राणा-

१ मुसे दोसा-मु० ॥ २ तुलना—योगशास्त्रटीका (३।६१) । धर्मसङ्ग्रहः (भा० १ पृ० १०२) ॥

मुपलक्षणत्वान्मित्रादीनां च मन्त्रो--मन्त्रणं तस्य भेदः-प्रकाशनं दारमन्त्रभेदः, अस्य चानुवादरूपत्वेन सत्यत्वाद्यद्यपि नातिचारत्वं घटते तथापि विश्रब्धभाषितार्थप्रकटनजनितलज्जादिनः कलत्रमित्रादेर्मरणादि-सम्भवेन परमार्थतोऽस्यासत्यत्वात्कथञ्चिद्भङ्गरूपत्वेनातिचारतैव, रहस्यदूषणे हि रहस्यमाकारादिना विज्ञायानधिकृत एव प्रकाशयति इह तु मन्त्रयितैव स्वयं मन्त्रं भिनत्तीत्यनयोर्भेदः, इति तृतीयोऽतिचारः, तथा कूटस्य-असद्भूतस्य लेखो-लेखनं कूटलेखस्तस्य करणम्, एतच्च यद्यपि कायेनासत्यां वाचं न [1]वदामीत्यस्य, न वदामि न वादयामीत्यस्य वा व्रतस्य भङ्ग एव तथापि सहसाकारानाभोगादिनाऽतिक्रमा-दिना वाऽतिचारः, अथवा सत्यमित्यसत्यभणनं मया प्रत्याख्यातम् इदं तु लेखनमिति भावनया व्रतसव्य-पेक्षस्यातिचार एवेति चतुर्थोऽतिचारः, मृषा—अलीकं तस्योपदेशो मृषोपदेशः, इदं च 'एवं च एवं च ब्रूहि त्वं एवं च एवं च अभिदध्याः कुलगृहेष्वि'त्यादिकमसत्याभिधानशिक्षाप्रदानमित्यर्थः, इह व्रतसंरक्षण-बुद्ध्या परवृत्तान्तकथनद्वारेण मृषोपदेशं यच्छतः पञ्चमोऽतिचारः, व्रतसव्यपेक्षत्वेन मृषावादे परप्रवर्तनेन च भग्नाभग्नरूपत्वादस्य उपलक्षणत्वान्निकृतिप्रधानशास्त्राध्यापनमप्यतिचारः, इति मृषादोषाः—द्वितीय-व्रतातिचाराः[2] ॥२७५॥

१ वदामीत्यस्य न वादयामि मु० ॥ तुलना-योगशास्त्रटीका (३।९१) ॥

२ तत्त्वार्थसूत्रे तु-मिथ्योपदेश-रहस्याभ्याख्यान-कूटलेखक्रिया-न्यासापहार-साकारमन्त्रभेदाः ।७।२०। इति प्रकारान्तरेण पञ्चातिचारा दर्शिताः ॥

[1]अथ तृतीयव्रतातीचारानाह–

चोराणीय १ चोरपयोगजं २ कूडमाण-तुलकरणं ३ ।
रिउरज्जव्ववहारो ४ सरिसजुई ५ तइयवयदोसा ॥२७६॥

'चोराणीयमि'त्यादि, चौरैरानीतम्–आहृतं चौरानीतं कनकवसनादि, अत्र च सूत्रे आदानपदाध्याहारात्तस्यादानं–मूल्येन मुधिकया वा ग्रहणम्, चौरानीतं हि काणक्रयेण मुधिकया वा प्रच्छन्नं गृह्णन् चौर एव भवति, ततश्च चौर्यकरणाद् व्रतभङ्गः, वाणिज्यमेव मया विधीयते न साक्षाच्चौरिकेत्यध्यवसायेन व्रतसापेक्षत्वाच्च न भङ्ग इति भङ्गाभङ्गरूपः प्रथमोऽतीचारः १, तथा चौराणां प्रयोजनं–व्यापारणं चौरप्रयोगः–हरत यूयमिति हरणक्रियायां प्रेरणा, अथवा चौराणां प्रयोगाः–उपकरणानि कुशिका-कर्तरिका-घर्घरिकादीनि तेषामर्पणं विक्रयणं वा उपचाराच्चौरप्रयोगः, ततो जातश्चौरप्रयोगजोऽतिचारः, प्राकृतत्वाच्च नपुंसकत्वम्, अत्र यद्यपि चौर्यं न करोमि न कारयामीत्येवंप्रतिपन्नस्य व्रतस्य चौरप्रयोगो व्रतभङ्ग एव तथापि किमधुना यूयं निर्व्यापारास्तिष्ठथ ? यदि भवतां भोजनादिकं नास्ति तदाऽहं तद्ददामि भवदानीतमोषस्य वा यदि विक्रायको न विद्यते तदाऽहं तं विक्रेष्ये इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वयं च चौर्यव्यापारं परिहरतो व्रतसापेक्षस्यासावतिचार इति द्वितीयः २, तथा मीयतेऽनेनेति मानं–कुडव-पल-हस्तादि तुला तु प्रसिद्धैव मानं च तुला च मान-तुले कूटे च ते मान-तुले च कूटमान-तुले तयोः करणं–हीनेन मानेन ददाति अधिकेन मानेन च गृह्णाति एवं तुलयाऽपीति तृतीयः ३, तथा रिपोः–द्विषः सम्बन्धिनि राज्ये–नियमिते भूमिभागे कटके वा व्यवहारो–व्यवस्थातिक्रमेण व्यवहरणम्, इह च यद्यपि स्वस्वामिनाऽननुज्ञातस्य परकटकादिप्रवेशस्य

१ तुलना योगशास्त्रटीका (३।६२) धर्मसङ्ग्रह (भा० १-१०३)॥

[1] 'सामिजीवादत्तं तित्थयरेणं तहेव य गुरूहिं । एयस्स उ आऽविरई अदिन्नदाणे सरूवं तं ॥१॥" इत्यदत्तादानलक्षणयोगेन विरुद्धराज्यव्यवहारकारिणां च चौर्यदण्डयोगेनादत्तादानव्रतभङ्ग एव तथापि विद्वेषिनृपतिभूमौ मया वाणिज्यमेव क्रियते न चौर्यमिति भावनया व्रतसापेक्षत्वाल्लोके च चौरोऽयमिति व्यपदेशाभावादतिचारतेति चतुर्थः ४, तथा सदृशयुतिः-सदृशानां वस्तूनां युतिः-मिश्रीकरणं यथा व्रीहिषु पलञ्जिकान् , घृते वसादि, तैले मूत्रादि, सिकतादि अच्छधवलषण्डिकायां, जात्यसुवर्णरूप्ययोर्युक्तिसुवर्णरूप्ये मिश्रयित्वा व्यवहरतीति पञ्चमः, अत्र च कूटमान-तुलादिव्यवहारः सदृशयुतिश्च परव्यंसनेन परधनग्रहणरूपत्वाद्भङ्ग एव केवलं खात्रखननादिकमेव [2]चौर्यं प्रतिषिद्धं मया वणिक्कलैव कृतेति भावनया व्रतरक्षणोद्यतत्वादतिचारता ५, इति तृतीयव्रतेऽतिचाराः ॥२७६॥

इदानीं चतुर्थव्रतातिचारानाह-

भुंजइ इत्तरपरिग्गह १ मपरिग्गहियं थियं २ चउत्थवए ।
कामे तिव्वहिलासो ३ अणंगकीला ४ परविवाहो ५ ॥२७७॥

'भुंजई' त्यादि, इत्वरमल्पमुच्यते, ततः इत्वरम्-अल्पं परिग्रहो यस्याः सा इत्वरपरिग्रहा, इत्वरकालं परिग्रहो यस्याः सा, तथा कालशब्दलोपोऽत्र दृश्यः, अथवा इत्वरी-प्रतिपुरुषमयनशीला वेश्येत्यर्थः परिगृह्यत इति परिग्रहा-कञ्चित्कालं भाटीप्रदानादिना संगृहीता इत्वरी चासौ परिग्रहा च सा तथा, पुंव-

१ स्वामिजीवादत्तं तीर्थकरेण तथैव गुरुभिरदत्तम् । एतस्माद् याऽविरतिः अदत्तादानस्यैतत् स्वरूपम् ॥१॥
२ चौर्यं प्रसिद्धम् , मया तु वणि० इति च धर्मसङ्ग्रहे (भा० १, पृ० १०४) योगशास्त्रे (३।९३) पाठः ॥

द्भावश्चात्र कार्यः, तां यद्भुङ्क्ते-सेवते गृहीतचतुर्थव्रतः सोऽतिचारः, इयमत्र भावना--भाटीप्रदानादित्वरकालं स्वीकारेण स्वकलत्रीकृतस्य वेश्यां सेवमानस्य स्वमतिकल्पनया स्वदारत्वेन व्रतसापेक्षचित्तत्वान्न भङ्गः, अल्पकालं परिग्रहाच्च वस्तुतोऽन्यकलत्रत्वाद्भङ्ग इति भङ्गाभङ्गरूपत्वादित्वरपरिग्रहां सेवमानस्य प्रथमोऽतिचारः १, तथा अपरिगृहीता-अगृहीतान्यसत्कभाटिर्वेश्या प्रोषितभर्तृका स्वैरिणी कुलाङ्गना वाऽनाथा तां 'थियं'ति स्त्रियं स्थितां वा, एवंविधां स्त्रीं यो भुङ्क्ते सोऽतिचार इति षष्ठङ्कः, अयं चानाभोगादिना अतिक्रमादिना वा अतिचारः २,

एतौ च द्वावप्यतिचारौ स्वदारसन्तोषिण एव न तु परदारवर्जकस्य इत्वरपरिग्रहाया वेश्यात्वेन अपरिगृहीतायास्त्वनाथतयैव परदारत्वाभावात् शेषास्त्वतिचारा द्वयोरपीति [1]हरिभद्रसूरिमतम्, एतदेव च सूत्रानुपाति, यदाह-"सदारसंतोसस्स इमे पंच अइयारा जाणियव्वा न समायरियव्व"त्ति, अन्ये त्वाहुः-इत्वरपरिग्रहासेवनं स्वदारसन्तोषिणोऽतीचारो यथा पूर्वं व्याख्यातस्तथैव, अपरिग्रहासेवनं तु परदारवर्जिनोऽतीचारः, अपरिग्रहा हि वेश्या, यदा च तां गृहीतान्यसत्कभाटिकामभिगच्छति तदा परदारगमनदोषसम्भवात् कथञ्चित्परदारत्वाच्च भङ्गत्वेन वेश्यात्वाच्चाभङ्गत्वेन भङ्गाभङ्गरूपोऽतीचारः इति द्वितीयः, परे पुनरन्यथा प्राहुर्यथा—

१ द्रष्टव्या आवश्यकसूत्रस्य हारिभद्री वृत्तिः (पृ० ८२५ B) ॥

"परदारवज्जिणो पंच होंति तिन्नि उ सदारसंतुट्ठे । इत्थीए तिन्नि पंच व भङ्गविगप्पेहिं अइयारा ॥१॥" इयमत्र भावना–इत्वरकालं या परेण भाट्यादिना परिगृहीता वेश्या तां गच्छतः [2]परदारवर्जिनो भङ्गः, कथंचित्परदारत्वात्तस्याः, लोके तु परदारत्वारूढेर्न भङ्ग इति भङ्गाऽभङ्गरूपोऽतीचारः, अपरिगृहीतायाऽनाथकुलाङ्गनायां यद्गमनं परदारवर्जिनः सोऽप्यतीचारः तत्कल्पनया परस्य भर्तुरभावेनाऽपरदारत्वाद्-भङ्गः, लोके च परदारतया रूढेर्भङ्ग इति पूर्ववदतीचारः, शेषास्तु त्रयोऽतीचारा द्वयोरपि भवेयुः, स्त्रियास्तु स्वपुरुषसन्तोष-परपुरुषवर्जनयोर्न भेदः, स्वपुरुषव्यतिरेकेणान्येषां परपुरुषत्वात्, अन्यविवाहनादयस्तु त्रयः स्वदारसन्तोषिण इव स्वपुरुषविषयाः स्युरिति, पक्षे वा, कथं ?, आद्यस्तावद्यदा स्वकीयपतिर्वारकदिने सपत्न्या परिगृहीतो भवति तदा सपत्नीवारकं विलुप्य परिभुञ्जानाया अतीचारः, [3]द्वितीयस्तु अतिक्रमादिना परपुरुषमभिसरन्त्या अतीचारः, ब्रह्मचारिण्या वा स्वपतिमतिक्रमादिना अभिसरन्त्या अतीचारः, शेषास्त्रयः स्त्रियाः पूर्ववदिति ।

तथा कामे–मदने तीव्रो–गाढोऽभिलाषः–परित्यक्तान्यसकलव्यापारस्य तदेकाध्यवसायता, रमणी-मुखकमल-कक्षोपस्थान्तरेष्वतितृप्ततया प्रक्षिप्य प्रजननं महतीं वेलां यावन्निश्चलो मृत [4]इवास्ते चटक इव चटकायां मुहुर्मुहुः कामिन्यामारोहतीति तृतीयः ३, तथा अनङ्गः-कामः, स च पुंसः स्त्री-पुं-नपुंसकसेव-

१ अपरे पुनरस्यन्यथा प्राहुः-सं. ॥ २ परदारवर्जिणो-मु० ॥ ३ अब्रह्मचारिणं-सं ॥
४ दवास्ते-जे. यो. टी. (३।६४) ॥

नेच्छा हस्तकर्मादीच्छा वा वेदोदयात्[1] । तथा स्त्रियोऽपि पुरुष-नपुंसक-स्त्रीसेवनेच्छा हस्तकर्मादीच्छा वा । नपुंसकस्यापि नपुंसक-पुरुष-स्त्रीसेवनेच्छा हस्तकर्मादीच्छा वा । तेन तस्मिन् वा क्रीडा—रमणमनङ्ग-क्रीडा स्वलिङ्गेन कृतकृत्योऽपि योषितामवाच्यदेशं भूयो भूयः [2]कुण्णाति केशाकर्षण-प्रहारदान-दन्त-नख-कदर्थनादिप्रकारैश्च मोहनीयकर्मावेशात्तथा क्रीडति यथा प्रबलो रागः समुज्जृम्भते, अथवा अङ्गं—देहावयवो मैथुनापेक्षया योनिर्मेहनं वा तद्व्यतिरिक्तान्यनङ्गानि-कुच-कक्षोरु-वदनादीनि तेषु क्रीडा, इह च श्रावकोऽत्यन्तपापभीरुतया ब्रह्मचर्यं चिकीर्षुरपि यदा वेदोदयासहिष्णुतया तत्कर्तुं न शक्नोति तदा यापनामात्रार्थं स्वदारसन्तोषादि प्रतिपद्यते, मैथुनमात्रेणैव च यापनायां सम्भवन्त्यां कामतीव्राभिलाषाऽनङ्गक्रीडे अर्थतः प्रतिषिद्धे, तत्सेवने च न कश्चिद् गुणः प्रत्युत राजयक्ष्मादयो दोषा एव भवन्ति, एवं प्रतिषिद्धाचरणाद्भङ्गः, निजनियमाबाधनाच्चाभङ्ग इत्येतावतीचारौ,

अन्ये त्वन्यथाऽतीचारद्वयमपि भावयन्ति—स हि स्वदारसंतोषी निधुवनमेव मया प्रत्याख्यातमिति स्वकल्पनया वेश्यादौ तत्परिहरति, नालिङ्गनादि, परदारवर्जिनोऽपि परदारेषु निधुवनं परिहरन्ति नालिङ्गनादि, इति कथञ्चिद् व्रतसापेक्षत्वादतीचाराविति ४, ।

तथा परेषाम्—अन्येषां स्वस्वाऽपत्यव्यतिरिक्तानां विवाहो—विवाहकरणं कन्याफललिप्सया स्नेहसंबन्धादिना वा परिणयनविधानम्, इदं च स्वकलत्रसन्तोषवता स्वकलत्रात् परदारवर्जकेन तु

१ याच्य तथा जे ॥ २ कुण्णाति-योगशास्त्रटीका (३।६४ पृ. १६४ A) धर्मसङ्ग्रहः (मा. १ पृ. १०५) ॥

स्वकलत्र-वेश्याभ्यामन्यत्र मनो-वाक्कायैर्मैथुनं न कार्यं न च कारणीयमिति, यदा प्रतिपन्नं व्रतं भवति तदा परविवाहकरणं मैथुनकारणमर्थतः प्रतिषिद्धमेव भवति, मैथुनव्रतकारी च मन्यते—मया विवाह एवायं विधीयते न मैथुनं कार्यते इति व्रतसापेक्षत्वादतीचारः, कन्याफललिप्सा च सम्यग्दृष्टेरभ्युत्पन्नावस्थायां सम्भवति, मिथ्यादृष्टेश्च भद्रकावस्थायामनुग्रहार्थं व्रतदाने सा सम्भवति, ननु परविवाहवत् स्वापत्यविवाहनेऽपि समान एवायं दोषः, सत्यमेतत्, परं यदि स्वकन्यादीनां विवाहो न कार्यते तदा स्वच्छन्दचारित्वं भवेत्, ततः शासनोपघातः स्यात्, विहिते तु विवाहे पत्यादिनियन्त्रितत्वेन न तथा भवतीति, परेऽप्याहुः—

[1]"पिता रक्षति कौमारे, भर्ता रक्षति यौवने । पुत्राश्च स्थाविरे भावे, न स्त्री स्वातन्त्र्यमर्हति ॥१॥" यस्तु यादवशिरोमणेः कृष्णस्य चेटकमहाराजस्य च निजापत्येष्वपि विवाहनियमः श्रूयते स चिन्तकान्तरसद्भावे सति द्रष्टव्य इति ५, मध्ये स्थितस्य 'चउत्थवए' इति पदस्यात्रापि सम्बन्धाच्चतुर्थव्रते एते पञ्चातीचाराः ॥२७७॥

अथ पञ्चमव्रतातीचारानाह—

जोएइ खेत्त-वत्थूणि १ रूप्प-कणयाइ देइ सयणाणं २ ।
धण-धन्नाइ परग्घरे बंधइ जा नियमपज्जंतो ३ ॥२७८॥

---

१ "यत्तूक्तं स्वापत्येष्वपि सङ्ख्याऽभिग्रहो न्याय्यः तच्चिन्तकान्तर सद्भावे सुतसङ्ख्यापूर्तौ वाऽपत्यान्तरोत्पत्तिपरिहारोपायत इति अपरे पुनराहुः परोऽन्यो यो विवाहः आत्मन एव विशिष्टसंतोषाऽभावात् योषिदन्तराणि प्रति विवाहान्तरकरणं तत्परविवाहकरणम्" इति धर्मबिन्दुटीका (३।१७) ॥

दुपयाइं चउप्पयाइं गब्भं गाहेइ ४ कुप्पसंखं च ।
अप्पधणं बहुमोल्लं ५ करेई पंचमवए दोसा ॥२७९॥

'जोएई'त्यादिगाथाद्वयम्, धन-धान्यादिवस्तुलक्षनयविधपरिग्रहपरिमाणस्वरूपे पञ्चमव्रतेऽतीचारा विज्ञेयाः, यथा 'जोएई'त्यादि, योजयति–क्षेत्र-वास्तूनि एकत्र मीलयतीति, [1]तत्र क्षेत्रं–धान्योत्पत्तिभूमिः, तत् त्रिविधं–सेतु-केतूभयभेदात्, तत्र सेतुक्षेत्रं यदरघट्टादिजलेन सिच्यते, केतुक्षेत्रमाकाशोदकनिष्पाद्यशस्यम्, उभयक्षेत्रं तूभयजलनिष्पाद्यशस्यम्, वास्तु–गृहहट्टादि ग्रामनगरादि च, तत्र गृहं त्रिविधं–खातं–भूमिगृहादि, उच्छ्रितं–प्रासादादि, खातोच्छ्रितं–भूमिगृहस्योपरि गृहादिसन्निवेशः क्षेत्राणि च वास्तूनि च क्षेत्र वास्तूनि तान्येकत्र योजयति, गृहीतपरिग्रहव्रतेन हि केनचिदेकं क्षेत्रं परिगृहीतम्, तस्य केनापि स्वकीयं क्षेत्रं तत्क्षेत्रप्रत्यासन्नमेव दीयते, ततोऽसौ स्वकीयनियमभङ्गभयेन तत्परदत्तं क्षेत्रं स्वकीयक्षेत्रेण सह योजयति यथैकमेव द्वाभ्यामपि ताभ्यां क्षेत्रं भवति, एवं गृहादिकमपि परदत्तं [2]वृति-भित्त्याद्यपनयनेन स्वकीयगृहादिनैकीकरोतीत्यतीचारः प्रथमः १, तथा रूप्य-कनकादिसङ्ख्याव्रतकाले चतुर्मासादिकालावधिना यत्परिमाणं गृहीतं तावतोऽधिकं जातं व्यवहारादिना, ततो यथा मे नियमभङ्गो न भवति न चेदमन्यत्र कुत्रापि याति नियमावधौ च समाप्ते अहमेव ग्रहीष्याम्येतदितिबुद्धया

१ तुलना–धर्मबिन्दुटीका (३।१८)। योगशास्त्रटीका (३।६५)॥
२ वृत्ति० मु०। 'वृतिः कण्टकावरणम् इति' धातुपारायणे (१-६-५५)॥

[1]स्वजनेभ्यो ददत् व्रतसापेक्षत्वादतिचरति अतीति द्वितीयः २, तथा धन-धान्यादि परगृहे बध्नाति-स्वीकृत्य मुञ्चति यावन्निजनियमपर्यन्तः, तत्र धनं-गणिम-धरिम-मेय-परीक्ष्य(परिच्छेद्य)लक्षणम् , यदाहुः-

"गणिमं जाईफलफोफलाइ धरिमं तु कुंकुमगुडाई। [2]मेयं चोप्पडलोणाइ रयणवत्थाइ परिच्छेज्जं ॥१॥

धान्यं सप्तदशविधम् , यदाहुः-

"व्रीहिर्यवो मसूरो गोधूमो मुद्ग-माष-तिल-चणकाः। अणवः प्रियङ्गुकोद्रवकुष्ठकाः शालिराढकयः ॥१॥

किञ्च कलायकुलत्थौ सणसप्तदशानि धान्यानि ॥" इति,

धनं च धान्यं धन-धान्ये ते आदी यस्य तद्धन-धान्यादि, तत्रकृतधन-धान्यादिपरिमाणः कोऽपि पूर्वलभ्यमन्यद्वा धनादिकं कस्यापि पार्श्वाल्लभ्यमानमिदानीमेव यदि स्वगृह एवैतत्समानयामि तदा नियमभङ्गो मे भवति अग्रेतने तु विक्रीतादौ सति पूर्णे वा नियमावधौ स्वगृहे समानेष्यामीतिबुद्धया वचननियन्त्रणात्मकेन मूढकादिबन्धरूपेण वा सत्यङ्कारदानादिस्वरूपेण वा बन्धनेन स्वीकृत्य यदा तदीयगृह एव तद्व्यवस्थापयति तदा तृतीयोऽतीचारः ३ ॥२७८॥

तथा 'दुपये'त्यादि, द्वे पदे येषां तानि द्विपदानि-कलत्रावरुद्धदासी-दास-कर्मकर-पदात्यादीनि हंस-मयूर-कुक्कुट-शुक-सारिका-चकोर-पारापतप्रभृतीनि च, चत्वारि पदानि येषां तानि चतुष्पदानि-गो-महिष-मेषा-ऽविक-करभ-रासभ-तुरग-हस्त्यादीनि, तानि यद्भर्मे ग्राहयति सोऽतीचार इति सम्बन्धः, यथा किल केनापि संवत्सराद्यवधिना द्विपद-चतुष्पदानां परिमाणं कृतं तेषां च विवक्षितसंवत्सराद्यवधिमध्य एव

१ सुजनेभ्यो-सं० ॥ २ मेज्जं चोप्पडलोणय-जे० ॥

प्रसवेऽधिकद्विपदादिभावाद् व्रतभङ्गः स्यादिति तद्भयात्कियत्यपि काले गते गर्भे ग्राहयतो गर्भस्थद्विपदादिभावेन बहिश्च तदभावेन कथञ्चिद् व्रतभङ्गाऽभङ्गरूपोऽतिचार इति चतुर्थः ४, तथा कुप्यस्य-रूप्य-सुवर्णव्यतिरिक्तस्य कांस्य-लोह-ताम्र-त्रपु-सीसक-वंशविकार-कट-मञ्चिका-मञ्चक-मन्थानक-तूलिका-रथ-शकट-हल-मृद्भाण्डप्रभृतिकस्य गृहोपकरणकलापस्य सङ्ख्या—परिगणनम् तामल्पधनां बहुधनां करोति, कोऽर्थः ? स्थालादीनां कथञ्चिदधिकत्वे प्रतिपन्ननियमस्य जाते सत्यल्पमूल्यं स्थालाद्यपरेणोत्कलितेन स्थालादिना मेलयित्वा बहुमूल्यं करोति यथा नियमो न भज्यत इति पर्यायान्तरकरणेन सङ्ख्यापूरणात्स्वाभाविकसङ्ख्याबाधनाच्च पञ्चमोऽतिचारः ५, एते पञ्चमव्रते दोषा—अतीचारा इति ॥२७६॥

उक्ता अणुव्रतानां प्रत्येकं पञ्च पञ्चातिचाराः, अथ गुणव्रतातिचाराणामवसरः, तत्रापि प्रथमगुणव्रतस्य दिग्विरतिलक्षणस्यातिचारानाह—

तिरियं १ अहो २ य उड्ढं ३ दिसिवयसंखाअइक्कमे तिन्नि।
दिसिवयदोसा तह सइविम्हरणं ४ खित्तवुड्ढी ५ य ॥२८०॥

'तिरियं अहो य'इत्यादि, तिर्यगधश्च, चः समुच्चये भिन्नक्रमः, ऊर्ध्वं चेत्येवं योज्यः, दिग्व्रतस्य सङ्ख्यातिक्रमे त्रयो दिग्व्रते दोषाः—अतीचाराः, तथा स्मृतिविस्मरणं चतुर्थः, क्षेत्रवृद्धिश्च पञ्चमः, तत्र तिर्यक्पूर्वादिदिक्षु [1]अधः—अधोग्राम-भूमिगृह-कूपादिषु ऊर्ध्वं—पर्वत-तरुशिखरादिषु योऽसौ नियमितः प्रदेशस्तस्य व्यतिक्रमः ३, एते त्रयोऽतीचाराः, एते चानाभोगा-ऽतिक्रम-व्यतिक्रमादिभिरेवातीचारा भवन्ति, अन्यथाप्रवृत्तौ तु भङ्ग एव, अतिक्रमादीनां च स्वरूपम्—

१ तुलना-धर्मबिन्दुटीका (३।१६) योगशास्त्रटीका (३।६७) ॥

* "आहाकम्मनिमंतण पडिसुणमाणे अइक्कमो होइ । पयभेयाइ [1]वइक्कम गहिए [2]तइओयरो गिलिए॥१॥"
[पिण्ड नि. १८२]

इति गाथानुसारेण सर्वत्र ज्ञेयम् , अत्र 'तइओ' त्ति अतिचारः 'इयरो' त्ति अनाचारः, अत्र च चैत्य-साधुवन्दनाद्यर्थं नियमितोर्ध्वादिदिक्प्रमाणमतिक्रम्य सूक्ष्मेक्षिकया साधोरिव उपयुक्तस्य परतोऽपि गच्छतो न भङ्गः, तथा स्मृतेर्योजनशतादिरूपदिक्परिमाणविषयाया अतिव्याकुलत्व-प्रमादित्व-वृद्धत्वपाट-वादिना विस्मरणम् , तथाहि—केनचित्पूर्वस्यां दिशि योजनशतरूपं परिमाणं कृतमासीत् गमनकाले च स्पष्टरूपतया न स्मरति—किं शतं परिमाणं कृतमुत पञ्चाशत् ?, तस्यैवं पञ्चाशतमतिक्रमतोऽतीचारः सापेक्षत्वात् , शतमतिक्रामतश्च भङ्गो निरपेक्षत्वात् , ततः स्मरणीयमेव गृहीतं व्रतम् , स्मृतिमूलं हि सर्वमनु-ष्ठानमिति चतुर्थोऽतीचारः ४, अयं तु सर्वव्रतेषु द्रष्टव्यः, तथा क्षेत्रस्य—पूर्वादिदेशस्य दिग्व्रतविषयस्य ह्रस्वस्य [3]सतो वृद्धिः—वर्धनं पश्चिमादिक्षेत्रान्तरपरिमाणप्रक्षेपेण दीर्घीकरणं क्षेत्रवृद्धिरिति पञ्चमोऽतीचारः, तथाहि—केनापि पूर्वा-ऽपरदिशोः प्रत्येकं योजनशतं गमनपरिमाणं विदधे, स चोत्पन्नतथाविधप्रयोजन एकस्यां दिशि नवतिं योजनानि व्यवस्थाप्याऽन्यस्यां दशोत्तरं योजनशतं करोति, द्वाभ्यामपि प्रकाराभ्यां योजनशतद्वयरूपस्य परिमाणस्याऽव्याहतत्वादित्येवमेकत्र क्षेत्रं वर्धयतो व्रतमापेक्षत्वादतीचार इति, यदि चानाभोगात् क्षेत्रपरिमाणमतिक्रान्तो भवति तदा निवर्तितव्यम् , ज्ञाते वा न गन्तव्यम् , अन्यो वा न विसर्ज-

* आधाकर्मणो निमन्त्रणे प्रतिश्रुयमाणेऽतिक्रमो भवति । पदभेदादौ व्यतिक्रमो गृहीते तृतीय इतरो गिलिते ॥१॥

१ वतिक्कम-जे ॥ २ तइउयरो-सं. ॥ तइएयरो-मु ॥ ३ संतो- जे. ॥

नीयः, अपराज्ञानतया गतौ भवेत्तदा यत्नेन लब्धं स्वयं वा विस्मृतितो गतेन लब्धं तत्परिहर्तव्यं ५ ॥२८०॥

अथ द्वितीयगुणव्रतातीचारानाह—

अप्पक्कं दुप्पक्कं सचित्तं तह सचित्तपडिबद्धं ।
तुच्छोसहिभक्खणयं दोसा उवभोगपरिभोगे ॥२८१॥

'अपक्कं दुष्पक्क'मित्यादि, 'इह हि श्रावकेण भोजनतः किल प्रायो निरवद्याहारेणैव भाव्यम्, अतस्तदपेक्षया यथासम्भवममी अतीचारा दृश्याः, तत्र अपक्वं—अग्न्यादिना यदसंस्कृतं शालि-गोधूमौषध्यादि तदनाभोगातिक्रमादिना भुञ्जानस्य प्रथमोऽतीचारः १, [1]नन्वपक्वौषधयो यदि सचेतनास्तदा सचित्तमितितृतीयपदेनैवोक्तार्थत्वादस्योपादानमसङ्गतम्, अथाऽचेतनास्तदा कोऽतीचारो ? निरवद्यत्वात्तद्भक्षणस्येति, सत्यम्, किन्तु तृतीय-चतुर्थावतीचारौ सचित्तकन्द-फलादिविषयौ प्रथमद्वितीयौ तु शाल्याद्यौषधिविषयाविति विषयकृतो भेदः, अत एवावश्यकसूत्रे 'अपउलिओसहिभक्खणया' [आव. प्रत्या.] इत्याद्युक्तम्, अथवा कणिकादेरपक्वतया सम्भवत्सचित्तावयवस्य पिष्टत्वादिनाऽचेतनमिदमिति बुद्ध्या भक्षणं व्रतसापेक्षत्वादतीचारः, तथा दुष्पक्वं-मन्दपक्वं तच्चार्धस्विन्नपृथुकतण्डुल-यव-गोधूम-स्थूलमण्डक-कङ्कटुकफलादि ऐहिकप्रत्यवायकारि यावता चांशेन सचेतनं तावता परलोकमप्युपहन्ति, पृथुकादेर्दुष्पक्वतया सम्भवत्सचेतनावयवत्वात् पक्वत्वेन चाचेतनमिति बुद्ध्या भुञ्जानस्यातीचार इति द्वितीयः २, तथा सह

१ तुलना—योगशास्त्रटीका (३।६८) ॥ २ तुलना-पञ्चाशकटीका (१।२२) धर्मसङ्ग्रहटीका (भा.१।पृ.१०६B) ॥

चित्तेन–चेतनया वर्तते यत्तत्सचित्तम्–आहारवस्तु कन्द-मूल-फलादि पृथ्वीकायादि वा, इह च निवृत्तिविषयीकृतप्रवृत्तौ भङ्गसद्भावेऽप्यतीचारभणनं व्रतसापेक्षस्या-ऽनाभोगा-ऽतिक्रमादिना प्रवृत्तौ सत्यां द्रष्टव्यम्, यद्वाऽर्धकुट्टितचिञ्चिणीपत्रादि अपरिणतोष्णोदकं वा उपभुञ्जानस्यायमतीचारो द्रष्टव्य इति तृतीयः ३, तथा सचित्तेन प्रतिबद्धं–सम्बद्धं सचेतनवृक्षादिसम्बद्धं गुन्दादि पक्वफलादि वा, सचित्तान्तर्बीजं खर्जूरा-ऽऽम्रादि, तदाहारो हि सचित्ताहारवर्जकस्यानाभोगादिना सावद्याहारप्रवृत्तिरूपत्वादतीचारश्चतुर्थः, अथवा बीजं त्यक्ष्यामि तस्यैव सचेतनत्वात्, कटाहं तु भक्षयिष्यामि तस्याचेतनत्वादिति बुद्ध्या पक्वं खर्जूरादिफलं मुखे प्रक्षिपतः सचित्तवर्जकस्य सचित्तप्रतिबद्धं भक्षयतोऽतीचारः ४, तथा तुच्छाः–असारा औषधयः–अनिष्पन्नकोमलमुद्गादिफलीरूपाः तासां भक्षणं पञ्चमोऽतीचारः ५, ननु तुच्छौषधयोऽपक्वा दुष्पक्वा सम्यक्पक्वा वा स्युः ?, यद्याद्यौ पक्षौ तदा प्रथम-द्वितीयातीचाराभ्यामेवास्योक्तत्वात्पौनरुक्त्यप्रसङ्गः, अथ सम्यक्पक्वास्तदा निरवद्यत्वादेव तद्भक्षणस्य काऽतीचारतेति ?, सत्यम्, किन्तु यथाऽपक्व-दुष्पक्वयोः सचित्त-सचित्तप्रतिबद्धयोश्च सचित्तत्वे समानेऽप्यौषध्यनौषधिकृतो विशेषः, तथाऽत्रापि सचेतनत्वौषधित्वाभ्यां समानत्वेऽप्यतुच्छत्वतुच्छत्वकृतो विशेषोऽवगन्तव्यः, तत्र च कोमलमुद्गादिफलीविशिष्टतृप्त्यकारकत्वेन तुच्छाः सचेतना एव (वा) अनाभोगातिक्रमादिना भुञ्जानस्य तुच्छौषधिभक्षणमतीचारः, अथवाऽत्यन्तावद्यभीरुतयाऽचित्ताहारताऽभ्युपगता, तत्र च यत्तृप्तिकारकं तदचेतनीकृत्यापि भक्षयतु सचित्तस्यैव वर्जनीयत्वाभ्युपगमात्, यत्पुनस्तृप्तिसम्पादनाऽसमर्थं अप्यौषधीर्लौल्येनाऽचेतनीकृत्य भुङ्क्ते तत्तुच्छौषधिभक्षणमतीचारः, तत्र भावतो विरते-

विराधितत्वाद् द्रव्यतस्तु पालितत्वादिति, एवं रजनीभोजन-मांसादिनिवृत्तिव्रतेष्वनाभोगा-ऽतिक्रमादिभिरतीचारा भावनीयाः, एते पञ्च दोषा-अतीचारा उपभोगपरिभोगव्रते इति ।

[1]तत्त्वार्थे तु सचित्तः सचित्तसम्बद्धः सम्मिश्रोऽभिषवो दुष्पक्काहारश्चेत्येवं पञ्चातीचाराः प्रतिपादिताः, तत्र सचित्त-सचित्तसम्बद्ध-दुष्पक्काहारास्त्रयः पूर्ववत्, संमिश्रस्तु सचित्तेन मिश्रः—शबल आहारः, यथा आर्द्रक-दाडिमबीज-करमन्दकादिमिश्रः पूरणादिस्तिलमिश्रो यवधानादिर्वा, अयमप्यनाभोगा-ऽतिक्रमादिनाऽतीचारः, यद्वा सम्भवत्सचित्तावयवस्याऽपक्वकणिकादेः पिष्टत्वादिना अचेतनमितिबुद्ध्या आहारः सम्मिश्राहारः, व्रतसापेक्षत्वादतीचारः, अभिषवः पुनरनेकद्रव्यसन्धाननिष्पन्नः सुरा-सौवीरकादिर्मांसप्रकारखण्डादिर्वा सुरा [2]मद्याद्यभिस्यन्दिवृक्षद्रव्योपयोगो वा, अयमपि सावद्याहारवर्जकस्यानाभोगातिक्रमादिनाऽतीचार इति ॥२८१॥

अथानर्थदण्डविरतिलक्षणस्य तृतीयगुणव्रतस्यातीचारानाह—

कुक्कुइयं मोहरियं भोगुवभोगाइरेग कंदप्पा ।
जुत्ताहिगरणमेए अइयाराऽणत्थदंडवए ॥२८२॥

'कुक्कुई'त्यादि, कुदिति [3]कुत्सायां निपातः, निपातानामानन्त्यात् कुत्सितं [4]कुचति भ्रू-नयनोष्ठ-नासा-कर-चरण-वदनविकारैः सङ्कुचतीति कुत्कुचस्तस्य भावः कौत्कुच्यम्—अनेकप्रकारं [5]भण्डानामिव

१ तुलना—तत्त्वार्थसूत्रम् (७३०) ॥ २ भिस्यन्दि० मु० । भिस्यन्दिद्रव्यं द्रव्योपयोगो—सं. । भिस्यन्दिवृक्ष्य-द्रव्योपयोगो—योग. टी. (३।१८) ॥ ३ तुलना योगशास्त्रटीका (३।११५) ॥ ४ कुञ्चति-मु. ॥ ५ भाण्डा० मु० ॥

विक्रियाकरणम्, अथवा कुत्सितः कुचः [1]कुकुचः-सङ्कोचादिक्रियावान् तस्य भावः [2]कौकुच्यम्, [3]अत्र च कोऽपि परो दूषयति स्वस्य च लाघवं सम्पद्यते न तादृशं वक्तुं चेष्टितुं वा कल्पते, प्रमादात्तथाचरणे चातीचार इति प्रथमः १, तथा मुखमस्यास्तीतिमुखरः-अनालोचितभाषी वाचाटस्तस्य भावः कर्म वा मौखर्यं-धाष्टर्य-प्रायमसभ्या ऽसम्बद्धबहुप्रलापित्वम्, अतीचारत्वम् चास्य पापोपदेशसम्भवादिति द्वितीयः २, तथा भोगः-सकृद्भोग्य आहार-माल्यादिः, उपभोगः-पुनःपुनर्भोग्य आच्छादन-वनितादिः तयोरतिरेकः-आधिक्यम्, इह च स्नान-पानभोजन-कुङ्कुम-चन्दन-कस्तूरिका-वस्त्रा-ऽऽभरणादीनामतिरिक्तानामारम्भोऽनर्थदण्डः, [4]अत्रायं सम्प्रदायः-अतिरिक्तानि बहूनि तैलामलकादीनि यदि गृह्णाति तदा तल्लौल्येन बहवः स्नातुं तडागादौ व्रजन्ति, ततः पूतरकाप्का-ऽयादिवधोऽधिकः स्यात्, न चैवं कल्पते, ततः को विधिः ?, तत्र [5]स्नाने तावत् गृह एव स्नातव्यम्, तदभावे तु तैलामलकैर्गृहे एव शिरो घर्षयित्वा तानि सर्वाणि साटयित्वा तडागादीनां तटे निविष्टोऽञ्जलिभिः स्नाति, पुष्पादिष्वपि येषु संसक्तिः सम्भवति तानि परिहरति, एवं सर्वत्र वाच्यं इति तृतीयः ३, तथा कन्दर्पः-कामस्तद्धेतुस्तत्प्रधानो वा वचनप्रयोगोऽपि कन्दर्पः, श्रावकेण हि तादृशं न वक्तव्यं येन स्वस्य परस्य वा मोहोद्रेको भवतीति चतुर्थः ४, तथाऽधिक्रियते दुर्गतावात्मा अनेनेत्यधि-

---

१ कुत्कुचः-मु० ॥ २ कौत्कुच्यं-मु० । तुलना-"अथवा कौकुच्यमिति पाठः, तत्र कुत्सितः ...." इति योगशास्त्रटीका ३-११५) ॥ ३ तुलना-एत्थ सामायारी-तारिसगाणि भासितुं ण कप्पति जारिसेहिं लोगस्स हासो उप्पज्जति.....आव. हा. टी. (पृ. ८३०b) ॥

४ तुलना-आवश्यकसूत्रस्य हारिभद्री वृत्तिः (पृ: ८३१A) ॥ ५ स्नानेच्छुना-योगशास्त्रटीका (३।११५) ॥

करणम्—उदूखल-घरट्टादि संयुक्तम्, उदूखलेन मुशलम्, हलेन फालम्, शकटेन युगम्, धनुषा शरा इत्यादि एवमेकमधिकरणमधिकरणान्तरेण युक्तं—संयुतं युक्ताधिकरणम्, इह च श्रावकेण संयुक्तमधिकरणं न धारणीयम्, तथा च सति हिंसकः कश्चित्संयुक्तमधिकरणमाददीत, वियुक्ताधिकरणतायां सुखेनैव परः प्रतिषेद्धुं शक्यते, इह च निषिद्धस्यानर्थदण्डस्य अपध्यानाचरित-प्रमादाचरित-हिंस्रप्रदान-पापकर्मोपदेश-भेदत्वेन चतुर्विधत्वात्तद्विरतिश्चतुर्धा, तत्र अपध्यानाचरितविरतौ कौत्कुच्यादिपञ्चकस्यानाभोगादिनाऽनुचिन्तनमतिचारः, आकुट्या पुनः प्रवृत्तौ भङ्ग एव, प्रमादाचरितविरतौ तु कौत्कुच्य-कन्दर्प-भोगोपभोगातिरेकाणां त्रयाणामपि करणमतिचारः, युक्ताधिकरणं तु हिंस्रप्रदानविरतेः, मौखर्ये तु पापकर्मोपदेशविरतेः इति ५ एतेऽतीचारा अनर्थदण्डव्रते ॥२८२॥

उक्ता गुणव्रतातिचाराः, अथ शिक्षाव्रतातिचारावसरः, तत्रापि सामायिकस्य तावदतिचारानाह—

काय १ मणो २ वयणाणं ३ दुप्पणिहाणं सईअकरणं च ४ ।
अणवट्ठियकरणं चिय सामइए पंच अइयारा ॥२८३॥
आणयणं १ पेसवणं २ सद्दणुवाओ य ३ रूवअणुवाओ ४ ।
बहिपोग्गलपक्खेवो ५ दोसा देसावगासस्स ॥२८४॥
अप्पडिलेहिय अप्पमज्जियं च [1]सेज्जाइ थंडिलाणि ४ तहा ।

१ सेज्जाइ-मु० ।

संमं च अणणुपालणं ५ मइयारा पोसहे पंच ॥२८५॥
एक्किगरे लिक्खिवणं १ सचित्तपिहणं च २ अन्नववएसो ३ ।
मच्छरइयं च ४ कालाईयं ५ दोसाऽतिहिविभाए ॥२८६॥

[1]"काय मणो" इत्यादि, [2]प्रणिहितिः प्रणिधानं दुष्टं च तत्प्रणिधानं च दुष्प्रणिधानं—काय-मनो-वचनानां सावद्ये प्रवर्तनम्, तत्र शरीरावयवानां पाणि-पादादीनामनिभृततावस्थापनं कायदुष्प्रणिधानम्, क्रोध-लोभ-द्रोहा-ऽभिमानेर्ष्यादिभिः कार्यव्यासङ्गः सम्भ्रमश्च मनोदुष्प्रणिधानम्, वर्णसंस्कारभावोऽर्थानवगम-श्चापलं च वाग्दुष्प्रणिधानमिति त्रयोऽतीचाराः ३, यदुक्तम्—

* "अनिरिक्खियप्पमज्जिय थंडिल्ले ठाणमाइ सेवंतो । हिंसाऽभावेऽवि न सो कडसामइओ पमायाओ ॥१॥
सामाइयं तु काउं घरचिंतं जो य चिंतए सड्ढो । [3]अट्टवसट्टोवगओ निरत्थयं तस्स सामइयं ॥२॥
कडसामइओ पुव्विं बुद्धीए पेहिऊण भासेज्जा । सइ निरवज्जं वयणं अन्नह सामाइयं न भवे ॥३॥"

---

१ आवश्यकहारिभद्र्यां (पृ. ८३४) योगशास्त्रटीकायाम् (३।११६) अपि उद्धृता इमा गाथाः ॥
२ प्रणिहितिः—मु० । इत आरभ्य तुलना योग-शास्त्रटीका (३।११६) ॥
३ अट्टवसट्टमुवगओ-आव. हा. टी. (पृ. ८३४) ॥
* अनिरीक्षिताऽप्रमार्जितस्थण्डिले स्थानादि सेवमानः । हिंसाऽभावेऽपि न स कृतसामायिकः प्रमादात् ॥१॥
सामायिकं तु कृत्वा गृहचिन्तां यस्तु चिन्तयति श्राद्धः । आर्तवशात्तोपगतो निरर्थकं तस्य सामायिकम् ॥२॥
कृतसामायिकः पूर्वं बुद्ध्या प्रेक्ष्य भाषेत । सदा निरवद्यं वचनम् अन्यथा सामायिकं न भवेत् ॥३॥

तथा स्मृतेः सामायिकविषयाया अकरणम्, कोऽर्थः ? सामायिकं मया कर्तव्यं न कर्तव्यमिति वा सामायिकं मया कृतं न कृतमिति वा प्रबलप्रमादाद्यदा न स्मरति तदाऽतीचारः, स्मृतिमूलत्वान्मोक्षसाधनानुष्ठानस्य, यदभ्यधायि–

△"न सरइ पमायजुत्तो जो सामइयं कया उ कायव्वं । कयमकयं वा तस्स हु कयंपि विहलं तयं नेयं ॥१॥" इति चतुर्थः ४ ।

तथाऽनवस्थितस्य करणं प्रतिनियतवेलायां सामायिकस्याकरणं यथाकथञ्चिद्वा करणं करणानन्तरमेव पारणं च, यदुक्तम्–

❀"काऊण तक्खणं चिय पारेइ करेइ वा अहिच्छाए । अणवट्ठियसामइयं अणायरओ न तं सुद्धं ॥१॥" इति पञ्चमः ५, इह चाद्यत्रयस्याऽनाभोगादिभिरेवातीचारत्वम्, अन्यथा तु भङ्ग एव, इतरद्वयस्य तु प्रमादबहुलतयेति; एते, सामायिकव्रते पञ्चातीचाराः ॥२८३॥

इदानीं देशावकाशिकव्रतातीचारानाह–'आणयणं पेसवणं' मित्यादि, [1]दिग्व्रतविशेष एव देशावकाशिकव्रतम्, इयांस्तु विशेषः–दिग्व्रतं यावज्जीवं संवत्सरं चातुर्मासीं वा यावत्, देशावकाशिकं तु

△ न स्मरति प्रमादयुक्तो यः सामायिकं कदा तु कर्त्तव्यम् । कृतमकृतं वा तस्य कृतमपि निष्फलमेव तकत् ज्ञेयम् ॥१॥
❀ कृत्वा तत्क्षणमेव पारयेत् करोति वा यदृच्छया । अनवस्थितं सामायिकं अनादरात् तत् न शुद्धम् ॥१॥
१ तुलना–योगशास्त्रटीका (३।११७) ॥

दिवस-प्रहर-मुहूर्तादिपरिमाणम्, तस्य च पञ्चातीचाराः, तत्र 'आणयण'मित्यादि, आनयनं–विवक्षितक्षेत्राद्बहिःस्थितस्य सचेतनादिद्रव्यस्य विवक्षिते क्षेत्रे प्रापणं प्रेष्येणेति द्रष्टव्यम्, स्वयं गमने हि मम व्रतभङ्गः स्यादितिबुद्धया प्रेष्येण यदा आनाययति सचेतनादिद्रव्यं तदाऽतीचार इति प्रथमः १, तथा प्रेषणं–प्रेष्यस्य [1]विवक्षितक्षेत्राद्बहिः प्रयोजनाय व्यापारणम्, स्वयं गमने हि मम व्रतभङ्गो भवति ततः समा भूदितिबुद्धया स्वनियमितदेशात्परतोऽन्यं व्यापारयति प्रयोजनकरणायेति, देशावकाशिकव्रतं हि मा भूद्गमनागमनादिव्यापारजनितः प्राण्युपमर्द इत्यभिप्रायेण गृह्यते, स तु स्वयं कृतोऽन्येन वा कारित इति न कश्चित्फले विशेषः, प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः, परस्य प्रेष्यस्य पुनरनिपुणत्वादीर्यासमित्यभावे दोष इति द्वितीयः २, तथा शब्दस्यानुपातः शब्दानुपातः, [2]स्वगृहवृत्तिप्राकारादिव्यवच्छिन्नभूप्रदेशकृताभिग्रहः समुत्पन्ने प्रयोजने व्रतभङ्गभयेन स्वयमगमनाद् [3]वृत्तिप्राकारादिप्रत्यासन्नीभूय काशितादिशब्दं करोति, आकारणीयानां कर्णेऽनुपातयति ते च तच्छब्दश्रवणात्तत्समीपमागच्छन्तीति ३, तथा रूपं–स्वशरीरसम्बन्धि, उत्पन्नप्रयोजनः शब्दमनुच्चारयन्नाह्वानीयानां दृष्टावनुपातयति तद्दर्शनाच्च ते तत्समीपमागच्छन्तीति रूपानुपातोऽयम् ४, अयमत्र परमार्थः–विवक्षितक्षेत्राद्बहिः स्थितं कञ्चन नरं व्रतभङ्गभयादाह्वातुमशक्नुवन् यदा स्वकीयशब्दश्रावण-रूपदर्शनव्याजेन तमाकारयति तदा व्रतसापेक्षत्वात् शब्दानुपात-रूपानुपातावतीचाराविति तृतीयचतुर्थौ,, तथा बहिर्विवक्षितक्षेत्रात्पुद्गलस्य–लेष्टु-काष्ठशकलादेः प्रक्षेपणं प्रक्षेपः, विशिष्टदेशाभिग्रहे हि सति

१ विवक्षित–स ॥ २ स्वगृहवृत्ति० मु० । तुलना–आव. हा. टी. (पृ. ८३५) ॥ ३ वृत्ति० मु० ॥

कार्यार्थी परतो गमननिषेधाद्यदा लेष्ट्वादीन् परेषां बोधनाय क्षिपति तदा लेष्ट्वादिपातसमनन्तरमेव ते तत्समीपमनुधावन्ति, ततश्च तान् व्यापादयतः स्वयमनुपमर्दकस्याप्यतीचारो भवतीति पञ्चमः ५, इह चाद्यद्वयमव्युत्पन्नबुद्धित्वेन सहसाकारादिना वा, अन्त्यत्रयं तु मायाचितया अतीचारतां यातीति, एते दोषा-अतीचारा देशावकाशिकव्रतस्य ।

अत्राहुर्वृद्धाः-दिग्व्रतसङ्क्षेपकरणं शेषव्रतसङ्क्षेपकरणस्याप्युपलक्षणं द्रष्टव्यम्, तेषामपि सङ्क्षेपस्याऽवश्यंकर्तव्यत्वात् प्रतिव्रतं च सङ्क्षेपकरणस्य भिन्नव्रतत्वे द्वादश व्रतानीति सङ्ख्याविरोधः स्यादिति । तत्र केचिदाचक्षते-दिग्व्रतसङ्क्षेप एव देशावकाशिकव्रतम्, तदतीचाराणां दिग्व्रतानुसारितयैवोपलम्भात् । अत्रोच्यते, यथोपलक्षणतया शेषव्रतसङ्क्षेपकरणमपि देशावकाशिकमुच्यते तथोपलक्षणतयैव तदतीचारा अपि तदनुसारिणो द्रष्टव्याः, अथवा प्राणातिपातादिव्रतान्तरसङ्क्षेपकरणेषु वध-बन्धादय एवातीचाराः, दिग्व्रतसङ्क्षेपकरणे तु सङ्क्षिप्तत्वात् क्षेत्रस्य प्रेष्यप्रयोगादयोऽप्यतीचाराः स्युरिति भेदेन दर्शिताः, न च सर्वेष्वपि व्रतभेदेषु विशेषतोऽतीचारा दर्शनीयाः, रात्रिभोजनादिव्रतभेदेषु तेषामदर्शितत्वादिति ॥२८४॥

[1]अथ **पौषधव्रतातीचारानाह**- [2]**'अप्पडिलेहिय'**मित्यादि. अप्रत्युपेक्षिता-ऽप्रमार्जिताभ्यां दुष्प्रत्युक्षितदुष्प्रमार्जितयोरपि ग्रहणम्, नञः कुत्सार्थस्यापि दर्शनात्, यथा कुत्सितो ब्राह्मणोऽब्राह्मणः, ततोऽप्रत्युपेक्षितदुष्प्रत्युपेक्षितं शय्या-संस्तारकादीति प्रथमोऽतीचारः, १ अप्रमार्जित-दुष्प्रमार्जितं शय्यासंस्तारकादीति द्वितीयः २, अप्रत्युपेक्षित दुष्प्रत्युपेक्षितमुच्चार-प्रश्रवणादिस्थण्डिलमिति तृतीयः ३, अप्रमार्जित-दुष्प्रमार्जितमु-

१ पोषध० सं० ॥ २ तुलना-योगशास्त्रटीका (३।११८) ॥

चार-प्रश्रवणादिस्थण्डिलमिति चतुर्थः ४, तत्र अप्रत्युपेक्षितं-चक्षुषाऽनिरीक्षितम् , दुष्प्रत्युपेक्षितं-विभ्रान्तचेतसा निरीक्षितम् , अप्रमार्जितं-रजोहरण-वस्त्राञ्चलादिना न विशोधितम् , दुष्प्रमार्जितम्-अविधिनाऽनुपयुक्ततया च रजोहरणादिना विशोधितम् , [1]इह च सामाचारी-गृहीतपौषधो नाप्रत्युपेक्षितां शय्यामारोहति, संस्तारकं वा पौषधशालां वा सेवते, दर्भवस्त्रं वा शुद्धवस्त्रं वा भूमौ संस्तृणाति, कायिकाभूमेश्चागतः पुनरपि संस्तारकं प्रत्युपेक्षते, अन्यथाऽतीचारः स्यात् , एवं पीठादिष्वपि वाच्यम् ४, तथा पौषधव्रतस्य सम्यग्-यथागमं निष्प्रकम्पेन चेतसा अननुपालनम्-अनासेवनम् , तथाहि-आहारादिविषये चतुर्विधे पौषधे प्रतिपन्ने सति बुभुक्षा-तृषापीडितः सन्नेवं चिन्तयति-प्रातरिदमिदं शाल्योदन घृतपूरपुरस्सरमाहारजातं पाचयिष्यामि द्राक्षापानकादीनि च पानकानि कारयिष्यामि, तथा शरीरसत्कारपौषधक्लेशितश्चिन्तयति-प्रभाते स्नान-कुङ्कुमादिविलेपनं भव्यरीत्या करिष्यामिति, तथा ब्रह्मचर्यपौषधे चिन्तयति पूर्वक्रीडितानि मदनोद्दीपकानि च वचनचेष्टादीनि करोतीति, तथा अव्यापारपौषधेऽपीदं मे करणीयं व्यवहरणीयं चास्ति इदं लभ्यमिदं च देयमित्यादि चिन्तयन्नतिचरति व्रतमिति पञ्चमः ५ एते अतीचाराः पञ्च **पौषधव्रते** ॥२८५॥

इदानीमतिथिसंविभागव्रतातीचारानाह-'**सचित्ते निक्खिवणमि**' त्यादि, [2]सचित्ते-सचेतने पृथिवी-जल-कुम्भीपचुल्ली-धान्यादौ, निक्षेपणं निक्षेपः-साधुदेयभक्तादेः स्थापनमदेयबुद्ध्या, असौ हि

१ तुलना-'एत्थ पुण सामायारी कडजोसधो णो अप्पडिलेहिया सज्जं दुरुहति, संथारगं वा दुरुहइ, पोसहसालं वा सेवइ, दब्भवत्थं वा सुद्धवत्थं वा भूमिए संथरति, काइयभूमितो वा आगतो पुणरवि पडिलेहति, अण्णधातियारो, एवं पीढगादिसुवि विभासा' । [आवश्यक हा. टी. (पृ. ८३६B)॥] २ इत आरभ्य तुलना-योगशास्त्रटीका (३।११६) ॥

तुच्छबुद्धिर्जानाति यत् मया गृहीतनियमेन साधूनामवश्यं देयम्, न चैते मुनयः सचित्ते निक्षिप्तं गृहीष्यन्ति मया दीयमानमपि ततो मया निजनियमोऽप्याराधितो भविष्यति 'वस्त्वप्यशनादिकं रक्षितं भविष्यतीत्येवं कुर्वतोऽतीचारः प्रथमः १, तथा सचित्तेन-मूरण-कन्द-पत्र-पुष्प-फलादिना तथाविधयैव बुद्ध्या पिधानम्-आच्छादनं देयस्य वस्तुन इति द्वितीयः २, चः समुच्चये, तथा-अन्यस्य-परस्य व्यपदेशोऽन्यव्यपदेशः, इदं हि शर्करा-गुडखण्ड घृतपूरादिकं यज्ञदत्तसम्बन्धीति व्रतिनः श्रावयन् ढौकयत्यदेयबुद्ध्या, न च व्रतिनः स्वामिनाऽननुज्ञातं गृह्णन्तीति नियमोऽपि तेन न भग्नः शर्करादिकं च रक्षितमिति तृतीयोऽतीचारः ३, तथा मत्सरः-कोपः, स विद्यते यस्येति मत्सरिकस्तस्य भावो मत्सरिकता तया ददतिचरति व्रतम्, कोऽभिप्रायः ?-मार्गितः सन् कुप्यति सदपि वस्तु न ददातीति, अथवाऽनेन तावद् द्रमकेण मार्गितेन दत्तं मुनिभ्यः किमहं ततोऽपि निकृष्टः ? इति मात्सर्यात्-परगुणाऽसहनलक्षणाद्ददतोऽतीचारश्चतुर्थः ४, तथा कालस्य-साधूनामुचितभिक्षासमयस्यातीतमतिक्रमः-अदित्सयाऽनागतभोजन-पश्चाद्भोजनद्वारेणोल्लङ्घनं कालातीतम्, अयं भावः-उचितो यो भिक्षाकालः साधूनां तं लङ्घयित्वा प्रथमं वा भुञ्जानस्य गृहीताऽतिथिसंविभागनियमस्यातीचारः पञ्चमः ५, एते दोषा अतिथिविभागे-अतिथिसंवि[2]भागव्रते इति ॥२८६॥

सम्प्रति 'भरहेमि भूय-संपइ-भविस्सतित्थंकराण नामाइं । एरवयंमिवि ताइं [3]संपइभाविजिणनामाइं'ति सप्तमं द्वारं विवरीतुमाह-

---

१ वस्त्वप्यन्नादिकं-सं. ॥ २ •विभागे व्रते ॥

३ संपइ जिणभाविनामाइं-मु० । 'ताइं जिणाण संपइभविस्साणं' इति द्वारगाथायाम् (३) ॥

भरहेऽतीए संपइ भाविजिणे वंदिमो चउव्वीसं ।
एरवयंमिवि संपइभाविजिणे नामओ वंदे ॥२८७॥
[1]केवलनाणी १ निव्वाणी २ सायरो ३ जिणमहायसो ४ विमलो ५ ।
[2]नाहसुतेया ६ सिरिहर ७ दत्तो ८ दामोयर ९ सुतेओ १० ॥२८८॥
सामिजिणो य ११ सिवासी १२ सुमई १३ सिवगइ १४ जिणो य अरथाहो १५(अघाहो)।
नाहनमीसर १ अनिलो १७ जसोहरो १८ जिणकयग्घो य १९ ॥२८९॥
धम्मीसर २० सुद्धमई २१ सिवकरजिण २२ संदणो य २३ संपइ य २४ ।
तीउरसप्पिणिभरहे जिणेसरे नामओ वंदे ॥२९०॥
उसभं १ अजियं २ संभव ३ मभिणंदण ४ सुमइ ५ पउमप्पह ६ सुपासं ७ ।
चंदप्पह ८ सुविहिं ९ सीअल १० सेज्जंसं ११ वासुपुज्जं च १२ ॥२९१॥
विमल १३ मणंतं १४ धम्मं १५ संतिं १६ कुंथुं १७ अरं च १८ मल्लिं च १९ ।
मुणिसुव्वय २० नमि २१ नेमी २२ पासं २३ वीरं २४ च पणमामि ॥२९२॥
जिणपउमनाह १ सिरिसुरदेव २ सुपास ३ सिरिसयंपभयं ४ ।
सव्वाणुभूइ ५ देवसुय ६ उदय ७ पेढाल ८ मभिवंदे ॥२९३॥

१ तुलना-विचारसार: (गाथा-५७ तः) ॥ २ सव्वाणुभूइ (नाहसुतेया)-मु० ॥

पोट्टिल ९ सयकित्तिजिणं १० मुणिसुव्वय ११ अमम १२ निक्कसायं च १३।
जिणनिप्पुलाय १४ सिरिनिममत्तं १५ जिणचित्तगुत्तं १६ च ॥२९४॥
पणमामि समाहिजिणं १७ संवरय १८ जसोहरं १९ विजय २० [1]मल्लिं २१।
देवजिण २२ ऽणंतविरियं २३ भद्दजिणं २४ भाविभरहंमि ॥२९५॥

"**भरहेतीए संपई**' त्यादि, भरते–भारते क्षेत्रेऽतीतान्, सम्प्रति–वर्तमानान्, भाविनो-भविष्यतश्च जिनान् वन्दामहे चतुर्विंशतिम्, [2]ऐरवते ऐरवतक्षेत्रेऽपि सम्प्रतिवर्तिनो भाविनश्च नामतो नामानि गृहीत्वेत्यर्थः, इदं च विशेषणं भारतजिनेष्वपि सम्बन्धनीयम्, ऐरवतेऽतीतजिननामानि न ज्ञायन्ते ततो वार्तमानि कभविष्यज्जिनवन्दनमेवोद्दिष्टम्, वन्दे–अभिवादये स्तौमि चेत्यर्थः ॥२८७॥

तान्येव नामानि भारताऽतीतजिनानामाह–'**केवलनाणी**'त्यादि गाथा त्रयम्, केवलज्ञानी १ निर्वाणी २ सागरो जिनो ३ महायशाः ४ विमलो ५ नाथसुतेजाः अन्ये सर्वानुभूतिमाहुः ६ श्रीधरो ७ दत्तः ८ दामोदरः ९ सुतेजा १० इति प्रथमगाथायां दश ॥२८८॥

स्वामिजिनः ११, चः समुच्चये, शिवाशी अन्ये मुनिसुव्रतमाहुः १२ सुमतिः १३ शिवगतिर्जिन १४ श्चाबाधः अन्येऽस्तागमाहुः १५, नाथनेमीश्वरो १६ ऽनिलो १७ यशोधरो १८ जिनकृतार्थश्च १९ इति गाथायामस्यां नव जिनाः ॥२८९॥

१–४६८ तमगाथायामत्रैव 'मल्लनामाणं' पाठः ॥ २ ऐरवतेऽपि-सं. ॥

धर्मीश्वर. केचिज्जिनेश्वरमाहुः २०, शुद्धमतिः २१ शिवकरजिनः २२ स्यन्दनश्च २३ सम्प्रतिजिनश्च २४ अतीतोत्सर्पिण्यां भारते जिनेश्वरानेतान्नामतो वन्देऽहमिति तृतीयगाथायां पञ्च जिनाः ॥२९०॥

भारतवर्तमानजिनान्नामत आह–'उसभमि' त्यादि गाथाद्वयम्, ऋषभमजितं सम्भवमभिनन्दनं सुमतिं पद्मप्रभं सुपार्श्वं चन्द्रप्रभं सुविधिं शीतलं श्रेयांसं वासुपूज्यं च ॥२९१॥

विमलमनन्तं धर्मं शान्तिं कुंथुं अरं च मल्लिं च मुनिसुव्रतं नमिं 'नेमी' त्ति पदैकदेशे पदसमुदायोपचाराद् अरिष्टनेमिम्, एवं पार्श्वनाथं महावीरं च प्रणमामि ॥ २९२ ॥

भविष्यद्भारतजिनान्नामत आह– [1]'जिणपउमनाभमित्यादि' गाथात्रयम् । जिनं पद्मनाभं श्रीसुरदेवं श्रीसुपार्श्वं श्रीस्वयम्प्रभं सर्वानुभूतिं देवश्रुतम् उदयं पेढालम् अभिवन्दे इति प्रथमगाथायामष्टौ [2]जिनाः ॥२९३॥

पोट्टिलं शतकीर्तिजिनं मुनिसुव्रतम् अममं निष्कषायम्, चः समुच्चये, जिनं निष्पुलाकं श्रीनिर्ममत्वं जिनं चित्रगुप्तं चेति द्वितीयगाथायामष्टौ, अभिवन्दे इत्यत्रापि [3]योज्यम् ॥२९४॥

प्रणमामि समाधिजिनं संवरकं यशोधरं विजयं मल्लिं देवजिनम् अनन्तवीर्यं भद्रजिनम्, अन्ये भद्रकृतमाहुः, इति भाविनो भारते जिनाः ॥२९५॥

१ 'जिणपउमे' त्यादि जिनं-मु० ॥ २ जिनाः । 'पोट्टिले' त्यादि पोट्टिलं-मु० ॥
३ योज्यम् । 'पणमामी' त्यादि प्रणमामि-मु० ॥

[1]समवायाङ्गे त्वेवं नामानि दृश्यन्ते, यथा—

'महापउमे १ सुरादेवे २ सुपासे ३ य सयंपभे ४ । सव्वाणुभूई ५ अरहा, देवगुत्ते ६ य होक्खइ ॥१॥
उदए ७ पेढालपुत्ते ८ य, पोट्टिले ९ सयए १० इय। मुणिसुव्वए ११ य अरहा, सव्वभावविऊ १२ जिणे ॥२॥
अमले १३ निक्कसाए १४ य, निप्पुलाए १५ य निम्ममे १६ । चित्तगुत्ते १७ समाही १८ य, [2]आगमिस्सेण होक्खइ ॥३॥
संवरे १९ अनियट्टी २० य, विवाए २१ विमले २२ य । देवोववाए २३ अरिहा, अणंतविजए २४ इय ॥४॥

—[सू० १५१, पृ. ३०५]

[3]आगमिस्सेण होक्खइ' त्ति, आगमिष्यता कालेन भविष्यतीत्यर्थः, एवमग्रेऽपि नामविषये यत्र क्वचित्समवायांगादिभिर्विसंवादो दृश्यते तत्र मतान्तरमवसेयमिति ॥२८७–२९५॥

[4]ऐरवतवार्तमानिकजिनेन्द्रानाश्रित्य आह—

बालचंदं १ सिरिसिच्चयं २ अग्गिसेणं ३ च नंदिसेणं ४ च ।
सिरिदत्तं ५ च वयधरं ६ सोमचंद ७ [5]जिणदीहसेणं च ८ ॥२९६॥

---

१ मुद्रितसमवायाङ्गे पाठभेदाः दृश्यन्ते । तुलना—लोकप्रकाशः (सर्ग ३४।४०१ पश्चात्) ॥
२ आगमस्सेण—मु० ॥ ३ आगमेस्सेण—जे.। आगमेस्साए—लो० प्र० (३४।४०१) ॥ ४ ऐरवततीर्थकृतां नामभेददर्शनार्थं द्रष्टव्यं समवायाङ्गसूत्रम् (सू० १५६, पृ० ३०४, ३०८) ॥ ५ जिणं दी० सं० ॥

वंदे सयाउ ९ सचइ १० जुत्तिस्सेणं ११ जिणं च सेयंसं १२ ।
सीहसेणं १३ सयंजल १४ उवसंतं १५ देवसेणं १६ च ॥२९७॥
महाविरिय १७ पास १८ मरुदेव १९ सिरिहरं २० सामिकुट्ठ २१ मभिवंदे ।
अग्गिसेणं २२ जिणमग्गदत्तं २३ सिरिवारिसेणं २४ च ॥२९८॥
इय संपइजिणनाहा एरवए कित्तिया सणामेहिं ।
अहुण॥ भाविजिणिंदे भिषणामेहिं पकित्तेमि ॥२९९॥
सिद्धत्थं १ पुन्नघोसं २ जमघोसं ३ सायरं ४ सुमंगलयं ५ ।
सव्वट्ठसिद्ध ६ निव्वाणसामिं ७ वंदामि धम्मधयं ८ ॥३००॥
तह सिद्धसेण ९ महसेण नाह १० रविमित्त ११ सव्वसेणजिणे १२ ।
सिरिचंदं १३ दढकेउं १४ महिंदयं १५ दीहपासं १६ च ॥३०१॥
सुव्वय १७ सुपासनाहं १८ सुकोसलं १९ जिणवरं अणंतत्थं २० ।
विमलं २१ उत्तर २२ महरिट्ठि २३ देवयाणंदयं २४ वंदे ॥३०२॥
निच्छीण्णभवसमुद्दे वीसाहियसयजिणे सुहसमिद्धे ।
सिरिचंदथुणियहनए सासयसुहदायए नमह ॥३०३॥

'बाले'त्यादि गाथाचतुष्कम्, बालचन्द्रं श्रीसिंचयम् [1]अग्निषेणं च नन्दिषेणं च श्रीदत्तं च व्रतधरं

१ अग्निसेनं-सं० ॥

सोमचन्द्रं जिनदीर्घसेनं चेति प्रथमगाथायामष्टौ वन्दे इति क्रिया, शतायुषं सत्यकिं च युक्तिसेनं जिनं च श्रेयांसं सिंहसेनं स्वयंजलम् उपशान्तं देवसेनं चेति द्वितीयगाथायामष्टौ, महावीर्यं पार्श्वं, मरुदेवं श्रीधरं [1]स्वामिकोष्ठुनभिवन्दे इति क्रिया, [2]अग्निसेनं जिनमग्रदत्तं मार्गदत्तं वा श्रीवारिषेणं चेति तृतीयगाथायामष्टौ, इत्येवमैरवते साम्प्रतिकजिननाथाः कीर्तिताः स्वनामभिः, अधुना भाविनो जिनेन्द्रानैरवते निजनामभिः प्रकीर्तयामि ॥२९६-२९९॥

तान्येवाह- सिद्धत्थे'त्यादि गाथात्रयम्, सिद्धार्थं पुण्यघोषं पूर्णघोषं वा यमघोषं सागरं सुमङ्गलं सर्वार्थसिद्धं निर्वाणस्वामिनं वन्दे धर्मध्वजमिति प्रथमगाथायामष्टौ जिनाः, तथा सिद्धसेनं महासेननाथं रविमित्रं सत्यसेनजिनं श्रीचन्द्रं दृढकेतुं महेन्द्रं दीर्घपार्श्वं च इति द्वितीयगाथायामष्टौ जिनाः, सुव्रतं सुपार्श्वनाथं सुकोशलं जिनवरमनन्तार्थं विमलं उत्तरं महर्द्धिं देवतानन्दकं वन्दे इति तृतीयगाथायां जिनाष्टकम् ॥३००-३०२॥

अथ पूर्वोक्तानां तीर्थकृतां सर्वसङ्ख्यामाह- [3]निस्तीर्णभवसमुद्रान् विंशत्यधिकशतसङ्ख्यजिनान् सुखसमृद्धान् श्रीचन्द्रमुनिपतिनतान् शाश्वतसुखदायकान्नमत भव्यलोका यूयमिति, अत्र च चतुर्विंशतिः पञ्चभिर्गुणिता विंशत्युत्तरं शतं भवतीति ॥३०३॥

---

१ सामकोष्ठ० सं० ॥ २ अग्निप्रभ-आगमसार संग्रह (पृ ८) ॥

३ निश्चन्नेत्यादि निस्ती०-सं०

इदानीं 'उसभाइजिणिंदाणं आइमगणहर'त्यष्टमं द्वारं विवरीतुमाह—

[1]सिरिउसभसेण १ पहु सोहसेण २ चारु ३ वज्जनाहक्खा ४ ।
चमरो ५ पज्जोय ६ वियब्भ ७ दिण्णपहवो ८ वराहो ९ य ॥३०४॥
पहुनंद १० कोत्थुहावि ११ य सुभोम १२ मंदर १३ जसा १४ अरिट्ठो १५ य ।
चक्काउह १६ संबा १७ कुंभ १८ भिसय १९ मल्ली २० य सुंभो २१ य ॥३०५॥
वरदत्त २२ अज्जदिन्ना २३ तहिंदभूई २४ गणहरा पढमा ।
सिस्सा रिसहाईणं हरंतु पावाइं पणयाणं ॥३०६॥

'सिरिउसभसेणे' त्यादि गाथात्रयम्, श्रीऋषभसेन-प्रभुसिंहसेन-चारु-वज्रनाभाख्याः चमरः प्रद्योत-विदर्भ-दत्तप्रभवः वराहश्च प्रभुनन्द-कौस्तुभावपि सुभौम-मन्दर यशसः अरिष्टश्च चक्रायुध-शम्बौ कुम्भः भिषजो मल्लिश्च सुम्भश्च वरदत्त आर्यदत्तः तथा इन्द्रभूतिश्च, एते प्रथमगणधराः शिष्या वृषभादीनां जिनानां हरन्तु दुरितानि प्रणतानाम् ॥३०४–३०६॥

इदानीं 'पवित्तिणि'त्ति नवमं द्वारमाह–

[2]बंभी १ फग्गु २ सामा ३ अजिया ४ तह कासवी ५ रई ६ सोमा ७ ।
सुमणा ८ वारुणि ९ सुजसा १० धारिणी ११ धरिणी १२ धरा १३ पउमा १४ ॥३०७॥
अज्जा सिवा १५ सुहा १६ दामणी १७ य रक्खी १८ य बंधुमइनामा १९ ।
पुप्फवई २० अनिला २१ जक्खदिन्ना २२ तह पुप्फचूला २३ य ॥३०८॥

१ तुलना-विचारसारः (गाथा १७४–१७६) ॥ २ तुलना-विचारसारः (गाथा १८३–१८४) ॥

चंदण २४ सहिया उ पवत्तिणीओ चउवीसजिणवरिंदाणं ।
दुरियाइं हरंतु सया सत्ताणं भत्तिजुत्ताणं ॥३०९॥

बंभी'त्यादि गाथात्रयम्, तत्र ब्राह्मी फल्गुः श्यामा अजिता तथा काश्यपी रतिः सोमा सुमना वारुणी सुयशा धारिणी धरिणी धरा पद्मा इति प्रथमगाथायां चतुर्दश प्रवर्तिनीनामानि। आर्या शिवा शुभा दामिनी च रक्षी च बन्धुमतीनामा पुष्पवती अनिला यक्षदत्ता तथा पुष्पचूला, चः [1]समुच्चये सर्वत्र, चन्दनासहिता तु एताः प्रवर्तिन्यश्चतुर्विंशतेर्जिनेन्द्राणां दुरितानि हरन्तु सदा सत्त्वानां भक्तियुक्तानाम् ॥३०७-३०९॥

इदानीं 'अरिहंतज्जणठाण'त्ति दशमं द्वारं विवरीतुमाह-

अरिहंत १ सिद्ध २ पवयण ३ गुरु ४ थेर ५ बहुस्सुए ६ तवस्सी ७ य।
वच्छल्लया य एसिं अभिक्खनाणोवओगो ८ य ॥३१०॥
दंसण ९ विणए १० आवस्सए य ११ सीलव्वए १२-१३ निरइयारो।
खणलव १४ तव १५ चियाए १६ वेयावच्चे समाही १७ य ॥३११॥
अप्पुव्वनाणगहणे १८ सुयभत्ती १९ पवयणे पभावणया २० ।
एएहिं कारणेहिं [2]तित्थयरत्तं लहइ जीवो ॥३१२॥ [आव० निर्युक्ति १७९-१८१]

'अरिहंते' त्यादि [3]गाथात्रयम्, अत्र प्रथमगाथायां अष्टौ कारणान्युक्तानि, द्वितीयगाथायां नव,

१ समुच्चये चन्द० सं॥ २ तित्थयरत्तं-मु०॥ ३ गाथावशकं-मु०॥

तृतीयगाथायां त्रीणि, तत्र प्रथमगाथाव्याख्या– [1]अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तः–तीर्थंकराः १, अपगतसकलकर्मांशाः परमसुखिन एकान्तकृतकृत्याः सिद्धाः २, प्रवचनं–द्वादशाङ्गं तदुपयोगानन्यत्वात्सङ्घो वा प्रवचनम् ३, गृणन्ति यथावस्थितं शास्त्रार्थमिति गुरवो–धर्मोपदेशादिदातारः ४, स्थविरा जाति-श्रुत-पर्यायभेदभिन्नाः, तत्र जातिस्थविराः षष्टिवर्षप्रमाणाः, श्रुतस्थविराः समवायाङ्गधारिणः, पर्यायस्थविरा विंशतिवर्षव्रतपर्यायाः ५, बहु–प्रभूतं श्रुतं येषां ते बहुश्रुताः, तच्च बहुश्रुतत्वमापेक्षिकं प्रतिपत्तव्यम्, श्रुतं च त्रिधा–सूत्रतोऽर्थत उभयतश्च, तत्र सूत्रधरेभ्योऽर्थधराः प्रधानाः तेभ्योऽप्युभयधराः प्रधाना इति ६, विचित्रमनशनादिभेदभिन्नं तपो विद्यते येषां ते तपस्विनः–सामान्यसाधवः ७, अर्हन्तश्च सिद्धाश्च प्रवचनं च गुरवश्च स्थविराश्च बहुश्रुताश्च तपस्विनश्च अर्हत्सिद्ध–प्रवचन-गुरु-स्थविर-बहुश्रुत-तपस्विनः, सूत्रे च 'बहुस्सुए' इत्यत्र एकारः प्राकृतत्वादलाक्षणिकः, तेषु, 'एसि'ति प्राकृतत्वात्सप्तम्यर्थे षष्ठी, तत एतेषु सप्तसु स्थानेषु वत्सलभावो वत्सलता–अनुरागः यथावस्थितगुणोत्कीर्तनं तदनुरूपोपचारलक्षणा तीर्थकरनामकर्मबन्धकारणमिति शेषः, तथा अभीक्ष्णम्–अनवरतं ज्ञानोपयोगो–ज्ञाने व्याप्रियमाणता, इदमष्टमं कारणम् ८। अथ द्वितीयगाथाव्याख्या– दर्शनं–सम्यक्त्वं विनयो–ज्ञानादिविनयः, स च प्रागेवोक्तो वक्ष्यमाणो वा, दर्शनं च विनयश्च दर्शन-विनयं समाहारद्वन्द्वः तस्मिन् ९-१०, आवश्यकम्–अवश्यकर्तव्यं प्रतिक्रमणादि तस्मिन् ११, शीलानि च व्रतानि च शील-व्रतम्, अत्रापि समाहारद्वन्द्वः तस्मिन्, तत्र शीलानि–उत्तरगुणाः,

१ तुलना- आवश्यकसूत्रस्य हारिभद्री वृत्तिः (पृ.११६) ॥

व्रतानि–मूलगुणाः, तेषु निरतिचारः सन् तीर्थकरनामकर्म बध्नातीति क्रियायोगः १२-१३, एतावता पञ्च कारणान्युक्तानि, तथा क्षण-लवे तपसि त्यागे वैयावृत्त्ये च समाधिस्तीर्थकरनामकर्मबन्धकारणम्, तत्र क्षण-लवग्रहणमशेषकालविशेषोपलक्षणम्, क्षण-लवादिषु कालविशेषेषु निरन्तरं संवेगभावनातो ध्यानासेवनतश्च समाधिः क्षण-लवसमाधिः १४, तथा तपसि–बाह्या-ऽभ्यन्तरभेदभिन्ने यथाशक्ति निरन्तरं प्रवृत्तिस्तपःसमाधिः १५, त्यागो द्विधा–द्रव्यत्यागो भावत्यागश्च, द्रव्यत्यागो नाम आहारोपधि-शय्यादिनामप्रायोग्याणां परित्यागः, प्रायोग्याणां च यतिजनेभ्यो दानम्, भावत्यागः क्रोधादीनां विवेको ज्ञानादीनां च यतिजनेभ्यो वितरणम्, एतस्मिन् द्विविधेऽपि त्यागे सूत्रानतिक्रमेण यथाशक्ति निरन्तरं प्रवृत्तिस्त्यागसमाधिः १६, वैयावृत्त्यं दशविधम्, तद्यथा–आचार्यवैयावृत्त्यम् १, उपाध्याय वैयावृत्त्यम् २, स्थविरवैयावृत्त्यम् ३, तपस्विवैयावृत्त्यम् ४, ग्लानवैयावृत्त्यम् ५, शैक्षकवैयावृत्त्यम् ६, साधर्मिकवैयावृत्त्यम् ७, कुलवैयावृत्त्यम् ८, गणवैयावृत्त्यम् ९, सङ्घवैयावृत्त्यम् १० चेति, एकैकं त्रयोदशविधम्, तद्यथा-भक्तदानम् १, पानदानम् २, आसनप्रदानम् ३, उपकरणप्रत्युपेक्षा ४, पादप्रमार्जनम् ५, वस्त्रप्रदानम् ६, भेषजप्रदानम् ७, अध्वनि साहाय्यम् ८, दुष्ट-स्तेनादिभ्यो रक्षणम् ९, वसतौ प्रविशतां दण्डकग्रहणम् १०, कायिकामात्रकसमर्पणम् ११, संज्ञामात्रकसमर्पणम् १२, श्लेष्ममात्रकसमर्पणम् १३ चेति, एतेषु वैयावृत्त्यभेदेषु यथाशक्ति निरन्तरं प्रवृत्तिर्वैयावृत्त्यसमाधिः १७, अथ तृतीयगाथाव्याख्या–अपूर्वस्य ज्ञानस्य निरन्तरं ग्रहणमपूर्वज्ञानग्रहणम् अष्टादशं तीर्थकरनामकर्मबन्धकारणम् १८, एकोनविंशतितमं श्रुतभक्तिः–श्रुतविषयं बहुमानम् १९, विंशतितमं प्रवचनप्रभावना यथाशक्ति

प्रवचनार्थोपदेशदानादिरूपा, एभिरनन्तरोक्तैः कारणैः[1] स्तीर्थकरत्वं लभते जीवः ॥३१०-३१२॥

एतानि च कानिचित्सूत्रकार एव स्वयं व्याचष्टे–

संघो पवयणमित्थं गुरुणो धम्मोवएसयाईया ।
सुत्तत्थोभयधारी बहुस्सुया होंति विक्खाया ॥३१३॥
जाई-सुय-परियाए पडुच्च थेरो तिहा जहक्कमेणं ।
सट्ठीवरिसो समवायधारओ वीसवरिसो य ॥३१४॥
भत्तो पूया वन्नप्पयडण वज्जणमवन्नवायस्स ।
आसायणपरिहारो अरिहंताईण बच्चल्लं ॥३१५॥
नाणुवओगोऽभिक्खं दंसणसुद्धी य विणयसुद्धी य ।
आवस्सयजोएसुं सील-वएसु निरइयारो ॥३१६॥
संवेगभावणा झाणसेवणं खण-लवाइकालेसु ।
तवकरणं जहजणसंविभागकरणे जहसमाही ॥३१७॥
वेयावच्चं दसहा गुरुमाईणं समाहिजणणं च ।
किरियादारेण तहा अपुव्वनाणस्स गहणं तु ॥३१८॥

१ वीसस्थानकतपविध्यादि दर्शनार्थं द्रष्टव्यः–लोकप्रकाशः (सर्ग ३०।१तः) ॥

आगमबहुमाणो चिय तित्थस्स पभावणं जहासत्ती ।
एएहिं कारणेहिं तित्थयरत्तं समज्जिणइ ॥३१९॥

'संघोपबृंहणमि'त्यादिगाथासप्तकम्, व्याख्यातार्थं चैतत्, नवरं स्थविर-बहुश्रुतयोर्गाथानुलोम्याद्व्यतिक्रमनिर्देशः, तथा तृतीयगाथायां भक्तिः—आन्तरो बहुमानविशेषः, पूजा—यथोचित्येन पुष्प-फलाऽऽहार-वस्त्रादिभिरुपचारः, वर्णस्य-श्लाघायाः प्रकटनं-प्रकाशनम्, वर्जनं परिहरणमवर्णवादस्य-अश्लाघायाः, आशातनाया—वक्ष्यमाणायाः परिहारो—वर्जनम्, एतदर्हदादीनां सप्तानां वात्सल्यं—वत्सलता । तथा षष्ठगाथायां वैयावृत्त्यं-भक्त-दानादिक्रियाद्वारेण गुर्वादीनां समाधिजननं तत् पुनर्दशधा पूर्वोक्तप्रकारेण, यद्वा शील-व्रताभ्यामेकमेव कारणं कृत्वा समाधिरिति विभिन्नमेव तीर्थकरगोत्रबन्धस्थानं विवक्ष्यते, ततो वैयावृत्त्यं दशधा गुर्वादीनां तथा तेषामेव क्रियाद्वारेण समाधिजननं—कार्य-करणद्वारेण स्वस्थतापादनमिति । तथा ऋषभनाथेन वर्धमानस्वामिना च पूर्वभवे एतान्यनन्तरोक्तानि सर्वाण्यपि स्थानान्यासेवितानि, मध्यमेषु पुनरजितस्वामिप्रभृतिषु द्वाविंशतितीर्थकरेषु केनाप्येकम्, केनापि द्वे, केनापि त्रीणि, यावत् केनापि सर्वाण्यपि स्थानानि स्पृष्टानीति । एतच्च तीर्थकरनामकर्म मनुष्यगतावेव वर्तमानः पुरुषः, स्त्री, नपुंसको वा तीर्थकरभवात् पृष्ठतस्तृतीयभवं प्राप्य बद्धुमारभते ।

आह—तीर्थकरनामकर्मणो जघन्यत उत्कर्षतश्च बन्धस्थितिरन्तःसागरोपमकोटाकोटीप्रमाणा ततः कथमुक्तं तीर्थकरभवात्प्राक् तृतीयभवे बद्धयत इति, नैष दोषः, द्विविधो हि बन्धो—निकाचनारूपोऽनिकाच-

नारूपश्च, तत्र अनिकाचनारूपस्तृतीयभवात्प्राक्तरामपि भवति, जघन्यतोऽप्यन्तःसागरोपमकोटाकोटीप्रमाणत्वात्, निकाचनारूपस्तु तीर्थकरभवात्प्राक्तृतीयभव एव ।

△"तं च कहं वेइज्जइ ? अगिलाए धम्मदेसणाईहिं । बज्झइ तं तु भयवओ तइयभवोसक्कइत्ताणं ॥१॥" [आव. नि. १८३] ति वचनप्रामाण्यात्, तत्र निकाचितमवन्ध्यफलम्, इतरत्तु उभयथापि, निकाचनारूपश्च बन्धस्तृतीयभवादारभ्य तावत्प्रवर्तते यावत्तीर्थकरभवे अपूर्वकरणस्य सङ्ख्येया भागाः, तत ऊर्द्ध व्यवच्छेदः, केवलज्ञानोत्पत्तौ च अष्टमहाप्रातिहार्यादिरूपे सुरेन्द्रकृते पूजोपचारे सति सदेव-मनुजासुरायां परिषदि ग्लानिपरिहारेण धर्मदेशनया–श्रुत-चारित्ररूपधर्मप्ररूपणलक्षणया चतुस्त्रिंशता देहसौगन्ध्यादिभिरतिशयैः पञ्चत्रिंशता वुद्धवचनातिशेषैश्च तद्वेद्यत इति ॥३१३–३१९॥

अथ '**जिणजणणी–जणयनाम**'त्येकादशं द्वारमाह–

[1]मरुदेवी १ विजय २ सेणा ३ सिद्धत्था ४ मंगला ५ सुसीमा ६ य ।
पुहवी ७ लक्खण ८ [2]रामा ९ नंदा १० विण्हू ११ जया १२ [3]सामा १३॥३२०॥
सुजसा १४ [4]सुव्वय १५ अइरा १६ सिरी १७ देवी १८ पभावई य १९ ।
पउमावई २० बप्पा २१ सिव २२ वम्मा २३ तिसला २४ [5]इय ॥३२१॥

△ तच्च कथं वेद्यते ? अग्लान्या धर्मदेशनादिभिः । बध्यते तत्तु भगवत्तृतीयभवमवष्वष्क्य ॥१॥

१ तुलना–विचारसारः ६०, ६१, ८७, ८८, ८६ ॥ २ सामा–आव. निर्युक्तिः ॥ ३ रामा–आव. नि. ॥ ४ सुव्वइ–जे ॥ ५ ईय जे. ॥

नाभी १ जियसत्तू या २, जियारि ३ संवरे ४ इय ।
मेहे ५ धरे ६ पइट्ठे ७ य, महसेणे य खत्तिए ८ ॥३२२॥
सुग्गीवे ९ दढरहे १० विण्हू ११, वसुपुज्जे १२ य खत्तिए ।
कयवम्मा १३ सीहसेणे १४ य, भाणू १५ विस्ससेणे इय १६ ॥३२३॥
सूरे १७ सुदंसणे १८ कुंभे १९, सुमित्त २० विजए २१ समुद्दविजए २२ य ।
रागा य अस्ससेणे २३ सिद्धत्थे २४ ऽविय खत्तिए ॥३२४॥

[आव. निर्युक्ति ३८५-३८९]

'मरुदेवी'त्यादिगाथाऽक्षरार्थः, भगवत ऋषभस्वामिनो माता मरुदेवी, अजितस्वामिनो विजया, सम्भवनाथस्य सेना, अभिनन्दनस्य सिद्धार्था, सुमतिनाथस्य मङ्गला, पद्मप्रभस्य सुसीमा, सुपार्श्वस्य पृथिवी, चन्द्रप्रभस्य लक्ष्मणा, सुविधिस्वामिनो रामा, शीतलस्य नन्दा, श्रेयांसस्य विष्णुः, वासुपूज्यस्य जया, विमलस्य श्यामा, अनन्तजिनस्य सुयशाः, धर्मनाथस्य सुव्रता, शान्तिनाथस्य अचिरा, कुन्थुनाथस्य श्रीः, अरस्वामिनो देवी, मल्लिजिनस्य प्रभावती, मुनिसुव्रतस्य पद्मावती, नमिनाथस्य वप्रा, अरिष्टनेमेः शिवा, पार्श्वनाथस्य वामा, वर्धमानस्वामिनस्त्रिशला ॥३२०-३२१॥

तथा आदितीर्थकृत ऋषभस्वामिनः पिता नाभिः, अजितजिनस्य जितशत्रुः, सम्भवस्वामिनो जितारिः, अभिनन्दनस्य संवरः, सुमतिनाथस्य मेघः, पद्मप्रभस्य धरः, सुपार्श्वस्य प्रतिष्ठः, चन्द्रप्रभस्य

महासेनः क्षत्रियो राजा, सुविधिस्वामिनः सुग्रीवः, शीतलस्य दृढरथः, श्रेयांसस्य विष्णुः, वासुपूज्यस्य वसुपूज्यः क्षत्रियः, विमलस्य कृतवर्मा, अनन्तजिनस्य सिंहसेनः, धर्मनाथस्य भानुः, शांतिनाथस्य विश्वसेनः, कुन्थुनाथस्य शूरः, अरस्वामिनः सुदर्शनः, मल्लिजिनस्य कुम्भः, मुनिसुव्रतस्य सुमित्रः, नमिनाथस्य विजयः, अरिष्टनेमेः समुद्रविजयः, पार्श्वनाथस्य राजा अश्वसेनः, वर्धमानस्वामिनश्च सिद्धार्थः क्षत्रिय इति ॥३२२-३२४॥

इदानीं 'जिणजणणी-जणयगइ'त्ति द्वादशं द्वारमाह-

अट्ठण्हं जणणीओ तित्थयराणं तु हुंति सिद्धाओ ।
अट्ठ य सणंकुमारे माहिंदे अट्ठ बोद्धव्वा ॥३२५॥
नागेसु उसहपिया सेसाणं सत्त हुंति ईसाणे ।
अट्ठ य सणंकुमारे माहिंदे अट्ठ बोद्धव्वा ॥३२६॥

'अट्ठण्ह'मित्यादि गाथाद्वयम्, अष्टानां तीर्थकृतामृषभादीनां चन्द्रप्रभान्तानां जनन्यो-मातरो भवन्ति सिद्धाः, तदनु सुविध्यादीनां शान्तिनाथपर्यन्तानामष्टौ जनन्यः सनत्कुमारे-तृतीयदेवलोके गताः, तथा कुन्थुप्रभृतीनां श्रीमहावीरान्तानामष्टौ जनन्यो माहेन्द्रे-चतुर्थदेवलोके गता बोद्धव्या इति ॥३२५॥

तथा नागेषु-नागकुमारेषु भवनपतिद्वितीयनिकायवर्तिषु सुरेषु श्रीऋषभनाथपिता-नाभिनामा गत इति शेषः, तथा शेषाणामजितनाथप्रभृतीनां चन्द्रप्रभान्तानां सप्त पितरो भवन्ति गता ईशाने-द्वितीयदेवलोके ।

△ [1]सैद्धान्तिकास्तु श्रीअजितस्वामिपितुर्जितशत्रोर्मुक्तिगमनमाचक्षते, अनुयोगद्वारादौ तथैव भणनात्, श्रीहेमसूरिः–

"राजा बाहुबलिः सूर्ययशाः सोमयशा अपि। अन्येऽप्यनेकशः केऽपि, शिवं केऽपि दिवं ययुः ॥१॥" जितशत्रुः शिवं प्राप, सुमित्रस्त्रिदिवं गतः"। इति [2]योगशास्त्रे[३।१२टीका] त्रिषष्टिचरितेऽपि च, △ तथा सुविधि प्रभृतीनां शान्तिनाथान्तानामष्टौ च पितरः सनत्कुमारे–तृतीयदेवलोके, तथा कुन्थु [3]प्रमुखाणां श्रीमहावीरान्तानामष्टौ पितरो माहेन्द्रे–चतुर्थदेवलोके गता बोद्धव्याः ॥३२६॥१२॥

इदानीं 'उक्किट्ठ-जहन्नेहिं संखा विहरंत तित्थनाहाणं ।' इति त्रयोदशं द्वारं गाथापूर्वार्धेन, तथा 'जम्मसमएवि संखा उक्किट्ठ जहन्निया तेसिं ।' इति चतुर्दशं च द्वारं गाथोत्तरार्धेन विवृणोति–

सत्तरिसयमुक्कोसं जहन्न वीसा य दस य विहरंति ।
जम्मं पइ उक्कोसं वीसं दस हुंति उ जहन्ना ॥३२७॥

'सत्तरी' त्यादि, सप्तत्यधिकं शतमुत्कृष्टत एककालं तीर्थकृतां समयक्षेत्रे विहरति। पञ्चसु भरतेष्वेकैकस्य भावादैरवतेष्वपि पञ्चसु तावतां भावात्, पञ्चसु च महाविदेहेषु प्रत्येकं द्वात्रिंशता विजयैः

△△ चिन्हद्वयमध्यवर्तीपाठः-जे. नास्ति ॥ १ "जितशत्रु-सुमित्रविजयौ दीक्षितौ सिद्धौ" इति तूत्तराध्ययनदीपिकायाम्-लोकप्रकाशः (३२।१८० पश्चात्) ॥ २ तुलना-'जितशत्रुर्ययौ मुक्तिं सुमित्रस्त्रिदिवं गतः' इति योगशास्त्रवृत्तौ, 'नृपो न युत्रैः सगरः' इति श्लोकवृत्तौ; श्रीवीरमातापित्रोस्तु श्री आचाराङ्गे द्वादशदेवलोकेऽपि गतिरुक्तेति ज्ञेयम्-लोकप्रकाशः(३२।१८०पश्चात्) ॥ ३ °प्रभृतीनामष्टौ-जे. ॥ ४ प्रमुखाणामष्टौ-जे. ॥

कलितेषु तीर्थकृतां षष्ट्यधिकशतस्य सद्भावादेतत्सङ्ख्यायाः सम्भव इति । तथा जघन्यतो विंशतिस्तीर्थकृत एककालं विहरमाणाः प्राप्यन्ते । तथाहि-जम्बूद्वीपस्य पूर्वविदेहे शीतामहानद्या द्विभागीकृते दक्षिणोत्तरदिग्विभागेनैकैकस्य सद्भावात् द्वौ, अपरविदेहेऽपि शीतोदया महानद्या द्विभागीकृते तथैव द्वौ जिनेन्द्रौ, मिलिताश्चत्वारः, एवमपरद्वीपद्वयसम्बन्धिमहाविदेहचतुष्टयेऽपि चत्वार्यत्वार इति पञ्च चतुष्का विंशतिः, भरतैरावतयोस्तु एकान्तसुषमादावभाव एव । अन्ये तु सूरयो दशैव जघन्यतो विहरन्तीति मन्यन्ते । पञ्चानां महाविदेहानां पूर्वा-ऽपरविदेहयोः प्रत्येकमेकैकस्य विहरतः सद्भावेन दशानामेव तीर्थकृतां प्राप्यमाणत्वात्, तथा जन्म प्रति-जन्माश्रित्योत्कृष्टत एककालं विहरमाण[1]जिनविंशतिवत् विंशतिस्तीर्थकृतो भवन्ति, यतः सर्वेषामपि तीर्थकृतामर्धरात्रसमय एव जन्म, ततो महाविदेहेषु तीर्थकृज्जन्मसमये भरतैरावतक्षेत्रेषु दिवससद्भावेन तीर्थकृदुत्पत्त्यभावादेतावन्त एव प्राप्यन्ते ।

ननु महाविदेहक्षेत्रवर्त्तिषु विजयेषु चतुर्भ्योऽधिकानामपि तीर्थकृतामुत्पत्तेः सम्भवात् कथमुत्कृष्टपदे विंशतिरेवेति ?, उच्यते, इह हि मेरौ पण्डकवने चूलिकायाश्चतसृषु पूर्वादिषु दिक्षु प्रत्येकं चतुर्योजनप्रमाणबाहल्याः पञ्चयोजनशतप्रमाणायामा मध्यभागेऽर्धतृतीययोजनशतप्रमाणविष्कम्भा अर्धचन्द्रसंस्थानसंस्थिताः सर्वश्वेतसुवर्णमय्यश्चतस्रोऽभिषेकशिलाः, तत्र चूलिकायाः पूर्वदिग्भाविन्यां पाण्डुकम्बलशिलायां द्वे तीर्थकराभिषेकसिंहासने, तद्यथा-एकमुत्तरत एकं दक्षिणतः, तत्र ये शीताया महानद्या उत्तरतः कच्छादिषु विजयेषु तीर्थकरा उपजायन्ते ते उत्तराहे सिंहासने सुरेन्द्रैरभिषिच्यन्ते ।

१ ०णजिन(ना) विंशतिस्तीर्थकृतो-मु. ॥

ये पुनः शीताया महानद्या दक्षिणतो मङ्गलावतीप्रमुखेषु विजयेषु उत्पद्यन्ते ते दाक्षिणात्ये सिंहासने[1] सुरेन्द्रैरभिषिच्यन्ते । तथा चूलिकायाः पश्चिमदिग्भाविन्यां रक्तकम्बलशिलायां द्वे सिंहासने, तद्यथा–एकमुत्तरतः एकं दक्षिणतः, तत्र शीतोदाया ▷महानद्या उत्तरतो गन्धिलावतीप्रमुखेषु विजयेषु ये तीर्थकरा उत्पद्यन्ते ते उत्तराहे सिंहासने सुरेन्द्रैरभिषिच्यन्ते, ये पुनः शीतोदाया महानद्या दक्षिणतः पद्मादिषु विजयेषु तीर्थङ्करा उत्पद्यन्ते ते दक्षिणात्ये सिंहासने सुरेन्द्रैरभिषिच्यन्ते, तथा चूलिकाया▷ दक्षिणदिग्भाविन्यामतिपाण्डुकम्बलशिलायां ये भरतक्षेत्रसमुद्भवास्तीर्थकरास्तेऽभिषिच्यन्ते, उत्तरदिग्भाविन्यां त्वतिरक्तकम्बलशिलायामै[2]रावतक्षेत्रसमुद्भवास्तीर्थकरास्तेऽभिषिच्यन्ते, सिंहासनानि च सर्वरत्नमयानि सर्वाण्यपि प्रत्येकं पञ्चधनुःशतायामविष्कम्भान्यर्धतृतीयधनुःशतबाहल्यानीति, ततः समधिकाभिषेक-सिंहासनाभावादेव विदेहेषु चतुर्भ्योऽधिकानां तीर्थकृतामेककालमुत्पद्यभाव इति, जघन्यतः पुनर्दशैव एककालमुत्पद्यन्ते, पञ्चसु भरतेषु पञ्चसु चैरवतेषु प्रत्येकमेकैकस्य सद्भावात्, भरतैरवतेषु हि जिनजन्म समये महाविदेहेषु दिनसद्भावान्नाधिकानामुत्पत्तिरिति ॥३२७॥१३-१४॥

---

१ सनेऽभिषिच्यन्ते–जे. ।

▷◁ चिह्नद्वयमध्यवर्तीपाठस्थले जे. प्रतौ इत्थं पाठः "महानद्या दक्षिणतः पद्मादिषु विजयेषु ये तीर्थकरा उत्पद्यन्ते तदा दाक्षिणात्ये सिंहासनेऽभिषिच्यन्ते, ये तु शीतोदाया महानद्या उत्तरतो गन्धिलावतीप्रमुखेषु विजयेषु जायन्ते ते उत्तराहे सिंहासने, तथा चूलिकाया"

२ ०रवत० मु. ॥ ३०वाः सिंहासने–जे. ॥

इदानीं 'जिणगणहर' त्ति पञ्चदशमं द्वारमाह—

चुलसीइ १ पंचनवई २ बिउत्तरं ३ सोलसोत्तरं ४ च सयं ५ ।
सत्तुत्तर ६ पणनउई ७ तेणउई ८ [1]अट्ठसीई य ९ ॥३२८॥
एकासीई १० छावत्तरी ११ य छोवट्ठि १२ सत्तवन्ना १३ य ।
पन्ना १४ तेयालीसा १५ छत्तीसा १६ चेव पणतीसा १७ ॥३२९॥[आव.नि.२६६-२६७]
तेत्तीस १८ अट्ठवीसा १९ अट्ठारस २० चेव तह य सत्तरस २१ ।
एक्कारस २२ दस २३ एक्कारसेव २४ [2]इय गणहरपमाणं ॥३३०॥

'चुलसी' इत्यादि गाथात्रयम्, भगवत आदितीर्थकरस्य चतुरशीतिर्गणधराः, अजितस्वामिनः पञ्चनवतिः, शम्भवनाथस्य द्व्युत्तरं शतम्, अभिनन्दनस्य षोडशोत्तरं शतम्, सुमतिनाथस्य परिपूर्णं शतम्, पद्मप्रभस्य सप्ताधिकं शतम्, सुपार्श्वस्य पञ्चनवतिः, चन्द्रप्रभस्य त्रिनवतिः, सुविधिस्वामिनोऽष्टाशीतिः, शीतलनाथस्य एकाशीतिः, श्रेयांसस्य षट्सप्ततिः, वासुपूज्यस्य षट्षष्टिः, विमलस्य सप्तपञ्चाशत्, अनन्तजितः पञ्चाशत्, धर्मस्य त्रिचत्वारिंशत्, शान्तिनाथस्य षट्त्रिंशत्, कुन्थुनाथस्य पञ्चत्रिंशत्, अरजिनस्य त्रयस्त्रिंशत्, मल्लिस्वामिनोऽष्टाविंशतिः, मुनिसुव्रतस्याष्टादश, नमिनाथस्य सप्तदश, अरिष्टनेमेरेकादश * नेमिनाथस्याष्टादशेति केचिन्मन्यन्ते, * पार्श्वनाथस्य दश, वर्धमानस्वामिन-

१ अट्ठसीयाइ–जे. ॥ २ ईय–जे. ॥ * * चिन्हद्वयमध्यवर्ती पाठः जे. नास्ति ॥

श्चैकादशैवेति, ★ एतत् ऋषभादीनां चतुर्विंशतेस्तीर्थकृतां यथाक्रमं गणधराणां-मूलसूत्रकर्तृणां प्रमाणम् ॥३२८-३३०॥

इदानीं 'मुणि' त्ति षोडशं द्वारमाह-

चुलसीइ सहस्सा १ एगलक्ख २ दो ३ तिन्नि ४ तिन्नि लक्खा य।
वीसहिया ५ तीसहिया ६ तिन्नि य ७ अट्ठाइय ८ दु ९ एक्कं १० ॥३३१॥
चउरासीइ सहस्सा ११ [1]बिसत्तरी १२ अडसट्ठि १३ छावट्ठी १४।
चउसट्ठी १५ बासट्ठी १६ सट्ठी १७ पन्नास १८ चालीसा १९ ॥३३२॥
तीसा २० वीसा २१ अट्ठारसेव २२ सोलस २३ य चउदस सहस्सा २४।
एयं साहुपमाणं चउवीसाए जिणवराणं ॥३३३॥
अट्ठावीसं लक्खा अडयालीसं [2]च तह सहस्साइं।
सव्वेसिंपि जिणाणं जईण माणं विणिद्दिट्ठं ॥३३४॥

१६ द्वारे मुनिमानं गाथा ३३१-३३४ प्र.आ.८६

॥२३४॥

★ अत्रस्था गणधराणां सङ्ख्या आवश्यकनिर्युक्तिमनुसरति केवलं श्रेयांसप्रभोः छावत्तरीस्थाने तत्र बावत्तरी इति पाठः। समवायाङ्गसूत्रानुसारं तु अजितजिनस्य ९० (सू.-९०), सुविधिजिनतः कुन्थुजिनयावत् ८६, ८३, ६६, ६२, ५६, ५४, ४८, १०, ३७ पार्श्वप्रभोस्तु १० गणधरा निर्दिष्टाः।

१ बिउत्तरी-जे.॥ २ च-मु० नास्ति॥

'चुलसीई'त्यादि गाथात्रयम्, चतुरशीतिसहस्रा मुनीनामाद्यजिनस्य १, एकं लक्षं मुनीनामजितजिनस्य २, एवं मुनि-तीर्थकृतोः सर्वत्र सम्बन्धः करणीयः, द्वे लक्षे ३, तिस्रो लक्षाः ४, तिस्रो लक्षा विंशत्यधिकाः ५, तिस्रो लक्षास्त्रिंशदधिकाः ६, तिस्रो लक्षाः ७, द्वे सार्धे लक्षे ८, द्वे लक्षे ९, एकं लक्षम् १०, चतुरशीतिसहस्राः ११, द्विसप्ततिसहस्राः १२, अष्टषष्टिसहस्राः १३ षट्षष्टिसहस्राः १४, चतुःषष्टिसहस्राः १५, द्विषष्टिसहस्राः १६, षष्टिसहस्राः १७, पञ्चाशत्सहस्राः १८, चत्वारिंशत्सहस्राः १९, त्रिंशत्सहस्राः २०, विंशतिसहस्राः २१, अष्टादशसहस्राः २२, षोडशसहस्राः २३, चतुर्दशसहस्राः २४, एतत्साधुप्रमाणं क्रमेण चतुर्विंशतेर्जिनवराणां ॥३३१-३३३॥

एतेषां सर्वसङ्ख्यामीलने यद्भवति तदाह—'अट्ठावीस'मित्यादि, अष्टाविंशतिर्लक्षाणि अष्टचत्वारिंशच्च तथा सहस्राणि सर्वेषामपि जिनानां सम्बन्धिनां यतीनां मानं—परिमाणं विनिर्दिष्टं—विनिश्चितम्, ^ एतच्च ये श्रीजिनेन्द्रैर्निजकरकमलेन दीक्षितास्तेषामेवैकत्र पिण्डितानां परिमाणम्, न पुनर्गणधरादिभिरपि ये दीक्षितास्तेषामतिबहुत्वादिति ॥३३४॥१६॥

---

^ लोकप्रकाशे तु—"इदं किल चतुरशीतिसहस्रादिकमृषभादीनां तीर्थकृतां श्रमणपरिमाणं प्रधानसूत्रविरचनसमर्थान् श्रमणानधिकृत्य वेदितव्यम्, इतरथा पुनः सामान्यश्रमणाः प्रभूततरा अपि तस्मिन् तस्मिन् ऋषभादिके आसीरन् इति नन्दीवृत्तौ। (३२।१०८० पश्चात्) ॥

उक्ता विशेषमुनयो येऽमी गणधरादयः। तैर्वर्जिता सर्वसाधुसङ्ख्याः पूर्वनिरूपिताः ॥ सामान्यमुनिसङ्ख्याः स्युः सर्वेषामर्हतामिह। यथायोगं भावनीयास्ताः सर्वास्तात्त्विकैः स्वयम् ॥ एकोनविंशतिर्लक्षाः षडशीतिः सहस्रकाः। एकपञ्चाशदधिकाः (१९८६०५१) सामान्यमुनयोऽखिलाः ॥ लो. प्र. (३२।१०६४-६) ॥ तुलना—हीरप्रश्न, प्रकाश-२ प्रश्न ७ ॥

इदानीं समणी[1]त्ति सप्तदशं द्वारमाह—

[1]तिन्नि य १ तिन्नि य २ तिन्नि य ३ छ ४ [2]पंच ५ चउरो ६ चउ७ तिगे ८क्के ९ का १०।
लक्खा उसह मोत्तुं तदुवरि सहस्साणिमा संखा ॥३३५॥
तीसा २ छत्तीसा ३ तीस ४ तीस ५ वीसा ६ य तीस ७ असीई ८ य।
वीसा ९ दसमजिणिंदे लक्खोवरि अज्जिया छक्कं ॥३३६॥
लक्खो तिन्नि सहस्सा ११ लक्खो १२ लक्खो य अट्ठसयअहिओ १३।
बासट्ठी १४ पुण बासट्ठी [3]सहस्स अहिया चउसएहिं १५ ॥३३७॥
छसयाहिय इगसट्ठी १६ सट्ठी छसयाइं १७ सट्ठी १८ पणपन्ना १९ ।
पन्ने २० गचत्त २१ चत्ता २२ अडतिस २३ छत्तीस सहसा य २४ ॥३३८॥
चोयालीसं लक्खा छायालसहस्स चउसयसमग्गा ।
अज्जाछक्कं एसो अज्जाणं संगहो सव्वो ॥३३९॥

'तिन्नि'इत्यादि गाथापञ्चकम्, त्रीणि १ त्रीणि २ त्रीणि ३ षट् ४ पञ्च ५ चत्वारि ६ चत्वारि ७ त्रीणि ८ एकं ९ एकं १० लक्षाण्येतानि, तत्र ऋषभजिनस्य त्रीण्येवार्यिकालक्षाणि, ततो वृषभम्—आदिजिनं मुक्त्वा तदुपरि—पूर्वोद्दिष्टलक्षाणामुपरि क्रमेण यावन्तः सहस्राश्चटन्ति तावत आह—'तीसे' त्यादि, त्रिंशत्

॥२३६॥

१ तुलना—आवश्यकनिर्युक्तिः (२६०-२६३), विचारसारः (१८५-१८८) ॥
२ पंच चेव चउरो—जे. ॥ ३ सहस्सा—मु० ॥

सहस्रा इति सर्वत्र योज्यम् २, षट्त्रिंशत् ३ त्रिंशत् ४ त्रिंशत् ५ विंशतिः ६ त्रिंशत् ७ अशीतिश्च ८ विंशतिः ९ दशमजिनेन्द्रस्य-शीतलस्य एकलक्षोपरि आर्यिकाषट्कमिति, अयं भावार्थः-श्रीऋषभदेवस्य आर्यिकालक्षत्रयं जातम्, अजितजिनस्यार्यिकालक्षत्रयं त्रिंशत्सहस्रैरधिकम्, सम्भवजिनस्यार्यिकालक्षत्रयं षड्त्रिंशत्सहस्रैरधिकम्, अभिनन्दनस्य साध्वीलक्ष षट्कं त्रिंशत्सहस्रैरधिकम्, सुमतिजिनस्यार्यिकालक्ष-पञ्चकं त्रिंशत्सहस्रैरधिम्, पद्मप्रभस्यार्यिकालक्षचतुष्टयं विंशतिसहस्रैरधिकम्, सुपार्श्वजिनस्यार्यिकालक्ष-चतुष्टयं त्रिंशत्सहस्रैरधिकम्, चन्द्रप्रभजिनस्य साध्वीलक्षत्रयम् अशीतिसहस्रैरधिकम्, सुविधिजिनस्यार्यि-कालक्षमेकं विंशतिसहस्रैरधिकम्, दशमजिनस्य श्रीशीतलस्य आर्यिकाणामेकं लक्षमार्यिकाषट्कं चेति। इदानीं श्रेयांसादिजिनसाध्वीमानमाह-श्रेयांसजिनस्य साध्वीनामेकं लक्षं सहस्रत्रयाधिकम्, श्रीवासुपूज्यस्य साध्वीनामेकं लक्षम्, श्रीविमलजिनस्यार्यिकालक्षं शताष्टाधिकम्, श्रीअनन्तजिनस्य द्विषष्टिसहस्राण्यार्यिका-णाम्, श्रीधर्मजिनस्य पुनरार्यिकाणां द्विषष्टिसहस्राणि चतुर्भिः शतैरधिकानि, [1]श्रीशान्तिजिनस्यार्यिकाणा-मेकषष्टिसहस्राणि षड्भिः शतैरधिकानि, [2]श्रीकुन्थुनाथस्यार्यिकाणां षष्टिसहस्राणि षड्भिः शतैरधिकानि, [3]श्रीअरनाथस्यार्यिकाणां षष्टिसहस्राणि, श्रीमल्लिजिनस्यार्यिकाणां पञ्चपञ्चाशत्सहस्राणि, श्रीमुनिसुव्रतस्या-र्यिकाणां पञ्चाशत्सहस्राणि, श्रीनमेरार्यिकाणाम् एकचत्वारिंशत्सहस्राणि, श्रीनेमेरार्यिकाणां चत्वारिंशत्सह-स्राणि, श्रीपार्श्वजिनस्यार्यिकाणामष्टात्रिंशत्सहस्राणि, श्रीमहावीरजिनस्यार्यिकाणां षट्त्रिंशत्सहस्राणि, चः

१ समवायाङ्गसूत्रे शान्तिजिनस्य ८९००० आर्यिकाः (सू० ८९) ॥
२ श्रीकुन्थुनाथजिनस्या०-सं० ॥ ३ अरजिनस्या०-सं० ॥

समुच्चये प्रागुक्तार्यिकाणां सर्वसङ्ख्यामीलने यद्भवति तदाह–चतुश्चत्वारिंशल्लक्षाः षट् चत्वारिंशत्सहस्रैश्चतुः-शताधिकैः समग्राः-पूर्णा आर्याषट्कं च, एष आर्यिकाणां सङ्ग्रहः सर्व इति ॥३३५–३३६॥१७॥

'वेउव्विय' त्ति अष्टादशं द्वारमाह–

वेउव्वियलद्धीणं वीससहस्सा सयच्छगब्भहिया १ ।
वीससहस्सा चउसय २ [1]इगुणीससहस्स अट्ठसया ३ ॥३४०॥
अगुणीससहस्स ४ अट्ठार[1] अट्ठसया ५ सोलसहस्स अट्ठसयं ६ ।
[2]सत्तिसय पनरस ७ चउदस ८ तेरस ९ बारससहस्स दसमे १० ॥३४१॥
एक्कारस ११ दस १२ नव १३ अट्ठ १४ सत्त १५ छसहस १६ एगवन्नसया १७ ।
सत्तसहस्स सत्तिसया १८ दोन्नि सहस्सा नव सयाइं १९ ॥३४२॥
दुन्नि सहस्सा २० पंचसय सहस्स २१ पन्नरससयाइं नेमिमि २२ ।
एक्कारस सय पासे २३ सयाइं सत्तेव वीरजिणे २४ ॥३४३॥

'वेउव्वियलद्धीणमि'त्यादि गाथाचतुष्कम्. वैक्रियलब्धिमतां–नानाविधवैक्रियरूपकरणशक्तानां मुनीनाम् [3]आद्यजिनेन्द्रस्य विंशतिः सहस्राणि षट्शताभ्यधिकानि, श्रीअजितजिनस्य विंशतिसहस्राः सचतुः-शताः–शतचतुष्टयाधिकाः, श्रीसम्भवजिनस्य एकोनविंशतिसहस्राः शताष्टकाधिकाः, श्रीअभिनन्दनस्य

१ अगु०-जे ॥ २ सत्तसय-जे० ॥ ३ ०आदिजि०-सं० ॥

एकोनविंशतिः सहस्राणि, श्रीसुमतिजिनस्य चतुःशताधिका अष्टादश सहस्राः, श्रीपद्मप्रभस्य षोडश सहस्राणि अष्टोत्तरशताधिकानि, श्रीसुपार्श्वजिनस्य [1]शतत्रयाधिकाः पञ्चदश सहस्राः, श्रीचन्द्रप्रभस्य चतुर्दशसहस्राः, श्रीसुविधेस्त्रयोदशसहस्राः, श्रीशीतलस्य द्वादशसहस्राः, श्रीश्रेयांसस्य एकादश सहस्राः, श्रीवासुपूज्यस्य दश सहस्राणि, श्रीविमल[2]जिनस्य नव सहस्राणि, श्रीअनन्तजिनस्य अष्टौ सहस्राणि, श्रीधर्मजिनस्य सप्तसहस्राणि, श्रीशान्तिनाथस्य षट्सहस्राणि, श्रीकुन्थुजिनस्य एकपञ्चाशत् शतानि-पञ्च सहस्राण्येकशताधिकानीत्यर्थः, श्रीअरजिनस्य सप्तसहस्राणि त्रिभिः शतैरधिकानि, श्रीमल्लिजिनस्य द्वौ सहस्रौ नवशताधिकौ, श्रीमुनिसुव्रतस्य द्वौ सहस्रौ, श्रीनमिजिनस्य पञ्च सहस्राः, श्रीनेमिजिनस्य पञ्चदश शतानि, श्रीपार्श्वजिनस्यैकादश शतानि, श्रीवीरजिनस्य च शतानि सप्तैवेति ॥३४०-३४३॥ १८॥

इदानीं 'चाइ'त्ति एकोनविंशं द्वारं विवरीषुराह—

सट्ठच्छसया तुचालस सहस्स १ बारस य चउसयऽब्भहिया २ ।
बारे ३ कारससहसा ४ दससहसा छसयपन्नासा ५ ॥३४४॥
छन्नउई ६ चुलसीई ७ छहत्तरी ८ सट्ठि ९ अट्ठवन्ना य १० ।
पन्नासाइ सयाणं ११ सयसीयालाऽहव बयाला १२ ॥३४५॥
[3]बत्तीसा १३ चत्तीसा १४ अट्ठावीसा १५ सयाण चउव्वीसा १६ ।
बिसहस्स १७ सोलससया १८ चउद्दस १९ बारस २० दससयाइं २१ ॥३४६॥

१ लोकप्रकाशे तु वैक्रियाणां पञ्चदश सहस्रस्त्रिंशताधिकाः । (२२।४६५) इति ॥ २ लस्य-सं ॥ ३ छत्तीसा-मु. ॥

अट्ठसया २२ छच्च सया २३ चत्तारि सयाइं २४ हुंति वीरम्मि ।
वाइमुणीण पमाणं चउवीसाए जिणवराणं ॥३४७॥

'सट्ठे'त्यादि गाथाचतुष्कम्, प्रथमजिनस्य वादियतीनां द्वादशसहस्राः सार्धषट्शताः पञ्चाशदधिकैः षड्भिः शतैरधिका इत्यर्थः, श्रीअजितजिनस्य द्वादशसहस्राश्चतुःशताधिकाः, श्रीसम्भवस्य द्वादशसहस्राः, श्रीअभिनन्दनस्य एकादशसहस्राः, श्रीसुमतिजिनस्य दशसहस्राः पञ्चाशदधिकषट्शताधिकाः ।

'छच्चउई' इत्यादि गाथायामुत्तरार्धवर्ति शतानामिति पदं सर्वत्र सम्बध्यते, ततः श्रीपद्मप्रभस्य वादिनां [1]षण्णवतिः शतानाम्, कोऽर्थः ?—नवसहस्राः षट्शतैरधिका इति, श्रीसुपार्श्वजिनस्य [2]चतुरशीतिः शतानाम्, चतुर्भिः शतैरधिकानि अष्टौ [3]सहस्राणीत्यर्थः, चन्द्रप्रभस्य षट्सप्ततिः शतानाम्, षड्भिः शतैरधिकानि सप्त सहस्राणीत्यर्थः [4]श्रीसुविधिजिनस्य षष्टिः शतानाम्, षट् सहस्राणीत्यर्थः, श्रीशीतलजिनस्य अष्टपञ्चाशच्छतानाम्, पञ्च सहस्रा अष्टशताधिका इत्यर्थः, श्रीश्रेयांसस्य पञ्चाशत् शतानाम्, पञ्च सहस्राणीत्यर्थः, श्रीवासुपूज्यस्य सप्तचत्वारिंशच्छतानि, चत्वारः सहस्राः सप्तशताधिका इत्यर्थः, **'अहवा बायाल'** त्ति अथवा मतान्तरेण श्रीवासुपूज्यस्य द्विचत्वारिंशच्छतानि, चत्वारः सहस्राः शतद्वयाधिका इत्यर्थः, श्रीविमलजिनस्य [5]द्वात्रिंशच्छतानि, त्रीणि सहस्राणि शतद्वयाधिकानीत्यर्थः, श्रीअनन्तजिनस्य द्वात्रिंशच्छतानि, श्रीधर्मजिनस्य अष्टाविंशतिशतानि, सहस्रद्वयमष्टशताधिकमित्यर्थः, श्रीशान्तिनाथस्य शतानां

१ षण्णवतिशतानां-मु. ॥ २ समवायाङ्गाभिप्रायेण ८६०० (सू-८६) ॥
३ सहस्राः च० जे. सं. ॥४ सुविधेर्जिनस्य मु. ॥ ५ लोकप्रकाशे ३६०० (३२/६०६) ॥

चतुर्विंशतिः, द्वे सहस्रे शतचतुष्टयाधिके इत्यर्थः, श्रीकुन्थुजिनस्य द्वे सहस्रे, श्रीअरनाथस्य षोडश शतानि षट्शताधिकं सहस्रमित्यर्थः, श्रीमल्लिजिनस्य चतुर्दशशतानि शतचतुष्टयाधिकं सहस्रमित्यर्थः, श्रीमुनिसुव्रतस्य द्वादशशतानि-सहस्रमेकं शतद्वयाधिकमित्यर्थः, श्रीनमिजिनस्य दश शतानि-सहस्रमित्यर्थः, श्रीनेमिजिनस्य अष्टौ शतानि, श्रीपार्श्वजिनस्य षट् शतानि. श्रीवीरजिनस्य चत्वारि शतानि भवन्ति, इति वादिमुनीनां-वादसमरेषु सुरासुरैरप्यजेयानां यतीनां प्रमाणं क्रमेण *चतुर्विंशतेर्जिनवराणामिति ॥३४४-३४७॥१९॥

इदानीं 'अवही' त्ति विंशतितमं द्वारमाह—

ओहिनाणिमुणीणं नउई १ चउनवइ २ छण्णवइसयाणि ३ ।
अट्ठानवइसयाइं ४ एक्कारस ५ दस ६ नवसहस्सा ७ ॥३४८॥
असीई ८ चुलसी ९ बहत्तरी १० सट्ठी ११ चउप्पण १२ अट्ठचत्ताला १३ ।
तेयाला १४ छत्तीसा १५ तीसा १६ पणवीस १७ छव्वीसा १८ ॥३४९॥
बावीसा १९ अट्ठारस २० सोलस २१ पनरस २२ चउदस सयाणि २३ ।
तेरस २४ साहुण सयाइं ओहिनाणीण वीरस्स ॥३५०॥

'ओही'त्यादिगाथात्रयम्, तत्रादिजिनस्य अवधिज्ञानिमुनीनां नवतिशतानि, नव सहस्राणीत्यर्थः, श्रीअजितजिनस्य चतुर्नवतिशतानि, नव सहस्राश्चतुर्भिः शतैरधिका इत्यर्थः, श्रीसंभवजिनस्य षण्णवति-

* लक्षद्वयं तथा पञ्च चत्वारिंशत्सहस्रकाः । [२४५२०८] अष्टाढ्ये द्वे शते सर्वे लसद्वैक्रियलब्धयः ॥
—लो. प्र. (३२।१०६२) ॥

शतानि, नवसहस्राः षड्भिः शतैरधिका इत्यर्थः, श्रीअभिनन्दनस्य अष्टानवतिशतानि, नवसहस्रा अष्टशतैरधिका इत्यर्थः, श्रीसुमतिजिनस्य एकादश सहस्राणि, श्रीपद्मप्रभस्य दश सहस्राणि, श्रीसुपार्श्वस्य नव सहस्राः; अत्र **'बावीसे'** त्यादितृतीयगाथायां द्वितीयपादवर्ति **'सयाणि'**त्ति (ग्रन्थाग्र ३०००) पदमशीत्यादिपदेषु योज्यते, ततः श्रीचन्द्रप्रभस्य अशीतिशतानि, अष्टौ सहस्रा इत्यर्थः, श्रीसुविधिजिनस्य चतुरशीतिशतानि, अष्टौ सहस्राश्चतुर्भिः शतैरधिका इत्यर्थः, श्रीशीतलजिनस्य द्विसप्ततिशतानि, सप्तसहस्राः शतद्वयाधिका इत्यर्थः, श्रीश्रेयांसजिनस्य षष्टिशतानि, सहस्रषट्कमित्यर्थः, श्रीवासुपूज्यस्य चतुष्पञ्चाशच्छतानि, पञ्च सहस्राश्चतुःशताधिका इत्यर्थः, श्रीविमलजिनस्य अष्टचत्वारिंशच्छतानि, चत्वारः सहस्रा अष्टशताधिका इत्यर्थः, श्रीअनन्तजिनस्य त्रिचत्वारिंशच्छतानि, चत्वारः सहस्राः शतत्रयेणाधिका इत्यर्थः, श्रीधर्मजिनस्य षट्त्रिंशच्छतानि, सहस्रत्रयं षड्भिः शतैरधिकमित्यर्थः, श्रीशान्तिनाथस्य त्रिंशच्छतानि, त्रयः सहस्रा इत्यर्थः, श्रीकुन्थुनाथस्य [1]पञ्चविंशतिशतानि, सहस्रद्वयं पञ्चशताधिकमित्यर्थः, श्रीअरनाथस्य षड्विंशतिशतानि, द्वौ सहस्रौ षट् शताधिकावित्यर्थः, श्रीमल्लिजिनस्य [2]द्वाविंशतिशतानि, सहस्रद्वयं द्विशताधिकमित्यर्थः, श्रीमुनिसुव्रतस्य अष्टादशशतानि, सहस्रमेकमष्टशताधिकमित्यर्थः, श्रीनमिजिनस्य [3]षोडशशतानि, सहस्रमेकं षट्शताधिकमित्यर्थः, श्रीनेमिजिनस्य पञ्चदशशतानि, एकः सहस्रः शतपञ्चकाधिक

१ समवायाङ्गाभिप्रायेण ९१०० (सू. ९१) ॥
२ समवायाङ्गाभिप्रायेण ५९०० (सू.५६) ॥
३ समवायाङ्गाभिप्रायेण ३६०० (सू.३६) ॥

इत्यर्थः, श्रीपार्श्वजिनस्य चतुर्दशशतानि, सहस्रमेकं शतचतुष्टयाधिकमित्यर्थः, श्रीमहावीरजिनस्य च त्रयोदश शतानि, सहस्रमेकं शतत्रयाधिकमित्यर्थः ॥३४८-३५०॥ *२०॥

'केवलि'त्ति द्वारमेकविंशतितममिदानीमाह–

वीससहस्सा उसहे १ वीसं बावीस अहव अजियस्स २ ।
पन्नरस ३ चउदस ४ तेरस ५ बारस ६ एक्कारस ७ दसेव ८ ॥३५१॥
अट्ठुम ९ सत्तेव य १० छस्सट्ठा ११ छच्च १२ पंच सट्ठा य १३ ।
पंचेव १४ अट्ठपंचम १५ चउसहस्सा तिन्नि य सया य १६ ॥३५२॥
बत्तीससया अहवा बावीस सया व हुंति कुंथुस्स १७ ।
अट्ठावीसं १८ बावीस १९ तहय अट्ठारस सयाइं २० ॥३५३॥
सोलस २१ पनरस २२ दससय २३ सत्तेव सया हवंति वीरस्स २४ ।
एयं केवलिमाणं मणपज्जवनाणमिण्हं तु ॥३५४॥

[1]"वीसे"त्यादिगाथाचतुष्कम्, केवलिनां विंशतिसहस्रा ऋषभे–वृषभजिनस्य, विंशतिसहस्रा अजितजिनस्य, अथवा मतान्तरेण द्वाविंशतिसहस्रा अजितनाथस्य, श्रीसम्भवस्य पञ्चदशसहस्राः,

* लक्षमेकं त्रयस्त्रिंशत्सहस्राः सचतुःशताः । [१३३४००] उक्ता जिनानां सर्वेषामवधिज्ञानशालिनः ॥
–लो. प्र. (३२।१०६०) ॥

१ वीससहस्सा इत्यादि गाथाचतुष्टयं-सं. ॥

श्रीअभिनन्दनस्य चतुर्दशसहस्राः, श्रीसुमतिनाथस्य त्रयोदशसहस्राः, श्रीपद्मप्रभस्य द्वादशसहस्राः, श्रीसुपार्श्वस्य एकादशसहस्राः, श्रीचन्द्रप्रभस्य दशैव सहस्राः, श्रीसुविधिजिनस्य अर्धाष्टमाः सहस्राः, सप्तसहस्राः पञ्चशताधिका इत्यर्थः, श्रीशीतलजिनस्य सप्तसहस्राः, श्रीश्रेयांसस्य षट् सहस्राः सार्धाः, सपञ्चशता इत्यर्थः, श्रीवासुपूज्यस्य षट् सहस्राः, श्रीविमलजिनस्य पञ्च सहस्राः सार्धाः, सपञ्चशता इत्यर्थः, श्रीअनन्तजिनस्य पञ्चैव सहस्राः, श्रीधर्मजिनस्य अर्धपञ्चमाः सहस्राः, चत्वारः सहस्राः सपञ्चशता इत्यर्थः, श्रीशान्तिनाथस्य चत्वारः सहस्राः [त्रीणि च शतानि] शतत्रयाधिकाः इत्यर्थः, श्रीकुन्थुजिनस्य [1]द्वात्रिंशच्छतानि, सहस्रत्रयं शतद्वयाधिकमित्यर्थः, अथवा मतान्तरेण द्वात्रिंशतिशतानि, सहस्रद्वयं शतद्वयाधिकमित्यर्थः, श्रीअरजिनस्य अष्टाविंशतिशतानि, सहस्रद्वयं शताष्टकाधिकमित्यर्थः, श्रीमल्लिजिनस्य द्वाविंशतिशतानि, सहस्रद्वयं शतद्वयाधिकमित्यर्थः, श्रीमुनिसुव्रतस्य अष्टादशशतानि, सहस्रमेकमष्टशताधिकमित्यर्थः, श्रीनमिजिनस्य षोडशशतानि, सहस्रमेकं षड्भिः शतैरधिकमित्यर्थः, श्रीनेमिजिनस्य पञ्चदशशतानि, सहस्रमेकं पञ्चशताधिकमित्यर्थः, श्रीपार्श्वजिनस्य दशशतानि, सहस्रमित्यर्थः, श्रीवीरजिनस्य च सप्त शतानि, एतत्—पूर्वोक्तं यथाक्रमं [2]सर्वतीर्थकृतां केवलिमानम्, मनःपर्यवज्ञानिपरिमाणमिदानीं ब्रूम इति शेषः ॥३५१-३५४॥२१॥

---

१ समवायाङ्गे ३२३२ (सू.३२) ॥

२ षट् सप्ततिसहस्राढ्यं लक्षमेकं शताधिकम् । (१७६१००) सर्वेषामर्हतामुक्तं सर्वाग्रं सर्ववेदिनाम् ॥
—लो. प्र. (३२।१०८८) ॥

तदेवेदानीं 'मणपज्जवनाणि'त्ति द्वाविंशतितमद्वारेणाह–

बारससहस्स तिण्हं सय सड्ढा सत्त १ पंच य २ दिवड्ढं ३ ।
एगदस सड्ढछस्सय ४ दसछस्सहस्सा य छच्चसया सड्ढा ५ ॥३५५॥
दससहस्सा तिण्णि सया ६ नव दिवड्ढसया य ७ अट्ठ सहस्सा य ।
पंचसय सत्तसहस्सा ९ सुविहिजिणे सीयले १० चेव ॥३५६॥
छसहस्स दोण्हमित्तो ११-१२ पंच सहस्साइं पंच य सयाइं १३ ।
पंच सहस्सा १४ चउरो सहस्स सयपंचअब्भहिया १५ ॥३५७॥
चउरो सहस्स १६ तिन्नि य तिण्णेव सया हवंति चालीसा १७ ।
सहसदुगं पंचसया इगवन्ना अरजिणिंदस्स १८ ॥३५८॥
सत्तरससया सपन्ना १९ पंचदससया य २० बारसय सड्ढा २१ ।
सहसो २२ सय अड्ढम २३ पंचेव सया उ वीरस्स २४ ॥३५९॥

'[1]'बारससहस्से' त्यादिगाथापञ्चकम्, त्रयाणामृषभा-ऽजित-सम्भवनाम्नां तीर्थकृतां द्वादश मनःपर्यवज्ञानिनां सहस्राः, परमा[2]दिजिनस्यसार्धसप्तशताधिकाः, अजितजिनस्य [3]पञ्चशताधिकाः, सम्भवजिनस्य सार्धशताधिकाः, तथा श्रीअभिनन्दनस्य मनःपर्यवज्ञानिनामेकादशसहस्राः सार्धषट्शताधिकाः, श्रीसुमतेर्दश-

१ बारसेत्यादि० मु. ॥ २ सप्ततिशतस्थानप्रकरणे मतान्तरेण (गा–२५०) लोकप्रकाशाभिप्रायेण च (३२/२१९) १२६५० मनःपर्यवज्ञानिनः ॥ ३ मतान्तरेण १२५५० सप्ततिशत. प्र. गाथा २५० ॥

सहस्राः सार्धचतुःशताधिकाः, श्रीपद्मप्रभस्य दशसहस्राः शतत्रयाधिकाः, श्रीसुपार्श्वस्य नवसहस्राः सार्धैकशताधिकाः, श्रचन्द्रप्रभस्य अष्टौ सहस्राः, श्रीसुविधिजिनस्य सप्तसहस्राः पञ्चशताधिकाः, शीतलस्याप्येतावन्त एव, श्रेयांसजिनस्य श्रीवासुपूज्यजिनस्य च षट् षट् सहस्राः, 'इत्तो'त्ति इतोऽनन्तरं विमलजिनस्य पञ्चसहस्राणि पञ्चशताधिकानि, अनन्तजिनस्य पञ्चसहस्राः, श्रीधर्मस्य चत्वारः सहस्राः पञ्चशताधिकाः, श्रीशान्तिजिनस्य चत्वारः सहस्राः, [1]श्रीकुन्थोस्त्रयःसहस्राश्चत्वारिंशदधिकशतत्रयाधिकाः, श्रीअरजिनस्य सहस्रद्विकमेकपञ्चाशदधिकपञ्चशताभ्यधिकम्, [2]श्रीमल्लेः सहस्रमेकं शतानि पञ्चाशदधिकानि, श्रीमुनिसुव्रतस्य पञ्चदशशतानि, श्री नमिजिनस्य [3]द्वादश शतानि षष्ट्यधिकानि, श्रीनेमेरेकः सहस्रः, श्रीपार्श्वजिनस्य शतान्यर्धाष्टमानि, सार्धानि सप्त शतानीत्यर्थः, श्रीवीरजिनस्य पञ्चैव शतानीति ॥३५५ ३५६*॥२२॥

इदानीं 'चउइसपुव्वि' त्ति त्रयोविंशतितमं द्वारमाह—

चउइसपुव्वि सहस्सा चउरो अद्धट्ठमाणि य सयाणि १ ।
वीसहिय सत्ततीसा २ इगवीस सया य पन्नासा ३ ॥३६०॥
पनरस ४ चउवीस सया ५ तेवीस सया ६ य वीससय तीसा ७ ।
दो सहस ८ पनरस सया ९ सयचउदस १० तेरस सयाइं ११ ॥३६१॥

---

* लक्षमेकं तथा पञ्चचत्वारिंशत्सहस्रकाः । शता पञ्चैकनवतियुक्ता (१४५५९१) मानसवेदिनाम् ॥ लो. प्र. (३२।१०८६)॥ १ समवायाङ्गाभिप्रायेण ८१०० (सू ८१)॥ २ समवायाङ्गाभिप्रायेण ५७०० (सू. ५७)॥ ३ 'शता द्वादश षञ्चाशाः षष्टयाढ्या वा मनोविदाम् ।' लोक.प्र.(३२।८३०)॥

सय बारस १२ एक्कारस ११ दस १४ नव १५ अव १६ छच्च सय सयरा १७ ।
दसहिय छच्चेव सया १८ छच्च सया अट्ठसट्ठिहिया १९ ॥३६२॥
सय पंच २० अद्धपंचम २१ चउरो २२ अद्धुट्ठ २३ तिन्नि य सयाइं २४ ।
उसहाइजिणिंदाणं चउदसपुव्वीण परिमाणं ॥३६३॥

'[1]'चउद्दसपूव्वी'त्यादि गाथाश्चतस्रः, तत्रादिजिनस्य चतुर्दशपूर्विणां चत्वारः सहस्रा अर्धाष्टमानि च शतानि, पञ्चाशदधिकानि सप्त शतानीत्यर्थः, श्रीअजितजिनस्य विंशत्यधिकसप्तत्रिंशच्छतानि, श्रीसम्भवजिनस्य एकविंशतिः शतानि पञ्चाशदधिकानि, श्रीअभिनन्दनस्य पञ्चदश शतानि, श्रीसुमतेश्चतुर्विंशतिः शतानि, श्रीपद्मप्रभस्य त्रयोविंशतिः शतानि, श्रीसुपार्श्वस्य विंशतिः शतानि त्रिंशदधिकानि, श्रीचन्द्रप्रभस्य द्वौ सहस्रौ, श्रीसुविधेः पञ्चदश शतानि, श्रीशीतलस्य शतानि चतुर्दश, श्रीश्रेयांसस्य त्रयोदश शतानि, श्रीवासुपूज्यस्य द्वादश शतानि, श्रीविमलजिनस्य एकादश शतानि, श्रीअनन्तजिनस्य दश शतानि, श्रीधर्मस्य नव शतानि, [2]श्रीशान्तेरष्टौ शतानि, श्रीकुन्थोः षट् शतानि सप्तत्यधिकानि, श्रीअरजिनस्य दशाधिकानि पञ्चैव शतानि, श्रीमल्लिजिनस्य षट् शतानि अष्टषष्ट्यधिकानि, श्रीमुनिसुव्रतस्य शतानि पञ्च, श्रीनमेश्चत्वारि शतानि पञ्चाशदधिकानि, श्रीनेमेश्चत्वारि शतानि, श्रीपार्श्वजिनस्य त्रीणि शतानि पञ्चाशदधिकानि, श्रीवीरजिनस्य च त्रीणि शतानि, इदं पूर्वोक्तमृषभादिजिनेन्द्राणां क्रमेण चतुर्दशपूर्वि

१ 'चउ' इत्यादि-मु० ॥
२ समवायाङ्गे ६३०० (सू.९३) ॥

परिमाणम् * ॥३६०-३६३॥ २३॥

इदानीं 'सङ्घ' त्ति चतुर्विंशतितमं द्वारमाह—

पढमस्स तिन्नि लक्खा पंच सहस्सा दुलक्ख जा संती ।
लक्खोवरि अडनउई २ तेणउई ३ अट्ठसीई य ४ ॥३६४॥
एगसीई ५ छावत्तरि ६ सत्तावण्णा ७ य तह य पन्नासा ८ ।
गुणतीस ९ नवासीई १० अणुणासी ११ पनरस १२ अट्ठेव १३ ॥३६५॥
छच्चिय सहस्स १४ चउरो सहस्स १५ नउई सहस्स संतिस्स १६ ।
तत्तो एगो लक्खो उवरिं गुणसीय १७ चुलसी १८ य ॥३६६॥
तेयासी १९ बावत्तरि २० सत्तरि २१ इगुहत्तरी २२ य चउसट्ठी २३ ।
एगुणसट्ठि सहस्सा २४ सावगमाणं जिणवराणं ॥३६७॥

' 'पढमस्स तिन्नी' त्यादिगाथाचतुष्टयम् , तत्र प्रथमजिनस्य श्रावकाणां तिस्रो लक्षाः पञ्चसहस्राधिकाः, श्रीअजितादिजिनानां यावत् शान्तिजिनस्तावल्लक्षद्वयं श्राद्धानाम् द्विलक्षोपरि च यदधिकं भवति तन्निवेद्यते, तत्र तृतीयगाथावर्ति 'सहस्स'त्ति पदस्य सर्वत्राभिसम्बन्धात् अष्टनवतिः सहस्रा अजितजिनस्य, लक्ष-

---

* त्रयस्त्रिंशत्सहस्राणि शतानि नव चोपरि । अष्टानवत्युपेतानि (३३९९८) स्युश्चतुर्दशपूर्विणः ॥ लो. प्र. (३२।१०६१) ॥

१ 'पढमे' त्यादि० मु ॥

द्वयमष्टनवतिसहस्राधिकमित्यर्थः, त्रिनवतिः श्रीसम्भवस्य, लक्षद्वयं त्रिनवतिसहस्राधिकमित्यर्थः, अष्टाशीतिश्च श्रीअभिनन्दनस्य, लक्षद्वयमष्टाशीतिसहस्राधिकमित्यर्थः, एकाशीतिः श्रीसुमतेः, लक्षद्वयमेकाशीतिसहस्राधिकमित्यर्थः, षट्सप्ततिः श्रीपद्मप्रभस्य, लक्षद्वयं षट्सप्ततिसहस्राधिकमित्यर्थः, सप्तपञ्चाशच्च श्रीसुपार्श्वस्य, लक्षद्वयं सप्तपञ्चाशत्सहस्राधिकमित्यर्थः, तथा [1]पञ्चाशत् श्रीचन्द्रप्रभस्य, लक्षद्वयं पञ्चाशत्सहस्राधिकमित्यर्थः, एकोनत्रिंशत् श्रीसुविधेः, लक्षद्वयमेकोनत्रिंशत्सहस्राधिकमित्यर्थः, नवाशीतिः श्रीशीतलस्य, लक्षद्वयं नवाशीतिसहस्राधिकमित्यर्थः, एकोनाशीतिः श्रीश्रेयांसस्य, लक्षद्वयं एकोनाशीतिसहस्राधिकमित्यर्थः, पञ्चदश श्रीवासुपूज्यस्य, लक्षद्वयं पञ्चदशसहस्राधिकमित्यर्थः, अष्टैव श्रीविमलजिनस्य, लक्षद्वयं अष्टसहस्राधिकमित्यर्थः, षट् सहस्राः श्रीअनन्तजिनस्य, लक्षद्वयं षट्सहस्राधिकमित्यर्थः, चत्वारः सहस्राः [2]श्रीधर्मजिनस्य, लक्षद्वयं चतुर्भिः सहस्रैरधिकमित्यर्थः, नवतिसहस्राः श्रीशान्तेः, लक्षद्वयं नवतिसहस्राधिकमित्यर्थः, ततः–श्रीशान्तिनाथादनन्तरं कुन्थुप्रभृतीनां तीर्थकृतां महावीरपर्यन्तानामेकं लक्षं श्राद्धानाम् लक्षोपरि च यत्सङ्ख्यास्थानं तदुच्यते–यथा एकोनाशीतिः श्रीकुन्थोः, लक्षमेकमेकोनाशीतिसहस्राधिकमित्यर्थः, चतुरशीतिः श्रीअरजिनस्य, लक्षमेकं चतुरशीतिसहस्राधिकमित्यर्थः व्यशीतिः श्रीमल्लेः, लक्षमेकं व्यशीतिसहस्राधिकमित्यर्थः, द्विसप्ततिः श्रीमुनिसुव्रतस्य, लक्षमेकं द्विसप्ततिसहस्राधिकमित्यर्थः, सप्ततिर्नमेः, लक्षमेकं सप्ततिसहस्राधिकमित्यर्थः, एकोनसप्ततिः श्रीनेमेः, लक्षमेकमेकोनसप्ततिसहस्राधिकमित्यर्थः, चतुःषष्टिः श्रीपार्श्वस्य, लक्षमेकं चतुःषष्टिसहस्राधिकमित्यर्थः, एकोनषष्टिसहस्राः श्रीवीरजिनस्य, लक्षमेक-

१ पञ्चाशच्चन्द्रप्रभस्य-मु० ॥ २ मतान्तरेण २४०००० इति सप्तति-शतस्थानप्रकरणाभिप्रायः (गाथा २४१) ॥

मेकोनषष्टिसहस्राधिकमित्यर्थः, इति जिनवरेन्द्रचतुर्विंशतेः सम्बन्धिनां श्रावकाणां [1]मानं क्रमेण ज्ञातव्यम् ॥३६४-३६७॥२४॥

इदानीं 'सङ्ख्या' ति पञ्चविंशतितमं द्वारं निर्दिदिक्षुराह—

पढमस्स पंच लक्खा चउपन्न सहस्स १ तयणु पण लक्खा ।
पणयालीससहस्सा २ छलक्ख छत्तीस सहसा य ३ ॥३६८॥
सत्तावीससहस्साहियलक्खा पंच ४ पंच लक्खा य ।
सोलससहस्स अहिया ५ पणलक्खा पंच उ सहस्सा ६ ।३६९॥
उवरिं चउरो लक्खा धम्मो जा उवरि सहस तेणउई ७ ।
इगनउई ८ इगहत्तरि ९ अडवन्न १० ऽडयाल ११ छत्तीसा १२ ॥३७०॥
चउवीसा १३ चउदस १४ तेरसेव १५ तत्तो तिलक्ख जा वीरो ।
तदुवरि तिनवइ १६ इगासी १७ बिसत्तरी १८ सयरि १९ पन्नासा २० ॥३७१॥
अडयाला २१ छत्तीसा २२ इगुचत्त २३ ऽट्ठारसेव य सहस्सा २४ ।
सङ्ख्या माणमेयं चउवीसाए जिणवराणं ॥३७२॥

'पढमस्से'त्यादिगाथापञ्चकम्, तत्र प्रथमस्य—आदिजिनस्य श्राविकाणां पञ्च लक्षाणि चतुष्पञ्चाशत्सहस्राधिकानि, तदनु—प्रथमतीर्थंकरानन्तरमजितस्य श्राविकाणां पञ्च लक्षाणि, पञ्चचत्वारिंशत्सहस्राधि-

१ 'सर्वेषां जिनानां पिण्डिकृताः श्रावकाः ज्ञेयाः ५५४८००० ।' इति सप्ततिशत. प्र. टीका पृ. ५८ B ॥

कानि, श्रीसम्भवस्य षट् लक्षाणि षट्त्रिंशत्सहस्राश्च, अभिनन्दनस्य सप्तविंशतिसहस्राधिका लक्षाः पञ्च, सुमतिजिनस्य लक्षाः पञ्च षोडशसहस्राधिकाः, श्रीपद्मप्रभस्य लक्षाः पञ्च पञ्चसहस्राधिकाः, इत ऊर्ध्वं—पद्मप्रभादारभ्य धर्मजिनं यावत् श्राविकाणां चतस्रो लक्षाः प्रत्येकमुपरि च त्रिनवत्यादयः सहस्राः, कोऽर्थः ?—सुपार्श्वस्य श्राविकाणां लक्षचतुष्टयं त्रिनवतिसहस्राधिकम्, चन्द्रप्रभस्य लक्षचतुष्टयमेकनवतिसहस्राधिकम्, सुविधेर्लक्षचतुष्टयमेकसप्ततिसहस्राधिकम्, शीतलस्य लक्षचतुष्टयमष्टपञ्चाशत्सहस्राधिकम्, श्रेयांसस्य लक्षचतुष्टयं अष्टचत्वारिंशत्सहस्राधिकम्, वासुपूज्यस्य लक्षचतुष्टयं षट्त्रिंशत्सहस्राधिकम्, विमलस्य लक्षचतुष्टयं चतुर्विंशतिसहस्राधिकम्, अनन्तस्य लक्षचतुष्टयं चतुर्दशसहस्राधिकम्, धर्मस्य लक्षचतुष्टयं त्रयोदशसहस्राधिकम्. ततः—श्रीशान्तिनाथादारभ्य प्रत्येकं लक्षत्रयं श्राविकाणां यावन्महावीरम्, तदुपरि च—त्रिलक्षोपरि च त्रिनवत्यादयः सहस्राः, तत्र श्रीशान्तेर्लक्षत्रयं त्रिनवतिसहस्राधिकम्, कुन्थोर्लक्षत्रयमेकाशीतिसहस्राधिकम्, अरजिनस्य लक्षत्रयं द्विसप्ततिसहस्राधिकम्, मल्लेर्लक्षत्रयं सप्ततिसहस्राधिकम्, मुनिसुव्रतस्य लक्षत्रयं पञ्चाशत्सहस्राधिकम्, श्रीनमेर्लक्षत्रयमष्टचत्वारिंशत्सहस्राधिकम्, श्रीनेमेर्लक्षत्रयं षट्त्रिंशत्सहस्राधिकम्, श्रीपार्श्वस्य लक्षत्रयमेकोनचत्वारिंशत्सहस्राधिकम्, वीरजिनस्य च लक्षत्रयमष्टादशसहस्राधिकम्, श्राविकाणां मानमेतच्चतुर्विंशतेर्जिनवराणामिति * ॥३६८-३७२॥२५॥

* '१०५३८००० एषा सर्वश्राद्धीनां संख्या ज्ञेया' इति सप्ततिशत. प्र. टीका पृ. ५८ B ॥

इदानीं 'जिणजक्ख' त्ति षड्विंशतितमं द्वारं विवरीतुमाह—

[1] जक्खा गोमुह १ महजक्ख २ तिमुह ३ ईसर ४ तुंबुरु ५ कुसुमो ६ ।
मायंगो ७ विजया ८ जिय ९ बंभो १० मणुओ ११ य सुरकुमरो १२ ॥३७३॥
छम्मुह १३ पयाल १४ किन्नर १५ गरुडो १६ गंधव्व १७ तह य जक्खिंदो १८ ।
कूबर १९ वरुणो २० भिउडी २१ गोमेहो २३ वामण २३ मयंको २४ ॥३७४॥

[तुलना—संतिकरं ७-८]

'जक्खा गोमुह' इत्यादिगाथाद्वयम्, यक्षा भक्तिदक्षास्तीर्थकृतामिमे, यथा प्रथमजिनस्य गोमुखो यक्षः सुवर्णवर्णो गजवाहनश्चतुर्भुजो वरदा-ऽक्षनालिकायुक्तदक्षिणपाणिद्वयो मातुलिङ्ग-पाशकान्वितवामपाणिद्वयश्च १, अजितनाथस्य महायक्षाभिधो यक्षश्चतुर्मुखः श्यामवर्णः करीन्द्रवाहनोऽष्टपाणिर्वरद-मुद्गरा-ऽक्षसूत्र पाशकान्वितदक्षिणपाणिचतुष्टयो बीजपूरका-ऽभया-ऽङ्कुश-शक्तियुक्तवामपाणिचतुष्कश्च २, श्रीसम्भवजिनस्य त्रिमुखो नाम यक्षस्त्रिवदनस्त्रिनेत्रः श्यामवर्णो मयूरवाहनः षड्भुजो नकुल गदा-ऽभययुक्त-दक्षिणकरकमलत्रयो मातुलिङ्ग-नागा-ऽक्षसूत्रयुक्तवामपाणिपद्मत्रयश्च ३, श्रीअभिनन्दनस्य ईश्वरो यक्षः श्यामकान्तिर्गजवाहनश्चतुर्भुजो मातुलिङ्गा-ऽक्षसूत्रयुक्तदक्षिणकरकमलद्वयो नकुला-ऽङ्कुशान्वितवामपाणि-द्वयश्च ४, श्रीसुमतेस्तुम्बुरुर्यक्षः श्वेतवर्णो गरुडवाहनश्चतुर्भुजो वरद-शक्तियुक्तदक्षिणपाणिद्वयो गदा-नागपाशयुक्तवामपाणिद्वयश्च ५, श्रीपद्मप्रभस्य कुसुमो यक्षो नीलवर्णः कुरङ्गवाहनश्चतुर्भुजः फला-ऽभय-

१ तुलना—सप्ततिशत. प्र. २२५-६ ॥ जक्खो-इत्यादि-मु० ॥

युक्तदक्षिणपाणिद्वयो नकुला-ऽक्षसूत्रयुक्तवामपाणिद्वयश्च ६, श्रीसुपार्श्वस्य मातङ्गो यक्षो नीलवर्णो गज-वाहनश्चतुर्भुजो [1]बिल्व-पाशयुक्तदक्षिणपाणिद्वयो नकुला-ऽङ्कुशयुक्तवामपाणिद्वयश्च ७, श्रीचन्द्रप्रभस्य विजयो यक्षो हरितवर्णस्त्रिलोचनो हंसवाहनो द्विभुजः कृतदक्षिणहस्तचक्रो वामहस्तधृतमुद्गरश्च ८, श्रीसुविधि-जिनस्याजितो यक्षः श्वेतवर्णः कूर्मवाहनश्चतुर्भुजो मातुलिङ्गा-ऽक्षसूत्रयुक्तदक्षिणपाणिद्वयो नकुल-कुन्त-कलि-तवामपाणिद्वयश्च ९, श्रीशीतलस्य ब्रह्मा यक्षश्चतुर्मुखस्त्रिनेत्रः सितवर्णः पद्मासनोऽष्टभुजो मातुलिङ्ग-मुद्गर-पाशका-ऽभययुक्तदक्षिणपाणिचतुष्टयो नकुल-गदा-ऽङ्कुशा-ऽक्षसूत्रयुक्तवामपाणिचतुष्टयश्च १०, श्रीश्रेयांसस्य मनुजो यक्षो मतान्तरेणेश्वरो धवलवर्णस्त्रिनेत्रो वृषभवाहनश्चतुर्भुजो मातुलिङ्ग-गदायुक्तदक्षिणपाणिद्वयो नकुला-ऽक्षसूत्रयुक्तवामपाणिद्वयश्च ११, श्रीवासुपूज्यस्य सुरकुमारो यक्षः श्वेतवर्णो हंसवाहनश्चतुर्भुजो बीजपूरक-[2]बाणान्वितदक्षिणपाणिद्वयो नकुल-धनुर्युक्तवामपाणिद्वयश्च १२, श्रीविमलस्य षण्मुखो यक्षः श्वेतवर्णः शिखि-वाहनो द्वादशभुजः फल-चक्र-बाण-खड्ग-पाशका ऽक्षसूत्रयुक्तदक्षिणपाणिषट्को नकुल-चक्र धनुः-फलका-ऽङ्कुशा-ऽभययुक्तवामपाणिषट्कश्च १३, श्रीअनन्तस्य पातालो यक्षस्त्रिमुखो रक्तवर्णो मकरवाहनो षड्भुजः पद्म-खड्ग-पाशयुक्तदक्षिणपाणित्रयो नकुल-फलका-ऽक्षसूत्रयुक्तवामपाणित्रयश्च १४, श्रीधर्मस्य किन्नरो यक्ष-

---

१ बिल्व-पाश० इति निर्वाणकलिका (पृ. ३५ A) । मन्त्राधिराजकल्पे तु 'अदुम्बर-बिल्व युतदक्षिण-पाणियुग्मः' इति पाठः (प्रति० प्रबोधटीका भा. ३, पृ. ७०६ । बिल्वपाश० लो. प्र. (३२।४६८) ॥

२ •वीणान्वित० मु० । •बाणान्वित० नि.क. पृ. ३५ B, विषमपद-वृत्तिः, ३१ A । बाणशालि० लो. प्र. ३२।५८४) ॥

स्त्रिमुखो रक्तवर्णः कूर्मवाहनः षड्भुजो बीजपूरक-गदा-ऽभययुक्तदक्षिणपाणित्रयो नकुल-पद्मा-ऽक्षमाला-युक्तवामपाणित्रयश्च १५, श्रीशान्तिनाथस्य गरुडो यक्षो वराहवाहनः क्रोडवदनः श्यामरुचिश्चतुर्भुजो बीजपूरक-पद्मान्वितदक्षिणकरद्वयो नकुला-ऽक्षसूत्रयुक्तवामपाणिद्वयश्च १६, श्रीकुन्थोर्गन्धर्वयक्षः श्यामवर्णो हंसवाहनश्चतुर्भुजो वरद पाशकान्वितदक्षिणपाणिद्वयो मातुलिङ्गा-ऽङ्कुशाधिष्ठितवामकरद्वयश्च १७, श्रीअर-जिनस्य यक्षेन्द्रो यक्षः षण्मुखस्त्रिनेत्रः श्य मवर्णः [1]शङ्खवाहनो द्वादशभुजो बीजपूरक-बाण-खड्ग-मुद्गर--पाशका-ऽभययुक्तदक्षिणकरषट्को नकुल-[2]धनु-चर्मफलक-शूला-ऽङ्कुशा-ऽक्षसूत्रयुक्तवामपाणिषट्कश्च १८, श्रीमल्लिजिनस्य कुबेरो यक्षश्चतुर्मुख इन्द्रायुधवर्णो गजवाहनोऽष्टभुजो [3]वरद-परशु-शूला-ऽभययुक्तदक्षिण पाणिचतुष्टयो बीजपूरक-शक्ति-मुद्गर-ऽक्षसूत्रयुतवामपाणिचतुष्टयश्च, अन्ये कुबेरस्थाने कुबेरमाहुः १९, श्रीमुनिसुव्रतस्य वरुणो [4]यक्षश्चतुर्मुखस्त्रिनेत्रः सितवर्णो वृषभवाहनो जटामुकुटभूषितोऽष्टभुजो बीजपूरक-गदा बाण-शक्तियुक्तदक्षिणकरकमलचतुष्को नकुल-पद्म-धनुः-परशुयुतवामपाणिचतुष्टयश्च २०, श्रीनमि-

---

१ शिखीवाहनो-सं.। शम्बरवाह० निर्वाणकलिका (पृ. ३६ B)। शङ्खवा० नि. क. पाठा. - श्लोक प्र. (३२-७५७) ॥ शङ्खारूढो-त्रिषष्टिपद-वृत्तिः ३१ I. ॥

२ ०धनुः फलक० इति-मु० त्रिषष्टिपद-वृत्तिः ३१B। तुलना-निर्वाणकलिका (पृ. ३६B)

३ वरदपाशचापशूलाभय० इति नि. क. (पृ. ३६B ॥ वरदपरशु० त्रि. प. ३१B। निर्वाणक टि. पृ. ३६ B॥

४ यक्षश्चतुर्मुखस्त्रिनेत्रोऽसितवर्णो-मु०। धवलवर्ण-इति-निर्वाणक. (पृ. ३६B)। श्वेतवर्णो-श्लो. प्र. (३२।८१२)॥ ०स्त्रिनेत्रः सित०त्रिषष्टिपद-वृत्ति ३१ B॥

जिनस्य भृकुटियक्षश्चतुर्मुखस्त्रिनेत्रः सुवर्णवर्णो कूर्मवाहनोऽष्टभुजो बीजपूरक-शक्ति-मुद्गरा-ऽभययुक्त-दक्षिणकरचतुष्टयो नकुल-परशु-वज्रा-ऽक्षसूत्रयुक्तवामकरचतुष्टयश्च २१, श्रीनेमिजिनस्य गोमेधो यक्ष-स्त्रिमुखः श्यामकान्तिः पुरुषवाहनः षड्भुजो मातुलिंग-परशु-चक्रान्वितदक्षिणकरत्रयो नकुल शूल-शक्ति-युक्तवामपाणित्रयश्च २२, श्रीपार्श्वजिनस्य वामनो यक्षो मतान्तरेण पार्श्वनामा यक्षो गजमुख उरगफण-मण्डितशिराः श्यामवर्णः कूर्मवाहनश्चतुर्भुजो बीजपूरकोरगयुक्तदक्षिणपाणिद्वयो नकुल-भुजगयुक्तवामपा-णियुगश्च २३, श्रीवीरजिनस्य मातङ्गो यक्षः श्यामवर्णो गजवाहनो द्विभुजो नकुलयुक्तदक्षिणभुजो वाम-करधृतबीजपूरकश्चेति २४ ॥३७३–३७४॥२६॥

इदानीं 'जिणदेवीओ' त्ति सप्तविंशतितमं द्वारमाह–

* देवीओ चक्केसरी १ अजिया २ दुरियारि ३ कालि ४ महकाली ५ ।
अच्चुय ६ संता ७ जाला ८ सुतारया ९ ऽसोय १० सिरिवच्छा ११ ॥३७५॥
पवर १२ विजयं १३ कुसा १४ पण्णत्ती १५ निव्वाणि १६ अच्चुया १७ धरणी १८ ।
वइरोट्ट १९ ऽछुत्त २० गंधारि २१ अंब २२ पउमावई २३ सिद्धा २४ ॥३७६॥

[तुलना–संतिकरं–६-१०]

'देवी'त्यादि गाथाद्वयम्, तत्राद्यजिनस्य चक्रेश्वरी देवी, मतान्तरेणाप्रतिचक्रा, सुवर्णवर्णा गरुडवाहना अष्टकरा वरद-बाण-चक्र-पाशयुक्त दक्षिणपाणिचतुष्टया धनुर्वज्र-चक्रा-ऽङ्कुशयुक्तवामपाणि-

* तुलना–सप्ततिशत. प्र. २३७-८ ॥१ देवीउ चक्केसरि इत्यादि–सं. ॥

चतुष्टया चेति १, श्रीअजितजिनस्याजिताऽजितबला वा देवी गौरवर्णा लोहासनाधिरूढा चतुर्भुजा वरद-पाशकाधिष्ठितदक्षिणकरद्वया बीजपूरका-ऽङ्कुशालङ्कृतवामपाणिद्वया च २, श्रीसम्भवस्य दुरितारिर्देवी गौरवर्णा मेषवाहना चतुर्भुजा वरदा-ऽक्षसूत्रभूषितदक्षिणभुजद्वया फला-ऽभयान्वितवामकरद्वया च ३, श्रीअभिनन्दनस्य कालीनामा देवी श्यामकान्तिः पद्मासना चतुर्भुजा वरद-पाशाधिष्ठितदक्षिणकरद्वया नागा-ऽङ्कुशालङ्कृतवामपाणिद्वया च ४, श्रीसुमतेर्महाकाली देवी सुवर्णवर्णा पद्मासना चतुर्भुजा वरद-पाशाधिष्ठितदक्षिणकर[1]द्वया मातुलिङ्गा-ऽङ्कुशयुक्तवामपाणिद्वया चेति ५, श्रीपद्मप्रभस्याच्युता मतान्तरेण श्यामा देवी श्यामवर्णा नरवाहना चतुर्भुजा [2]वरद-वीणान्वितदक्षिणकरद्वया कार्मुका-ऽभययुतवाम-पाणिद्वया च ६, श्रीसुपार्श्वस्य शान्ता देवी सुवर्णवर्णा गजवाहना चतुर्भुजा वरदा-ऽक्षसूत्रयुक्तदक्षिण-करद्वया शूला-ऽभययुक्तवामहस्तद्वया च ७, श्रीचन्द्रप्रभस्य ज्वाला मतान्तरेण भृकुटिर्देवी पीतवर्णा [3]वराहकाख्यजीवविशेषवाहना चतुर्भुजा खड्ग-मुद्गरभूषितदक्षिणकरद्वया फलक-परशुयुतवामपाणिद्वया च ८, श्रीसुविधेः सुतारा देवी गौरवर्णा वृषभवाहना चतुर्भुजा वरदा-ऽक्षसूत्रयुक्तदक्षिणकरद्वया कलशा-ऽङ्कुशाञ्चितवामपाणिद्वया च ९, श्रीशीतलस्य अशोका देवी नीलवर्णा पद्मासना चतुर्भुजा वरद-पाशयुक्त-दक्षिणपाणिद्वया [4]फला-ऽङ्कुऽशयुक्तवामपाणिद्वया च १०. श्रीश्रेयांसस्य श्रीवत्सा देवी मतान्तरेण मानवी

१ °द्वया च मातु°-जे.सं ॥ २ वरदवाणान्वित० मु., नि.क.पाठा. । वरदवीणा० निर्वाणक (पृ.३५A) युक्तं वरदवाणाभ्यां-लो.प्र.(३२।४४) वरदपाशान्वितदक्षिणकरद्वया मातुलिङ्गाङ्कुशयुतवामपाणिद्वया च इति विषमपद-३२-B

३ वराह (बिडाल) वाहनां-निर्वाणक. (पृ. ३५A)। विराल० इति निर्वाणक. पाठान्तरम् (पृ-३५ A) ॥

४ फलकाङ्कु मु., वि. प. ३२B । फलाङ्कुश० निर्वाणक. (पृ. ३५B) फलमङ्कुशम्-लो.प्र. (३२।५४२) ॥

गौरवर्णा सिंहवाहना चतुर्भुजा [1]वरद-मुद्गरान्वितदक्षिणकरद्वया कलशा-ऽङ्कुशयुक्तवामकरद्वया च ११, श्रीवासुपूज्यस्य [2]प्रवरा देवी मतान्तरेण चण्डादेवी श्यामवर्णा तुरगवाहना चतुर्भुजा वरद-शक्तियुक्त-दक्षिणकरयुगा पुष्प-गदायुतवामकरद्वया च १२, श्रीविमलस्य विजया मतान्तरेण विदिता देवी हरितालवर्णा पद्मासना चतुर्भुजा बाण-पाशयुक्तदक्षिणकरद्वया धनुर्नागयुतवामपाणिद्वया च १३, श्रीअनन्तजिनस्य अङ्कुशा देवी गौरवर्णा पद्मासना चतुर्भुजा खड्ग-पाशयुक्तदक्षिणपाणि [3]द्वयाफलका-ऽङ्कुशयुक्तवाम-करद्वया च १४, श्रीधर्मस्य पन्नगा देवी मतान्तरेण कन्दर्पा गौरवर्णा मत्स्यवाहना चतुर्भुजा उत्पला ऽङ्कुऽशयुक्तदक्षिणपाणिद्वया पद्मा-ऽभययुतवामपाणिद्वया च १५, श्रीशान्तिनाथस्य निर्वाणीदेवी [4]कनक-रुचिः पद्मासना चतुर्भुजा पुस्तकोत्पलयुक्तदक्षिणपाणिद्वया कमण्डलु-कमलकलितवामकरद्वया च १६, श्रीकुन्थोरच्युता देवी मतान्तरेण बलाभिधाना [5]कनकच्छविर्मयूरवाहना चतुर्भुजा बीजपूरक-शूलान्वित-दक्षिणपाणिद्वया मुषुण्ढि-पद्मान्वितवामपाणिद्वया च १७, श्रीअरजिनस्य धारणी देवी [6]नीलवर्णा पद्मासना

---

१ वरदपाशयुक्तदक्षिण० मु. । वरद-मुद्गरान्वित० निर्वाण क० (पृ. ३५ B) विषमपद-३२–B । वरदं मुद्गरं-लो० प्र० (३२/५६५) ॥ २ प्रचण्डा० निर्वाणक० (पृ-३५B) ॥

३ ०द्वया च फल० सं. । चर्मफलका निर्वाणक० (पृ ३६A)

४ 'गौरवर्णा'- निर्वाणक. (पृ.३६A) । 'कनकच्छविः लोक. प्र. (३२/७१३) ॥ स्वर्णाभा-विषमपद. ३३A

५ 'गौरवर्णा'-निर्वाणक. (पृ.३६B) । 'स्वर्णद्युतिः' लो.प्र. (३२।७२५), स्वर्णाभा-वि.प.३२B ॥

६ 'कृष्णवर्णा-' निर्वाणक. (पृ ३६B) । नीलवर्णा' लो.प्र. (३२/७२६), नीलाभा-वि.प. ३३B ॥

चतुर्भुजा मातुलिङ्गोत्पलयुक्तदक्षिणपाणिद्वया [1]पद्मा-ऽक्षसूत्रान्वितवामपाणिद्वया च १८, श्रीमल्लिजिनस्य वैरोट्या देवी कृष्णवर्णा पद्मासना चतुर्भुजा वरदा-ऽक्षसूत्रयुक्तदक्षिणपाणिद्वया बीजपूरक-शक्तियुक्तवाम-पाणिद्वया चेति १९, श्रीमुनिसुव्रतस्य [2]अच्छुप्ता देवी मतान्तरेण नरदत्ता कनकरुचिर्भद्रासनारूढा चतुर्भुजा वरदा-ऽक्षसूत्रयुक्तदक्षिणभुजद्वया [3]बीजपूरक-शूलयुक्तवामकरद्वया च २०, श्रीनमिजिनस्य गान्धारी देवी श्वेतवर्णा हंसवाहना चतुर्भुजा वरद-खड्गयुक्तदक्षिणकरद्वया बीजपूरक-[4]कुन्तकलितवामकरद्वया च २१, श्रीनेमिजिनस्य अम्बा देवी कनककान्तिरुचिः सिंहवाहना चतुर्भुजा [5]आम्रलुम्बि-पाशयुक्तदक्षिणकरद्वया [6]पुत्रा-ऽङ्कुशासक्तवामकरद्वया च २२, श्रीपार्श्वजिनस्य पद्मावती देवी कनकवर्णा [7]कुर्कुटसर्पवाहना चतुर्भुजा पद्म-पाशान्वितदक्षिणकरद्वया फला-ऽङ्कुशाधिष्ठितवामकरद्वया च २३, श्रीवीरजिनस्य सिद्धायिका देवी हरितवर्णा सिंहवाहना चतुर्भुजा पुस्तका-ऽभययुक्तदक्षिणकरद्वया [8]बीजपूरक-वीणाभिरामवामकरद्वया

---

१ पाशाक्ष० निर्वाणिक (पृ.३६B)। पद्माक्ष० लो.प्र. (३२/७५८), वि.प.३३B ॥

२ वरदत्ता' निर्वाणिक. (पृ.३६B) ॥ नरदत्ता मतान्तरे इति लो.प्र. (३२/८१४) ॥

३ बीजपूरककुम्मयुत० निर्वाणिक. (पृ ३६B)। बीजपूरं शक्तिं-लो-प्र. (३२/८१३)। मातुलिङ्गशूल० वि.प.३३B। निर्वाणिक. टि. (पृ.३६B) ॥

४ ०कुम्मयुत० निर्वाणिक. (पृ.३७A)। ०कुन्ताभ्यां-लो.प्र. (३२/८३६) ॥ ०कुन्तान्वित०-वि.प.३३B ॥

५ मातुलिङ्गपाशयुक्तदक्षिण०-निर्वाणिक. (पृ.३७A)-आम्रलुम्बिपाश०-लो.प्र. (३२/८७४) वि.प.३३B॥

६ पात्राङ्कुश०-लो.प्र. (३२।८७४) ॥ ७ कुर्कुटवाहनां-निर्वाणिक. (पृ.३७A)। कुर्कुटोरग० लो.प्र. (३२।९१४) ॥

८ मातुलिङ्गवीणान्वित० निर्वाणिक. (पृ.३७B)। बीजपूरकवीणाढ्य०-लो-प्र-(३२।११२०)।

चेति २४ । अत्र च सूत्रकारेण यक्षाणां देवीनां च केवलानि नामान्येवाभिहितानि, न पुनर्नयन-वदन-वर्णादिस्वरूपं निरूपितम्, अस्माभिस्तु शिष्यहिताय **निर्वाणकलिकादिशास्त्रानुसारेण** किंचित्तदीयमुख-वर्ण-प्रहरणादिस्वरूपं निरूपितमिति ॥३७५-३७६॥ ॥२७॥

इदानीं 'तणुमाणं' ति अष्टाविंशतितमं द्वारमाह—

पंचधणूसय पढमो कमेण पण्णासहीण जा सुविही १०० ।
दसहीण जा अणंतो ५० पंचूणा जाव जिणनेमी १० ॥३७७॥
नव हत्थपमाणो पाससामिओ सत्त हत्थ जिणवीरो ।
उस्सेहअंगुलेणं सरीरमाणं जिणवराणं ॥३७८॥

'[1]पंचे' त्यादि, गाथाद्वयम्, तत्र प्रथमो जिनः—ऋषभस्वामी पञ्चधनुःशतः—पञ्च धनुषां शतानि अर्थाद्देहप्रमाणं यस्य स तथा पञ्चधनुः[2]शतप्रमाणशरीर इत्यर्थः । ततोऽजितादयः 'क्रमेण' परिपाट्या पञ्चाशता धनुषां हीना यावत्सुविधिजिनः, कोऽर्थः ?—पञ्चभ्यो धनुःशतेभ्यः पञ्चाशत्पञ्चाशत्पात्यन्ते, ततोऽजितजिनस्य चत्वारि धनुःशतानि पञ्चाशद्धनुरधिकानि देहमानम्, एवं सम्भवस्वामिनश्चत्वारि धनुःशतानि, अभिनन्दनस्य पञ्चाशदधिकानि त्रीणि धनुःशतानि, सुमतिनाथस्य त्रीणि धनुःशतानि, पद्मप्रभस्य पञ्चाशदधिके द्वे धनुःशते, सुपार्श्वस्य द्वे धनुःशते, चन्द्रप्रभस्य सार्धं धनुःशतम्, सुविधि-

१ तनुमाणं-मु. । २ पंचधणुस्सय इत्यादि-सं० ॥ ३ शतप्रमाण इत्यर्थः-मु० ॥

स्वामिनः परिपूर्णं धनुः शतम् । 'दसहीण जा अणंतो' त्ति सुविधेरनन्तरं यावदनन्तजिनस्तावत्तीर्थकृतस्तनुमानविषये क्रमेण दशभिर्दशभिर्धनुर्भिर्हीना वक्तव्याः । ततोऽयमर्थः-सुविधिजिनतनुमानाद्धनुःशतलक्षणादशस्वपनीतेषु शीतलस्य नवतिर्धनूंषि देहमानम्, एवं श्रेयांसस्य अशीतिर्धनूंषि, वासुपूज्यस्य सप्ततिः, विमलस्य षष्टिः, अनन्तजिनस्य पञ्चाशद्धनूंषि । 'पंचूणा जाव जिणनेमि' त्ति अनन्तजिनादनन्तरं तीर्थकृतः क्रमेण पञ्चभिः पञ्चभिन्यूर्नास्तावद्वक्तव्या यावन्नेमिजिनः । ततश्चायमर्थः-अनन्तजिनदेहमानात्पञ्चाशद्धनुःस्वरूपात् पञ्चसूदधृतेषु धर्मजिनस्य पञ्चचत्वारिंशद्धनूंषि देहमानम्, एवं शान्तिनाथस्य चत्वारिंशद्धनूंषि, कुन्थुनाथस्य पञ्चत्रिंशद्धनूंषि, अरस्वामिनस्त्रिंशत्, मल्लिजिनस्य पञ्चविंशतिः, मुनिसुव्रतस्य विंशतिः, नमिनाथस्य पञ्चदश, अरिष्टनेमेर्दश धनूंषि, नवहस्तप्रमाणः पार्श्वस्वामी, सप्तहस्तप्रमाणश्च वीरजिनः । इत्येवमुत्सेधाङ्गुलेन-'परमाणू रहरेणू तसरेणू' इत्यादिक्रमनिष्पन्नेन शरीरमानमिदं जिनवराणां विज्ञेयमिति ॥३७७-३७८॥२८॥

साम्प्रतं 'लंछणाणि' त्ति एकोनत्रिंशत्तमं द्वारमाह—

वसह १ गय २ तुरय ३ वानर ४ [1]कूंचो ५ कमलं च ६ सत्थिओ ७ चंदो ८ ।
मयर ९ सिरिवच्छ १० [2]गंडय ११ महिस १२ वराहो १३ य सेणो १४ [3]य ॥३७९॥

---

१ कूंचु-सु०॥ २ गंडो म०-सं० ता०॥ ३ य-सं० नास्ति ।।

वज्जं १५ हरिणो १६ छगलो १७ नंदावत्तो १८ य कलस १९ [1]कुम्मो २० य।
नीलुप्पल २१ संख २२ फणी २३ सीहो २४ य जिणाण [2]चिन्धाइं ॥३८०॥

'वसहे' त्यादि गाथाद्वयम्, वृषभो गजस्तुरगो मर्कटः क्रौंचः कमलं च स्वस्तिकश्चन्द्रो मकरः श्रीवत्सो गण्डको महिषो वराहश्च श्येनश्च वज्रं हरिणश्छगलो नंदावर्तश्च कलशः कूर्मश्च नीलोत्पलं शङ्खः फणी सिंहश्च जिनानां-नाभेयादीनां चिह्नानि-लाञ्छनानि क्रमेण ज्ञातव्यानीति ॥३७९-३८०॥२९॥

इदानीं त्रिंशत्तमं 'वन्ना' इति द्वारमाह—

पउमाभ-वासुपुज्जा रत्ता ससि-पुप्फदंत ससिगोरा ।
सुव्वय-नेमी काला पासो मल्ली पियंगाभा ॥३८१॥
[3]वरतविय़कणयगोरा सोलस तित्थंकरा मुणेयव्वा ।
एसो वन्नविभागो चउवीसाए जिणिंदाणं ॥३८२॥ [तु.आवश्यकनिर्युक्ति ३७६-३७७]

'पउमे' त्यादि गाथाद्वयम्, पद्मप्रभ-वासुपूज्यौ जपापुष्पवद्रक्तौ, शशि-पुष्पदन्तौ-चन्द्रप्रभ-सुविधी शशिगौरौ-चन्द्रचारुरुची, सुव्रत-नेमिनौ इन्द्रनीलमणिवत्कालौ, पार्श्व-मल्लिजिनौ प्रियङ्ग्वाभौ, प्रियङ्गुः-फलिनीतरुस्तदाभौ नीलावित्यर्थः । वरम्-अकृत्रिमं तापितं यत्कनकं तद्वद्गौराः शेषाः षोडश तीर्थङ्करा ज्ञातव्याः, एष वर्णविभागश्चतुर्वि[4]शतेस्तीर्थंकराणामिति ॥३८१-३८२॥३०॥

१ कुमो नी० सं ॥ २ चिन्हाइं-सं.। चिण्हाइं-ता. ॥ ३ वरकणगतविअगोरा-आव. नि. (३७७) ॥ ४ ०शतिस्ती० सं. ॥

इदानीं 'वयपरिवारो' त्ति एकत्रिंशत्तमं द्वारमाह —

एगो [1]भयवं वीरो पासो मल्ली [2]य तिहि तिहि सएहिं ।
[3]भगवंपि वासुपुज्जो [4]छहिं पुरिससएहिं[5] निक्खंतो ॥३८३॥
उग्गाणं भोगाणं रायण्णाणं च खत्ति[6]याणं च ।
चउहिं[7]सहस्सेहिं उसहो सेसा उ [8]१९ सहस्सपरिवारा ॥३८४॥[आव.निर्युक्ति २२४-२२५]

'एगो' इत्यादि गाथाद्वयम्, तत्र एको भगवान् वीरो—वर्धमानस्वामी प्रव्रजितः, न केनापि सह तेन व्रतं गृहीतमित्यर्थः । पार्श्वनाथो भगवांश्च मल्लिस्त्रिभिस्त्रिभिः शतैः सह व्रतमग्रहीत्, अत्र च मल्लिस्वामी स्त्रीणां पुरुषाणां च प्रत्येकं त्रिभिस्त्रिभिः शतैः सह प्रव्रजितः, ततो मिलितानि षट् शतानि भवन्ति । यत्तु सूत्रे त्रिभिः शतैरित्युक्तं तत्र केवलाः स्त्रियः पुरुषा वा गृहीताः, द्वितीयः पुनः पक्षः सन्नपि न विवक्षित इति सम्प्रदायः । **स्थानाङ्गटीकायामप्युक्तम्**—"मल्लिजिनः स्त्रीशतैरपि त्रिभिः" [पृ. १७८ B] इति, भगवानपि वासुपूज्यः षड्भिः पुरुषशतैः सह निष्क्रान्तः—संसारकान्तारान्निर्गतः प्रव्रजित इति यावत् । उग्राणाम्—आरक्षकस्थानीयानाम्, भोगानां—गुरुप्रायाणाम्, राजन्यानां—मित्रप्रायाणाम्, क्षत्रियाणां—सामन्तादीनाम्, सर्वसङ्ख्यया चतुर्भिः सहस्रैः सह ऋषभः—प्रथमो जिनो निष्क्रान्तो व्रतं जग्राहेत्यर्थः । शेषास्तु—वीर-पार्श्व-मल्लि-वासुपूज्य-नाभेयव्यतिरिक्ता जिना अजितादय एकोनविंशतिः सहस्रपरिवाराः—एकपुरुषसहस्रसहिताः प्राव्राजिषुरिति ॥३८३-३८४॥३१॥

१ भगवं-मु. ॥ २ अ-आव नि. ॥ ३ भयवं च-आव. नि. ॥ ४ छहि-आव. नि. ॥ ५ °एहि-आव. नि. ॥ ६ °आणं-आव. नि. ॥ ७ सहस्सेहुसभो-आव. नि. ॥

इदानीं 'सव्वाउयं' ति द्वात्रिंशत्तमं द्वारमाह —

चउरासीइ १ बिसत्तरि २ सट्ठी ३ पन्नास ४ मेव लक्खाइं ।
चत्ता ५ तीसा ६ वीसा ७ दस ८ दो ९ एगं १० च पुव्वाणं ॥३८५॥
[1]चउरासी ११ बावत्तरी १२ य सट्ठी १३ य होइ वासाणं ।
तीसा १४ य दस १५ य एगं ❀ एवमेए सयसहस्सा ॥३८६॥
पंचाणउइ सहस्सा १७ [2]चउरासीई १८ य पंचवन्ना १९ य ।
तीसा २० य दस २१ य एगं २२ सयं २३ च बावत्तरी ९४ चेव ॥३८७॥

[आव. निर्युक्ति ३०३–३०५]

'चउ' इत्यादि गाथात्रयम्, तत्र प्रथमजिनस्य सर्वायुश्चतुरशीतिः पूर्वाणां लक्षाणि, श्रीअजितस्य द्विसप्ततिः पूर्वलक्षाः, श्रीसम्भवस्य षष्टिः पूर्वलक्षाः, श्रीअभिनन्दनस्य पञ्चाशत्पूर्वलक्षाः, श्रीसुमतेश्चत्वारिंशत्पूर्वलक्षाः, श्रीपद्मप्रभस्य त्रिंशत्पूर्वलक्षाः, श्रीसुपार्श्वस्य विंशतिः पूर्वलक्षाः, श्रीचन्द्रप्रभस्य दश पूर्वलक्षाः, श्रीसुविधेर्द्वे पूर्वलक्षे, श्रीशीतलस्य एकं पूर्वलक्षम्। तथा श्रेयांसस्य चतुरशीतिर्वर्षाणां शतसहस्राणि लक्षाणीत्यर्थः, श्रीवासुपूज्यस्य द्विसप्ततिर्वर्षलक्षाः, श्रीविमलस्य षष्टिर्वर्षलक्षाः, श्रीअनन्तस्य त्रिंशद्वर्षलक्षाः, श्रीधर्मस्य दश वर्षलक्षाः, श्रीशान्तेरेकं वर्षलक्षम्। तथा श्रीकुन्थोः पञ्चनवतिर्वर्षसहस्राः सर्वायुः, श्रीअरजिनस्य चतुरशीतिर्वर्षसहस्राः, श्रीमल्लेः पञ्चपञ्चाशद्वर्षसहस्राः, श्रीसुव्रतस्य त्रिंशद्वर्षसहस्राः, श्रीनमेर्दश

१ चउरासीई–आव. नि. ॥ ❀ एवं एए–मु. ॥ २ चउरासीय–जे. ॥

वर्षसहस्राणि, श्रीनेमेरेकं वर्षसहस्रम्, श्रीपार्श्वनाथस्य एकं वर्षशतम्, श्रीवीरजिनस्य च द्विसप्ततिरेव वर्षाणीति ॥३८५-३८७॥३२॥

इदानीं 'सिवगमणपरिवारो' त्ति त्रयस्त्रिंशत्तमं द्वारमाह—

एगो भगवं वीरो [1]तेत्तीसाए सह निव्वुओ पासो ।
[2]छत्तीसेहिं पंचहि सएहिं [3]नेमी उ सिद्धिगओ ॥३८८॥
पंचहिं समणसएहिं मल्ली संती उ नवसएहिं तु ।
अट्ठसएणं धम्मो सएहिं छहिं वासुपुज्जजिणो ॥३८९॥
सत्तसहस्साणंतइजिणस्स विमलस्स छस्सहस्साइं ।
पंच सयाइं सुपासे पउमाभे तिण्णि अट्ठसया ॥३९०॥ [आव. नि. ३०८-३१०]
दसहिं सहस्सेहिं उसहो सेसा उ सहस्सपरिवुडा सिद्धा ।
तित्थयरा उ दुवालस परिनिट्ठियअट्ठकम्मभरा ॥३९१॥

'एगो' इत्यादि गाथात्रयम्, तत्र एकः—एकाकी सन् भगवान् श्रीवीरो '[4]निव्वुतो' निर्वाणं ययौ, त्रयस्त्रिंशता साधुभिः सह निर्वृतः पार्श्वजिनः, षट्त्रिंशदधिकैः पञ्चभिः शतैः सह नेमिजिनः सिद्धिं गतः । पञ्चभिः श्रमणशतैः सह मल्लिजिनः, शान्तिजिनस्तु नवभिः श्रमणशतैः समम्, अष्टोत्तर-

१ तेत्तीसाइ-आव. नि. ॥ २ छत्तीसएहिं-आव. नि. ॥ ३ नेमि गओ सिद्धिं-ता. ॥
४ निर्वृत्तो-मु. एवमग्रेऽपि ॥

शतेन सह धर्मजिनः, शतैः षड्भिः साधै वासुपूज्यजिनः सिद्धिं गतः, [1]तथाऽनन्तजिज्जिनस्य निर्वाणं गच्छतः सप्त सहस्राणि परिवारः, विमलनाथस्य षट् सहस्राणि, पञ्च शतानि च **'सुपाइवें'** सुपार्श्वस्य, **'पद्माभे'** पद्मप्रभस्य त्रीण्यष्टोत्तराणि शतानि, अन्ये त्र्युत्तराण्यष्टौ शतानीति व्याख्यानयन्ति, **आवश्यक-टिप्पनके** तु "पद्मप्रभतीर्थकृद्विषये त्रीण्यष्टोत्तरशतानि साधूनां निर्वृतानीत्यवगन्तव्यम्, त्रिगुणमष्टोत्तरं शतमित्यर्थः, त्रीणि शतानि चतुर्विंशत्यधिकानीतियावत्" [पृ. ११A] इति व्याख्यातम्, तत्त्वं पुनः केवलिनो विदन्ति, ॥३८८-३९०॥

तथा दशभिः सहस्रै ऋषभः-प्रथमो जिनः परमानन्दश्रियमाशिश्लेष, शेषाः पुनरजित-सम्भवा-ऽभिनन्दन -सुमति-चन्द्रप्रभ-सुविधि-शीतल--श्रेयांस-कुन्थुनाथा-ऽरजिन-मुनिसुव्रत-नमिलक्षणा द्वादश तीर्थ-कृतः प्रत्येकमेकैकसहस्रपरिवृताः परिनिष्ठिताष्टकर्मभराः [2]सन्तः सिद्धा इति ॥३९१॥३३॥

इदानीं **'निव्वाणगमणठाणं'** ति चतुस्त्रिंशत्तमं द्वारमाह—

अट्ठावय-चंपुज्जिंत-पावा--सम्मेयसेलसिहरेसु ।
उसभ वसुपुज्ज नेमी वीरो सेसा य सिद्धिगया ॥३९२॥

[3]**'अट्ठे'** त्यादि, अष्टापदे चम्पायाम् उज्जयन्ते अपापायां पुरि सम्मेतशैलशिखरे च यथासङ्ख्येन ऋषभो वासुपूज्यो नेमिर्जिनो वीरः शेषजिनाश्च सिद्धिं गताः, अष्टापदपर्वते श्रीऋषभस्वामी सिद्धिमगमत्,

१ तथा अनंतजितो जिनस्य-सं. ॥ २ सिसन्तः-मु. ॥ ३ अट्ठावए इत्यादि-सं. ॥

चम्पायां नगर्यां वासुपूज्यः, उज्जयन्तगिरौ नेमिनाथः, अपापायां नगर्यां श्रीमहावीरः, शेषास्तु उक्त-व्यतिरिक्ता अजितादयो विंशतिस्तीर्थकृतः सम्मेतशैलशिखरे इति ॥३९२॥३४॥

सम्प्रति 'जिणंतराइं' ति पञ्चत्रिंशं द्वारमाह—

* इत्तो जिणंतराइं वोच्छं किल उसभसामिणो अजिओ ।
पण्णासकोडिलक्खेहिं सायराणं समुप्पण्णो ॥३९३॥
तीसाए संभवजिणो दसहि उ अभिनंदणो जिणवरिंदो ।
नवहि उ सुमइजिणिंदो उप्पण्णो कोडिलक्खेहिं ॥३९४॥
नउईह सहस्सेहिं कोडीणं वोलियाण पउमाभो ।
नवहि सहस्सेहिं तओ सुपासनामो समुप्पण्णो ॥३९५॥
कोडिसएहिं नवहि उ जाओ चंदप्पहो जणाणंदो ।
नउईए कोडीहिं सुविहिजिणो देसिओ समए ॥३९६॥
सीयलजिणो महप्पा तत्तो कोडीहि नवहिं निद्दिट्ठो ।
कोडिए सेयंसो ऊणाइ इमेण कालेण ॥३९७॥
सागरसएण एगेण तह य छावट्ठिवरिसलक्खेहिं ।
छव्वीसाइ सहस्सेहिं तओ पुरो अंतरेसुत्ति ॥३९८॥

* एत्तो-मु. ॥

चउपण्णा अयरेहिं वसुपुज्जजिणो जगुत्तमो जाओ ।
विमलो विमलगुणोहो तीसहि अयरेहि रयरहिओ ॥३९९॥
नवहिं अयरेहि [1]अणंतो चउहि उ धम्मो उ धम्मधुरधवलो ।
तिहि ऊणेहिं संती तिहि चउभागेहिं पलियस्स ॥४००॥
भागेहि दोहिं कुंथू पलियस्स अरो उ एगभागेणं ।
[2]कोडिसहस्सोणेणं वासाण जिणेसरो भणिओ ॥४०१॥
मल्ली तिसल्लरहिओ जाओ वासाण कोडिसहसेण ।
चउपण्णवासलक्खेहिं सुव्वओ सुव्वओ सिद्धो ॥४०२॥
जाओ छहि नमिनाहो पंचहि लक्खेहिं जिणवरो नेमी ।
पासो अट्ठहमसय समहियतेसीइसहसेहिं ॥४०३॥
अड्ढाइज्जसएहिं गएहिं वीरो जिणेसरो जाओ ।
दूसमअइदूसमाणं दोण्हंपि दुचत्तसहसेहिं ॥४०४॥
पुज्जइ कोडाकोडी उसहजिणाओ इमेण कालेण ।
भणियं अंतरदारं एयं समयाणुसारेणं ॥४०५॥

१ ऽणंतो-मु. ॥ २ कोडिसहस्सूणेणं-ता. ॥

"इत्तोजिणंतराइ" इत्यादि गाथात्रयोदशकम्, 'इतो' जिननिर्वाणस्थानानन्तरं जिनान्तराणि-जिनानामन्तरालान्यहं वक्ष्ये-कथयिष्यामि। किलेत्याप्तोपदेशे, अत्र च 'लक्खेहिं' इत्यादिपदेषु सप्तम्यर्थे तृतीया, ततश्च ऋषभस्वामिनः सकाशादजितो जिनः पञ्चाशत्कोटिलक्षेषु सागरोपमाणां गतेषु समुत्पन्नः सिद्धत्वेनेति शेषः। यद्वाऽनेकार्थत्वाद्धातूनां समुत्पन्नः सिद्ध इत्यर्थः। न तु समुत्पन्नो जात इति। इह हि 'उसहसामिणो' इत्यादिपदेषु अवधौ पञ्चमी, अवधिश्च द्विधा-अभिविधिर्मर्यादा च, तत्र यद्यभिविधौ पञ्चमीतिकृत्वा समुत्पन्नो-जात इति व्याख्यायेत तदा ऋषभस्वाम्यादिजन्मकालाद्यथोक्तमजितादिजन्मकालमानं स्यात्। ततश्च ऋषभस्वामिनः सर्वायुः कालमानेनाधिकेषु दुष्पमसुषमारकस्य एकोननवतिपक्षेषु अवशिष्यमाणेषु श्रीमहावीरस्वामिनः सिद्धिः प्रसज्येत। आगमे तु अन्यूनाधिकेषु एकोननवतिपक्षेष्ववशेषेषु श्रीमहावीरसिद्धिरुक्तेत्यागमविरोधप्रसङ्गेन नात्राभिविधौ पञ्चमी, किन्तु मर्यादायामेव। तत्रापि यदि समुत्पन्नो-जात इति व्याख्यायेत तदा ऋषभस्वाम्यादिनिर्वाणकालाद्यथोक्तमजितादिजन्मकालमानं स्यात्। ततश्च यथोक्तजिनान्तराणां कालमानैरेव चतुर्थारकः परिपूर्णः, श्रीमदजितादिजिनत्रयोविंशतेः सर्वायुःकालमानं तु जिनान्तरकालासङ्गृहीतत्वान्नदधिकमापद्यत, इत्यतोऽग्रेतनोत्सर्पिण्यां श्रीमन्महावीरसिद्धिः प्रसज्येत, न चैतदिष्टम्, तस्मादृषभस्वाम्यादिनिर्वाणाद्यथोक्तकालेन अजितादयः समुत्पन्नाः-सिद्धा इत्येवं व्याख्यातव्यम्, नान्यथेति ॥३९३॥

---

१ 'एत्तो' इत्यादि-मु. ॥ इत्तो जिणंतराइं इत्यादि-गाथात्रयोदश-सं० ॥

तथा '**तीसाए संभवजिणो**' त्ति श्रीअजितजिननिर्वाणात् त्रिंशत्सागरोपमकोटिलक्षेषु गतेषु श्रीसम्भवजिनः समुत्पन्नः सिद्ध इत्यर्थः। सम्भवानन्तरं च दशसु सागरोपमकोटिलक्षेषु गतेषु अभिनन्दनजिनः समुत्पन्नो निर्वृत इत्यर्थः। तदनन्तरं नवसु सागरकोटिलक्षेषु गतेषु सुमतिजिनेन्द्रः समुत्पन्नो–मुक्तो जातः ॥३९४॥

तदनन्तरं नवनिगरस्रे षुसागरोपमकोटीनां व्यतिगतेषु पद्मप्रभः समुत्पन्नः शिवश्रियमवापादित्यर्थः। तदनन्तरं नवसु सागरकोटीनां सहस्रे षु गतेषु श्रीसुपार्श्वनामा जिनः समुत्पन्नो निर्वाणमगच्छदित्यर्थः ॥३९५॥

सुपार्श्वानन्तरं च सागरोपमकोटिशतेषु नवसु गतेषु जातः सिद्धत्वेन चन्द्रप्रभो '**जनानन्दो**' जनानन्दकारी, तदनन्तरं नवतौ सागरोपमकोटीषु गतासु सुविधिजिनो '**देशितः, कथितः** सिद्धत्वेन '**समये**' सिद्धान्ते ॥३९६॥

सुविधेरनन्तरं च शीतलजिनो महात्मा सागरोपमकोटिषु नवसु गतासु '**निर्दिष्टः**' कथितो मुक्तत्वेनेति, तदनन्तरमनेन कालेन सागरोपमैकशतषट्षष्टिवर्षलक्षषड्विंशतिवर्षसहस्ररूपेण ऊनायां सागरोपमकोट्यां गतायां श्रेयांसः सिद्धत्वेन जातः। "**तओ पुरो अंतरेसु**" त्ति ततः–तस्मात् श्रीश्रेयांसजिनात् पुरः–अग्रतोऽनन्तरमित्यर्थः। '**इति**' वक्ष्यमाण प्रकारेण भणिष्यमाणेषु अन्तरेषु व्यतिक्रान्तेषु वक्ष्यमाणा वासुपूज्यादयो जिनाः सिद्धा इति ॥३९७-३९८॥

एतदेवाह–'**चउप्पन्ना अयरेहिं**' इत्यादि, श्रेयांसादनन्तरं चतुष्पञ्चाशत्सु [1]अतरेषु-सागरोपमेषु

१ अतरेषु गतेषु-मु. ॥

गतेषु वासुपूज्यो जिनो जगदुत्तमो जातः सिद्धत्वेनेति, तदनन्तरं विमलजिनो विमलगुणौघस्त्रिंशत्यतरेषु गतेषु रजोरहितः-कर्मनिर्मुक्तो जातः सिद्ध इत्यर्थः ॥३९९॥

तदनन्तरं नवस्वतरेषु गतेषु अनन्तो जिनो जातो-निर्वृत इति, तदनन्तरं चतुष्वतरेषु गतेषु धर्मस्तु-धर्मनामा जिनो धर्मधुराधवलो मोक्षं जगामेति, तदनन्तरं त्रिष्वतरेषु चतुर्भागीकृतस्य 'पल्यस्य' पल्यो-पमस्य त्रिभिर्भागैन्यू नेषु गतेषु श्रीशान्तिनाथः शिवश्रियमशिश्रियत् । तदनन्तरं चतुर्भागीकृतस्य पल्योप-मस्य ये पूर्वं त्रयो भागा उद्धरितास्तन्मध्याद्भागद्वितये गते कुन्थुजिनो निर्वृतः, तदनन्तरं एकस्मिन् पल्योपमचतुर्भागे वर्षकोटिसहस्रन्यूने गते श्रीअरो जिनेश्वरो भणितः सिद्धत्वेनेति ॥४००-४०१॥

तदनन्तरं मल्लिजिनस्त्रिशल्यरहितो-माया-निदान-मिथ्यादर्शनलक्षणशल्यत्रयरहितो वर्षाणां कोटि-सहस्रे गते जातः सिद्धत्वेनेति, तदनन्तरं चतुष्पञ्चाशद्वर्षलक्षेषु गतेषु सुव्रतः-शोभनव्रतः सुव्रतो जिनः सिद्धः, तदनन्तरं षट्सु वर्षलक्षेषु गतेषु नमिनाथः सिद्धः, तदनन्तरं पञ्चसु वर्षलक्षेषु गतेषु जिनवरो नेमिः सिद्धः, तदनन्तरं पार्श्वजिनोऽर्धाष्टमशतैः-सार्धसप्तशतैः समधिकेषु त्र्यशीतिवर्षसहस्रेषु गतेषु सिद्धिपदं अपेदे॥४०२-३॥

तदनन्तरं सार्धवर्षशतद्वये गते सति वीरो जिनेश्वरो जातः सिद्धत्वेनेति ।

अत्र च एकोननवतिपक्षैर[1] परिपूर्णे तृतीयारके श्रीआदिनाथ सिद्धः, श्रीमहावीरश्च एकोननवतिपक्षैर-परिपूर्णे चतुर्थारके सिद्धः, एवं च चतुर्थारककालमानः सर्वजिनान्तरकालः संवृत्तः, चतुर्थारकश्च द्विचत्वारिं-

१ ०परिपूर्णेऽतुर्थारके श्री आदिनाथः श्रीम०-मु.। 'एवं कृत्वा मोक्षमार्गं बहुमानं स सिद्धयति। एकोन-नवतिपक्षावशेषेऽरे तृतीयके। 'लो० प्र० (२६।१३४) ॥

शद्वर्षसहस्रन्यूनसागरोपमकोटाकोटिप्रमाणः, ततो द्विचत्वारिंशद्वर्षसहस्रसहितेन जिनान्तरकालमानेन सागरोपमकोटा [1]कोटिप्रमाणः परिपूरणायाह–'दूसमे'त्यादि, दुष्षमा-ऽतिदुष्षमयोः–पञ्चम-षष्ठारकयोर्द्वयोरपि [2]सम्बन्धिभिर्द्विचत्वारिंशद्वर्षसहस्रैः सहितेन श्रीवृषभजिनादिनिर्वाणादनेन–पूर्वभणितेन जिनान्त [3]रकालमानेन पूर्यते–सम्पूर्णा भवति कोटाकोटिरेका सागरोपमाणामिति [4]भणितमिति भणितमन्तरद्वारमेतत् समयानुसारेण–सिद्धान्तानुसारेण।

एषा च सागरोपमकोटाकोटिरेवं पूर्यते–यथा पञ्चाशत्सागरोपमकोटिलक्षास्तावदाद्यजिना-ऽजितान्तरेण, त्रिंशत्कोटिलक्षाः सम्भवस्य, दश सागरोपमकोटिलक्षाः अभिनन्दनस्य, नव सागरोपमकोटिलक्षाः सुमतिजिनस्य, एवं पञ्चाशत्, त्रिंशत्, दश, नव, च मीलिता नवनवतिकोटिलक्षाः सञ्जाताः, ततः सागरोपमकोटीनां नवतिः सहस्राः पद्मप्रभस्य, नव कोटिसहस्राः सुपार्श्वस्य, एवं नवनवतिकोटिसहस्राः जाताः, एककोटीसहस्रोऽवशिष्यते, तन्मध्यान्नव कोटिशतानि चन्द्रप्रभस्य, ततः शेषैककोटिशतमध्यान्नवतिः सागरोपम [5]कोट्यः सुविधिजिनस्य; तदनु [6]नवकोट्यः शीतलस्य, एका कोटिः श्रेयांसस्येति मिलितं कोटिशतम्, तच्च चन्द्रप्रभसम्बन्धिषु [7] नवसु कोटिशतेषु मील्यते, ततो जातं कोटिसहस्रम्, एतच्च पूर्वदर्शितनवनवतिसागरोपमकोटिसहस्रेषु प्रक्षिप्यते, जातमेकं सागरोपमकोटिलक्षम्, तदपि नवनवतिसागरोपमकोटिलक्षेषु प्रक्षिप्यते, ततो जाता सागरोपमकोटाकोटिरेकेति। या च श्रेयांसस्य

१ ०कोटेः परि०-सं. ॥ २ सम्बन्धिनिर्द्विच० सं. ॥ ३ कालेन पूर्यते–सं.।
४ ०णामिति भणितमन्तर०-मु ०॥ ५ ०कोटयः–सं. ॥ ६ कोटय-सं. ॥ ७ ०सम्बन्धेषु नवकोटि०-सं. ॥

सागरोपमकोटिरेका अभिदधे सा न परिपूर्णा ग्राह्या, किन्तु सागरोपम [1]शतेनैकोन षट्षष्टिवर्षलक्षैः षड्-विंशतिवर्षसहस्रैश्च न्यूना ग्राह्या । एषा चैकसागरोपमशतादिककाल एककोटेरुत्सारित एवं पूर्यते, यथा चतुष्पञ्चाशन्सागरोपमाणि तावद्वासुपूज्यस्य, त्रिंशत् विमलस्य, नव अनन्तस्य, चत्वारि धर्मस्य, एवं सप्त-नवतिसागरोपमाणि जातानि, तदनु शान्तिनाथस्य त्रीणि सागरोपमाणि, परं न तानि सम्पूर्णानि, किन्तु चतुर्भागीकृतस्य पल्योपमस्य सम्बन्धिभिस्त्रिभिर्भागैर्न्यूनानि, तदनु द्वौ भागौ चतुर्भागीकृतस्य पल्योपमस्य सम्बन्धिनौ कुन्थुनाथस्य, एको भागः पल्यसम्बन्धी श्रीअरजिनस्य, सोऽपि चैको भागो न परिपूर्णः, किन्तु वर्षाणां कोटिसहस्रेणैकेन न्यूनः, स च कोटिसहस्रो मल्लिजिनस्य, [2]एवं च श्रेयांसस्य सागरोपम-कोटेर्यदपकृष्टं सागरोपमशतमासीत्तदिदं परिपूर्णमभूत् । इदानीं षट्षष्टिर्वर्षलक्षाः षड्विंशतिर्वर्षसहस्राश्च प्रति-पाद्यन्ते-तत्र चतुष्पञ्चाशल्लक्षाः सुव्रतस्य-षट् लक्षा नमिजिनस्य-पञ्च लक्षा नेमिजिनस्य-मिलिताः पञ्च-षष्टिवर्षलक्षाः, अर्धाष्टमशतसमधिकचतुरशीतिसहस्राः पार्श्वजिनस्य, सार्धे द्वे शते श्रीवीरजिनस्य, एवं श्रीपार्श्व-वीरयोरन्तरमानमीलनेन चतुरशीतिसहस्रा जाताः, शेषाश्च एकविंशतिवर्षसहस्रप्रमिता दुष्षमासम्बन्धिन एकविंशतिवर्षसहस्रप्रमिता अतिदुष्षमासम्बन्धिनो द्विचत्वारिंशत्सहस्रास्तेभ्यः षोडश सहस्राः पश्चाद्गणित-चतुरशीतिसहस्रेषु क्षिप्यन्ते, ततः समजनि लक्षम्, तच्च पूर्वोक्तपञ्चषष्टिवर्षलक्षेषु क्षिप्तमिति जाताः षट्षष्टि-वर्षलक्षाः षड्विंशतिः सहस्राश्च, ततः श्रेयांसजिनकोटौ न्यूनायां सागरशतं षट्षष्टिर्लक्षाः षड्विंशतिर्वर्षसह-स्राश्च क्षिप्ता इति परिपूर्णा कोटिः, एवं च जाता एका सागरोपमकोटाकोटिरिति ॥४०४-४०५॥

१ °शतेनैकोनषट्°-मु. ॥ २ एवं श्रेयांसजिनसाग°- सं. ॥

सम्प्रति प्रकारान्तरेण सर्वतीर्थकृच्चक्रवर्ति-वासुदेवानामन्तराणि यस्य तीर्थकृतः काले अवान्तरे यश्चक्रवर्ती वासुदेवो वा बभूवेत्येवंरूपाणि वपुःप्रमाणं सर्वायुश्च विनेयव्युत्पत्त्यर्थमाह—

बत्तीसं घरयाइं काउं तिरियाअयाहि रेहाहिं ।
[1]उड्ढाययाहिं काउं पंच घराइं तओ पढमे ॥४०६॥
पन्नरस जिण निरंतर सुन्नदुगं तिजिण सुन्नतियगं च ।
दो जिण सुन्न जिणिंदो सुन्न जिणो सुन्न दोन्नि जिणा ॥४०७॥

बिईयपंतिठवणा– दो चक्कि सुन्न तेरस पण चक्की सुण्ण चक्कि दो सुण्णा ।
चक्की सुन्न दुचक्की [2]सुण्णं चक्की दुसुण्णं च ॥४०८॥

तईयपंतिठवणा– दस सुण्ण पंच केसव पणसुण्णं केसि सुण्ण केसी य ।
दो सुण्ण केसवोऽवि य सुण्णदुगं केसव तिसुण्णं ॥४०९॥

चउत्थपंतिठवणा–उसह-भरहाण दोण्हवि उच्चत्तं पंचधणुसए हुंति ।
अजिय–सगराण दोण्हवि उच्चत्तं चारि अद्धं च ॥४१०॥
पन्नासं पन्नासं धणुपरिहाणी जिणाण तेण परं ।
ता जाव पुप्फदंतो धणुसयमेगं भवे उच्चो ॥४११॥

१ उड्ढाअयाहिं—मु. ॥ २ चक्की सुण्णं—ता. ॥

नउइ धणू सीयलस्स सेज्जंस-तिविट्ठुमाइणं पुरओ ।
जा धम्म-पुरिससीहो उच्चत्तं तेसिमं होइ ॥४१२॥
कमसो असीइ सत्तरि सट्ठी पण्णास तह य पणयाला ।
एए हवंति धणुया बायालद्धं च मघवस्स ॥४१३॥
इगयालं धणु सद्धं च सणंकुमारस्स चक्कवट्टिस्स ।
संतिस्स य चत्ताला कुंथुजिणिंदस्स पणतीसा ॥४१४॥
तीस धणणि अरस्स उ[1] इगुतीसं पुरिसपुंडरीयस्स ।
अट्ठावीस सुभूमे छव्वीस धणूणि दत्तस्स ॥४१५॥
मल्लिस्स य पणुवीसा वीसं च धणूणि सुव्वए पउमे ।
नारायणस्स सोलस पनरस नमिनाह-हरिसेणे ॥४१६॥
बारस जयनामस्स य नेमी-कण्हाण दसधणुच्चत्तं ।
सत्तधणु बंभदत्तो नव रयणीओ य पासस्स ॥४१७॥
वीरस्स सत्त रयणी उच्चत्तं भणियमाउअं अहुणा ।
पंचमधरयनिविट्ठं कमेण [2]सव्वेसि वोच्छामि ॥४१८॥

१ य—ता. ॥ २ सव्वेसिं—ता. ॥

उसह-भरहाण दोण्हवि चुलसीई पुव्वसयसहस्साइं ।
[1]अजिय-सगराण दोण्हवि बावत्तरि सयसहस्साइं ॥४१९॥
पुरओ जहक्कमेणं सट्ठी पण्णास चत्त तीसा य ।
वीसा दस दो चेव य लक्खेगो चेव पुव्वाणं ॥४२०॥
[2]सिज्जंस-तिविट्ठूणं चुलसीई वाससयसहस्साइं ।
पुरओ जिण-केसीणं धम्मो ता जाव तुल्लमिणं ॥४२१॥
कमसो बावत्तरि सट्ठि तीस दस चेव सयसहस्साइं ।
मघवस्स चक्किणो पुण पंचेव य वासलक्खाइं ॥४२२॥
तिन्नि य सणंकुमारे संतिस्सय वासलक्खमेगं तु ।
पंचाणउइ सहस्सा [3]कुंथुस्स य आउयं भणियं ॥४२३॥
चुलसीइ सहस्साइं तु आउयं होइ अरजिणिंदस्स ।
पणसट्ठिसहस्साइं [4]आऊ सिरिपुंडरीयस्स ॥४२४॥
सट्ठिसहस्स सुभूमे लुप्पन्न सहस्स हुंति दत्तस्स ।
पणपण्णसहस्साइं मल्लिस्सवि आउयं भणियं ॥४२५॥

१ अजियसागराण-मु० ॥ २ सेज्जंस०-मु० ॥ ३ कुंथुस्सवि-मु० ॥ ४ आचयं-ता० ॥

[1]सुव्वय-महपउमाणं तीस सहस्साइं आउयं भणियं ।
बारस वाससहस्सा [2]आऊ नारायणस्स भवे ॥४२६॥
दस वाससहस्साइं नमि-हरिसेणाण हुंति दुण्हंपि ।
तिण्णेव सहस्साइं आऊ जयनामचक्किस्स ॥४२७॥
वाससहस्सा आऊ [3]नेमी-कण्हाण होइ दोण्हंपि ।
सत्त य वाससयाइं [4]चक्कीसरबंभदत्तस्स ॥४२८॥
वाससयं पासस्स य वासा बावत्तरिं च वीरस्स ।
इय बत्तीस घराइं समयविहाणेण भणियाइ ॥४२९॥

'बत्तीस'मित्यादि गाथाश्चतुर्विंशतिः, इह प्रज्ञापकेनालेखोपदर्शनार्थं पट्टिका सम्मुखमायता स्थाप्यते, न तिर्यक्, तत्र तिर्यगायताभिस्त्रयस्त्रिंशता रेखाभिर्द्वात्रिंशतं गृहकाणि कृत्वा ऊर्ध्वायताभिः षड्भिः रेखाभिः पञ्च गृहकाणि क्रियन्ते । कृत्वा च ततस्तत्र पञ्चगृहकमध्ये प्रथमे गृहके तिर्यगपेक्षया द्वात्रिंशद्-गृहकात्मके पञ्चदशस्ववान्तरगृहकेषु क्रमेण पञ्चदश जिना—ऋषभाद्या धर्मनाथपर्यन्ता निरन्तराः स्थाप्यन्ते, ततो गृहकद्वये शून्यद्विकम्, ततो गृहकत्रये शान्ति-कुन्थु-अरजिनाः क्रमेण स्थाप्यन्ते । ततो गृहकत्रये शून्यत्रिकम्, ततो गृहकद्वये क्रमेण मल्लि-मुनिसुव्रतौ स्थाप्येते, तत एकस्मिन् गृहके शून्यम्, तत एकस्मिन्

१ सुव्वइम०-जे. ॥ २ आउं-जे. ॥ ३ नेमि०-ता. ॥ ४ चक्कीसिरि०-ता. ॥

गृहके नमिजिनः स्थाप्यः, ततः परस्मिन् गृहके शून्यम्, ततः परस्मिन् गृहके नेमिजिनः, ततः परस्मिन् शून्यम्, ततः परस्मिन् गृहकद्वये क्रमेण पार्श्वजिनो वीरजिनश्चेति प्रथमपङ्क्तिस्थापना ॥४०६-४०७॥

अथ द्वितीयपङ्क्तिस्थापना दर्श्यते-तत्र च प्रथमगृहकद्वये क्रमेण भरतः सगरश्चक्रवर्ती स्थाप्येते, ततस्त्रयोदशगृहकेषु क्रमेण शून्यानि त्रयोदश, ततः क्रमेण पञ्चसु गृहकेषु पञ्च चक्रवर्तिनो मघवत्सनत्कुमार-शान्ति-कुन्थु-अरनामानः स्थाप्याः, ततः शून्यम्, तदग्रेतनगृहे सुभूमश्चक्रवर्ती, ततो गृहकद्वये क्रमेण द्वे शून्ये, तदग्रेतनगृहे महापद्मश्चक्रवर्ती, तदग्रेतनगृहे शून्यम्, तदग्रेतनगृहकद्वये क्रमेण हरिषेण-[1]जयनामानौ चक्रवर्तिनौ, ततः परस्मिन् गृहे शून्यम्, ततः परस्मिन् गृहके चक्री ब्रह्मदत्तः, ततः परयोर्गृहकयोः क्रमेण द्वे शून्ये, इति द्वितीयपङ्क्तिस्थापना ॥४०८॥

इदानीं तृतीयपङ्क्तिस्थापना-दशसु गृहकेषु क्रमेण दश शून्यानि, ततः पञ्चसु गृहकेषु क्रमेण पञ्च केशवा-वासुदेवाः त्रिपृष्ठ-द्विपृष्ठ-स्वयम्भू-पुरुषोत्तम-पुरुषसिंहाभिधानाः, ततो गृहकेषु पञ्चसु क्रमेण पञ्च शून्यानि, सूत्रे तु '**षण्णुह्न**'मिति पञ्चानां शून्यानां समाहारः पञ्चशून्यमिति समाहारविवक्षया एकवचनम्, ततः परस्मिन् गृहे केशवो-वासुदेवः पुरुषपुण्डरीकाभिधानः, ततः परस्मिन् गृहे शून्यम्, ततः परस्मिन् गृहे केशी-दत्ताभिधानः, ततः परस्मिन् गृहकद्वये क्रमेण शून्यद्वयम्, ततः परस्मिन् गृहे केशवो नारायण-नामा, ततः परस्मिन् गृहकद्वये क्रमेण शून्यद्वयम्, ततः परस्मिन् गृहे केशवः-कृष्णाभिधानः, ततः परस्मिन् गृहकत्रये क्रमेण शून्यत्रयमिति तृतीयपङ्क्तिस्थापना ॥४०९॥

१ 'जयदत्त' इति विषमपदटीकायाम् (पृ. ३७ A) ॥

इदानीं चतुर्थपङ्क्तिस्थापना–तत्र प्रथमगृहके ऋषभजिन-भरतचक्रिणोर्द्वयोरप्युच्चत्वं कायस्य पञ्च धनुःशतानि, द्वितीयगृहके अजितजिन-सगरचक्रिणोर्द्वयोरप्युच्चत्वं चत्वारि धनुःशतानि सार्धानि, ततः परं [1]सम्भवादीनां जिनानां पञ्चाशत्पञ्चाशद्धनुःपरिहाणिस्तावद्यावत्पुष्पदन्तः–सुविधिजिनो धनुःशतमेकं भवेदुच्चः, अयमर्थः–तृतीयगृहके सम्भवजिनस्य चत्वारि धनुःशतानि देहमानम्, चतुर्थगृहके अभिनन्दनस्य त्रीणि धनुःशतानि सार्धानि, पञ्चमगृहके सुमतिजिनस्य त्रीणि धनुःशतानि, षष्ठगृहे पद्मप्रभस्य द्वे धनुःशते सार्धे, सप्तमगृहे सुपार्श्वस्य द्वे धनुःशते, अष्टमगृहे चन्द्रप्रभस्य धनुःशतं सार्धम्, नवमगृहके धनुःशतमेकं सुविधेरिति, ततो दशमगृहके शीतलस्य नवतिर्धनूंषि, पुरतः–अनन्तरं श्रेयांस--त्रिपृष्ठादीनां यावद्धर्मजिन-पुरुषसिंहौ तावत्तेषामुच्चत्वमिदं–धनुरशीत्यादिकं क्रमशो भवति, अयमर्थः–एकादशे गृहके श्रेयांसजिन-त्रिपृष्ठवासुदेवयोरशीतिर्धनूंषि, ततो द्वादशके गृहके वासुपूज्यजिन-द्विपृष्ठ-वासुदेवयोः सप्ततिर्धनूंषि, ततस्त्रयोदशगृहे विमलजिन-स्वयम्भूवासुदेवयोः षष्टिर्धनूंषि, ततश्चतुर्दशगृहके अनन्तजिन-पुरुषोत्तमवासुदेवयोः पञ्चाशद्धनूंषि, ततः पञ्चदशगृहके धर्मजिन-पुरुषसिंहवासुदेवयोः पञ्चचत्वारिंशद्धनूंषीति, तथा षोडशकगृहे मघवतश्चक्रवर्तिनो द्विचत्वारिंशद्धनूंषि तदर्धं च, हस्तद्वय-मित्यर्थः, सप्तदशगृहके एकचत्वारिंशद्धनूंषि तदर्धं च सनत्कुमारचक्रवर्तिनः, अष्टादशे गृहे शान्तिजिनस्य परिपूर्णानि चत्वारिंशद्धनूंषि, एकोनविंशे गृहके कुन्थुजिनेन्द्रस्य पञ्चत्रिंशद्धनूंषि, विंशतितमे गृहके त्रिंश-द्धनूंषि अरजिनस्य, तत एकविंशतितमे गृहके पुरुषपुण्डरीकस्य वासुदेवस्य एकोनत्रिंशद्धनूंषि, द्वाविंशति-

१ शंभवादीनां-सं. ॥

तमगृहे सुभूमचक्रवर्तिनोऽष्टाविंशतिर्धनूंषि, त्रयोविंशतितमगृहके दत्तस्य वासुदेवस्य षड्विंशतिर्धनूंषि, चतुर्विंशे गृहे मल्लिजिनस्य पञ्चविंशतिर्धनूंषि, पञ्चविंशतितमे गृहके सुव्रतजिन-महापद्मचक्रवर्तिनोर्विंशतिर्धनूंषि, षड्विंशतितमे गृहके नारायणवासुदेवस्य षोडश धनूंषि, सप्तविंशतितमे गृहे नमिनाथ-हरिषेणचक्रिणोः पञ्चदश धनूंषि, अष्टाविंशतितमे गृहे जयचक्रवर्तिनो द्वादश धनूंषि, एकोनत्रिंशत्तमे गृहे नेमिजिन-कृष्णाभिधानवासुदेवयोर्दश धनूंषि उच्चत्वम्; त्रिंशत्तमे गृहे ब्रह्मदत्तचक्रिणः सप्त धनूंषि, एकत्रिंशे गृहके पार्श्वजिनस्य नव रत्नयः-हस्ताः, द्वात्रिंशत्तमगृहके श्रीवीरजिनस्य सप्त हस्तास्तनुमानम् ॥

एवमुच्चत्वं चतुर्थपङ्क्तौ सर्वेषां प्रथमजिनादीनां भणितम्, इदानीं पञ्चमपङ्क्तिगृहक-निविष्टं सर्वेषां जिनादीनां क्रमेणायुष्कं वक्ष्यामि, तदेवाह–'उसह-भरहाणं' इत्यादि, वृषभजिन-भरतचक्रिणोर्द्वयोरपि प्रथमगृहके चतुरशीतिः पूर्वाणां शतसहस्राणि–लक्षाणि आयुः, द्वितीयगृहके अजितजिन--सगरचक्रिणोर्द्वयोरपि द्विसप्ततिः पूर्वलक्षाणि, इतः पुरतो यथाक्रमं सम्भवादिजि-नानां परिपाट्या षष्टिः, पञ्चाशच्चत्वारिंशत्, त्रिंशत्, विंशतिर्दश, द्वे, एकं लक्षं पूर्वाणामिति, अयमर्थः–तृतीये गृहके सम्भवस्य षष्टिः पूर्वलक्षाः सर्वायुः, चतुर्थगृहके अभिनन्दनस्य पञ्चाशत्पूर्वलक्षाः, पञ्चमगृहे सुमतिजिनस्य चत्वारिंशत्पूर्वलक्षाः, षष्ठगृहे पद्मप्रभस्य त्रिंशत्पूर्वलक्षाः, सप्तमगृहे सुपार्श्वस्य विंशतिः पूर्वलक्षाः, अष्टमगृहे चन्द्रप्रभस्य दश पूर्वलक्षाः, नवमगृहे सुविधेर्द्वे पूर्वलक्षे, दशमगृहे शीतलस्य एकं पूर्वलक्षमिति, तथा एकादशे गृहे श्रेयांसजिन-त्रिपृष्ठवासुदेवयोश्चतुरशीतिर्वर्षलक्षाः, पुरतः–अनन्तरं जिन--केशीनां–तीर्थकृद्वासुदेवानां यावद्धर्म-पुरुषसिंहौ तावत्परस्परं तुल्यमिदमायुः, तदेव दर्शयति–'कमसो'

इत्यादि, क्रमशः—परिपाट्या द्विसप्ततिः, षष्टिस्त्रिंशत्, दशैव शतसहस्राणि—वर्षलक्षाणि, अयमर्थः—द्वादशे गृहे वासुपूज्य-द्विपृष्ठवासुदेवयोर्द्विसप्ततिर्वर्षलक्षाः, त्रयोदशे गृहे विमलजिन-स्वयम्भूवासुदेवयोः षष्टिर्वर्षलक्षाः, चतुर्दशे गृहे अनन्तजिन-पुरुषोत्तमवासुदेवयोस्त्रिंशद्वर्षलक्षाः, पञ्चदशे गृहे धर्मजिन-पुरुषसिंहवासुदेवयोर्दश वर्षलक्षा इति, तथा षोडशे गृहके मघवतश्चक्रिणः पञ्च वर्षलक्षाः, सप्तदशे गृहके सनत्कुमार-चक्रवर्तिनस्त्रीणि वर्षलक्षाणि, अष्टादशे गृहे शान्तिजिनचक्रवर्तिनो [1]वर्षलक्षमेकम्, एकोनविंशतितमगृहे कुन्थोर्जिनचक्रिणः पञ्चनवतिर्वर्षसहस्राः सर्वायुर्भणितम्, विंशतितमगृहे अरजिनस्य चक्रिणश्चतुरशीति-वर्षसहस्राण्यायुर्भवति, एकविंशतितमे गृहे पञ्चषष्टिर्वर्षसहस्राण्यायुः पुरुषपुण्डरीकवासुदेवस्य, द्वाविं-शतितमगृहे षष्टिर्वर्षसहस्राः, सुभूमचक्रिणः, त्रयोविंशे गृहे षट्पञ्चाशद्वर्षसहस्रा भवन्ति दत्तस्य वासुदेवस्य, चतुर्विंशतितमे गृहे पञ्चपञ्चाशद्वर्षसहस्राणि मल्लिजिनस्याप्यायुर्भणितम्, पञ्चविंशतितमगृहे मुनिसुव्रतजिन-महापद्मचक्रिणोस्त्रिंशद्वर्षसहस्राण्यायुर्भणितम्, षड्विंशतितमगृहे द्वादश वर्षसहस्राण्यायुर्नारायणवासुदेवस्य भवेत्, सप्तविंशतितमगृहे दश वर्षसहस्राणि नमिजिन-हरिषेणचक्रिणोर्द्वयोरपि भवन्तीति, अष्टाविंशतितमगृहे त्रीणि वर्षसहस्राण्यायुर्जयनाम्नश्चक्रिणः, एकोनत्रिंशत्तमगृहे एकं वर्षसहस्रमायुर्नेमिजिन-कृष्णवासुदेवयो-र्द्वयोरपि भवति, त्रिंशत्तमगृहे सप्त वर्षशतानि चक्रेश्वरब्रह्मदत्तस्य, एकत्रिंशत्तमगृहे वर्षशतं पार्श्वजिनस्य, द्वात्रिंशत्तमगृहे च वर्षाणि द्विसप्ततिर्वीरजिनस्य सर्वायुरिति द्वात्रिंशद् गृहकाणि समयविधानेन भणितानि। ॥४१०-४२६॥ ३१॥

१ वर्षलक्षाणामेकं सं. ॥

स्थापना चेयम्—

जिनाः	चक्रिणः	वासुदेवाः	तनुमानं	आयुः ८४
१	१	०	५०० ध.	लक्षपूर्वाणि
२	२	०	४५० ध.	७२ "
३	०	०	४०० ध.	६० "
४	०	०	३५० ध.	५० "
५	०	०	३०० ध.	४० "
६	०	०	२५० ध.	३० "
७	०	०	२०० ध.	२० "
८	०	०	१५० "	१० "
९	०	०	१०० "	२ "
१०	०	०	९० "	१ "
११	०	१	८० "	८४वर्षेलः

जि०	च०	वा०	तनु०	आयु०
१२	०	२	७० ध.	७२ वर्षेल०
१३	०	३	६० "	६० "
१४	०	४	५० "	३० "
१५	०	५	४५ "	१० "
०	३	०	४२॥"	५ "
०	४	०	४१॥"	३ "
१६	५	०	४० "	१ "
१७	६	०	३५ "	६५००० वर्षाणि
१८	७	०	३० "	८४००० "
०	०	६	२६ "	६५००० "
०	८	०	२८ "	६०००० "

जि०	च०	वा०	तनु०	आयु०
०	०	७	२६ ध.	५६००० वर्षाणि
१९	०	०	२५ "	५५००० "
२०	९	०	२० "	३०००० "
०	०	८	१६ "	१२००० "
२१	१०	०	१५ "	१०००० "
०	११	०	१२ "	३००० "
२२	०	९	१० "	१००० "
०	१२	०	७ "	७०० "
२३	०	०	९ हस्ताः	१०० "
२४	०	०	७ "	७२ "

इदानीं 'तित्थ[1]वुच्छेओ' त्ति षट्त्रिंशत्तमं द्वारमाह—

पुरिमंतिमअड्ढंतरेसु तित्थस्स नत्थि वोच्छेओ ।
मज्झिल्लएसु सत्तसु [2]एत्तियकालं तु वुच्छेओ ॥४३०॥

१ वोच्छेओ-मु. ॥ २ इत्तिय-ता. ॥

[1]चउभागं चउभागो तिन्नि य चउभाग पलियचउभागो।
तिण्णेव य चउभागा चउत्थ भागो य चउभागो ॥४३१॥

'पुरी' त्यादि गाथाद्वयम्, इह हि चतुर्विंशतेस्तीर्थकृतां त्रयोविंशतिरेवान्तराणि भवन्ति, यथा चतसृणामङ्गुलीनां त्रीण्येवान्तराणि, तत्र पूर्वेषु श्रीऋषभादीनां सुविधिपर्यन्तानां नवानां तीर्थकृतां सम्बन्धिषु अष्टसु, अन्तिमेषु च-शान्तिनाथादीनां महावीरान्तानां नवानां जिनानां सम्बन्धिषु अष्टस्वन्तरेषु **'तीर्थस्य'** चतुर्वर्णस्य श्रमणसङ्घस्य नास्ति व्यवच्छेदः, **'मज्झिल्लएसु'** त्ति मध्यवर्तिषु पुनः सुविधि-प्रभृतीनां शान्तिनाथपर्यन्तानां तीर्थकृतामन्तरेषु सप्तसु एतावन्मात्रं वक्ष्यमाणं कालं यावत्तीर्थस्य व्यवच्छेदः। तदेवाह-**'चउभागं'** इत्यादि, सुविधि-शीतलयोरन्तरे पल्योपमस्य चतुर्भागीकृतस्य एकश्चतुर्भागस्तावत्कालं तीर्थव्यवच्छेदः, अर्हद्धर्मवार्ताऽपि तत्र नष्टेत्यर्थः, तथा शीतल-श्रेयांसयोरन्तरे [2]पल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदः, तथा श्रेयांस-वासुपूज्ययोरन्तरे पल्योपमसम्बन्धिनस्त्रयश्चतुर्भागास्तीर्थव्यवच्छेदः, तथा श्रीवासुपूज्य-विमलजिनयोरन्तरे पल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदः, तथा विमला-ऽनन्तजिनयोरन्तरे पल्योपमसम्बन्धिनस्त्रयश्चतुर्भागास्तीर्थव्यवच्छेदः, तथाऽनन्तधर्मयोरन्तरे[3] पल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदः, तथा धर्म-शान्तिनाथयोरन्तरे पल्योपमचतु-

१ केचित्पल्योपमान्याहुः पल्यतुर्यांशकास्पदे ॥ लो. प्र. ३२-१०२६॥ तथाहुः सप्ततिशतस्थानके-' इग-इग-तिगेग-तिग-इगइगस इइ गारपलिअचउभागे। बिंतिन्ने इअ पलिए सुविहाइसु सत्ततित्थंते (गाथा २५३) लो. प्र. ॥३२-१०२७॥

२ पल्योपमस्य चतुर्भागीकृतस्य चतुर्भाग०-मु. ॥ ३ ०रंतरा०-मु० ॥

भागस्तीर्थव्यवच्छेद इति, सर्वाग्रेण भागमीलने त्रीणि पल्योपमानि एकचतुर्भागहीनानि जातानि इति षड्त्रिंशत्तमं द्वारम् ॥ ४३०-४३१ ॥३६॥

इदानीं 'दस आसायणे' त्ति सप्तत्रिंशत्तमं द्वारमाह—

[1]तंबोल १ पाण २ [2]भोयण ३ पाणह ४ थीभोग ५ [3]सुयण ६ निट्ठवणे ७ ।
मुत्तु ८ च्चारं ९ जूयं १० वज्जे जिणमंदिर[4]स्संतो ॥४३२॥

'तंबोले' त्यादि गाथा, ताम्बूल-पान-भोजनोपानत्स्त्रीभोग-स्वपन-निष्ठीवनानि मूत्रं—प्रश्रवणम्, उच्चारं-पुरीषम्, द्यूतम्-अन्धकादि वर्जयेत् तीर्थकृदाशातनाहेतुत्वाज्जिनमन्दिरस्यान्तर्विवेकी जन इति ॥४३२॥३७॥

'आसायणा उ चुलसी' इति अष्टात्रिंशत्तमं द्वारमाह—

[1][4]खेलं १ केलि २ कलिं ३ कला ४ कुललयं ५ तंबोल ६ मुग्गालयं ७,
गाली ८ कंगुलिया ९ सरीरधुवणं १० केसे ११ नहे १२ लोहियं १३ ।
मंसोसं १४ तय १५ पित्त १६ वंत १७[6]दसणे १८[7]विस्सामणं १९ दामणं २०,
[8]दंत २१ च्छी २२ नह २३ [9]गंड २४ नासिय २५ सिरो २६ [10]सोत २७ च्छवीणं मलं २८॥४३३॥

१ तुलना-श्राद्धविधिटीका (पृ.७१), धर्मसङ्ग्रहवृत्तिः (भा. १-पृ. १६४A) धर्मरत्न प्र. देवेन्द्रसूरिटीका-पृ.२१६A ॥
२ भोअणु-वाहण-श्राद्ध.टी. । भोअण-वाहण ध.सं. टीका ॥ ३ सुवण्ण-निट्ठवणं-श्राद्ध. टी. । सुवण-निट्ठुवणं-ध.सं.टीका ॥
४ ०रसंते-ध.सं. टी. ॥ ५ तुलना-श्राद्धविधिटीका (पृ.७१), धर्मसङ्ग्रहटीका (भा. १-पृ. १०६४) ॥
६ 'दसणा'-इति श्राद्ध.टी. ध. सं.टीका ॥ ७ 'विस्सामणा' इति ध.सं. टीका ॥ ८ 'दंत त्थी'-मु. ॥
९ 'गल्ल' श्राद्ध. टी. ध.सं. टी. ॥ १० सुत्त-श्राद्ध.टी. । सोत्त-ध. सं. टी. । साय छ. धर्म.प्र. टी. ॥

[1]मंतं २९ मीलण ३० [2]लेक्खयं ३१ विभजणं ३२ भंडार ३३ दुद्दासणं ३४ छाणी ३५ कप्पड ३६ दालि ३७ पप्पड ३८ वडी विस्सारणं ३९ नासणं ४० । अक्कंदं ४१ विकहं ४२ [3]सरत्थवडणं ४३ तेरिच्छसंठावणं ४४, अग्गीसेवण ४५ रंधणं ४६ परिखणं ४७ निस्सीहियाभंजणं ४८ ॥४३४॥ छत्तो ४९ वाणह ५० सत्थ ५१ चामर ५२ मणोऽणेगत्त ५३ मब्भंगणं ५४ सच्चित्ताणमचाय ५५ [4]चायमऽजिए ५६ दिट्ठीअ नो अंजली ५७ । साडेगुत्तरसंगभंग ५८ मउडं ५९ [5]मउलिं ६० सिरोसेहरं ६१ । दुड्ढा ६२ [6]जिंडुहगिडियाहरमणं ६३ जोहार ६४ भंडक्कियं ६५ ॥४३५॥ [7]रेक्कारं ६६ धरणं ६७ रणं ६८ विवरणं वालाण ६९ पल्हत्थियं ७०, [8]पाऊ ७१ पायपसारणं ७२ [9]पुड्डपुडी ७३ पंकं ७४ रओ ७५ मेहुणं ७६ ।

१ 'मंतु म्मीलण-' मु. ता. धर्मरत्नप्र. दे. टी. ॥ २ लिक्खयं-श्राद्ध. टी. ध. सं. टीका ॥ ३ सरच्छ० मु. । सरच्छु-ता. । सरुच्छ० श्राद्ध. टी. । सरुच्छु०-ध. सं. टीका ॥ ४ चायणऽजिए-मु. । चायमजिए दिट्ठीए-ता. । चायमजिए दिट्ठीइ-श्राद्ध-टी. ध. सं. टीका ॥

५ मोलिं-श्राद्ध-टी. ध.सं. टीका ॥ ६ जिंडुहगेडिआ० श्राद्ध. टी. ध. सं. टीका ॥

७ रेकारं-मु. । रेक्कारं-श्राद्ध. टी. ध.सं. टीका ॥ ८ पाओ-मु. । पाऊ-श्राद्ध. टी. ध. स. टीका ॥

९ पुड्डपुडी-श्राद्ध. टी. ध. सं. टीका ॥

[1]जूया ७७ जेमण ७८ [2]जुज्झ (गुज्झ)७९ विज्ज ८० वणिजं ८१ [3]सेज्जं ८२ जलं ८३, मज्जणं ८४ एमाईयमवज्जकज्जमुज्जुओ वज्जे जिणिंदालए ॥४३६॥

'खेलङ्केलि'मित्यादिशार्दूलवृत्तचतुष्टयम्, इदं च यथाविदितं व्याख्यायते—तत्र जिनभवने इदमिदं च कुर्वन्नाशातनां करोतीति तात्पर्यार्थः, आयं-लाभं ज्ञानादिनां निःशेषकल्याणसम्पल्लतावितानाऽविकल-बीजानां शातयंति—विनाशयंतीत्याशातनाः, तत्र खेलं—मुखश्लेष्माणं जिनमन्दिरे त्यजति १, तथा केलिं—क्रीडां करोति २, तथा कलिं—वाकलहं विधत्ते ३ तथा कलां—धनुर्वेदादिकां खलूरिकायामिव तत्र शिक्षते ४, तथा कुललयं—गण्डूषं विधत्ते ५, तथा ताम्बूलं तत्र चर्वयति ६, तथा ताम्बूलसम्बन्धिनमुद्गालमाविलं तत्र मुञ्चति ७, तथा गालीः—जकार-मकारादिकास्तत्र ददाति ८, तथा कड्गुलिकां—लघ्वीं महतीं च नीतिं विधत्ते ९, तथा शरीरस्य [4]धावनं—प्रक्षालनं कुरुते १०, तथा केशान् मस्तकादिभ्यस्तत्रोत्तारयति ११, तथा नखान् हस्त-पादसम्बन्धिनः किरति १२, तथा लोहितं शरीराच्निर्गतं तत्र विसृजति १३, तथा भक्तोद्गं—सुखादिकां तत्र खादति १४, तथा त्वचं व्रणादिसम्बन्धिनीं पातयति १५, तथा पित्तं—धातुविशेषमौषधादिना तत्र पातयति १६, तथा वान्तं—वमनं करोति १७, तथा दशनान्—दन्तान् क्षिपति तत्संस्कारं वा कुरुते १८, तथा विश्रामणाम्—अङ्गे संवाधनं कारयति १९, तथा दामनं—बन्धनमजादितिरश्चां विधत्ते २०, तथा दन्ता

१ जूअं-श्राद्ध. टी. ध. सं. टीका ॥ २ गुज्झ-श्राद्ध. टी., ध. सं. टीका ॥ ३ सिज्जं-ता. श्राद्ध. टी., ध. सं. टीका ॥ ४ धवनप्र०-सं. ॥

ऽक्षि-नख-गण्ड-नासिका-शिरः-श्रोत्र-च्छवीनां सम्बन्धिनं मलं जिनगृहे त्यजति २१-२८, तत्र छविः-शरीरम्, शेषाश्च तदवयवा इति प्रथमसूत्रम् ॥४३३॥

तथा मन्त्रं-भूतादिनिग्रह[1]लक्षणं राजादिकार्यपर्यालोचनरूपं वा कुरुते २९, तथा मीलनं-क्वापि स्वकीयविवाहादिकृत्यनिर्णयाय वृद्धपुरुषाणां तत्रोपवेशनम् ३०, तथा लेख्यकं व्यवहारादिसम्बन्धि तत्र कुरुते ३१, [2]तथा विभजनं-विभागं दायादादीनां तत्र विधत्ते ३२, तथा भाण्डागारं निजद्रव्यादेर्विधत्ते ३३, तथा कुट्टासणं-गादेरुपरिपादस्थापनादिकमनौचित्योपवेशनं कुरुते ३४, तथा छाणी-गोमयपिण्डः ३५, कर्पटं-वस्त्रम् ३६, दालिः-मुद्गादिद्विदलरूपा, पर्पट-वटिके प्रसिद्धे, तत एतेषां विसारणम्-उद्वापनकृते विस्तारणम् ३७-३९, तथा नाशनं-नृपदायादादिभयेन चैत्यस्य गर्भगृहादिष्वन्तर्धानम् ४०, तथा आक्रन्दं-रुदितविशेषं पुत्र-कलत्रादिवियोगे तत्र विधत्ते ४१, तथा [3]विकथां-विविधां कथां रमणीयरमण्यादिसम्बन्धिनीं कुरुते ४२, तथा शराणां-बाणानामीक्षूणां च घटनम्, ❀'सरत्थति' पाठे तु शराणां अस्त्राणां च धनुःशरादीनां घटनम् ४३, तथा तिरश्चाम्-अश्व-गवादीनां संस्थापनम् ४४, तथा अग्निसेवनं शीतादौ मति ४५, तथा रन्धनं- [4]पचनमन्नादीनाम् ४६, तथा परीक्षणं द्रम्मादीनाम् ४७, तथा [5]नैषेधिकीभञ्जनम् अवश्यमेव हि चैत्यादौ प्रविशद्भिः सामाचारीचतुरैर्नैषेधिकी करणीया, ततस्तस्या

१ ०लक्षणं त राजा० स. ॥ २ तथा राजादिकाय विभजनं-जै. । राजादिकार्यविभजनं-इति श्राद्ध. टी. ॥
३ विकथा-विविधाः कथा रमण्यादिसम्बधिनीः-सं. ॥ -❀'सरच्छेति' मु. ॥ ४ पाचन.-सं. ॥
५ 'कृतायामपि नैषेधिक्यां सावद्यव्यापारकरणादि ४८' इति धर्मसङ्ग्रहेः (भा. १ । पृ. १६५B) ॥

अकरणं–भञ्जनमाशातनेति द्वितीयवृत्तार्थः ४८ ॥४३४॥

तथा छत्रस्य तथा उपानहोस्तथा शस्त्राणां–खड्गादीनां तथा चामरयोश्च देवगृहाद्बहिरमोचनं मध्ये वा धारणम् ४९-५२, तथा मनसोऽनेकान्तता–अनैकाग्र्यं नानाविकल्पकल्पनमित्यर्थः ५३, तथा अभ्यञ्जनं तैलादिना ५४, तथा सच्चित्तानां–पुष्प-ताम्बूल--पत्रादीनामत्यागो बहिरमोचनम् ५५, तथा त्यागः–परिहरणम् 'अजिए' इति अजीवानां [1]हार-रत्न--मुद्रिकादीनाम्, बहिस्तन्मोचने हि 'अहो भिक्षाचराणामयं धर्म' इत्यवर्णवादो दुष्टलोकैर्विधीयते ५६, तथा सर्वज्ञप्रतिमानां दृष्ट्वा दूरोच्चरतायां नो– [2]नैवाञ्जलिकरणम्-अञ्जलिविरचनम् ५७, तथा एकशाटकेन-एकोपरितनवस्त्रेण उत्तरासङ्गभङ्ग–उत्तरासङ्गस्याकरणम् ५८, तथा मुकुटं–किरीटं मस्तके धरति ५९, तथा मौलि–शिरोवेष्टनविशेषरूपां करोति ६०, तथा शिरःशेखरं कुसुमादिमयं विधत्ते ६१, तथा [3]हुड्डा–पारापत-नालिकेरादि[4]सम्बन्धिनीं विधत्ते ६२, तथा [5]'जिंडुह' त्ति कन्दुकः गेडिका–तत्क्षेपणी वक्रयष्टिका ताभ्याम्, आदिशब्दाद्दोलिका-[6]कपर्दिकादिभिश्च रमणं–क्रीडनम् ६३, तथा ज्योत्कारकरणं पित्रादीनाम् ६४, तथा भाण्डानां–विटानां क्रिया–कक्षावादनादिका ६५, इति तृतीयवृत्तार्थः ॥४३५॥

---

१ हारमुद्रिका०-मु. ॥ २ निवाञ्जलि०-सं. ॥ ३ हुड्डी-सं.। हुडा-पणकरण तां पातयति' ६२ इति धर्म-सङ्ग्रहटीका (भा. १। पृ १६५B) ॥ ४ ०सम्बधिनी-सं.
५ जिंडुह गंडुका-सं.। 'जिंडडु दंडकः गेडिया ऊलकणः' इति विषमपद. टीका (३७B) ॥ ६ कपर्दिकामिश्र-मु. ॥

तथा रेकारं–तिरस्कारप्रकाशकं रे रे [1]रुद्रदत्तेत्यादि वदित ६६, तथा धरणकं–रोधनमपकारिणाम-धमर्णादीनां च ६७, तथा रणं–संग्रामकरणम् ६८, तथा विवरणं [2]वालानां–केशानां विजटीकरणम् ६९, तथा पर्यस्तिकाकरणम् ७०, तथा पादुका–काष्ठादिमयं चरणरक्षणोपकरणम् ७१, तथा पादयोः प्रसारणं स्वैरं निराकुलतायाम् ७२, तथा पुटपुटिकादानम् ७३, तथा पङ्कं–कर्दमं करोति निजदेहा[3]वयवप्रक्षाल-नादिना ७४, तथा रजो–धूली तां तत्र पादादिलग्नां [4]शाटयति ७५, तथा मैथुनं–मिथुनस्य कर्म ७६, तथा यूका मस्तकादिभ्यः क्षिपति वीक्षयति वा तथा ७७, जेमनं–भोजनम् ७८, तथा गुह्यं–लिङ्गं तस्यासं-वृतस्य करणम् [5]"जुज्झ" मिति तु पाठे युद्धं [6]दृग्मुष्टि-बाहुयुद्धादि ७९, तथा 'विज्ज' त्ति वैद्यकम् ८०, तथा वाणिज्यं–क्रयविक्रयलक्षणम् ८१, तथा शय्यां कृत्वा तत्र स्वपिति ८२, तथा जलं–पयः तत्पानाद्यर्थं तत्र मुञ्चति पिबति वा ८३, तथा मज्जनं–स्नानं तत्र करोति ८४, एवमादिकमवद्यं–सदोषं कार्यम् ऋजुकः–प्राञ्जलचेता उद्यतो वा वर्जयेज्जिनेन्द्रालये–जिनमन्दिरे, 'एवमादिक' मित्यनेनेदमाह–न केवलमेतावत्य एवाशातनाः, किन्त्वन्यदपि यदनुचितं [7]हसन-वल्गनादिकं जिनालये तदप्याशातनास्वरूपं ज्ञेयम् ॥

नन्वेवं 'तंबोल-पाणे'त्यादिगाथयैवाशातनादशकस्य प्रतिपादितत्वाच्छेषाशातनानां चैतद्दशकोपल-क्षितत्वेनैव ज्ञास्यमानत्वादयुक्तमिदं द्वारान्तरमिति चेत्, न, सामान्याभिधानेऽपि बालादिबोधनार्थं विभिन्नं

१ रुद्रदत्ते इत्यादि-स. ॥ २ वालाना--सं.॥
३ ०वयवप्रक्षालना०-सं. श्राद्ध. टी. ॥ ४ शाटयति-सं. ॥ ५ 'जुज्झमी' ति-मु. ॥
६ दृग्युद्ध बाहुयुद्धादि-सं. ॥ ७ हसनवचनादिकं-सं. ॥

विशेषाभिधानं क्रियत एव, यथा ब्राह्मणाः समागताः वशिष्ठोऽपि समागत इति सर्वमनवद्यम् ॥

नन्वेता आशातना जिनालये क्रियमाणा [1]गृहिणां कञ्चन दोषमावहन्ति ? उतैवमेव न करणीयाः ?, तत्र ब्रूमः—न केवलं गृहिणां सर्वसावद्यकरणोद्यतानां भवभ्रमणादिकं दोषमावहन्ति, किन्तु निरवद्याचाररतानां मुनीनामपि दोषमावहन्तीत्याह—

आसायणा उ भवभमणकारणं इय विभाविउं जईणो ।
मलमलिणत्ति न जिणमंदिरंमि निवसंति [2]इय समओ ॥४३७॥
दुब्भिगंधमलस्सावि, तणुरप्पेस पहाणिया ।
दुहा वायवहो वावि, तेणं ठंति न चेइए ॥४३८॥
तिन्नि दा कडुई जाव, थुइओ स्सिसिलोइया ।
ताव तत्थ अणुन्नायं, कारणेण परेण उ ॥४३९॥

'आसायणाउ' इत्यादिगाथात्रयम्, [3]एताः आशातनाः परिस्फुरद्विविधदुःखपरम्पराप्रभवभवभ्रमण-कारणमिति विभाव्य—परिभाव्य यतयोऽस्नानकारित्वेन मलमलिनदेहत्वाच्च जैनमन्दिरे निवसन्तीति समयः-सिद्धान्तः ॥४३७॥

तमेव समयं व्यवहारभाष्योक्तं [4]दर्शयति—'दुब्भिगंधे' त्यादि, एषा तनुः स्नापितापि

१ गृहिणां कं कंचन-सं. ॥ २ इइ-ध. सं-टीका (मा. १ । पृ. १६६ A) ॥
३ एताः परि० मु. ॥ ४ दर्शयति एषा-मु. ॥

दुरभिगन्ध-मल-प्रस्वेदस्राविणी, तथा द्विधा वायुपथः-अधोवायुनिर्गम उच्छ्वास-निःश्वासनिर्गमश्च यद्वा मुखेन अपानेन च वायुवहो यापि- वातवहनं च, तेन कारणेन न तिष्ठन्ति यतयश्चैत्ये–जिनमन्दिरे ॥४३८॥

यद्येवं व्रतिभिश्चैत्येष्वाशातनाभीरुभिः कदाचिदपि न गन्तव्यम् । तत्राह–तिस्रः स्तुतयः कायोत्सर्गानन्तरं या दीयन्ते ता यावत्कथयति–भणतीत्यर्थः । किंविशिष्टाः ? तत्राह–त्रिश्लोकिकाः-त्रयः श्लोकाः-छन्दोविशेषरूपा [1]अधिका न यासु ताः, तथा 'सिद्धाणं बुद्धाणं' इत्येकः श्लोकः, 'जो देवाणवि' इति द्वितीयः, 'एकोवि नमुक्कारो' इति तृतीय इति, अग्रेतनगाथाद्वयम्, स्तुतिश्च चतुर्थी गीतार्थाचरणेनैव क्रियते, गीतार्थाचरणं तु मूलगणधरभणितमिव सर्वं विधेयमेव सर्वैरपि मुमुक्षुभिरिति, तावत्कालमेव तत्र जिनमन्दिरेऽनुज्ञातमवस्थानं यतीनाम्, कारणेन पुनर्धर्मश्रवणाद्यर्थमुपस्थितभविकजनोपकारादिना परतोऽपि चैत्यवन्दनाया अग्रतोऽपि यतीनामवस्थानमनुज्ञातम्, शेषकाले तु साधूनां जिनाशातनादिभयान्नानुज्ञातमवस्थानं तीर्थकर-गणधरादिभिः । ततो व्रतिभिरप्येवमाशातनाः परिहियन्ते, गृहस्थैस्तु सुतरां परिहरणीया इति । [2]इयं च तीर्थकृतामाज्ञा, आज्ञाभङ्गश्च महतेऽनर्थाय सम्पद्यते, यदाहुः–

'आणाइच्चिय चरणं' [बृहत्कल्प भा. २४८८] इत्यादि ॥४३९॥ ॥३८॥

साम्प्रतम्, 'अट्ठ महापाडिहेराइं' ति एकोनचत्वारिंशत्तमं द्वारमाह—

कंकिल्लि १ कुसुमवुट्ठी २ * दिव्वज्झुणि ३ चामरा ४ऽऽसणाइं ५ च।
भावलय ६ भेरि ७ छत्तं ८ जयंति जिणपाडिहेराइं ॥४४०॥ [सप्ततिशत. प्र. २०८]

१ अधिकयेत्न-जे. । २ इयं तीर्थ-सं. ॥ * देव० मु. । दिव्वु० ता । दिव्व० सप्ततिशत. प्र. ॥

'कंकिल्ली'त्यादिगाथा, तत्र प्रतिहारा इव प्रतिहाराः—सुरपतिनियुक्ता देवास्तेषां कर्माणि—कृत्यानि प्रातिहार्याणि, 'वर्णदृढादिभ्यः `ष्यञ्च'[पा-५-१-१२३] इति कर्मणि ष्यञ् , तान्यष्टौ, तद्यथा-उल्लसद्बहलपाटलपल्लवजालसर्वकालविकसदसमानकुसुमसमूहविनिःसरद्विरलपरमपरिमलोद्गारभरसमाकृष्यमाणभ्रमद्भ्रमरनिकुरम्बझणझणारावशिशिरीकृतप्रणमद्भव्यजनानेकश्रवणविवरोऽतिमनोरमाऽऽकारशालिविशालशालः [२]कङ्केल्लिः अशोकतरुर्जिनस्योपरि देवैर्विधीयते १, तथा जलज-स्थलज-विकुर्वणाविरचितानां पञ्चवर्णानां विकस्वराणामधःकृतवृन्तानामुपरिमुखानां कुसुमानां पुरुषजानुद्वयसंवृष्टिः क्रि (ग्रन्थाग्रं ४०००) यते २, तथा [३]सरसतरसुधारसमहोदरः सरभसविविधदेशापहृतमुक्ताऽपरव्यापारप्रसारितवदनैः कुरङ्गकुलैराकुलाकुलैरुत्कर्णैराकर्ण्यमानः सकलजनानन्दप्रमोददायी दिव्यो ध्वनिर्वितन्यते ३, तथा कमनीयकदलीकाण्डप्रकाण्ड[४]तन्तुमण्डली रुचिरचमरीचिकुरनिकुरम्बडम्बरीताऽतिजात्यविचित्रपवित्रनिःसपत्न[५]रत्नविसरविनिः सरत्किरणनिकुरम्बजालेन दिशि दिशि संसृज्यमाणेन्द्रचापकान्तकाञ्चनमयोद्दण्डरमणीया चारुचामर[६]श्रीर्विस्तार्यते ४, तथा अतिभास्वर[७]सटापाटलबन्धुरस्कन्धबन्धविकटप्रकटदंष्ट्राकरालसजीवायमानसिंहरूपाऽलङ्कृतमनेकप्रकाण्डरत्नखण्डविनिर्यद्भर्य[८]किरणावलिविलुप्यमानविलसत्तमस्काण्डडम्बरं सिंहासनं चारुतरं

१ घञ्वेतिकर्मणि घञ्-जे । ष्यङ्वेति कर्म्मणि ष्यङ्-सं. । तुलना-'वर्णदृढादिभ्यष्ट्यण् च वा'(सि. हे.७-१-५६)
२ कङ्केल्लितरुः अशोक० मु. ॥ ३ सरससुधा० सं. ॥ ४ ०तनुमंडली० सं. ॥ ५ रुचिरमरीचिचिकुर० मु. ॥
६ ०रत्नविशतर विनिः० सं. ॥ ७ ०रणकुरलजालेन सं. ॥ ८ ०श्रीर्वितायते-सं. ॥
९ ०सटपा० सं. ॥ १० ०किरणावली० सं. ॥

विरच्यते ५, तथा शरत्कालविलसदखण्डमयूखमण्डलप्रचण्डचण्डमरीचिमण्डलमिव दुरालोकं तीर्थकरकायतः प्रकृतिभा[1]स्वगत्तदीयनिरुपमरूपाच्छादकमतुच्छं प्रभापटलं सम्पिण्ड्य जिनशिरसः पश्चाद्भागे मण्डलायमानं भामण्डलमातन्यते ६, तथा [2]तारतरविस्फारझाङ्कारभरितभुवनोदरविवरा भेरयो–महाढक्काः क्रियन्ते ७, तथा भूर्भुवःस्वस्त्रयैकसाम्राज्यसंसूचकं शरदिन्दुकुन्दकुमुदावदातं प्रलम्बमानमुक्ताफलपटलावचूलमालामनोरमं छत्रत्रयमतिविचित्रमाकुरुते ८, इत्यष्टौ प्रातिहार्याणि जिनेश्वराणां जयन्तीति ।

तत्र [3]कङ्केल्लिः श्रीमहावीरस्य द्वात्रिंशद्धनुरुच्छ्रितः, शेषाणां तु ऋषभस्वाम्यादीनां पार्श्वनाथपर्यन्तानां त्रयोविंशतेरपि तीर्थकृतां निजनिजशरीरमानाद् द्वादशगुणः, यदुक्तम्–

●''उसभस्स तिन्नि गाउय वत्तीस धणूणि वद्धमाणस्स। सेसजिणाणमसोओ [4]सरीरओ बारसगुणो उ ॥१॥'इति।

ननु महावीरस्यापि कापि निजशरीराद् द्वादशगुणोऽशोकपादपः प्रतिपाद्यते, यदुक्तमावश्यकचूर्णौ श्रीमहावीरसमवसरणप्रस्तावे—

△ ''असोगवरपायवं जिणउच्चत्ताओ बारसगुणं सक्को विउव्वइ''[पृ. ३२५] त्ति ।

---

१ ०भासुर० मं. ॥ २ तारतरस्फार० सं. ॥ ३ कंकिल्लिः-सं. ।

● ऋषभस्य त्रीणि गव्यूतानि द्वात्रिंशद्धनूंषि वर्धमानस्य । जिनानां शेषाणामशोकः शरीराद् द्वादशगुणः ॥१॥

४ तुलना-तिण्णे य गाउआइं चेइयरुक्खो जिणस्स उसभस्स । सेसाणं पुण रुक्खा सरीरओ बारसगुणा उ। समवायाङ्गम् (सू. १५७, गाथा ३७)॥ ५ सरीरउ-सं. । ससरीरा-विषमपद. टीका ॥

△ अशोकवरपादपं जिनोच्चत्वाद् द्वादशगुणं शक्रो विकुर्वयति ।

तत्कथमिदमुपपद्यते ? इति, [1]अत्रोच्यते, [2]केवलस्यैवाशोकतरोस्तत्र मानमुक्तम्, इह तु सालवृक्ष-सहितस्य, ततोऽत्रापि केवलो द्वादशगुण एव, स तु सप्तहस्तमानश्रीमहावीरशरीराद् द्वादशगुणीकृतः सन्नेक-विंशतिर्धनूंषि भवति, सालवृक्षोऽप्येकादशधनुःप्रमाणः, ततो मिलितानि द्वात्रिंशद्धनूंषि युज्यन्ते इति सम्प्रदायः। **समवायाङ्गे**ऽप्युक्तम्—

"बत्तीसं धणुयाइं चेइयरुक्खो उ वद्धमाणस्स। निच्चोउगो असोगो [3]उच्छन्नो सालरुक्खेणं ॥१॥" [सू. १५७, गाथा ३६]

तट्टीका च **'निच्चोउगो'**त्ति "नित्यं-सर्वदा ऋतुरेव-पुष्पादिकालो यस्य स नित्यर्तुकः, **'असोगो'**त्ति अशोकाभिधानो यः समवसरणभूमिमध्ये भवति, **'उच्छन्नो सालरुक्खेणं'**ति अवच्छन्नः सालवृक्षेणेति अत एव वचनादशोकस्योपरि सालवृक्षोऽपि कथञ्चिदस्तीत्यवसीयत इति"।

तथा आयोजनभूमिकुसुमवर्षविषये कृपार्द्रीकृतचेतसः केचन प्रेरयन्ति-ननु विकचकान्तकुसुमप्रचय-निचितायां समवसरणभुवि जीवदयारसिकान्तःकरणानां श्रमणानां कथमवस्थान-गमनादिकं कर्तुं युज्यते ? जीवविघातहेतुत्वादिति। तत्र केचिदुत्तरयन्ति-तानि कुसुमानि सचित्तान्येव न भवन्ति, विकुर्वणयैव देवैस्तेषां विहितत्वादिति। एतच्चायुक्तम्, यतो न तत्र विकुर्वितान्येव पुष्पाणि भवन्ति, जलज-स्थलजानामपि कुसु-मानां सम्भवात्, न चैतदनार्षम्—

---

१ तुलना समवसरणस्तवाऽवचूर्णिः, (लो. प्र. ३० । ६०६ तः ॥
२ केवलमस्यैवा०-मु. ॥ ३ ओच्छण्णो इति समवायाङ्गे पाठः ॥

△"[1]विंटट्ठाइं सुरभिं जल-थलयं दिव्वकुसुम[2]नीहारिं । [3]पयरिंति समंतेणं दसद्ध[4]वण्णं [5]कुसुमवासं॥ १ ॥" [आव. निर्युक्ति ५४६] ति सिद्धान्तवचनाद् ।

एवं श्रुत्वाऽपरे सहृदयंमन्या उत्तरयन्ति–यत्र व्रतिनस्तिष्ठन्ति न तत्र देशे देवाः पुष्पाणि किरन्तीति, एतदप्युत्तरमाभम्, न खलु तपोधनैः काष्ठीभूतावस्थामालम्ब्य तत्रैव देशेऽवश्यं स्थातव्यम्, प्रयोजने गमनागमनादेरपि तत्र सम्भवादिति । तस्मान्निखिलगीतार्थसम्मतमिदमुत्तरमत्र-दीयते– [6]तत्रैकयोजनमात्रायां समवसरणधरणावपरिमितसुरासुरादिलोकसंमर्देऽपि न परस्परमाबाधा काचित्, तथा तेषामाजानुप्रमाणक्षिप्तानाममन्दमकरन्दसम्पत्सम्पादितानन्द[7]मन्दार-मुचुकुन्द-कुन्द कुवलय कमलदल-मुकुल-मालती-विकच-विचकिलप्रमुखकुसुमसमूहानामप्युपरि सञ्चरिष्णौ स्थाष्णौ च मुनिनिकरे विविधजननिचये च न काचिदाबाधा प्रत्युत सुधारसमिश्रयमाणानामिव [8]बहुतरमुल्लासस्तेषामापनिपद्यते, अचिन्तनीयनिरुपमतीर्थकर [9]प्रभावोज्जृम्भमाणप्रसादादेवेति ।

तथा दिव्यध्वनिविषये पूर्वपक्षचञ्चवः केचिदाचक्षते–ननु सकलजनाह्लाददायी जात्यशर्करा-द्राक्षादि-रसमिश्रितपरिक्वथितस्निग्धदुग्धरससहोदरस्तीर्थकरस्यैव ध्वनिरसौ कथं प्रतिहारकृतत्वमस्य युज्यते ?, युक्तमिद-

△ वृन्तस्थायिनीं सुरभि जल-स्थलजानां दिव्यकुसुमगन्धनिहारिणीं दशार्धवर्णां कुसुमवृष्टिं समन्ततो विकिरन्ति ॥१॥

१ वेंट० आव. नि. । विंटट्ठाइं सुरभिजलथलयं- सं. ॥ २ ०णीहारीं-आव. नि. ॥
३ पइरंति-आव. नि. । पयरंति-विषमपद. टीका ॥ ४ ०वन्नं-आव. नि. ॥ ५ कुसुमवुट्ठिं- मु. ॥
६ यथैकयोजन० मु. ॥ ७ ०मन्दारमचकुन्दकुन्दकुमुद० मु. । ०मन्दारमुचुकुन्दकुमुद० स. ॥
८ बहुमानस० जे. ॥ ९ प्रभावाद्विजृम्भण० सं. ॥

मुदितमुदाग्रमतिभिः, तीर्थकृतां वाणी हि परम[1]मधुरिममनोरमपदार्थसार्थातिशायिशब्दशालिनी स्वभावत एव, परं यदा मालव-कैशिक्यादिग्रामरागैर्भव्यजनोपकाराय देशनां भगवान् विधत्ते तदा देवैरुभयपार्श्ववर्तिभिरति-मनोहरवेणु-वीणादिकलक्वणितकरणेन स एव तीर्थकरशब्दः कलतरः क्रियते, यथा मधुरगानप्रवृत्ततरुणतर-गायनीजनगीतरवोऽनवमवैणिक-वैणविकादिवीणा-वेण्वादिरवैरित्येतावतांऽशेन प्रतिहारदेवकृतत्वमस्य न विरुद्ध्यते इति सर्वं समञ्जसम् ॥४४०॥३६॥

इदानीं 'चउत्तीसातिसयाणं'ति चत्वारिंशत्तमं द्वारमाह—

रय-रोय-सेयरहिओ देहो १ धवलाइं मंस-रुहिराइं २ ।
आहारा नीहारा अदिस्सा ३ सुरहिणो सासा ४ ॥४४१॥
[2]जम्माउ इमे चउरो एक्कारसकम्मखयभवा इण्हिं ।
खेत्ते [3]जोयणमेत्ते तिजयजणो माइ बहुओऽवि ५ ॥४४२॥
नियभासाए नर-तिरि-सुराण धम्माऽवबोहया वाणी ६ ।
पुव्वभवा रोगा उवसमंति ७ न य हुंति वेराइं ८ ॥४४३॥
दुब्भिक्ख ९ डमर १० दुम्मारि ११ ईई १२ अइवुट्ठि १३ अणभि[4]वुट्ठीओ ।
हुंति न १४ जियबहुतरणी पसरइ भामंडलुज्जोओ १५ ॥४४४॥

१ मधुरिमा० सं.॥ २ जम्हाउ० जे. ॥ ३ जोयणमित्ते- ता. ॥ ४ ०वुट्ठी य० ता. ॥

सुररइयाणिगुवीसा मणिमयसीहासणं सपयवीढं १६ ।
छत्तत्तय १७ इंदद्धय १८ सियचामर १९ धम्मचक्काइं २० ॥४४५॥
एए अणगुब्भवा गयणट्ठिया पंचवि इमाइं विगरंति ।
पाउब्भवइ असोओ २१ चिट्ठइ जत्थप्पइ तत्थ ॥४४६॥
चउमुहमुत्तिचउक्कं २२ मणि-कंचण-तारइयसालतिगं २३ ।
नव कणयपंकयाइं २४ अहोमुहा कंटगा हुंति २५ ॥४४७॥
निच्चमवट्ठियमित्ता पहुणो चिट्ठंति केस-रोम-नहा २६ ।
इंदियअत्था पंचवि मणोरमा २७ हुंति लद्धि रिऊ २८ ॥४४८॥
मघोदयस्स वुट्ठी २९ वुट्ठी कुसुमाण पत्तवन्नाणं ३० ।
[1]दिंति पयाहिण सउणा ३१ पहुणो पवणोऽवि अणुकूलो ३२ ॥४४९॥
पणमंति दुमा ३३ वज्जंति दुंदुहीओ गहीरघोसाओ ३४ ।
चउतीसाइसयाणं सव्वजिणिंदाण हुंति इमा ॥४५०॥

[2]"रये"त्यादिगाथादशकम्, रजो–मलः, रोगो–व्याधिः, स्वेदः–श्रमजं शरीरजलम्, तैर्विरहितः–त्यक्तः, उपलक्षणत्वाल्लोकोत्तर[3]रूप-गंध-रसबंधुरश्च तीर्थकृतां देहः–शरीरम् १, तथा गोक्षीरधारावद्धवलं–

१ ०कणयकमलाइं-जे. ॥ २ दिंति य पयाहिणाउ सउणा पवणो-जे. ॥ ३ रय-रोग-सेयरहिउ इत्यादि-सं. ॥
४ रूपगंधबन्धु- स ॥

पाण्डुरम् अविश्रं च मांस-रुधिरम् २, तथा आहारः—अभ्यवहरणम्, नीहारो—मूत्र-पुरीषोत्सर्गस्तौ क्रियमाणौ न दृश्येते इत्यदृश्यौ मांसचक्षुषा, न पुनरवध्यादिलोचनेन पुंसा ३, तथा विकचोत्पलवत्सुरभयः श्वासा—उच्छ्वास-निःश्वासाः ४, इत्येते चत्वारोऽप्यतिशया जिनानां जन्मतोऽपि जाताः ।

इदानीमेकादशातिशयाः '**कर्मक्षयभवाः**' कर्मणां—ज्ञानाऽऽवरणादीनां चतुर्णां घातिकर्मणां क्षयाज्जाताः कथ्यन्त इति शेषः, तत्र **योजनमात्रे**' योजनप्रमाणेऽपि '**क्षेत्रे**' समवसरणभुवि '**त्रिजगज्जनः**' सुर-नर तिर्यग्जनः '**प्रभूतोऽपि**' कोटीकोटीप्रमाणोऽपि '**माति**' परस्परासम्बाधया सुखेनावतिष्ठते ५, तथा वाणी अर्धमागधीकाया भगवताऽभिधीयमाना नर-तिर्यक्-सुराणां प्रत्येकं '**निजनिजभाषया**' स्वस्वभाषया कृत्वा धर्मावबोधका धर्मावबोधदा वा भवति । अयमर्थः—योजनव्यापिनी एकस्वरूपाऽपि भगवतो भारती वारिदविमुक्तवारिवत्तत्तदाश्रयानुरूपतया परिणमति, यत उक्तम्—

"देवा दैवीं नरा नारीं शबराश्चपि शाबरीम् । तिर्यञ्चोऽपि हि तैरश्चीं मेनिरे भगवद्गिरम् ॥ १ ॥"

न ह्यं वंविधभुवनादद्भुतमतिशयमन्तरेण युगपदनेकसत्त्वोपकारः शक्यते कर्तुमिति ६, तथा पूर्वोत्पन्ना रोगाः ज्वरा-ऽरोचकादय उपशाम्यन्ति, अपूर्वाश्च नोत्पद्यन्ते ७, तथा न च—नैव भवन्ति पूर्वभवनिबद्धानि जातिप्रत्ययानि च वैराणि—परस्परविरोधाः ८, तथा दुर्भिक्षं—दुष्कालः ९, तथा डमरः—स्वचक्र-परचक्रकृतो विप्लवः १०, तथा दुष्टदेवतादिकृतं सर्वगतं मरणं दुर्मारिः ११, तथा ईतयः—प्रचुरशलभ-शुक-मूषकाद्या धान्यादिविनाशिकाः १२, तथाऽतिवृष्टिः—अतिजलपातः १३, तथाऽनावृष्टिः—सर्वथा जलपाताऽभावः १४, एते च

रोगादयो यत्र यत्र भगवान् विहरति तत्र तत्र चतसृषु दिक्षु प्रत्येकं पञ्चविंशतियोजनमध्ये न जायन्ते, तदुक्तं **समवायाङ्गे** ।

* "जओ जओऽवि य णं [1]अरिहंता भगवंतो विहरंति तओ तओऽवि य णं जोअणपणवीसाए णं [2]ईई न भवइ मारी न भवइ परचक्कं न [3]भवइ सचक्कं न भवइ अइवुट्ठी न भवइ अणावुट्ठी न भवइ दुब्भिक्खं न भवइ, पुव्वुप्पण्णा[4]वि य णं उप्पाइया वाही खिप्पामेव उवसमंति" [सू. ३४] त्ति ।

स्थानाङ्गटीकायामपि दशस्थानके लिखितम्—

"महावीरस्य भगवतः स्वप्रभावप्रशमितयोजनशतमध्यगतवैरिमारिविद्वरदुर्भिक्षाद्युपद्रवस्यापि" इति ।

तथा जिनशिरसः पश्चाद्भागेऽतिभास्वरतया जितबहुतरणिः—तिरस्कृतद्वादशार्कतेजाः प्रसरति भामण्डलस्य—प्रभापटलस्योद्योतः १५ ।

अथ सुररचितानां—देवकृतानामतिशयानामेकोनविंशतिः कथ्यते, तत्र आकाशवदत्यन्तं स्वच्छो योऽसौ स्फटिकमणिस्तन्मयं सिंहासनं सपादपीठं—पादपीठयुक्तम् १६, तथा छत्रत्रयमतिपवित्रम् १७, तथा

---

* यत्र यत्रापि च अर्हन्तो भगवन्तो विहरन्ति तत्र तत्रापि पञ्चविंशतौ योजनेषु ईतयो न भवन्ति, मार्यो न भवन्ति परचक्रं न भवति, स्वचक्रं न भवति, अतिवृष्टिर्न भवति, अनावृष्टिर्न भवति, दुर्भिक्षं न भवति, पूर्वोत्पन्ना अपि च व्याधयः क्षिप्रमेवोपशाम्यन्ति ।

१ अरहंतो-इति समवायाङ्गसूत्रे पाठः ॥ २ ईती न- समवा. । ईई ण मु. ॥

३ हवइ-मु. । भवइ सचक्कं न भवइ परचक्कं न भवइ अइ० इति समवायाङ्गसूत्रे पाठः ॥ ४ ०ऽवा० सं ॥

जिनस्य पुरतोऽनेकलघुपताकिकासहस्रसुन्दरः समुत्तुङ्गो निस्सपत्नरत्नमयः शेषध्वजापेक्षयाऽतिमहत्त्वादिन्द्र-श्चासौ ध्वजश्च इन्द्रत्वसूचको वा ध्वज इन्द्रध्वजः१८, तथोभयोः पार्श्वयोर्यक्षहस्तगते सिते चामरे १९, तथा पुरतः पद्मप्रतिष्ठितं स्फुरत्किरणचक्रं धर्मप्रकाशकं चक्रं धर्मचक्रम् २०, एतानि च सिंहासनादीनि पञ्चापि यत्र यत्र जगद्गुरुर्विचरति तत्र तत्र गगनगतानि गच्छन्ति, तथा यत्र यत्र प्रभुस्तिष्ठति तत्र तत्र विचित्रपत्रपुष्पपल्लवसृहणीयच्छत्र-ध्वज-घण्टा-पताकादिपरिवृतः प्रादुर्भवत्यशोकवृक्षः २१, तथा चतुर्मुखं चतुर्दिशं मूर्तिचतुष्कम्, तत्र पूर्वाभिमुखं भगवान् स्वयमुपविशति शेषासु च तिसृषु दिक्षु प्रतिरूपकाणि तीर्थकराऽऽकृतिमन्ति तीर्थकरप्रभावादेव च तीर्थकररूपाऽनुरूपाणि सिंहासनादियुक्तानि देवकृतानि भवन्ति शेषदेवादीनामपि अस्माकं स्वयं कथयतीति प्रतिपत्त्यर्थम् २२, तथा समवसरणे मणि-काञ्चन--तारचितं शालत्रिकम्, तत्र तीर्थङ्करप्रत्यासन्नप्रथमप्राकारो नानाप्रकारनिःसपत्नरत्नमयो वैमानिकसुरैर्विरच्यते, द्वितीयो मध्यवर्ती कमनीयकनकमयो ज्योतिष्कविबुधैर्विधीयते, तृतीयस्तु बहिर्भूतस्तारतरकान्तिराजितरज-तमयो भवनपतिदेवैर्विंतन्यते २३, तथा **'नवकनकपङ्कजानि'** नवसङ्ख्यानि काञ्चनकमलानि नवनीतस्प-र्शानि क्रियन्ते, तत्र च द्वयोर्भगवान् स्वकीयक्रमकमलयुगलं [2]विन्यस्य विचरति अन्यानि च सप्त पद्मानि पृष्टतस्तिष्ठन्ति तेषां च यद्यत्पश्चिमं तत्तत्पादन्यासं कुर्वतो भगवतः पुरतो भवति २४, तथा यत्र यत्र भगवान् विहरति तत्र तत्राधोमुखाः कण्टकाः संपद्यन्ते २५, तथा नित्यं–सर्वदा अवस्थितमात्रा–अवृद्धिस्वभावाः प्रभोः–भगवतस्तिष्ठन्ति–आसते केश-रोम-नखाः, केशाः–शिरः-कूर्चसम्भवाः, रोमाणि–शेषशरीरसम्भवानि,

१ भुवन०-सं. ॥ २ विरचय्य विचरति-सं. ॥

नखाः—पाणिपादजाः २६, तथा इन्द्रियार्था—विषयाः पञ्चापि—स्पर्श-रस-रूप-गन्ध-शब्दस्वरूपा अमनोज्ञानामभावेन मनोज्ञानां च प्रादुर्भावेन मनोरमा—मनःप्रीणका भवन्ति २७, तथा षडपि ऋतवो—वसन्ताद्याः शरीराप्यायकसुखस्पर्शादिसम्पादकत्वेन सर्वदाविकाशिकुसुमादिसमृद्धया च मनोरमा अनुकूलाः सम्पद्यन्ते २८, तथा यत्र भगवांस्तिष्ठति तत्र पांशुप्रसरप्रशमनार्थं गन्धोदकवृष्टिर्घनघनसारादिमिश्रमनोहारिवृष्टिः २९, तथा वृष्टिः कुसुमानां—मन्दार-पारिजातक-चम्पकादीनां पञ्चवर्णानां—श्वेत-रक्त-पीत-नील कालानाम् ३०, तथा शकुनाः-पक्षिणो ददति प्रदक्षिणाम् , यत्र भगवान् सञ्चरति तत्र चाष-शिखण्डिप्रभृतयः पक्षिणः प्रदक्षिणगतयो भवन्तीत्यर्थः ३१, तथा पवनः-संवर्तकवातो योजनं [1]यावत्क्षेत्रशुद्धिविधायकत्वेन सुरभि-शीतलमन्दत्वेन च अनुकूलः—सुखदो भवति, यदुक्तं **समवायाङ्गे**—△"सीयलेणं सुहफासेणं [2]सुरभिणा मारुएणं जोयणपरिमंडलं सव्वओ समंता संपमज्जिज्जइ" [सू. ३४] त्ति, ३२. तथा यत्र भगवान् [3]व्रजति तत्र द्रुमाः—पादपाः प्रणमन्ति-नम्रा भवन्ति ३३, तथा यत्र भगवान् सलीलं सुञ्चरति तत्र वाद्यन्ते दुन्दुभयो—महत्यो ढक्काः सजलजलधरवद्गम्भीरभुवनव्यापिघोषाः ३४ । इति [4]सर्वजिनेन्द्रातिशयानां चतुस्त्रिंशत् चतुर्णामेकादशानामेकोनविंशतेश्च [5]मीलने भवन्तीति । इह च **यत्समवायाङ्गेन** सह किञ्चिदन्यथात्वमपि

१ यावते क्षेत्र०-सं. ॥ △ शीतलेन सुरभिना सुखस्पर्शेन मारुतेन योजनपरिमण्डलं सर्वतः समन्तात् संप्रमार्ज्यते ॥ २ सुरहिणा-मु. ॥ ३ प्रव्रजति-सं. ॥ ४ "चत्वारोऽतिशयाश्चान्ये, तेषां विश्वोपकारिणाम् पूजा-ज्ञान-वचो-ऽपाया-ऽपगमाख्या महाद्भुताः ॥ अष्टकं प्रतिहार्याणां चत्वारोऽतिशया इमे । इत्येवं द्वादशगुणा अर्हतां परिकीर्तिताः" ॥ इति लो. प्र. (३० । ९९७-९९८) ॥ ५ मीलनेन म० मु० ॥

दृश्यते तन्मतान्तरमवगन्तव्यम्, मतान्तरबीजानि तु सर्वज्ञविज्ञेयानीति ॥४४१-४५०॥४०॥

सम्प्रति 'दोसा अट्ठारस'त्ति एकचत्वारिंशत्तमं द्वारमाह—

[1]अन्नाण १ कोह २ मय ३ माण ४ लोह ५ माया ६ रई ७ य अरई ८ य।
निद्दा ९ सोय १० अलियवयण ११ चोरिया १२ मच्छर १३ भया १४ य ॥४५१॥
पाणिवह १५ [2]पेम्म १६ [3]कीला पसंग १७ हासा १८ य जस्स इय दोसा।
[4]अट्ठारसवि पणट्ठा नमामि देवाहिदेवं तं ॥४५२॥

'अन्नाण कोह' इत्यादिगाथाद्वयम्, 'अज्ञानं' संशया-ऽनध्यवसाय-विपर्ययात्मकं मौढ्यम् १, 'क्रोधः' कोपः २, 'मदः' कुल-बलैश्वर्य-रूप-विद्यादिभिरहङ्कारकरणं [5]परप्रधर्षणानिबन्धनं वा ३, 'मानो' दुरभिनिवेशाऽमोचनं युक्तोक्ताग्रहणं वा ४, 'लोभो' गृद्धिः ५, 'माया' दंभः ६, 'रतिः' अभीष्टपदार्थानामुपरि मनःप्रीति ७, 'अरतिः' अनिष्टसम्प्रयोगसंभवं मनोदुःखम् ८, 'निद्रा' स्वापः ९, 'शोकः' चित्त-

१ तुलना-"अन्तराया दान-लाभ-वीर्य-भोगोपभोगगाः। हासो रत्यरती भीतिर्जुगुप्सा शोक एव च॥
कामो मिथ्यात्वमज्ञानं निद्रा चाऽविरतिस्तथा। रागो द्वेषश्च नो दोषास्तेषामष्टादशाप्यमी॥
हिंसा-ऽलीकमदत्तं च क्रीडा हास्याऽरती रतिः। शोको भयं क्रोध-मान-माया-लोभास्तथा मदः॥
स्युः प्रेम-मत्सरा-ऽज्ञान-निद्रा अष्टादशेत्यमी। द्वेधापि सप्तत्रिंशतस्थानके प्रतिपादिताः॥" इति लो. प्र. (३०।१००२-१००५), द्रष्टव्यं-सप्ततिशतप्र. १६१-१६२। अभि.चिन्तामणि॥१।७२-७३॥

२ पेम-मु.। द्रष्टव्यम्-'तैलादौ' सि. हे. ८।२।९८.....पेम्म.....॥ ३ कीडा-ता.॥ ४ अट्ठारस्सवि-मु.॥
५ पर प्रधर्षणनि० सं०॥

वैधुर्यम् १०, 'अलीकवचनं' वितथभाषणम् ११ [1]'चोरिका' परद्रव्यापहारः १२, 'मत्सरः' परसम्पद-सहिष्णुता १३, 'भयं' प्रतिभयः १४, 'प्राणिवधः' प्राण्युपमर्दः १५, 'प्रेम' स्नेहविशेषः १६, 'क्रीडा-प्रसङ्गः' क्रीडायामासक्तिः १७, 'हासो' हास्यम् १८, इति यस्य दोषा अष्टादशापि प्रणष्टा नमामि देवाधिदेवं तमिति ॥४५१-४५२॥४१॥

इदानीं 'अरिहन्तचक्कं'ति द्विचत्वारिंशत्तमं द्वारमाह—

जिणनामा नामजिणा केवलिणो सिवगया य भावजिणा ।
ठवणजिणा पडिमाउ दव्वजिणा भाविजिणजीवा ॥४५३॥

'जिननामा' इत्यादि, जिनाश्चतुर्धा नामजिनाः, स्थापनाजिनाः, द्रव्यजिनाः, भावजिनाश्चेति, तत्र जिनानां—तीर्थकृतां नामानि ऋषभा-ऽजित-सम्भवादीनि नामजिनाः, तथा अष्टमहाप्रातिहार्यादिसमृद्धिं साक्षादनुभवन्तः **'केवलिनः'** समुत्पन्नकेवलज्ञानाः **'शिवगताश्च'** परमपदप्राप्ता भावतः—सद्भावतो जिना भावजिनाः, गाथानुलोम्याच्च अनानुपूर्व्या भावजिना व्याख्याताः, **'स्थापनाजिनाः'** प्रतिमाः काञ्चन-मुक्ता-शैल-मरकतादिभिर्निर्मिताः, द्रव्यजिना ये जिनत्वेन भाविनो—भविष्यन्ति जीवाः श्रेणिकादय इति ॥४५३॥४२॥

इदानीं [2]**'निक्खमणतवो'**त्ति त्रिचत्वारिंशत्तमं द्वारं विवृणोति—

१ चौरिका-सं. ॥ २ निक्खवण०-मु. ॥

[1]सुमइत्थ निच्चभत्तेण निग्गओ [2]वासुपुज्ज जिणो चउत्थेण ।
पासो मल्लीवि य अट्ठमेण सेसा उ छट्ठेणं ॥४५४॥ [आव. नि. २२८]

'सुमइ'त्यादि सुमतिरत्र-अस्यामवसर्पिण्यां चतुर्विंशतौ तीर्थकृत्सु मध्ये 'नित्यभक्तेन' अनवरतभक्तेन निर्गतो-गृहवासात् प्रव्रजित इत्यर्थः, वासुपूज्यो द्वादशस्तीर्थकृच्चतुर्थेन-एकेनोपवासेन प्रव्रजितः, पार्श्वः-त्रयोविंशतितमतीर्थकृत् मल्लिरपि च एकोनविंशतितमतीर्थकृदष्टमेन-त्रिभिरुपवासैः प्रव्रजितः शेषास्तु-ऋषभस्वामिप्रभृतयो विंशतिर्जिनाः षष्ठेन-द्वाभ्यामुपवासाभ्यां निष्क्रान्ता इति ॥४५४॥४३॥

इदानीं 'नाणतवो'त्ति चतुश्चत्वारिंशत्तमं द्वारमाह—

अट्ठमभत्तवसाणे [3]पासोसह-मल्लि-रिट्ठनेमीणं ।
वसुपुज्जस्स चउत्थेण छट्ठभत्तेण सेसाणं ॥४५५॥ [तु. आव. नि. २४५]

'अट्ठम'इत्यादि, अष्टमभक्तान्ते उपवासत्रयपर्यन्ते श्रीपार्श्वजिन-ऋषभस्वामि मल्लिनाथा-ऽरिष्टनेमीनां केवलज्ञानमुत्पेदे, वासुपूज्यस्य चतुर्थेन-एकेनोपवासेनेत्यर्थः, शेषाणां तु अजितस्वामिप्रभृतीनां एकोनविंशतेस्तीर्थकृतां षष्ठभक्तेन-द्वाभ्यामुपवासाभ्यामिति ॥४५५॥४४॥

---

१ "सुमई य"-इति आव.नि.। 'थेति निपातः' इति तत्रैव हारिभद्री व्याख्या ॥
तुलना-"सुमतिर्नित्यभक्तेन मल्ली-पार्श्वौ कृताऽष्टमौ। चतुर्थेन द्वादशान्ये कृतषष्ठाः प्रवव्रजुः ॥" इति। लो.प्र.(३२।१००६)॥

२ वासुपुज्ज [जिणो]-मु.। वासुपुज्जो-ता. ॥ ३ पासोसम० ता. ॥

सम्प्रति 'निव्वाणतवो'त्ति पञ्चचत्वारिंशं द्वारं विवृणोति—

निव्वाणं संपत्तो चउदसभत्तेण पढमजिणचन्दो ।
सेसा [1]उण मासएणं वीरजिणिंदो य छट्ठेणं ॥४५६॥ [तु.-आव. नि. ३०६]

'निव्वाण' गाथा, निर्वाणं—परमानन्दं सम्प्राप्तश्चतुर्दशभक्तेन—उपवासषट्केन प्रथमजिनचन्द्रः श्रीनाभेयजिनेन्द्रः, शेषाः पुनरजितादयः पार्श्वनाथपर्यन्ता द्वाविंशतिर्जिना मासेन—त्रिंशतोपवासैः, वीरजिनेन्द्रश्च षष्ठेन—उपवासद्वयेनेति ॥४५६॥४५॥

इदानीं 'भाविजिणेसरजीव'त्ति षट्चत्वारिंशं द्वारं विवरीषुः प्रथमं तत्प्रस्तावनागाथामाह —

वीरवरस्स भगवओ वोलिय चुलसीइवरिससहस्सेहिं ।
पउमाईचउवीस जह हुंति जिणा तहा थुणिमो ॥४५७॥
पढमं च [2]पउमनाहं सेणियजीवं जिणेसरं [3]नमिमो ।
बीयं च सूरदेवं वंदे जीवं सुपासस्स ॥४५८॥
तइयं सुपासनामं उदायिजीवं पणट्ठभववासं ।
वंदे सयंपभजिणं पुट्टिल्लजीवं चउत्थमहं ॥४५९॥
सव्वाणुभूइनामं दढाउजीवं[4] च पंचमं वंदे ।
छट्ठं देवसुयजिणं वंदे जीवं च कित्तिस्स ॥४६०॥

१ ब मासएणं-मु. । उण मासिएणं-ता. ॥ २ पउमनाभं-ता. ॥ ३ वंदे-जे ॥ ४ °जीयं-ता ॥

सत्तमगं उत्तरजिणं वंदे जीवं च संखनामस्स ।
पेढालं अट्ठमयं आणंदजियं नमंसामि ॥४६१॥
पोट्टिलजिणं च नवमं सुरकयसेवं सुनंदजीवस्स ।
सयकित्तिजिणं दसमं वंदे सयगस्स जीवंति ॥४६२॥
एगारसमं [1]मुणिसुव्वयं च वंदामि [2]देवईजीयं ।
बारसमं अममजिणं सच्चइजीवं जयपईवं ॥४६३॥
निक्कसायं तेरसमं वंदे जीवं च वासुदेवस्स ।
बलदेवजियं वंदे चउदसमं [3]निप्पुलायजिणं ॥४६४॥
सुलसाजीवं वंदे [4]पनरसम [5]निम्ममत्तजिणनामं ।
रोहिणिजीवं नमिमो सोलसमं चित्तगुत्तंति ॥४६५॥
सत्तरसमं च वंदे रेवइजीवं समाहिनामाणं ।
संवरमट्ठारसमं सयालिजीवं पणिवयामि ॥४६६॥
दीवायणस्स जीवं जसोहरं वंदिमो इगुणवीसं ।
कण्हजियं गयतण्हं वीसइमं विजयमभिवंदे ॥४६७॥

१ मुणिसोव्वयं-ता. ॥ २ देवईए जीयं-ता० ॥ ३ निप्पुलाइजिणं-जे. ॥ ४ पन्नरसमं-मु. ॥ ५ निम्ममत्तं० ता. ॥

वंदे इगवीसइमं नारयजीवं च 'मल्लिनामाणं ।
देवजिणं बावीसं अंबडजीवस्स वंदेऽहं ॥४६८॥
अमरजिणं तेवीसं अणंतविरियाभिहं जिणं वंदे ।
तह [2]साइबुद्धजीवं चउवीसं भद्दजिणनाम ॥४६९॥
[3]उस्सप्पिणिए चउवीस जिणवरा तित्थिया सनामेहिं ।
सिरिचंदसूरिनामेहिं सुहयरा हुंतु सयकालं ॥४७०॥

'वीरवरस्से' त्यादिगाथाचतुर्दशकम्, अत्र षष्ठी पञ्चम्यर्थे, तृतीया च सप्तम्यर्थे, ततो 'वीरवरात्' श्रीमहावीरस्वामिनो 'भगवतः' सकलैश्वर्यादिगुणयुक्तात् 'व्युत्क्रान्तेषु' गतेषु चतुरशीतिवर्षसहस्रेषु 'पञ्चादशः' पञ्चनामयुतयश्चतुर्विंशतिर्जिना यथा भविष्यन्ति तथा 'स्तुमो' नामग्रहणपूर्वकं प्रणमामः, [4]इयमत्र भावना-एतस्यामवसर्पिण्यां चतुर्थारकस्य दुष्षमसुषमालक्षणस्य पर्यन्ते एकोननवतिपक्षे-

१ मल्लिन०मु. । अत्रैव २६४ तमगाथायामपि 'मल्लि' इति पाठः ॥ २ सा०बुद्ध० ना. ॥ ३ उस्सप्पिणिइ-मु. ॥

४ तुलना-' ४६ द्वारे वीरस्सेति अवसर्पिण्या दुष्षमसुषम स्याचतुर्थारकस्यान्ते एकोननवतिपक्षषण्णवतिष्ठ(ष्ठ)मासेषु श्रीवीरो निर्वृतः । उत्सर्पिण्या अपि दुःषमसुषमाख्ये तृतीयारके एकोननवतिपक्षेषु गतेषु श्रीपद्मनाभ उत्पन्न इति । अरकेऽरके एकोननवतिपक्षाणामाकपकपूरणेन चतुर्भि मध्यमावैश्चतुरशीतिवर्षसहस्रा जायन्ते । परेत्वाहुः-"चुल(सी)इ च सहस्सा वरि)मा मज्झत्थ रंचमासओ य र-महापरमाणं अंतरमेयं वियाणाहि" अन्ये सूत्रमिण्या द्वितीयदुःषमारकस्य एकोननवतिपक्षेष्वतिक्रान्तेषूत्पन्न इत्याहुः तत्र तु संख्या पूर्वत एव ।" इति विषमपदटीकायाम् पत्र ४० A ॥

व्यवतिष्ठमानेषु श्रीवर्धमानस्वामी निर्वृतः, ततो महावीरनिर्वाणानन्तरम् एकोननवतिपक्षाधिके प्रत्येकमेकविंशतिवर्षसहस्रप्रमिते अवसर्पिणीसम्बन्धिपर्यन्तारकद्वये गते तथोत्सर्पिण्या अप्यतिदुष्षमादुष्षमारूपे प्रत्येकमेकविंशतिवर्षसहस्रमाने एवाद्यारकद्वये गते तृतीयारकस्य च दुष्षमसुषमारूपस्यैकोननवतिपक्षेषु गतेषु श्रीपद्मनाभः समुत्पत्स्यते, ततः प्रागुक्तारकचतुष्टयसम्बन्धिसर्वप्रमाणमीलने चतुरशीतिर्वर्षसहस्रा जायन्ते, ये च पक्षाणां द्वे एकोननवती समधिके अवतिष्ठेते ते अल्पत्वान्न विवक्षिते इति ।

अथ तानेव क्रमेणाह–प्रथमं पद्मनाभं जिनेश्वरं श्रीमन्महावीरपरमश्रावक**श्रेणिक**महाराजजीवं नमामः, द्वितीयं च सुरदेवं वन्दे जीवं **सुपार्श्वस्य** श्रीमहावीरपितृव्यस्य, तृतीयं सुपार्श्वनामानं कोणिकपुत्र**उदायि**महाराजजीवं प्रणष्टभववासमहं वन्दे, स्वयंप्रभजिनं [1]**पोट्टिल**जीवं चतुर्थमहम्, सर्वानुभूतिनामानं **दृढायुषो** जीवं पञ्चमं वन्दे, तथा षष्ठं देवश्रुतजिनं वन्दे जीवं **कीर्तेः**, सप्तमम् उदयजिनं वन्दे जीवं च **शङ्ख**नाम्नः श्रावकस्य, पेढालमष्टमकम् **आनन्द**जीवं नमस्यामि, पोट्टिलजिनं च नवमं सुरकृतसेवं **सुनन्द**जीवस्य सम्बन्धिनम्, शतकीर्तिजिनं दशमं वन्दे **शतकस्य** जीवम्, एकादशमं मुनिसुव्रतं वन्दे **देवकया** जीवम्, द्वादशममजिनं **सत्यकि**जीवं जगत्प्रदीपम्, निष्कषायं त्रयोदशं वन्दे जीवं च **वासुदेवस्य, बलदेवस्य** जीवं चतुर्दशं निष्पुलाकजिनम्, **सुलसाया** जीवं वन्दे पञ्चदशं निर्ममत्वनामानं जिनम्, **रोहिणी**जीवं नमामः षोडशं चित्रगुप्तमिति, सप्तदशं च वन्दे **रेवत्या** जीवं समाधिनामानं जिनम्, संवरमष्टादशं **सत्यालि**जीवं प्रणिपतामि–नमामि, **द्वीपायन**स्य जीवं यशोधरनामानं जिनमेकोनविंशं वन्दे,

१ पोट्टिलकजीवं-मु. ॥

कृष्णजीवं गततृष्णं विंशतितमं विजयनामानमभिवन्दे, तथा वन्दे एकविंशतितमं नारदजीवं च [1]मल्लिनामानम्, देवजिनं द्वाविंशं अम्बडजीवस्य संबन्धिनम्, अमरजीवं त्रयोविंशतितममनन्तवीर्याभिधं जिनं वन्दे, तथा स्वातिबुद्धजीवं चतुर्विंशतितमं भद्रजिननामानं वन्दे। उत्सर्पिण्यां-भाविन्यां चतुर्विंशतिर्जिनवराः 'कीर्तिताः' पूर्वभवसम्बन्धिनामप्रति[2]पादनपूर्वकैः स्वनामभिः श्रीचन्द्रसूरिनाम्नाऽऽचार्येण स्तुताः सुखकराः शुभकरा वा भवन्तु सदाकालमिति। एते च तथाविधसम्प्रदायाभावात् शास्त्रान्तैः सह विसंवादित्वाच्च न विशेषतो विवृताः ॥४५७-४७०॥४६॥

सम्प्रति 'संखा उड्ढाह-तिरियसिद्धाणं' इति सप्तचत्वारिंशं द्वारमाह—

[3]चत्तारि उड्ढलोए दुवे समुद्दे तओ जले चेव ।
बावीसमहोलोए तिरिए अट्ठुत्तरसयं तु ॥४७१॥

---

१ मल्लना० सं. ॥ २ पादनकपू०-मु. ॥

३ तुलना-"एकस्मिन्समये चोर्ध्वलोके चत्वार एव ते। सिद्धन्त्युत्कर्षतो दृष्टमधोलोके मतत्रयम् ॥६५॥ विंशतिर्द्वाविंशतिश्च, चत्वारिंशदिति स्फुटम्। उत्तराध्ययने संग्रहण्यां च सिद्धप्राभृते ॥६६॥" 'वीसमहे तहेवेति' उत्तराध्ययने जीवाजीव विभक्त्यध्ययने [३६।५४]। 'उड्ढलोतिरिय लोए चउबावीसट्ठसयं' इति सङ्ग्रहण्याम् [गाथा २७३]। 'वीसपुहुत्तं अहोलोए' इति सिद्धप्राभृते, तट्टीकायां 'विंशतिपृथक्त्वं दुवे विंशती' इति" इति लोकप्रकाशे द्वितीयसर्गे। 'पुहत्तसद्दो बहुत्तवाई कम्मपगडिसंगहणीए मणिओत्ति गाथार्थः।' इति सिद्धप्राभृतटीकायाम्। विशेषार्थं द्रष्टव्यानि विजयोदयसूरिप्रणितानि टिप्पनकानि (लो.प्र. पृ.१०६तः) इयं गाथा बृहत्संग्रहणी मलय० वृत्तौ (पृ० १३३ A) प्रक्षेपरूपेण निर्दिष्टा ॥

'चत्तारि' त्यादिगाथा, ❀ ऊर्ध्वलोके एकसमयेनोत्कर्षतश्चत्वार एव सिद्धयन्ति, तथा द्वौ समुद्रे, त्रयः शेषजले ह्रद-नद्यादिसम्बन्धिनि, सिद्धप्राभृताभिप्रायेण तु जलमध्ये चत्वारो द्रष्टव्याः, तथा अधोलोके-अधोग्रामादौ उत्कर्षत एकसमयेन द्वात्रिंशतिः सिद्धयति, सिद्धप्राभृते [1]पुनरित्थं दृश्यते यथा—

"चत्तारि उड्ढलोए जले चउक्कं दुवे समुद्दंमि । अट्ठसयं तिरिलोए वीसपुहुत्तं अहोलोए" ॥१॥

एतट्टीकायां च विंशतिपृथक्त्वं [2]द्वित्रिंशतिप्रमाणं गृहीतम्, द्विप्रभृत्या नवभ्य इति पृथक्त्ववचनात्, ततो यद्यत्रापि 'दोवीसमहोलोए' इति पठ्यते ततः समीचीनं भवति, तथा तिर्यग्लोके उत्कर्षत एकसमये-नाष्टोत्तरं शतं सिद्धयतीति ॥४७१॥ ४७ ॥

सम्प्रति 'तह [3]एकसमयसिद्धाणं' ति अष्टचत्वारिंशं द्वारमाह—

[4]एक्को व दो व तिन्नि व अट्ठसयं जाव एक्क [5]समयम्मि ।
मणुयगईए सिज्झइ सखाउयवीयरागा उ ॥४७२॥

[6]"एक्को व गाहा', एकस्मिन् समये जघन्यत एको [7]द्वौ त्रयो वा सिद्धयन्ति उत्कर्षतोऽष्टोत्तरं शतम्, ते च सिद्धयन्ति मनुष्यगतेः सकाशात्र शेषगतिभ्यः, तेऽपि च सङ्ख्ये यवर्षायुषः, असङ्ख्ये यवर्षायुषां सिद्धयभावात्, तत्रापि वीतरागाः—अपगतरागाः उपलक्षणत्वाच्च अपगतसकलकर्मकलङ्काः, न पुनः कुतीर्थिक-सम्मता इव सकर्माणोऽपि इति ।४७२॥४८॥

❀ तुलना-बृहत्सङ्ग्रहणी मलय० वृत्तिः पृ० १३३ B॥ १ पुनरिदं-मु. ॥ २ द्वा (द्वि) विंशति०-मु. ॥ ३ इक्क० मु. ॥ ४ इक्को-मु. ॥ ५ ०समएणं-जे. समयेणं-ता. ६ एको व गाहा-मु. नास्ति॥ ७ द्वौ वा त्रयो-मु. ॥

'ते य पन्नरसभेएहिं' ति द्वारमिदानीमेकोनपञ्चाशं विवरीतुमाह–

तित्थयर १ अतित्थयरा २ तित्थ ३ सलिंग ४ ऽन्नलिंग ५ थी ६ पुरिसा ७।
गिहिलिंग ८ [1]नपुंसक ९ अतित्थसिद्ध १० पत्तेयबुद्धा ११ य ॥४७३॥
एग १२ अणेग १३ सयंबुद्ध १४ बुद्धबोहिय १५ पभेयओ भणिया ।
सिद्धंते सिद्धाणं भेया पन्नरससंखत्ति ॥४७४॥

'तित्थयरे'त्यादिगाथाद्वयम्, तीर्थकराः सन्तो ये सिद्धास्ते तीर्थकरसिद्धाः १, तथा अतीर्थकराः-सामन्यकेवलिनः सन्तो ये सिद्धास्तेऽतीर्थकरसिद्धाः २, तथा तीर्यते 'संसारसागरोऽनेनेति तीर्थं-यथावस्थितजीवा-ऽजीवादिपदार्थसार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनं तच्च निराधारं न भवतीति सङ्घः प्रथमगणधरो वा वेदितव्यः, तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः ३, [2]तथा स्वलिङ्गे–रजोहरणादिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते स्वलिङ्गसिद्धाः ४, तथा अन्यलिङ्गे–परिव्राजकादिसम्बन्धिनि वल्कलकषायादिरूपे द्रव्यलिङ्गे व्यवस्थिताः सन्तो ये सिद्धास्ते अन्यलिङ्गसिद्धाः, यदा अन्यलिङ्गिनामपि भावतः सम्यक्त्वादिप्रतिपन्नानां केवलज्ञानमुत्पद्यते तत्समयं च कालं कुर्वन्ति तदेदं द्रष्टव्यम्, अन्यथा यदि दीर्घमायुष्कमात्मनः पश्यन्ति ततः साधुलिङ्गमेव प्रतिपद्यन्ते ५, तथा स्त्रिया लिङ्गं स्त्रीलिङ्गं स्त्रीत्वस्योपलक्षणमित्यर्थः, तच्च त्रिधा–वेदः शरीरनिर्वृत्तिर्नेपथ्यं च, तत्रेह शरीरनिर्वृत्त्या प्रयोजनं न वेद-नेपथ्याभ्याम्, वेदे सति सिद्धयभावात्, नेपथ्यस्य चाप्रमाणत्वात्, तस्मिन् स्त्रीलिङ्गे वर्तमानाः सन्तो ये सिद्धास्ते स्त्रीलिङ्गसिद्धाः ६,

१ नपुंस अतित्थ०-जे ॥ २ तथा च सलिङ्गे-खं. ॥

तथा पुरुषलिङ्गे शरीरनिर्वृत्तिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते पुरुषलिङ्गसिद्धाः ७ तथा, गृहस्थाः सन्तो ये सिद्धास्ते गृहिलिङ्गसिद्धा **मरुदेवी**प्रभृतयः ८, तथा नपुंसकलिङ्गे वर्तमानाः सन्तो ये सिद्धास्ते 'नपुंसकलिङ्गसिद्धाः ९, तथा तीर्थस्याभावोऽतीर्थं तीर्थस्याभावश्चानुत्पादोऽपान्तराले व्यवच्छेदो वा तस्मिन् ये सिद्धास्तेऽतीर्थसिद्धाः, तत्र तीर्थस्यानुत्पादे सिद्धा **मरुदेवी**प्रभृतयः, न हि मरुदेव्याः सिद्धिगमनकाले तीर्थमुत्पन्नमासीत्, तीर्थस्य व्यवच्छेदश्च सुविधिस्वाम्याद्यपान्तरालेषु, तत्र ये जातिस्मरणादिना प्राप्तापवर्गास्ते तीर्थव्यवच्छेदसिद्धाः १०, तथा प्रतीत्य एकं किञ्चिद् वृषभादिकमनित्यतादिभावनाकारणं वस्तु बुद्धा—बुद्धवन्तः परमार्थमिति प्रत्येकबुद्धास्ते सन्तो ये सिद्धास्ते प्रत्येकबुद्धसिद्धाः ११, तथा [2]एकस्मिन् समये एकका एव सन्तो ये सिद्धास्ते एकसिद्धाः १२, तथा एकस्मिन् समये ये अनेके सिद्धास्ते अनेकसिद्धाः १३, तथा स्वयम्—आत्मना बुद्धाः—तत्त्वं ज्ञातवन्तः स्वयंबुद्धास्ते सन्तो ये सिद्धास्ते स्वयंबुद्धसिद्धाः १४, तथा बुद्धा—आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः १५, इत्येतैः पूर्वोक्तैस्तीर्थकरत्वादिभिः प्रभेदैः-विशेषैर्भणिताः-प्रतिपादिताः सिद्धान्ते सिद्धानां भेदाः—प्रकाराः पञ्चदशसङ्ख्याः ।

[3]ननु तीर्थकरसिद्धा-ऽतीर्थकरसिद्धरूपभेदद्वये तीर्थसिद्धा-ऽतीर्थसिद्धरूपभेदद्वये वा शेषभेदाः सर्वेऽप्यन्तर्भवन्ति तत्किमर्थं शेषभेदोपादानम् ?, सत्यमन्तर्भवन्ति परं न विवक्षितभेदद्वयोपादानमात्रात् शेषभेदपरिज्ञानं भवति, विशेषपरिज्ञानार्थं चैष शास्त्रारम्भप्रयास इति शेषभेदोपादानमिति ॥४७३-४७४॥४१॥

---

१ नपुंसकसिद्धाः-सं ॥ २ एकस्मिन् एकस्मिन् समये-जे. ॥ ३ तुलना—नन्दिसूत्र हा. टी. पृ. ३६ ॥

इदानीम् 'अवगाहणाय सिद्धा उक्किट्ठ-जहन्न-मज्झिमाए य' त्ति पञ्चाशत्तमं द्वारमाह–

दो चेवुक्कोसाए चउर जहन्नाए मज्झिमाए उ ।
अट्ठाहियं सयं खलु सिज्झइ ओगाहणाइ तहा ॥४७५॥

'दो चेवु गाहा', एकस्मिन् समये युगपदुत्कृष्टायामवगाहनायां पञ्चधनुःशतमानायामुत्कर्षतो द्वावेव सिद्ध्यतः, जघन्यायामवगाहनायां हस्तद्वयप्रमाणायां चत्वारः, मध्यमायां [1]तु अजघन्योत्कृष्टरूपायामष्टाधिकं शतं खलु सिद्ध्यति, [2]ननु मरुदेवी नाभिकुलकरपत्नी, नाभेश्च पञ्चविंशत्यधिकानि पञ्च धनुःशतानि तनुमानम्, यदेव च तस्य तनुमानं तदेव मरुदेव्या अपि,

△'संघयणं संठाणं उच्चत्तं चेव कुलगरेहिं समं' [आव. नि. १६०] इति वचनात्,

मरुदेवी च भगवती सिद्धा, ततः कथं पञ्चधनुःशतप्रमाणा उत्कृष्टाऽवगाहना घटते ? इति, नैष दोषः, मरुदेवाया नाभेः किञ्चिदूनप्रमाणत्वात्, स्त्रियो ह्युत्तमसंस्थाना उत्तमसंस्थानेभ्यः पुरुषेभ्यः स्वस्व-कालापेक्षया किञ्चिदूनप्रमाणा भवन्ति, ततो मरुदेवाऽपि पञ्चधनुःशतप्रमाणेति न कश्चिद्दोषः, अपि च– हस्तिनः स्कन्धारूढा सङ्कुचिताङ्गी मरुदेवी सिद्धा ततः शरीरसङ्कोचभावान्नाधिकावगाहनासम्भव इत्य-

१ तु जघन्य० मु. ॥ २ तुलना-लो.प्र. (२ । १२८ तः) आव.मलय.टीका पृ. ५४४ B गाथा १७१ ॥
△ संहननं संस्थानं उच्चैस्त्वं चैव कुलकरैः समम् ॥
३ 'अयं च भाष्यकृदभिप्रायः' इति लो. प्र. (२/१३०) । आवश्यकहा.टी. (पृ. ५४४ B) द्रष्टव्या ॥

विरोधः, अथवा यदिदं[1] आगमे पञ्चधनुःशतान्युत्कृष्टं तनुमानमुक्तं तद्बाहुल्यापेक्षया, अन्यथा [2]पञ्चविंशत्यधिकपञ्चधनुःशतप्रमाणा उत्कृष्टाऽवगाहना, सा च मरुदेवीकालवर्तिनामेवावसेया, मरुदेव्या आदेशान्तरेण नाभिकुलकरतुल्यत्वात्, तदुक्तं **सिद्धप्राभृतटीकायाम्**–'मरुदेवीवि आएसंतरेण नाभितुल्ल'त्ति [गाथा-३७ टीका] **सिद्धप्राभृतसूत्रेऽप्युक्तम्**–

△"ओगाहणा जहन्ना रयणीदुगं [3]अह पुणाइ उक्कोसा। पंचेव धणुसयाइं धणुहपुहुत्तेण अहियाइं॥१॥"

एतट्टीकाव्याख्या च "पृथक्त्वशब्दो बहुत्ववाची बहुत्वं चेह पञ्चविंशतिरूपं द्रष्टव्य"मिति ॥४७५॥५०॥

इदानीं-**गिहिलिंग-अन्नलिंग-* सलिंग-सिद्धाण संखा उ**' त्ति एकपञ्चाशत्तमं द्वारमाह–

इह चउरो गिहिलिंगे दसऽन्नलिंगे सयं च अट्ठहियं।
विन्नेयं [4]च सलिंगे समएणं सिज्झमाणाणं ॥४७६॥

'इह चउरो गाहा' 'इह' मनुष्यलोके गृहिलिङ्गे वर्तमाना एकस्मिन् समये उत्कर्षतश्चत्वारः सिद्ध्यन्ति, तथा तापसाद्यन्यलिङ्गे वर्तमाना उत्कर्षत एकसमये दश सिद्ध्यन्ति, तथा शतं चैकमष्टाधिकं विज्ञेयमेकस्मिन्

---

१ द्रष्टव्यम् औपपातिकसूत्रम् (पृ. ११५ B तः)॥ २ 'संग्रहणिवृत्त्यभिप्रायस्त्वयम्' इति लो.प्र. (२।१३०)। तुलना–तत्रोत्कृष्टं पञ्चधनुःशतानि पञ्चविंशत्युत्तराणि। जघन्यमर्धचतुर्थी रत्नयो देशोनाः। इति सर्वार्थसिद्धिः (१०।६)॥ △ अवगाहना जघन्या रत्निद्विकमथ पुनरुत्कृष्टा-पञ्चैव धनुःशतानि धनुष्पृथक्त्वेनाधिकानि ॥१॥ ३ तह-सिद्धप्राभृते, अह-सिद्धप्रा. पाठान्तरम्॥ * °स्सलिंग० मु.॥ ४ तु-ता.॥

समये युगपदुत्कर्षतः 'स्वलिङ्गे' यतिलिङ्गे सिद्धयतामिति ॥४७६॥५१॥

साम्प्रतं **बत्तीसाई सिज्झंत अविरय**'मिति द्विपञ्चाशत्तमं द्वारमाह—

बत्तीसाई सिज्झंति अविरयं जाव अट्ठअहियसयं ।
अट्ठसमएहिं एक्केक्कूणं जावेक्कसमयंमि ॥४७७॥
बत्तीसा अडयाला सट्ठी बावत्तरी य बोद्धव्वा ।
चुलसीई छन्नउई दुरहियमट्ठोत्तरसयं च॥४७८॥[1] [बृहत्संग्रहणी (जिनभद्रगणी-गाथा ३४७)]

[2]**बत्तीसे**'त्यादिगाथाद्वयम्, [3]एकादयो द्वात्रिंशत्पर्यंताः सिद्धयन्तो निरन्तरमष्टौ समयान् यावत् प्राप्यन्ते, अयमत्र परमार्थः-प्रथमे समये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत् सिद्धयन्ति, द्वितीयेऽपि समये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत्, एवं तृतीयेऽपि चतुर्थेऽपि यावदष्टमेऽपि समये जघन्यत एको द्वौ वा सिद्धयतः उत्कर्षतो द्वात्रिंशत् सिद्धयन्ति, परतोऽवश्यमन्तरं समयादिकम्, न कोऽपि सिद्धयतीत्यर्थः, तथा त्रयस्त्रिंशदादयोऽष्टचत्वारिंशत्पर्यन्ता निरन्तरं सिद्धयन्त उत्कर्षतः सप्त समयान् यावत्प्राप्यन्ते, परतो नियमादन्तरं समयादिकम्, तथा एकोनपञ्चाशदादयः षष्टिपर्यन्ता निरन्तरं

---

१ इतोऽग्रे ता. प्रतौ "अट्ठय सत्तय छ पंच चेव चत्तारि तिन्नि दो एक्कं । बत्तीसाइसु समया निरंतरं अंतरं उवरि ॥" इत्यधिका गाथा विद्यते । द्रष्टव्यं लोकप्रकाशे टिप्पनम् [पृ० ११८ संपा. उदयसूरिः] ॥

२ बत्तीसमित्यादि० मु. ॥ ३ तुलना-बृहत्संग्रहणी मलयगिरिवृत्तिः पृ. १३२ तः । स्थानाङ्गसूत्रवृत्तिः पृ. ३४ ॥

सिद्धयन्त उत्कर्षतः षट् समयान् यावत् प्राप्यन्ते, ततः परमवश्यमन्तरम्, तथा एकषष्ट्यादयो द्विसप्ततिपर्यन्ता निरन्तरं सिद्धयन्त उत्कर्षतः पञ्च समयान् यावत्प्राप्यन्ते, ततः ऊर्ध्वं नियमादन्तरम्, तथा त्रिसप्तत्यादयश्चतुरशीतिपर्यन्ता निरन्तरं सिद्धयन्त उत्कर्षतश्चतुरः समयान् यावत्प्राप्यन्ते, परतोऽवश्यमन्तरम्, तथा पञ्चाशीत्यादयः षण्णवतिपर्यन्ता निरन्तरं सिद्धयन्त उत्कर्षतस्त्रीन् समयान् यावदासाद्यन्ते, परतो नियमादन्तरम्, तथा सप्तनवत्यादयो द्व्युत्तरशतपर्यन्ता निरन्तरं सिद्धयन्त उत्कर्षतो द्वौ समयौ यावत्प्राप्यन्ते, परतो नियमादन्तरम्, तथा त्र्युत्तरशतादयोऽष्टोत्तरशतपर्यन्ताः सिद्धयन्तो नियमादेकमेव समयं यावत्प्राप्यन्ते, परतोऽवश्यमन्तरं समयादिकम् इति, * जघन्यतः, उत्कर्षतश्च षण्मासान्तरं षण्मासान् यावत् न कोऽपि सिद्धयतीत्यत्र सर्वत्र भावना * ॥४७८॥ ५२॥

थीवेए पुंवेए नपुंसए सिज्झमाणपरिसंख' त्ति त्रिपञ्चाशत्तमं द्वारं विवरीतुमाह—

वीसित्थीगाउ [2]पुरिसाण अट्ठसयं एगसमयओ सिज्झे ।
दस चेव नपुंसा तह उवरिं समएण पडिसेहो ॥४७९॥
वीस नरकप्पजोइस पंच य भवणवण दस य तिरियाण ।
इत्थीओ पुरिसा पुण दस दस सव्वेऽवि कप्पविणा ॥४८०॥
कप्पट्ठसयं [3]पुढवी आऊ पंकप्पभाउ चत्तारि ।
रयणाइसु तिसु दस दस छ तरूणमणंतरं सिज्झे ॥४८१॥

* * चिह्ननद्वयमध्यवर्ती पाठः जे. नास्ति ॥ १ संखं' इति-मु. ॥ २ पुरिसा-ता. । ३ पुढवी-जे. ॥

'वीसी'त्यादिगाथाः, एकस्मिन् समये उत्कर्षतः स्त्रियो विंशतिः सिद्धयन्ति, तथा पुरुषाणामष्टोत्तरं शतम् एकसमये सिद्धयति, तथा दशैव नपुंसका एकसमयेन सिद्धयन्ति, उक्तसङ्ख्याया उपरि सर्वत्राप्येकसमयेन सिद्धयतां प्रतिषेधः ।

[1]अथास्मिन्नेव द्वारे कस्या गतेरागताः कियन्त उत्कर्षत एकसमयेन सिद्धयन्तीति विशेषतः प्रतिपादयन्नाह-'वीस नरे'त्यादिगाथाद्वयम् , अग्रतः स्थितस्य 'इत्थीउ'त्ति पदस्य सर्वत्राभिसम्बन्धात् मनुष्याणां स्त्रियः स्त्रीत्वादुद्धृत्य अनन्तरभवे मनुष्यगतावागताः सत्यो यद्येकस्मिन् समये सिद्धयन्ति तदा उत्कर्षतो विंशतिरेव, तथा कल्पयोः-सौधर्मेशानयोः स्त्रियः स्वभवादुद्धृता अनन्तरभवे मनुष्यगतिं प्राप्य विंशतिः सिद्धयन्ति, द्वयोरेव कल्पयोः स्त्रिय उत्पद्यन्ते, अतः 'कप्प'त्ति सामान्योक्तावपि सौधर्मेशानयोरित्युक्तम् , एवं ज्योतिष्काणामपि स्त्रियः स्त्रीत्वादुद्धृता विंशतिः सिद्धयन्ति, तथा भवनपतीनाम्-असुरकुमारादीनां दशानामपि निकायानां व्यन्तराणां द्वात्रिंशज्जातीनां च स्त्रियः स्त्रीत्वादुद्धृताः प्रत्येकं पञ्च पञ्च सिद्धयन्ति, तथा पञ्चेन्द्रियतिरश्चां स्त्रियः स्त्रीत्वादुद्धृत्य दशैव सिद्धयन्ति, पुरुषाः पुनः सर्वेऽपि कल्पव्यतिरिक्ता मनुष्य-ज्योतिष्क-भवनपति-व्यन्तर-तिर्यग्गतिलक्षणस्थानपञ्चकसम्बन्धिनः पुरुषत्वादुद्धृत्य अनन्तरं मनुष्यभवमागता एकसमयेनोत्कर्षतः प्रत्येकं दश दश सिद्धयन्ति, इह 'कप्पं विने'त्युक्तम् , ततः कल्पादुद्धृताः कियन्तः सिद्धयन्ति ?, तत्राह-'कप्पाः' कल्पस्था विमानवासिनो देवा अनन्तरभवे पुरुषत्वं प्राप्य एकसमयेनोत्कर्षतोऽष्टोत्तरं शतं सिद्धयन्ति, तथा 'पृथिव्याः' पृथिवीकायिकेभ्योऽप्कायिकेभ्यश्च तथा पङ्क-

१ तथा० सं. ॥

प्रभाया उद्धृताः सन्तः प्रत्येकं चत्वारश्चत्वारः, तथा 'रयणाइसु'त्ति सप्तम्याः पञ्चम्यर्थत्वेन रत्नादिभ्यो-रत्नप्रभा-शर्कराप्रभा-वालुकाप्रभाभ्यस्तिसृभ्यः पृथिवीभ्यः उद्धृताः प्रत्येकं दश दश, धूमप्रभा-दिभ्यस्तु तिसृभ्यः पृथिवीभ्य आगता न सिद्धयन्ति तथास्वाभाव्यात्, तथा 'तरूण' त्ति षष्ठी पञ्चम्यर्थे, ततस्तरुभ्यो-वनस्पतिकायिकेभ्य उद्धृत्य अनन्तरं मनुष्यभवमागता उत्कर्षत एकस्मिन् समये षडेव सिद्धयन्ति, तेजो-वायूनां पुनरनन्तरभवेन मनुष्यत्वस्यैवाप्राप्तेः द्वि-त्रि-चतुरिन्द्रियाणां तु तथाभवस्वा-भाव्यादेवानन्तरभवेन सिद्धयभाव इति, तथा चोक्तं **प्रज्ञापनायाम्**—

"अणंतरागया णं भंते ? नेरइया एगसमएणं केवइया अंतकिरियं पकरिंति ?, गोयमा ! जहन्नेणं एगो वा दो वा तिन्नि वा उक्कोसेणं दस, रयणप्पभापुढविनेरइयावि एवं चेव जाव वालुयप्प-भापुढवीनेरइया, पंकप्पभापुढवीनेरइया उक्कोसेणं चत्तारि, असुरकुमारा दस, असुरकुमारीओ पञ्च, एवं जहा असुरकुमारा सदेवीया तहा जाव थणियकुमारा, पुढवीकाइया चत्तारि, एवं आउकाइयावि, वणस्स-इकाइया छ, पंचिंदियतिरिक्खजोणिया दस, पंचिंदियतिरिक्खजोणिणीओवि दस, मणुस्सा दस, मणुस्सीओ वीसं, वाणमंतरा दस, वाणमंतरीओ पञ्च, जोइसिया दस, जोइसिणीओ वीसं, वेमाणिया अट्ठसयं, वेमाणिणीओ वीसं" [तुलना—प्रज्ञापना पद २०-सू.३] इति, **सिद्धप्राभृते** च देवगतेरन्यत्र गतित्रयेऽपि दशेत्युक्तम् ।

'सेसाण गईण दस दसगं' [गाथा ४८] ति वचनात्, तत्त्वं तु श्रुतविदो विदन्ति, इह च पुंवेदेभ्यो देवादिभ्योऽनन्तरोद्धृता जीवाः केचित्पुरुषाः जायन्ते, केचित् स्त्रियः, केचिन्नपुंसकाः, एवं स्त्रीवेदेभ्योऽपि देवीप्रभृतिभ्य उद्धृतानां भङ्गत्रयम्, एवं नपुंसकेभ्योऽपि नारकादिभ्यो भङ्गत्रयम्, सर्वसंख्यया भङ्गा नव,

तत्र ये पुंवेदभ्य उद्धृत्य पुरुषा भूत्वा सिद्धयन्ति तेषामेवैकस्मिन् समयेऽष्टोत्तरं शतं सिद्धयति, शेषेषु पुनरष्टसु भङ्गकेषु प्रत्येकं दश दशैव, इदमुक्तं भवति–देवेभ्य आगताः पुरुषा भूत्वा एकसमयेनाष्टोत्तरं शतं सिद्धयन्ति, स्त्रियो नपुंसकाश्च भूत्वा प्रत्येकं दशैव, देवीभ्यश्चागताः पुरुषा अपि भूत्वा दशैव, एवं स्त्रियो नपुंसकाश्च, यत्तु वैमानिकदेवीभ्यो ज्योतिष्कदेवीभ्यो मानुषीभ्यश्चागता विंशतिः सिद्धयन्तीत्युक्तं तत्र पुं-स्त्री-नपुंसकात् द्विकसंयोगतस्त्रिकसंयोगतो वा मिलिताः सन्तो विंशतिः सिद्धयन्ति, न पुनः केवलाः पुरुषाः स्त्रियो नपुंसका वा, यदपि विंशतिः स्त्रिय एकसमयेन सिद्धयन्तीत्युक्तं तत्रापि काश्चित्पुरुषेभ्यः काश्चित् स्त्रीभ्यः काश्चिन्नपुंसकेभ्य आगताः सत्यो मिलिताः विंशतिः सिद्धयन्ति, न पुनः केवलेभ्यः पुरुषेभ्यः केवलाभ्यः स्त्रीभ्यः केवलेभ्यश्च नपुंसकेभ्यः, एवमनया दिशा सर्वेऽपि भङ्गा भावनीयाः, तदुक्तं सिद्धप्राभृतसूत्रे–

—"सेसा उ अट्ठ भंगा दसगं दसगं तु होइ [1]इक्केको ॥" [गाथा ५०] इति,

अपरश्चात्र विशेषो [2]दृश्यते, यथा नन्दनवने चत्वार एकसमये सिद्धयन्ति, 'नंदनवणे चत्तारि' [तुलना-सिद्धप्रा. गाथा ४५ टीका] इति सिद्धप्राभृतटीकावचनात् , एकतरस्मिन् विजये विंशतिः,'वीसा एगयरे विजये' [सिद्धप्रा. गाथा ४३ टीका] इति वचनात् , संहरणतः पुनः कर्मभूम्यकर्मभूमि-कूटशैलादिषु सर्वेष्वपि स्थानेष्वेकसमयेनोत्कर्षतो दश दश, पण्डकवने तु संहरणतो द्वौ, पञ्चदशस्वपि कर्मभूमिषु प्रत्येकं जन्मतोऽष्टोत्तरं शतम् , यदुक्तं सिद्धप्राभृतसूत्रे—

१ इक्केकं-इति सिद्ध प्राभृत सूत्रे पाठः ॥ २ दर्श्यते- मु- ॥

"[1]संकामणाए दसगं दो चेव हवन्ति पंडगवणंमि । समएण य अट्ठसयं पन्नरससु कम्मभूमीसु ॥ १ ॥" [गाथा ४५] तथोत्सर्पिण्यामवसर्पिण्यां च प्रत्येकं तृतीये चतुर्थे चारकेऽष्टशतम् , अवसर्पिण्यां पञ्चमारके विंशतिः, शेषेष्वरकेषु प्रत्येकमुत्सर्पिण्यामवसर्पिण्यां च संहरणतो दश, उक्तं च **सिद्धप्राभृतसूत्रे**–

"ओसप्पिणिउस्सप्पिणि तइयचउत्थयसमासु अट्ठसयं । पञ्चमियाए वीसं दसगं दसगं तु सेसासु ॥१॥" [गाथा ४६] तत्र पञ्चम्यां समायामवसर्पिण्याः सम्बन्धिन्यां नोत्सर्पिण्याः, तत्र तीर्थाभावादिति ॥४७९-४८१॥५३॥

इदानीं **'सिद्धाणं संठाणं'**ति चतुष्पञ्चाशत्तमं द्वारमाह–

दीहं वा [2]हस्सं वा जं संठाणं तु आसि पुव्वभवे ।
तत्तो तिभागहीणा सिद्धाणोगाहणा भणिया ॥४८२॥ [तु.आव.नि. १७०]
जं संठाणं तु इहं भवं चयंतस्स चरिमसमयंमि ।
आसीय पएसघणं तं संठाणं तहिं तस्स ॥४८३॥
[3]उत्ताणओ य पासिल्लओ य ठियओ निसन्नओ चेव ।
जो जह करेइ कालं सो तह उववज्जए सन्तो ॥४८४॥ [आव.नि. ९६९, ९६७]

'दीहे' त्यादिगाथात्रयम् , दीर्घं वा–पञ्चधनुःशतप्रमाणं ह्रस्वं वा हस्तद्वयप्रमाणं वाशब्दान्मध्यमं वा विचित्रम् , यच्चरमभवे आसीत् संस्थानं ततः–तस्मात्संस्थानात् त्रिभागहीना–वदनोदरादिरन्ध्रपूरणात्

१ संकम० मु. ॥ २ ह्रस्सं मु. ॥ ३ उत्ताणउव्व पासिल्लउव्व अहवा नि० इति आव नि पाठः ॥

तृतीयेन भागेन हीना सिद्धानामवगाहना, अवगाहन्ते अस्यामित्यवगाहना—स्वावस्थैव भणिता तीर्थकर-गणधरैरिति, भगवतसंस्थानप्रमाणापेक्षया त्रिभागहीनं तत्र संस्थानप्रमाणमिति भावः ॥ ४८२ ॥

एतदेव स्पष्टतरमुपदर्शयति—'यत्संस्थानम्' यावत्प्रमाणं संस्थानम् 'इह' मनुष्यभवे आसीत् तदेव 'भवं' भवन्ति प्राणिनः कर्मवशवर्तिनोऽस्मिन्निति भवं—शरीरं संसारं वा त्यजतः काययोगं परिजिहान-स्येति भावः, चरमसमये सूक्ष्मक्रियाऽप्रतिपातिध्यानबलेन वदनोदरादिरन्ध्रपूरणात् त्रिभागहीनं प्रदेशघनम् आसीत् तदेव प्रदेशघनं मूलप्रमाणापेक्षया त्रिभागहीनं प्रमाणं संस्थानं 'तत्र' लोकाग्रे 'तस्य' सिद्धस्य नान्यदिति ॥४८३॥

तस्य च किमेकेनैवाकारेणावस्थानमुतान्यथाऽपीत्याह-उत्तान एव उत्तानकः पृष्ठतोऽधोवनता-दिस्थानतः, [1]पार्श्वस्थितो वा—तिर्यग्व्यवस्थितः, स्थितः—ऊर्ध्वस्थानतः, निषण्णश्चैव-उपविष्टः, किंबहुना ? यो यथा' येन प्रकारेणावस्थितः सन् कालं करोति स 'तथा'तेन प्रकारेणोपपद्यते सिद्ध इति ॥४८४॥ ५४॥

इदानीं 'अवट्ठिइट्ठाणं' च सिद्धाणं इति पञ्चपञ्चाशत्तमं द्वारमाह—

ईसिप्पब्भाराए उवरिं खलु जोयणस्स जो कोसो ।
कोसस्स य छब्भाए सिद्धाणोगाहणा भणिया ॥४८५॥ [तु.आव.नि.९६५]
अलोए पडिहया सिद्धा, लोयग्गे य पइट्ठिया ।
[2]इहं बोंदिं चइत्ताणं, तत्थ गंतूण [3]सिज्झइ ॥४८६॥ [औपपातिक सू.४४।२,आव.नि.९५९]

१ °हीनप्र० मु. ॥ २ पार्श्वतो-मु.तुलना-आव.हा. टी. (पृ ४४३B) ॥३ इह-मु० । इहं-आ.नि- ॥ ४ °सिज्झई-आ.नि. ॥

'ईसी'त्यादि गाथाद्वयम्, इह सर्वार्थसिद्धविमानाद्ऊर्ध्वं द्वादशभिर्योजनैः पञ्चचत्वारिंशद्योजनलक्षविष्कम्भा वृत्तत्वादायामतोऽप्येतावन्माना बहुमध्यदेशभागे च आयाम-विष्कम्भाभ्यामष्टयोजनप्रमाणे क्षेत्रेऽष्टयोजनबाहल्या तदनन्तरं सर्वासु [1]दिक्षु च विदिक्षु च प्रदेशहान्या परिहीयमाना परिहीयमाना सर्वेषु चरमान्तेषु मक्षिकापत्रादपि प्रतनुतरत्वादङ्गुलासङ्ख्येयभागमात्रबाहल्या सर्वश्वेतसुवर्णमयी स्फटिकनिर्मला उत्तानच्छत्रसंस्थिता घृतभृततथाविधकरोटिकाकारा च ईषत्प्राग्भारा नाम सिद्धशिला भवति, स्थापना चेयम्-◡, सर्वार्थाद् द्वादशभिर्योजनैर्लोकान्त इत्यन्ये, तस्याश्चेषत्प्राग्भाराया उपरि योजने गते लोकान्तो भवति, तस्य च योजनस्य य उपरितनक्रोशः—चतुर्थं गव्यूतम्, तस्य च क्रोशस्य सर्वोपरितने षष्ठे भागे—त्रयस्त्रिंशदधिकानि त्रीणि धनुःशतानि धनुस्त्रिभागश्चेत्येवंरूपे सिद्धानामवगाहना—अवस्थितिर्भणिता, एतावत्या एवोत्कर्षतः सिद्धावगाहनाया भावात्, यदुक्तम्—

तिन्नि सया तेत्तीसा धणुत्तिभागो य कोस छब्भाओ। जं परमोगाहोऽयं तो ते कोसस्स [2]छब्भागे ॥१॥ [आव.नि.९६६] ॥४८५॥

तथा [3]"अलोए' इह सप्तमी तृतीयार्थे अलोकेन—केवलाकाशास्तिकायरूपेण 'प्रतिहताः' स्खलिताः सिद्धाः, इह च तत्र [4]धर्मास्तिकायाद्यभावात्तदानन्तर्यवृत्तिरेव प्रतिस्खलनम्, न तु सम्बन्धे सति

१ दिक्षु वि॰-मु॰ ॥ २ छब्भागो-इति श्रीचन्द्रमहर्षिप्रणीते सङ्ग्रहणीसूत्रे (गाथा २८२)। छब्भाए-आ.नि. ॥ ३ अलोके इति श्लोकः सप्तमी०-सं.॥ ४ तुलना-आवश्यक.हा.टी.पृ. (४४२B), आवश्यक.मलय. टी. ४४२B॥

विघातोऽप्रतिघातत्वात्[1], सप्रतिघातानां हि सम्बन्धे सति विघातो नान्येषाम् इति, तथा 'लोकस्य' पञ्चास्तिकायात्मकस्याग्रे–मूर्धनि 'प्रतिष्ठिताः' अपुनरागत्या व्यवस्थिताः, तथा 'इह' मनुष्यक्षेत्रे 'बोन्दिं' तनुं त्यक्त्वा 'तत्र' लोकाग्रे समयान्तरप्रदेशान्तरास्पर्शनेन गत्वा 'सिद्ध्यन्ति' निष्ठितार्था भवन्ति, अत्रानुस्वारलोपो द्रष्टव्यः, अथवा एकवचनतोऽप्येवमुपन्यासः सूत्रशैल्या अविरुद्ध एव, तथा चान्यत्रापि दृश्यते–

'वत्थगंधमलंकारं, इत्थिओ सयणाणि य । अच्छंदा जे न भुंजंति, न से चाइत्ति वुच्चइ ॥१॥" [दशवै. २।२] ॥४८६॥५५॥

सम्प्रति 'अवगाहणा य तेसिं उक्कोस'त्ति षट्पञ्चाशत्तमं द्वारमाह–

तिण्णि सया तेत्तीसा धणुत्तिभागो य होइ बोद्धव्वो ।
एसा खलु सिद्धाणं उक्कोसोगाहणा भणिया ॥४८७॥ [आव.नि. ९७१]

'तिन्निसया' इत्यादि, धनुषां त्रीणि शतानि त्रयस्त्रिंशदधिकानि धनुषस्तृतीयभागश्च भवति बोद्धव्यः, एषा खलु सिद्धानामुत्कृष्टाऽवगाहना भणिता। इयमत्र भावना–सिद्धगमनयोग्योत्कृष्टावगाहनायाः पञ्चधनुःशतरूपायास्तृतीयो भागः षट्पष्ट्यधिकं धनुःशतं चतुःषष्टिश्चाङ्गुलानि, स च सिद्धिगमनकाले वदनोदरादिविवरपूरणेन सङ्कोचित इति धनुःशतपञ्चकात्पात्यते, ततः शेषमुत्कृष्टा सिद्धावगाहनेति, यत्पुनः

१ त्वात् सप्रतिघातत्वात् सप्रति० सं० ॥

पञ्चविंशत्यधिकपञ्चधनुःशतप्रमाणमुत्कृष्टमवगाहनामानं सिद्धिगमनयोग्यानां मरुदेवीप्रभृतीनां क्वापि श्रूयते तदादेशान्तरेण ज्ञातव्यम् ॥ ४८७ ॥ ५६ ॥

इदानीं 'मज्झिमसिद्धोगाहण' सि सप्तपञ्चाशत्तमं द्वारमाह—

चत्तारि य रयणीओ रयणि तिभागूणिया य बोद्धव्वा ।
एसा खलु सिद्धाणं मज्झिमओगाहणा भणिया ॥४८८॥ [आव. नि. ९७२]

'चत्तारि य' गाहा, चतस्रो रत्नयो-हस्ता रत्निश्च त्रिभागोना बोद्धव्या,एषा खलु सिद्धानां मध्यमावगाहना भणिता, श्रीमहावीरस्य हि भगवतः सप्त हस्ताः शरीरमानम् , ततः सिद्धावस्थायां शुषिरपूरणायाऽङ्गुलाष्टकाधिकहस्तद्वयरूपे त्रिभागे सङ्घुत्सारिते शेषं चत्वारो हस्ताः षोडश चाङ्गुलानि मध्यमावगाहनेति, उपलक्षणं चैतत् , तत उत्कृष्टायाः सिद्धावगाहनाया अधो जघन्यायाश्चोपरि सर्वापि मध्यमावगाहना भवतीत्यवगन्तव्यम् , [1]आह—जघन्यपदे सप्तहस्तोच्छ्रितानामागमे सिद्धिरुक्ता तत एषा जघन्या प्राप्नोति कथं मध्यमा ?, तदयुक्तम्, वस्तुतत्त्वापरिज्ञानात् , जघन्यपदे हि तीर्थकरापेक्षया [2]सप्तहस्तोच्छ्रितानां सिद्धरुक्ता, सामान्यकेवलिनां तु हीनप्रमाणानामपि भवति, इदमपि चावगाहनामानं चिन्त्यते सामान्यसिद्धापेक्षया, ततो न कश्चिद्दोषः ॥४८८॥५७॥

१ तुलना—औपपातिकसूत्रवृत्तिः पृ. २१७ ॥ २ सप्तहस्तानां- खं. ॥

इदानीं 'जहन्न सिद्धोगाहण'त्यष्टपञ्चाशत्तमं द्वारमाह-

एगा य होइ रयणी अट्ठेव य [1]अंगुलाइ साहीया ।
एसा खलु सिद्धाणं जहण्णओगाहणा भणिया ॥४८९॥[आव.नि.९७३]

'एगा य' गाहा [2]एका च भवति रत्निः परिपूर्णा अष्टौ चाङ्गुलान्यधिकानि एषा खलु सिद्धानां जघन्यावगाहना भणिता तीर्थकरगणधरैः, सिद्धिगमनयोग्यानां हि जघन्या अवगाहना हस्तद्वयप्रमाणा, ततः शुषिरपूरणाय षोडशाङ्गुलल्क्षणे त्रिभागे पातिते सति अङ्गुलाष्टकाधिक एको हस्तो जघन्यावगाहना भवति, एषा च [3]कूर्मापुत्रादीनां द्विहस्तानामवसेया, [4]यदि वा सप्तहस्तोच्छ्रितानामपि यन्त्रपीलनादिना संवर्तितशरीराणामिति ॥४८९॥५८॥

इदानीं 'सासयजिणपडिमानामाइं' त्येकोनषष्टं द्वारमामन्त्रणपूर्वमाशिषा प्राह-

सिरि उसहसेणपहु १ वारिसेण २ सिरिवद्धमाणजिणनाह ३ ।
चंदाणणजिण ४ सव्वेवि भवहरा होह मह तुब्भे ॥४९०॥

'सिरिउसभे'त्यादि श्रीवृषभसेनप्रभो ! वारिषेण ! श्रीवर्धमानजिननाथ ! चन्द्राननजिन ! सर्वेऽपि यूयं 'भवहराः' संसारनिर्नाशका [5]भवत ममेति ॥४९०॥५९॥

---

१ अंगुलाइं-ता. पो. ॥ २ तुलनार्थं विशेषार्थं द्रष्टव्या आवश्यकसूत्रस्य मलयगिरिसूरिकृता टीका पृ. २४५ ॥
३ कूर्मपुत्रा० मु. ॥ ४ यद्वा-मु. ॥ ५ भवंत-सं. ॥

सम्प्रति [1]'जिणकप्पिओवगरणसंख' त्ति पतितमं द्वारमाह-

[2]पत्तं पत्ताबंधो पायट्ठवणं च पायकेसरिया ।
पडलाइं रयत्ताणं च गुच्छओ पायनिज्जोगो ॥४९१॥
तिन्नेव य पच्छागा रयहरणं चेव होइ मुहपोत्ती ।
एसो दुवालसविहो उवही जिणकप्पियाणं तु ॥४९२॥ [ओघनि. ६६८-६६९]
जिणकप्पियावि दुविहा पाणीपाया पडिग्गहधरा य ।
पाउरणमपाउरणा एक्केक्का ते भवे दुविहा ॥४९३॥
[3]दुग १ तिग २ चउक्क ३ पणगं ४ नव ५ दस ६ एक्कारसेव ७ बारसगं ८
एए अट्ठ विगप्पा जिणकप्पे हुंति उवहिस्स ॥४९४॥
[तुलना – निशीथभाष्य १३९०-१, पञ्चवस्तु ७७५]
पुत्तो रयहरणेहिं दुविहो तिविहो य एक्ककप्पजुओ ।
चउहा [4]कप्पदुगेणं कप्पतिगेणं तु पंचविहो ॥४९५॥
दुविहो तिविहो चउहा पंचविहोऽवि हु सपायनिज्जोगो ।
जायइ नवहा दसहा एक्कारसहा दुवालसहा ॥४९६॥

१ जिनकल्पिकोपकरण० मु. ॥ २ एतद्(४९१-४९२) गाथाद्वयं बृ. क. भाष्ये ३९६२-३ क्रमाङ्केन, क्रमाङ्केनाऽपि उपलभ्यते ॥ ३ त्रिक तिअ-इति पंचवस्तुके पाठः(७७५) ॥ ४ कप्पदुएणं-मु. । कप्पजुएणं-जे. ।

अहवा दुगं च नवगं उवगरणे हुंति दुन्नि उ विगप्पा ।
पाउरणवज्जियाणं विसुद्धजिणकप्पियाणं तु ॥४९७॥ [निशीथ भा.१३९२]
तवेण [1]सुत्तेण सत्तेण एगत्तेण बलेण य ।
तुलणा पंचहा वुत्ता, जिणकप्पं पडिवज्जओ ॥४९८॥ [बृ. क. भा. १३२८]

'पत्तं पत्ताबंधो इत्यादि [2]गाथाष्टकम्, [3]उपक्रियते व्रती अनेनेत्युपकरणम्–उपधिरित्यर्थः, स चोपधिर्द्विधा-औधिक औपग्रहिकश्च, ओघः-प्रवाहः सामान्यमितियावत् तत्र भव औधिको नित्यमेव यो गृह्यते इत्यर्थः, [4]उप–आत्मनः समीपे संयमोपष्टम्भार्थं वस्तुनो ग्रहणमुपग्रहः स प्रयोजनमस्येत्यौपग्रहिकः, कारणे आपन्ने संयमयात्रार्थं [5]यो गृह्यते न पुनर्नित्यमेव स औपग्रहिक इत्यर्थः, तत्र औधिक उपधिर्द्विविधो–गणनाप्रमाणेन प्रमाणप्रमाणेन च, तत्र गणनाप्रमाणमेकद्वित्र्यादिरूपम्, प्रमाणप्रमाणं तु दीर्घपृथुत्वादिरूपम्, एवमौपग्रहिकोपधेरपि भेदद्वयं भणनीयम्, तत्र औधिकोपधिर्गणनाप्रमाणतो जिनकल्पिकानामिह प्रतिपाद्यते, तत्र पात्रं–पतद्ग्रहः १, पात्रबन्धो येन पात्रं धार्यते वस्त्रखण्डेन चतुरस्रेण २, पात्रकस्थापनं कम्बलमयं यत्र पात्रकाणि स्थाप्यन्ते ३, पात्रकेसरिका–पात्रप्रत्युपेक्षणिका या [6]चिलिमिलिकेति प्रसिद्धा ४, पटलानि यानि भिक्षां भ्रमद्भिः पात्रोपरि दीयन्ते ५, रजस्त्राणानि–

१ 'सत्तेण सुत्तेण'-इति बृ क भाष्ये(गाथा १३२८) अत्रैव च ५४० समगाथाटीकायां पाठः॥ २ ०गाथाद्वयं-सं. ॥ ३ तुलना-ओघनि. टीका पृ. २०८ तः,बृ. क.टी. पृ. १०८७, पञ्चवस्तुटीका पृ. १२० , धर्मसङ्ग्रह टीका पृ. ६३ ॥ ४ उपः-आत्मनः-मु० ॥ ५ योपगृह्यते-जे. ॥ ६ चिलिमिलिका जवनिकार्थे प्रसिद्धा, पात्रप्रत्युपेक्षणिकार्थे न दृश्यते ।

पात्रवेष्टनकानि ६, प्राकृतत्वाच्च सूत्रे एकवचननिर्देशः गोच्छकः-कम्बलखण्डमयो यः पात्रकोपरि दीयते ७, अयं सप्तविधः पात्रनिर्योगः, पात्रपरिकर इत्यर्थः ॥४९१॥

तथा त्रय एव प्रच्छादकाः-प्रावरणरूपाः कल्पा इत्यर्थः, द्वौ सूत्रमयावेक ऊर्णामयो ३, रजोहरणं ४ चैव भवति मुखपोतिका ५, एष उत्कर्षतो द्वादशविध [1]उपधिर्जिनकल्पिकानां भवति ॥४९२॥

ननु जिनकल्पिका एकस्वरूपा एव भवन्त्याहोश्चित्पृथक्स्वरूपा अपीत्याह-'जिणकप्पिका' इत्यादि, जिनानां कल्पः आचारो जिनकल्पः स विद्यते येषां ते ◁'अत इनिठना'विति (पा०५-२-११५) ठनि ▷ जिनकल्पिकाः, अपिः पुनरर्थो, जिनकल्पिकाः पुनर्द्विविधा-द्विभेदाः, तावेव भेदावाह-पाणी एव पात्रं येषां ते पाणिपात्राः-पाणिपात्रभोजिन एके, पतद्ग्रहधराः-पतद्ग्रहभोजिनो द्वितीयाः, ते पुनरेकैके द्विभेदा भवेयुः-सप्रावरणा अप्रावरणाश्च, अत्र च सूत्रे प्राकृतत्वात्सलोपो द्रष्टव्यः ॥४९३॥

ननु जिनकल्पिकानां द्वादशविध उपधिरभिदधे स किं सर्वेषामेकविध एव भवति ?, नेत्याह-'दुगतीगे'त्यादि, द्विकं [2]त्रिकं चतुष्कं पञ्चकं नवकं दशकं एकादशकं द्वादशकमित्येतेऽष्टौ विकल्पा जिनकल्पे भवन्त्युपधेरिति ॥४९४॥

१ "एकग्रहणे तज्जातीयानां सर्वेषां ग्रहणम्" इति न्यायात् अन्येऽपि ये गच्छनिर्गतास्तेषां यथायोगमिदमेवोपकरणमवसातव्यम्।" इति बृ. क. टी. (पृ-१०८७) ॥ ◁▷ चिह्नद्वयमध्यवर्ती पाठः सं. नास्ति ॥ २ तृकं-जे. ॥

तानेवव्याचष्टे–'पुग्गीरयहरणेहिं'इत्यादिगाथाद्वयम्, मुखपोतिका-रजोहरणाभ्यां द्विविधः, कोऽर्थः ?–मुखपोतिका-रजोहरणलक्षणमुपकरणद्वयमेव पाणिपात्राः प्रावरणवर्जिता जिनकल्पिका धारयन्ति, तथा तेषामेव सप्रावरणानामेकेन कल्पेन युक्तः सन् पूर्वोक्त उपधिस्त्रिविधो भवति, तथा स एव मुखवस्त्रिका-रजोहरणरूप उपधिः कल्पद्वयेन सहितश्चतुर्विधः, कल्पत्रयेण संयुक्तः पुनः पञ्चविधो भवति, तथा पूर्वोक्त एव द्विविधस्त्रिविधश्चतुर्विधः पञ्चविधश्च उपधिः सप्तविधपात्रनिर्योगसहितः सन् यथाक्रमं नवविधो दशविध एकादशविधो द्वादशविधश्चजायते, तत्र रजोहरण-मुखपोतिका सप्तविधपात्रनिर्योगसहितो नवविध उपधिः पात्रभोजिनामप्रावरणानां ज्ञेयः, शेषस्तु दशविध एकादशविधो द्वादशविधश्च सप्रावरणानां पात्रभोजिनामिति ॥४९५-४९६॥

अथ सूत्रकृदेवाप्रावरणानामुपकरणसङ्ख्यामाह– [1]'अहवे' त्यादि, पूर्वं सामान्यतो जिनकल्पिकोपधेरष्टौ भेदाः प्रतिपादिताः, अथवा द्विकं नवकं चेति द्वावेव भेदौ, तत्र द्विकं रजोहरणमुखपोतिकारूपं नवकं तु रजोहरणमुखपोतिकासप्तविधपात्रनिर्योगलक्षणम्, इह च ये प्रावरणवर्जितास्ते स्वल्पोपधित्वेन विशुद्धजिनकल्पिका भण्यन्ते, तेषामेवेदं द्विकनवकलक्षणं भेदद्वयम्, अविशुद्धजिनकल्पिकानां तु पूर्वोक्ता एव भेदा इति ॥४९७॥

जिनकल्पप्रतिपत्तिश्च परिकर्मणापूर्विकैव भवति अतः पूर्वं परिकर्मणाप्रतिपादनार्थमाह–'तवेणो' त्यादि, तोल्यते–परीक्ष्यते आत्मा यया सा तुलना–परिकर्मणा आत्मनो जिनकल्पाङ्गीकरणं प्रति परीक्षण-

१ 'अहवा' गाहा पूर्व-सं. ॥

मित्यर्थः, सा पञ्चधा–पञ्चभेदा उक्ता जिनकल्पं प्रतिपद्यमानस्य, कथमिति तत्राह–'तपसा' चतुर्थादिषण्मासान्ततपोऽभ्यासेनात्मानं भावयति, यद्येतावत्तपः कुर्वाणः प्रथममेव न बाध्यते तदा जिनकल्पं प्रतिपद्यते, नान्यथेति भावः १, 'सूत्रेण' नवपूर्वादिलक्षणेन जिनकल्पोचितेन तथाऽभ्यासं करोति यथा पश्चानुपूर्व्यादिक्रमेण तत्परावर्तयितुं शक्नोति २, 'सत्त्वेन' मानसिकावष्टम्भलक्षणेनात्मानं तथा तोलयति यथा शून्यगृह-चत्वर-श्मशानादिस्थानेषु भयजनकेषु कायोत्सर्गादिकरणसमये निसर्गनिर्मलदुर्गोपसर्गपरीषहादिभिरक्षोभ्यो भवति ३, एकत्वेनात्मानं भावयति, एकाकयेव पर्यटन् यदि [1]विस्रोतसिकादिभिः न बाध्यते तदा जिनकल्पं प्रतिपद्यते, नान्यथेति ४, 'बलेन' एकाङ्गुष्ठाद्यवष्टम्भतश्चिरस्थायित्वादिरूपेण शारीरेण धृतिरूपेण च मानसेनावष्टम्भेनात्मानं परीक्षयतीति ५, एतैः पञ्चभिः प्रकारैस्तुलनां विधाय पश्चाज्जिनकल्पप्रतिपत्तिः करणीयेति ॥४९८॥

इदानीं 'थविरकप्पोवगरणाइ'ति एकषष्टितमं द्वारमाह—

[2]एए चेव दुवालस मत्तग अइरेग चोलपट्टो उ ।
एसो चउदसरूवो उवही पुण थेरकप्पंमि ॥४९९॥

१ 'विस्रोतसिका' तत्प्रसवदर्शनस्मरणापध्यानकुचवरनिरोधतः ज्ञानश्रद्धाबलोज्झनेन संयमस(श)स्यशोषकल्पा चित्तविप्लुतेति सूत्रार्थः ॥९॥ दशवै हा. टी. ५–१ ॥

२ एतद् गाथापञ्चकम् (४९९-५०३) पञ्चवस्तुके ७७९, ७९२, ७९८, ७९९, ८०६ क्रमाङ्केन, गाथाद्वयम् (४९९-५००) बृहत्कल्पसूत्रे ३९६४, ४०१३ क्रमाङ्केन उपलभ्यते । तुलना-बृ.क. भा. ३९६४, ४०१३, ३९७१, ३९८२ ॥

तिण्णि विहत्थी चउरंगुलं च भाणस्स मज्झिमपमाणं ।
एत्तो हीण जहन्नं अइरेगयरं तु उक्कोसं ॥५००॥
[1]पत्ताबंधपमाणं भाणपमाणेण होइ कायव्वं ।
जह गंठिमि कयंमि ३ कोणा चउरंगुला हुंति ॥५०१॥
पत्तगठवणं तह गुच्छगो य पायपडिलेहणी चेव ।
तिण्हंपि उ प्पमाणं विहत्थी चउरंगुलं चेव ॥५०२॥
अड्ढाइज्जा हत्था दीहा छत्तीसअंगुले रुंदा ।
बीयं पडिग्गहाओ ससरोराओ य निप्फण्णं ॥८॥५०३॥
[तुलना-ओघनि. ६७०-६८०-६९३-६९४-७०१]
[2]कयलीगब्भदलसमा पडला उक्किट्ठमज्झिमजहण्णा ।
गिम्हे हेमंतंमि य वासासु य पाणरक्खट्ठा ॥५०४॥
तिण्णि चउ पंच गिम्हे चउरो पंचच्छगं च हेमंते ।
पंच च्छ सत्त वासासु होंति घणमसिणरूवा ते ॥५०५॥

१ तुलना-बृ.क. भा. ४६७१ ॥ २ तुलना-बृहत्कल्पसूत्रम् गाथा ३९७३तः, पञ्चवस्तुकः गाथा ८०२ तः ॥

[1]माणं तु [2]रयत्ताणे भाणपमाणेण होइ निप्फन्नं ।
पायाहिणं करंतं मज्झे चउरंगुलं कमइ ॥५०६॥
कप्पा आयपमाणा अड्ढाइज्जा य [3]वित्थडा हत्था ।
दो चेव सुत्तियाओ [4]उण्णिय तइओ मुणेयव्वो ॥५०७॥
बत्तीसंगुलदीहं [5]चउवीसं अंगुलाइं दंडो से ।
अट्ठंगुला दसाओ एगयरं होणमहियं वा ॥५०८॥
[6]चउरंगुलं विहत्थी एयं मुहणंतगस्स उ पमाणं ।
चोओऽवि य आएसो मुहप्पमाणेण निप्फण्णं ॥५०९॥
जो मागहओ पत्थो सविसेसयरं तु मत्तगपमाणं ।
दोसुवि दव्वग्गहणं वासावासे य अहिगारो ॥५१०॥
सूवोयणस्स भरियं [7]दुगाउ अद्धाणमागओ साहू ।
भुंजइ एगट्ठाणे एय किर मत्तगपमाणं ॥५११॥
दुगुणो चउग्गुणो वा हत्थो चउरस्स चोलपट्टो उ ।

१ एतद् गाथा सप्तकम् (५०६-५१२) पञ्चवस्तुके ८०८, ८१२, ८१४, ८१६, ८१८, ८१९, ८२१ क्रमाङ्केषु स्वल्प-पाठभेदेन उपलभ्यते ॥ २ रयणत्ताणे-मु. ॥ ३ वित्थरा-जे. ॥ ४ उण्णिओय-जे. । उन्निओ अ-इति पंचवस्तु ८१२ ॥ ५ चउवीसंगुला दंडो सो-सं.॥ ६ तुलना-बृ.क.भा.३६८२॥ ७ दुगाउमद्धा० जे. ॥

थेर-जुवाणाणट्ठा सण्हे थुल्लंमि य विभासा ॥५१२॥
[1]संथारुत्तरपट्टो अट्ठाइज्जा य आयया हत्था ।
दोण्हंपि य वित्थारो हत्थो चउरंगुलं चेव ॥५१३॥
[2]आयाणे [3]निक्खिवणे ठाणे निसियण-तुयट्ट-संकोए ।
पुव्विं पमज्जणट्ठा लिंगट्ठा चेव रयहरणं ॥५१४॥
संपाइमरयरेणू पमज्जणट्ठा वयंति मुहपोत्तिं ।
नासं मुहं च बंधइ तीए वसहिं पमज्जंतो ॥५१५॥
छक्कायरक्खणट्ठा पायग्गहणं जिणेहिं पन्नत्तं ।
जे य गुणा संभोगे हवंति ते पायगहणेऽवि ॥५१६॥
तणगहणानलसेवानिवारणा धम्मसुक्कझाणट्ठा ।
दिट्ठं कप्पग्गहणं निक्खमणमरणट्ठया चेव ॥५१७॥
वेउव्वऽवाउडे वाइए य ही खद्धपजणणे चेव ।
तेसिं अणुग्गहट्ठा लिंगुदयट्ठा य पट्टो य ॥५१८॥ [तुलना-ओघनिर्युक्तिः ७०३ ७०५, ७०८, ७११, ७१३, ७१४, ७२१, ७२३, ७१०, ७१२, ६९१, ७०६, ७२२]

१ तुलना-बृ.क.भा.३६८० ॥ २ एतद् गाथापञ्चकम् (५१४-५१८) पञ्चवस्तुके ८१५,८१७, ८१०, ८१३, ८२२ क्रमाङ्केषु, स्वल्पपाठभेदेन विद्यते ॥ ३ निक्खमणे-मु-॥ निक्खेवे ठाण० इति पञ्चवस्तुके ८१५, ओघनिर्युक्तौ च पाठः ॥

'एए' इत्यादि [1]गाथा विंशतिः, एत एव-अनन्तरोदिता जिनकल्पिकसम्बन्धिनः पात्रकाद्या मुखवस्त्रिकापर्यन्ता द्वादश उपधिभेदाः, अतिरिक्तं च मात्रकं चोलपट्टकश्च, एष चतुर्दशविध उपधिः पुनः 'स्थविरकल्पे' स्थविरकल्पविषये भवति गणनाप्रमाणेनेति ॥४९९॥

इदानीं पात्रकस्य प्रमाणमाह-'**तिन्नी विहत्थो**' इत्यादि, तिस्रो वितस्तयश्चतरङ्गुलं च चतुर्णामङ्गुलानां समाहारश्चतुरङ्गुलं चत्वार्यङ्गुलानि चेत्यर्थः, इदं भाजनस्य मध्यमं [2]प्रमाणम्, अयमर्थः- [3]वर्तुलस्य सर्वतः समचतुरस्रस्य सुप्रतिष्ठानस्य निश्छिद्रस्य निर्व्रणस्य स्निग्धवर्णोपेतस्य पात्रस्य परिधिर्दवरकेण मीयते, तत्र च मिते यदा मानदवरकस्तिस्रो वितस्तयश्चत्वारि चाङ्गुलानि भवन्ति तदा तत्पात्रं

१ गाथा एत-सं० तुलना- बृ. क. टीका पृ. १०८७, १०८६, १०९२। पञ्चवस्तुटीका पृ. १२२ तः, धर्मसङ्ग्रहटीका भा.२ पृ. ६५ तः॥ २ 'तथा इदमपरं प्रमाणान्तरं प्रकारान्तरेण पात्रकस्य प्रमाणं भवति-'इणमन्नं तु पमाणं, नियगाहारा उ होइ निप्फन्नं । कालपमाणसिद्धं उदगप्पमाणेण य वयंति ॥ ओघनि. ६८१ ॥ इदमन्यत्प्रमाणं निजेनाहारेण निष्पन्नं वेदितव्यम् । एतदुक्तं भवति - काङ्क्षिकादिदोषेपेतस्य चतुर्भिरङ्गुलैरूनं पात्रकम्, तत्साधोर्भक्षयतो यत्परिनिष्ठितं याति तत्तादृग्विधं मध्यमप्रमाणं पात्रकम्, तच्चैवंविधं कालप्रमाणेन ग्रीष्मकाले प्रमाणसिद्धं पात्रकं मण्णन्ति ..... 'उक्कासतिसामासे दुगाउमद्धाणमागओ साहू । चउरंगुलूणमरियं ज पज्जत्तं तु साहुस्स' ॥ ओघनि. ६८२ ॥ उत्कृष्टा तृढ् मासयोः ज्येष्ठाषाढयोः यस्मिन् काले स उत्कृष्टतृष्मासः कालः, तस्मिन्नुत्कृष्टतृष्मासकाले द्विगव्यूताध्वानमात्रादागतः यो भिक्षुश्चतुर्भिरङ्गुलैर्न्यूनं भृतं सत् यत् पर्याप्त्या साधोर्भवति तदित्थं भूतं कालप्रमाणोदरप्रमाणसिद्धं पात्रकं मध्यमं भवति" ॥ इति तत्रैव द्रोणाचार्यकृतटीकायाम् पृ. २१०॥

३ तुलना 'समचउरंसं वट्टं दोरएण मविज्जइ तिरिच्छियं उड्ढमहो य, सो य दोरओ तिण्णि विहत्थीओ चत्तारि अंगुलाइं अति होइ ततो भाणस्स एयं मज्झिमं पमाणं।" ओघनि. ६८० द्रोणाचार्यटीका पृ. २१० ॥ तुलना-बृ.क.गा.४० तः २२॥

मध्यमप्रमाणं भवति, 'इतो' मध्यमप्रमाणात् पात्रकात् हीनं द्वितस्त्येकवितस्त्यादिमानं यत्पात्रं तज्जघन्यम् 'अतिरिक्ततर तु' मध्यमप्रमाणात्तद्बृहत्तरमुत्कृष्टं भवति ॥५००॥

[1]पात्रबन्धप्रमाणमाह–'पत्ते'त्यादि, पात्रबन्धप्रमाणं भाजनप्रमाणेन भवति करणीयम्, यदि मध्यमं पात्रं भवति तदा पात्रबन्धकोऽपि (ग्रन्थाग्रं ५०००) तत्प्रमाणः कार्यः, अथ जघन्यं तदा सोऽपि तदनुसारेण करणीयः, अथोत्कृष्टप्रमाणं पात्रं तदा सोऽपि गुरुतरः कार्यः, किं बहुना ?, यथा ग्रन्थौ 'कृते' दत्ते सति 'कोणाः' ग्रन्थेरञ्चलाश्चतुरङ्गुला भवन्ति तथा पात्रबन्धकः कार्य इति ॥५०१॥

अथ पात्रस्थापनक-गोच्छक-पात्रप्रत्युपेक्षणिकानां प्रमाणमाह– 'पत्तगे'त्यादि, अथ पात्रकस्थापनं तथा गोच्छकस्तथा पात्रप्रतिलेखनी च एतेषां [2]त्रयाणामपि प्रमाणमेका वितस्तिश्चतुर्भिरङ्गुलैरधिका षोडशाङ्गुलानीत्यर्थः, प्रयोजनं तु पात्रबन्ध-पात्रस्थापनयो रजःप्रभृतिरक्षणम्, गोच्छकस्य भाजनवस्त्राणां पटलादीनां प्रमार्जनम्, केशरिकायास्तु पात्रप्रमार्जनमिति, उक्तं च—

" [3]रयमाइरक्खणट्ठा पत्तबंधो य पायठवणं च । होइ [4]पमज्जणहेउं तु गुच्छओ भाणवत्थाणं ॥१॥

---

१ तुलना "जं च समचउरंसं तस्स जा बाहिरतो परिही तेण भायणप्पमाणेण पत्तगबंधो कायव्वो, जं पुण विसमं तस्स जा परिही महंततरी तेणप्पमाणेण पत्तगबंधो कायव्वो, अहवा गंठीए कयाए जहा पत्तगबंधकण्णा चउरंगुला भवंति–गंठीए अतिरित्ता भवंतीत्यर्थः" ॥ इति निशीथचूर्णि भा. ४ । पृ.१३८ ॥ गाथा ५७६० ॥

२ 'अत्र द्वे ऊर्णामये, पात्रमुखवस्त्रिका च क्षौमिकी" इति ध. सं. टी. (भा. २–पृ ६५) ॥

३ अस्य हरिभद्रसूरिभिरेव कृता व्याख्या-"रजःप्रभृतिरक्षार्थं पात्रबन्धश्चोक्तलक्षणः, पात्रस्थापनं च भवति प्रमार्जनहेतोः, एतन्निमित्तमेव गोच्छकः भाजनवस्त्राणां-पटलादीनामिति गाथार्थः ॥८००॥ पात्रप्रमार्जनहेतोः किमित्याह-केसरिका अत्र भवति ज्ञातव्या" इति पञ्चवस्तुटीका पृ. १२४ A ॥ ४ पमज्जणहेउं गु० मु. ॥

पायपमज्जणहेउं केसरिया इत्थ होइ णयव्वा ॥'' (पञ्चवस्तु ८००-८०१) ॥५०२॥

अथ पटलानां [1]प्रमाणमाह–'अड्ढे' त्यादि, अर्धतृतीयान् हस्तान् सार्धौ द्वौ हस्तौ दीर्घाणि -आयतानि षट्त्रिंशदङ्गुलानि एको हस्तो द्वादशाङ्गुलानि चेत्यर्थो [2]रुन्द्राणि-विस्तीर्णानि पटलकानि भवन्ति, अथवा द्वितीयमिदं प्रमाणं–पतद्ग्रहात् स्वशरीराच्च निष्पन्नम्, कोऽर्थः ?–महति पात्रके स्थूले शरीरे लघुतरे पात्रके कृशे शरीरे वा पटलकान्यपि तदनुसारेण करणीयानि ॥५०३॥

तानि च कीदृशानि भवन्तीत्याह– **कयली'** त्यादि, कदलीगर्भदलसमानि शुक्लानि मसृण-श्लक्ष्णानि घनानि चेन्यर्थः क्षौमाणि पटलान्युत्कृष्ट-मध्यम-जघन्यभेदभिन्नानि भवन्ति, [3]उत्कृष्टत्व-मध्यमत्व--जघन्यत्वानि तु शोभनत्वादिस्वरूपापेक्षया परिगृह्यन्ते, न तु सङ्ख्यापेक्षया, तानि च **'ग्रीष्मे'** उष्णकाले **'हेमन्ते'** शीतकाले **'वर्षासु च'** वर्षाकाले प्रत्येकं २ त्रिविधानि ज्ञेयानि, तानि च किमर्थं

१ तुलना-''अथ प्रमाणप्रमाणम्-तत्र च विशेषचूर्णिः-गच्छनिग्गयाणं चउरंसा पडला, जं माणे मज्झे कए हेट्ठा अट्ठ अंगुलाइं लंबंति । गच्छवासीणं जं उग्गाहिए समाणे चउहिं अंगुलेहिं जन्नुए न पावति, अहवा दीहत्तणेण अड्ढाइज्जा हत्था, रुंदत्तणेण तिवड्ढो हत्थो'' इति बृहत्कल्प. टीका पृ. १०९०॥

२ रुन्दानि- इति पंचवस्तुटीका (८०६)॥ रुंदा'-इति ध.सं. टीका. (भा. २। पृ. ६६) ॥

३ तुलना-''तत्र यानि अत्यन्तदृढानि तान्युत्कृष्टानि, दृढ-दुर्बलानि मध्यमानि, दुर्बलानि जघन्यानि'' इति । बृ. क. ३६७३ । टीका (पृ. १०९०) ॥

क्रियन्ते ?, तत्राह–'प्राणरक्षार्थं' सम्पातिमादिजीवरक्षणनिमित्तम् , उपलक्षणत्वात्पक्षिपुरीष-पांशुपातादि-रक्षणार्थं लिङ्गसंवरणार्थञ्च, [1]एतदुक्तं भवति–अस्थगिते पात्रके सम्पातिमाः सत्त्वाः पतन्ति, पवनप्रकम्पित-पादपादेः पत्र-पुष्प-फलादीनि सचित्तरजः-सलिलादयो व्योमवर्तिविहङ्गमपुरीष-वात्याहतपांशुप्रकरादयश्च निपतन्ति ततस्तत्संरक्षणार्थं पटलानि धियन्ते, तथा भिक्षां भ्रमतः साधोः कदाचिद्वेदोदयोऽपि सम्भवति ततस्तैर्विकृतलिङ्गस्थगनं क्रियते ॥५०४॥

अथैतेषामेवोत्कृष्ट-मध्यम-जघन्यानां ग्रीष्मादिषु सङ्ख्यामाह–'तिण्णी'त्यादि, ग्रीष्मे उत्कृष्टा अत्यन्तशोभनानि त्रीणि पटलानि भवन्ति, कालस्यात्यन्तरूक्षत्वात् सत्वरं सचित्तपृथ्वीरजःप्रभृतीनां परिण-तेस्तेन पटलभेदायोगात् , मध्यमानि–न शोभनानि नाप्यशोभनानि चत्वारि, तेषां प्रभूततराणामेव स्वकार्यसाधनात् , जघन्यानि–जीर्णप्रायाणि अत्यन्तमशोभनानि पञ्चैव । तथा हेमन्ते उत्कृष्टानि चत्वारि, कालस्य स्निग्धत्वाद्विमर्देन पृथ्वीरजःप्रभृतीनां परिणतेस्तेन पटलभेदसम्भवात् , [2]मध्यमानि पञ्च, जघन्यानि तु षडेव । तथा वर्षासूत्कृष्टानि पञ्च, कालस्यात्यन्तस्निग्धत्वादतिचिरेण पृथ्वीरजः प्रभृतीनां परिणतेस्तेन पटलभेदयोगात् , मध्यमानि षड् , जघन्यानि तु सप्तैव पटलानि भवन्तीति, तानि च पटलानि तथा घनमसृणरूपाणि कर्तव्यानि यथा तैस्तिरोहितः सवितोऽपि न दृश्यते, प्राकृतत्वाच्च पुंस्त्वमिति ॥५०५॥

१ तुलना–"पुप्फफलोदय-रय-रेणु-सउणपरिहारपायरक्खट्ठा। लिंगस्स य संवरणे वेदोदयरक्खणे पडला ॥" इति ओघनि. गाथा ७०२)। पञ्चवस्तु (८०७) ॥ २ मध्यमानि तु पञ्च- सं. ॥

इदानीं रजस्त्राणप्रमाणमाह- 'माण'मित्यादि, 'मानं तु' प्रमाणं 'रजस्त्राणे' रजस्त्राणविषयं भाजनप्रमाणेन-पात्रकप्रमाणेन भवति निष्पन्नम्, तच्चैवं वेदितव्यमित्याह-प्रादक्षिण्यं-वेष्टनं कुर्वन् पात्रस्य मध्ये चतुरङ्गुलमिति-चत्वार्यङ्गुलानि यावत्क्रमते[1]-अधिकं तिष्ठति, एतदुक्तं भवति-पात्रकानुरूपं रजस्त्राणं कर्तव्यम्, किं बहुना ?, तिर्यक् पदक्षिणाक्रमेण भाजने वेष्ट्यमाने भाजनस्य मध्यभागो यथा चतुर्भिरङ्गुलैं रजस्त्राणेनातिक्रम्यते तथा रजस्त्राणं विधेयं-कार्यम्, प्रयोजनं चास्य मूषकभक्षण-रेणूत्कर-वर्षोदका-ऽवश्यायसचित्तपृथिवीकायादिसंरक्षणम्, उक्तं च-"[2]मूसग-रय-उक्केरे [3]वासासिण्हारए य रक्खट्ठा। होंति गुणा रयत्ताणे एवं भणियं जिणिंदेहिं ॥१॥" [पञ्चवस्तु ८०९] ॥५०६॥

इदानीं [4]कल्पप्रमाणमाह- कप्पे'त्यादि, 'कल्पा आत्मप्रमाणाः-सार्धहस्तत्रयप्रमाणा दैर्घ्यतः सार्ध-

---

१ क्रमति-मु० । क्रमोऽनुपसर्गात्(सिद्धहे० ३-३-४७) ... क्रमते, क्रामति । इति तत्रैव लघुवृत्तिः ॥

२ "मूसग-रय-उक्केरे वासे सिण्हा रए अ रक्खट्ठा। होंति गुणा रयताणे एवं भणिआ जिणिंदेहिं ॥ पञ्चवस्तु ८०९ ॥ 'मूषक-रज-उत्कर' इति षष्ठ्यर्थे सप्तमी, मूषक-रज-उत्करस्य ग्रीष्मादिषु वर्षायां 'सिण्हायाः' अवश्यायस्य रजसश्च रक्षार्थं क्रियमाणे भवन्ति 'गुणाः' चारित्रवृद्धयादयो रजस्त्राणे, एवं भणितं जिनेन्द्रैरिति गाथार्थः।" इति तत्रैव टीकायाम् पृ. १२५ ॥

३ वासिण्हारएसयरक्खट्ठा-सं, ॥

४ तुलना-"कप्पा आयपमाणा, अड्ढाइज्जा उ वित्थडा हत्था। एवं मज्झिम माणं, उक्कोसं होति चत्तारि। बृ.क.भा. ॥३६६॥ कल्पाः 'आत्मप्रमाणाः' सार्धहस्तत्रयप्रमाणात्मानः, अर्धतृतीयांश्च हस्तान् 'विस्तृताः' पृथुला विज्ञेयाः, एतद् मध्यमं 'मानं' प्रमाणं भवति। उत्कर्षतो दैर्घ्येण चत्वारो हस्ताः। एतदादेशद्वयं मन्तव्यम् ॥बृ. क. भा ३६६१॥ अत्रैव कारणमाह-

हस्तद्वयप्रमाणाश्च विस्तरतो विधेयाः, तेषां च मध्ये द्वौ 'सौत्रिकौ' सूत्रनिष्पन्नौ प्रच्छादनपटीरूपौ तृतीयः पुनः 'और्णिकः'-ऊर्णानिष्पन्नः कम्बल इत्यर्थः ॥५०७॥

इदानीं रजोहरणमानमाह-'बत्ती'त्यादि, 'द्वात्रिंशदङ्गुलानि दीर्घं तावद्रजोहरणं सामान्येन कार्यम्, तत्र च चतुर्विंशतिरङ्गुलानि दण्डः 'से' तस्य करणीयः, अष्टाङ्गुलाश्च दसिकाः कार्याः, अथवा एकतरत् हीनमधिकं वा कार्यम्, कोऽर्थः ?-दण्डो वा हीनो दसिका अधिकमानाः, दण्डोऽधिकप्रमाणो दसिका

संकुचिय वरुण आयप्पमाण सुयणे न सीयसंफासो। दुहओ पेल्लण थेरे, अणुचिय पाणाइरक्खाऽऽया ॥३६७०॥ यो भिक्षुस्तरुणो बलवान् स सङ्कुचितपादः स्वप्तुं शक्नोति, तस्य तथा स्वप्ने शीतस्पर्शो न भवति, अतस्तस्य आत्मप्रमाणाः कल्पा अनुज्ञाताः। यस्तु स्थविरो वयसा वृद्धः स क्षीणबलत्वान्न शक्नोति सङ्कुचितपादः शयितुम्, अतस्तस्यानुग्रहार्थं दैर्घ्येणात्मप्रमाणादूर्ध्वं षडङ्गुलानि विस्तरतोऽप्यर्धतृतीयहस्तप्रमाणादभ्यधिकानि षडङ्गुलानि विधीयन्ते। एवं विधीयमाने गुणमुपदर्शयति-"दुहओ पेल्लण" त्ति शिरःपादान्तलक्षणयोर्द्वयोरपि पार्श्वयोर्यत् कल्पस्य 'प्रेरणम्' आक्रमणं तेन स्थविरस्य शीतं न भवति। 'अनुचितः' अभावितः शैक्ष इत्यर्थः, तस्याऽपि स्वपनविधावनभिज्ञस्य कल्पप्रमाणमेवमेव ज्ञातव्यम्। अपि च एवं प्राणिनां रक्षा कृता भवति, न मण्डूकप्लुत्या कीटिकादयः प्राणिन प्रविशन्तीति भावः, आदिशब्दाद् दीर्घजातीयादयोऽपि न प्रविशन्ति, तेनात्मनोऽपि रक्षा कृता भवति ॥३६७०॥" इति बृहत्कल्पटीका पृ.१०८६॥ द्रष्टव्ये निशीथभाष्य (५७१४-५) चूर्णी (भा.४. पृ. १३६)॥

१ तुलना-"रयहरणं गणणप्पमाणेण एगं गच्छनिग्गयाणं, गच्छवासीणं दो वासासुप्पमाणप्पमाणेण समं दसियासु बत्तीसं अंगुलाइं-अस्स चउव्वीसं अंगुलाइं दंडो तस्स अट्ठ अंगुलाइं दसियाओ जस्स पुण वीसं अंगुलाइं दंडो तस्स बारसंगुला दसियाओ।" इति विशेषचूर्णौ। इति बृहत्कल्प० टिप्पनम् ३ (पृ. १०९०) ॥

हीनप्रमाणाः, सर्वथा समुदायतस्तद् द्वात्रिंशदङ्गुलं कर्तव्यमिति ।

❀ यच्चाधुनातनाः साधुमान्याः केचिदेवमाचक्षते-रजोहरणं मध्यभागे पाशकत्रययुक्तं भवतु ● 'मज्झे तिपासियं कुज्ज' त्ति सिद्धान्तवचनात् अधस्तनदवरकं तु ये बध्नन्ति रजोहरणे ते मिथ्यादृशः साधवो भगवदाज्ञाभङ्गकारित्वादिति, तान् प्रतीदमभिधीयते-गीतार्थैः रजोहरणे अधस्तनदवरकबन्धस्याऽऽचरितत्वात् मिथ्यादृष्टिता न तद्बन्धकसाधूनाम्, न चाशठपञ्चगीतार्थाचरितं कुर्वतां भगवदाज्ञाभङ्गेऽपि कश्चन, [1]"असढेहिं समाइण्णं जं कत्थइ केणई असावज्जं । न निवारियमन्नेहिं य तं बहुगुणमेवमायरियं" ॥१॥ इति गणधरैरेवाभिहितत्वात्, अपरं च-एवं व्याकुर्वतां गीतार्थाचरितं च न्यक्कुर्वतां तेषामेव मिथ्यादृष्टिताप्रसक्तेः, [2]यतस्तेऽपि पृच्छयन्ते अहो सिद्धान्तोक्तकारकंमन्या ! भवद्भिः सिद्धान्तोक्तादधिकं किमपि न विधीयते ?, तत आस्तां तावदन्यत् रजोहरणमपि-[3]"घणं मूले थिरं मज्झे, अग्गे

❀ ❀ चिह्नद्वयमध्यवर्ती [बहुतरदोषसम्भव इति पर्यन्तः] पाठः जे. पो. प्रत्योः नास्ति ॥ ● मध्ये त्रिपाशितं कुर्यात् ॥

१ तुलना-"असढेण समाइण्णं, जं कत्थइ कारणे असावज्जं ॥ ण णिवारियमण्णेहिं य, बहुमणुमयमेतमाइण्णं ॥ बृ.क.भा. ॥४४९॥ 'अशठेन' राग-द्वेषरहितेन कालिकाचार्यादिवत् प्रमाणस्थेन सता 'समाचीर्णम्' आचरितं यद् भाद्रपदशुद्धचतुर्थीपर्युषणापर्ववत् 'कुत्रचिद्, द्रव्य-क्षेत्र-कालादौ 'कारणे' पुष्टालम्बने 'असावद्यं' प्रकृत्या मूलोत्तरगुणाराधनाया अबाधकम्, 'न च' नैव निवारितम् 'अन्यैः' तथाविधैरेव' तत्कालवर्तिभिर्गीतार्थैः, अपि तु बहु यथा भवति एवमनुमतमेतदाचीर्णमुच्यते ॥४४९॥" इति बृहत्कल्पटीका पृ. १२१४ ॥

२ यतस्तेऽपि अहो- मु. ॥ ३ अस्य क्षेमकीर्तिसूरिकृता व्याख्या-" 'मूले' हस्तग्रहणप्रदेशे रजोहरणं 'घनं' निबिडवेष्टितम्, 'मध्ये' मध्यभागे 'स्थिरं' दृढम्; 'अग्रे' वशिकापर्यन्ते 'मार्दवयुक्तता' वशिका मृदुस्पर्शा विधेया

मदव [1]जुत्तयं । एगंगियं अभुसिरं, पोरायामं तिपासियं ॥१॥ अप्पोल्लं [2]मिउ पम्हं, पडिपुण्णं हत्थपूरिमं । रयणीपमाणमित्तं, कुज्जा पोरपरिग्गहं' [बृ.क.भा. ३९७७-३९७९] ॥२॥ इत्यागमानभिहितं कुर्वतां भवतामपि भगवदाज्ञाभङ्गकारित्वेन मिथ्यादृष्टित्वं प्राप्तम्, ततो भवद्भिरपि गीतार्थाचरितमवश्यं शरणीकर्त्तव्यं अन्यथा तु बहुतरदोषसंभव इति * ॥५०८॥

मुखवस्त्रिकाप्रमाणनिरूपणायाह--'चउ'इत्यादि, चत्वार्यङ्गुलानि एका च वितस्तिरेतच्चतुरस्रस्य मुखानन्तकस्य--मुखवस्त्रिकायाः प्रमाणम् । अथवा द्वितीय आदेशो--मतान्तरं मुखप्रमाणेन निष्पन्नं [3]मुखानन्तकम्, एतदुक्तं भवति--वसतिं प्रमार्जयतः साधोर्नासिकामुखयो रजःप्रवेशरक्षणार्थम्, उच्चारभूमौ नाशिकाशोदोषपरिहारार्थं च यावता मुखं प्रच्छाद्यते, त्र्यस्रं कोणद्वये गृहीत्वा पृष्ठतश्च कुकाटिकायां यावता ग्रन्थिर्दातुं शक्यते तावत्प्रमाणा मुखवस्त्रिका करणीयेति ॥५०९॥

इत्यर्थः । "एकाङ्गिकं नाम' तज्जातदशिकं न वा द्व्यादिखण्डनिष्पन्नम् 'अशुषिरं' न रोमबहुलं न वा ग्रन्थिलम्, 'पोरायामं' ति पर्वायामम् अङ्गुष्ठपर्वणि प्रतिष्ठितायाः प्रदेशिन्या यावदपान्तरालं तावत्प्रमाणायामम्, "तिपासियं" ति त्रिभिर्देवरकवेष्टकैः पाशितं--बद्धम्, एवंविधं रजोहरणं कर्त्तव्यम् ॥३६७७॥ ..... 'अप्पोल्लं' दृढवेष्टनादशुषिरमशुषिरदण्डं वा, तथा मृदूनि-कोमलानि पक्ष्माणि दशिका रोमाग्रभागरूपाणि यस्य तद् मृदुपक्ष्मकम्, 'प्रतिपूर्णं' बाह्येन निषद्याद्वयेन युक्तं सद् 'हस्तपूरिमं' यथा हस्तं पूरयति तथा कर्त्तव्यमित्यर्थः, ... रत्निप्रमाणमात्रं हस्तप्रमाणायामदण्डकं 'पर्वपरिग्रहम्' अङ्गुष्ठपर्वलग्नप्रदेशिनीशुषिरपूरकम्, एवंविधं रजोहरणं कुर्यात् ॥३६७९॥ ... "इति बृ.क. टीका पृ.१०६१॥ निशीथभाष्यम्(५८३०-५८०२) निशीथचूर्णिश्च भा. ४। पृ १४० द्रष्टव्या ॥

१ जुत्तया इति बृ.क.पाठः गाथा ३९७७॥ २ मिदुपम्हं च पडिपुन्नं-इति बृ.क.पाठः गाथा३९७८॥ ३ मुखानन्तकं वसति-जे.॥

इदानीं [1]मात्रकप्रमाणमाह–'जो' इत्यादि, यो 'मागधो' मगधदेशोद्भवः प्रस्थः–

△'दो असईओ पसई दो पसईओ य सेइया होइ । चउसेइयाहिं कुलओ चउकुलओ मागहो पत्थो' ॥१॥

इति क्रमनिष्पन्नः तन्मानात्सविशेषतरम्–अधिकतरं मात्रकप्रमाणं भवति, तेन च किं प्रयोजनमित्याह–

१ तुलना–"जो मागहओ पत्थो उल्लिखेत्तरं तु मत्तगपमाणं । दोसुवि हत्थग्गहणं, वासावासासु अहिकारो ॥४०६७॥ यो 'मागधः' मगधदेशोद्भवः 'प्रस्थः' "दो असईओ पसई, दो पसईओ य सेइया होति । चउसेइयाहि पत्थो" इति क्रमनिष्पन्नः ततो मागधप्रस्थात् सविशेषतरं मात्रकप्रमाणं भवति । तेन च मात्रकेण 'द्वयोरपि' ऋतुबद्ध-वर्षावासयोर्गुरु-ग्लानाद्यियोग्यस्य भक्त-पानद्रव्यस्य ग्रहणं क्रियते । अन्ये तु व्याचक्षते-"दोसु वि" त्ति प्रतिग्रहे भक्तं मात्रके पानकं गृह्यते । वर्षावासे तु विशेषतो मात्रकेणाधिकारः, यतो वर्षासु प्रथममेव यत्र धर्मलाभयति तत्र पानकं गृह्णाति, यतः कदाचिद् व्यापारितं वर्षं निपतेद् येन गृहाद् गृहं सञ्चरितुं न शक्येत ततः पानकेन विना प्रतिग्रहो लेपकृतो भवति । अथवा वर्षावासे भक्त-पानं संसज्यत इति कृत्वा मात्रकेण तस्य शोधनं कार्यम् ॥४०६७॥ प्रकारान्तरेण मात्रकप्रमाणमाह—

सुक्खोल्लओदणस्सा, दुगाउतद्धाणमागओ साहू भुंजति एगट्ठाणे, एतं खलु मत्तगपमाणं ॥४०६८॥ शुष्कौदनस्यान्यभाजनगृहीतेन तीमनेनार्द्रस्य भृतं यद् 'एकस्थाने' एकवारं द्विगव्यूतमात्रादध्वन आगतः साधुर्भुंक्ते एतत् खलु मात्रकप्रमाणं मन्तव्यम् ॥४०६८॥ यदि वा—

भत्तस्स व पाणस्स व, एगतरागस्स जो भवे भरिओ । पज्जत्तो साहुस्स उ, बितियं पि य मत्तयपमाणं ॥४०६९॥ भक्तस्य वा पानकस्य वाऽनयोरेकतरस्य यद् भृतं सद् एकस्य साधोः पर्याप्तं भवति एतद् द्वितीयमपि मात्रकप्रमाणमवगन्तव्यम् ॥४०६९॥" इति बृ. क. भा. टीका पृ. ११११ ॥

△द्वे असती प्रसृतिः द्वे प्रसृती सेतिका भवति चतसृभिः सेतिकाभिः कुलवः चतष्कुलवो मागधः प्रस्थः ॥१॥

द्वयोरपि—वर्षावर्षयोः—वर्षाकाल-ऋतुबद्धकालयोर्गुर्वादिप्रायोग्यद्रव्यग्रहणं क्रियते, अयमधिकारः इदं मात्रकस्य [1]प्रयोजनम्, एतदुक्तं भवति—यदि तत्र क्षेत्रे गुरु-ग्लान-प्राघूर्णकादिप्रायोग्यद्रव्यस्यावश्यंभावी लाभः तदा वैयावृत्यकरसङ्घाटक एव मात्रके तत्प्रायोग्यं द्रव्यं गृह्णाति, असति च प्रायोग्यद्रव्यस्य ध्रुवलाभे सर्व एव सङ्घाटका मात्रकेषु गुर्वादिप्रायोग्यं द्रव्यं गृह्णन्ति, यतो न ज्ञायते कः किं लप्स्यते आहोस्विन्नेति, [2]तथा यत्र क्षेत्रे काले वा स्वभावेनैव भक्तपानं संसज्यते तत्र प्रथमं मात्रके तद् गृह्यते, ततः शोधयित्वा भक्तपानमितरेषु पतद्ग्रहेषु प्रक्षिप्यते, तथा दुर्लभघृतादिद्रव्यग्रहणं सहसादानग्रहणं च तेन क्रियते, इत्यादि मात्रकस्य प्रयोजनमिति ॥ ५१० ॥

अपरं च मात्रकस्य प्रमाणमाह—'**सूवोयणस्से**' इत्यादि, अत्र प्राकृतत्वेन विभक्तिव्यत्ययात्सूपोदनेन—दाली कूरेण भृतं यदेकं स्थानं—भाजनरूपं द्विगव्यूतादध्वन आगतः साधुर्भुङ्क्ते तदेतत्किल मात्रकस्य द्वितीयं प्रमाणम्, मूलनगरादुपनगरगोकुलादिषु द्विगव्यूतस्थितेषु भिक्षामटित्वा समागत्य वसतौ मात्रके सर्वं प्रक्षिप्य तदानीमेतावता श्रमेण एकस्थानस्थितस्तत्सूपादिकं भुङ्क्ते यदि च यावन्मात्रं सूपादिकं साधुर्भोक्तुं शक्नोति तावन्मात्रमेव तत्र मात्रके माति न न्यूनमधिकं वा तदा तत्प्रमाणं मात्रकस्येति तात्पर्यम् ॥५११॥

१ तुलना—'आयरिए य गिलाणे पाहुणए दुल्लभे सहसदाणे। संसत्तभत्तपाणे मत्तगपरिभोगो अणुन्नाओ ॥ एक्कंसि व पाउग्गं गुरुणो बितिओग्गहे य पडिकुट्ठं। गिण्हइ संघाडेगो धुवलंभे सेस उभयंपि ॥ असई लाभे पुण मत्तए य सव्वे गुरूण गेण्हंति। एसेव कमो नियमा गिलाणसेहाइएसुं पि'। इति ओघनि.७१६-७१८ ॥

२ यथा यत्र क्षत्र—जे.। तथा यत्र यत्र क्षेत्रे—मु.।

इदानीं चोलपट्टमानमाह-' [1]'दुगुणो' इत्यादि, द्विगुणश्चतुर्गुणो वा कृतः सन् यथा हस्तप्रमाणश्चतुरस्रश्च भवति तथा चोलस्य-पुरुषचिह्नस्य पट्टः-आवरणवस्त्रं चोलपट्टः कार्यः, किमर्थं द्विगुणश्चतुर्गुणो वेत्याह-'थेरजुवाणाणट्ठ' त्ति क्रमेण स्थविराणां यूनां च साधूनामर्थाय-प्रयोजनाय, स्थविराणां द्विहस्तः, तदिन्द्रियस्य प्रबलसामर्थ्याभावादल्पेनाप्यावरणात्, यूनां च चतुर्हस्तश्चोलपट्टकः करणीय इति भावः, 'सण्हे थुल्लंमि य विभासा' त्ति श्लक्ष्णे स्थूले च चोलपट्टे 'विभाषा' विविधा भाषा, अयं भेदो-यदुत स्थविराणां श्लक्ष्णः करणीयस्तदिन्द्रियस्पर्शेन चोलपट्टस्योपघाताभावात्, यूनां तु स्थुल इति ॥५१२॥

इदानीं पूर्वमनुद्दिष्टयोरप्युपकरणप्रस्तावादौपग्रहिकोपधिरूपयोः संस्तारकोत्तर[2]पट्टयोर्मानमाह-'संथारुत्तारे'त्यादि, संस्तारक उत्तरपट्टश्चेति द्वयमपि प्रत्येकमर्धतृतीयौ हस्तौ आयतं भवति, [3]द्वयोरपि च संस्तारकोत्तरपट्टयोर्विस्तारः-पृथुत्वमेको हस्तश्चतुरङ्गुलं-चत्वार्यङ्गुलानि, [4]प्रयोजनं च संस्तारकस्य प्राणि-रेणुसंरक्षणम्, तदभावे हि शुद्धभूमौ शयानस्य साधोः पृथिव्यादीनां प्राणिनामुपमर्दो भवति रेणुश्च शरीरे लगति, तथा उत्तरपट्टोऽपि क्षौमिकः षट्पदिकासंरक्षणार्थं संस्तारकस्योपरि आस्तीर्यते, अन्यथा कम्बलमयसंस्तारक-शरीरयोः संघर्षेण षट्पदिकाविराधना स्यादिति ॥ ५१३ ॥

अथ सूत्रकृदेव केषाञ्चिदुपकरणानां प्रयोजनं प्रतिपिपादयिषुः पूर्वं तावद्रजोहरणस्य प्रयोजनमाह-

१ दिगुणो-मु. ॥ २ °पट्टरूपयोर्मान० मु. ॥ ३ द्वयोरपि संस्ता० मु. ॥
४ तुलना-"पाणादिरेणुसारक्खणट्ठया होंति पट्टगा चउरो। छप्पइयरक्खणट्ठा तत्थुवरिं खोमियं कुज्जा" ॥इति ओघनिर्युक्तिः (गा. ७२४)। तुलना-धर्मसङ्ग्रहटीका (भा. २। पृ. ६८) ॥

[1]'आयाणे'त्यादि, आदाने-ग्रहणे निक्षेपे-मोचने स्थाने-ऊर्ध्वस्थानं निषदने-उपवेशने त्वग्वर्तने-शयने सङ्कोचने च-पादादीनां पश्चात्करणे सम्पातिमादिसूक्ष्मजीवसंरक्षणाय पूर्वम्-आदौ भूम्यादेः प्रमार्जनार्थं रजोहरणं तीर्थकरैः कथितम् , पूर्वमप्रमार्जिते हि पात्रादौ तदादाने क्रियमाणेऽवश्यं मशक-कुंथ्वादीनामुपघातो भवति, रजोहरणेन तु प्रमार्जने कृते तेषां रक्षा कृता भवति, तथाऽर्हद्दीक्षायां लिङ्गं-चिह्नमेतत् प्रथममिति ॥ ५१४ ॥

अथ मुखवस्त्रिकायाः प्रयोजनमाह-'संपे'त्यादि, सम्पातिमा जीवा मक्षिका-मशकादयस्तेषां रक्षणार्थं भाषमाणैर्मुखे मुखवस्त्रिका दीयते, तथा रजः-सचित्तः पृथिवीकायस्तत्प्रमार्जनार्थं रेणुप्रमार्जनार्थं च मुखपोत्तिकां वदन्ति-प्रतिपादयन्ति तीर्थकरादयः, तथा वसतिं प्रमार्जयन् साधुर्नासां मुखं च बध्नाति-आच्छादयति 'तया' मुखपोत्तिकया यथा मुखादौ रेणुर्नप्रविशतीति ॥ ५१५ ॥

इदानीं पात्रग्रहणस्य प्रयोजनमाह-'छक्काये'त्यादि, षट्कायरक्षणार्थं पात्रग्रहणं जिनैः प्रज्ञप्तम् , पात्रकरहितो हि साधुर्भोजनार्थी षडपि जीवनिकायान् [2]परिशाटनादिदोषेण विनाशयतीति, ये [3]च गुणाः-गुरु-ग्लान-वृद्ध बाल-भिक्षाभ्रमणासहिष्णुराजपुत्र-प्राघूर्णका ऽलब्धिमत्साध्वादेर्भिक्षादानादयः सम्भोगे-एकमण्डलीरूपे व्यावर्णिताः सिद्धान्ते त एव गुणाः पात्रग्रहणेऽपि भवन्ति, पात्रग्रहणमन्तरेण कथमेतन्निमित्तं भिक्षा समानीयत इति भावः ॥ ५१६ ॥

---

१ 'आये' त्यादि-मु. । आयाणे गाहा-सं. ॥ २ परिशातनादि० पञ्चवस्तुकटीका ८१० ॥

३ तुलना-"अतरंत बाल-वुड्ढा सेहाऽऽएसा गुरू असहुवग्गे । साहारणोग्गहालद्धिकारणा पादगहणं तु" इति ओघनि० ६१२, पंचवस्तुकः ८११ ॥

इदानीं कल्पानां प्रयोजनमाह–'तणगहणे'त्यादि, तृणानां–व्रीहि-पलालादीनां ग्रहणं तृणग्रहणम् , अनलः–अग्निस्तस्य सेवा, तयोर्निवारणार्थं कल्पग्रहणम् , असति कल्पे शीतादौ सति गाढे पलाला-ऽग्नि-सेवामवश्यं करोति तत्करणे च जीववधः, तथा धर्म-शुक्लध्याननिमित्तं दृष्टम्–अनुज्ञातं कल्पग्रहणं तीर्थ-कृद्भिः, शीताद्युपद्रवे हि कल्पप्रावृत्तः सुखेन धर्म-शुक्लध्याने [1]अध्यासे करोतीति, अन्यथा शीतादौ कम्प-मानकायो दन्तवीणामनवरतं वादयन् कथङ्कारं ते ध्याने विधास्यतीति?, तथा ग्लानसंरक्षणार्थं दृष्टं कल्प-ग्रहणम् , अन्यथा शीतवातादिना बाध्यमानो ग्लानो गाढतरं ग्लानो भवति, तथा मरणार्थं कल्पग्रहणम् , मृतस्य ह्युपरि प्रच्छादनार्थं कल्पः क्रियते, इतरथा लोकव्यवहारादिबाधा कृता भवति ॥ ५१७ ॥

इदानीं चोलपट्टस्य प्रयोजनमाह–'वेउव्वे' त्यादि, यस्य साधोः प्रजननं–साधनं [2]वैक्रियं–विकृतं भवति, यथा दाक्षिणात्यपुरुषाणामग्रभागे विध्यते प्रजननम् , तच्च तथाविधं दृष्टं विकृतं भवति तत-स्तत्प्रच्छादनार्थं चोलपट्टकोऽनुज्ञे, 'अवाउडे'त्ति पदं सर्वत्र सम्बध्यते, ततोऽप्रावृते–अपरिहिते चोल-पट्टके एते दोषा भवन्ति, यथा–कश्चित्साधुरप्रावृतसाधनो भवति, अग्रभागे चर्मणा अनाच्छादितलिङ्गो दुश्चर्मा इत्यर्थः, ततस्तदनुग्रहार्थं चोलपट्टोऽनुज्ञातः, तथा कश्चित् साधुर्वातिको भवति–वातेन च तदीय-साधनमुच्छूनं भवति, ततस्तदनुग्रहाय चोलपट्टोऽनुमतः, तथा प्रकृत्यैव कश्चित् ह्रीमान्–लज्जालुर्भवति ततस्तत्प्रावरणाय चोलपट्टः, तथा स्वभावेनैव कश्चित् 'खङ्कपजणण' त्ति बृहत्साधनो भवति लोकश्च तथाविधं तं दृष्ट्वा हसति, ततस्तथाविधानुग्रहाय चोलपट्टः, तथा लिङ्गोदयार्थं चोलपट्टः कदाचिन्मनोहर-

१ अध्यासे-सं. ॥ २ तुलना-बृहत्कल्पटीका पृ. ७३०, पं २० तः ॥

रूपामनुपमयौवनां वनितां विलोक्य लिङ्गस्योदयो भवति अथवा तदीयं लिङ्गं मनोरमं चोलपट्टानाच्छादितं दृष्ट्वा स्त्रिया एव लिङ्गोदयो भवति ततस्तत्प्रच्छादनाय पट्टः—चोलपट्टोऽनुज्ञात इति ॥ ५१८ ॥

इदानीमिहैव द्वारे उपकरणादिव्यवस्थार्थं साधुभेदानाह—

[1]अवरेवि सयंबुद्धा हवंति पत्तेयबुद्धमुणिणोऽवि ।
पढमा दुविहा एगे तित्थयरा तदियरा अवरे ॥५१९॥
तित्थयरवज्जियाणं बोही उवही सुयं च लिंगं च ।
नेयाइं तेसि बोही जाइस्सरणाइणा होइ ॥ ५२० ॥
मुहपत्ती रयहरणं कप्पतिगं सत्त पायनिज्जोगो ।
इय बारसहा उवही होइ सयंबुद्धसाहूणं ॥५२१॥
हवइ इमेसि मुणीणं पुव्वाहीयं सुअं अहव नत्थि ।
जइ होइ देवया से लिंगं अप्पइ अहव गुरुणो ॥५२२॥
जइ एगागीविहु विहरणक्खमो तारिसी व से इच्छा ।
तो कुणइ तमन्नहा गच्छवासमणुसरइ निअमेणं ॥५२३॥
पत्तेयबुद्धसाहूण होइ वसहाइदंसणे बोही ।
पोत्तिय-रयहरणेहिं तेसि जहण्णो दुहा उवही ॥५२४॥

१ तुलना- धर्मसङ्ग्रहः टीका भा. २/पृ. ६८A ॥

मुहपोत्ती रयहरणं तह सत्त य पत्तयाइनिज्जोगो ।
उक्कोसोऽवि नवविहो सुयं पुणो पुव्वभवपढियं ॥५२५॥
एक्कारस अंगाइं जहन्नओ होइ तं तदुक्कोसं ।
देसेण असंपुन्नाइं हुंति पुव्वाइं दस तस्स ॥५२६॥
लिंगं तु देवया देइ होइ कइयावि लिंगरहिओवि ।
एगागी किंवय विहरइ नागच्छइ गच्छवासे सो ॥५२७॥

'अपरेऽवी'[1]त्यादिगाथानवकम्, 'अपरेऽपि' जिनकल्पिक-स्थविरकल्पिकेभ्यः पूर्वभणितेभ्योऽन्येऽपि मुनयो भवन्ति [2]स्वयम्बुद्धाः प्रत्येकबुद्धाश्च, अपिश्चार्थे, तत्र प्रथमाः—स्वयम्बुद्धा द्विविधाः—

१ त्यादि अपरे-सं. ॥ २ तुलना "सयंबुद्धकेवलनाणं जं सयं चेव संबुज्झिऊणं किंचि आवरियं उवसंपज्जति, ततो पच्छा जं तस्स केवलणाणं तं सयंबुद्धकेवलणाणं भण्णति। पत्तेयबुद्धकेवलणाणं णाम जहा णमिस्स रायरिसिणो, ते य पत्तेयबुद्धा सयं चेव संबुज्झिऊण सयं चेव पव्वज्जं अब्भुवगच्छंति तेसिं जं केवलणाणं तं पत्तेयबुद्धकेवलणाणं भन्नति; अथवा सयं अधिगिज्जं जातिसरणादिकारणं पडुच्च बुद्धा सयंबुद्धा, फुडतरं वा अभिधीयते, बाह्यप्रत्ययमन्तरेण ये प्रतिबुद्धास्ते सयंबुद्धाः, ते य दुविहा तित्थगरा वइरित्ता य, इह वतिरित्तेहिं अहिगारो, किंच सयंबुद्धस्स बारसविहोऽवि उवही भवति, पुव्वाधीतं से सुतं भवति वा ण वा, जति से णत्थि तो लिंगं नियमा गुरुसंनिहे पडिवज्जति गच्छे य विहरति, अहवा पुव्वाधीतसुयसंभवो अत्थि तो से लिंगं देवता पयच्छति गुरुसंनिहे वा पडिवज्जति जदि य एगविहारविहरणजोग्गो इच्छा य से तो एगो चेव विहरति, अन्नहा गच्छे विहरति, एयम्मि भावे ठिता सिद्धा, पती पती (पत्तेयत्ता) ओ वा भावतो सिद्धा पत्तेयबुद्ध० पत्तेयं बाह्यं वसभादि-

एके तीर्थकरास्तदितरे—तीर्थकरव्यतिरिक्ताः, 'अपरे' द्वितीयाः, इह च तीर्थकरव्यतिरिक्तैरधिकारः, तत्र स्वयम्बुद्ध-प्रत्येकबुद्धानां बोध्युपधि-श्रुत-लिङ्गकृतो विशेषः ॥५१९॥

तत्र स्वयम्बुद्धानां बोध्यादीन्याह—'तित्थे' त्यादि गाथाचतुष्टयम्, तीर्थकरवर्जितानां स्वयम्बुद्धानां बोधिः—धर्मप्राप्तिः, उपधिः—उपकरणानि, श्रुतं—ज्ञानम्, लिङ्गं चेति ज्ञेयानि प्रत्येकबुद्धेभ्यो भेदप्रतिपादकानि चत्वारि स्थानानि, तान्येव क्रमेणाह—तेषां बोधिर्बाह्यप्रत्ययमन्तरेणैव निजजातिस्मरणादिना भवति, तथा मुखपोत्तिका रजोहरणं कल्पत्रिकं सप्तविधश्च पात्रनिर्योग इति द्वादशधा उपधिर्भवति स्वयम्बुद्धसाधूनाम्, तथा एषां स्वयम्बुद्धसाधूनां पूर्वजन्मन्यधीतं—पठितं श्रुतं भवति अथवा नैव भवति पूर्वाधीतं श्रुतं किन्तु नवतर-पठितमेव, ततो यदि पूर्वाधीतं श्रुतं तेषामुपतिष्ठते तदा 'से' त्ति तस्य स्वयम्बुद्धस्य देवता 'लिङ्गं' रजो-हरणादिकमर्पयति, उपलक्षणमेतत्, गुरुसन्निधौ वा गत्वा लिङ्गं प्रतिपद्यते, अथ न पूर्वाधीतं श्रुतमुपतिष्ठते तदा गुरव एव लिङ्गमर्पयन्ति, अयं च यद्येकाक्यपि विहरणक्षमो-विहारं कर्तुं समर्थस्तादृशी वा तस्य इच्छा—एकाकि-विहारकरणेऽभिलाषस्ततः करोति तम्—एकाकिविहारम्, 'अन्यथा' एकाकिविहाराक्षमतायामिच्छाया अभावे

कारणमभिवीक्ष्य बुद्धा पत्तेयबुद्धा, एतेसिं णियमा पत्तेयं विहारो जम्हा तम्हा ते पत्तेयबुद्धा; जहा करकंडुमादयो, किंच पत्तेयबुद्धाण जहन्नेण दुविहो, उक्कोसेण णवविहो, उवधी णियमा पाउरणवज्जो भवति किंच पत्तेयबुद्धाणं नियमा पुव्वाधीतं सुतं भवति. जहन्नेण एक्कारसंगी, उक्कोसेण भिन्नदसपुव्वी. लिंगं च देवया पयच्छति, लिंगवज्जितो वा भवति। जतो भणितं रुप्पं पत्तेयबुद्धा' [आव. नि.]" इति आवश्यकचूर्णिः पृ. ७५ तः। आव. मलय. टीका अपि पृ. ८४ A तः द्रष्टव्या ॥

च गच्छवासमनुसरति—गच्छ एवास्ते **'नियमेन'** निश्चयेन, इदं च पूर्वाधीतश्रुतसद्भाव एव द्रष्टव्यम्, पूर्वाधीतश्रुताभावे तु गच्छवास एवावश्यं व्यवतिष्ठते इति, तथा चोक्तम्—

"पुव्वाहीयं सुयं से हवइ वा न वा, जइ से नत्थि तो लिंगं नियमा गुरुसंनिहे पडिवज्जइ गच्छे य विहरइत्ति, अह पुव्वाहीयसुयसंभवो अत्थि तो से लिंगं देवया पयच्छइ, गुरुसन्निहे वा पडिवज्जइ, जइ एगविहारविहरणे समत्थो इच्छा व से तो एक्को चेव विहरइ, अन्नहा गच्छे विहरइत्ति" [तुलना-आव० चूर्णिः पृ.७५] ॥५२०-५२३॥

इदानीं प्रत्येकबुद्धानां बोध्यादीनि चत्वारि स्थानान्याह-'पत्ते' इत्यादिगाथाचतुष्टयम्, प्रत्येकबुद्धसाधूनां बाह्यवृषभादिकारणदर्शने बोधिर्नियमतो भवति, तथा तेषामुपधिर्द्विविधो—जघन्य उत्कृष्टश्च, तत्र जघन्यो मुखपोतिका-रजोहरणाभ्यां द्विधा, उत्कृष्टोऽपि मुखपोतिका-रजोहरण-सप्तविधपात्रनिर्योगरूपो नवविधः, तथा श्रुतं पुनः पूर्वभवपठितमेव तेषां नियमतो भवति, तच्च जघन्यत एकादशाङ्गानि—आचारादीनि, तथोत्कृष्टं श्रुतं देशेन—एकदेशेनोनानि—असम्पूर्णानि भवन्ति पूर्वाणि दश **'तस्य'** प्रत्येकबुद्धस्य, लिङ्गं तु—रजोहरणादिकं देवतैव तस्य ददाति कदाचिच्च लिङ्गरहितोऽपि भवति तथा एकाकयेव विहरति वसुन्धरायाम्, न पुनरागच्छति गच्छवासे स इति ॥ ५२४-२७ ॥

इदानीं **'साहुणीणोवगरणाइं'** ति द्वापष्टं द्वारमाह—

उवगरणाइं चउद्दस अचोलपट्टाइं कमढयजुयाइं ।
अज्जाणवि भणियाइं अहियाणिवि हुंति ताणेवं ॥ ५२८ ॥

[1]उग्गहऽणंतग १ पट्टो २ अद्धोरुय ३ चलणिया ४ य बोद्धव्वा ।
अब्भिंतर ५ बाहिनियंसणी ६ य तह कंचुए ७ चेव ॥ ५२९ ॥
उक्कच्छिय ८ वेगच्छिय ९ संघाडी १० चेव खंधकरणी ११ य ।
ओहोवहिंमि एए अज्जाणं पन्नवीसं तु ॥ ५३० ॥ [तु. ओघनि. ६७६-७]
अह उग्गहणंतगं नावसंठियं गुज्झदेसरक्खट्ठा ।
तं तु पमाणेणेक्कं घणमसिणं देहमासज्ज ॥ ५३१ ॥
पट्टोवि होइ एगो देहपमाणेण सो उ मइयव्वो ।
छायंतोग्गहणंतं कडिबद्धो मल्लकच्छा व ॥ ५३२ ॥
अद्धोरुगोवि ते दो वि गिण्हउं छायए कडीभागं ।
जाणुपमाणा चलणी असीविया लंखियाए व ॥ ५३३ ॥
अंतोनियंसणी पुण लीणतरी जाव अद्धजंघाओ ।
बाहिरगा जा खलुगा कडीइ दोरेण पडिबद्धा ॥ ५३४ ॥
छाएइ अणुक्कुइए उरोरुहे कंचुओ असिव्वियओ ।
एमेव य ओक्कच्छिय सा नवरं दाहिणे पासे ॥ ५३५ ॥

१ एतद् गाथाषट्कं (५२९-५३८) निशीथभाष्ये १३९८-१४०७ क्रमाङ्केन बृहत्कल्प० भाष्ये ४०८२-४०९१ क्रमाङ्केन पञ्चवस्तुके ७८२, ७८३, ८२५ - ८३२ क्रमाङ्केन उपलभ्यते, तत्र स्वल्पपाठभेदो दृश्यते ॥

वेगच्छिया उ पट्टो कंचुगमुक्कच्छिगं च छायंतो ।
संघाडीओ चउरो तत्थ दुहत्था उवसयंमि ॥ ५३६ ॥
दोन्नि तिहत्थायामा भिक्खट्ठा एग एगमुच्चारे ।
ओसरणे चउहत्थाऽनिसण्णपच्छायणा मसिणा ॥ ५३७ ॥
खधगरणी उ चउहत्थवित्थडा वायविहुयरक्खट्ठा ।
खुज्जकरणी उ कीरइ रूववईणं कुडहहेऊ ॥ ५३८ ॥ [तु.-ओघनि. भाष्य ३१३-३२०]

[1]'उवगरणाइं' इत्यादिगाथैकादशकम्, पूर्वोक्तानि 'पसं पत्ताबंधो' [गाथा ४९१] इत्यादीनि उपकरणादीनि चतुर्दश अचोलपट्टानि-चोलपट्टकरहितानि [2]कमठकयुतानि आर्यिकाणामपि भणितानि, पात्रादीनां च प्रमाणं गणनया स्वरूपेण च स्थविराणामिव द्रष्टव्यम्, [3]कमठकं च-लेपिततुम्बक-भाजनरूपं कांस्यमयबृहत्तरकरोटिकाकारमेकैकं संयतीनां [4]निजोदरप्रमाणेन विज्ञेयम्, संयतीनां च मण्डलीमध्ये पतद्ग्रहको न भ्रमति ❀ एकस्याः संयत्या अपरस्याः कार्ये न समायाति ❀ तुच्छस्वभावात् किन्तु कमठक एवार्यिका भोजनक्रियां कुर्वन्तीत्यतः कमठकग्रहणम्, 'अहियाणिव होंति ताणेवं' ति अधिकान्यपि-पूर्वोक्तचतुर्दशोपकरण-व्यतिरिक्तान्यप्युपकरणान्यार्यिकाणां भवन्ति, तानि चैवम् ॥५२८॥

१ उवेत्यादि-मु.॥ २ कमढग-मु. ॥ ३ कमढकं-मु. ॥
४ तुलना-"कमढगपमाणं उदरप्पमाणओ संजईण विण्णेयं । सइगहणं पुण तस्सा लहुसगदोसा इमासिं तु" इति पञ्चवस्तुके ८२४ ॥ ❀ ❀ चिह्नद्वयमध्यवर्तीपाठः जे. सं. नास्ति ॥

यथा- [1]अवग्रहानन्तकं १ पट्टकः २ अर्धोरुकं ३ चलनिका ४ च बोद्धव्या, अभ्यन्तरनिवसनी ५ बहिर्निवसनी ६ च तथा कञ्चुकश्चैव ७ [2]उपकक्षिका ८ वैकक्षिका ९ सङ्घाटी १० चैव स्कन्धकरणी ११ च एते [3]आर्यिकाणां सम्बन्धिनि ओघोपधौ [4]पञ्चविंशतिभेदाः ॥५२९-३०॥

एनान् स्वयमेव व्याचष्टे-'अथे'-त्यानन्तर्ये, [5]अवग्रह इति योनिद्वारस्य सामयिकी संज्ञा, तस्यानन्तकं-वस्त्रम् अवग्रहानन्तकम्, तच्च नौसंस्थानं-वेडिकाकारं मध्यभागे विशालं पर्यंतभागयोस्तु तनुकमित्यर्थः, गुह्यदेशरक्षार्थं-ब्रह्मचर्यसंरक्षणार्थं गृह्यते, तत्पुनर्गणनाप्रमाणेनैकं भवति, तथा आर्तव-

१ इतः आरभ्य तुलना-निशीथचूर्णिः भा. २। पृ. १८९ तः, बृ.क.टी. पृ ११९४ तः, पंचवस्तुटीका पृ-१२२A,१२८ ॥
२ उत्कक्षिका. पंचवस्तुटीका: ७८३। औपकक्षिकी-इति बृ. क. टी. ४०८३ ॥ ३ आर्यिका सं० सं० ॥
४ "अयं चार्यिकाणां संबन्धी अवधिस्त्रिप्रकारो भवति एकोऽपि सन् उत्तम-मध्यम-जघन्यभेदेन, तत्र तस्यार्यिकावधिमध्ये उत्कृष्टः प्रधानोऽष्टविधः एतदेवाह—

'उक्कोसो अट्ठविहो मज्झिमओ होइ तेरसविहो उ। जहन्नो चउव्विहोवि य तेण परमुवग्गहं जाण' ॥ओघ. नि.६७८॥

उत्कृष्टोऽष्टविधस्तद्यथा-पात्रकं संघाडीओ चत्तरो संधकरणी अंतोनिवंसणी बाहिणिवंसणी य, अयमष्टविध उत्कृष्टः प्रधानः। पत्ताबंधो पडलाइं रयत्ताणं रयहरणं मत्तयं उग्गहणंतयं पट्टओ अद्धोरुगं चलणि कंचुगो उक्कच्छिया वेकच्छिया कमढगा अयमार्यिकावधेर्मध्य त्रयोदशभेदो मध्यमोपधिरिति। पायट्ठवणं पायकेसरिया गोच्छओ मुहपत्तिया चेति आर्यिकावधेर्मध्ये जघन्यः-अशोभनश्चतुष्प्रकार इति। अतः परं यः कारणे सति संयमार्थं गृह्यते सोऽवमहावधिरित्येवं जानीहि।" इति ओघनिर्युक्तिवृत्तिः पृ. २०६ B ॥
५ तुलना-"यथा चोलस्स पट्टगो चोलपट्टगो एवं उग्गहस्स णंतगो उग्गहणंतगो इति। उग्गह इति जोणिदुवारस्स सामइकी संज्ञा। अहवा उदुयं उग्गिण्हतीती उग्गहणंतयं।" निशीथचूर्णिः गा० १५००। भा. २-पृ. १८९ ॥

बीजपातसंरक्षणार्थं घनं–घनवस्त्रेण क्रियते, पुरुषसमानकर्कशस्पर्शपरिहरणार्थं च मसृणं–मसृणवस्त्रेण क्रियते, मसृणे हि वस्त्रे स्त्रीयोनिस्पर्शसदृशः स्पर्शो भवति, सजातीयश्च सजातीये न प्रभवतीति मसृणग्रहणम्, तथा **'देहमाश्रित्य'** देहानुमानेन प्रमाणं तस्य करणीयम्, देहो हि कस्याश्चित्तनुः कस्याश्चित्स्थूलः ततस्तदनुसारेण विधेयमित्यर्थः ॥५३१॥

पट्टोऽपि गणनाप्रमाणेन भवत्येकः पर्यन्तभागवर्तिघोटकबन्धः पृथुत्वेन चतुरङ्गुलप्रमाणः समतिरिक्तो वा दैर्घ्येण तु स्त्रीकटीप्रमाणः, स च देहप्रमाणेन भजनीयः, पृथुलकटीभागाया दीर्घः, कृशकटीभागायाश्च ह्रस्व इत्यर्थः, अवग्रहानन्तकस्य पुरतः पृष्ठतश्च द्वावपि पर्यन्तभागावाच्छादयन् [1]वर्धावत्कट्यां बध्यते, तस्मिंश्च बद्धे [2]मल्लकच्छावद्भवति ॥५३२॥

[3]अध ऊरुकार्धं भजतीति निरुक्तवशादधोरुकः, तौ द्वावपि–अवग्रहानन्तकपट्टौ गृहीत्वा–अवष्टभ्य सर्वं कटीभागमाच्छादयति, स च मल्लचलनाकृतिः, [4]केवलम् ऊर्वोरन्तरे ऊरूद्वये च [5]कसाबद्धः, चलनकाऽपीदृश्येव, केवलमधो जानुप्रमाणा अस्यूता कसानिबद्धा लङ्घिका–वंशोपरिनर्तकी तत्परिधानवत् ॥५३३॥

---

१ पार्श्वावत् सं. ॥ २ मल्लकक्षा० इति बृहत्कल्प. टीका गा० ४०८५ ॥

३ "अड्ढो-उरुकार्धं भजतीति अड्ढोरुगो" इति नि. चूर्णिः भा. २। पृ.१९० । 'तथा अर्धं उरुकाद्भिमजतीति निरुक्तात्' इति धर्मसङ्ग्रहटीका भा. २ । पृ. ६४A ॥

४ तुलना-"नवरं ऊरुगान्तरे ऊरुगेसु च योणिबंधो । चलणिगा वि एरिसा चेव,णवरं अद्धे जाणुप्पमाणा योत्रकनिबद्धा लंखिया-परिधानवत् ॥१४०२॥" इति निशीथचूर्णिः भा. २-पृ. १६०॥ ५ कसाबद्धा- मु. ॥

अन्तर्निवसनी पुनरुपरि कटीभागादारभ्य अधः अर्धजङ्घं[1] यावद्भवति, सा च परिधानकाले लीनतरा परिधीयते, आकुलतया जनहासो मा भूदिति, बहिर्निवसनी या उपरि कटीत आरभ्य अधो यावत् खलुगो-गुल्फः कटयां च दवरकेण प्रतिबद्धा भवति ॥५३४॥

[2]इदमधः शरीरस्य षड्विधमुपकरणमुक्तम्, अथ ऊर्ध्वकायस्य कथ्यते, तत्र--'छाएई'[3] त्यादि, दैर्घ्यमाश्रित्य स्वहस्तेनार्धतृतीयहस्तप्रमाणः पृथुत्वेन तु हस्तमानः यद्वा, निजनिजशरीरप्रमाणनिष्पन्नः, अस्यूतः पार्श्वद्वयेऽपि कसावद्धः [4]कापालिककञ्चुकवत्कञ्चुकः क्रियते, स च उरोरुहौ-स्तनौ छादयति, किम्भूतौ ?, तत्राह-'अणुक्कुइए' त्ति अणु-स्वल्पं यथा भवति एवं कुचितौ--कञ्चुकाभ्यन्तरे ससंचारौ न

१ °जङ्घे सं० । जङ्घा-बृ.क. टीका पृ. ११५४ ॥

२ तुलना-"अधो सरीरस्स षड्विधमुपकरणं दवरकसप्तममाहितं ।" इति निशीथचूर्णिः भा. २ । पृ. १६० ॥

३ तुलना- "प्रच्छादयति "अणुकुए" त्ति अनुकुचिता अनुद्विग्ना इत्यर्थः, गंड इति स्तना । अथवा 'अणुकुंचित'त्ति अनुः स्वल्पं, कुंच स्पन्दने, कंचुकाभ्यन्तरे सप्रविचारा, ण गाढमित्यर्थः । गाढ-परिहरणे प्रतिविभागविभक्ता जनहार्या भवन्ति, तस्मात् कंचुकस्य प्रसिद्धिलं परिधानमित्यर्थः । स च कंचुको वीहत्तणेण सहत्थेणं अड्ढाइज्ज-हत्थो, पुहुत्तेणं हत्थो, असिव्वितो, कापालिककंचुकवत्, उभओ कडिदेसे जोत्तयपडिबद्धो । अहवा प्रमाणं सरीरात् णिप्पादयितव्यमित्यर्थः । कच्छाए समीवं उवकच्छं, वकारलोपं काउं तं छादयतीति उक्कच्छिया पायवसीलीए उक्कच्छिया । एमेव य उक्कच्छियाए प्रमाणं वक्तव्यम् । सा य समचउरंसा । सहत्थेण दिवड्ढ हत्था । उरं दाहि-णपासं पट्ठिं च च्छादेति परिहिज्जति । खंधे वामपासे य जोत्तपडिबद्धा भवति ॥ १४०४ ॥" इति निशीथचूर्णिः भा. २-पृ. १६०॥ ४ तुलना-"कापालिककन्थावत् " इति धर्मसङ्ग्रहटीका भा. २ । ६४A ॥

गाढं सम्पृक्तावित्यर्थः. गाढपरिधाने हि अतिविविक्तविभागतया जननयनमनःस्पृहणीयरूपौ भवतः, तस्मात्कञ्चुकस्य शिथिलमेव परिधानं विधेयमिति । कक्षायाः समीपमुपकक्षम्, तदाच्छादिका [1]उपकक्षिका 'एवमेव' कञ्चुकवद्भवति, सा च अस्यूता समचतुरस्रा स्वहस्तेन सार्धहस्तप्रमाणा उरोभागं दक्षिणपार्श्वं पृष्ठं च प्रच्छादयन्ती वामस्कन्धे-वामपार्श्वे च वीटकप्रतिबद्धा परिधीयते ॥५३५॥

वेगच्छिद्यत्ति पूर्वार्धम्, उपकक्षिकाविपरीतो वैकक्षिकालक्षणः पट्टो भवति, तुशब्द उपकक्षिकासादृश्यावधारणे वामपार्श्वपरिधानविशेषे वा द्रष्टव्यः, स च कञ्चुकमुपकक्षिकां चाच्छादयन् वामपार्श्वे परिधीयते ।

'संघाडीओ' इत्यादि [2]सार्द्धगाथा, उपरि परिभोगाय चतस्रः सङ्घाट्यो भवन्ति, एका द्विहस्ता पृथुत्वेन द्वे त्रिहस्ते, एका च चतुर्हस्ता, दैर्घ्येण तु चतस्रोऽपि सार्धहस्तत्रयप्रमाणाश्चतुर्हस्ता वा द्रष्टव्याः, तत्र 'द्विहस्ता' द्विहस्तविस्तृता उपाश्रये भवति, न तां विहाय प्रकटदेहया कदाचिदासितव्यमिति भावः, ये च द्वे 'त्रिहस्तायामे' त्रिहस्तविस्तृते भवतस्तयोर्मध्ये एका भिक्षार्थम् एका उच्चारे भवति, भेदग्रहणं गोचर्याद्युपलब्धतुल्यवेषादिपरिहारार्थम्, तथा 'अवसरणे'-समवसरणे व्याख्याने स्नात्रादौ 'चतुर्हस्ता' चतुर्हस्तविस्तृता सङ्घाटिर्भवति, सा च अनिपण्णप्रच्छादनायोपयुज्यते, यतो न तत्र संयतीभिरुपवेष्टव्यं किन्तु ऊर्द्ध्वाभिरेव स्थातव्यम्, ततस्तया स्कन्धादारभ्य पादौ यावद् व्रतिन्यो

१ औपकक्षिका मु.। "कक्षायाः समीपमुपकक्षम्,तत्र भवा औपकक्षिकी,अध्यात्मादित्वादिकण् प्रत्ययः।" इति बृहत्कल्पटीका पृ. ११५५। "कक्षासमीपमुपकक्षम् , तथाऽऽच्छादिकोपकक्षिकोत्कक्षिका वा।" इति धर्मसङ्ग्रह टीका गा. २। पृ. ६४ A ॥ २ सार्धा गाथा-मु. ॥

वपुः प्रच्छादयन्तीति, एताश्च पूर्वप्रावृतवेषप्रच्छादनार्थं श्लाघादीप्त्यर्थं च मसृणाः क्रियन्ते, चतस्रोऽपि च गणनाप्रमाणेन एकमेव रूपम्, युगपत्परिभोगाभावात् ॥५३६-५३७॥

'स्कंधे'त्यादि स्कन्धकरणी 'चतुर्हस्तविस्तृता' चतुर्हस्तदीर्घा च समचतुरस्रा प्रावरणस्य वातविधुतरक्षणार्थं चतुष्पुटीकृत्य स्कन्धे क्रियते, सैव च स्कन्धकरणी रूपवत्याः संयत्याः [1]कुड्डभनिमित्तं कुब्जकरण्यपि क्रियते, पृष्ठप्रदेशे स्कन्धादधः संवृततया मसृणवस्त्रपट्टकेन उपकक्षिका-वैकक्षिकानिबद्धया तया विरूपतापादनाय [2]कुड्डभं विधीयते इति [3]भावः ॥५३८॥६२॥

सम्प्रति 'जिणकप्पियाण संखा उक्किट्ठा एगवसहीए' त्ति त्रिषष्टं द्वारमाह—

जिणकप्पिया य साहू उक्कोसेणं तु एगवसहीए ।
सत्त य हवंति कहमवि अहिया कइयावि नो हुंति ॥५३९॥

'जिणकप्पिया य गाहा', इह च विनेयजनानुग्रहार्थं किञ्चिदप्रतीतार्थत्वादुत्तरत्र यथालन्दकल्पादौ

१ कुडुम० बृहत्कल्पटीका पृ. ११९६ ॥ २ कुडुभं बृहत्कल्पटीका पृ. ११९६ ॥

३ "उपसंहरन्नाह-संघातिमेतरो वा, सव्वोऽवेसो समासओ उवधि । पासगवद्धमझुसिरो जं चाऽऽइण्णं तगं सेयं ॥ बृहत्कल्पभा. ४०९२ ॥ सर्वोऽपि 'एषः' अनन्तरोक्त उपधिः समासतो द्विधा-सङ्घातिम इतरश्च । द्वित्र्यादि-खण्डानां मीलनेन निष्पन्नः सङ्घातिमः, 'इतरः' तद्विपरीतोऽसङ्घातिमः । अयं च 'पाशकबद्धः' कसाबद्धः तथा 'अशुषिरः' गृहिसीवनिकारहितः प्रतिथिग्गलवर्जितो वा । यच्चात्र द्रव्य-क्षेत्र-काल-भावेषु संविग्नगीतार्थैः पूर्वसूरिभिराचीर्णं तत् सर्वमपि 'ज्ञेयं' सम्यगुपादेयतया मन्तव्यम् ॥४०९२॥"इति बृहत्कल्पटीका पृ. ११९६ ॥

सप्रयोजनत्वाच्च प्रथमं [1]जिनकल्पिकस्वरूपमेव निरूप्यते। तत्र जिनकल्पं प्रतिपित्सुना प्रथममेव [2]पूर्वापररात्रकाले तावदिदं चिन्तनीयं-विशुद्धचारित्रानुष्ठानेन कृतं मयाऽऽत्महितं शिष्यादिनिष्पादनतः परहितं च, जातश्चेदानीं मम गच्छपरिपालनसमर्थाः शिष्याः, ततो विशेषतः साम्प्रतमात्महितं ममानुष्ठानमुचितम् इति, विचिन्त्य चेदं [3]सति परिज्ञाने निजमायुःशेषं स्वयमेव पर्यालोचयति, परिज्ञानाभावे पुनरन्यमनिशायिनमाचार्यादिकं पृच्छति, तत्र स्वल्पे स्वायुषि भक्तपरिज्ञानादिनामन्यतमन्मरणमङ्गीकरोति, अथ दीर्घमायुः केवलं जङ्घाबलपरिक्षीणस्तदा वृद्धवासं स्वीकुरुते, पुष्टायां तु शक्तौ जिनकल्पं प्रतिपद्यते, तं च प्रतिपत्तुकामः पूर्वमेव पञ्चभिस्तुलनाभिरात्मानं तोलयति, तद्यथा–

" [4]तवेण सत्तेण सुत्तेण,एगत्तेण बलेण य। तुलणा पंचहा वुत्ता जिणकप्पं पडिवज्जओ ॥१॥"[बृ.क.भा.

१ जिनकल्पस्व० सं.। इत आरभ्य तुलना-धर्मसङ्ग्रहटीका भा. २। पृ. १८३ Aतः ॥ तुलना-"सो पुव्वावरकाले जागरमाणो उ धम्मजागरिअं उत्तमपसत्थझाणो हिअएण इमं विचिंतेइ ॥" इति पञ्चवस्तुकः १३७२॥

२ "अणुपालिओ य दीहो, परियाओ वायणा वि मे दिन्ना। निप्फाइया य सीसा, सेयं खु महप्पणो काउं" ॥ इति बृ.क.भा. गाथा १२८१॥ तुलना-पञ्चवस्तुकः गाथा १३७२तः ॥

३ तुलना-"सयमेव आउकालं, नाउं पोच्छित्तु वा बहुं सेसं। सुबहुगुणलाभकंखी, विहारमब्भुज्जयं भजइ" ॥ इति बृ. क. भा. गाथा १२८४ ॥ पञ्चवस्तुकः १३७७॥

४ अस्य क्षेमकीर्तिसूरिकृता व्याख्या-"तपसा सत्त्वेन सूत्रेण एकत्वेन बलेन च एवं 'तुलना' भावना पञ्चधा प्रोक्ता जिनकल्पं प्रतिपद्यमानस्य इति निर्युक्तिगाथासमासार्थः" ॥१२८॥ इति बृहत्कल्प टीका पृ. ॥ ४०७ ॥

१३२८] तुलना भावना परिकर्म चेत्येकार्थानि, [1]तत्राचार्योपाध्याय-प्रवर्तक-स्थविर-गणावच्छेदकस्वरूपाः प्रायः पञ्चैव जनाः प्रशस्ताभिरेताभिः पञ्चभिर्भावनाभिर्जिनकल्पं प्रतिपित्सवः प्रथममेवात्मानं भावयन्ति, अप्रशस्तास्तु कन्दर्प-देवकिल्बिषा-ऽऽभियोगिका-ऽऽसुर-सम्मोहस्वरूपाः पञ्च भावना वक्ष्यमाणाः सर्वथा दूरतः परिहरन्ति, [2]तत्र तपसाऽऽत्मानं भावयंस्तथा क्षुधां पराजयति यथा देवाद्युपसर्गादिनाऽनेषणीयादिकरणतो यदि षण्मासान् यावदाहारं न लभते तथापि न बाध्यते। [3]सत्त्वभावनया तु भयं निद्रां च

१ तुलना-"गणि-उवज्झाय-पवित्ती थेर-गणच्छेइआ इमे पञ्च। पायमहिगारिणो इह तेसिमिमा होइ तुलणा उ॥" पञ्चवस्तुकः १३७८॥ २ तुलना-"जो जेण अणब्भत्थो पोरिसिमाई तवो उ तं तिगुणं। कुणइ छुआविजयट्ठा गिरिनइसीहेण दिट्ठंतो॥१३२९॥ एक्केक्कं ताव तवं, करेइ जह तेण कीरमाणेणं। हाणी न होइ जइआ, वि होज्ज छम्मासुवसग्गो ॥१३३०॥ अप्पाहारस्स न इंदियाइ विसएसु संपवत्तंति। नेव किलम्मइ तवसा, रसिएसु न सज्जए यावि॥१३३१॥ तवभावणाइ पंचिंदियाणि दंताणि जस्स वसमिंति। इंदियजोग्गा (गा) यरिओ समाहिकरणाइं कारयए॥१३३२॥" इति बृहत्कल्पभाष्यम्। पञ्चवस्तुकः १३९०-३। विशेषार्थिना द्रष्टव्या बृहत्कल्पटीका पृ.४० ७ पञ्चवस्तुकटीका पृ.१९९॥

३ तुलना-"जे वि य पुढिवं निसि निग्गमेसु विसहिंसु साहस-भयाइं। अहि-तक्कर-गोवाई, विसिंसु घोरे य संगामे ॥१३३३॥ पासुत्ताण तुयट्टं, सोयव्वं जं च तीसु जामेसु। थोवं थोवं जिणइ उ, भयं च जं संभवइ जत्थ॥१३३४॥ भोगजढे गंभीरे, पव्वए कोट्टए अलिंदे वा। तणुसाइ जागरो वा, झाणट्ठाए भयं जिणइ॥१३३५॥ लिक्कस्स व खइयस्स व, मूसिगमाईहिं वा निसिचरेहिं। जह सहसा न वि जायइ रोमंचुब्भेय चाडो वा॥१३३७॥ सविसेसतरा बाहिं, तक्कर-आरक्खि-सावयाईया। सुण्णाघर-सुसाणेसु य, सविसेसतरा भवे तिविहा॥१३३८॥ देवेहिं भेसिओ वि य, दिया व राओ व भीमरूवेहिं। तो सत्तभावणाए, वहइ भरं निब्भओ सयलं॥१३३९॥" इति बृहत्कल्पभाष्यम्। विशेषार्थं द्रष्टव्या बृहत्कल्पटीका पृ. ४०८॥ सटीकः पञ्चवस्तुकः १३९५-७ अपि द्रष्टव्यः॥

व्याक्रियते, तत्र भय निद्राक्षयार्थं रात्रौ सुप्तेषु सर्वसाधुषूपाश्रय एव कायोत्सर्गं कुर्वतः प्रथमा सत्त्वभावना भवति, द्वितीयाद्यास्तूपाश्रयबाह्यादिप्रदेशेषु, आह च–

" [1]पढमा उवस्सयंमि य बीया बाहिं तइया चउक्कंमि । सुन्नघरंमि चउत्थी अह पंचमिया मसाणंमि ॥१॥" [बृ. क. भाष्य १३३५]

[2]सूत्रभावनया तु निजनामवत्तथा परिचितं सूत्रं करोति यथा दिवा रात्रौ वा शरीरच्छायाद्य-

---

१ अस्य क्षेमकीर्तिसूरिकृता व्याख्या "प्रथमा प्रतिमा उपाश्रये १ द्वितीया उपाश्रयाद् बहिः २ तृतीया 'चतुष्के' चत्वरे ३ चतुर्थी शून्यगृहे ४ पञ्चमी श्मशाने ५ ॥ बृ. क. टीका पृ. ४०८ ॥ तुलना-पञ्चवस्तुकः १३६५ टीका च ॥

२ तुलना-"जइ वि य सनामंमिव परिचियं सुअं अणहिय-अहीणवन्नाई । कालपरिमाणहेउं, तहावि खलु तज्जयं कुणइ ॥ बृ. क. भा. १३४०॥ यद्यपि स्वनामेव तस्य श्रुतं परिचितम् अनधिका-ऽहीनवर्णादि' अनत्यक्षरम् अहीनाक्षरम् आदिशब्दाद् अव्याविद्धाक्षरादिगुणोपेतं च तथापि कालपरिमाणहेतोः 'तज्जयं' श्रुताभ्यासं करोति ॥१३४०॥ कथम् ? इति चेद् उच्यते-उस्सासाओ पाणू तओ य थोवो तओ विय मुहुत्तो ॥ मुहुत्तेहिं पोरिसीओ जाणेइ निसा य दिवसा य ॥ बृ. क. भा. १३४१ ॥ श्रुतपरावर्त्तेनानुसारेणैव सम्यगुच्छ्वासमानं कलयति, तत उच्छ्वासात् 'प्राणः' उच्छ्वास-निःश्वासात्मकः, ततश्च प्राणात् 'स्तोकः' सप्तप्राणमानः, ततोऽपि च स्तोकाद् 'मुहूर्त्तः' घटिकाद्वयमानः, मुहूर्त्तैश्च पौरुष्यस्तेन भगवता ज्ञायन्ते ताभिश्च पौरुषीभिर्निशाश्च दिवसाँश्च जानाति ॥१३४१॥ बृहत्कल्पटीका पृ. ४०६ ॥ मेहाइछन्नेसु वि, उभओकालंमहवा उवस्सग्गे । पेहाइ मिक्ख पंथे, नाहिइ कालं विणा छायं ॥ एगग्गया सुमहु निज्जरा य नेव मिणणम्मि पलिमंथो । न पराहीणं नाणं,काले जह मंसचक्खूणं ॥ सुयभावणाएँ नाणं, दंसण तवसंजमं च परिणमइ । तो उवओगपरिण्णो, सुयमब्भहितो समाणेइ ॥" इति बृहत्कल्पभाष्ये सटीके १३४२-४ । पञ्चवस्तुकः १३६८-१४०१ अपि द्रष्टव्यः ॥

भावेऽप्युच्छ्वास-प्राण-स्तोक-लव-मुहूर्त्तादिकं कालं सूत्रपरावर्तनानुसारेणैव सर्वं सम्यगवगच्छति । [1]एकत्वभावनया चात्मानं भावयन् [2]सङ्घाटिक साध्वादिना सह पूर्वप्रवृत्तानालाप-सूत्रार्थ-सुखदुःखादिप्रश्न-मिथः कथादिव्यतिकरान्निराकरोति, ततो बाह्यममत्वे मूलत एव व्यवच्छेदिते पश्चाद्देहोपध्यादिभ्योऽपि भिन्नमात्मानमवलोकयन् सर्वथा तेष्वपि निरभिष्वङ्गो भवति । [3]बलभावनायां बलं द्विविधं—शारीरं मनो-धृतिबलं च, [4]तत्र शारीरमपि बलं जिनकल्पार्हस्य शेषजनातिशायिकमेष्टव्यम् , तपःप्रभृतिभिस्तु अपकृष्य-

६३ द्वारे एकवसति-जिन-कल्पिकाः गाथा ५३९

प्र.आ.१२७

॥३६०॥

१ तुलना-"जइ वि य पुव्वममत्तं, छिन्नं साहूहिं दारमाईसु । आयरियाइममत्तं तहा वि संजायए पच्छा ॥१३४५॥ दिट्ठीनिवायाऽऽलावे, अयरोप्परकारियं सपडिपुच्छं । परिहास मिहो य कहा, पुव्वपवत्ता परिहवेइ ॥१३४६॥ तणुईकयम्मि पुव्वं, बाहिरपेम्मे सहायमाईसु । आहारे उवहिम्मि य देहे य न सज्जए पच्छा ॥१३४७॥ पुव्विं छिन्नममत्तो उत्तरकालं वविज्जमाणे वि । सामाविय इअरे वा, खुब्भइ दट्ठुं न संगइए ॥१३४८॥ एगत्तभावणाए, न कामभोगे गणे सरीरे वा । सज्जइ वेरग्गगओ फासेइ अणुत्तरं करणं ॥१३५२॥" इति बृहत्कल्पभाष्यम् । विशेषार्थिना द्रष्टव्या बृहत्कल्पटीका पृ. ४१० ॥ पञ्चवस्तुकः १४०२-५ अपि द्रष्टव्यः ।

२ सङ्घाटकसंङ्घाटक साध्वादिना-मु० । सङ्घाटिकसाधु० इति बृ. क. टीका पृ. ४१० ॥

३ तुलना-"भावो अभिस्संगो सो उ पसत्थो व अप्पसत्थो वा । नेह गुणओ उ रागो, अपसत्थ पसत्थओ चेव ॥१३५३॥ कामं तु सरीरबलं, हायइ तव-नाणभावणाजुअस्स । देहावचए वि सती, जह होइ धिई तहा जयइ ॥१३५४॥ कसिणा परिसहचमू, जइ उट्ठिज्जाहि सोवसग्गा वि । दुद्धरपहकरवेगा, मयजणणी अप्पसत्ताणं ॥१३५५॥ धिइधणियबद्धकच्छो, जोहेइ अणाउलो तमव्वहिओ । बलभावणाए धीरो संपुण्ण मणोरहो होइ ॥१३५६॥ धिइ-बलपुरस्सराओ, हवंति सत्ता वि भावणा एता । तं तु न विज्जइ सज्झं, जं धिइमंतो न साहेइ ॥१३५७॥" इति बृहत्कल्पभाष्यम् । पञ्चवस्तुकः १४०६-९, पञ्चवस्तुकटीका पृ. २०१, बृहत्कल्पटीका पृ. ४११ तत्र द्रष्टव्याः ॥

४ तुलना-बृ.कल्पटीका पृ. ४१२ । पं. १ ॥

माणस्य यद्यपि शारीरं बलं तथाविधं न भवति तथापि धृतिबलेनात्मा तथा भावयितव्यो यथा महद्भिरपि परीषहोपसर्गैर्न बाध्यते।

एताभिः पञ्चभिर्भावनाभिर्भावितात्मा [1]जिनकल्पिकप्रतिरूपो गच्छेऽपि प्रतिवसन्नुपध्या-ऽऽहार-विषये [2]द्विविधे परिकर्मणि प्रवर्तते, तत्र यदि पाणिपात्रलब्धिरस्ति ततस्तदनुरूपमेव परिकर्म चेष्टते, अथ पाणिपात्रलब्धिर्नास्ति ततः [3]पतद्ग्रहधारित्वपरिकर्मणि यथायोगं प्रवर्तते, आहारपरिकर्मणि तु तृतीय-पौरुष्यामवगाढायां वल्ल-चणकादिकमन्तं[4] प्रान्तं रूक्षं च-

१ तुलना-"जिणकप्पियपडिरूवी गच्छे वसमाण दुविह परिकम्मं। ततियं भिक्खायरिया पंतं लूहं अभिग्गहिया" ॥ इति बृहत्कल्पभाष्यम् १३५८॥

२ "अथ द्विविधं परिकर्म व्याख्यानयति-पाणी पडिग्गहेण व, सच्चेल निच्चेलओ जहा भविया। सो तेण पगारेणं, भावेइ अणागयं चेव ॥बृ.क-भा. १३६१॥ द्विविधं परिकर्म, तद्यथा-पाणिपरिकर्म प्रतिग्रहपरिकर्म च, अथवा सचेलपरिकर्म अचेलपरिकर्म च। तत्र यो यथा पाणिपात्रधारकः प्रतिग्रहधारको वा सचेलको अचेलको वा भविता स तेनैव प्रकारेण पाणिपात्रभोजित्वादिना अनागतमेवाऽऽत्मानं भावयति॥१३६१॥ प्रकारान्तरमाह-आहारे उवहिम्मि य, अहवा दुविहं तु होइ परिकम्मं। पंचसु अ वोसु अग्गह, अभिग्गहो अन्नयरियाए॥१३६२॥ अथवा द्विविधं परिकर्म आहारे उपधौ च।" .....इति बृहत्कल्पटीका पृ. ४१३॥ बृहत्कल्पचूर्णिरपि द्रष्टव्या बृ.क.टी. पृ. ४१३॥

३ परिग्रह० सं. ॥ ४ "निप्फाव-चणकमाई, अंतं पंतं तु होइ वावण्णं। नेहरहियं तु लूहं, जं वा अबलं समावेणं॥" इति बृहत्कल्पभाष्यम् ॥१३६३॥

△" [1]संसट्ठमसंसट्ठा उद्धड तह अप्पलेवडा चेव । उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया ॥१॥"
[2]एतासां सप्तानां पिण्डैषणानां मध्ये आद्यद्वयवर्ज्यं शेषाणां पञ्चानां मध्यादन्यतरैषणाद्वयाभिग्रहेणाहारं गृह्णाति, तत्राप्येकया भक्तमपरयाऽन्वेषणया पानकमिति ॥

एवमाद्यागमोक्तविधिना गच्छान्तर्गतः पूर्वमेवात्मानं परिकर्मयित्वा ततो जिनकल्पं प्रतिपित्सुः [3]समग्रमपि सङ्घं मीलयति, तदभावे स्वगणं तावदवश्यमाह्वयते, ततस्तीर्थकरसमीपे तदभावे गणधर-सन्निधाने तदसत्त्वे च चतुर्दशपूर्वधरसविधे तदसम्भवे दशपूर्वधरान्तिके तदलाभे तु वटा-ऽश्वत्था-ऽशोकपाद-पादीनामासन्नौ महत्या विभूत्या जिनकल्पमभ्युपगच्छति, [4]निजपदव्यवस्थापितं सूरिं सबालवृद्धं गच्छं विशेषतः पूर्वविरुद्धांश्च क्षमयति, तद्यथा—

△ असंसृष्टा संसृष्टा उद्धृता तथा अल्पलेपिका । अवगृहिता प्रगृहिता उज्झितधर्मा च सप्तमी ॥ १ ॥

१ संसट्ठमसंसट्ठा उद्धडा अप्पडा लवडा चेव— सं. । 'संसट्ठाऽसंसट्ठा वड्ढड तह होइ अप्पलेवा य' । इति पञ्चवस्तु-टीका पृ. २०२ A । सन्मतितर्के प्रकरणवृत्तौ [पृ. ७५५] अप्पलेविया-इति पाठः ॥

२ तुलना-"तइआए अलेवाडं पंचण्णयरीए भयइ आहारं । दोण्हऽण्णयरीएँ पुणो उवहिं च अहागडं चेव ॥" इति पञ्चवस्तुकः १४१२ ॥

३ तुलना-"दव्वाई अणुकूले, संघं असती गणं समाहूय । जिण गणहरे य चउदस, अभिन्न असती य वडमाई"॥ इति बृहत्कल्पभाष्य १३६६॥ पञ्चवस्तुकः १४१७ अपि द्रष्टव्यः ॥

४ तुलना-"गणि गणहरं ठवित्ता, खामे अगणी उ केवलं खामे । सव्वं च बाल-वुड्ढं, पुव्वविरुद्धे विसेसेणं ॥" इति बृहत्कल्पभाष्यम् १३६७॥ पञ्चवस्तुकः १४१५ अपि द्रष्टव्यः ॥

[1]"अइ किंचि पमाएणं न सुट्ठु मे वट्टियं मए पुव्वि। तं मे खामेमि अहं निस्सल्लो निक्कसाओ य॥१॥ [2]आणंदअंसुपायं कुणमाणा तेऽवि भूमिगयसीसा। [3]खामिति तं जहरिहं जहारिहं खामिया तेणं॥२॥" [बृहत्कल्पभाष्यम् १३६८-९] निजपदस्थापितसूरेः शेषसाधूनां चानुशास्तिं प्रयच्छति, यथा—△"पालेज्जसु गणमेयं अप्पडिबद्धो य होज्ज सव्वत्थ। एसो य परंपरओ तुमंपि अंते कुणसु एवं।१। [4]पुव्वपवण्णं विणयं मा हु पमाएहि विणयजोग्गेसु जो जेण पगारेण उवज्जुज्जइ तं च जाणेहि।२। [5]तथा "ओमो समराइणिओ अप्पतरसुओ य मा य णं तुब्भे। परिभवह एस तुम्हवि विसेसओ संपयं पुज्जो।३।" [बृ. क.भा. १३७२-१३७३]

१ अस्य क्षेमकीर्तिसूरिकृता व्याख्या-"यदि किञ्चिन् 'प्रमादेन' अनाभोगादिना न सुष्ठु 'मे' मयता वर्त्तितं पूर्वं तद् 'मे' युष्मान् क्षमयाम्यहं निःशल्यो निष्कषायश्च ॥१३६८॥ इत्थं तेन क्षमिते सति शेषसाधवः किं कुर्वन्ति ? इत्याह-'तेऽपि' साधवः आनन्दाश्रुपातं कुर्वाणाः 'भूमिगतशीर्षाः' क्षितिनिहितशिरसः सन्तः क्षमयन्ति 'यथार्हं' यो यो रत्नाधिकः स स प्रथममित्यर्थः, तेनाचार्येण 'यथार्हं' यथापर्यायज्येष्ठं क्षामिताः सन्ति इति" ॥१३६९॥ इति बृहत्कल्पटीका पृ. ४१४॥ २ 'आणंदअंसुपायं' इति बृ.क.भा. १३६९ पाठः॥

३ 'खामिति जहरिहं खलु, जहारिहं खामिता तेणं' इति बृ.क.भा. १३६९॥

△ पालयेर्गणमेनप्रतिबद्धश्च भवेः सर्वत्र। एष च परम्परकः त्वमप्यन्ते कुर्याः॥

४ तुलना-' पुव्वपविट्ठं विणयं, मा हु पमाएहिं विणयजोगेसु। जो जेण पगारेणं, उवबज्जइ तं च जाणाहिं॥ बृहत्कल्पभाष्यम् १३७२॥ ये च तव बहुश्रुत-पर्यायज्येष्ठादयो विनययोग्याः-गौरवार्हास्तेषु 'पूर्वप्रवृत्तं' यथोचितं विनयं 'मा प्रमादयेः' मा प्रमादेन परिहापयेः। यश्च साधुर्येन तपः-स्वाध्याय-वैयावृत्त्यादिना प्रकारेण 'उपयुज्यते' निर्जराप्रत्युपयोगमुपयाति 'तं च जानीहि' तं तथैव प्रवर्तयेत्यर्थः॥१३७२॥इतिबृहत्कल्पटीका पृ. ४१६॥

५ तुलना-"अथ साधूनामनुशिष्टिं प्रयच्छति-ओमो समराइणिओ, अप्पतरसुओ अ मा य णं तुब्भे। परिभवह तुम्ह

इत्यादिशिक्षां दत्त्वा [1]गच्छाद्विनिर्गते चक्षुर्गोचरातीते तस्मिन्नानन्दिताः साधवः प्रतिनिवर्तन्ते, एवं च प्रतिपन्नजिनकल्पो यत्र [2]ग्रामादौ मासकल्पं चतुर्मासकं वा करिष्यति तत्र षट् [3]भागान् ग्रामादेः कल्पयति, ततश्च यत्र भागे एकस्मिन् दिने गोचरचर्यायां हिण्डितस्तत्र पुनरपि सप्तम एव दिवसे पर्यटति, भिक्षाचर्यां ग्रामान्तरगमनं च तृतीयपौरुष्यामेव करोति, चतुर्थपौरुषी तु यत्रावगाहते तत्र नियमादवतिष्ठते, भक्तं पानकं च पूर्वोक्तैषणाद्वयाभिग्रहेणालेपकृदेव गृह्णाति, एषणादिविषयं मुक्त्वा न केनापि सार्धं जल्पति. उपसर्ग-परीषहान् सर्वानपि सहत एव, रोगेऽपि चिकित्सां न कारयत्येव, तद्वेदनां तु सम्यगेव विषहते, एकाकयेव च भवति, [4]अनापाता-ऽसंलोकादिदशगुणोपेत एव स्थण्डिले उच्चारादि करोति, जीर्ण-

६३ द्वारे एकवसति जिन-कल्पिका

गाथा ५३९

प्र. आ. १२७

॥३६४॥

एसो, विसेसओ संयं पुज्जो ॥बृहत्कल्पभा. १३७३॥ अयमोऽयं समरात्निकोऽयं अल्पतरश्रुतो वाऽयमस्मदपेक्षया, अतः किमर्थमस्य आज्ञानिर्देशं वयं कुर्महे ? इति मा यूयममुं परिभवत। यत एष युष्माकं साम्प्रतमस्मत्स्थानीयत्वाद् गुरुतरगुणाधिकत्वाच्च विशेषतः पूज्यः, न पुनरवज्ञातुमुचित इति भावः" ॥१३७४॥ इति बृहत्कल्पटीका पृ. ४१६ ॥

१ तुलना-"निच्चेले सचेले वा गच्छारामा विणिग्गए तम्मि। चक्खुविसयं अईए अयंति आणंदिया साहू" ॥ इति बृहत्कल्पभा. १३७६।

२ तुलना-'छव्वीहीओ गामं काउं एक्किक्कियं तु सो अडइ। वज्जेउं होइ सुहं, अनिययवित्तिस्स कम्माई" इति बृ. क. भा. १४००॥

३ भागान् कल्पयति-जे. सं. ॥ ४ तुलना-"उच्चारे पासवणे उस्सग्गं कुणइ थंडिले पढमे। तत्थेव य परिजुण्णे कयकिच्चो उज्झई वत्थे" ॥ इति बृ. क. भा. १३८९, पञ्चवस्तुक; १४२५ ॥

वस्त्राणि च तत्रैव त्यजति, [1]प्रमार्जनादिपरिकर्मविरहितायां वसतौ तिष्ठति, [2]यद्युपविशति तदा नियमादुत्कटुक एव न तु निषद्यायामौपग्रहिकोपकरणस्यैवाभावात्, मासकल्पेनैव चायं विहरति, मत्तमतङ्गजव्याघ्रसिंहादिके च संमुखे समापतत्युन्मार्गगमनादिना ईर्यासमितिं न भिनत्ति, [3]श्रुतसम्पदपि चास्य जघन्यतो नवमस्य पूर्वस्य तृतीयमाचारवस्तु, तत्र हि न्यक्षेण कालपरिज्ञानम्, उत्कर्षतस्तु असम्पूर्णानि दश पूर्वाणि, प्रथमसंहननो वज्रकुड्यसमानावष्टम्भश्चायं भवति, लोचं चासौ नित्यमेव विधत्ते, [4]आवश्यकी-नैषेधिकी-मिथ्यादुष्कृत-गृहिविषयपृच्छोपसंपल्लक्षणाः पञ्च सामाचार्योऽस्य भवन्ति, [5]अन्ये त्वाहुः—आवश्यकी-नैषेधिकी-गृहस्थोपसम्पल्लक्षणास्तिस्र एव, आरामादिनिवासिन ओघतः पृच्छादीनामपि असम्भवादित्याद्यन्याऽपि जिनकल्पिकानां [6]सामाचारी कल्पग्रन्थादेरवगन्तव्या ॥

१ तुलना-'अममत्त अपरिकम्मा नियमा जिणकप्पाण वसहीओ ॥" इति बृहत्कल्प.१२६१॥ तुलना-पञ्चवस्तुकः १४२६॥

२ "अत्रैव विधिविशेषमाह-उक्कुडुयामणसमुइं, करेइ पुढवीसिलाइसुववेसे । पडिवज्जो पुण नियमा, उक्कुडुओ केइ उ भयंति ॥१३६४॥ तं तु न जुज्जइ जम्हा, अणंतरो नत्थि भूमिपरिभोगो । तम्मि य हु तस्स काले ओवग्गहितोवही नत्थि ॥१३६५॥" इति बृहत्कल्पभाष्यम् ॥

३ तुलना-'आयारवत्थुतइयं जहन्नयं होइ नवमपुव्वस्स । तहियं कालण्णाणं, दस उक्कोसेण भिन्नाइं' ॥ इति बृ.क.भा. ११८५, पञ्चवस्तुकः १४२९ ॥

४ तुलना-"आवसि निसीहि मिच्छा, आपुच्छुवसंपदं च गिहिएसु । अन्ना सामायारी न होंति से सेसिया पंच" ॥ इति बृ. क. भा. १३७६ ॥ पञ्चवस्तुकः १४२३ ॥ ५ तुलना-"आदेशान्तरमाह-"आवासियं निसीहियं मोत्तुं उवसंपयं च गिहिएसु । सेसा सामायारी, न होंति जिणकप्पिए सत्त" ॥ इति बृ. क. भा. १३८० ॥ पञ्चवस्तुकः १४२४॥

६ बृहत्कल्प. पृ. ४१७ तः द्रष्टव्यम् । पञ्चवस्तुकः पृ. २०३ तः द्रष्टव्यः ॥

तथा जिनकल्पिकस्थितिप्रतिपादनार्थं सोपयोगत्वात् कानिचिद् द्वाराणि दर्श्यन्ते, [1]तद्यथा–क्षेत्र-द्वारं १ कालद्वारं २ चारित्रद्वारं ३ तीर्थद्वारं ४ पर्यायद्वारम् ५ आगमद्वारं ६ वेदद्वारं ७ कल्पद्वारं ८ लिङ्गद्वारं ९ ध्यानद्वारं १० गणनाद्वारम् ११ अभिग्रहद्वारं १२ प्रव्राजनाद्वारं १३ [2]निष्प्रतिकर्मताद्वारं १४ भिक्षाद्वारं १५ पथद्वारं १६ चेति, तत्र तीर्थ-पर्याया-ऽऽगम-वेद-ध्याना-ऽभिग्रह-प्रव्रज्या-निष्प्रतिकर्मता--भिक्षा-पथद्वाराण्येकोनसप्ततितमे परिहारविशुद्धिद्वारे यथा वक्ष्यन्ते तथैवात्रापि ज्ञेयानि। [3]क्षेत्रद्वारे जन्मना सद्भावेन च पञ्चदशस्वपि कर्मभूमिषु, संहरणेन त्वकर्मभूमिष्वपि भवति [4]कालद्वारे अवसर्पिण्यां जन्मना तृतीय-चतुर्थारकयोरेव व्रतस्थस्तु पञ्चमारकेऽपि, उत्सर्पिण्यां तु व्रतस्थस्तृतीय-चतुर्थारकयोरेव, जन्मना तु द्वितीयारकेऽपि, प्रतिभागकाले तु दुष्षमसुषमारूपे जन्मतः सद्भावतश्च प्राप्यते, विदेहेष्वपि जिनकल्पिकानां

---

१ तुलना–"खेत्ते काल चरित्ते, तित्थे परियाय आगमे वेए । कप्पे लिंगे लेसा, झाणे गणणा अभिग्गहा य ॥ पव्वावण मुंडावण, सणसाऽऽवन्ने वि से अणुग्घाया । कारण निप्पडिकम्मे, भत्तं पंथो य सइयाए" इति बृहत्कल्पभा. ।।१४१३-१४१४॥, पञ्चवस्तुकः १४८३-१४८४॥

२ १३ निष्प्रतिकर्मताद्वारं १४ पथद्वारं १५ भिक्षाद्वारं चेति–सं. ॥

३ तुलना–"जम्मण-संतीभावेसु होज्ज सव्वासु कम्मभूमीसु । साहरणे पुण भइयं, कम्मे व अकम्मभूमे वा" इति बृ. क. भा. १४१५ ॥

४ तुलना–"ओसप्पिणीइ दोसुं, जम्मणतो तीसु संतीभावेणं । उस्सप्पिणि विवरीया, जम्मणतो संतिभावे य ॥१४१६॥ नोसप्पिणिउस्सप्पे भवंति पडिभागतो चउत्थम्मि । काले पडिभागेसु य साहरणे होंति सव्वेसु" इति ॥बृ. क. भा. १४१७॥ विशेषार्थं बृहत्कल्पटीका द्रष्टव्या पृ. ४२४ ॥

सद्भावात् , संहरणेन पुनः सर्वस्मिन्नपि काले प्राप्यते, [1]चारित्रद्वारे प्रतिपद्यमानकः सामायिक-च्छेदोपस्थापनीययोरेव, मध्यम-विदेहतीर्थकृतां सामायिके प्रथम-पश्चिमजिनयोस्तु छेदोपस्थापनीये, पूर्वप्रतिपन्नस्तु सूक्ष्मसम्पराय-यथाख्यातचारित्रयोरपि, स चोपशमश्रेण्यामेव, न तु क्षपकश्रेण्याम् , [2]'तज्जन्मनि केवलपरिणामाभावात्' [पञ्चवस्तुकः १४१८] इति वचनात् । [3]कल्पद्वारे स्थितकल्पेऽस्थितकल्पे च भवति, लिङ्गद्वारे प्रतिपद्यमानको द्विविधेऽपि द्रव्य-भावरूपे लिङ्गे भवति, पूर्वप्रतिपन्नस्तु भावलिङ्गेऽवश्यमेव, द्रव्यलिङ्गे तु भाज्यो [4]हृतजीर्णत्वादिभिः कदाचिद् द्रव्यलिङ्गस्याभावात् , [5]गणनाद्वारे प्रतिपद्यमानका जघन्यत एकादय उत्कर्षतः शतपृथक्त्वम् , पूर्वप्रतिपन्नाः पुनर्जघन्यत उत्कर्षतश्च सहस्रपृथक्त्वम् , केवलमुत्कृष्टाज्जघन्यं लघुतरम् , इत्याद्यन्यदपि जिनकल्पिकस्वरूपं समयसमुद्रादवसेयमिति ।

सम्प्रति सूत्रमनुश्रियते, जिना-गच्छनिर्गतसाधुविशेषाः तेषां कल्पः—समाचारस्तेन चरन्तीति जिनकल्पिकाः, ते च जिनकल्पिकसाधवः उत्कर्षत एकस्यां वसतौ सप्त भवन्ति, अधिका-अष्टादयः कथमपि

१ तुलना-"पढमे वा बीये वा, पडिवज्जइ संजमम्मि जिणकप्पं । पुव्वपडिवन्नओ पुण, अन्नयरे संजमे होज्जा' इति बृ. क. भा. १४१८ ॥

२ "तज्जन्मन्यस्य केवलप्रतिषेधभावादिति गाथार्थः" । इति पञ्चवस्तुटीका पृ. २१३॥

३ तुलना-"ठियमट्ठियम्मि कप्पे, लिंगे भयणा उ दव्वलिंगेणं" इति बृ. क. भा. १४२१ ॥ पञ्चवस्तुकः १५०१॥

४ "इत्थरं तु जिण्णभावाइएहिं सयमं न होइवि कयाइं । ण य तेण विणावि तहा जायइ से भावपरिहाणी" ॥ इति पंचवस्तुकः १५०२ ॥

५ तुलना-"पडिवत्ति सयपुहुत्तं, सहसपुहुत्तं च पडिवन्ने" ॥ इति बृ.क.भा.१४२३॥ पञ्चवस्तुकः १५०७-८ तुलनीयः ॥

कदाचनापि न भवन्ति, यद्यपि चैकस्यां वसतावुत्कृष्टतः सप्त जिनकल्पिकाः प्रतिवसन्ति तथापि परस्परं न भाषन्ते, *धर्मवार्त्तामपि न कुर्वन्ति * वीथ्यामपि चैकस्यामेक एव जिनकल्पिकः प्रतिदिनमटति, न पुनरपर इति, उक्तं च—

^"[1]एक्काए वसहीए उक्कोसेणं वसंति सत्त[2]जिणा । अवरोप्परसंभासं चइंति [3]अन्नोन्नवीहिं च"॥१॥ [बृ. क. भा. १४१२] ॥५३९। ६३॥

'छत्तीसं [4]सूरिगुण' त्ति चतुःषष्टं द्वारमाह—

[5]अट्ठविहा [6]गणिसंपय [7]चउग्गुणा नवरि हुंति बत्तीसं ।
विणओ य चउब्भेओ छत्तीस गुणा इमे गुरुणो ॥५४०॥
आयार १ सुय २ सरीरे ३ वयणे ४ वायण ५ मई ६ पओगमई ७ ।
[8]एएसु संपया खलु अट्ठमिया [9]संगहपरिण्णा ८ (१) ॥५४१॥

---

* * चिह्नद्वयमध्यवर्तीपाठः नास्ति जे. मं. ॥ ^एकस्यां वसतौ उत्कर्षतो वसन्ति सप्त जिनाः । परस्परं संभाषं त्यजन्ति अन्योऽन्यवीथिं च ॥१॥ १ तुलना-"वीहिए एक्काए एक्को किंचऽ पइदिणं अडइ एसो । अण्णे भणंति भयणा सा य ण जुत्तिक्खमा सेआ ॥१४७६॥ एएसि सत्त वीही एसो किंचऽ वायसो जओ भणिआ । कह नाम अणोमाणं ? हविज्ज गुणकारणं णिअमा ॥१४८०॥ अइसइणो अ जमेए वीहिविभागं अओ विआणंति । ठाणाईएहिं धीरा समयपसिद्धेहिं लिंगेहिं ॥" १४८१ ॥ इति पञ्चवस्तुकः ॥

२ जणा-इति बृहत्कल्पभा. १४१२ । षष्ठवस्तुकः १४७८ ॥

३ अन्नान्न० मु. ॥ ४ सूरिणगुणत्ति-मु. ॥ ५ तुलना-सम्बोधप्रकरण ३-६८ ॥ ६ गणिसंपइ-जे. ॥

७ चउग्गुणा हुंति नवरि बत्तीसं-ता. ॥ ८ एएउ-ता. ॥ ९ °पइण्णा-जे. ता. । परिन्ना. धर्मरत्नप्र.दे.टीका ॥

चरणजुओ मयरहिओ अनिययवित्ती अचंचलो चेव (४) ।
जुगपरिचिय [1]उस्सग्गी उदत्तघोसाइ [2]विन्नेओ (८) ॥५४२॥
चउरंसोऽकुंटाई बहिरत्तणवज्जिओ तवे सत्तो (१२) ।
थाई महुरत्तऽनिस्सिय फुडवयणो संपया [3]वयणे (१६) ॥५४३॥
[4]जोगो परिणयवायण निज्जविया वायणाए निव्वहणे (२०) ।
ओग्गह [5]ईहावाया धारण मइसंपया [6]चउरो (२४) ॥५४४॥
सत्तीं पुरिसं [7]खित्तं वत्थुं नाउं [8]पउंजए वायं (२८) ।
गणजोग्गं संसत्तं सज्झाए सिक्खणं जाणे (३२) ॥५४५॥
[9]आयारे सुयविणए विक्खिवणे चेव होइ [10]बोधव्वा ।
[11]दोसस्स परीघाए विणए चउहेस पडिवत्ती (३६) ॥५४६॥
[12]सम्मत्त-नाण-चरणा पत्तेयं अट्ठअट्ठभेइल्ला ।
बारसभेओ य तवो सूरिगुणा हुंति छत्तीसं (२) ॥५४७॥

१ उस्सग्गो-ता. ॥ २ विन्नेया-ता. ॥ ३ वयणेत्ति-मु. ॥ ४ जोग्गे-जे. । जोगे-ता. ॥ ५ ईह उवाया-ता. ॥ ६ चउरोत्ति-मु. ॥ ७ खेत्तं-मु. ॥ ८ पओजए-मु. ॥ ९ तुलना-धर्मरत्नप्र. दे. टीका गाथा १२६ पृ. २९०A ॥ १० बोधव्वे-ता. ॥ ११ दोसस्य य निग्घाए इति धर्मरत्नप्र. दे. टी. गाथा १२६ पृ. २९० ॥ १२ अथवा सम्मत्त० ता. ॥

आयाराई अट्ठ उ तह चेव य दसविहो य ठियकप्पो ।
बारस तव छावस्सग सूरिगुणा हुंति छत्तीसं (३) ॥५४८॥

[तुलना–सम्बोध प्रकरण ३।९९-१००]

[1]'अट्ठविहे'त्यादिगाथानवकम्, गुणानां साधूनां वा गणः–समुदायो भूयानतिशयवान् वा यस्यास्ति स गणी-आचार्यस्तस्य सम्पत्–समृद्धिर्भावरूपा गणिसम्पत्, सा आचारादिभेदादष्टविधा, केवलमेकैकस्याश्चतुर्भेदत्वेन चतुर्भिर्गुणने द्वात्रिंशद्भेदाः, विनयश्चतुर्भेदस्तत्र प्रक्षिप्यते, तत एते गुरोः–आचार्यस्य षट्त्रिंशद् गुणा भवन्ति ॥ ५४० ॥

तत्राष्टौ सम्पद इमाः–'आयारे'त्यादि, आचारश्च श्रुतं च शरीरं चेत्येकवद्भावादाचार-श्रुत-शरीरम्, तथा वचनम्, प्राकृतत्वादेकारः, वाचना, मतिः, प्रयोगमतिः, एतेषु विषये सम्पत्, तथाहि–आचारसम्पत् १, श्रुतसम्पत् २, शरीरसम्पत् ३, वचनसम्पत् ४, वाचनासम्पत् ५, मतिसम्पत् ६, प्रयोगमतिसम्पत् ७, अष्टमी च संग्रहपरिज्ञासम्पत् ८ । तत्र आचरणमाचारः–अनुष्ठानं तद्विषया स एव वा सम्पद्–विभूतिस्तस्य वा सम्पत्–सम्पत्तिः प्राप्तिराचारसम्पत्, एवमग्रेऽपि व्युत्पत्त्यर्थो भावनीयः ॥५४१॥

सा चतुर्धा, यथा–'चरणयुतो मदरहितोऽनियतवृत्तिरचञ्चलश्चेति', तत्र चरणं-चारित्रं व्रत-श्रमणधर्मेत्यादि-सप्ततिस्थानस्वरूपं तेन युतो–युक्तश्चरणयुतः, [2]अन्यत्र तु 'संयमध्रुवयोगयुक्तते' त्येवमिदं पठ्यते, तत्राप्य-

१ 'अट्ठविहा गाहा'-सं. ॥ २ तुलना- "संयमध्रुवयोगयुक्तता-चरणे नित्यं समाध्युपयुक्ततेरयर्थः ।" इति धर्मरत्न-प्रकरणदे टीका गाथा १२६, पृ.२६० ॥

यमेव परमार्थः, यतः संयमः–चारित्रं तस्मिन् ध्रुवः–नित्यो योगः–समाधिस्तेन युक्तता, तत्र सततोपयुक्ततेत्यर्थः, तथा मदैः–जाति-कुल-तपः-श्रुताद्युद्भवैः रहितो मदरहितः, ग्रन्थान्तरे तु "'असंपग्गह" इति पठ्यते, तत्रापि स एवार्थः, यतः समन्तात्प्रकर्षेण–जाति-श्रुत-तपोरूपादिप्रकृष्टतालक्षणेनात्मनो ग्रहणम्–अहमेव जातिमानित्यादिरूपेणावधारणं सम्प्रग्रहः,न तथा असम्प्रग्रहो जात्याद्यनुत्सिक्तत्वमित्यर्थः, अनियतवृत्तिः–ग्रामादिष्वनियतविहारस्वरूपता, तथाऽचञ्चलो–वशीकृतेन्द्रियः, [2]अन्यत्र तु 'वृद्धशीलता' इत्येवं पठ्यते, तत्र वृद्धशीलता–मनसि च कामिनीजनोल्लोडने वयसि वर्तमानस्यापि निभृतस्वभावता निर्विकारतेतियावत् , यतः–"मनसि जरसाऽभिभूता जायन्ते यौवनेऽपि विद्वांसः । मूढधियः पुनरितरे भवन्ति वृद्धत्वभावेऽपि ॥ १ ॥"

तथा श्रुतसम्पच्चतुर्धा, यथा–तत्र 'सूचनात्सूत्र'मिति 'युगो'–युगप्रधानागमः, परिचितसूत्रः–क्रमोत्क्रमवाचनादिभिः स्थिरसूत्रः, 'उत्सर्गी'–उत्सर्गा-ऽपवाद-स्वसमय-परसमयादिवेदि, 'उदात्तघोषादि'–उदाता-ऽनुदात्तादिस्वरविशुद्धिविधायी, [3]अन्यत्र बहुश्रुतता १, परिचितसूत्रता २, विचित्रसूत्रता ३, घोषविशुद्धिकरणता ४ चेति पठ्यते, अर्थस्तु स एव ॥ ५४२ ॥

शरीरसम्पदं चतुर्विधामाह–'चउ' इत्यादि, तत्र चतुरस्रः'–आरोह-परिणाहयुक्तो दैर्घ्य-विस्ताराभ्यां

---

१ असंप्रग्गह-सं. । "तुलना-असंप्रग्रह आत्मनोजात्याद्युत्सेकरूपाग्रहवर्जनम् ।" इति धर्मरत्नप्र.दे.टी.गाथा२६ पृ.२६० ॥
२ तुलना-'वृद्धशीलता वपुर्मनसो निर्विकारता' । धर्मरत्न प्र. देवेन्द्रसूरिकृतटीका. पृ. २६० A ॥
३ तुलना-धर्मरत्नप्र. दे. टीका गाथा १२६ पृ. २६० A ॥

लक्षण-प्रमाणसहिताभ्यां युक्त इतियावत् , तथा 'अकुण्टादिः'–सम्पूर्णपाण्यादिः, तथा 'बधिरत्वादिवर्जितः–अविकलसकलेन्द्रियः, तथा दृढसंहननत्वेन बाह्या-ऽभ्यन्तरभेदभिन्ने तपसि शक्तः–समर्थः, [1]अन्यत्र तु आरोह-परिणाहयुक्तता १, [2]अनवत्राप्यता २, परिपूर्णेन्द्रियता ३, स्थिरसंहननता ४ चेति पठ्यते, तत्रापि स एवार्थः, केवलमविद्यमानमवत्राप्यम्–अवत्रपणं लज्जनं यस्य सोऽयमनवत्राप्यो यद्वा अवत्रापयितुं लज्जयितुमर्हः शक्यो वा अवत्राप्यो–लज्जनीयो न तथाऽनवत्राप्योऽहीनसर्वाङ्गत्वेनाऽलज्जाकर इत्यर्थः ।

वचनसम्पच्चतुर्धा, तद्यथा–'वाई'त्यादि, वादी मधुरवचनः अनिश्रितवचनः स्फुटवचनश्चेत्येषा 'वचने' वचनविषये सम्पत् , तत्र वदनं–वादः स प्रशस्तोऽतिशायी वा विद्यते यस्य स वादी आदेयवचन इत्यर्थः, तथा प्रकृष्टार्थप्रतिपादकमपरुषं सुस्वरता-गम्भीरतादिगुणोपेतमत एव श्रोतृजनमनःप्रीणकं वचनं यस्य स मधुरवचनः, तथा राग-द्वेषादिभिरनिश्रितम्–अकलुषं वचनं यस्य सोऽनिश्रितवचनः, स्फुटं–सर्वजनसुबोधं वचनं यस्य स स्फुटवचनः, [3]अन्यत्र तु आदेयवचनता १,मधुरवचनता २, अनिश्रितवचनता ३, असन्दिग्धवचनता ४ चेति पठ्यते, अर्थः प्राग्वदेव ॥५४३॥

अथ वाचनासम्पच्चतुर्धा, तद्यथा–'जोगो' इत्यादि, तत्र परिणामिकत्वादिगुणोपेतान् शिष्यान् विज्ञाय यस्य यद्योग्यं सूत्रं तत्तस्यैवोद्दिशन् समुद्दिशन् वा योग्यवाचनः, अपरिणामिकादावपक्वघटनिहितजलोदाहरणतो दोषसम्भवात् ; तथा पूर्वप्रदत्तसूत्रालापकान् शिष्यस्य सम्यक्परिणमय्य ततोऽपरा-ऽपरालापकानां

१ तुलना-धर्मरत्नप्र.दे.टीका गाथा १२६ पृ. २६०B ॥ २ "अनवत्राप्यता अलज्जनीयाङ्गता" । इति धर्मरत्नप्र.दे.टीका गाथा १२६ पृ २६०B ॥ ३ तुलना-धर्मरत्नप्र. दे.टीका गाथा १२६ पृ. २६०B ॥

वाचनां पुनः पुनः प्रयच्छन् परिणतवाचनः, तथा 'वाचनायाः'–व्याख्यानस्य 'निर्यापयिता'–निर्वाहकः, शिष्यसमुत्साहनेन झटित्येव ग्रन्थं समर्थयते न पुनरपान्तराले एवमेव मुञ्चतीत्यर्थः, तथा 'निर्वाहणो'–निर्वाहकोऽर्थस्येति शेषः, पूर्वा-ऽपरसाङ्गत्येन स्वयं ज्ञानतोऽन्येषां च कथनतः सम्यगर्थं निर्गमयतीति भावः, [1]ग्रन्थान्तरे त्वेवं दृश्यते–विदित्वोद्देशनम् १, विदित्वा समुद्देशनं–परिणामिकादिकं शिष्यं ज्ञात्वेत्यर्थः २, परिनिर्वाप्य वाचना– [2]पूर्वदत्तालपकानधिगमय्य शिष्यं पुनः सूत्रदानमित्यर्थः ३, [3]अर्थनिर्यापणा अर्थस्य पूर्वा-ऽपरसाङ्गत्येन गमनिकेत्यर्थः ४ ॥

अथ मतिसम्पच्चतुर्धा, तद्यथा–'उग्गहे'त्यादि, अवग्रहः, ईहा, अवायः, धारणा च, अवग्रहादीनां च स्वरूपं षोडशोत्तरद्विशततमद्वारे वक्ष्यते ॥५४४॥

तथा प्रयोगः–अत्र वादादिप्रयोजनसिद्धये व्यापारः तत्काले मतिः–वस्तुपरिच्छित्तिः प्रयोगमतिः, तत्सम्पच्चतुर्धा, तद्यथा–'**सत्ति**' इत्यादि, शक्तिं पुरुषं क्षेत्रं वस्तु च ज्ञात्वा वादं प्रयुञ्जीत, तत्र [4]शक्तिज्ञानं वादादिव्यापारकाले किममुं वावदूकं वादिनं जेतुं मम शक्तिरस्ति न वेत्यात्मीयस्वरूपपर्यालोचनम्, [5]पुरुषज्ञानं किमयं प्रतिवादी पुरुषः सौगतः साङ्ख्यो वैशेषिकोऽन्यो वा, तथा प्रतिभादिमानितरो

१ तुलना-धर्मरत्नप्र.दे.टीका गाथा-१२६ पृ. २९० B ॥
२ पूर्वदत्ताकापका० मु. ॥ ३ 'अर्थनिर्वापणा'-इति धर्मरत्नप्र. दे.टीका गाथा १२६ पृ. २९० B ॥ ४ ०प्रयोजन सिद्धन सिद्धये-सं. ॥ ५ शक्तेर्ज्ञानं-मु. ॥ ६ तुलना-धर्मरत्नप्र. दे.टीका गाथा १२६ पृ.२९०B ॥

वेत्यादिपरिभावनम्, क्षेत्रज्ञानं किमिदं क्षेत्रं मायाबहुलमन्यथा वा, तथा साधुभिर्भावितमभावितं वेत्यादिविमर्शनम्, वस्तुज्ञानं किमिदं राजामात्यादि सभासदादि वा वस्तु दारुणमदारुणं वा, भद्रकम-भद्रकं देत्यादिनिरूपणम्।

तथा [1]सङ्ग्रहः—स्वीकरणं तत्र परिज्ञानं नाम—अभिधानं सङ्ग्रहपरिज्ञा, तत्सम्पच्चतुर्धा, तद्यथा—'गणे'त्यादि, तत्र गणस्य—गच्छस्य बाल-दुर्बल-ग्लान-बहुयतिजनादिलक्षणस्य निर्वाहयोग्यक्षेत्रग्रहणं गणयोग्योपसङ्ग्रहसम्पत् प्रथमा १, तथा भद्रकादिपुरुषं प्रति तदनुरूपदेशनादिकरणेन संसक्तसम्पद् द्वितीया २, ग्रन्थान्तरे तु निषद्यादिमालिन्यपरिहाराय पीठ-फलकोपादानात्मिका द्वितीया सम्पदुक्ता, न चैतानि पीठादीनि न गृह्यन्ते समये अग्रहितत्वात्, तथा च जीतकल्पे—

卐"पीढ-फलगाइग्गहणे न उ मइलिंती निसिज्जाई। वासासु विसेसेणं अन्नकालं तु गम्मए ऽन्नत्थ ॥१॥ पाणा सीयल कुंथाइया य तो गहण वासासु।" तथा यथासमयमेव स्वाध्याय-प्रत्युपेक्षणा-भिक्षाटनोपधि-समुत्पादनात्मिका स्वाध्यायसम्पत्तृतीया, तथा गुरुप्रव्राजका-ऽध्यापक-रत्नाधिकप्रभृतीनामुपधिवहन-विश्राम-णाऽभ्युत्थान-दण्डकोपादानादिशिक्षणात्मिका [2]शिक्षोपसङ्ग्रहसम्पच्चतुर्थी, इत्येवं चतुर्विधां संग्रहपरिज्ञा-सम्पदं जानीयात्। दर्शिता अष्टापि प्रत्येकं चतुर्विधा गणिसम्पदः ॥५४५॥

---

१ तुलना-"सङ्ग्रहः स्वीकरणम्, तत्र परिज्ञानमष्टमी सम्पत्, सा चतुर्धा, तथाहि पीठफलकादिविषया, बालादि-योग्यक्षेत्रविषया, यथासमयं स्वाध्यायादिविषया, यथोचितविनयादिविषया चेति।" इति धर्मरत्न प्र-दे- टीका गाथा १२६ पृ २९० B ॥ 卐 पीठ-फलकादिग्रहणे नैव मलिन्यन्ते निषद्यादीनि। वर्षासु विशेषेण अन्यकाले तु गम्यतेऽन्यत्र ॥ १ ॥ प्राणाः शीतलं कुन्थ्वादिकाश्च ततो ग्रहणं वर्षासु ॥ २ शिष्योप० सं० ॥

इदानीं [1]चतुर्विधं विनयमाह–[2]'आयरे'त्यादि, आचारविनयः श्रुतविनयो विक्षेपणविनयो दोषपरिघातविनयश्चेति विनयविषये एषा चतुर्धा प्रतिपत्तिर्भवति, तत्र आचारो–व्रतिनां समाचारः स एव विनीयते–अपनीयते कर्मानेनेति [3]विनयः आचारविनयः, [4]स चतुर्धा, यथा–संयमसामाचारि, [5]तपःसामाचारि, गणसामाचारी, एकाकिविहारसामाचारि च ।

तत्र संयमं स्वयमाचरति परं च ग्राहयति तत्र च सीदन्तं स्थिरीकरोति तत्रोद्यतं चोपबृंहतीति संयमसामाचारी १, [6]पाक्षिकादिषु तपःकर्म स्वयं करोति परं च कारयति भिक्षाचर्यां स्वयमनुतिष्ठति परं च तस्यां नियुङ्क्ते इति तपःसामाचारी २, ग्लान्युपेक्षणा-बालवृद्धादिवैयावृत्त्यादिकार्येषु स्वयमुद्यतोऽग्लान्या गणं प्रेरयतीति गणसामाचारी ३, एकाकिविहारप्रतिमांस्वयं प्रतिपद्यते परं च ग्राहयतीति एकाकिविहारसामाचारी ४ ।

[7]श्रुतविनयोऽपि चतुर्धा, सूत्रवाचनां ददाति १, अर्थं व्याख्यानयति २, हितं वाचयति, हितवाचना च तदैव भवति यदा सूत्रमर्थं तदुभयं च पारिणामिकादिगुणोपेतं शिष्यं परिभाव्य यद्यस्य योग्यं तत्तस्यैव ददाति ३, सूत्रमर्थं वा निःशेषं परिसमाप्तिं यावद्वाचयति नानवस्थिततयाऽपान्तरालेऽपि मुञ्चतीति ४।

१ चतुर्द्धा विनय० सं.॥ २ आयार सुय विणए इत्यादि-सं.॥ ३ विनयः स चतुर्धा जे.॥ ४ तुलना-धर्मरत्नप्र. टीका गाथा १२६ पृ. २६० ॥ ५ तपः समा. मु. ॥ ६ पक्षिका० सं.॥ ७ तुलना-धर्मरत्नप्र. वृ. टीका गाथा १२६ पृ. २६१ A ॥

विक्षिप्यते इति विक्षेपणं तदेव विनयो विक्षेपणविनयः, [1]स चतुर्धा, तत्र मिथ्यादृष्टिं मिथ्यामार्गाद्विक्षिप्य सम्यक्त्वमार्गं ग्राहयतीत्येकः १, सम्यग्दृष्टिं तु गृहस्थं गृहस्थभावाद्विक्षिप्य प्रव्राजयतीति द्वितीयः २, सम्यक्त्वाचारित्राद्वा च्युतं तद्भावाद्विक्षिप्य पुनस्तत्रैव व्यवस्थापयतीति तृतीयः ३, स्वयं च चारित्रधर्मस्य यथैवाभिवृद्धिस्तथैव प्रवर्तते अनेषणीयपरिभोगादित्यागेन एषणीयपरिभोगादिस्वीकारेण चेति चतुर्थः ४ ।

दोषाः-क्रोधादयस्तेषां परिघातो-निर्घातना स एव विनयो दोषपरिघातविनयः, [2]स चतुर्धा, क्रुद्धस्य देशनादिभिः क्रोधनिर्घातनमित्येकः १, कषाय-विषयादिभिर्दुष्टस्य तद्भावविनिवर्तनमिति द्वितीयः २, भक्त-पानादिविषयायाः परसमयविषयाया वा काङ्क्षाया निवर्तनमिति तृतीयः ३, स्वयं च क्रोधदोषकाङ्क्षारहितस्य सुप्रणिहितस्य प्रवर्तनमिति चतुर्थः ४ । तदेवमेते सर्वेऽपि षट्त्रिंशद्गुणा गुरोर्भवन्ति ॥५४६॥

अथवा इत्थं षट्त्रिंशद्गुणा गुरोर्भवन्ति, तत्राह-**'सम्मत्ते'**त्यादि, सम्यक्त्वस्य-दर्शनाचारस्य निःशङ्कितादयः, ज्ञानस्य-ज्ञानाचारस्य काल-विनयादयः, चरणस्य-चारित्राचारस्य ईर्यासमित्यादयः, प्रत्येकमष्टावष्टौ भेदा मिलिताश्चतुर्विंशतिः, तपसश्च बाह्याभ्यन्तरभेदभिन्नस्य प्रत्येकं षड्विधत्वेन अनशनादयो द्वादश भेदाः, सर्वमीलने च षट्त्रिंशद्भवन्ति ॥५४७॥

अथ भङ्गयन्तरेणापि गुरोः षट्त्रिंशद्गुणानाह-**'आयाराई'**त्यादि, आचाराः-श्रुतादयः प्राग्व्यावर्णितस्वरूपा अविवक्षितस्वस्वभेदा अष्टौ गणिसम्पदः, तथा-

"आचेलक्कु १ देसिय २ सिज्जायर ३ रायपिंड ४ किइकम्मे ५ । वय ६ जेट्ठ ७ पडिक्कमणे ८

१ तुलना-धर्मरत्नप्र.दे.टीका गाथा १२६ पृ.२९१ A ॥ २ तुलना-धर्मरत्नप्र. टीका गाथा १२६ पृ.२९१ A ॥

मासं ६ पञ्चोसवणकप्पो १० ॥ १ ॥" [तुलना–पञ्चवस्तु १५००, बृहत्कल्पभा. ६३६४, निशीथभा. ५९३३] इत्येवं वक्ष्यमाणस्वरूपो दशविधः स्थितकल्पः, तथा द्वादशविधं तपः प्रागुक्तस्वरूपम्, तथा षडावश्यकानि–सामायिक-चतुर्विंशतिस्तव-वन्दनक-प्रतिक्रमण-कायोत्सर्ग-प्रत्याख्यानलक्षणानि, एतानि सर्वाण्यपि मिलितानि षट्त्रिंशत्सूरिगुणा भवन्ति ।

इह चैवमन्या अपि [1]षट्त्रिंशिकाः सम्भवन्ति, तास्तु विस्तरभयान्नाभिधीयन्ते, केवलं किञ्चित्सोपयोगत्वात् सुप्रतीतत्वाच्च—

"[2]देस-कुल-जाइ-[3]रूवे [4]संघयणी धिइजुओ अणासंसी । [5]अविकत्थणो अमायी थिरपरिवाडी गहियवक्को ॥१॥
जियपरिसो जियनिद्दो मज्झत्थो देस-कालभावन्नू । आसन्नलद्धपइभो नाणाविहदेसभासन्नू ॥२॥
पंचविहे आयारे जुत्तो सुत्तत्थ-तदुभयविहिन्नू । आहरण-हेउ-[6]उवनय-नयनिउणो गाहणाकुसलो ॥३॥
ससमय परसमयविऊ गंभीरो दित्तिमं सिवो सोमो । गुणसय[7]कलिओ जुत्तो [8]पवयणसारं परिकहेउं ॥४॥

[बृ. क. भा. २४१-४]

---

१ सम्बोधप्रकरणे(३।९०-१४३।४७ प्रकारैः षट्त्रिंशिकाः प्रदर्शिताः । गुरुगुणषट्त्रिंशद्षट्त्रिंशिकाकुलकम अपिद्र ष्टव्यम् ॥
२ इदं गाथाचतुष्टयं सम्बोधप्रकरणे (३।९४-९७) धर्मरत्नप्र. दे. टीकायाम् (गाथा १२६ पत्र २८९) अपि विद्यते ॥
३ ०रूवी-सम्बोधप्र. ३।९४, बृहत्कल्पभाष्य २४१, धर्मरत्नप्र. दे. टीका पत्र २८९ B ॥ ४ संघयणं-जे. । संघइणी-बृ.क. भा. २४१ ॥ ५ अविकंथणो-सम्बोधप्र. ३।९४, बृ.क.भा २४१ ॥ ६ ०भायन्नू-सं. ॥ ७ ०उवणय० सं. । कारण०-इति धर्मरत्नप्र.दे. टीका पृ.२८९ ॥ ८ ०कलिओ एसो प० मु. ॥ ९ पवयणउवएसओ सुगुरु-इति सम्बोधप्र. ३।९० पाठः ॥

इति गाथाचतुष्टयभणिताः सूरिगुणाः षट्त्रिंशद्दर्श्यन्ते-तत्र युतशब्दः प्रत्येकमभिसम्बध्यते, देशयुतः कुलयुत इत्यादि, [1]तत्र यो मध्यदेशे जातो यो वाऽर्धषड्विंशतिषु जनपदेषु स देशयुतः, स ह्यार्यदेशभणितं जानाति ततः सुखेन तस्य समीपे शिष्याः सर्वेऽप्यधीयन्ते इति तदुपादानम् १, कुलं-पैतृकं तथा च [2]लोके व्यवहारः-ईक्ष्वाकुकुलजोऽयमित्यादि तेन युतः प्रतिपन्नार्थनिर्वाहको भवति २, जातिः-मातृकी, तया युतो विनयादिगुणवान् भवति ३, रूपयुतो लोकानां गुणविषयबहुमानभाग् जायते, 'यत्राकृतिस्तत्र गुणा वसन्ति' इति प्रवादात् , कुरूपस्य अनादेयत्वादिप्रसङ्गाच्च ४, संहननेन-विशिष्टशारीरसामर्थ्यरूपेण युतो व्याख्यायां न श्राम्यति ५, धृतिः-विशिष्टमानसावष्टम्भलक्षणा तया युतो नातिगहनेष्वप्यर्थेषु भ्रममुपयाति ६, 'अनाशंसी'-श्रोतृभ्यो वस्त्राद्यनाकाङ्क्षी ७, 'अविकत्थनः'-नातिबहुभाषी, यद्वा स्वल्पेऽपि केनचिदपराद्धे पुनः पुनस्तदुत्कीर्तनं विकत्थनं तद्रहितः ८, 'अमायी'-शाठ्यरहितः ९, स्थिरा-अतिशयेन निरन्तराभ्यासतः स्थैर्यमापन्ना अनुप्रयोगपरिपाट्यो यस्य स स्थिरपरिपाटिः, तस्य हि सूत्रमर्थो वा न मनागपि गलति १०, 'गृहीतवाक्यः'-उपादेयवचनः, तस्य हि स्वल्पमपि वचनं महार्थमिव प्रतिभाति ११, 'जितपर्षत्' न महत्यामपि पर्षदि क्षोभमुपयाति १२,'जितनिद्रः'अल्पनिद्रः, स हि रात्रौ सूत्रमर्थं वा परिभावयन् न निद्रया बाध्यते १३, [3]मध्यस्थः-सर्वेषु शिष्येषु समचित्तः १४, देशं कालं च भावं जानातीति देश-काल-भावज्ञः, स हि देशं कालं भावं च लोकानां ज्ञात्वा सुखेन विहरति, शिष्याणां वाऽभिप्रायान् ज्ञात्वा तान्

१ इत आरभ्य आद्वारं तुल्यप्रायं बृहत्कल्पटीका मलयगिरिसूरिविहिता पृ. ७५ तः ॥ २ लोकव्यवहार-मु. ॥
३ मध्यस्थः सत्वेषु समचित्ता-सं.॥

सुखेनानुवर्तयति १५-१६-१७, आसन्ना-तत्क्षणादेव लब्धा कर्मक्षयोपशमेनाविर्भूता प्रतिभा-परितीर्थिकादीनामुत्तरप्रदानशक्तिर्यस्य स आसन्नलब्धप्रतिभः १८, नानाविधानां देशानां भाषां जानातीति नानाविधदेशभाषाज्ञः, स हि नानादेशीयान् शिष्यान् सुखेन शास्त्राणि ग्राहयति, तत्तद्देशजांश्च जनान् तत्तद्भाषया-धर्ममार्गेऽवतारयति १९, पञ्चविध आचारो-ज्ञानाचारादिरूपस्तस्मिन् 'युक्तः' उद्युक्तः स्वयमाचारे [1]ष्वनवस्थितस्यान्यानाचारेषु प्रवर्तयितुमशक्यत्वात् २४, सूत्रार्थग्रहणेन चतुर्भङ्गी सूचिता, एकस्य सूत्रं नार्थः, द्वितीयस्यार्थो न सूत्रम्, तृतीयस्य सूत्रमप्यर्थोऽपि, चतुर्थस्य न सूत्रं नाप्यर्थः, तत्र तृतीयभङ्गग्रहणार्थं तदुभयग्रहणम्, ततः सूत्रा-ऽर्थतदुभयविधीन् जानातीति सूत्रा-ऽर्थतदुभयविधिज्ञः २५, आहरणं-दृष्टान्तः, [2]हेतुर्द्विविधः-कारको ज्ञापकश्च तत्र कारको यथा घटस्य कर्ता कुम्भकारः, ज्ञापको यथा तमसि घटादीनामभिव्यञ्जकः प्रदीपः, उपनयः-उपसंहारो दृष्टान्तदृष्टस्यार्थस्य प्रकृते योजनमिति भावः, 'कारण' त्ति पाठे तु कारणं-निमित्तम्, नया-नैगमादयः, एतेषु निपुणः आहरण-हेतूपनय-नयनिपुणः, स हि श्रोतारमपेक्ष्य तत्प्रतिपत्त्यनुरोधतः क्वचिद् दृष्टान्तोपन्यासं क्वचिद्धेतूपन्यासं करोति २६-२७, उपसंहारनिपुणतया सम्यगधिकृतमर्थमुपसंहरति २८, नयनिपुणतया स सम्यगधिकृतनयवक्तव्यताऽवसरे सम्यक् सप्रपञ्चं विवक्षत्येन नयानभिधत्ते २९, 'ग्राहणाकुशलः'-प्रतिपादनशक्तियुक्तः ३०, [3]स्वसमयं परसमयं च वेत्तीति स्वसमयपरसमयवत्, स हि परेणाक्षिप्तः सुखेन स्वपक्षं परपक्षं च निर्वाहयति ३१-३२, 'गम्भीरः'-अतुच्छस्वभावः

१ ष्ववस्थितस्याज्ञानाचारेषु-सं. ॥ २ "हेतुश्चतुर्विधो यापकादिः, यथा दशवैकालिकनिर्युक्तौ [१। ८६]" इत्यधिकं बृहत्कल्पटीकायाम् पृ. ७५ ॥ ३ सस्समयं-जे. ॥

३३, 'दीप्तिमान्'–परवादिनामनुद्घर्षणीयः ३४; 'शिवः'–अकोपनो यदिवा यत्र तत्र वा विहरन् कल्याणकरः ३५; 'सोमः'–शान्तदृष्टिः ३६ इति षट्त्रिंशद्गुणोपेतो गुरुर्विज्ञेयः, उपलक्षणत्वाच्चामीषां गुणानामपरैरपि गुणैरौदार्यस्थैर्यादिभिः शशधरकरनिकरकमनीयैरलङ्कृतः प्रवचनोपदेशको गुरुर्भवति, तथा चाह–"गुणसय-[1]कलिओ जुत्तो पवयणसारं परिकहेउं"ति,यद्वा गुणा–मूलगुणा उत्तरगुणाश्च तेषां शतानि तैः कलितो गुण-शतकलितः 'युक्तः'–समीचीनः प्रवचनस्य–द्वादशांगस्य सारम्–अर्थं कथयितुम् , यदुक्तम्–

"[2]गुणसुट्ठियस्स वयणं घयपरिसित्तो व्व पावओ भाइ । गुणहीणस्स न सोहइ नेहविहूणो जह पईवो ॥१॥" [बृ.क.भा.२४५] ॥५४८॥ ॥६४॥

इदानीं 'विणओ आसन्नेत्यधिकृत्याह' त्ति पञ्चषष्टं द्वारमाह—

तित्थयर १ सिद्ध २ कुल ३ गण ४ संघ ५ किरिय ६ धम्म ७ णाण ८ णाणीणं ९ ।
आयरिय १० थेर ११ उज्झाय १२ गणीणं १३ तेरस पयाइं ॥५४९॥
अणासायणा १ य भत्ती २ बहुमाणो ३ तह य वण्णसंजलणा ४ ।
तित्थयराई तेरस चउग्गुणा हुंति बावण्णा ॥५५०॥ [दशवै.नि.३२५-६]

१ कलिय उज्जुत्तो-सं.। २ अन्य मलयगिरिसूरिकृता "व्याख्या-'यो मूलगुणादिषु गुणेषु सुस्थितस्तस्य वचनं घृतपरि-सिक्तपावक इव भाति' दीप्यते । गुणहीनस्य तु न शोभते वचनम् , यथा स्नेहविहीनः प्रदीपः। उक्तञ्च-आयारे बहुं तो, आयारफलवणा अलंकंतो । आयारपरिच्छट्ठो, सुद्धचरणदेसणे महओ ॥२४५॥बृ.क भा. दी. पृ. ७९ ॥

३ बावन्नविहिविहाणेणऽत्थि-ता. । तुलना-बावन्नविहिविहाणं बेंत अणासायणाविणयं ॥दशवै. नि. ३२४॥ समवायाङ्ग-टीकायाम् (पृ.६५B) षष्ठिविधो अनाशातनाविनयः दर्शितः ॥

'तित्थे'त्यादिगाथाद्वयम्, [1]'तीर्थकरादिस्वरूपाणि तावत् त्रयोदश पदानि, तत्र तीर्थकर-सिद्धौ प्रसिद्धौ, कुलं—नागेन्द्रकुलादि, गणः-कोटिकादिः, सङ्घः—प्रतीतः, क्रिया—अस्तिवादरूपा, [2]धर्मः—श्रमण-श्रावकधर्मादिः, ज्ञानं—मत्यादि, ज्ञानिनः—तद्वन्तः, आचार्यः—प्रतीतः, स्थविरः—सीदतां स्थिरीकरणहेतुः, उपाध्यायः—प्रसिद्धः, कियतोऽपि साधुसमुदायस्याधिपतिर्गणी ॥

यदि नामैतानि च त्रयोदश पदानि ततः किमित्याह— आशातना—ज्ञात्यादिहीलना तदभावोऽनाशातना तीर्थकरादीनां सदैव कर्तव्या, तथा भक्तिः—तेष्वेवोचितोपचाररूपा, तथा बहुमानः—तेष्वेवान्तरङ्गप्रतिबन्धविशेषः, तथा तेषामेव 'वर्णसञ्ज्वलना' वर्णः—कीर्तिस्तस्य सञ्ज्वलना—प्रकाशनम्, अनेन प्रकारेण तीर्थकरादयस्त्रयोदश चतुर्गुणा अनाशातनाद्युपाधिभेदेन द्विपञ्चाशद्[3]नयभेदा भवन्तीति ॥५४९—५५० ॥६५॥ सम्प्रति 'चरणं' ति षट्षष्टं द्वारमाह—

वय ५ समणधम्म १० संजम १७ वेयावच्चं १० च बंभगुत्तीओ ९ ।
नाणाइतियं ३ तव १२ कोहनिग्गहा ४ इइ चरणमेयं ७० ॥५५१॥ [तुलना—ओघनि.भाष्य. २]

पाणिवह मुसावाए अदत्त मेहुण परिग्गहे चेव ।
एयाइं [4]होंति पंच [5]उ महव्वयाइं जईणं तु ॥५५२॥

१ तुलना—दशवै.हारि.वृत्तिः २४२ A ॥ २ "धर्मः श्रुतधर्मादिः" इतिदशवै. हारि.वृत्तिः २४२A ॥ ३ नयरूपाभेदा-सं. ॥ ४ हुंति-ता. ॥ ५ वि-ता. ॥

खंती य मद्दवज्जव मुत्ती तव संजमे य बोद्धव्वे ।
सच्चं सोयं आकिंचणं च बंभं च जइधम्मो ॥५५३॥
[1]पंचासवा विरमणं पंचिंदियनिग्गहो कसायजओ ।
दंडत्तयस्स विरई सतरसहा संजमो होइ ॥५५४॥

[2]पुढवि १ दग २ अगणि ३ मारुय ४ वणस्सइ ५ बि ६ ति ७ चउ ८ पणिंदि ९ [3]अजीवे १० ।
पेहु ११ [4]प्पेह १२ पमज्जण १३ परिठवण १४ मणो १५ वई १६ काए १७ ॥५५५॥[दशवै. नि.४६]

आयरिय १ उवज्झाए २ तवस्सि ३ सेहे ४ गिलाण ५ [5]साहूसु ६ ।
समणोन्न ७ संघ ८ कुल ९ गण १० वेयाच्चं हवइ दसहा ॥५५६॥

वसहि १ कह २ निसिज्जि ३ दिय ४ कुड्डंतर ५ पुव्वकीलिय ६ पणीए ७ ।
अइमायाहार ८ विभूसणाई ९ नव बंभगुत्तीओ ॥५५७॥

बारस अंगाईयं नाणं तत्तत्थसद्दहाणं तु ।
दंसणमेयं चरणं विरई देसे य सव्वे य ॥५५८॥

---

१ तुलना- 'पञ्चास्रवाद्विरमणं पञ्चेन्द्रियनिग्रहश्च कषायजयः । दण्डत्रयविरतिरिति संयमः सप्तदशभेदः ॥' इति प्रशमरति प्र.१५२॥ २ तुलना-तत्त्वार्थसूत्रभाष्यं सिद्धसेनगणिटीका च ६।६ ॥ ओघनिर्युक्तिभाष्यम् १६६-१७७ ॥ ३ अज्जीवा- मु. । अज्जीवे-इति दशवै.नि ४६, योगशास्त्रटीका ४-६३ ॥ ४ पेहु-वा. । प्पेहु-इति धर्मसङ्ग्रहवृत्तिः मा. २/पृ.१२८ B ॥ ५ साहूसु-वा. । धर्मसङ्ग्रहवृत्तौ (मा. २/पृ. १२१) अपि साहुसु इति पाठः ॥

अणसणमूणोयरिया वित्तिसंखेवणं रसच्चाओ ।
कायकिलेसो संलीणया य बज्झो तवो होइ ॥५५९॥
पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।
झाणं उस्सग्गोवि य अब्भिंतरओ तवो होइ ॥५६०॥ [दशवै. नि. ४७, ४८]
कोहो माणो माया लोभो [1]चउरो हवंति हु कसाया ।
एएसिं निग्गहणं चरणस्स हवंतिमे भेया ॥५६१॥

[2]'वयसमणे'त्यादिगाथादशकम्, [3]व्रतानि–प्राणातिपातविरमणादीनि *परिग्रहविरमणान्तानि * तथा श्रमणानां–साधूनां धर्मः श्रमणधर्मः–क्षान्तिमार्दवादिको दशभेदः, तथा सम्–एकीभावेन [4]यमः–संयमः उपरमः सप्तदशभेदः, तथा व्यापिपर्ति स्मेति व्यापृतस्तस्य भावो वैयावृत्त्यम् आचार्यादिभेदाद्दशप्रकारम्, तथा ब्रह्म–ब्रह्मचर्यम्, तस्य गुप्तयो ब्रह्मचर्यगुप्तयः, ताश्च वसत्यादिका नव, तथा ज्ञायतेऽनेनेति ज्ञानम्–आभिनिबोधिकादि तत् आदिर्यस्य तद् ज्ञानादि आदिशब्दात्सम्यग्दर्शन-चारित्रपरिग्रहः, ज्ञानादि च तत् त्रिकं च ज्ञानादित्रिकम्, तथा तपो–द्वादशप्रकारमनशनादि, तथा क्रोधस्य निग्रहः क्रोधनिग्रहः बहुवचनं माननिग्रहादिपरिग्रहार्थम्, इति–एवम्प्रकारम् एतच्चरणं [5]भवति, [6]'कोहनिग्गहाई चरणं' इति तु पाठे क्रोधनिग्रह आदिर्यस्य माननिग्रहादिकदम्बकस्य तत्क्रोधनिग्रहादि, एतच्चरणमवसेयमिति ।

१ चउरो वि हुंति चउभेया-ता. ॥ २ 'वये' त्यादि-मु. ॥ ३ तुलना–ओघनिर्युक्तिटीका पृ. ५ B तः ॥ * * चिह्नद्वयमध्यवर्तीपाठः जे.सं.नास्ति ॥ ४ यमः उपरमः संयमः सप्त० मु. ॥ ५ भवतीति-मु. ॥ ६ ओघनिर्युक्तिभाष्येऽपि (गाथा २, पृ. ५) 'कोहनिग्गहाई चरणं' इति पाठः ॥

इह सहृदयंमन्यः प्राह—ननु चतुर्थव्रतान्तर्गतत्वाद् गुप्तयो न पृथग्भणनीयाः, अथ परिकरभूताश्चतुर्थ-व्रतस्य ब्रह्मचर्यगुप्तयोऽभिधीयन्ते एवं तर्हि प्राणातिपातविरमणादेरेकैकस्य व्रतस्य परिकरभूता भावना अपि वाच्याः, गुप्तेर्भणने वा चतुर्थं व्रतं न भणनीयम्, तथा ज्ञानादित्रिकस्य ग्रहणं न करणीयम्, किन्तु ज्ञान-सम्यग्दर्शनयोरेवोपन्यासः कार्यः, चारित्रस्य व्रतग्रहणेनैव ग्रहणात्, तथा श्रमणधर्मग्रहणे संयमग्रहणं तपोग्रहणं चातिरिच्यते, संयम-तपसी वोद्धृत्य श्रमणधर्मोपन्यासः करणीयः, तथा तपोग्रहणे सति वैयावृत्त्यस्योपन्यासो निरर्थकः, वैयावृत्त्यस्य तपोऽन्तर्गतत्वात्, तथा क्षान्त्यादिधर्मग्रहणे सति क्रोधादिनिग्रहग्रहणमनर्थकमेव, तदियं गाथा परिभाव्यमाना आलूनविशीर्णेति ।

[1]तत्रोच्यते, चतुरचक्रवर्तिभिर्यदेतदुच्यते—व्रतग्रहणे सति गुप्तयो न पृथग्वाच्या इति, तदयुक्तम्, चतुर्थव्रतस्य हि निरपवादत्वं दर्शयितुमेता ब्रह्मचर्यगुप्तयः पृथगुपात्ताः, यदुक्तमागमे—
△ [2]"नवि किंचि अणुन्नायं पडिसिद्धं वावि जिणवरिंदेहिं। मुत्तुं मेहुणभावं न विणा तं रागदोसेहिं॥१॥"इति अथवा प्रथम-चरमतीर्थकरयोः परिग्रहव्रतात् भिन्नमेतन्महाव्रतं भवतीत्येतस्यार्थस्य ज्ञापनार्थं भेदे-नोपन्यास इति, यच्चाभ्यधीयत—व्रतग्रहणे ज्ञानादित्रिकं न वक्तव्यम्, किन्तु ज्ञान-दर्शनद्वयमेव, चारित्रस्य व्रतगहणेनैव गतत्वादिति, तदयुक्तम्, यतो यदेतद् व्रतचारित्रं स एकांशः सामायिकादेः पञ्चविधस्य चारित्रस्य, चतुर्विधं चारित्रमद्याप्यगृहीत[3]मस्ति, तदर्थं ज्ञानादित्रयमुपन्यस्तम् इति, यच्चोक्तम्—श्रमणधर्म-

१ तुलना-धर्मसङ्ग्रह भा-२-पृ- १३० ∧॥ △ नापि किञ्चिदनुज्ञातं प्रतिषिद्धं वापि जिनवरेन्द्रैः। मुक्त्वा मैथुनभावं न तद् विना राग-द्वेषाभ्याम् ॥ २ उद्धृतमिदम् ओघनिर्युक्तिवृत्तौ पृ- ६ ॥ ३ °मास्ते-सं- ॥

ग्रहणे संयम-तपसोरुपादानं न विधेयम्, श्रमणधर्मग्रहणेनैव तयोर्गृहीतत्वात्, तदप्यसाधु, संयम-तपसोः प्रधानमोक्षाङ्गत्वेन पृथगुपादानात्, कथं मोक्षं प्रति प्रधानाङ्गत्वम् इति चेत्, तत्र ब्रूमः—अपूर्वकर्माश्रवसंवर-हेतुः संयमः, पूर्वोपार्जितकर्मक्षयहेतुश्च तपः, ततः प्रधानत्वमनयोः, अतः श्रमणधर्मगृहीतयोरप्यनयोः प्रधान-तया भेदेनोपन्यासः कृतः, दृष्टश्चायं न्यायो यथा ब्राह्मणा आयाता [1]वशिष्ठोऽप्यायातः, अत्र हि ब्राह्मणग्रह-णेन [2]वशिष्ठस्यापि ग्रहणं कृतमेव तथापि प्रधानतया तस्य भेदेनोपन्यासः क्रियत इति, यच्चोक्तम्—तपोग्रह-णेन वैयावृत्त्यस्यापि ग्रहणाद्भेदेन तदुपादानं न विधेयमिति, तदप्यचारु, वैयावृत्त्यस्य यथा स्वपरोपकार-कारित्वेन प्राधान्यं न तथाऽनशनादीनां शेषतपोभेदानामिति ख्यापनार्थं तस्य भेदेनोपादानम्, यच्चाभि-हितम्—श्रमणधर्मग्रहणेनैव गृहीतत्वात् क्रोधादिनिग्रहः पृथग् न वक्तव्य इति, तदप्यसाधीयः, यतो द्विविधाः क्रोधादयः—उदीर्णा अनुदीर्णाश्च, तत्रोदीर्णानां क्रोधादीनां निग्रहणं क्रोधादिनिग्रहः अनुदीर्णानां तु तेषामुदयनिरोधनं क्षान्त्यादय इति ज्ञापनार्थं पृथगुपादानम्, अथवा वस्तु त्रिविधं—ग्राह्यं हेयमुपेक्षणीयं च, तत्र क्षान्त्यादयो ग्राह्याः, क्रोधादयो हेयाः, अतो निग्रहीतव्यास्ते इत्येवमर्थमित्थमुपन्यासः, ततः सर्वमनवद्यमिति ॥५५१॥

एनां च गाथां स्वयमेव सूत्रकारः प्रत्यवयवं व्याख्यानयति[3] पाणिवहेत्यादि—'एकदेशेन समुदायोपचा-रात्' "पाणिवह"त्ति प्राणिवधविरतिरिति द्रष्टव्यम्, एवं मृषावादादिष्वपि, तत्र प्राणिनां—त्रस-स्थावरजीवानाम्

[4]अज्ञान १ संशय २ विपर्यय ३ राग ४ द्वेष ५ स्मृतिभ्रंश ६ योगदुष्प्रणिधान ७ धर्मानादर ८

१ वशिष्ठो० मु. ॥ २ वशिष्ठ० मु. ॥ ३ ०नयति एक० मु. ॥ ४ तुलना-योगशास्त्रटीका १।२०॥

रूपाष्टविधप्रमादयोगाद्वधो–हिंसनं प्राणिवधस्तस्माद्विरतिः–सम्यग्ज्ञानश्रद्धानपूर्विका निवृत्तिः प्रथमव्रतम्, मृषा–अलीकम् [1]वदनं–प्रिय पथ्य-तथ्यवचनपरिहारेण भाषणं मृषावादस्तस्माद्विरतिर्द्वितीयं व्रतम्, [2]तत्र प्रियं वचनं यत् श्रुतमात्रं प्रीणयति, पथ्यं–यदुत्तरकाले हितम्, तथ्यं–सत्यम्, तथ्यमपि व्यवहारापेक्षया यदप्रियम्, यथा चौरं प्रति चौरस्त्वं कुष्ठिनं प्रति कुष्ठी त्वमिति तदप्रियत्वान्न तथ्यम्, तथ्यमपि यदहितं यथा मृगयुभिः पृष्टस्यारण्ये मृगान् दृष्टवतो मया मृगा दृष्टा इति, तज्जन्तुजातघातपापनिमित्तत्वाद् न तथ्यमिति, अदत्तस्य–स्वामिनाऽवितीर्णस्यादानं–ग्रहणम् अदत्तादानम्, [3]तच्च स्वामि-जीव-तीर्थकर गुर्वदत्तभेदेन चतुर्विधम्, तत्र स्वाम्यदत्तं–तृण-दारु-पाषाणादिकं तत्स्वामिना यददत्तम्, जीवादत्तं–यत्स्वामिना दत्तमपि जीवेनादत्तम्, यथा प्रव्रज्यापरिणामरहितो माता-पितृभ्यां पुत्रादिर्गुरुभ्यो दीयते सचित्तपृथ्वीकायादिर्वा, तद्धि तत्स्वामिना दत्तमपि तदधिष्ठायकजीवैरदत्तमिति, तीर्थकरादत्तं–यत्तीर्थकरैः प्रतिषिद्धमाधाकर्मादि गृह्यते, गुर्वदत्तं नाम स्वामिना दत्तमाधाकर्मादिदोषरहितं गुरूनननुज्ञाप्य यद् गृह्यते, तस्माद्विरतिस्तृतीयं व्रतम्, मिथुनं–स्त्री–पुंसद्वन्द्वं तस्य कर्म मैथुनं तस्माद्विरतिश्चतुर्थं व्रतम्, परिगृह्यते-आदीयते असाविति *परिग्रहः, * परिग्रहणं वा परिग्रहः, स च धन-धान्य-क्षेत्र-वास्तु-रूप्य-सुवर्ण-चतुष्पद-द्विपद-कुप्यभेदान्नवविधस्तस्माद्विरतिः- मूर्च्छापरिहारेण निवृत्तिः, 'मुच्छा परिग्गहो वुत्तो' इतिवचनात्, [4]न तु द्रव्यादित्यागमात्रम्, यस्मादविद्यमानेष्वपि द्रव्य-क्षेत्र-काल-भावेषु मूर्च्छया प्रशमसौख्यविपर्यासेन चित्त-

१ वचनं-सं. ॥ २ तुलना-योगशास्त्रटीका १।२१॥ धर्म संग्रहवृत्तिः ३।४२॥ ३ तुलना-योगशास्त्रटीका १। २२॥
* * चिह्नद्वयमध्यवर्तीपाठः सं. नास्ति ॥ ४ तुलना-योगशास्त्रटीका १। २४॥

विप्लवः स्यात्, सत्स्वपि च द्रव्यादिषु तृष्णात्यक्तमनसामसमप्रशमसुखसंप्राप्त्या चित्तविप्लवाभावः, अत एव धर्मोपकरणधारिणामपि मुनीनां शरीरे उपकरणे च निर्ममत्वानामपरिग्रहत्वम्, यदाहुरस्मद्गुरवः–"धर्मसाधननिमित्तमुक्तवद्वस्त्रपात्रमुपकारि धारयन्। देहवन्न हि परिग्रही यतिः, प्रेम नास्य यदि मूर्च्छया सह ॥१॥"

एतानि यतीनां भवन्ति पञ्चैव तुशब्दस्यैवकारार्थत्वान्न चत्वारि, प्रथम-पश्चिमतीर्थकृत्तीर्थयोः पञ्चानामेव भावात्, महान्ति–बृहन्ति तानि च व्रतानि च-नियमा महाव्रतानि, महत्त्वं चैषां सर्वजीवादिविषयत्वेन महाविषयत्वात्, उक्तं च—

△पढमंमि सव्वजीवा बीए चरिमे य सव्वदव्वाणि। सेसा महव्वया खलु तदेकदेसेण दव्वाणं ॥१॥" [आव. नि. ७६१] इति, तेषां–द्रव्याणामेकदेशेनेत्यर्थः ॥५५२॥

अथ श्रमणधर्ममाह 'खंती' त्यादि, [1]क्षान्तिः—क्षमा शक्तस्याशक्तस्य वा सहनपरिणामः, सर्वथा क्रोधविवेक इत्यर्थः, मृदुः–अस्तब्धस्तस्य भावः कर्म वा मार्दवम्, नीचैर्वृत्तिरनुत्सेकश्च, ऋजुः–अवक्रमनोवाक्कायकर्मा तस्य भावः कर्म वा आर्जवं–मनोवाक्कायविक्रियाविरहः मायारहितत्वमितियावत्, मोचनं मुक्तिः–बाह्याऽभ्यन्तरवस्तुषु तृष्णाविच्छेदः लोभपरित्याग इत्यर्थः, तप्यन्ते रसादिधातवः कर्माणि वाऽनेनेति तपः, तच्च द्वादशविधमनशनादि, संयमः–आश्रवविरतिलक्षणः, सत्यं–मृषावादविरतिः, शौचं–संयमं प्रति निरुपलेपता, निरतीचारतेत्यर्थः, नास्य [2]किञ्चनद्रव्यमस्तीत्यकिञ्चनः तस्य भाव आकिञ्चन्यम्, उपलक्षणं

१ ०समशम० सं. ॥ △प्रथमे सर्वजीवा द्वितीये चरमे च सर्वद्रव्याणि। शेषाणि महाव्रतानि खलु तदेकदेशेन द्रव्याणां ॥ २ तुलना-योगशास्त्रटीका-४/९३, धर्मसङ्ग्रहवृत्तिः भा. २/पृ. १२८ ऽ तः॥ ३ किञ्चनं-मु. ॥

चैतत् तेन शरीरधर्मोपकरणादिष्वपि निर्ममत्वमाकिञ्चन्यम्, नवब्रह्मचर्यगुप्तिसनाथ उपस्थसंयमो ब्रह्म, एष दशप्रकारो यतिधर्मः, अन्ये त्वेवं पठन्ति—

"खंती मुत्ती अज्जव मद्दव तह लाघवे तवे चेव। संजम [1]चियागऽकिञ्चण बोद्धव्वे बंभचेरे य ॥१॥"

तत्र लाघवं द्रव्यतोऽल्पोपधिता भावतो गौरवपरिहारः, त्यागः—सर्वसङ्गानां विमोचनं संयतेभ्यो वस्त्रादिदानं वा, शेषं प्राग्वत् ॥५५३॥

अथ संयममाह—'पंचासवे'त्यादि, आश्रूयते—उपार्ज्यते कर्म एभिरित्याश्रवाः—अभिनवकर्मबन्धहेतवः प्राणातिपात मृषावादा-ऽदत्तादान-मैथुन-परिग्रहलक्षणाः पञ्च, तेभ्यो विरमणं—विनिवर्तनम्, इन्द्रियाणि—स्पर्शन रसन-घ्राण-चक्षुः-श्रोत्रलक्षणानि पञ्च, तेषां निग्रहो—नियन्त्रणम्, स्पर्शादिषु विषयेषु लाम्पट्यपरिहारेण वर्तनम्; कषायाः—क्रोध-मान-माया-लोभलक्षणाश्चत्वारस्तेषां जयः—अभिभवः, उदितानां विफलीकरणेन अनुदितानां चानुत्पादनेन, दण्ड्यते—चारित्रैश्वर्यापहारतोऽसारीक्रियते एभिरात्मेति दण्डा—दुष्प्रयुक्ता मनो-वाक्कायास्तेषां त्रयं दण्डत्रयम्, तस्य विरतिः—अशुभप्रवृत्तिनिरोधः, एष सप्तदशविधः संयमो भवति ॥५५४॥

अथवाऽन्यथा सप्तदशविधः संयमो भवति—'पुढवी'त्यादि, [2]पृथिव्युदकाऽग्निमारुत-वनस्पति-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियाणां मनो-वाक्कायकर्मभिः करण-कारणा-ऽनुमतिभिश्च संरम्भ-समारम्भाऽऽरम्भवर्जनमिति नवधा जीवसंयमः, तत्र—

---

१ चाओ-धर्मसङ्ग्रहवृत्तिः भा. २। पृ. १२८ ॥ २ सप्तदशसंयमानां, तुलना-योगशास्त्रटीका ४।९३ ॥

∧ "[1]संकप्पो संरम्भो [2]परितावकरो भवे समारंभो । आरम्भो उद्दवओ सुद्धनयाणं तु सव्वेसिं॥१॥" तथा अजीवरूपाण्यपि पुस्तकादीनि दुष्षमादिदोषात्तथाविधप्रज्ञा-ऽऽयुष्क-श्रद्धा-संवेगोद्यम-बलादिहीनाऽद्यकालीनविनेयजनानुग्रहाय प्रतिलेखनाप्रमार्जनापूर्वं यतनया धारयतोऽजीवसंयमः, तथा प्रेक्ष्य—चक्षुषा निरीक्ष्य बीजहरितजन्तुसंसक्त्यादि [3]रहितं स्थानं तत्र शयना-ऽऽसन-चङ्क्रमणादीनि कुर्वीतेति प्रेक्षासंयमः, [4]तथोपेक्षासंयमो—गृहस्थस्य पापव्यापारं कुर्वत उपेक्षणं न पुनरिदं ग्रामचिन्तनादिकं सोपयोगः कुरु इत्याद्युपदेशनम् । अथवा साधूनां संयमं प्रति सीदतां प्रेरणं [5]प्रेक्षासंयमः, पार्श्वस्थादीनां च निर्द्वंधसानां व्यापारणं प्रत्युपेक्षणमुपेक्षासंयम इति । तथा प्रेक्षितेऽपि स्थण्डिले वस्त्र-पात्रादौ च रजोहरणादिना प्रमृज्य शयना-ऽऽसन निक्षेपा-ऽऽदानादि कुर्वतः कृष्णभूमप्रदेशात्पाण्डुभूमादौ प्रदेशे सागारिकाद्यनिरीक्षणे सचित्ता-ऽचित्त-मिश्ररजोऽवगुण्ठितपादादीनां रजोहरणेन प्रमार्जनं सागारिकादिनिरीक्षणे त्वप्रमार्जनं कुर्वतो वा [6]प्रमार्जनासंयमः, यदुक्तम्—

*"पायाई सागरिए अपमज्जित्तावि संजमो होइ । [7]ते चेव पमज्जंतेऽसागरिए संजमो होइ ॥१॥"

∧ संकल्पः संरम्भः परितापकरो भवेत् समारम्भः । आरम्भः उपद्रवतः शुद्धनयानां च सर्वेषाम् ॥१॥

१ इयं गाथा आचाराङ्गटीकायाम् (पृ०३२५ A) उद्धृता, अत्रापि १०६० क्रमाङ्के विद्यते ॥ २ परितापकरो-मु० ॥ ३ ०रहितं (यत्)स्थानं-मु० ॥ ४ तुलना-ओघनि. वृत्तिः पत्र ११४B ॥ ५ प्रेक्षासंयमः तथा उपेक्षा संयम पार्श्वस्थादीनां-जे० ॥ ६ तुलना-ओघनि. वृत्तिः पत्र ११४ B ॥ * पादादीनप्रमार्जयतोऽपि सागारिके सति संयमो भवति । तानेवासागारिके प्रमार्जयतः संयमो भवति ॥१॥ ७ पायाइ-धर्मसङ्ग्रहवृत्तिः भा. २/पत्र १२८ ॥ इति ।

तथा भक्त पानादिकं वस्त्र-पात्रादिकं च प्राणिसंसक्तमविशुद्धमनुपकारकं वा जन्तुरहिते स्थाने विधिना समयभणितेन परिष्ठापयतः परिष्ठापनासंयमः, तथा मनसो द्वेषेर्ष्याभिमानादिभ्यो निवृत्तिर्धर्मध्यानादिषु च प्रवृत्तिर्मनः-संयमः । तथा वाचो हिंसपरुषादिभ्यो निवृत्तिः शुभभाषायां च प्रवृत्तिर्वाक्संयमः, तथा गमनाऽऽगमनादिष्ववश्यकरणीयेषु यदुपयुक्तः कायं व्यापारयति स कायसंयमः, इत्येवं सप्तदशप्रकारः प्राणातिपात निवृत्तिरूपः संयमो भवति ॥५५५॥

इदानीं वैयावृत्यमाह–'आयरिये'त्यादि, आचारे-ज्ञानाचारादिके पञ्चविधे साधव आचार्याः आचर्यन्ते–सेव्यन्ते इति वा आचार्याः उप-समीपमागत्य विनेयैरधीयते–पठ्यते येभ्यस्ते उपाध्यायाः, तपो विकृष्टाविकृष्टरूपं विद्यते येषां ते तपस्विनः, नवतरदीक्षिताः शिक्षार्हाः शैक्षाः, ग्लाना–ज्वरादिरोगाक्रान्ताः, साधवः स्थविराः, समनोज्ञा–एकसामाचारीसमाचरणपराः, सङ्घः–श्रमण-श्रमणी-श्रमणोपासक-श्रमणोपासिकासमुदायः [1]बहूनां गच्छानामेकजातीयानां समूहः कुलं–चान्द्रादि, गच्छस्त्वेकाचार्यप्रणेयः साधुसमूहः, कुलसमुदायो [2]गणः–कोटिकादिः, एषामेवाचार्यादीनामन्न पान-वस्त्र पात्र-प्रतिश्रय-पीठ-फलक-संस्तारकादिभिर्धर्मसाधनैरुपग्रहः शुश्रूषामेषजक्रियाक्रान्तारोगोपसर्गेषु परिपालनमेवमादि वैयावृत्यम् ॥५५६॥

अथ ब्रह्मगुप्तीराह–'वसही'त्यादि, ब्रह्मचारिणा स्त्री पशु-पण्डकविवर्जिता वसतिरासेवनीया, तत्र [3]स्त्रियो देव-मानुषभेदात् द्विविधाः, एताश्च सचित्ताः, अचित्तास्तु पुस्त-लेप्य-चित्रकर्मादिनिर्मिताः,

१ तुलना-योगशास्त्रटीका (४/६०) पृ. ३१४। तत्त्वार्थे-सिद्धसेनीयावृत्तिः भा २। पृ. २५७॥ २ 'गणः स्थविरसन्ततिसंस्थितिः ।" इति तत्त्वार्थभाष्यम् ९-२४। 'गणः स्थविरसन्ततिः"। इति तत्त्वार्थ राजवार्तिकम् पृ. ६२३॥
३ तुलना–तत्त्वार्थ०सिद्ध० ७/३, योगशास्त्रटीका १। ३०-१, धर्मसङ्ग्रहवृत्तिः भा.२/पृ. १२६ B॥

पशवः-तिर्यग्योनिजाः, तत्र गो-महिषी-वडवा-वालेयादयः सम्भाव्यमानमैथुनाः, षण्डकाः-तृतीयवेदोदय-वर्तिनो महामोहकर्माणः स्त्री-पुंसेवनाभिरताः, तत्संसक्तौ हि तत्कृतविकारदर्शनान्मनोविकारसद्भावेन ब्रह्मचर्यबाधासम्भवात् १ । तथा स्त्रीणां केवलानामेकाकिना कथा-धर्मदेशनादिलक्षणवाक्यप्रबन्धरूपा न कथनीया, यदिवा स्त्रीणां सम्बन्धिनी कथा, यथा-'कर्णाटी सुरतोपचारचतुरा, लाटी विदग्धप्रिया' इत्यादिरूपा न कर्तव्या, रागानुबन्धिनी हि देश-जाति-कुल-नेपथ्य-भाषा-गति-विभ्रम-गीत-हास्य-लीला-कटाक्ष-प्रणय कलह-शृङ्गाररसानुविद्धा कामिनीनां कथा अवश्यमिह मुनीनामपि मनो विक्रियां नयतीति २ । [1]तथा निषद्या-आसनम्, कोऽर्थः ? - स्त्रीभिः सहैकासने नोपविशेत्, उत्थितास्वपि तासु मुहूर्तं तत्र नोपविशेत्, तदुपभुक्तासनस्य चित्तविकारकारणत्वात्, यदाह—

△"इत्थीए मलिय सयणासणंमि तप्फासदोसओ जइणो । दूसेइ मणं मयणो कुट्ठं जह फासदोसेणं ॥१॥३। तथा [2]अविवेकिजनापेक्षया स्पृहणीयानि स्त्रीणामिन्द्रियाणि—नयन-नासिका-मुख-कर्ण-देहादीनि उपलक्षण-त्वादङ्गानि च—स्तन-जघनादीनि अपूर्वविस्मयरसनिर्भरतया विस्फारितलोचनो न विलोकयेत्, न च विलोकनानन्तरमहो सलवणत्वं लोचनयोः, सरलत्वं नाशावंशस्य, स्पृहणीयत्वं पयोधरयोरित्यादि

१ तुलना-धर्मसङ्ग्रहवृत्तिः भा.२/पृ.१२९B । इतोऽग्रे "स्त्रीणां च पुरुषासने यामत्रयं नोपवेष्टव्यम्, यतः-पुरि-सासणे तु इत्थी, जामतिअं जाव नो व उवविसइ । इत्थीइ आसणंमी, वज्जेअव्वा नरेण दो घडिआ" ॥ इत्यधिकं धर्मसङ्ग्रहवृत्तौ भा. २ पृ. १२९B ॥ △ स्त्रिया परिषेविते शयनासने तत्स्पर्शदोषतो यतेर्मनो मदनो दूषयति यथा कुष्ठं स्पर्शदोषेण ॥१॥ २ तुलना-योगशास्त्रटीका १ । ३०-३१ पृ. १२६ ॥

तदेकाग्रचित्तश्चिन्तयेत्, तदवलोकनतच्चिन्तनयोर्मोहोदयहेतुत्वात् ४ । तथा कुड्यान्तरं–यत्रान्तरस्थेऽपि कुड्यादौ दम्पत्योः सुरतादिशब्दः श्रूयते ब्रह्मचर्यभङ्गभयाच्च तत्परित्यागः ५ । तथा [1]पूर्वं–गृहस्थावस्थायां क्रीडितं-स्त्रीसम्भोगानुभवलक्षणं द्यूतादिरमणलक्षणं वा नानुस्मरेत्,तत्स्मरणेन्धनक्षेपात्स्मराग्निः संधुक्ष्यते ६ । तथा प्रणीतम्–अतिस्निग्धमधुरादिरसं भक्तं न भुञ्जीत, [2]निरन्तरं वृष्य-स्निग्धरसप्रीणितो हि प्रधान-धातुपरिपोषेण वेदोदयादब्रह्मापि सेवते ७ । तथा रूक्षमैदंयुगीनमात्रमाहारम्–आकण्ठमुदरपूरणं वर्जयेत्, ब्रह्मच्युतिकारित्वात् शरीरपीडाकारित्वाच्च ८ । तथा विभूषणा– [3]स्नान-विलेपन-[4]धूपन-नख-दन्त-केशसंमार्जनादिः स्वशरीरस्य संस्कारमन्तं न कुर्यात्, अशुचिशरीरसंस्कारमूढो हि तत्तदुत्कलिकाम-यैर्निष्कल्पैर्वृथाऽऽत्मानमायासयतीति ९ । एता ब्रह्मचर्यस्य–मैथुनव्रतस्य गुप्तयः–परिरक्षणोपाया ब्रह्मचर्य-गुप्तयो नव भवन्ति ॥५५७॥

अथ ज्ञानादित्रिकमाह-'**णाणरसे**'त्यादि, ज्ञानं–कर्मक्षयोपशमसमुत्थोऽवबोधः, तद्धेतुत्वाद् द्वादशाङ्गा-दिकमपि ज्ञानम्, आदिशब्दादुपाङ्गप्रकीर्णादिपरिग्रहः । तथा तत्त्वानि–जीवा-ऽजीवा-ऽऽश्रव-संवर निर्जरा-बन्ध-मोक्षलक्षणानि, तेषामर्थः-अभिधेयम्, तस्य श्रद्धानं– तथेतिप्रत्ययरूपा रुचिरेतद्दर्शनम् । तथा सर्वेभ्यः पापव्यापारेभ्यो विरतिः–ज्ञान-श्रद्धानपूर्वकं परिहारश्चरणम्, तच्च द्विविधं–देशतः सर्वतश्च, तत्र देशतः श्राद्धानाम् , सर्वतः साधूनामिति ॥५५८॥

---

१ तुलना-योगशास्त्रटीका १।३०-३१,पृ-१२६ ॥ २ तुलना-योगशास्त्रटीका १/३०-३१ । पृ. १२६ ॥
३ तुलना-योगशास्त्रटीका १ । ३०-३१, पृ. १२६ । ४ ०धूपनख० सं. ॥

अथ द्वादशप्रकारं तप आह–'अणसण' 'मित्यादि, 'पायच्छित्त'मित्यादि, गाथाद्वयम्, एतत्स्वरूपं च तपोऽतिचारव्याख्यायां पूर्वमेव व्याख्यातम्, न पुनरिहोच्यते ॥५५९-५६०॥

अथ क्रोधनिग्रहादीनाह–'कोहो' इत्यादि, क्रोधो मानो माया लोभश्चत्वारो [2]भवन्ति कषायाः, कष्यन्ते–हिंस्यन्ते प्राणिनो यत्रासौ कषः–संसारस्तमेति–प्राप्नोति प्राणी यैस्ते कषायास्तेषां निग्रहणं–नियन्त्रणम् इति, चरणस्य–चारित्रस्यैते–पूर्वोक्ता भेदाः सप्ततिसङ्ख्या भवन्ति ॥

व्रतानां पञ्चके श्रमणधर्मस्य दशके संयमसम्बन्धिनि सप्तदशके वैयावृत्त्यदशके ब्रह्मगुप्तिनवके ज्ञानादीनां त्रिके तपसो द्वादशके क्रोधनिग्रहादीनां च चतुष्के मिलिते एतत्संख्यासम्भवादिति ॥५६१॥६६॥

इदानीं 'करण' ति सप्तषष्टं द्वारमाह—

पिंडविसोही ४ समिई ५ भावण १२ पडिमा १२ य इंदियनिरोहो
५ पडिलेहण २५ गुत्तीओ ३ अभिग्गहा ४ चेव करणं तु ७० ॥५६२॥ [ओघनि. भा. ३]

[3]'पिंडविसोही'इत्यादिगाथा, 'पिडि सङ्घाते' इत्यस्य 'इदितो नुम् धातोः' (पा० ७-१-५८) इति नुमि कृते पिण्डनं पिण्डः–सङ्घातः, बहूनां सजातीयानां विजातीयानां वा कठिनद्रव्याणामेकत्र समुदाय इत्यर्थः, समुदायश्च समुदायिभ्यः कथञ्चिदभिन्न इति त एव बहवः पदार्था एकत्र संश्लिष्टाः पिण्डशब्देनोच्यन्ते, तस्य विविधम्–अनेकैराधाकर्मादिपरिहारप्रकारैः शुद्धिः–निर्दोषता पिण्डविशुद्धिः । सं–सम्यक्

१ मित्यादि गाथाद्वयं-सं. ॥ २ भवन्ति कष्यन्ते-जे.॥ ३ पिंडेत्यादि-मु. ॥

प्रशस्ता अर्हत्प्रवचनानुसारेण, इतिः—चेष्टा, समितिः—ईर्यासमित्यादिका। भाव्यन्ते इति भावनाः—अनुप्रेक्षा अनित्यत्वादिकाः। प्रतिमाः—प्रतिज्ञा अभिग्रहप्रकारा मासिक्यादयः। इन्द्रियाणि—स्पर्शनादीनि तेषां निरोधः आत्मीयात्मीयेष्टानिष्टविषयरागद्वेषाभाव इत्यर्थः। प्रतिलेखनं प्रतिलेखना—आगमानुसारेण प्रति प्रति निरीक्षणमनुष्ठानं वा, सा च चोलपट्टादेरुपकरणस्य। गुप्तिः—गोपनमात्मसंरक्षणम्, मुमुक्षोर्योगनिग्रह इत्यर्थः। अभिगृह्यन्त इत्यभिग्रहाः—नियमविशेषा द्रव्यादिभिरनेकप्रकाराः। चः समुच्चये, एवकारः क्रमप्रतिपादनार्थः, एतत्करणं भवतीति, क्रियत इति करणम्, मोक्षार्थिभिः साधुभिर्निष्पाद्यत इत्यर्थः, तुशब्दो विशेषेण मूलगुणसद्भावे करणत्वमस्य नान्यथेति [दर्शनाय]।

अत्राह परः—ननु समितिग्रहणेनैव पिण्डविशुद्धेर्गृहीतत्वात् किं पिण्डविशुद्धिग्रहणं कर्तव्यम्, यत एषणासमितौ सर्वाऽप्येषणा गृहीता, पिण्डविशुद्धिरप्येषणैव, तत्किं भेदेनोपन्यासः? इति, अत्रोच्यते, [1]पिण्डद्रव्यव्यतिरेकेणाप्येषणा विद्यते [2]वसत्यादिरूपा, तद्ग्रहणार्थमेषणासमितिग्रहणं भविष्यतीति, पिण्डविशुद्धेस्तु भेदेनोपन्यासः कारणे ग्रहणं कर्तव्यं नाकारणे इत्यस्यार्थस्य ज्ञापनार्थः, अथवा आहारमन्तरेण न शक्यते पिण्डविशुद्ध्यादिकरणं सर्वमेव कर्तुमतो भेदेनोपन्यास इति ॥५६२॥

तत्र स्वयमेवैनां गाथां प्रतिपदं व्याख्यानयन् यैर्दोषै रहितस्य पिण्डस्य विशुद्धिर्भवति तान् दोषान् सामान्येन त्रिभेदानाह—

---

१ पिण्ड व्यति० सं.॥ २ वसत्यादिरूपेण जे.॥

[1]सोलस उग्गमदोसा सोलस [2]उप्पायणाय दोसत्ति ।
दस [3]एसणाय दोसा बायालीसं इह हवन्ति ॥५६३॥ [पञ्चाशकप्र. १३/३]
[4]आहाकम्मु १ देसिय २ पूईकम्मे ३ य मीसजाए य ४ ।
ठवणा ५ पाहुडियाए ६ पाओयर ७ कीय ८ पामिच्चे ९ ॥५६४॥
परियट्टिए १० अभिहडु ११ ब्भिन्ने १२ मालोहडे १३ [5]य अच्छिज्जे १४ ।
अणिसिट्ठे १५ ऽज्झोयरए १६ सोलस पिण्डुग्गमे दोसा ॥५६५॥ [पिण्डविशुद्धिः ३,४]

[6]'सोलसे' त्यादि, षोडश उद्गमदोषाः, उद्गमनमुद्गमः-पिण्डस्योत्पत्तिः, तद्विषया आधाकर्मिकादयो दोषा उद्गमदोषाः, तथा षोडश उत्पादनादोषाः, उत्पादनम् उत्पादना-मूलतः शुद्धस्यापि पिण्डस्य धात्रीत्वादिभिः प्रकारैरुपार्जनम्, तद्विषया दोषा उत्पादनादोषाः । तथा दश एषणादोषाः, एषणमेषणा-अशनादेर्ग्रहणकाले शङ्कितादिभिः प्रकारैरन्वेषणम् तद्विषया दोषा एषणादोषाः । एते चेह त्रयोऽपि मिलिता द्विचत्वारिंशद्भवन्ति ॥५६३॥

१ इतः पूर्वं ता. प्रतौ "पिंडं सिज्जं च वत्थं च चउत्थं पाय मेवय । अकप्पियं न इच्छिज्जा पडिगाहिज्ज कप्पियं' [दशवै. ६/४७] इत्यधिका गाथा विद्यते । तुलना-पिण्डनि. ६६९ ॥
२ 'उप्पायणाए' इति पञ्चाशके (१३/३) पाठः । उत्पादनायामपि तस्या वा-इति तत्रैव वृत्तौ पाठः । पिण्डनि. ६६९ द्रष्टव्या ॥ ३ एसणाए-इति पञ्चाशके (१३/३) पाठः॥ तुलना-सटीकपञ्चाशकप्र. १३/७ ॥
४ तुलना-पिण्डनिर्युक्तिः १२, १३, पञ्चाशकप्र. १३/५,६ ॥
५ य इय अच्छिज्जे-जे. ता. ॥ ६ 'सोलसे' त्यादि-मु. नास्ति ॥

तत्र तावदुद्गमविषयान् षोडश दोषान्नामग्राहमाह–'आहाकम्मे' त्यादिगाथाद्वयम् , आधाकर्मादयोऽध्यवपूरकान्ताः षोडश पिण्डोद्गमविषया दोषा भवन्तीतिगाथाद्वयस्य परमार्थः । तत्र 'आहाकम्मं' ति [1]आधानमाधा–साधुनिमित्तं चेतसः प्रणिधानम् यथा अमुकस्य साधोः कारणेन मया भक्तादि पचनीयमिति । आधया कर्म–पाकादिक्रिया आधाकर्म तद्योगाद्भक्ताद्यप्याधाकर्म । इह दोषाभिधानप्रक्रमेऽपि यद्दोषवतो भक्तादेरभिधानं तद्दोष-दोषवतोरभेदविवक्षया द्रष्टव्यम्, एवमन्यत्रापि । यद्वा आधाय–साधुं चेतसि प्रणिधाय यत् क्रियते भक्तादि तदाधाकर्म, पृषोदरादित्वाद्यलोपः, साधुनिमित्तं सचित्तस्याचित्तीकरण[2]मचित्तस्य वा पाक इति भावः १ ।

'उद्देसिय' त्ति [3]उद्देशनमुद्देशो–यावदर्थिकादिप्रणिधानं तेन निर्वृत्तं तत्प्रयोजनं वा औद्देशिकम् । तद् [4]द्विविधम्–ओघेन विभागेन च । तत्र ओघः–सामान्यम् , विभागः–पृथक्करणम् , इयमत्र भावना–नादत्तमिह किमपि लभ्यते, ततः कतिपया भिक्षा दद्म इति बुद्धया कतिपयाधिकतण्डुलप्रक्षेपेण यन्निर्वृत्तमशनादि तदोघौद्देशिकम् ओघेन–सामान्येन स्व–परपृथग्विभागकरणाभावरूपेण औद्देशिकमोघौद्देशिकमिति व्युत्पत्तेः । तथा विवाहप्रकरणादिषु यदुद्धरितं तत्पृथक्कृत्वा दानाय कल्पितं सद्विभागौद्देशिकम्, विभागेन–स्वसत्तायाः उत्तार्य पृथक्करणेनोद्देशिकं विभागौद्देशिकमिति व्युत्पत्तेः । [5]तत्रौघौद्देशिकमेवं

१ तुलना-पिण्डनिर्युक्तिवृत्तिः पृ. ३५A ॥ २ ०मचित्तस्य अचित्तीकरणमचीत्तस्य व पाकः-सं. ॥
३ तुलना–पिण्डनि. वृत्तिः पृ. ३५ A ॥ ४ तुलना–पिण्डनिर्युक्तिवृत्तिः पृ. ७७ A ॥
५ तुलना–सटीका पिण्डनिर्युक्तिः गाथा २२०-१, पृ.७७ B । पञ्चाशकटीका १३ / ८ ॥

प्रायेण भवति–इह कश्चिदनुभूतदुर्भिक्षबुभुक्षः सम्प्राप्तसुभिक्षो गृहस्थश्चिन्तयति, यथा–जीवितास्तावद्वयं कथमपि महाकष्टेनास्मिन् दुर्भिक्षे, इदानीं किमपि सम्प्राप्तवर्तनस्य प्रतिदिनमर्थिजनसम्पूर्णभोजनदानशक्त्यभावे मम भिक्षा अपि तावत्क्रियत्योऽपि दातुं युक्ताः, यतो नादत्तमिह जन्मन्यमुत्र च स्वर्गाद्यवाप्त्योपभुज्यते, दत्तस्यैव भोगात्, नाप्यकृतं पुण्यं स्वर्गगमनाद्यवाप्तये सम्पद्यते, कृतस्यैव फलदानसमर्थत्वादिति, ततः पुण्योपार्जनबुद्ध्या यदा गृहिणा प्रतिदिवसं यावत्प्रमाणं भक्तं पच्यते तावत्प्रमाणे एव भक्ते पक्तुमारभ्यमाणे पाखण्डिनां गृहिणां वा मध्ये यः कोऽपि समागमिष्यति तस्य भिक्षादानार्थमेतावत् स्वार्थमेतावच्च भिक्षादानार्थमित्येवं विभागरहितमेव तण्डुलानधिकतरान् प्रक्षिपति तदा ओघौद्देशिकं भवति। विभागौद्देशिकं पुनः प्रथमं तावत् त्रिधा–उद्दिष्टं कृतं कर्म च, [1]तत्र स्वार्थमेव निष्पन्नमशनादिकं भिक्षाचराणां दानाय यत्पृथक्कल्पितं तदुद्दिष्टम्, यत्पुनरुद्धरितं सत् शाल्योदनादिकं भिक्षादानाय करम्बादिरूपतया कृतं तत्कृतमित्युच्यते। यत्पुनर्विवाहप्रकरणादावुद्धरितं मोदकचूर्णादि तद्भूयोऽपि भिक्षाचराणां दानाय गुडपाकदानादिना मोदकादिरूपतया कृतं तत्कर्मेत्यभिधीयते। एकैकमपि पुनश्चतुर्धा–उद्देश-समुद्देश-ऽऽदेश-समादेशभेदात्। [2]तत्र यदुद्दिष्टं कृतं कर्म वा विभोगौद्देशिकं यावन्तः केऽपि भिक्षाचराः पाखण्डिनो गृहस्था वा समागमिष्यन्ति तेभ्यः सर्वेभ्योऽपि दातव्यमिति यदा सङ्कल्पितं भवति तदा तदुद्देशसंज्ञमुच्यते। यदा पुनः पाखण्डिनां देयत्वेन कल्पयति तदा तत् समुद्देशाख्यम्। यदा श्रमणानां शाक्यादीनां दास्या-

१ तुलना पिण्डनिर्युक्तिवृत्तिः पृ. ७६॥ २ तुलना-पिण्डनिर्युक्तिवृत्तिः पृ. ७६। पिण्डविशुद्धिः गाथा ३०॥

मीति चिन्तयति तदा तदेवादेशाभिधम् यदा च निर्ग्रन्थानामेव–आर्हतयतीनां दास्यामीति परामृशति तदा तत् समादेशनामकम् । न चैतदनार्षम् , यत उक्तम्—

△[1] "जावंतियमुद्देसं पासंडीणं भवे समुद्देसं । समणाणं आएसं निग्गंथाणं समाएसं [पिण्डनिर्युक्ति-२३०] ॥१॥" इति । सर्वसङ्ख्यया विभागौद्देशिकं द्वादशप्रकारं भवति । अथ आधाकर्म-कर्मौद्देशिकयोः कः परस्परं प्रतिविशेषः ?, उच्यते, यत्प्रथमत एव साध्वर्थं निष्पादितं न स्वार्थं तदाधाकर्म, यत्पुनः प्रथमतः स्वार्थं निष्पादितं सत् भूयोऽपि पाककरणेन संस्क्रियते तत्कर्मौद्देशिकमिति २ ।

'पूई–कम्मे य' त्ति [2]उद्गमादिदोषरहिततया पूतेः–पवित्रस्य सतो भक्तादेरन्यस्याविशुद्धकोटिक-भक्तादेरवयवेन सह सम्पर्कात् [3]पूतेः–पूतिभूतस्य कर्म–करणं पूतिकर्म । तद्योगाद्भक्ताद्यपि पूतिकर्म । अयमर्थः–यथा [4]सौरभ्यमनोहरत्वादिगुणैर्विशिष्टमपि शाल्यादिभोजनद्रव्यं कुथितगन्धा-ऽशुच्यादिद्रव्य-लवेनापि युक्तमपवित्रं स्याद्विशिष्टजनपरिहार्यं च [5]तथा निरतिचारचारित्रिणो यतेर्निरतिचारचारित्रस्य सातिचारतयाऽपवित्रत्वकरणेनाविशोधिकोटीनामवयवमात्रेणापि संयुक्तः स्वरूपतः परिशुद्धोऽप्याहार उप-भुज्यमानो भावपूतेः कारणत्वात् पूतिरिति । तथा आधाकर्मिकाद्यवयवलेशेनापि संश्लिष्टाः स्थालीचटुक-कारोटिकादयोऽपि पूतित्वात्परिहर्तव्याः ३ ।

६७ द्वारे १६उद्गम-दोषाः गाथा ५६३-५६५ प्र. आ. १३८

△ यावतामुद्देशं पाखण्डिनां समुद्देशं भवेत् । श्रमणानामादेशं निर्ग्रन्थानां समादेशम् ॥१॥ १ यावंतिय० सं. ॥ २ तुलना–पिण्डनि. टीका पृ. ३५ A । "पूतिकर्म सम्भाव्यमानाधाकर्मावयवसंमीश्रलक्षणम्-।" दशवै. हा.टी.पृ. १७४ ॥ ३ पूतेः कर्म-सं. ॥ ४ द्रष्टव्या-सटीका पिण्डनिर्युक्तिः गाथा २४४॥ ५ द्रष्टव्या-सटीका पिण्डनिर्युक्तिः गाथा २४७ ॥

'मिस्सजाए य' त्ति [1]मिश्रेण-कुटुम्बप्रणिधान-साधुप्रणिधानमीलनरूपेण भावेन जातं-पाकादि-भावमापन्नं यद्भक्तादि तन्मिश्रजातम्, तत् [2]त्रिधा-यावदर्थिकं पाखण्डिमिश्रं साधुमिश्रं च, तत्र दुर्भिक्षादौ बहून् भिक्षाचरानुपलभ्य तदनुकम्पया यावन्तः केचन गृहस्था अगृहस्था वा भिक्षाचराः समागमिष्यन्ति तेषामपि भविष्यति कुटुम्बे चेति [3]बुद्धितः सामान्येन भिक्षाचरयोग्यं कुटुम्बयोग्यं चैकत्र मीलितं यत्पच्यते तद्यावदर्थिकमिश्रजातम् । यत्तु केवलपाखण्डियोग्यमात्मयोग्यं चैकत्र पच्यते तत्पाखण्डिमिश्रम् । यत्पुनः केवलसाधुयोग्यमात्मयोग्यं चैकत्र पच्यते तत्साधुमिश्रम्, श्रमणानां पाखण्डिष्वन्तर्भावविवक्षणात् श्रमण-मिश्रं पृथङ् नोक्तम् ४ ।

ठवण'त्ति [4]स्थाप्यते साधुनिमित्तं कियन्तं कालं यावन्निधीयते इति स्थापना। यद्वा स्थापनं-साधुभ्यो देयमिदमितिबुद्ध्या देयवस्तुनः कियन्तं कालं व्यवस्थापनं स्थापना, तद्योगाद्देयमपि स्थापना । स्वस्थाने-चुल्ली-स्थाल्यादौ परस्थाने-सुस्थितक-च्छब्बकादौ चिरकालमित्वरकालं च साधुदाननिमित्तं धार्य-माणमशनादिकं स्थापनेति भावः ५ ।

'पाहुडियाए'त्ति [5]कस्मैचिदिष्टाय पूज्याय वा बहुमानपुरस्सरीकारेण यदभीष्टं वस्तु दीयते तत् प्राभृतमुच्यते, ततः प्राभृतमिव प्राभृतं-साधुभ्यो देयं भिक्षादिकं वस्तु, प्राभृतमेव प्राभृतिका । यद्वा प्र इति-प्रकर्षेण, आ इति-साधुदानलक्षणमर्यादया, भृता-निर्वर्तिता यका भिक्षा सा प्राभृता, ततः

१ तुलना-पिण्डनि. वृत्तिः पृ. ३५ A ॥ २ तुलना-पिण्डनिर्युक्तिटीका पृ. ८८ A ॥
३ बुध्यतः-जे. ॥ ४ तुलना-पिण्डनि. वृत्तिः पृ. ३५ A ॥ ५ तुलना-पिण्डनि. वृत्तिः पृ. ३५ A ॥

स्वार्थिककप्रत्ययविधानात् प्राभृतिका । [1]सा च बादरा सूक्ष्मा चेति द्विभेदा, तत्र बादरारम्भविषयतया बादरा स्थूलेत्यर्थः, स्वल्पारम्भविषयतया तु सूक्ष्मेति, एकैकाऽपि च द्विधा–उत्ष्वष्कणेन अवष्वष्कणेन च, तत्र स्वयोगप्रवृत्तिकालावधेः उत्–ऊर्द्ध्वं परतः ष्वष्कणम्–आरम्भस्य करणमुत्ष्वष्कणमभिधीयते । तथा स्वयोगप्रवृत्तकालावधेरव–अर्वाक् ष्वष्कणं–आरम्भकरणमवष्वष्कणमुच्यते ।

इह हि केनापि श्रावकेण कुत्रापि नगरे निजापत्यस्य विवाहः कर्तुमारेभे, लग्नं च भव्यं दत्तं ज्योतिषिकेण, परं तस्मिन् समयेऽन्यत्र विहृतत्वेन तत्र गुरवो न सन्ति, ततोऽसौ श्रावको विकल्पयति–अस्मिन् विवाहलग्ने सङ्घडयामनेकाशन–खाद्यादिमनोरमायां क्रियमाणायां जनखाद्यमेव सर्वं भविष्यति । न व्रतिनां किञ्चिदुपयोगं यास्यति । कियद्दिनानन्तरं च यथाविहारक्रमं श्रीगुरवोऽप्यत्र आजिगमिषवः श्रूयन्ते । ततस्तत्समय एव मम विवाहः कर्तुं युज्यते, येन साधूनामशनादिकं पुष्कलं ददामि । तदेवाशनादिकं सफलं यत्सुपात्रेषु विनियोगं याति । एवं च महापुण्यमुपार्जितं स्यात्, कल्याणं च महत् सम्पनीपद्यते । इत्यादि विचिन्त्य निष्टङ्कितलग्नात्परतो गुरूणामागमनसमये विवाहं करोति । एवं च विवाहदिनस्योत्ष्वष्कणं कृत्वा यदुपस्क्रियते भक्तादि सा बादरोत्ष्वष्कणप्राभृतिकेति ।

तथा केनापि श्रावकेण स्वपुत्रादेर्विवाहदिनं किञ्चिन्निष्टङ्कितम्, इतश्च निष्टङ्कितविवाहदिनादर्वागेव साधवस्तत्रागताः, ततोऽसौ परिभावयति–मयैतेषां साधूनां विपुलं विशिष्टं च भक्तपानादिकं पुण्यार्थं

१ तुलना- पिण्डनिर्युक्तिवृत्तिः पृ. ६१ तः । द्रष्टव्या पिण्डविशुद्धिवृत्तिः पृ. ३४ गाथा ४० ॥

दातव्यम्, तच्च प्रायेण विवाहादिके महति पर्वणि विशालं भवति, मत्पुत्रादिविवाहस्तु प्रारिप्सितो यतिजनेऽन्यत्र विहृते भविष्यतीति विचिन्त्य यतिजने तत्रस्थ एवान्यद्विवाहलग्नं व्यस्थापयति । अत्र च विवाहलग्नस्य भविष्यत्कालभाविनोऽवष्वष्कणं कृत्वा यदुष्किकयते भक्तादि सा बादरावष्वष्कणप्राभृतिकेति ।

तथा किल काचित्कुटुम्बिनी सूत्रकर्तनादिव्यापारपरायणा बालकेन रुदता भोजनं याच्यते, यथा मातः ! मम भोजनं प्रयच्छेति । तत्र च [1]प्रस्तावे प्रत्यासन्नगृहेषु भिक्षामटन् साधुसङ्घाटकस्तया दृष्टो, सा च तं दृष्ट्वा सूत्रकर्तनादिलोभेन बालकं क्षपन्तं रुदन्तं च प्रत्यवादीत्—मा पुत्र ! प्रलप मा रोदीश्च त्वम्, इह मद्गृहे गेहानुगेहक्रमेण विचरन् यदि यतिसंघाटकः समेष्यति तस्य भिक्षादानायोत्थिता सती तवापि तत्समयमेव भोजनं दास्यामिति । ततः साधुसङ्घाटके क्रमेणागते धर्मार्थमुत्थाय भिक्षां ददाति बालकस्य च भोजनम्, इह च तत्र क्षणे बालकेन याचितं भोजनं तदैव तया कर्तुमुचितस्य पुत्रभोजनदानस्य भविष्यत्कालभाविना साधुभिक्षादानेन समं यत्करणं तदुत्ष्वष्कणं, तत्र या प्राभृतिका सा सूक्ष्मोत्ष्वष्कणप्राभृतिका ।

तथा काचिद् गृहस्था कर्त्तनं कुर्वती भोजनं [2]याचमानं बालकं प्रति वदति- [3]कणन्मि तावत्पूणिकामेकां पश्चात्ते भोजनं दास्यामीति, अत्रान्तरे च साधुरागतः, तत उत्थाय तस्मै भिक्षां ददाति बालकस्य च भोजनम्, इह च रूतपूणिकाकर्त्तनसमाप्त्यनन्तरं दातव्यतया बालकाय प्रतिज्ञाते भोजने साधुनिमित्त-

१ प्रस्तावे-मु. ॥ २ याच्यमानं-जे. ॥ ३ कर्तयामि-मु. । कणन्मि-जे. । कृणन्मि- इति पिण्डनिर्युक्तिवृत्तिः पृ. ६२ A ॥

मर्वागुत्थानेन यदर्वागेव बालकस्य भोजनदानं तदवष्वष्कणम्, तत्र या प्राभृतिका सा सूक्ष्मावष्वष्कणप्राभृतिकेति । इयं च प्राभृतिका साध्वर्थमुत्थितायां बालकभोजनदानादनन्तरं हस्तधावनादिनाऽप्कायाद्युपमर्दहेतुत्वादकल्पनीयेति ६ ।

[1]'पाओयर' त्ति [2]साधुनिमित्तं वह्नि-प्रदीप-मण्यादिस्थापनेन भित्त्याद्यपनयनेन वा बहिर्निष्काश्य धारणेन वा प्रादुः—प्रकटत्वेन देयस्य वस्तुनः करणं प्रादुष्करणम् । तद्योगाद् भक्ताद्यपि प्रादुष्करणम्, यद्वा प्रादुः—प्रकटं करणं यस्य तत् प्रादुष्करणम्, [3]तच्च द्विधा—प्रकाशकरणं प्रकटकरणं च, तत्र कोऽपि श्रावकः साधुभक्तिभूषितमानसो निरन्तरं सत्पात्रदानपवित्रीकृतनिजपाणिपल्लवो मनाक् मन्दविवेकः सान्धकारगृहमध्यस्थितस्य साधुदेयस्याशनादेरचक्षुर्विषयतया साधूनाम[4]कल्प्यतां परिभाव्य तस्य प्रकाशनार्थं भास्वरतरं मणिं तत्र व्यवस्थापयति, अग्नि-प्रदीपौ वा कुरुते, गवाक्षं वा कारयति, लघुतरं वा सद् द्वारं बृहत्तरं करोति, कुड्यच्छिद्रादि वा विधापयति, इत्थं यत्स्थानस्थितस्यैव देयवस्तुनः प्रकाशनं तत्प्रकाशकरणम् । यत्पुनर्गृहमध्यवर्तिन्यां चुल्ल्यां स्वगृहार्थं राद्धस्यौदनादेरन्धकारादपसार्य बहिश्चुल्ल्यां चुल्लिव्यतिरिक्ते वाऽन्यस्मिन् सप्रकाशे प्रदेशे साधुदानार्थं स्थापनं प्रकटकरणम्, एतच्च द्विविधमपि प्रादुष्करणं षट्कायोपमर्दप्रवृत्तिदोषादिसद्भावात् साधुभिर्वर्जनीयमिति ७ ।

---

१ पाउअर-सं. ॥ २ तुलना-पिण्डनि. वृत्तिः पृ. ३५A ॥ ३ द्रष्टव्या-सटीका पिण्डनिर्युक्तिः गाथा २१८, २१९ । पञ्चाशकवृत्ति १३/११ । पिण्डविशुद्धिवृत्तिः गाथा ४१, ४२ ॥ ४ मकल्प्यतां-मु. ॥

'कीय'त्ति [1]क्रीतं यत् साध्वर्थं मूल्यादिना परिगृहीतम्, [2]तच्च चतुर्धा–आत्मद्रव्यक्रीतम्, आत्मभावक्रीतम्, परद्रव्यक्रीतम्, परभावक्रीतं च, तत्रात्मना–स्वयमेव द्रव्येण–उज्जयन्तादितीर्थशेषादि-[3]रूपपरावर्तादिकारिगुटिका-सौभाग्यादिसम्पादकरक्षाटकादिरूपेण प्रदानतः परमावर्जयन् भक्तादि [4]गृह्णाति तदात्मद्रव्यक्रीतम्, दोषाश्चात्र उज्जयन्तादितीर्थशेषादिसमर्पणानन्तरमेव दैवयोगेन तस्य गृहिणोऽकस्मादेव ज्वरादिके मान्द्ये जातेऽनेन साधुनाऽहं निराकुलः सन् ग्लानीकृत इत्यादिप्रजल्पनतः शासनस्य मालिन्यं स्यात्। एवं ज्ञाते च राजादयः कर्षण-कुट्टनादिकं विदध्युः। [5]अथाग्रतो मन्दः सन् तेन शेषादिना समर्पितेन नीरोगः सम्पद्यते तदा चाटुकारिण एते यतय इत्युड्डाहो लोकस्य जल्पतो भवेत्। तथा निर्मा-ल्यादिप्रदानेन प्रगुणीभूतशरीरस्य गृहव्यापारादिप्रयोजकतया षड्जीवघातापन्नः कर्मबन्धः स्यादित्यादयः १। [6]तथा आत्मना–स्वयमेव भक्ताद्यर्थं धर्मकथक-वादि-क्षपका-ऽऽतापक-कविप्रमुखैः धर्मकथोपन्यासादिलक्षणेन भावेन विधीयमानेन धर्मकथोपन्यासाद्याक्षिप्तेभ्यो जनेभ्यो यदशनादिकं गृह्यते तदात्मभावक्रीतम्, दोषा-श्चात्र निर्मलनिजानुष्ठाननिष्फलीकरणादयः २। तथा परेण–गृहस्थेन साधुनिमित्तं सचित्ता-ऽचित्त-मिश्रभेदेन द्रव्येण कृत्वा यदशनादिकं क्रीतं तत्परद्रव्यक्रीतम्, अत्र च षट्कायविराधनादयः प्रतीता एव दोषाः ३।

१ तुलना-पिण्डनि. वृत्तिः पृ.३५A ॥ "क्रेतुम् अन्यसत्कं यत्कर्तुं दीयते क्रीतकृतं।" इति दशवै. चूर्णिः पृ. ११। "क्रयणं क्रीतम्, भावे निष्ठाप्रत्ययः; साध्वादिनिमित्तमिति गम्यते, तेन कृतं-निर्वर्तितं क्रीतकृतम्।" इति। दशवै.हा.टी. प. ११६॥ २ तुलना- सटीका पिण्डनिर्युक्तिः गाथा ३०६-३०८ ॥ ३ ०रक्षादि०-सं- ॥ ४ गृह्यते-जे.। परमावर्ज्य यद्भ-क्तादि गृह्यते -इति पिण्डनिर्युक्ति टीका पृ. १६ A ॥ ५ स्थवा भूतो मंदः सन्-सं.॥ ६ तुलना-सटीका पिण्डनिर्युक्तिः गाथा ३०७-३१२ ॥

तथा [1]परेण–मङ्खादिना भक्तिवशात्साधुनिमित्तं निजनिजविज्ञानप्रदर्शनादिरूपेण धर्मकथादिरूपेण वा भावेन परभावर्ज्यं यत्ततो गृहीतं तत्परभावक्रीतम्, मङ्खः–केदारको यः पटमुपदर्श्य लोकमावर्जयति, इत्थंभूते च परभावक्रीते त्रयो दोषाः–एकं तावत्क्रीतम्, द्वितीयमन्यस्माद् गृहादानीतमित्यभ्याहृतम्, आनीयानीय चैकत्र साधुनिमित्तं स्थाप्यत, इति स्थापितमिति ४, ८ ।

[2]**'पामिच्चे'** त्ति अपमित्यं–भूयोऽपि तव दास्यामीत्येवमभिधाय यत्साधुनिमित्तमुच्छिन्नं गृह्यते तदपमित्यं [3]प्रामित्यकं वा, इह [4]यदपमित्य गृह्यते तदप्युपचारादपमित्यमित्युक्तम्। [5]तद् द्विविधं–लौकिकं लोकोत्तरं च, तत्र लौकिकं यद् गृहस्थेन परस्मादुच्छिन्नं गृहीत्वा घृतादिकं वस्तु व्रतिभ्यो वितीर्यते, दोषाश्च दासत्व-निगडनियन्त्रणादयः। लोकोत्तरं तु वस्त्रादिविषयं साधूनामेव परस्परमवसेयम्, तत्तु द्विधा–कोऽपि कस्यापि सत्कमेवं वस्त्रादि गृह्णाति–यथा कियदिनानि परिभुज्य पुनरपि ते समर्पयिष्यामि। कोऽपि पुनरेवम्–एतावद्दिनानामुपरि तवैतत्सदृशमपरं वस्त्रादि दास्यामि। तत्र प्रथमे प्रकारे शरीरादिमलेन मलिनीकृते यदि वा पाटिते चौरादिना वा हृते मार्गे पतिते वा तस्मिन् वस्त्रादिके कलहादयो दोषाः।

---

१ तुलना-सटीका पिण्डनिर्युक्तिः गाथा ३०६ ॥ २ तुलना-"'पामिच्चं' ति अपरस्मादुच्छिन्नमुद्यतकं गृहीतम्, बलात्कारितया वाऽन्यस्मदाच्छिद्य राजोपसृष्टो वाऽन्येभ्यो गृहीभ्यः साधोर्दास्यामीत्याच्छिन्द्यात् ।" आचाराङ्गटीका पृ. २७१। पिण्डनि. वृत्तिः प. ३५ A। पञ्चाशकप्र. १३ / १२ ॥

३ चाणक्यस्वामिप्रायेण-"सत्ययाचनमन्यतः प्रामित्यकम्। तदेव प्रतिदानार्थमापमित्यकम् ।" कौटलीयअर्थशास्त्र २। १५। ३३ ॥ दशवै. टि. पृ. २६१ ॥ ४ जदि प्रत्यगृह्यते-सं. ॥ ५ द्रष्टव्या-पिण्डनि. टीका गाथा ३१६ तः ॥

द्वितीये च प्रकारे अन्यद्वस्त्रादिकं याचमानस्य तस्य दुष्कररुचेर्विशिष्टतरेऽपि दत्ते महता कष्टेन रुचिरापादयितुं शक्यते । ततः तमाश्रित्य कलहादयो दोषाः सम्भवन्तीति ९ ।

'परियट्टिए' त्ति परिवर्तितं यत्साधुनिमित्तं कृतपरावर्तम्, [1]तद् द्विविधं–लौकिकं लोकोत्तरं च, एकैकमपि द्विधा–तद्द्रव्यमन्यद्रव्यविषयं च । तत्र तद्द्रव्यविषयं यथा कुथितं घृतं दत्त्वा साधुनिमित्तं सुगन्धि घृतं गृह्णातीत्यादि । अन्यद्रव्यविषयं यथा कोद्रवकूरं समर्पयित्वा साधुनिमित्तं शाल्योदनं गृह्णातीत्यादि । इदं च लौकिकमेव, लोकोत्तरमपि साधोः साधुना सह वस्त्रादिपरावर्तनस्वरूपम्, इति द्विधा भावनीयम्, दोषाश्चात्रापि प्राग्वदेव १० ।

'अभिहडे' त्ति [2]अभि-साध्वभिमुखं हृतं-गृहस्थेन स्थानान्तरादानीतमभिहृतम्, [3]तद् द्विधा–अनाचीर्णमाचीर्णं च । तत्रानाचीर्णं द्विविधं–प्रच्छन्नं प्रकटं च । सर्वथा साधुना अभ्याहृतत्वेन यदपरिज्ञातं तत्प्रच्छन्नम्, यत्पुनरभ्याहृतत्वेन ज्ञातं तत्प्रकटम्, एकैकमपि द्विविधं–स्वग्रामविषयं परग्रामविषयं च । यस्मिन् ग्रामे साधुर्निवसति स किल स्वग्रामः, शेषस्तु परग्रामः ।

तत्र [4]काचित् श्राविका भक्तियुक्ता साधूनां प्रतिलाभनायाभ्याहृताशङ्कानिवृत्त्यर्थं प्रहेणकमिषेणोपाश्रये मोदकाद्यानीय साधुसंमुखमेवं वदति–यथा भगवन् ! मया भ्रातृगेहादौ सङ्घडयां वा गतया इदं लब्धम्, यद्वा मया स्वजनानां गृहे प्रहेणकमिदं स्वगृहाऽऽनीतम्, तैश्च रोषादिना केनापि कारणेन न गृहीतम्,

१ द्रष्टव्या सटीका पिण्डनि. गाथा ३२३ तः ॥ २ तुलना-पिण्डनि. वृत्तिः पृ. ३५B । दशवै.अग.चू. । दशवै.जिन.चू. पृ. ११२ । दशवै. हा.टी.११६ ॥ ३ द्रष्टव्या सटीका पिण्डनिर्युक्तिः गाथा ३२९ तः । पिण्डविशुद्धिवृत्तिः ४६ ॥ ४ द्रष्टव्या सटीका पिण्डनिर्युक्तिः गाथा ३४१, ३४२ । पिण्डविशुद्धिवृत्तिः पृ. ४१ ॥

ग्रम्यति वन्दनार्थमत्र प्रविष्टा, ततो यदि युष्माकमिदमुपकरोति तर्हि अनुगृह्यतामिति । ततः सा यद्ददाति तत् प्रच्छन्नं स्वग्रामविषयमभ्याहृतम् ।

[1]तथा क्वचिद् ग्रामे बहवः श्रावकाः सन्ति । ते च सर्वेऽप्येककुटुम्बवर्तिनः । अन्यदा तेषां गृहे विवाहः समजनि । निवृत्ते च विवाहे प्रचुरमोदकाद्युद्धरितम् । ततस्तैरचिन्ति—यथैतत्साधुभ्यो दीयतां येन महत्पुण्यमस्माकमुपजायते । अथ केचित् साधवो दूरेऽवतिष्ठन्ते, केचित्पुनः प्रत्यासन्नाः । परमन्तराले नदी विद्यते, ततस्तेऽप्यप्कायविराधनाभयतो नागमिष्यन्ति, आगता अपि च प्रचुरमोदकादिकमालोक्य शुद्धमिति कथ्यमानमप्याधाकर्मशङ्कया न गृहीष्यन्ति । ततो यत्र ग्रामे साधवो निवसन्ति तत्रैव प्रच्छन्नं गृहीत्वा व्रजाम इति । तथैव च कृतम्, ततो भूयोऽपि चिन्तयन्ति—यदि साधूनाहूय दास्यामस्ततस्तेऽशुद्धमाशङ्कय न गृहीष्यन्ति । तस्माद् द्विजादिभ्योऽपि किमपि किमपि दद्मः । तच्च तथा दीयमानमपि यदि साधवो न प्रेक्षिष्यन्ते ततस्तदवस्थैव तेषामशुद्धाशङ्का भविष्यति, ततो यत्र यत्रोच्चारादिकार्यार्थं निर्गताः सन्तः साधवः प्रेक्षन्ते तत्र दद्म इति । एवं च चिन्तयित्वा विवक्षिते कस्मिंश्चित्प्रदेशे द्विजादिभ्यः स्तोकं स्तोकं दातुमारब्धम्, तत उच्चारादिकार्यार्थं निर्गताः केचन साधवो दृष्टाः । ततस्ते निमन्त्रिता—यथा भो साधवोऽस्माकमुद्धरितं मोदकादिकं प्रचुरमवतिष्ठते, ततो यदि युष्माकं किमप्युपकरोति तर्हि तत्प्रतिगृह्यतामिति । साधवोऽपि शुद्धमित्यवगम्य प्रत्यगृह्णन् । एतत्प्रच्छन्नं परग्रामविषयमभिहृतम् । परम्परया ज्ञाते च परिष्ठापनीयम् ।

[2]तथा कश्चित्साधुर्भिक्षामटन् क्वापि गृहे प्रविष्टः, तत्र च गौरवार्हं स्वजनभोजनादिकं प्रकृतं वर्तते । ततो

१ तुल्यप्रायं पिण्डनि.वृत्तिः गा. ३३७ तः पृ. १०३७ तः, पिण्डविशुद्धिवृत्तिः पृ.४२ ॥ २ द्रष्टव्या पिण्डनि. वृत्तिः पृ. १०३ ।

न तदानीं साधवे भिक्षां दातुं प्रपारिता, इत्यादिभिः कारणैः काचित् श्राविका स्वगृहात्साधोरुपाश्रये मोदकादिकमानीय यद्ददाति तत्प्रकटं स्वग्रामविषयमभिहृतम्, एवं परग्रामविषयमपि प्रकटमनाचीर्णमवसेयम्।

[1]आचीर्णं पुनर्द्विविधं–क्षेत्रविषयं गृहविषयं च। क्षेत्रविषयमपि त्रिविधम्–उत्कृष्टं मध्यमं जघन्यं च। तत्र कस्मिंश्चिन्महति गृहे भूरिभुञ्जानकजनपङ्क्तिरुपविष्टा वर्तते। तस्याश्चैकस्मिन् पर्यन्ते साधुसङ्घाटको द्वितीये तु देयमशनादिकं तिष्ठति न च साधुसङ्घाटकश्छुप्तिभयादिना देयस्याशनादेः समीपं गन्तुं शक्नोति। ततो हस्तशतप्रमितक्षेत्रादानीतं यद् गृह्णाति तदुत्कृष्टं क्षेत्राभिहृतमाचीर्णम्, हस्तशतात्परतस्त्वानीतं प्रतिषिद्धमेव। मध्यमं क्षेत्राभ्याहृतं पुनः करपरिवर्त्तादुपरि यावद्धस्तशतं किञ्चिन्न्यूनं भवति तावद्विज्ञेयम्, करपरिवर्ते तु जघन्यं क्षेत्राचीर्णमभ्याहृतम्, करपरिवर्तो नाम हस्तस्य किञ्चिच्चलनम्, यथा काचिदात्री ऊर्ध्वा उपविष्टा वा स्वयोगेनैव निजकरगृहीतमोदक मण्डकादिका प्रसारितबाहुस्तिष्ठति, सा च तथास्थिता साधुसङ्घाटकं दृष्ट्वा करस्थितैर्मोदकादिभिस्तं निमन्त्रयते, स च करस्याधः पात्रकं धारयति, सा च भुजमचालयन्ती किञ्चिन्मुष्टिं शिथिलयति, ततो मण्डकादिकं पात्रके पततीति। इदं क्षेत्रविषयमाचीर्णम्।

[2]गृहविषयमभ्याहृतमाचीर्णं पुनरित्थं भवति–पङ्क्तिस्थितानि त्रीणि गृहाणि सन्ति। तत्र च यदा साधुसङ्घाटको भिक्षां गृह्णाति तदा एकः साधुरेकत्र धर्मलाभिते गृह्यमाणभिक्षे गृहे उपयोगं ददानो भिक्षां

१ द्रष्टव्या–सटीका पिण्डनिर्युक्तिः गाथा ३४३ तः॥ २ द्रष्टव्या सटीका पिण्डनिर्युक्तिः गाथा ३३३,३३४। जे भिक्खू गाहावइकुलं पिंडवाय पडियाए अणुपविट्ठे समाणे परं ति घरंतराओ असणं वा पाणं वा खाइमं वा साइमं वा अभिहडं आहट्टु दिज्जमाणं पडिग्गाहेति, पडिग्गाहेंतं वा सातिज्जति" निशीथसूत्रम् उ.३। सू.१५॥

गृह्णाति । पश्चाद्भागवर्ती द्वितीयसङ्घाटकस्तु धर्मलाभितगृहादितरयोर्गृहयोरानीयमानभिक्षयोरुपयोगं दायकहस्तादिविषयं ददातीति गृहत्रयादानीतमाचरितमशनादिकम्, चतुर्थादेस्तु गृहान्नाचरितमिति ११ ।

उद्भिन्ने' त्ति [1]उद्भेदनमुद्भिन्नं—साधुभ्यो घृतादिदाननिमित्तं कुतुपादेर्मुखस्य गोमयादिस्थगितस्योद्घाटनम्, [2]तद् द्विधा—पिहितोद्भिन्नं कपाटोद्भिन्नं च, तत्र यच्छगणकाग्नितापितजतु-सचित्तपृथिवीकायप्रभृतिभिः श्लेषद्रव्यैः पिहितद्वारं प्रतिदिनमपरिभोगं [3]खण्ड-गुडघृतादिभृतघटकुतुप-कुशूलादिकं साधुदाननिमित्तमुद्घाट्य खण्डादिकं साधुभ्यो दीयते तद्दीयमानं खण्डादि पिहितोद्भिन्नम्, पिहितमुद्भिन्नं यत्र तत्पिहितोद्भिन्नमितिव्युत्पत्तेः । यत्पुनः [4]खण्ड-घृत-गुडादियुक्तापवरकादेर्निश्चलनिभृतदत्तकपाटस्य प्रतिदिनमनुद्घाटितद्वारस्य साधुदाननिमित्तमुद्घाट्य कपाटानि गुड-खण्डादि साधुभ्यो दीयते तत्कपाटोद्भिन्नम् । व्युत्पत्तिः प्रागिव । दोषाश्चात्र षड्जीवनिकायविराधनादयः । तथाहि—कुतुपादिमुखाद् घृतादिकं साधवे दत्त्वा शेषस्य रक्षणार्थं भूयोऽपि कुतुपादिमुखं सचित्तपृथिवीकायेन जलार्द्रीकृतेनोपलिम्पति, ततः पृथिवीकायविराधनाऽप्कायविराधना च, पृथिवीकायमध्ये च मुद्रादयः कीटिकादयश्च सम्भवन्ति ततस्तेषामपि विराधना, तथा कोऽप्यभिज्ञानार्थं जतु तापयित्वा कुतुपादिमुखस्योपरि जतुमुद्रां ददाति तदा तेजस्कायविराधनाऽपि, यत्राग्निस्तत्र वायुरिति वायुकायविराधना च । तथा कुतुपादिलेपननिमित्तं मृत्तिकादि गवेषयन् दाता कदाचिद् वृश्चिकादिना दश्यते पीड्यते चासौ, ततो जना वदन्ति—अहो महाप्रभावा एते यतयो येषां दानमात्रे

॥४०८॥

१ तुलना—पिण्डनि. वृत्तिः प. ३५॥ २ द्रष्टव्या—सटीका पिण्डनिर्युक्तिः गाथा ३४७ तः। पिण्डविशुद्धिवृत्तिः प.४३७ तः ॥ ३ खण्डगुडादि-मु. ॥ ४ खण्डगुडादि-सं. ॥

ऽपि दात्रा फलं झगित्येवंविधं प्राप्तमित्येवं लोके उपहासः । तथा प्रथमतः कुतुपादिमुखे साध्वर्थमुद्घाटिते सति पुत्रादिभ्यो घृतादिप्रदाने तथा क्रये विक्रये च पापप्रवृत्तिः । तस्मिन् कुतुपादिमुखे पिधातुं विस्मृते मूषकादयो जीवा निपत्य विनश्यन्तीति ।

कपाटोद्भिन्नेऽप्येत एव दोषाः, तथाहि–यदा कपाटात्प्राक्थमपि पृथिवीकायो जलभृतः करवको वा बीजपूरकादिकं वा मुक्तं भवति तदा तस्मिन्नुद्घाट्यमाने कपाटे तद्विराधना भवति । जलभृते च करवकादौ लुठ्यमाने भिद्यमाने वा पानीयं प्रसर्पन् प्रत्यासन्नचुल्ल्यादावपि प्रविशेत् , तथा च सत्यग्निविराधना, यत्राग्निस्तत्र वायुरिति वायुविराधना च, मूषिकादिविवरप्रविष्टकीटिका-गृहगोधिकादिसत्त्वविनाशे त्रसकायविराधना च, तथैव च दान-क्रय-विक्रयेभ्योऽधिकरणप्रवृत्तिरिति, ततो द्विविधमप्युद्भिन्नं न ग्राह्यम् ।

यदा तु कुतुपादीनां मुखबन्धः प्रतिदिवसं बध्यते छोट्यते च, तत्रापि यदि जतुमुद्राव्यतिरेकेण केवलवस्त्रमात्रग्रन्थिर्दीयते, नापि च सचित्तपृथिवीकायादिलेपस्तदा तस्मिन् साध्वर्थमुद्भिन्नेऽपि यद्दीयते तत्साधुभिर्गृह्यते । तथा कपाटोद्भिन्नेऽपि यत्र प्रतिदिनमुद्घाट्यते कपाटमुल्लालकश्च भूमिघर्षकस्तथाविधो न भवति, तत्रोद्घाटितेऽपि कपाटादावपवरकादिस्थितमशनादिकं कल्पते एवेति १२ ।

'मालोहडे य'त्ति मालात्–[1]सिक्कादेरपहृतं–साध्वर्थमानीतं यद्भवतादि तन्मालापहृतम् । [2]तच्च-

१ तुलना–पिण्डनि. वृत्तिः पृ. ३५ B ॥ २ "मालोहडंपि दुविहं जहन्नमुक्कोसगं च बोद्धव्वं । अग्गतलेहिं जहन्नं तद्विवरीयं तु उक्कोसं ॥" पिंडनि. ३५७ । व्याख्या–' मालापहृतं द्विविधम् , तद्यथा जघन्यमुत्कृष्टं च, तत्र यदूर्ध्वभूम्यस्ताभ्यां पादयोरग्रभागाभ्यां फलकसंज्ञाभ्यां पार्ष्णिभ्यां चोत्पाटिताभ्यामूर्ध्वविलगितोच्चसिक्कादिस्थितं

तुर्भेदम्—ऊर्द्ध्वमालापहृतम् अधोमालापहृतम् उभयमालापहृतं तिर्यग्मालापहृतं च । 'तत्रोर्द्ध्वमालापहृतं जघन्योत्कृष्ट-मध्यमभेदात् त्रिविधम् , तत्रोर्द्ध्वविलगितोच्चसिक्कादेर्ग्रहीतुमशक्तत्वेनोत्पाटिताभ्यां पार्ष्णिभ्यां पादाधोभागरूपाग्रेतनफणाभ्यां च भूमिन्यस्ताभ्यां दात्र्या निज[2]चक्षुषाऽदृष्टं यद् गृहीतमशनादि-तत्पाष्ण्युत्पाटनमात्रस्तोककृियागृहीतत्वाज्जघन्यमूर्ध्वमालापहृतम् , यच्च निश्रेण्यादिकमारुह्य प्रासादोपरितलाद्दात्र्या गृहीतं तन्निश्रेण्यारोहणादिगुरुक्रियागृहीतत्वादुत्कृष्टं मालापहृतम् , अनयोर्मध्यवर्ति मध्यममिति । [3]तथा साध्वर्थं भूमिगृहादौ प्रविश्य तत्र स्थितं भक्तादिकं यदानीय ददाति तदधोवर्ति-भूमिगृहादेरपहृतमितिकृत्वाऽधोमालापहृतम्, तथोष्ट्रिका-कलश-मञ्जूषा-कोष्ठकादिस्थितं किञ्चित्यत्कृष्टं यदात्री

दात्र्या दृष्टेरगोचरं यद्दीयते तज्जघन्यं मालापहृतम् , 'तद्विपरितम्' जघन्यविपरीतम् बृहन्निःश्रेण्यादिकमारुह्य प्रासादोपरितलादानीय दीयते तदुत्कृष्टं मालापहृतम् ।" तत्रैव वृत्तिः पृ. १०७-१०८ । "सम्प्रति-मालापहृतमेव भङ्गयन्तरेणाह-"उड्ढमहे तिरियंपि य अहवा मालोहडं भवे तिविहं । उड्ढे य महोयरणं भणियं कुंभाइसु उभयं ॥" पिंडनि. ३६३ । अथवा मालापहृतं त्रिविधम् , तद्यथा ऊर्ध्वमधस्तिर्यक् च, तत्र ऊर्ध्वमेतदनन्तरोक्तमूर्ध्व-विलगितसिक्कादिगतम्, अधोभूमिगृहादाववतरणम्—प्रवेशः, तत्राऽधोवतरणेन यद्दीयते तदप्युपचारादधोऽवतरणम् , तथा 'कुम्भादिषु' कुम्भोऽष्ट्रिकाप्रभृतिषु यद्वर्तते देयं तदुभयम्-ऊर्ध्वाऽधोमालाप हृतस्वभावं भणितं तीर्थ-करादिभिः, तथाहि—बृहत्तरोच्चैस्तरकुम्भादिमध्यव्यवस्थितस्य देयस्य ग्रहणाय येन दात्री पाष्ण्युत्पाटनादि करोति तेनो र्ध्वमालापहृतम्, येन त्वधोमुखं बाहुमतिप्रभूतं व्यापारयति तेनोधोमालापहृतम् , दोषा अत्रापि पूर्ववद्भावनीयाः" । इति तत्रैव वृत्तिः पृ. १०९-११० । पिण्डविशुद्धिवृत्तिः (गाथा ४३) द्रष्टव्या ॥

१ तुलना-पिण्डविशुद्धिवृत्तिः गाथा ४३ पृ. ४५ ॥ २ 'दृष्टेगोचरं' इति पिण्डनि. वृत्तिः पृ.१०८A । 'दृष्ट्या दृष्ट'-इति पिण्डविशुद्धिवृत्तिः पृ. ४५B ॥ ३ तुलना-पिण्डविशुद्धिवृत्तिः पृ. ४६ B तः ॥

ददाति तदुभयस्माद्दूर्वा-ऽधोगतव्यापारा[1] दुष्ट्रिका-कलश-मंजूषा-कुम्भ्यादेरपहृतमितिकृत्वोभयमालापहृतम्। तथाहि–बृहत्तरोच्चैस्तरकुम्भ्यादि[2] मध्यस्थितस्य देयस्य ग्रहणाय येन दाता पाष्ण्युत्पाटनं करोति तेनोद्ध्वाश्रितव्यापारता, येन त्वधोमुखं बाहुं व्यापारयतीति तेनाधो[3]गतव्यापारता, यदा च पृथुलभित्त्यादिस्थिते स्कंधसमोच्चप्रदेशप्राये दीर्घगवाक्षादौ तिर्यक्प्रसारितबाहुः[4] क्षिप्तेन हस्तेन गृहीत्वा यद्देयं प्रायेण दृष्टाऽदृष्टं दाता ददे तदा तत्तिर्यग्मालापहृतम्। तिर्यग्मालाद्–भित्त्यादिस्थितगवाक्षादिरूपादपहृतमितिकृत्वा।

न चेदमत्र वक्तव्यं–मालाशब्देनोच्चप्रदेश एवाभिधीयते तत्कथं भूमिगृहादीनामधोभूमिस्थितानां मालशब्दाभिधेयत्वमिति ?, यतो लोकरूढ्या उच्चैःप्रदेशवाचको नात्र मालशब्दो गृह्यते, किन्तु समयप्रसिद्ध्या। समये च भूमिगृहादिकमपि मालशब्देनाभिधीयत इति।

दोषाश्चात्र [5]मञ्चक-मञ्चिकोदूखलादिष्वारुह्य पाष्णीं चोत्पाट्य उद्ध्वंविलगितसिक्थकादिस्थितमोदकादिग्रहणे कथमपि यदि मञ्चकादिल्हसनतो दात्री निपतति तदा तदधःस्थितानां पिपीलिकादीनां पृथिव्यादिकायादीनां च विनाशः दात्र्याश्च हस्तादिभङ्गः। यदिवा विसंस्थुलपतनतः कथमप्यस्थानाभिघातसम्भवात् प्राणव्यपरोपणमपि। तथा प्रवचनस्योड्डाहो यथा साध्वर्थमेषा भिक्षामाहरन्ती परासुरभूत्, तस्मान्नामी साधवः कल्याणकारिणः, एवंविधमपि दात्र्या अनर्थमेते न जानन्तीत्येवं लोकमध्ये मूर्खताप्रवादश्चेत्येव-

१ ०दुष्ट्रिकाकुम्भ्या० जे.॥ २ ०मध्ये स्थित० सं.॥३ ०गतिव्या० सं.। ०धोगत० इति पिण्डविशुद्धिवृत्तिपाठः पृ ४७A॥ ४ ०बाहुना-इति पिण्डविशुद्धिवृत्तिपाठः पृ.४७A॥ ५ द्रष्टव्या-पिण्डनि. वृत्तिः गाथा ३६१॥

मादयः । तस्मान्मालापहृतं साधुभिर्न ग्राह्यम् , [1]यत्पुनर्दर्दरसोपानादीनि सुखावताराण्यारुह्य ददाति तन्मालापहृतं न भवति । केवलं साधुरप्येषणाशुद्धिनिमित्तं प्रासादस्योपरि दर्दरादिना चटति, अपवादेन भूस्थोऽप्यानीतं गृह्णातीति १३ ।

'अच्छिज्जे' त्ति [2]आच्छिद्यते—अनिच्छतोऽपि मृतक-पुत्रादेः सकाशात् साधुदानाय परिगृह्यते यत्तदाच्छेद्यम् । [3]तत् त्रिविधं-स्वामिविषयं प्रभुविषयं स्तेनविषयं च । तत्र ग्रामादिनायकः स्वामी, स्वगृहमात्रनायकः प्रभुः, स्तेनः—चौरः, ततो ग्रामादिस्वामी यतीन् दृष्ट्वा भद्रकतया कलहेनाकलहेन वा बलादपि साधुनिमित्तं कौटुम्बिकेभ्यः सकाशादशनाद्याच्छिद्य यतिभ्यो यद्ददाति तत् स्वामिविषयमाच्छेद्यम् । तथा यद्गोरक्षक-कर्मकर-पुत्र-पुत्रिका-वधू-भार्यादिसत्कमेतेभ्योऽनिच्छद्भ्योऽपि सकाशाद् गृहीत्वा गृहनायकः साधुभ्यो दुग्धादिकं दद्यात्तत्प्रभुविषयमाच्छेद्यम् । तथा स्तेना अपि केचित् संयतान् प्रति भद्रका भवन्ति, ततस्ते मार्गे आगच्छन्तः कदाचित्तथाविधसार्थेन सार्धमागतान् भोजनार्थं कृतावस्थितेः सार्थस्य मध्ये भिक्षामटतः परिपूर्णान्नमप्राप्नुवतश्च संयतान् दृष्ट्वा तन्निमित्तमात्मनो वाऽर्थाय सार्थिकेभ्यो बलादाच्छिद्य पाथेयादि यदि साधुभ्यो दद्युस्तत् स्तेनविषयमाच्छेद्यम् , एतत् त्रिविधमपि आच्छेद्यं साधूनां न कल्पते । अप्रीति-कलहा-ऽऽत्मघाता-ऽन्तराय-प्रद्वेषाद्यनेकदोषसम्भवात् केवलं स्तेनाच्छेद्येऽयं विशेषः—यथा येषां सम्बन्धि भक्तादि बलादाच्छिद्य चौराः साधुभ्यः प्रयच्छन्ति, त एव सार्थिका यदि स्तेनै-

१ द्रष्टव्या-सटीका पिण्डनिर्युक्तिः गाथा ३६४ ॥ २ तुलना-पिण्डनि. वृत्तिः पृ. ३५ B ॥
३ द्रष्टव्या-सटीकापिण्डनिर्युक्तिः गाथाः ३६६ तः ॥

र्ग्लाह्यमाना एवं ब्रुवते- [1]अस्माकमवश्यं चौरैर्गृहीतव्यम्, ततो यदि चौरा अपि यदि युष्मभ्यं दापयन्ति तदा महानस्माकं सन्तोष इति। तत एवं सार्थिकैरनुज्ञाताः साधवो दीयमानं गृह्णन्ति। पश्चाच्चौरेष्वपगतेषु भूयोऽपि तद् द्रव्यं गृहीतं तेभ्यः समर्पयन्ति। यथा तदानीं चौरप्रतिभयादस्माभिर्गृहीतं सम्प्रति ते गतास्तत एतदात्मीयं द्रव्यं यूयं गृह्णीथेति। एवं चोक्ते सति यदि तेऽपि समनुजानते यथा युष्मभ्यमेव तदस्माभिर्दत्तमिति तर्हि भुञ्जते कल्पनीयत्वादिति १४।

'अणिसिट्ठे'त्ति [2]न निसृष्टं-सर्वैः स्वामिभिः साधुदानार्थमनुज्ञातं यत्तदनिसृष्टम्। तत् [3]त्रिधा-साधारणानिसृष्टं चोल्लकानिसृष्टं जड्डानिसृष्टं च। तत्र साधारणं-बहुजनसामान्यम्, चोल्लकं-स्वामिना पदातिभ्यः प्रसादीक्रियमाणम्, कौटुम्बिकेन वा क्षेत्रादिस्थितकर्मकरेभ्यो दीयमानं देशीभाषया भक्तमुच्यते, जड्डो-हस्ती तैरनिसृष्टम्-अननुज्ञातं न कल्पते साधूनाम्।

तत्र साधारणानिसृष्टं च यन्त्र-हट्ट-गृहादिस्थिततिलकुट्टि-तैल-वस्त्र-लड्डुक-दध्यादिदेयवस्तुभेदे-नानेकवस्तुविषयम्। तत्र घाणकादियन्त्रे तिलकुट्टि-तैलादिकम्, हट्टे वस्त्रादिकम्, गृहेऽशनादिकम्, बहुजनसाधारणं च सर्वैः स्वामिभिरननुज्ञातं यदेकः कश्चित्साधुभ्यः प्रयच्छति तत् साधारणानिसृष्टम्।

१ तुलना-पिण्डनि. टीका गाथा ३७६, पृ. ११३॥ २ तुलना-पिण्डनि. वृत्तिः पृ. ३५B॥ ३ तुलना-पिण्डविशुद्धिवृत्ति. पृ. ४ १A॥ "लड्डुग चोल्लग जंते संखडि खीराइणाईसु" पिण्डनि. ३७७। "तच्चानिसृष्टमनेकधा,तद्यथा-'लड्डु-कविषयम्, मोदकविषयम्, तथा 'चोल्लकविषयम्' भोजनविषयम्, 'यन्त्रे' इति 'कोल्हकादिघाणविषयम्, तथा 'संखडिविषयम्' विवाहादिविषयम्, तथा 'क्षीरविषयम् दुग्धविषयम्, तथा आपणादिविषयम्, आदिशब्दाद् गृहादिविषयमवसेयम्।"इति तत्रैवटीकायाम् पृ. ११३ A॥

तथा [1]चोल्लको द्विविधः-छिन्नोऽच्छिन्नश्च, तत्र कोऽपि [2]कौटुम्बिकः क्षेत्रगतहालिकानां कस्यापि पार्श्वे कृत्वा भोजनं प्रस्थापयति। स यदा एकैकहालिकयोग्यं पृथग्पृथग्भाजने कृत्वा प्रस्थापयति तदा स चोल्लकश्छिन्नः। यदा तु सर्वेषामपि हालिकानां योग्यमेकस्यामेव स्थाल्यां कृत्वा प्रेषयति तदा सोऽच्छिन्नः। तत्र यश्चोल्लको यस्य निमित्तं छिन्नः स तेन दीयमानो मूलस्वामिना कौटुम्बिकेन दृष्टोऽदृष्टो वा साधूनां कल्पते। तेन छेदनेन तस्य स्वकीयीकृतस्य दत्तत्वात्। अच्छिन्नोऽपि कौटुम्बिकेन येषां हालिकानां योग्यः स चोल्लकस्तैश्च साधुभ्यो दानायानुज्ञातो दृष्टोऽदृष्टो वा कल्पते। तैः पुनरननुज्ञातोऽन्यतरेणानुज्ञातो वा न कल्पत एव। अद्वेषा-ऽन्तराय-परस्परकलहादिदोषसम्भवात्।

तथा अङ्गानिसृष्टं [3]हस्तिनो भक्तं [4]मेण्ठेनानुज्ञातमपि राज्ञा हस्तिना चाननुज्ञातत्वाच्च कल्पते। हस्तिनो हि भक्तं राज्ञः सम्बन्धि, ततो [5]राज्ञाननुज्ञातस्य ग्रहणे ग्रहणा-ऽऽकर्षण-[6]वेषोद्दालनादयो दोषा भवेयुः। तथा मदीयाज्ञामन्तरेणैष साधवे पिण्डं ददातीति रुष्टः सन् राजा कदाचिन्मेण्ठं स्वाधिकाराद् भ्रंशयति। ततस्तस्य वृत्तिच्छेदः साधुनिमित्त इति साधोरन्तरायदोषः, [7]राज्ञाननुज्ञातत्वाददत्तादानदोषश्च।

---

१ 'चुल्लक' इति पिण्डनि. टीका पृ. ११४B, एवमग्रेपि॥
२ तुलना-पिण्डनि. टीका पृ. ११४B, पिण्डविशुद्धिवृत्तिः पृ. ४६Bतः॥ ३ तुलना-पिण्डनि. वृत्तिः पृ. ११५A॥
४ मेण्ठे०-इति मु.। पिण्डनि. वृत्तौ अपि मिण्ठे० इति पाठः, एवमग्रेपि। पिण्डविशुद्धिवृत्तौ 'मेण्ठ' इति पाठः पृ. ५०॥ ५ राजाननु० मु.। पिण्डनि. वृत्तावपि [पृ.११५] राजानन्नु० इति पाठः॥ ६ ०वेषाद्दाल० सं.॥
७ राजानन्नु० मु.॥

तथा गजस्य पश्यतो मेण्ठस्यापि मन्कं न गृह्णीयात् । गजो हि सचेतनः, ततो मदीयकवलमध्यादनेन मुण्डेन पिण्डो गृह्यते इत्येवं कदाचिद् रुष्टः सन् यथायोगं मार्गे परिभ्रमन्नुपाश्रये तं साधुं दृष्ट्वा तमुपाश्रयं स्फोटयेत् साधुं च कथमपि प्राप्य मारयेदिति १५ ।

'अज्झोयरए य' त्ति 'अधि-आधिक्येनावपूरणं—स्वार्थदत्ताधिश्रयणादेः साध्वागमनमवगम्य तद्योग्यभक्तसिद्ध्यर्थं प्राचुर्येण भरणमध्यवपूरः, स एव स्वार्थिकप्रत्ययविधानादध्यवपूरकः, तद्योगाद्भक्ताद्यप्यध्यवपूरकः । स च त्रिधा—स्वगृहयावदर्थिकमिश्रः, स्वगृहसाधुमिश्रः, स्वगृहपाखण्डिमिश्रश्च, स्वगृहश्रमणमिश्रस्तु स्वगृहपाखण्डिमिश्रे अन्तर्भावित इति पृथङ् नोक्तः । तत्र यावदर्थिकाद्यागमनात्प्रथममेवाग्निसन्धुक्षणस्थालीजलप्रक्षेपादिरूपे आरम्भे स्वार्थे निष्पादिते पश्चाद्यथासम्भवं त्रयाणां यावदर्थिकादीनामर्थायाधिकतरान् तण्डुलादीन् प्रक्षिपति, एषोऽध्यवपूरकः । अत एवास्य मिश्रजाताद्भेदः, [1]यतो मिश्रजातं तदुच्यते यत्प्रथमत एव यावदर्थिकाद्यर्थमात्मार्थं च मिश्रं निष्पाद्यते । यत्पुनः प्रथमत आरभ्यते स्वार्थम्, पश्चात्प्रभूतान् यावदर्थिनः [2]पाखण्डिनः साधून् वा समागतानवगम्य तेषामर्थायाधिकतरजल-तण्डुलादि प्रक्षिप्यते, सोऽध्यवपूरक इति । अत्र च स्वगृहयावदर्थिकमिश्रे अध्यवपूरके शुद्धभक्तमध्ये यावन्तः कणाः कार्पटिकाद्यर्थं पश्चात्क्षिप्तास्तावन्मात्रे स्थाल्याः पृथक्कृते कार्पटिकेभ्यो वा दत्ते सति शेषमुद्धरितं यद्भक्तं

१ तुलना-पिण्डनि. वृत्तिः प. ३५ B ॥ २ तुलना-पिण्डनि. वृत्तिः प. ११५ B द्रः ॥ ३ पाखण्डिनः-इति पिण्डनि. वृत्तिः प. ११६ A ॥

तत्साधूनां कल्पते, अत एव चायं विशोधिकोटिर्वर्ण्यते। तथा स्वगृहपाखण्डिमिश्रे स्वगृहसाधुमिश्रे च शुद्धभक्तमध्यपतिते यदि तावन्मात्रं स्थाल्याः पृथक्कृतं दत्तं वा पाखण्डयादिभ्यस्तथापि शेषं न कल्पते, यतः सकलमपि तद्भक्तं पूतिदोषदुष्टं भवतीति १६ ॥ ५६३–५६५ ॥

उक्ताः षोडश उद्गमदोषाः, अथ उत्पादनादोषानाह—

[1]धाई १ दुई २ निमित्ते ३ आजीव ४ वणीमगे ५ तिगिच्छा ६ य।
कोहे ७ माणे ८ माया ९ लोभे १० य हवंति दस एए ॥५६६॥
पुव्वि पच्छा संथव ११ विज्जा १२ मंते १३ य चुण्ण १४ जोगे १५ य।
[2]उप्पायणाय दोसा सोलसमे मूलकम्मे १६ य ॥५६७॥

[पिण्डनिर्युक्तिः ४०८-४०९]

'धाई' त्यादिगाथाद्वयम्, तत्र धयन्ति–पिबन्ति बालकास्तामिति, धीयते–धार्यते बालानां दुग्धपानाद्यर्थमिति वा धात्री–बालपालिका। सा च [3]पञ्चधा–क्षीरधात्री, मज्जनकधात्री, मण्डनधात्री, क्रीडनधात्री, उत्सङ्गधात्री च। इह धात्रीत्वस्य यत्करणं कारणं वा तद्धात्रीशब्देनोक्तं द्रष्टव्यम्, तथाविवक्षणात्।

१ इतः पूर्वम् "उप्पायणदोसत्ति" इत्यधिकं ता, प्रतौ। गाथाद्वयं पिण्डविशुद्धौ ५८-५९ क्रमाङ्केन विद्यते।
२ उप्पायाय–मु.। उप्पायणाइ–इति पिण्डनिर्युक्तिः ४०९, पिण्डविशुद्धिः ५९॥
३ तुलना–"खीरे य मज्जणे मंडणे य कीलावणंकधाई य। एक्केककावि य दुविहा करणे कारावणे चेव॥" इति पिण्डनिर्युक्तिः ४१०। पिण्डविशुद्धिः गा. ६० द्रष्टव्या॥

ततो धात्र्याः पिण्डो धात्रीपिण्डः, धात्रीत्वस्य करणेन कारणेन च य उत्पाद्यते पिण्डः स धात्रीपिण्ड इत्यर्थः। एवं दूत्यादिष्वपि भावनीयम्।

इयमत्र भावना- [1]कश्चित्साधुर्भिक्षार्थं पूर्वपरिचितगृहे प्रविष्टो रुदन्तं बालकं विलोक्य तन्मातरमाह- यथाऽयं हि बालकोऽद्यापि क्षीराहारः, ततः क्षीरमन्तरेणावसीदन् रोदिति, तस्मान्मह्यं शीघ्रं भिक्षां देहि, पश्चादेनं बालकं स्तन्यं पायय, यद्वा प्रथमत एनं स्तन्यं पायय पश्चान्मह्यं भिक्षां देहि, यदि वा अलं मे सम्प्रति भिक्षया पायय स्तन्यं बालकमेव, पुनरप्यहमन्यगृहे गत्वाऽत्र समेष्यामि, यद्वा तिष्ठ त्वं निराकुला अहमेवास्मै कुतोऽप्यानीय क्षीरं दास्यामि, एवं स्वयं धात्रीत्वं करोति। तथा [2]मतिमान् रोगरहितो दीर्घायुश्च बालः स्तन्यं पायितः स्यात्, अपमानितस्तु विपरीतः। तथा दुर्लभं खलु लोके पुत्रमुखदर्शनम्, तस्मात्सर्वाण्यन्यानि कर्माणि मुक्त्वा त्वमेनं बालकं स्तन्यं पाययेति। एवं च क्रियमाणे बहवो दोषा भवेयुः, [3]तथाहि-बालकमाता भद्रकत्वादावर्जितमानसा सत्याधाकर्मादिकं कुर्यात्। तथा बालकस्वजनोऽन्यो वा प्रातिवेशिकादिर्बालकमात्रादिना सह सम्बन्धं साधोः सम्भावयेच्चाटुकरणदर्शनात्। यदि च प्रान्ता बालजननी भवेत्तदा प्रद्वेषं व्रजेत्, अहो प्रव्रजितस्यास्य महती परकीया तृप्तिः। तथा वेदनीयकर्म-

१ तुलना-सटीका पिण्डनिर्युक्तिः गाथा ४१२। पिण्डविशुद्धिवृत्तिः पृ. ५५ तः॥ २ तुलना-"मइमं अरोगि दीहाउओ य होइ अधिमाणिओ बालो। दुल्लभयं खु सुयमुहं पिज्जाहि अहं व से देमि॥" इति पिण्डनिर्युक्तिः ४१३। पिण्डविशुद्धिवृत्तिः पृ. ५६ A॥ ३ तुलना-सटीकापिण्डनिर्युक्तिः गाथा ४१४। पिण्डविशुद्धिवृत्तिः प. ५६ A॥

विपाकवशात्कदाचिद्बालकस्य ज्वरादिमान्द्ये सञ्जाते त्वया मदीयपुत्रो ग्लानीकृत इत्यादि साधुना सह कलहकरणात्प्रवचनमालिन्यं स्यादिति ।

अथवा कस्यापीश्वरस्य गेहे बालधापनपरां धात्रीं स्वबुद्धिप्रपञ्चेनोत्सार्यान्यां तत्र स्थापयन् धात्री-स्वलक्षणं दोषमासादयति । [1]तथाहि-भिक्षाचर्यायां प्रविष्टः कश्चित्साधुः कचिद्गेहे महिलां काञ्चित् सशोकामवलोक्य पप्रच्छ-किं त्वमद्याधृतिपरा दृश्यसे ?, सा प्राह-धार्मिक यते ! दुःखं दुःखसहायस्यैव कथ्यते, यतिराह-को दुःखसहायो भण्यते ?, सा प्राह-यः कथितदुःखप्रतीकारं कुरुते, मुनिराह-मां मुक्त्वा कोऽन्यस्तथाभूतः ?, सा प्राह-भगवंस्तर्हि स्फेटितमपरधात्र्या अमुकस्मिन् गृहे मम धात्रीत्वं तेनाहं विपण्णेति, ततः साधुरुत्पन्नाभिमानो यावच्चां न तत्र तथा स्थापयामि न तावच्चदीयां भिक्षां गृह्णामीत्य-भिधाय स्फेटयितुमिष्टाया धात्र्या अदृष्टत्वात् तत्स्वरूपमजानानस्तस्या एव पार्श्वे पृच्छति-सा किं तरुणी मध्यमा वृद्धा वा ?, प्रतनुस्तनी स्थूलस्तनी कूर्परस्तनी वा ?, मांसला कृशा वा ?, कृष्णा गौरी वेत्यादि । पृष्ट्वा च तत्रेश्वरगृहे गतः सन् तं बालकमालोक्य गृहस्वाम्यादिसमक्षं धात्रीदोषान् ब्रूते । [2]यथा वृद्धा धात्री अबलस्तन्या स्यात् , तां धयन् बालोऽप्यबलः सम्पद्यते । कृशा च धात्री स्तोकस्तन्या भवेत् , तां धयन् शिशुरपि परिपूर्णस्तन्याभावात् सीदन् कृश एव भवति । स्थूलस्तन्याः स्तन्यं धयन् कोमलाङ्गत्वात्

१ तुलना-सटीका पिण्डनिर्युक्तिः ४१५ तः पिण्डविशुद्धिवृत्तिः प. ५६ ॥

२ तुलना-"थेरी दुब्बलखीरा चिमिढो पेल्लियमुहो अइथणीए । तणुई उ मंदखीरा कुप्परथणियाए सूइमुहो ॥" इति पिण्डनि. ४१८ । अत्रस्था वृत्तिरपिद्रष्टव्या । पिण्डविशुद्धिवृत्तिः (पृ.५६) अपि तुलनीया ॥

कुचचम्पितवक्त्रघ्राणः सन् चिपिटघ्राणः स्यात् । [1]कूर्पराकारस्तनीं च धयन् बालः सर्वदैव स्तनाभिमुखदीर्घीकृतमुखतया सूचीसदृशवदनः स्यात् । उक्तं च—

"निःस्थामा स्थविरा धात्रीं सूच्यास्यः कूर्परस्तनीम् । चिपिटः स्थूलवक्षोजां धयंस्तन्वीं कृशो भवेत् ॥१॥
जाडयं [2]भवति [3]स्थूलायास्तनुक्यास्त्वबलङ्करम् । तस्मान्मध्यबलस्थायाः, स्तन्यं पुष्टिकरं स्मृतम् ॥२॥"

[4]तथा अभिनवस्थापिता धात्री येन वर्णेन कृष्णादिना उत्कटा भवति तेन वर्णेन तां निन्दति । यथा—

"कृष्णा भ्रंशयते वर्णं, गौरी तु बलवर्जिता । [5]ततः श्यामा भवेद्धात्री, बलवर्णैः प्रशंसिता ॥१॥"

इत्यादि, एतद् गृहस्वामी श्रुत्वा स्थविरत्वादिस्वरूपां च वर्तमानधात्रीं परिभाव्य स्फेटयति साधुसम्मतां च धात्रीं करोति । सा च प्रमुदिता तस्मै साधवे मनोज्ञां विपुलां भिक्षां प्रयच्छतीति धात्रीपिण्डः ।

अत्र च बहवो दोषाः, [6]तथाहि—या स्फेटिता धात्री सा विद्वेषं याति । तथा सति साधुरयमनया सह स्वेच्छमास्ते इत्यालं ददाति । अतिद्विष्टा च सती विषादिदानतः कदाचिन्मारयत्यपीति । याऽपि चिरन्तनीं स्फेटयित्वा संप्रति स्थापिता साऽपि कदाचिदेवं चिन्तयति, यथाऽहमनेनाग्रेतनीं स्फेटयित्वा धात्री कृता तथाऽन्यया कदाचिदभ्यर्थितो मामपि धात्रीत्वात् स्फेटयिष्यति, ततस्तथा करोमि यथाऽयमेव

---

१ कूर्पराकारस्तन्यां-जे. ॥ २ भवेत्-सं. ॥ ३ स्थूरायाः इति पिण्डनि. वृत्तिः ४१८ ॥ ४ तुलना-सटीका पिण्डनिर्युक्तिः ४१६ । पिण्डविशुद्धिवृत्तिः पृ. ५६ ॥ ५ तेन श्यामा-जे. । तस्मात्श्यामा-इति पिण्डनिर्युक्तिवृत्तौ [प.१२३B] पाठः । तस्माच्छस्या-इति पिण्डविशुद्धिवृत्तौ (प.५६B) पाठः ॥
६ द्रष्टव्या-सटीका पिण्डनिर्युक्तिः ४२० । पिण्डविशुद्धिवृत्तिः प. ५६ ॥

न भवतीति विचिन्त्य विषादिप्रयोगेण मारयेदिति। [1]एवं मज्जनधात्रीत्वकारणे स्वयं वा करणे, मण्डनधात्रीत्वकारणे स्वयंकरणे वा, क्रिडनकधात्रीत्वकारणे स्वयंकरणे वा, अङ्कधात्रीत्वकारणे स्वयंकरणे वा दोषाः परिभाव्य भणनीया इति १॥

'दूई'त्ति दूती-परस्परसंदिष्टार्थकथिका। ततो दूतीत्वकरणेन-परस्परसन्दिष्टार्थकथनेन यः पिण्ड उपार्ज्यते यतिना स दूतीपिण्डः। सा च दूती [2]द्विधा-स्वग्रामे परग्रामे च। तत्र यस्मिन ग्रामे साधुर्वसति तस्मिन्नेव ग्रामे यदि सन्देशं कथयति तदा स्वग्रामदूती। यदा तु परग्रामे गत्वा सन्देशं कथयति तदा परग्रामदूती। [3]एकैकाऽपि च द्विधा-प्रकटा प्रच्छन्ना च। प्रच्छन्ना पुनरपि द्विधा-एका लोकोत्तरविषया, द्वितीयमङ्गाटकमाधोरपि गुप्तेत्यर्थः, द्वितीया [4]पुनर्लोकलोकोत्तरविषया, पार्श्ववर्तिनो जनस्य सङ्गाटकद्वितीयमाधोरपि च गुप्तेति भावः।

[5]तत्र कश्चिन्साधुर्भिक्षाकृते व्रजन विशेषतस्तल्लाभार्थं तस्यैव ग्रामस्य सम्बन्धिनः पाटकान्तरे ग्रामान्तरे वा जनन्यादेः सन्कं पुत्रिकादेरग्रतो गत्वा सन्देशकं कथयति, यथा सा तव माता स तव पिता वा स तव भ्रात्रादिर्वा स्वयाऽद्यात्रागन्तव्यमित्यादि त्वत्सम्मुखं वदतीत्येवं स्वपक्ष-परपक्षयोः शृण्वतो-

---

१ विशेषार्थं द्रष्टव्या पिण्डनिर्युक्तिः गाथा ४२२ तः। पिण्डविशुद्धिवृत्तिः प. ४७॥

२ तुलना-पिण्डनिर्युक्तिवृत्तिः ४२८॥ ३ तुलना- पिण्डनिर्युक्तिवृत्तिः ४२६॥ ४ पुनर्लोकलोकोत्तरविषया- मु.। तुलना-"बीया पुण उभयपक्खे वि॥" पिण्डनिर्युक्तिः ४२६ "द्वितीया पुनरुभयपक्षेऽपि, लोके लोकोत्तरे च" इति तत्रैव वृत्तिः प. १२६B॥ ५ तुलना-सटीका पिण्डनिर्युक्तिः ४३०। पिण्डविशुद्धिवृत्तिः प. ४८ A॥

निःशङ्कं कथनात् प्रकटं स्वग्राम-परग्रामविषयं दूतीत्वम् ।

[1]तथा कश्चिद्गृहिः कयाचिद् दुहित्रा मात्रादिकं प्रति स्वग्रामे परग्रामे वा सन्देशकथनायाभ्यर्थितः, ततस्तत्सन्देशकमवधार्य तज्जननन्यादिपार्श्वे गतः सन्नेवं चिन्तयति–दूतीत्वं खलु गर्हितं सावद्यत्वात्, ततो द्वितीयसङ्घाटकसाधुर्मा मां दूतीदोषदुष्टं ज्ञासीदित्येवमर्थं भङ्ग्यन्तरेणेदं भणति–यथा श्राविके ! अतिमुग्धा सा तव दुहिता यैवं सावद्ययोगरहितानस्मान् प्रति वदति–यथेदं प्रयोजनं मदीयागमनादिकं मम मातुस्त्वया कथनीयमिति । साऽपि दक्षतयाऽभिप्रायं ज्ञात्वा द्वितीयसङ्घाटकसाधुचित्तरक्षणार्थं प्रतिभणति–यथा वारयिष्येऽहं तां तवाभिमुखं पुनरेवं वदन्तीमित्येवं सङ्घाटकसाधोरिदं गोपायितुमिष्टं न लोकस्येति लोकोत्तर-प्रच्छन्नं स्वग्रामपरग्रामविषयं दूतीत्वम् ।

[2]उभयप्रच्छन्नं पुनरेवं–काचित् श्राविका साधुं प्रति वदति–यथा मज्जनन्यादेस्त्वमेवं कथयेः–तत्कार्यं तव प्रतीतं यथा त्वं जानासि तथैव सम्पन्नमिति । इह च साधुसङ्घाटकस्य शेषलोकानां च सन्देशार्थानवगमादुभयप्रच्छन्नत्वम्, [3]दोषाश्च सर्वत्र गृहस्थव्यापारणादिना जीवोपमर्दादयः २ ॥

'निमित्त'न्ति [4]निमित्तम्–अतीतार्थपरिज्ञानहेतुः शुभा-ऽशुभचेष्टादि, तद्धेतुकं ज्ञानमपि उपचारान्निमित्तम्, तत्करणेन पिण्डो निमित्तपिण्डः । अयमर्थः–कश्चिद् व्रती पिण्डादिलाभनिमित्तं गृहिणामग्रतो

---

१ तुलना-सटीका पिण्डनिर्युक्तिः ४२१ । पिण्डविशुद्धिवृत्तिः प. ५८ A ॥
२ तुलना- सटीका पिण्डनिर्युक्तिः ४२२ । पिण्डविशुद्धिवृत्तिः प. ५८ A ॥
३ तुलना- पिण्डविशुद्धिः प.५८ ॥ ४ द्रष्टव्या-सटीका पिण्डविशुद्धिः ६२ ॥

निमित्तं कथयति, यथाऽतीते दिने तवेदं सुख-दुःखादिकं जातम् , तथा भाविनि कालेऽमुकस्मिन् दिने तव राजादेः सत्कः प्रसादो भविष्यति, सम्प्रति चाद्यैव दिने तवेदमिदं च भविष्यतीति । तेऽपि च गृहस्था लाभा-ऽलाभ सुख-दुःख जीवित-मरणादिविषयं निमित्तं पृष्टमपृष्टं वा धृष्टेन तेन कथ्यमानं श्रुत्वा आवर्जितमानसास्तस्मै मुनये मोदकादिकां विशिष्टां विपुलां च भिक्षां ददतीति स [1]निमित्तपिण्ड उच्यते । न चायं यतीनां कल्पते । आत्म-परोभयविषयाणां वधादिदोषाणामनेकेषामत्र सम्भवादिति ३ ॥

'आजीवि'त्ति आजीवनमाजीवो जीविकेत्यर्थः । [2]स पञ्चविधो–जातिविषयः, कुलविषयः, गणविषयः, कर्मविषयः, शिल्पविषयश्च । एकैकोऽपि च द्विधा–सूचयाऽसूचया च । सूचया–वचनभङ्गविशेषेण कथनम्, असूचया तु स्फुटवचनेनेति । तत्र साधुः सूचया असूचया च स्वजातिप्रकटनात् जातिमुपजीवति ।

[3]यथा कश्चिद्भिक्षार्थमटन् ब्राह्मणगेहं प्रविवेश । तत्र च ब्राह्मणसुतं होमादिक्रियां सम्यक्कुर्वाणं वीक्ष्य तज्जनकाभिमुखं स्वजातिप्रकटनाय जल्पति–यथा समिन्मन्त्रा-ऽऽहुति-स्थान-याग-काल-घोषादीनाश्रित्य सम्यगसम्यग्वा क्रिया भवेत् । तत्र पिप्पलादीनामार्द्रप्रतिशाखादिखण्डरूपाः समिधः, मन्त्राः–प्रणवादिका वर्णपदवृतयः, आहुतिः–अग्नौ घृतादेः प्रक्षेपः, स्थानम्–उत्कटुकादिः, यागः अश्वमेधादिः, कालः–प्रभातादिः, उदात्ता-ऽनुदात्तादयश्च घोषा यत्र यथावत्प्रयुज्यन्ते सा सम्यक्क्रिया,

१ निमित्तपिण्डा-मु. ॥ २ तुलना-सटीका पिण्डनिर्युक्तिः ४३७ ॥
३ द्रष्टव्या-सटीका पिण्डनिर्युक्तिः ४३९-४४० । पिण्डविशुद्धिवृत्तिः पृ. ६०३ ।

यत्र च समिधादयो न्यूनतयाऽधिकतया विपर्ययेण वा प्रयुज्यन्ते सा न सम्यक्क्रियेति। अयमपि च स्वसुतः सम्यग्होमादिक्रियाकरणाद् ज्ञायते यथा श्रोत्रियस्य पुत्र इति। यदिवा वेदादिशास्त्रपारगस्य कस्यचिदुपाध्यायस्य पार्श्वे सम्यक् पठित इति। तत एवमुक्ते स ब्राह्मणो वदति—साधो! त्वमवश्यं ब्राह्मणो येनेत्थं होमादीनामवितथत्वं जानासि। साधुश्च मौनेनावतिष्ठते। एतच्च सूचया स्वजातिप्रकटनम्, असूचया तु जात्याजीवनं पृष्टोऽपृष्टो वा आहाराद्यर्थं स्वजातिं प्रकटयति यथाऽहं ब्राह्मण इति।

अत्र चानेके दोषाः, तथाहि—यदि स ब्राह्मणो भद्रकस्तर्हि स्वजातिपक्षपातात्प्रभूतमाहारादिकं तन्निमित्तं पक्त्वा दास्यति, ततो आधाकर्मदोषः। अथ प्रान्तस्तर्हि भ्रष्टोऽयं पापात्मा ब्राह्मण्यं परित्यक्तवानिति विचिन्त्य स्वगृहान्निष्काशनादि करोति। एवं क्षत्रियादिजातिष्वपि। एवं [1]कुलादिष्वपि * भावनीयमिति ४॥

'वणीमगे'त्ति [2]'वनु याचने' वनुते प्रायो दायकाभिमतेषु श्रमणादिष्वात्मानं भक्तं दर्शयित्वा पिण्डं याचते इति [3]वनीपकः। [4]कश्चिद्यति-निर्ग्रन्थ-शाक्य-तापस-परिव्राजकाऽऽजीवक-द्विज-प्राघूर्णक-श्वान-काक-शुकादिभक्तानां गृहिणां गृहे भिक्षां भ्रमन् प्रविष्टः, ततस्तेषां पुरतोऽशनादिलाभार्थं निर्ग्रन्थादिगुणवर्णनेनात्मानं तद्भक्तं दर्शयति। [5]तथाहि—स कदाचित्प्रविष्टो निर्ग्रन्थभक्तश्रावकगृहे

१ कुलाद्याजीवनार्थं द्रष्टव्या पिण्डनिर्युक्तिः ४४१ तः, पिण्डविशुद्धिवृत्तिः पृ. ६१॥ * भव० मु.॥
२ तुलना-पिण्डनिर्युक्तिवृत्तिः ४४३॥ ३ "वनिपकः पञ्चधा, तद्यथा-श्रमणे श्रमणविषयः, ब्राह्मणे, कृपणेऽतिथौ शुनि च पञ्चमो भवति।" इति पिण्डनिर्युक्तिवृत्तिः ४४३॥ ४ द्रष्टव्या पिण्डनिर्युक्तिः ४४२, ४४५॥
५ तुलना पिण्डविशुद्धिः पृ. ६२ A॥

निर्ग्रन्थानाश्रित्य वदति, यथा भोः श्रावककुलतिलक ! तवैते गुरवः सातिशयज्ञानादिविभूषिता बहुश्रुताः शुद्धक्रियानुष्ठानपालनपरा विशदसामाचारीसमाचरणचमत्कृतचतुरधार्मिकजनमनसः शिवनगर-मार्गसार्थवाहा इत्यादि । तथा शाक्योपासकगेहे प्रविष्टः शाक्यान् भुञ्जानानवलोक्य तदुपासकानां पुरतस्तत्प्रशंसां कुरुते, [1]यथा अहो महानुभावाः शाक्यशिष्याश्चित्रलिखिता इव निश्चलाः प्रशान्त-चित्तवृत्तयो भुञ्जते । महात्मनामित्थमेव भोक्तुं युक्तम्, दयालवो दानशीलाश्चैते इत्यादि । एवं तापस-परिव्राजका-ऽऽजीवक-द्विजानप्याश्रित्य तद्गुणतद्दानप्रशंसाकरणेन वनीपकत्वं विज्ञेयम्, तथाऽतिथि-भक्तानां [2]पुरत एवं वदति-इह प्रायेण लोकः परिचितेषु यद्वाऽऽश्रितेषु उपकारिषु वा ददाति, यः पुन-रध्वखिन्नमतिथिं पूजयति तस्यैव दानं जगति प्रधानमिति । श्वानभक्तांस्तु प्रति- [3]नैते श्वान एव किन्तु कैलाशपर्वतादागत्य यक्षा एव श्वानरूपेण पृथिव्यां सञ्चरन्ति, तत एतेषां पूजा महते हिताय भवतीति । एवं काकादिष्वपि भावनीयम् तदित्थं वनीपकत्वकरणेनोत्पादितः पिण्डो वनीपकपिण्डः ।

बहु दोषश्चायम् [4]यतो धार्मिकेऽधार्मिके वा पात्रे दानं दत्तं निष्फलं न भवतीत्येवमभ्युक्ते-ऽपात्रदानस्य पात्रदानसमतया प्रशंसनेन सम्यक्त्वातीचारः स्यात् । किं पुनः कुपात्रानेव शाक्यादीन् साक्षात्प्रशंसतः ? । उक्तं च—

१ तुलना-"भुंजंति चित्तकम्मठिया व कारुणिय दाणरुइणो वा । " इति पिण्डनिर्युक्तिः ४४६ ॥
२ पुरतस्तत्प्रशंसंति-जे. ॥ ३ तुलना-"केलासभवणा एए आगया गुज्झगा महिं । चरंति जक्खरूवेणं, पूयाऽपूया हियाऽहिया ।" इति पिण्डनिर्युक्तिः ४५२ । द्रष्टव्या पिण्डनि. वृत्तिः पृ. १३२ A । पिण्डविशुद्धिवृत्तिः पृ. ६२ ॥
४ तुलना-पिण्डविशुद्धिवृत्तिः पृ. ६२ B ॥

[1]दाणं न होइ अफलं पत्तमपत्तेसु संनिजुज्जंतं । इय भणिएऽवि य दोसो पसंसओ किं पुण अपत्ते ? ॥१॥ [पिण्डनि.४५५]

[2]एवं हि शाक्यादिप्रशंसने लोके मिथ्यात्वं स्थिरीकृतं भवति । तथाहि—साधवोऽप्यमून् प्रशंसन्ति तस्मादेतेषां धर्मः सत्य इति । तथा यदि ते शाक्यादिभक्ता भद्रका भवेयुस्तत इत्थं साधुप्रशंसामुपलभ्य तद्योग्यमाधाकर्मादि समाचरेयुः, ततस्तल्लुब्धतया कदाचित् शाक्यादिव्रतं प्रतिपद्येरन् । तथा लोके चाटुकारिण एते जन्मान्तरेऽप्यदत्तदाना आहाराद्यर्थं श्वान इवात्मानं दर्शयन्तीत्यवर्णवादः । अथ प्रत्यनीकास्तर्हि गृहनिष्काशनादि कुर्युः । तथा सर्वसावद्यनिरतानां तेषां प्रशंसने मृषावादप्राणातिपातादयोऽपि चानुमोदिताः स्युरिति ५ ॥

'चिकिच्छे'त्ति चिकित्सनम् , चिकित्सा—रोगप्रतिकारः रोगप्रतिकारोपदेशो वा, [3]सा द्विविधा-सूक्ष्मा बादरा च तत्र सूक्ष्मा औषधवैद्यज्ञापनेन, बादरा स्वयं चिकित्साकरणेन अन्यस्मात्कारणेन वा। [4]तत्र कश्चिज्ज्वरादिरोगाक्रान्तो गृही भिक्षाद्यर्थं गृहे साधुं प्रविष्टं दृष्ट्वा पृच्छति—भगवन्नेतस्य मदीयस्य व्याधेर्जानीषे कमपि प्रतीकारमिति । स प्राह—भोः श्रावक ! यादृशस्तवायं रोगस्तादृशो ममाप्येकदा सञ्जात

१ अस्या मलयगिरिसूरिकृता व्याख्या- "इह पात्रेष्वपात्रेषु वा सन्नियुज्यमानं दानं न भवत्यफलमित्यपि भणिते दोषः, अपात्रदानस्य पात्रदानसमतया प्रशंसनेन सम्यक्त्वातिचारसम्भवात्, किं पुनः अपात्राण्येव साक्षात् प्रशंसतः? तत्र सुतरां महान् दोषो, मिथ्यात्वस्थिरीकरणादिदोषभावादिति" । इति पिण्डनि.वृत्तिः पृ. १३२ B ॥

२ तुलना-पिण्डनिर्युक्तिवृत्तिः ४४७ ॥ ३ तुलना-"भणइ य नाहं वेज्जो, अहवावि कहेइ अप्पणो किरियं । अहवावि विज्जयाए तिविह तिगिच्छा मुणेयव्वा ॥" पिण्डनिर्युक्तिः ४५६ ॥ ४ तुलना-पिण्डविशुद्धिवृत्तिः पृ. ६३ A । द्रष्टव्या-सटीका पिण्डनि. ४५६ तः ॥

आसीत् , स चामुकेनौषधेन समोपशमं गत इति । एवं च अज्ञस्य गृहस्थस्य रोगिणो भैषज्यकरणाभिप्रायोत्पादनादौषधसूचनं कृतम् । अथवा रोगिणा चिकित्सां पृष्टो वदति–किमहं वैद्यो ! येन रोगप्रतीकारं जाने इति । एवं चोक्ते रोगिणोऽनभिज्ञस्य सतोऽस्मिन् विषये वैद्यं पृच्छेति सूचनं कृतमिति सूक्ष्मा चिकित्सा । यदा तु स्वयं वैद्यीभूय साक्षादेव वमन-विरेचन-क्काथादिकं करोति, कारयति वाऽन्यस्मात्तदा बादरा चिकित्सेति । एवमुपकृतो हि प्रमुदितो गृही मम भिक्षां प्रकृष्टां दास्यतीति यतिरिमां द्विविधामपि कुरुते ।

न चैवं तुच्छपिण्डकृते व्रतिनां कर्तुमुचितमनेकदोषसम्भवात् , [1]तथाहि–चिकित्साकरणकाले कन्द-फल-मूलादिजीववधेन क्काथकथनादिपापव्यापारकरणादसंयमो भवेत् तस्य तथा नीरुक्कृतो गृहस्थस्तप्तायोगोलकसमानः प्रगुणीकृतदुर्बलान्धव्याघ्रवत् अनेकदोषाणां कुर्यात् । तथा यदि दैवदुर्योगात्साधुना चिकित्स्यमानस्यापि रोगिणो व्याधेरधिक्यं जायते, तदा कुपितस्तत्पुत्रादिराकृष्य राजकुलादौ ग्राहयेत् । तथाऽऽहारादिलुब्धा एते इत्थमित्थं च वैद्यकादि कुर्वन्तीति प्रवचनमालिन्यं स्यादिति ६ ॥

'कोहे'त्ति क्रोधः–कोपः, तद्धेतुकः पिण्डः क्रोधपिण्डः । किमुक्तं भवति ? – [2]कस्यचित्साधोः सम्बन्धिनमुच्चाटन-मारणादिकं विद्याप्रभावं शापदानादिकं तपःप्रभावं महत्तयोधित्वादिकं बलं राजकुले वल्लभत्वं वा ज्ञात्वा, यद्वा शापदानेन कस्यचिन्मारणाद्यनर्थरूपं कोपफलं साक्षादेव दृष्ट्वा, भयाद्

१ तुलना–पिण्डविशुद्धिवृत्तिः पृ. ६३ B । द्रष्टव्या-पिण्डनिर्युक्तिः सटीका ४६० ॥
२ तुलना-सटीका पिण्डनिर्युक्तिः ४६२ । द्रष्टव्या-पिण्डविशुद्धिवृत्तिः पृ. ६३ B तः ॥

गृहस्थेन यत्तस्मै दीयते स क्रोधपिण्डः । अथवा [1]अन्येभ्यो ब्राह्मणादिभ्यो दीयमाने याचमानोऽपि साधुर्यदा न लभते तदाऽलब्धिमान् सन् कुप्येत, कुपिते च सति तस्मिन् 'साधुः कुपितो भव्यो न भवती'ति यदीयते स क्रोधपिण्ड इति । [2]अत्र च सर्वत्र कोप एव पिण्डोत्पादने मुख्यं कारणं द्रष्टव्यम् । विद्या-तपः-प्रभृतीनि तु तत्सहकारिकारणान्येवेति न विद्यापिण्डादिभिः सहास्य लक्षणसाङ्कर्यमाशङ्कनीयम् ७ ॥

'माणे'त्ति मानो–गर्वस्तद्धेतुकः पिण्डो मानपिण्डः । अयमर्थः- [3]कश्चिद्यतिः कैश्चिदपरैः साधुभिस्त्वं लब्धिमान् ज्ञास्यसे यद्यस्मानिदमिदं च भोजयिष्यसीत्यादिवचनैरुत्तेजितो न किमपि त्वया सिद्ध्यतीत्येवमपमानितो वा गर्वाध्मातचेताः, अथवाऽऽत्मनो लब्धि-प्रशंसादिकमपरैर्विरच्यमानमाकर्ण्य यत्र कुत्राप्यहं व्रजामि तत्र सर्वथाऽपि लभे, तथैव च जनो मां प्रशंसतीत्येवं प्रवर्धमानाभिमानमानसः कस्यापि गृहिणः पार्श्वे गत्वा तं गृहिणं तैस्तैर्वचनजातैर्दानविषयेऽभिमाने चटापयति, स च गृही तथाऽभिमानपरः शेषे कलत्रादिके निजलोके दातुमनिच्छत्यपि यदशनादिकं ददाति स मानपिण्डः ८ ॥

'माय'त्ति [4]माया–परवञ्चनात्मिका बुद्धिः तया, कश्चित्साधुर्मन्त्रयोगाद्युपायकुशलः सन् स्वकीय-रूपपरावर्तादिकं कृत्वा यन्मोदकादिकं पिण्डमुपार्जयति स मायापिण्डः ९ ॥

'लोभे य' लोभो–गृद्धिस्तेन यो गृह्यते पिण्डः स लोभपिण्डः । इयमत्र भावना–[5]कश्चित्साधुरद्याहममुकं

१ तुल्यप्रायम् पिण्डनिर्युक्तिवृत्तिः ४६२ ॥ २ तुल्यप्रायं पिण्डविशुद्धिवृत्तिः पृ. ६४ A ॥
३ द्रष्टव्या-सटीका पिण्डनिर्युक्तिः ४६५, सटीका पिण्डविशुद्धिः ६८ ॥ ४ द्रष्टव्या पिण्डविशुद्धिवृत्तिः प.६६ B॥
५ तुलना-सटीका पिण्डनिर्युक्तिः ४८१ । द्रष्टव्या. पिण्डविशुद्धिवृत्तिः ६९ A ॥

सिंहकेसरमोदकादिकं ग्रहीष्यामीतिबुद्ध्या अन्यद्वल्ल-चणकादिकं लभ्यमानमपि यन्न गृह्णाति किन्तु तदेवेप्सितं स लोभपिण्डः । अथवा पूर्वं तथाविधबुद्ध्यभावेऽपि यथाभावं लभ्यमानं प्रचुरं लपनश्रीप्रभृतिकं भद्रकरमिति कृत्वा यद् गृह्णाति स लोभपिण्डः । यदिवा पायसादौ लब्धे यदि खण्ड-शर्करादिकं कृतोऽपि लभ्यते तदा भव्यतरं भवतीति कृताध्यवसायः पर्यटन् यल्लभते खण्डादिकं स लोभपिण्ड इति । इदं च क्रोधादिपिण्डचतुष्टयं साधूनां न कल्पते । प्रद्वेष-कर्मबन्ध-प्रवचनलाघवादिदोषसम्भवात् १० ॥

'पुव्विं पच्छा संथव' त्ति [1]संस्तवो द्विधा–वचनसंस्तवः सम्बन्धिसंस्तवश्च । तत्र वचनं–श्लाघा तद्रूपो यः संस्तवः स वचनसंस्तवः, सम्बन्धिनो-मात्रादयः श्वश्वादयश्च तद्रूपतया यः संस्तवः स सम्बन्धिसंस्तवः । एकैकोऽपि च द्विधा–पूर्वसंस्तवः पश्चात्संस्तवश्च । तत्र देयेऽलब्धे सति पूर्वमेव दातारं यद्गुणैर्वर्णयति स पूर्वसंस्तवः । यत्तु देये लब्धे सति दातारं गुणैर्वर्णयति स पश्चात्संस्तवः ।

इयमत्र भावना– [2]कश्चित्साधुर्भिक्षामटन् कस्मिंश्चिद् गृहे कञ्चिदीश्वरं दातारं निरीक्ष्य दानात्पूर्वमेव सत्यैरसत्यैर्वा औदार्यादिभिर्गुणैः स्तौति, यथा अहो दानपतिरस्माभिर्यः पूर्वं वार्तोभिः श्रुतः सोऽयं प्रत्यक्षेणैव वीक्षितः, तथा हतस्ततो भ्राम्यद्भिरस्माभिर्नेदृशा औदार्यादयो गुणा अपरस्य कस्यापि दृष्टाः श्रुता वा. तथा धन्यस्त्वं यस्येदृशा गुणाः सर्वत्रास्खलिताः सर्वदिग्वलयव्यापिनः प्रसरन्तीत्येवं पूर्वसंस्तवः । तथा दाने गृह्णति दत्ते सति यत् स्तौति यथा त्वदीयदर्शनेनाद्यास्माकं लोचने मनश्च शीतलमजायत, न

१ तुलना-सटीका पिण्डनिर्युक्तिः ४८४ । द्रष्टव्या-पिण्डविशुद्धिः प. ७० A ॥
२ तुलना-पिण्डविशुद्धिवृत्तिः प. ७० । द्रष्टव्या-पिण्डनिर्युक्तिः ४६०-४६३ ॥

चेदमद्भुतम्, यतो दातरि गुणिनि च दृष्टे कः प्रमोदभाङ् न भवति ?, इत्येष पश्चात्संस्तवः । उभयरूपेऽपि चास्मिन् संस्तवे माया-मृषावादा-ऽसंयतानुमोदनादयो दोषा भवेयुरिति ।

तथा [1]माता-पित्रादिरूपतया यः संस्तवः—परिचयः स पूर्वसम्बन्धिसंस्तवः, मात्रादीनां पूर्वकालभावित्वात्, यस्तु श्वश्रू-श्वशुरादिरूपतया संस्तवः स पश्चात्सम्बन्धिसंस्तवः, श्वश्रूवादीनां पश्चात्कालभावित्वात् । तत्र कश्चित्साधुर्भिक्षार्थं कस्मिंश्चिद् गृहे प्रविष्टः सद्याहारलम्पटतया आत्मवयः परवयश्च ज्ञात्वा तदनुरूपं सम्बन्धं घटयति, तथाहि—यदि च सा वयोवृद्धा स्वयं च मध्यमवयास्तदा तां निजमात्रादिसमानां महेलामालोक्य मातृस्थानेन मनागश्रुविमोचनं विधत्ते, ततः सा पृच्छति—साधो ! किं त्वमधृतो दृश्यसे ?, साधुरपि प्राह-मम त्वत्सदृशी माताऽभूत् । यदि पुनः साऽपि मध्यमवयास्तदा ममेदृशी स्वमाऽभूदिति वदति । अथ सा बालवयास्ततो ममेदृशी दुहिता आसीदित्यादि भाषते इति । एवं पश्चात्संस्तवेऽपि भावना कार्या ।

अत्रापि च बहवो [2]दोषाः । तथाहि—ते गृहिणो यदि भद्रकास्तदा साधौ प्रतिबन्धो भवेत् । प्रतिबन्धे च सत्याधाकर्मादिकं कृत्वा दद्युः । अथ प्रान्तास्तर्हि अयमस्माकं स्वस्य कार्पटिकप्रायस्य जनन्यादिकल्पनेनापभ्राजनां विधत्ते, तत एवं विचिन्त्य स्वगृहान्निष्काशनादि कुर्युः । अधृत्या अश्रुमोचनादि कुर्वन् मायावी एषोऽस्माकमावर्जननिमित्तं चाटूनि करोतीति निन्दा चेति । तथा ममेदृशी

१ तुलना-पिण्डनिर्युक्तिवृत्तिः गाथा ४८९ तः । द्रष्टव्या पिण्डविशुद्धिवृत्तिः गाथा ७२ ॥
२ द्रष्टव्या पिण्डनिर्युक्तिवृत्तिः प. १४० B ॥

माता आसीदित्युक्ते मृतस्य पुत्रस्य स्थानेऽयं मे पुत्र इति बुद्धया तस्मै स्वस्नुषादि दानं कुर्यात्। श्वश्रूरीदृशी ममासीदित्युक्ते च विधवां कुरण्डां वा निजसुतां दद्यादित्यादयश्च दोषाः। ततः संस्तवपिण्डो यतीनां न कल्पत इति ११ ॥

'विज्जा-मंते'त्ति द्वारद्वयं प्रतिपाद्यते। तत्र विद्या–प्रज्ञप्त्यादि स्त्रीरूपदेवताधिष्ठिता जप-होमादि-साध्या वा अक्षरविशेषपद्धतिः। पुरुषरूपदेवताधिष्ठिता पाठमात्रसिद्धा वाऽक्षरविशेषपद्धतिर्मन्त्रः। तद्व्यापारणेन य उपार्ज्यते पिण्डः स विद्यापिण्डो मन्त्रपिण्डश्च। दोषाश्चात्र– [1]यो विद्ययाऽभिमन्त्रितः सन् दानं दाप्यते स स्वभावस्थो जातः कदाचित् प्रद्विष्टोऽन्यो वा तत्पक्षपाती प्रद्विष्टः सन् प्रतिविद्यया स्तम्भनोच्चाटन मारणादि कुर्यात् तथा विद्यादिना परद्रोहकरणरूपेण जीवनशीलाः शठाश्चैते इति लोके जुगुप्सा। तथा कार्मणकारिण इमे इति राजकुले ग्रहणा-ऽऽकर्षण-वेषपरित्याजन-कदर्थन-मारणादीनि कुर्यादित्यादयः १२–१३ ॥

'चुण्णजोगे' इति द्वारद्वयम्, तत्र चूर्णो–नयना ऽञ्जनादिरन्तर्धानादिफलः, योगः–पादप्रलेपादिः सौभाग्यदौर्भाग्यकरः, एतद्व्यापारणेन य उपार्ज्यते पिण्डः स चूर्णपिण्डो योगपिण्डश्च। दोषाश्चात्रापि पूर्ववत्।

[2]ननु चूर्ण-योगयोर्द्वयोः क्षोदरूपत्वे सति परस्परं को विशेषः ? येन योगद्वारं पृथगुच्यते,

१ तुलना-पिण्डनि. वृत्तिः ४६७ ॥ २ तुलना–"अथ चूर्णस्य वासानां च परस्परं कः प्रतिविशेषो ? द्वयोरपि क्षोदरूपत्वात् ; उच्यते, सामान्यद्रव्यनिष्पन्नः शुष्क आर्द्रो वा क्षोदश्चूर्णः, सुगन्धद्रव्यनिष्पन्नाश्च शुष्कपेषम्पिष्टा वासाः, इतरे चानाद्यार्या योगाः पादप्रलेपनादयः।" इति पिण्डनिर्युक्तिवृत्तिः पृ. १४३ B ॥

सत्यमेतत्, परं कायस्य बहिरुपयोगी चूर्णः, बहिरन्तश्चोपयोगी योग इति । यतोऽसावभ्यवहार्याऽनाहार्यभेदाद् द्विविधो भवेत्, तत्र जलपानादिना अभ्यवहार्यः-आहार्यः, पादप्रलेपादिश्चेतर इति अनयोर्विशेषः १४-१५॥

'उप्पायणाय दोसा सोलसमे मूलकम्मे य' इति एतेऽनन्तरोक्ता उत्पादनाया दोषाः, षोडशो दोषो मूलकर्म- [1]अतिगहनभववनस्य मूलं-कारणं प्ररोहहेतुः कर्म-सावद्यक्रिया, ततो मूलं च तत्कर्म च मूलकर्म, तत्र गर्भस्तम्भन-गर्भाधान-गर्भपाता-ऽक्षतयोनित्वकरण-क्षतयोनित्वकरणादिना य उपार्ज्यते पिण्डः स मूलकर्मपिण्डः । अयं च साधूनां न कल्पते, प्रद्वेष-प्रवचनमालिन्य-जीवघाताद्यनेकदोषसम्भवात् । तथाहि-गर्भस्तम्भने [2]गर्भशातने च साधुना कृते ज्ञाते सति प्रद्वेषो भवति, ततः शरीरस्यापि विनाशः, गर्भाधाना-ऽक्षतयोनित्वकरणयोश्च यावज्जीवं मैथुनप्रवृत्तिः, गर्भाधानाद्धि पुत्रोत्पत्तौ प्राय इष्टा भवति, क्षतयोनित्वकरणे पुनर्भोगान्तरायादीनि १६ ॥५६७॥

उक्ताः षोडशाप्युत्पादनादोषाः, अथ दश एषणादोषानाह-

संकिय १ मक्खिय २ निक्खित्त ३ पिहिय ४ साहरिय ५ [3]दायगु ६ म्मिस्से ७।
अपरिणय ८ लित्त ९ छड्डिय १० एसणदोसा दस हवंति ॥५६८॥ [पिण्डनि. ५२०]

१ तुलना-पिण्डविशुद्धिः गाथा ७५ ॥ २ तुलना-पिण्डनिर्युक्तिवृत्तिः पृ. १४५ B ॥
३ दायगुम्मीस्से-मु.। दायगुम्मीस्से-इति पिण्डनिर्युक्तौ (५२०), , पिण्डविशुद्धौ (७७), पञ्चाशके (१३।२६) पाठः ॥

'संकिय मक्खिय'माह 'शङ्कितं-सम्भाविताधाकर्मादिदोषम्, तत्र च चतुर्भङ्गी-ग्रहणे शङ्कितो भोजने चेति प्रथमो भङ्गः १, ग्रहणे शङ्कितो न भोजने इति द्वितीयः २, भोजने शङ्कितो न ग्रहणे इति तृतीयः ३, न ग्रहणे नापि भोजने इति चतुर्थः ४, तत्राद्येषु त्रिषु भङ्गेषु षोडशोद्गमदोष-नवैषणादोषरूपाणां पञ्चविंशतिदोषाणां मध्ये येन दोषेण शङ्कितं भवति तं दोषमाप्नोति। किमुक्तं भवति?- यदा आधाकर्मत्वेन शङ्कितं गृह्णाति भुंक्ते वा तदा आधाकर्मदोषेण सम्बध्यते, यदि पुनरौद्देशिकत्वेन तत औद्देशिकेनेत्यादि। चतुर्थे तु भङ्गे वर्तमानः शुद्धो, न केनापि दोषेण सम्बध्यते इत्यर्थः।

एतेषां चैवं सम्भवः- [1]यथा कोऽपि साधुः स्वभावतो लज्जावान् भवति। तत्र क्वापि गृहे स भिक्षार्थं प्रविष्टः सन् प्रचुरां भिक्षां लभमानः स्वचेतसि शङ्कते-किमत्र प्रचुरा भिक्षा दीयते?,न च लज्जया प्रष्टुं शक्नोति, तत एवं शङ्कया गृहीत्वा शङ्कित एव तद् भुङ्क्ते इति प्रथमभङ्गवर्ती। तथा भिक्षार्थं गतः कोऽपि साधुः क्वापि गेहे तथैव शङ्कितमनाः प्रचुरां भिक्षामादाय स्ववसतिमागमत्, ततो भोजनसमये तं दोलायमानमानसं समालोक्य कश्चिदपरसाधुर्विज्ञातभिक्षादायिगृहव्यतिकरस्तदभिप्रायं ज्ञात्वा भणति-भो साधो! यत्र त्वया विपुला भिक्षा लब्धा तद्गृहेऽद्य महत्प्रकरणं वर्तते लाभनकं वा महत्कुतोऽप्यागतमित्येवं तद्वचः श्रुत्वा शुद्धमेतदिति निश्चित्य विगतशङ्कस्तद् भुङ्क्ते इति द्वितीयभङ्गवर्ती। तथा कश्चित्साधुरीश्वरगेहान्निःशङ्कितः प्रचुरां भिक्षां गृहीत्वा वसतावागतोऽन्यान् साधून् गुरोः पुरतः

१ तुलना-पिण्डनिर्युक्तिवृत्तिः पृ. १४७ A। द्रष्टव्या-पिण्डविशुद्धिवृत्तिः पृ.८१॥
२ तुलना-पिण्डनिर्युक्तिवृत्तिः पृ.१४७। द्रष्टव्या-पिण्डविशुद्धिवृत्तिः गाथा ७८॥

स्वभिक्षातुल्यां भिक्षामालोचयतः श्रुत्वा सञ्जातशङ्कश्चिन्तयति—यथा यादृश्येव मया भिक्षा प्रचुरा लब्धा तादृश्येवान्यैरपि सङ्घाटकैः तन्नूनमेतदाधाकर्मादिदोषदुष्टं भविष्यतीति भुञ्जानस्तृतीयभङ्गवर्ती १ ॥

'**मक्खिय**' त्ति [1]म्रक्षितं—पृथिव्यादिनाऽवगुण्ठितम्, तच्च द्विधा सचित्तम्रक्षितमचित्तम्रक्षितं च। तत्र सचित्तम्रक्षितं त्रिविधं—पृथिवीकायम्रक्षितम्, अप्कायम्रक्षितम्, वनस्पतिकायम्रक्षितं च। तत्र शुष्केणार्द्रेण वा सचित्तपृथिवीकायेन देयं मात्रकं हस्तो वा यदि म्रक्षितो भवति तदा सचित्तपृथ्वीकाय-म्रक्षितम्, अप्कायम्रक्षिते चत्वारो भेदाः—पुरःकर्म, पश्चात्कर्म, सस्निग्धम्, उदकार्द्रं च। तत्र भक्ता-देर्दानात्पूर्वं यत् साध्वर्थं कर्म हस्त—मात्रादेर्जलप्रक्षालनादि क्रियते तत्पुरःकर्म, यत्पुनर्भक्तादेर्दानात् पश्चात्क्रियते तत्पश्चात्कर्म, सस्निग्धम्—ईषल्लक्ष्यमाणजलखरण्टितं हस्तादि, उदकार्द्रं—स्फुटोपलभ्यमान-जलसंसर्गम्, तथा चूतफलादीनां सद्यःकृतैः श्लक्ष्णखण्डैः खरण्टितं यद्धस्तादि तद्वनस्पतिकायम्रक्षितम्, शेषैस्तु तेजः समीर-त्रसकायैर्म्रक्षितं न भवति। तेजस्कायादिसंसर्गेऽपि लोके म्रक्षितशब्दप्रवृत्त्यदर्शनात्।

अचित्तम्रक्षितं पुनर्द्विविधं—गर्हितमितरच्च, गर्हितं वसादिना लिप्तम्, इतरत् घृतादिना। इह च सचित्त-म्रक्षितं तावत् साधूनां सर्वथा न कल्पते। अचित्तम्रक्षितं तु लोकानिन्दितेन घृतादिना म्रक्षितं कल्पते। [2]निन्दितेन पुनर्वसादिना म्रक्षितं न कल्पते एवेति २ ॥

'**निक्खित्त**'त्ति [3]निक्षिप्तं—सचित्तस्योपरि स्थापितम्। तच्च पृथिव्यप्तेजो-वायु-वनस्पति-त्रसनिक्षिप्त-

१ म्रक्षितस्य तुलना-सटीका पिण्डनिर्युक्तिः ५३१-५३७ ॥ २ निन्दितेन- जे. नास्ति ॥ ३ "तुलना-सचित्तमीसएसु दुविहं काएसु होइ निक्खित्तं। एक्केक्कं तं दुविहं अणंतरं परंपरं चेव।" इति पिण्डनिर्युक्तिः ५४० ॥

भेदेन षोढा पुनरेकैकं द्विधा–अनन्तरं परम्परं च । अनन्तरं–अव्यवधानेन, परम्परं च–व्यवधानेन । तत्र सचित्ते–मृदादौ यत् [1]पक्वान्न-मण्डकादिकमानन्तर्येण व्यवस्थापितं तदनन्तरनिक्षिप्तम् सचित्तमृदादेरेवोपरिस्थिते पिठरकादौ यन्निक्षिप्तं पक्वान्नादि तत् परम्परनिक्षिप्तम् । तथा यन्नवनीत-स्त्यानीभूतघृतादिकं सचित्ते उदके निक्षिप्तं तदनन्तरनिक्षिप्तम् , तदेव नवनीतादि पक्वान्नादि वा जलमध्ये स्थितेषु नावादिषु स्थितं परम्परनिक्षिप्तम् । तथा वह्नौ पर्पटादि यत्प्रक्षिप्यते तदनन्तरनिक्षिप्तम् , यत्पुनरग्नेरुपरि स्थापिते पिठरादौ क्षिप्तं तत्परम्परनिक्षिप्तम् , तथा [2]वातोत्पाटिताः शालिपर्पटकादयोऽनन्तरनिक्षिप्तम् , यद् येनोत्पाट्यते तत्तत्र निक्षिप्तमुच्यते इति विवक्षया, परम्परनिक्षिप्तं तु पवनापूरितदृत्याद्युपरिस्थितमण्डकादि, तथा वनस्पत्यनन्तरनिक्षिप्तं सचित्तव्रीहिकाफलादिषु पूपमण्डकादि न्यस्तम् , परम्परनिक्षिप्तं तु हरितादीनामेवोपरिस्थितेषु पिठरादिषु निक्षिप्ता अपूपादयः । तथा त्रसेऽनन्तरनिक्षिप्तं बलीवर्दादिपृष्ठेऽपूपमोदकादयो निक्षिप्ताः, परम्परनिक्षिप्तं तु बलीवर्दादिपृष्ठनिवेशितकुतुपादिभाजनेषु निक्षिप्ता घृत-मोदकादय इति ।

अत्र च पृथिव्यादिषु सर्वेष्वप्यनन्तरनिक्षिप्तं देयं वस्तु यतीनामकल्पनीयमेव, सचित्तपृथिवीकायाद्युपरिस्थितत्वेन सङ्घट्टादिदोषसम्भवात् । परम्परनिक्षिप्तं पुनः सचित्तसङ्घट्टादिपरिहारेण यतनया [3]ग्राह्यमपीति, [4]केवलं तेजस्काये परम्परनिक्षिप्तस्य ग्रहणमाश्रित्य विशेषः प्रतिपाद्यते–यथेक्षुरसः पाकस्थाने अग्ने-

१ तुलना-पिण्डनिर्युक्तिवृत्तिः ५४८ । पिण्डविशुद्धिः पृ. ८५ A ॥ २ तुलना-पिण्डनिर्युक्तिवृत्तिः पृ. १५४ । पिण्डविशुद्धिवृत्तिः पृ. ८५ B ॥ ३ ग्राह्यमयीति सम्प्रदायः- इति 'पिण्डनि.वृत्तौ पृ. १५४ B ॥ ४ तुलना-पिण्डविशुद्धिवृत्तिः पृ. ८६ ॥

रुपरिस्थिते कटाहादौ यदि कटाहः [1]सर्वतः पार्श्वेषु मृत्तिकयाऽवलिप्तो भवति, दीयमाने चेक्षुरसे यदि परिशाटिनोपजायते, सोऽपि च कटाहो यदि विशालमुखो भवति, सोऽपि चेक्षुरसोऽचिरक्षिप्त इतिकृत्वा यदि नात्युष्णो भवति, तदा स दीयमान इक्षुरसः कल्पते । इह यदि दीयमानस्येक्षुरसस्य कथमपि बिन्दुर्बहिः पतति नाम स लेप एव वर्तते, न तु चुल्लीपर्यन्तिस्थतेजस्कायमध्ये पतति, ततो मृत्तिकयाऽवलिप्त इत्युक्तम्, तथा विशालमुखादाकृष्यमाणः उज्झनः शिष्टस्य कर्णे न लगति, ततो न पिठरस्य भङ्ग इति न तेजस्काय-विराधनेत्यतो विशालमुख इत्युक्तम् । [2]तथा अत्युष्णो इक्षुरसादौ दीयमाने यस्मिन् भाजने तदत्युष्णं गृह्णाति तेन तप्तं सद् भाजनं हस्तेन साधुर्गृह्णन् दह्यते इत्यात्मविराधना, [3]येनापि स्थानेन सा दात्री ददाति तेनाप्यत्युष्णेन सा दह्यते, अन्यच्च—अत्युष्णमिक्षुरसादि कष्टेन दात्री दातुं शक्नोति, कष्टेन च दाने कथमपि साधुसम्बन्धिभाजनाद्बहिरुज्झने हानिर्दीयमानस्येक्षुरसादेस्तस्य च भाजनस्य, साधुना वमनाद्यानयनायोत्पाटितस्य पतद्ग्रहादेः दात्र्या वा दानायोत्पाटितस्योदञ्चस्य [4]गण्डरहितस्या-त्युष्णतया झगिति भूमौ मोचने भङ्गः स्यात्, तथा च षड्जीवनिकायविराधनेति संयमविराधना चेत्येतो-ऽनत्युष्णमित्युक्तम् ३ ॥

---

१ तुलना-'पासोल्लित्त कडाहे परिसाडी नत्थि तंपि य विसालं । सोवि य अचिरच्छूढो उच्छुरसो नाइउसिणो य' इति । पिण्डनिर्युक्तिः ५५२ । अत्रस्था वृत्तिरपि तुलनीया ॥ २ तुलना-"दुविहविराहण उसिणे छड्डण हाणी य भाण भेओ य" पिण्डनि.५५६ । अत्रस्था वृत्तिरपि तुलनीया ॥ ३ "येनापि स्थापितेन स्थानेन" इति पिण्डनि वृत्ती पृ.१५४ A । "येनापि स्थानेन [दव्यादिना]-मु० ॥ ४ दण्डरहित० मु. । गण्डरहित० इति पिण्डनि. वृत्ति पृ. १५४A ॥

'पिहिय'त्ति पिहितं-सचित्तेन स्थगितम्, तदपि षोढा पृथिवीकायादिपिहितभेदात् एकैकमपि द्विधा अनन्तरं परम्परं च। [1]तत्र सचित्तपृथिवीकायेनावष्टब्धं मण्डकादि सचित्तपृथ्वीकायानन्तरपिहितम्, सचित्तपृथिवीकायगर्भपिठरादिपिहितं सचित्तपृथिवीकायपरम्परपिहितम्। तथा हिमादिनाऽवष्टब्धं मण्डकादिकं सचित्ताप्कायानन्तरपिहितम्, हिमादिगर्भपिठरादिना पिहितं सचित्ताप्कायपरम्परपिहितम्। तथा स्थाल्यादौ संस्वेदिमादीनां मध्ये अङ्गारं स्थापयित्वा हिङ्ग्वादिवासो यदा दीयते तदा तेनाङ्गारेण केषाञ्चित्संस्वेदिमादिनां संस्पर्शोऽस्तीति तेजस्कायानन्तरपिहितम्, एवं चनकादिकमपि मुर्मु[2]रादिक्षिप्तमनन्तरपिहितमवगन्तव्यम्, अङ्गारभूतेन शरावादिना स्थगितं पिठरादि [3]परम्परपिहितम्, तथा तत्रैवाङ्गारधू[4]पितादौ अव्यवहितमनन्तरपिहितं वायौ द्रष्टव्यम्, [5]"यत्राग्निस्तत्र वायु"रिति वचनात्, समीरणभूतेन तु चर्मणा पिहितं परम्परपिहितम्, तथा फलादिना अतिरोहितेन पिहितं वनस्पत्यनन्तरपिहितम् फलभृच्छल्ल्यकादिना पिहितं परम्परपिहितम्। तथा मण्डक-मोदकादिकमुपरिसञ्चरत्पिपीलिकापङ्क्तिकं [6]त्रसानन्तरपिहितम्, कीटिकाद्याकीर्णेन तु शरावादिना पिहितं त्रसपरम्परपिहितमिति।

तत्र च पृथिवीकायादिभिरनन्तरपिहितं न कल्पत एव यतीनाम्, सङ्घट्टादिदोषसंभवात्,

१ तुलना-पिण्डनिर्युक्तिवृत्तिः पृ. १५५। द्रष्टव्या पिण्डविशुद्धिवृत्तिः गाथा ८२॥ २ परम्परया पिहितं-जे.। परम्परपिहितं-पिण्डनि. वृत्तिः ३ °धूपनादौ-मु.। धूपितादौ इति पिण्डनि.वृत्तिः पृ. १५५ B॥ ४ वायोः-पिण्डनि.वृत्तिः पृ.१५५ B॥ ५ तुलना-"त्रसकायविषये कच्छपेन सञ्चारादिना च कीटिकापङ्क्त्यादिना यत्पिहितं तदनन्तरपिहितम्, कच्छपसञ्चारादिगर्भपिठरादिना पिहितं परम्परपिहितम्।" इति पिण्डनि. वृत्तिः पृ. १५५ B॥

परम्परपिहितं तु यतनया ग्राह्यमपि । [1]तथा अचित्तेनाप्यचित्ते देये वस्तुनि पिहिते चतुर्भङ्गी, यथा—गुरुकं गुरुकेण पिहितम् १, गुरुकं लघुकेन २, लघुकं गुरुकेण ३, लघुकं लघुकेन ४, तत्र च प्रथम-तृतीययोर्भङ्गयोरग्राह्यम्, गुरुद्रव्यस्योत्पाटने हि कथमपि तस्य पाते पादादिभङ्गसम्भवात् । द्वितीय-चतुर्थ-योस्तु ग्राह्यमुक्तदोषाभावात् । देयवस्त्वाधारस्य पिठरादेर्गुरुत्वेऽपि ततः करोटिकादिना दानसम्भवात् ४ ॥

'साहरिय' त्ति संहृतम्—अन्यत्र प्रक्षिप्तम्, तत्र [2]येन करोटिकादिना कृत्वा भक्तादिकं दातुमिच्छति दात्री तत्रान्यददातव्यं किमपि सचित्तमचित्तं मिश्रं वाऽस्ति, ततस्तददेयमन्यत्र स्थानान्तरे क्षिप्त्वा तेन ददाति एतत्संहृतमुच्यते । तच्चादेयं कदाचित्सचित्तेषु पृथिव्यादिषु मध्ये क्षिपति, कदाचिदचित्तेषु, कदाचि-न्मिश्रेषु, [3]तदा मिश्रस्य सचित्त एवान्तर्भावात्सचित्ता-ऽचित्तपदाभ्यां चतुर्भङ्गी, यथा सचित्ते सचित्तं संहृतम् १, सचित्ते अचित्तम् २, अचित्ते सचित्तम् ३, अचित्ते अचित्तमिति ४ । तत्राद्येषु त्रिषु भङ्गेषु सचित्तसङ्घट्टादिदोषसम्भवान्न कल्पते, चतुर्थे भङ्गे तु तथाविधदोषासम्भवे सति कल्पतेऽपीति । अत्राप्यनन्तर-परम्परप्ररूपणा पूर्ववत्कर्तव्या, यथा सचित्तपृथिवीकायमध्ये यदा संहरति तदाऽनन्तरसचित्त-

१ तुलना-"गुरु गुरुणा गुरु लहुणा लहुयं गुरुएण दोऽवि लहुयाइं । अचित्तेणवि पिहिए चउभंगो दोसु, भणेज्जं । इति पिण्डनि. ५६२ । अन्यथा वृत्तिः तुल्यप्राया । पिण्डविशुद्धिवृत्तिः गाथा ८२ ॥ २ तुलना पिण्डनिर्युक्तिवृत्तिः ५६३ । द्रष्टव्या पिण्डविशुद्धिवृत्तिः ८३ ॥ ३ तदा-मु- । तुलना-पिण्डविशुद्धिवृत्तिः ८३ । पिण्डनिर्युक्तिवृतौ तु-"ततः संहरणे सचिताद्यधिकृत्य....तिस्रश्चतुर्भङ्ग्यो भवन्तीत्यर्थः, तथाहि एका चतुर्भङ्गी सचित्त-मिश्रपदाभ्याम्, द्वितीया सचित्ता-ऽचित्तपराभ्याम्, मिश्राऽचित्तापदाभ्यां तृतीयेति ।" इति पृ १५६ A ॥

पृथिवीकायसंहृतम्, यदा तु सचित्तपृथिवीकायस्योपरिस्थिते पिठरादौ संहरति तदा परम्परसचित्तपृथिवीकायसंहृतम् । एवमप्कायादिष्वपि भावनीयम् । अनन्तरसंहृते न ग्राह्यम्, परम्परसंहृते तु सचित्तपृथिवीकायाद्यसंस्पृष्टे ग्राह्यमिति ६ ॥

'दायग' त्ति दायकदोषदुष्टम्, दायकश्चानेकप्रकारः, [1]तथाहि–स्थविरः १, अप्रभुः २, नपुंसकः ३, कम्पमानकायः ४, ज्वरितः ५, अन्धः ६, बालः ७, मत्तः ८, उन्मत्तः ९, छिन्नकरः १०, छिन्नचरणः ११, गलत्कुष्ठः १२, बद्धः १३, पादुकारूढः १४, तथा कण्डयन्ती १५, पिंषन्ती १६, भर्जमाना १७, कृन्तन्ती १८, लोढयन्ती १९, विक्षणुवती २०, पिञ्जयन्ती २१, दलयन्ती २२, विरोलयन्ती २३, भुञ्जाना २४, आपन्नसत्त्वा २५, बालवत्सा २६, षट् कायान् सङ्घट्टयन्ती २७, तानेव विनाशयन्ती २८, सप्रत्यपाया २९ चेति, तत एवमादिस्वरूपे दातरि ददति न कल्पते ।

[2]तत्र स्थविरः सप्ततिवर्षाणां मतान्तरापेक्षया षष्टिवर्षाणां वोपरिवर्ती, [3]स च प्रायो गलल्लालो

१ तुलना- "थेरऽपहु-पंड-वेविर-जरियंध-ऽतरुण-मत्त-उम्मत्ते । कर-चरणछिन्न-पगलिय-नियलंडु य पाउयारूढो ॥ खंडइ पीसइ भुंजइ कत्तइ लोढेइ विक्किणइ । पिंजे दलइ विरोलइ, जेमइ जा गुव्विणि बालवच्छा य ॥ तह छक्काए गिण्हइ, घट्टइ आरंभइ खिवइ दट्ठु जइं । साहारणचोरियगं देइ परक्कं परट्ठं वा ॥ ठवइ बलिं उववत्तइ, पिठराइ तिहा सपच्चवाया जा । दंतेसु एवमाइसु ओघेण मुणी न गिण्हन्ति ।" इति पिण्डविशुद्धिः ८५-८८। पिण्डनिर्युक्तिः ५७२-५७७ द्रष्टव्या ॥ २ तुलना-पिण्डनिर्युक्तिवृत्तिः प.१५८ A । सर्वेषां दायकानां तुलना–पिण्डविशुद्धिः सटीका ८५-८८ ॥

३ तुल्यप्रायं पिण्डनिर्युक्तौ प. १५९ B ॥

भवति, ततो देयमपि वस्तु लालया खरण्टितं भवतीति तद्ग्रहणे लोके जुगुप्सा। तथा कम्पमानहस्तश्च भवति, ततो हस्तकम्पनवशाद्देयं वस्तु भूमौ निपतति, तथा च षट्जीवनिकायविराधना तथा स्वयं वा स्थविरो ददत् निपतेत्, तथा सति तस्य पीडा भूम्याश्रितषड्जीवनिकायविराधना च १। अपि च-प्रायः स्थविरो गृहस्वा-प्रभुर्भवति, ततस्तेन दीयमाने कोऽधिकारोऽस्य वृद्धस्य दाने इति विचिन्त्य गृहे स्वामित्वेन नियुक्तस्य प्रद्वेषः स्यात्, [1]तथा वृद्धोऽपि यदि प्रभुर्भवति कम्पमानश्च यद्यन्येन विधृतो वर्तते स्वरूपेण वा दृढशरीरो भवति तर्हि ततः कल्पते २।

[2]तथा नपुंसकादभीक्ष्णं भिक्षाग्रहणे अतिपरिचयात्तस्य नपुंसकस्य साधोर्वा वेदोदयो भवेत्, ततो नपुंसकस्य [3]साध्वालिङ्गनाद्यासेवनेन द्वयस्यापि कर्मबन्धः, तथा अहो एते नपुंसकादपि निकृष्टात् गृह्णन्तीति जननिन्दा भवेत्, [4]अपवादतस्तु वर्धितक-चिप्पित-[5]मन्त्रोपहत-ऋषिशप्त-देवशप्तादिषु केषुचिदप्रतिसेविषु नपुंसकेषु ददत्सु गृह्यतेऽपि भिक्षेति ३। तथा [6]कम्पमानकायोऽपि भिक्षादानसमये देयमानयन् भूमौ परिशाटयेत् तथा साधुभाजनाद्बहिर्भिक्षां क्षिपेत् देयमात्रकं वा पातनेन स्फोटयेदिति, सोऽपि च यदि दृढभिक्षाभाजनग्राही भवेत् पुत्रादिभिर्वा दृढहस्तो भिक्षां दाप्यते तदा ततोऽपि गृह्यते ४।

---

१ द्रष्टव्या-पिण्डविशुद्धिवृत्तिः प. ८८ A। सर्वेषामपवादानां तुलना-पिण्डनि.वृत्तिः ५१७ तः ॥ २ तुलना-पिण्डनिर्यु-क्तिवृत्तिः ५८५ ॥ ३ 'साधुलिङ्गाद्यासेवनेन'-इति पिण्डनि.वृत्तौ (५८५) पाठः ॥ ४ तुलना-पिण्डविशुद्धिवृत्तिः पृ. ८८ A ॥ ५ °मन्त्रोपहतौषध्युपहतऋषि० इति पिण्डवि. वृत्तिः प. ८८ A ॥ ६ कम्पमानकाय-ज्वरिता-ऽन्धानां तुलना-पिण्डनिर्यु क्तिवृत्तिः ५८२-५८३ ॥

एवं ज्वरितेऽपि दोषा भावनीयाः। किञ्च–ज्वरिताद्भिक्षाग्रहणे ज्वरसङ्क्रमणमपि साधोर्भवेत्, तथा जने उड्डाहो यथा अहो अमी आहारलम्पटा यदित्थं ज्वरपीडितादपि गृह्णन्ति, अथासञ्चरिष्णुर्ज्वरो भवेत्तदा यतनया ग्रहणविधिं गृह्णतोऽदोषः ५।

तथा अन्धाद्भिक्षाग्रहणे उड्डाहः, स चायं–अहोऽमी औदरिका यदन्धादपि भिक्षां च दातुमशक्नुवतो भिक्षां गृह्णन्तीति, [1]तथा अन्धोऽपश्यन् पादाभ्यां भूम्याश्रितषड्जीवनिकायघातं विदधाति। तथाऽन्धो लेष्टवादौ स्खलितः सन् भूमौ निपतेत्, तथा च सति भिक्षादानायोत्पाटितहस्तगृहीतस्थाल्यादेर्भङ्गः स्यात्, साधुपात्रकाद् बहिः क्षपणे च परिशाटिर्भवेदिति। सोऽपि पुत्रादिना धृतहस्तो यदि दद्यात्तदा यतनया गृह्णते ६।

तथा [2]बालो–जन्मतो वर्षाष्टकाभ्यन्तरवर्ती तस्मिन् देयमानमजानति मात्राद्यसमक्षमतिप्रभूतां भिक्षां ददति अहो लुण्टाका एते न साधुसदृक्षा इत्युड्डाहो भवेत्, मात्रादीनां व्रतिनामुपरि द्वेषश्च सञ्जायते। यदि च मात्रादिभिः कार्यवशादन्यत्र गच्छद्भिर्बालकस्य कथितमिदमिदं च व्रतिनामत्रागतानां त्वया देयमिति, यदि च जनन्याद्यनुपदिष्टेऽपि स्तोकमेव किञ्चिद्ददाति बालकस्तदा तेनापि दीयमानं गृह्यते। एवं मात्रादिभिः क्रियमाणस्य कलहादेरभावादिति ७।

तथा मत्तः–पीतमदिरादिः, स च भिक्षां ददत् [3]कदाचिन्मत्ततया साधोरालिङ्गनं विदधाति, भाजनं वा भिनत्ति, यद्वा कदाचिद्भिक्षां ददानः पीतमासवं वमति, वमंश्च साधुं साधुपात्रं वा खरण्टयति, ततो

१ तुलना–पिण्डविशुद्धिवृत्तिः पृ ८८ B ॥ २ तुलना–पिण्डविशुद्धिवृत्तिः पृ. ८८ B ॥
३ मत्तोन्मत्तयोः तुलना–पिण्डनिर्युक्तिवृत्तिः ५८१ ॥

लोके जुगुप्सा-धिगमी साधवोऽशुचयो ये मत्तादपीत्थं भिक्षां गृह्णन्तीति। तथा कोऽपि मत्तो मदविह्वलतया रे मुण्ड ! किमत्रायातस्त्वमिति ब्रुवन् घातमपि विदधाति ८ ।

तथा उन्मत्तो-दर्पो ग्रहगृहीतो वा, तस्मिन्नप्येत एवालिङ्गनादयो दोषा वमनवर्जा भावनीया इति। तथा मत्तोऽपि यदि भद्रकोऽलक्ष्यमदश्च भवति यदि च सागारिकः कोऽपि तत्र तथाविधो न विद्यते तर्हि तद्धस्तात् कल्पते नान्यथा। उन्मत्तोऽपि चेत् शुचिर्भद्रकश्च भवति तदा कल्पत इति ९ ।

तथा छिन्नकरो [1]मूत्राद्युत्सर्गादौ जलशौचाद्यभावादशुचिरेव, तेन च दीयमाने जनो निन्दां करोति। तथा हस्ताभावे येन भाजनेन कृत्वा भिक्षां ददति यद्वा देयं वस्तु तस्य पतनमपि भवति, तथा च सति षट्जीवनिकायव्याघातः। तथा छिन्नचरणोऽप्येत एव दोषा द्रष्टव्याः, केवलं पादाभावात्तस्य भिक्षादानाय चलतः प्रायो नियमतः पतनं भवेत् ; तथा च सति भूम्याश्रितपिपीलिकाप्रभृतिप्राणिप्रणाशः, छिन्नकरोऽपि यदि सागारिकाभावे ददाति तदा यतनया गृह्यते, छिन्नचरणोऽपि च यद्युपविष्टो ददाति असागारिकं च स्थानं भवेत्तदा गृह्यते १०-११।

तथा गलत्कुष्ठाद् गृह्यमाणे [2]तदीयोच्छ्वास-त्वक्संस्पर्शा-ऽर्धपक्वरुधिर-स्वेद-मल-लालादिभिः साधोः कुष्ठसङ्क्रमो भवेत्। सोऽपि चेन्मण्डलप्रभृतिरूपकुष्ठाकीर्णकायः सन् सागारिकाभावे ददाति तर्हि ततः कल्पते न शेषकुष्ठिनः सागारिके वा पश्यति। [3]तत्र मण्डलानि-वृत्ताकारदद्रुविशेषरूपाणि, प्रभृतिः-नखविदारणेऽपि वेदनाया असंवेदनमिति १२ ।

१ छिन्नकर-चरणयोस्तुलना पिण्डनि. वृत्तिः ५८४ ॥
२ गलत्कुष्ठ-स्कन्धयोः तुलना-पिण्डविशुद्धिवृत्तिः पृ. ६० B ॥ ३ तुलना-पिण्डनि.वृत्तिः ६०० ॥

तथा करविषयकाष्ठमयबन्धनरूपेण [1]हस्ताण्डुना पादविषयलोहबन्धनरूपेण निगडेन च बद्धे दातरि-भिक्षां प्रयच्छति दुःखं तस्य स्यात् , तथा मूत्राद्युत्सर्गादौ च शौचकरणासम्भवात्ततो भिक्षाग्रहणे लोके जुगुप्सा, यथा अमी अशुचयो यदेतस्मादप्यशुचीभूताद्भिक्षामाददत इति, तथा पादबद्धश्चेदितश्चेतश्च पीडा-मन्तरेण गन्तुं शक्तस्ततस्तस्मादपि कल्पते इतरस्तु य इतश्चेतश्च गन्तुमशक्तः, स चेदुपविष्टः सन् ददाति न च कोऽपि तत्र सागारिको विद्यते तर्हि ततोऽपि कल्पते । हस्तबद्धस्तु भिक्षां दातुमपि न शक्नोतीति तत्र प्रतिषेध एव न भजना १३ ।

तथा पादुकयोः- [2]काष्ठमयोपानहोरारूढस्य भिक्षादानाय प्रचलनः कदाचिद् दुःस्थितत्वेन पतनं स्यात् । पादुकारूढोऽपि यद्यचलो भवति तदा कारणे कल्पते १४ ।

तथा [3]कण्डयन्त्या-उदूखले तण्डुलादिकं छटयन्त्या न गृह्यते । यत इयमुदूखलक्षिप्तशाल्यादिबीज-सङ्घट्टादि करोति । भिक्षादानात्पूर्वं भिक्षादानोत्तरकालं वा जलेन हस्तधावनात्पुरःकर्मदोषं पश्चात्कर्मदोषं वा विदध्यादित्यादयो दोषाः, अत्रापि कण्डयन्त्या कण्डनायोत्पाटितं मुशलं न च तस्मिन् मुशले किमपि [4]काञ्च्यां बीजं लग्नमस्ति अत्रान्तरे च समायातः साधुस्ततो यदि सा पतनाद्यनर्थरहिते गृहकोणादौ मुशलं स्थापयित्वा भिक्षां ददाति तदा कल्पते १५ ।

---

१ हत्थिदु० इति पिण्डनि. ५७३ । हस्तान्दुना इति तत्रैव वृत्तिः । ० हस्तान्दुकबद्धः इति पिण्ड वि. वृत्तिः पृ. ८९ B ॥
२ तुलना-पिण्डनि. वृत्तिः ५८४ । पिण्डविशुद्धिवृत्तिः पृ. ८६ B ॥ ३ कण्डु० मु.। तुलना-पिण्डविशुद्धि वृत्तिः ८६॥
४ "मुसलदण्डलोहमयकुण्डलिकरूपायां कांच्याम्" इति पिण्डविशुद्धिवृत्तिः पृ.९० A ॥

तथा पिंषन्ती–शिलायां तिला-ऽऽमलकादिप्रमृद्नन्ती [1]यदा भिक्षादानायोत्तिष्ठति तदा पिष्यमाण-तिलादिसम्बन्धाः काश्चिन्मक्षिकाः सचित्ता अपि हस्तादौ लगिताः सम्भवन्ति, ततो भिक्षादानाय हस्तादि-प्रस्फोटने भिक्षां वा ददत्या भिक्षासम्पर्कतस्तासां विराधना भवति । भिक्षां च दत्त्वा भिक्षावयवसङ्गष्टितौ हस्तौ जलेन प्रक्षालयेत् ततोऽप्कायविराधना । एषाऽपि पेषणसमानौ प्राशुकं वा पिंषन्ती यदि ददाति तदा कल्पते १५ ।

तथा भर्जमाना [2]चुल्ल्यां कढिल्लकादौ चनकादिन् स्फोटयन्ती, तस्यां हि भिक्षां ददत्यां वेलाल-नेन कढिल्लकक्षिप्तगोधूम-चनकादीनां दाहे सति प्रद्वेषादयो दोषाः स्युः । अत्रापि यत्सचित्तं गोधूमादिकं कढिल्लके क्षिप्तं तदुत्क्षिप्योत्तारितम् अन्यच्च नाद्यापि करे गृह्णाति एतस्मिन्नन्तरे भिक्षाकृते साधु समागतः ततो यद्युत्थाय ददाति तदा कल्पते १६ ।

तथा कुन्तव्यां–यन्त्रेण कृतपौणिकां सूत्ररूपां कुर्वत्याम् , तथा [3]लोढयन्त्यां–लोढिन्यां कर्पासं कण्टकेन कृततया विदधत्याम् , तथा विरुणुवत्यां–कृतं कार्पासं पौनःपुन्येन विरलं कुर्वत्याम् , तथा पिञ्जयन्त्यां–पिञ्जनेन कृतं [4]विरलं कुर्वत्यां न गृह्णते । देयलिप्तहस्तधावनरूपस्य पुरःकर्म-पश्चात्कर्मादि-

---

१ तुलना–पिण्डनिर्युक्तिवृत्तिः प्र.८८। पिण्डविशुद्धिवृत्तिः पृ. १० A॥ २ तुलना-पिण्डविशुद्धिवृत्तिः पृ. १०A॥ ३ 'लोढ-यतिलोढिन्यां-' इति पिण्डविशुद्धिवृत्तिः १०A। 'कल्पन्ति कार्पासं लोढिन्यां लोढयन्ति'–इति पिण्डनि. वृत्तिः पृ.१८८ A॥ ४ तुलना-' 'विरुणुते विकर्णयति वा कृतं कार्पास्यां पौनःपुन्येन रूक्षणयति ।' इति पिण्डविशुद्धिवृत्तिः पृ. १० A॥

दोषस्य सम्भवात् कार्पासिकादिसचित्तसङ्घट्टसम्भवाच्चेति । इह च कर्तने यदि सूत्रस्य श्वेततातिशयोत्पादनाय शङ्खचूर्णेन हस्तौ न खरण्टयति, खरण्टने वा यदि जलेन न प्रक्षालयति तदा कल्पते । लोढनेऽपि यदि हस्ते धृतः कार्पासो न स्यात् कार्पासिकान् वा यदि उत्तिष्ठन्ती न घट्टयति तदा गृह्यते । भिक्षुकस्यां पिञ्जयन्त्यां च यदि पश्चात्कर्म न भवति तदा कल्पते १८-२१ ।

तथा [1]दलयन्ती—घरट्टेन गोधूमादि चूर्णयन्ती, तस्यां हि ददत्यां घरट्टक्षिप्तबीजसङ्घट्टः हस्तधावने तज्जविराधना च । दलयन्त्यपि तच्चिक्कणमुद्गादिना दल्यमानेन सह घरट्टं मुक्तवती अन्तरे च साधुराया-तस्ततो यद्युत्तिष्ठति अचेतनं वा मृष्टं मुद्गादिकं दलयति तर्हि तद्घट्टनात्कल्पते २२ ।

तथा विरोलयन्ती— [2]दध्यादि मथ्नन्ती, यदि तद्दध्यादि संसक्तं मथ्नाति तर्हि तेन संसक्तदध्यादिना लिप्तकरत्वाद्भिक्षां ददती तेषां रसजीवानां वधं विदध्यात् । अत्रापि चेदसंसक्तं दध्यादि मथ्नाति तदा कल्पते २३ ।

तथा भुञ्जाना दात्री भिक्षादानार्थमाचमनं करोति, आचमने च क्रियमाणे उदकं विराध्यते । अथ न करोत्याचमनं तर्हि लोके जुगुप्सा । उक्तं च—

△"छक्कायदयावंतोऽवि संजओ दुल्लहं कुणइ बोहिं । आहारे नीहारे दुगुंछिए पिंडगहणे य ॥१॥"२४ ।

१ 'मृदु'-इति पिण्डविशुद्धिवृत्तौ पृ. ९० A ॥ २ विरोलयन्ती-भुञ्जानयोः तुलना-पिण्डनि. वृत्तिः ५८७ । पिण्डविशुद्धि-वृत्तिः प. ९० B ॥

△ षट्कायदयावानपि संयतो दुर्लभां करोति बोधिम् । आहारे नीहारे जुगुप्सिते पिण्डग्रहणे च ॥१॥

तथा [1]आपन्नसत्त्वायां भिक्षां ददत्यां न ग्राह्यम्, यतस्तस्या भिक्षादानार्थमूर्द्ध्वीभवन्त्या भिक्षां दत्त्वा आसने उपविशन्त्याश्च गर्भबाधा भवेत्। तत्रापि स्थविरकल्पिकानां मासाष्टकं यावत् तत्करेण कल्पते वेलामासे तु न कल्पते। ऊर्द्ध्वीभवनाद्यावासमन्तरेण स्वभावस्थितयैव तया यदि दीयते तदा वेलामासेऽपि गृह्यते २५।

तथा बालवत्सा बालकं भूमौ मञ्चिकादौ वा निक्षिप्य यदि भिक्षां ददाति तर्हि तं बालकं मार्जार-सारमेयादयो मांसखण्डं शशकशिशुरिति वा कृत्वा विनाशयेयुः। तथा आहारखरण्टितौ शुष्कौ हस्तौ कर्कशौ भवतः; ततो भिक्षां दत्त्वा पुनर्दाक्ष्या हस्ताभ्यां गृह्यमाणस्य बालस्य पीडा स्यात्। यस्यास्तु बाल आहारेऽपि लगति भूमौ च मुक्तः सन्न रोदिति तस्या हस्तौ कल्पेते स्थविरकल्पिकानाम्, आहारं हि गृह्णन् बालः प्रायः शरीरेण महान् भवेत्, ततो न मार्जारादिविराधनाप्रसङ्गः। ये तु भगवन्तो जिनकल्पिकास्ते निरपवादत्वात्सूत्रबलेन गर्भाधानादि ज्ञात्वा मूलत एवापन्नसत्त्वां बालवत्सां च सर्वथा परिहरन्ति २६।

तथा [2]षट्कायान् पृथिव्यप्तेजो वायु-वनस्पति-त्रसस्वरूपान् संघट्टयन्ती—हस्तपादादिना शरीरावयवेन स्पृशन्ती, ततः सजीवलवणोदका-ग्निवायुपूरितबस्ति-बीजपूरफलादि-मत्स्यादीन् हस्तस्थान्, सिद्धार्थक-दूर्वा-पल्लव-मल्लिका-शतपत्रिकाप्रमुखपुष्पाणि शिरःस्थानि, मालतीमालादीन्युरःस्थानि, जपाकुसुमान्याभरणतया

---

१ आपन्नसत्त्वा- बालवत्सयोः तुलना-पिण्डनि.वृत्तिः ५८६। पिण्डविशुद्धिवृत्तिः प.९० B॥

२ तुलनार्थं मतान्तरदर्शनार्थञ्च द्रष्टव्या सटीका पिण्डनिर्युक्तिः ५८६-५९२। तुलना- पिण्डविशुद्धिवृत्तिः ८७॥

कर्णस्थानि, परिधानाधन्तःस्थापितसरससचित्त-ताम्बूलपत्रादीनि [1]कटीस्थानि, सचित्तजलकणादीनि पाद-लग्नानि धारयन्ती यदि ददाति तदा न कल्पते, सङ्घट्टादिदोषसद्भावात् २७ ।

तथा [2]तानेव षट्कायान् पृथिव्यादीन् विनाशयन्ती—व्यापादयन्ती, [3]तत्र कुश्यादिना भूम्यादिखनने पृथिवीकायम्, मज्जन-वस्त्रादिधावन-वृक्षादिसेचनादिभिरप्कायम्, उल्मुकघट्टनादिभिरग्निकायम्, चुल्यामग्निफूत्करणादिभिः सचित्तवातभृतवस्त्यादेरितस्ततः प्रक्षेपणेन वा वायुकायम्, चिर्भटिकादिच्छेदनेन वनस्पतिकायम्, मक्षादेर्मत्कुणादिपातनेन च त्रसकायं विनाशयन्त्यां दात्र्यां न गृह्यते २८ ।

तथा सप्रत्यपाया—सम्भाव्यमानापाया । इह [4]अपायास्त्रिविधाः, तद्यथा—तिर्यगूर्ध्वमधश्च, तत्र तिर्यग्वादिभ्यः, ऊर्ध्वमुत्तरङ्गकाष्ठादेः, अधः सर्प-कण्टकादेः । इत्थं च त्रिविधानामप्यपायानामन्यतममपायं बुद्ध्या सम्भावयन् न ततो भिक्षां गृह्णीयादिति । [5]अत्र च षट् कायान् सङ्घट्टयन्त्यां तथा तानेव विनाशयन्त्यां सप्रत्यपायायां चापवादो नास्ति, ततः सर्वथा न कल्पते एव । शेषेषु पुनरपवादो दर्शित एव २९ ।

एवमन्येऽपि दायकदोषाः स्वयं शास्त्रान्तरतश्च परिभाव्य परिहरणीयाः ६ ॥

'उम्मीसे' त्ति उन्मिश्रं—सचित्तमिश्रम्, इह कश्चिद् गृहस्थः केवलं वस्त्विदं व्रतिने [6]वितीर्यमाणमल्पं स्यादिति लज्जया, पृथग्वस्तुद्वयदाने वेला लगतीत्यौत्सुक्येन, मीलितं वस्तुद्वयं सृष्टं भवतीति

१ "शरीरस्थानि"-इति पिण्डविशुद्धिवृत्तौ प. ६१ A गाथा ८७ ॥ २ तुलना-पिण्डनि. वृत्तिः प. १६१ B । पिण्डविशुद्धिवृत्तिः ८७ ॥ ३ तुलना-पिण्डनि. वृत्तिः ५६५ ॥ ४ द्रष्टव्या-पिण्डनि. वृत्तिः ५७८ ॥ ५ तुलना-पिण्डविशुद्धिवृत्तिः ८६ ॥

भक्त्या, सचित्तभक्षणभङ्गो भवतु एतेषामिति प्रत्यनीकतया, अनाभोगेन वा साधूनां कल्पनीयतया उचितं पूरणादिकम् अकल्पनीयतया मुनीनामनुचितेन करमर्दक-दाडिमकुलिकादिना मिश्रयित्वा यद्ददाति तदुन्मिश्रम्, अत्र च कल्पनीया ऽकल्पनीये द्वे अपि वस्तुनी च मिश्रयित्वा यद्ददाति तदुन्मिश्रम्, [1]संहरणं तु यद्भाजनस्थमदेयं वस्तु तदन्यत्र क्वापि स्थगनिकादौ संहृत्य ददातीत्ययं मिश्र-संहृतयोर्भेदः ७ ॥

'अपरिणय' त्ति [2]अपरिणतम्–अप्रासुकीभूतम्, तत्सामान्यतस्तावद् द्विधा–द्रव्यतो भावतश्च, पुनरेकैकं द्विधा–दातृविषयं ग्रहीतृविषयं च, तत्र द्रव्यरूपमपरिणतं यत्पृथिवीकायादिकं स्वरूपेण सजीवम्, यत्पुनर्जीवेन विप्रमुक्तं तत्परिणतमिति । तच्च यदा दातुः सत्तायां वर्तते तदा दातृविषयम्, यदा तु ग्रहीतुः सत्तायां तदा ग्रहीतृविषयम्, तथा द्वयोर्बहूनां वा साधारणे देयवस्तुनि यद्येकस्य कस्यचिद्दामीत्येवं भावः परिणमति न शेषाणाम्, एतद्भावतो दातृविषयमपरिणतम्, साधारणानिसृष्टं दायकपरोक्षत्वे दातुभावापरिणतं तु दायकसमक्षत्वे इत्यनयोर्भेदः । तथा द्वयोः साध्वोः सङ्घाटकरूपेण भिक्षाकृते गृहिगृहं गतयोरेकस्य साधोरेतल्लभ्यमानमशनादिकं शुद्धमिति मनसि परिणतं न द्वितीयस्येति ग्रहीतृविषयं भावापरिणतम्, एतच्चसाधूनां न कल्पते; शङ्कितत्वात् कलहादिदोषसम्भावनाच्च ८ ॥

'लिप्त' त्ति हस्तमात्रकादिलेपकारित्वाल्लिप्तं–दुग्ध-दधि-तेमनादि, तत्पुनरुत्सर्गतः साधुभिर्न ग्राह्यम्, [3]रसाभ्यवहार-लाम्पट्यवृद्धिप्रसङ्गात्, दध्यादिलिप्तहस्तप्रक्षालनादिरूपपश्चात्कर्माद्यनेकदोषसद्भावाच्च ।

१ तुलना-पिण्डनि.वृत्तिः ६०७। पिण्डविशुद्धिवृत्तिः पृ. ९२ A ॥ २ तुलना-सटीका पिण्डविशुद्धिः ९० ॥
३ तुलना-पिण्डनि. वृत्तिः ६१३ ॥

किन्तु अलेपकृदेव वल्ल-चनकौदनादिकम्, तथाविधशक्त्यभावे च निरन्तरस्वाध्यायाध्ययनादिकं किमपि पुष्टं कारणमाश्रित्य लेपकृदपि कल्पते ।

तत्र च लेपकृति गृह्यमाणे [1]दातुः सम्बन्धी हस्तः संसृष्टोऽसंसृष्टो वा भवति । येन च कृत्वा भिक्षां ददाति तदपि मात्रकं करोटिकादिकं संसृष्टमसंसृष्टं वा । द्रव्यमपि देयं सावशेषं निरवशेषं वा । एतेषां च त्रयाणां पदानां संसृष्ट[2]हस्त-संसृष्टमात्र-सावशेषद्रव्यरूपाणां सप्रतिपक्षाणां परस्परं योगतोऽष्टौ भङ्गा भवन्ति । ते चामी-संसृष्टो हस्तः संसृष्टं मात्रम्, सावशेषं द्रव्यम् १, संसृष्टो हस्तः, संसृष्टं मात्रम्, निरवशेषं द्रव्यम् २, संसृष्टो हस्तोऽसंसृष्टं मात्रम्, सावशेषं द्रव्यम् ३, संसृष्टो हस्तोऽसंसृष्टं मात्रम्, निरवशेषं द्रव्यम् ४, असंसृष्टो हस्तः, संसृष्टं मात्रम्, सावशेषं द्रव्यम् ५, असंसृष्टो हस्तः, संसृष्टं मात्रम्, निरवशेषं द्रव्यम् ६, असंसृष्टो हस्तोऽसंसृष्टं मात्रम्, सावशेषं द्रव्यम् ७, असंसृष्टो हस्तोऽसंसृष्टं मात्रम्, निरवशेषं द्रव्यम् ८ । एतेषु चाष्टसु भङ्गेषु मध्ये विषमेषु भङ्गेषु– प्रथम-तृतीय-पञ्चम-सप्तमेषु ग्रहणं कर्तव्यम्, न समेषु–द्वितीय-चतुर्थ-षष्ठा-ऽष्टमरूपेषु । इयमत्र भावना–इह हस्तो मात्रं द्वे वा स्वयोगेन संसृष्टे वा भवेतामसंसृष्टे वा, न तद्वशेन पश्चात्कर्म सम्भवति, किं तर्हि ? द्रव्यवशेन, तथाहि–यत्र द्रव्यं सावशेषं तत्र तेन साध्वर्थं खरण्टितेऽपि न दात्री प्रक्षालयति भूयोऽपि परिवेषणसम्भवात् । यत्र तु निरवशेषं द्रव्यं तत्र साधुदानानन्तरं नियमतस्तद्द्रव्याधारस्थालीं हस्तं मात्रं वा प्रक्षालयति, ततो द्वितीयादिषु भङ्गेषु द्रव्ये निरवशेषे पश्चात्कर्मसम्भवान्न कल्पते । प्रथमादिषु तु पश्चात्कर्मासम्भवात्कल्पत इति ९ ॥

१ तुलना-पिण्डनि. वृत्तिः ६२६ । पिण्डविशुद्धिवृत्तिः ९१ ॥ २ हस्ता० मु. । 'हस्त० इति पिण्डनि. वृत्तावपि पाठः ६२६ ॥

'छड्डिय' त्ति, 'छर्दितम् उज्झितं त्यक्तमिति पर्यायाः, तच्च त्रिधा—सचित्तमचित्तं मिश्रं च; तदपि च कदाचिच्छर्दितं सचित्तद्रव्ये कदाचिदचित्तद्रव्ये कदाचिन्मिश्रद्रव्ये, तत्र उभयत्रापि मिश्रस्य सचित्त एवान्तर्भावात् छर्दने सचित्ता-ऽचित्तद्रव्ययोराधारभूतयोराधेयभूतयोश्च संयोगतश्चतुर्भङ्गी भवति । तद्यथा—सचित्ते सचित्तम्, अचित्ते सचित्तम्, सचित्ते अचित्तम्, अचित्ते अचित्तम्; अत्र चाद्येषु त्रिषु भङ्गेषु सचित्त सङ्घट्टादिदोषसद्भावान्न कल्पते, चरमे पुनः परिशाटिसद्भावात् । परिशाटौ च महान् दोषः, तथाहि—उष्णस्य द्रव्यस्य छर्दने भिक्षां ददानो दह्येत, भूम्याश्रितानां वा पृथिव्यादीनां दाहः स्यात्, शीतद्रव्यस्य च भूमौ पतने भूम्याश्रिताः पृथिव्यादयो विराध्यन्ते [1]इति १० ॥

एते दश एषणादोषा भवन्ति, उक्तास्तावत्सङ्क्षेपतो द्विचत्वारिंशदपि दोषाः, विस्तरतस्तु पिण्डनिर्युक्तेरवगन्तव्याः ॥५६८॥

अथ पिण्डविशुद्धेः सर्वसंग्रहमाह —

पिंडेसणा य सव्वा संखित्तोयरइ नवसु कोडीसु ।
न हणइ न किणइ न पयइ कारावण [3]अणुमईहिं नव ॥५६९॥

'पिंडेसणा य गाहा' पिण्डैषणा—पिण्डविशुद्धिः सर्वाऽपि सङ्क्षिप्ता—संक्षेपेण भण्यमाना अवतरति—अन्तर्भवति नवसु कोटीषु—विभागेषु, ता एवाह—न स्वयं हन्ति, न च क्रीणाति, न च पचति इति त्रयम्,

१ तुलना—पिण्डनिर्युक्तिवृत्तिः ६२७-६२८ । द्रष्टव्या-सटीका पिण्डविशुद्धिः ९२ ॥ २ इति-नास्ति सं. ॥ ३ अणुमईहि-मु. । अणुमइणं हिं-ता. ॥

एवं कारणा-ऽनुमतिष्वपि । तथा नान्येन घातयति, न क्रापयति, न च पाचयति, तथा नापरेण हन्यमानं न क्रीयमाणं न च पच्यमानमनुमोदते । मिलिताश्चैता नव कोटयः । एतैर्नवभिः पदैः पिण्डविशुद्धिः सर्वाऽपि सङ्गृह्यत इति भावः ॥५६९॥

इह च पूर्वं षोडशविध उद्गम उक्तः, स च सामान्यतो द्विधा भवति, तद्यथा-विशोधिकोटिरूपोऽविशोधिकोटिरूपश्च, तत्र यद्दोषदुष्टे भक्ते तावन्मात्रेऽपनीते सति शेषं कल्पते, स दोषो विशोधिकोटिः, शेषस्त्वविशोधिकोटिः, तत्र ये दोषा अविशोधिकोटिरूपा ये च विशोधिकोटिरूपास्तानाह—

कम्मुद्देसिय[1]चरिमे तिग पूइयमीसचरिमपाहुडिया ।
अज्झोयर अविसोही विसोहिकोडी भवे सेसा ॥५७०॥

'**कम्मुद्देसियगाहा**' सूचामात्रत्वात्सूत्रस्य '**कम्म**'त्ति आधाकर्म सप्रभेदम्, औद्देशिकस्य विभागौद्देशिकस्य चरमत्रिकं-कर्मभेदसत्कमन्त्यमेव भेदत्रयम्, पूतिर्भक्तपानरूपा, '**मीस**' त्ति मिश्रजातं पाखण्डिगृहिमिश्रं साधुगृहिमिश्रम्, चरमा-अन्त्या बादरेत्यर्थः प्राभृतिका, '**अज्झोयर**'त्ति अध्यवपूरकस्य स्वगृहिपाखण्डिमिश्र-स्वगृहिसाधुमिश्ररूपमन्त्यं भेदद्वयम्, एते उद्गमदोषा अविशोधिकोटिः, अस्याश्चाविशोधिकोट्या अवयवेन शुष्कसिक्थादिना तथा तक्रादिना लेपेन, वल्लचणकादिना च अलेपेन संसृष्टं यत् शुद्धं भक्तं तस्मिन्नुज्झितेऽपि यदकृतकल्पत्रये पात्रे शुद्धमपि भक्तं पश्चात्परिगृह्यते तत्पूतिरवगन्तव्यम् । '**विसोहिकोडी भवे [2]सेस**'त्ति शेषाः-ओघौद्देशिकं नवविधमपि च विभागौद्देशिकमुपकरणपूतिर्मिश्रस्याद्यो भेदः, स्थापना,

१ चरमतिय पूइय-ता. ॥ २ सेसत्ति शेषे विभागौ० सं. ॥

सूक्ष्मप्राभृतिका, प्रादुष्करणम्, क्रीतम्, प्रामित्यकम्, परिवर्तितमभ्याहृतमुद्भिन्नम्, मालापहृतमाच्छेद्यमनिसृष्टमध्यवपूरकस्याद्यो भेदश्चेत्येवंरूपा विशोधिकोटिः, विशुद्ध्यति शेषं शुद्धं भक्तं यस्मिन्नुद्धृते यद्वा विशुद्ध्यति पात्रकमकृतकल्पत्रयमपि यस्मिन्नुज्झिते सा विशोधिः, सा चासौ कोटिश्च–भेदश्च विशोधिकोटिः। उक्तं च—

△"उद्देसियंमि नवगं उवगरणे जं च पूइयं होइ । जावंतियमीसगयं अज्झोयरए य पढमपयं ॥१॥
परियट्टिए अभिहडे उब्भिन्ने मालोहडे इय । अच्छिज्जे अणिसट्ठे पाओयर कीय पामिच्चे ॥२॥
सुहुमापाहुडियाऽवि य ठवियगपिंडो य जो भवे दुविहो। सव्वोऽवि एस रासी विसोहिकोडी मुणेयव्वो ॥३॥"

इह च भिक्षामटता पूर्वं पात्रे शुद्धं भक्तं गृहीतम्, ततस्तत्रैवानाभोगादिकारणवशतो विशोधिकोटिदोषदुष्टं गृहीतम्, पश्चाच्च कथमपि ज्ञातं यथैतद्विशोधिकोटिदोषदुष्टं मया गृहीतमिति ततो यदि तेन विनाऽपि निर्वहति तर्हि सकलमपि तद्विधिनाऽऽहारादि परिष्ठापयति, अथ न निर्वहति तदा यदेव विशोधिकोटिदोषदुष्टं तदेव तावन्मात्रं सम्यक्परिज्ञाय परित्यजति। यदि पुनरलक्षितेन सदृशवर्णगन्धादितया पृथक्परिज्ञातुमशक्येन मिश्रितं भवति, यद्वा द्रवेण तक्रादि तदा सर्वस्यापि तस्य विवेकः, कृते च सर्वात्मना विवेके

△ औद्देशिके नवकमाद्यमुपकरणे यच्च पूतिकं भवति। यावदर्थिकं मिश्रजातम् अध्यवपूरके च प्रथमपदम् ॥१॥
परिवर्तितम् अभ्याहृतम् उद्भिन्नं मालापहृतं च । आच्छेद्यमनिसृष्टं प्रादुष्करणमपमित्यं क्रीतम् ॥२॥
सूक्ष्मा प्राभृतिका स्थापनापिण्डश्च यो भवेत् द्विविधः । सर्वोऽप्येष राशिर्विशोधिकोटी ज्ञातव्यः ॥३॥

यद्यपि केचित्सूक्ष्मा अवयवा लगिता भवन्ति तथापि तत्र पात्रेऽकृतकल्पेऽप्यन्यत्परिगृह्णन् शुद्धः [1]साधुः त्यक्तभक्तादेर्विशोधिकोटित्वादिति ॥५७०॥

अथ समितीराह—

इरिया १ भासा २ एसण ३ [2]आयाणाईसु ४ तह परिट्ठवणा ५ ।
सम्मं जा उ पवित्ती सा समिई पंचहा एवं ॥५७१॥

'इरिया गाहा' 'ईरणमीर्या—गतिः, भाषणं—भाषा, एषणमेषणा, आदीयते—गृह्यते इत्यादानम्, तदादिर्येषां निक्षेपादिक्रियाविशेषाणां ते आदानादयः, ईर्या च भाषा च एषणा च आदानादयश्च ते तथा [तेषु], परिष्ठापने—त्यजने सम्यगागमानुसारेण या प्रवृत्तिः—चेष्टा सा समितिः, पञ्चानां चेष्टानां तान्त्रिकीयं संज्ञा, तत ईर्यासमितिर्भाषासमितिरेषणासमितिरादाननिक्षेपसमितिः परिष्ठापनासमितिरित्येवमुक्तन्यायेन [3]पञ्चप्रकारा समितिः ।

तत्र [4]त्रस-स्थावरजन्तुजाताभयदानदीक्षितस्य यतेरावश्यके प्रयोजने लोकैरत्यन्तक्षुण्णेषु रविरश्मिप्रतापितेषु प्रासुकविविक्तेषु मार्गेषु गच्छतो जन्तुरक्षानिमित्तं स्वशरीररक्षानिमित्तं च पादाग्रादारभ्य युगमात्रक्षेत्रं यावन्निरीक्ष्य या ईर्या—गतिस्तस्यां समितिरीर्यासमितिः, यदुक्तम्—

१ साधुरुपत्त—सं. ॥ २ आयाराईसु-ता. ॥ ३ तुलना-तत्त्वार्थ० सिद्ध० ९ / ४-५ । तत्त्वार्थ० राज० ९ / ४-५ । योगशास्त्रटीका १ । ३४ । धर्मसं. वृ. ३। ४७ ॥ ४-तुलना योगशास्त्र टीका १ । ३६ । धर्मसं. वृ. पृ. १३० तः ॥

" [1]पुरओ जुगुमायाए, पेहमाणो महिं चरे । वज्जेंतो बीयहरियाइं, पाणे य दगमट्टियं ॥१॥
ओवायं विसमं खाणुं, विज्जलं परिवज्जए । संकमेण न गच्छिज्जा, विज्जमाणे [2]परक्कमे ॥२॥"
[दशवैकालिकसू. ४/१/३.४] एवंविधोपयोगेन गच्छतो यतेर्यदि कथमपि प्राणिवधो भवति तथाऽपि तस्य पापं न भवति, यदाहुः—

[3]'उच्चालियंमि पाए इरियासमियस्स संकमट्ठाए । वावज्जेज्ज कुलिंगी मरिज्ज तं जोगमासज्ज ॥१॥

---

[1] १ 'पुरतः' अग्रतो 'युगमात्रया' शरीर प्रमाणया शकटोद्धिसंस्थितया दृष्ट्येति वाक्यशेषः, 'प्रेक्षमाणः' प्रकर्षेण पश्यन् 'महिं' भुवं 'चरेत्' यायात् । .... 'वर्जयन्' परिहरन् 'बीज-हरितानि' इत्यनेनानेकभेदस्य वनस्पतेः परिहारमाह । तथा 'प्राणिनो' द्वीन्द्रियादीन् तथा 'उदकम्' अप्कायं 'मृत्तिकां च' पृथिवीकायम्, च शब्दात् तेजो-वायुपरिग्रहः । ... उक्तः संयमविराधना परिहारः, अधुना तु आत्म-संयमविराधना परिहारमाह- ओवायमिति सूत्रम् । व्याख्या-'अवपातं' गर्तादिरूपं 'विषमं' निम्नोन्नतं 'स्थाणुम्' ऊर्ध्वकाष्ठं 'विजलं' विगतजलं कर्दमं 'परिवर्जयेत्' एतत् सर्वं परिहरेत तथा 'संक्रमेण' जल-गर्तापरिहाराय पाषाण-काष्ठरचितेन न गच्छेत् आत्मसंयम विराधना संभवात्। अपवादमाह-विद्यमाने पराक्रमे अन्यमार्गे इत्यर्थः। असति तु तस्मिन् प्रयोजनमाश्रित्य यतनया गच्छेदिति सूत्रार्थः।" इति तत्रैव हारिभद्रीवृत्तिः ॥ २ पुरक्कमे-सं ॥ ३ तुलना—तत्त्वार्थराज० ७ / १३। "उच्चालिते उत्पाटिते पादे सति ईर्यासमितस्य साधोः संक्रमार्थमुत्पाटिते पादे इत्यत्र सम्बन्धः। व्यापद्येत संघट्टन-परितापनैः कः ? कुलिङ्गी द्वीन्द्रियादिः, सपरितापद्येत उत्पाटिते पादे सति, म्रियते चासौ कुलिङ्गी तं व्यापादनयोगमासाद्य प्राप्य। न च तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि देशितः समये सिद्धान्ते। किं कारणम् ? यतोऽनवद्योऽसौ साधुस्तेन व्यापादनप्रयोगेण व्यापादनव्यापारेण कथम् ? सर्वभावेन सर्वात्मना मनोवाक्कायकर्मभिरनवद्योऽसौ यस्मात् तस्मान्न सूक्ष्मापि बन्धस्तस्येति।" इति ओघनिर्युक्तिवृत्तिः पृ. २१६॥

न हु तस्स तन्निमित्तो बंधो सुहुमोऽवि देसिओ समए । अणवज्जो उ पओगेण सव्वभावेण सो जम्हा ॥२॥" [ओघनिर्युक्तिः ७४८-७४९] तथा–

△ "जियदु व मरदु व जीवो अजदाचारस्स निच्छओ हिंसा । पयदस्स नत्थि बंधो हिंसामित्तेण समिदस्स ॥१॥ [प्रवचनसारः ३१७]

तथा [1]वाक्यशुद्ध्यध्ययनप्रतिपादितां सावद्यां भाषां धूर्त-कामुक-क्रव्याद-चौर-चार्वाकादिभाषितानि च निर्दम्भतया वर्जयतः सर्वजनीनं स्वल्पसन्दिग्धं च यद्भाषणं सा भाषासमितिः ।

तथा गवेषण-ग्रहणग्रासैषणादोषैरदूषितस्याशनपानादेः रजोहरण-मुखवस्त्रिकाद्यौधिकोपधेः शय्या-पीठफलक-चर्मदण्डाद्यौपग्रहिकोपधेश्च विशुद्धस्य यद् ग्रहणं सा एषणासमितिः । तथा आसन-संस्तारक-पीठफलक-वस्त्र-पात्र-दण्डादिकं चक्षुषा निरीक्ष्य प्रतिलिख्य च सम्यगुपयोगपूर्वं रजोहरणादिना यद् गृह्णीयाद् यच्च निरीक्षितप्रतिलेखितभूमौ निक्षिपेत् सा आदाननिक्षेपसमितिः । अनुपयुक्तस्य तु प्रतिलेखनापूर्वमप्यादाने निक्षेपे च न शुद्धा समितिः, यदवाचि–

卐 "पडिलेहणं कुर्वदु मिहो कहं कुणइ जणवयकहं वा । देइ व पच्चक्खाणं वाएइ सयं पडिच्छइ वा ॥१॥

△जीवतु वा म्रियतां वा जीवः अयताचारस्य निश्चयतो हिंसा । प्रयतस्य नास्ति बन्धः हिंसामात्रेण समितस्य ॥१॥

१ दशवैकालिकसूत्रस्य सप्तममध्ययनम् । तुलना—योगशास्त्रवृत्तिः १/३७ ॥

卐 प्रतिलेखनां कुर्वाणो मिथः कथां करोति जनपदकथां वा । ददाति वा प्रत्याख्यानं वाचयति स्वयं प्रतीच्छति वा ॥१॥

* पृढवी आउकाए वाऊ तेऊ वणस्सइ तसाणं । पडिलेहणापमत्तो छण्हंपि विराहओ भणिओ ॥२॥" [ओघनि-२७३-४]

तथा पुरीष-प्रश्रवण-निष्ठिवन-श्लेष्म-शरीरमला-ऽनुपकारिविसनाशपानादीनां यज्जन्तुजातरहिते स्थण्डिले उपयोगपूर्वकं परित्यजनं सा परिष्ठापनासमितिः ॥५७१॥

इदानीं भावनाः प्रतिपादयति-

पढममणिच्चे १ असरण २ संसारो ३ एगया य ४ अन्नत्तं ५ ।
असुइत्तं ६ आसव ७ संवरो ८ य तह निज्जरा ९ नवमी ॥५७२॥
लोगसहावो १० बोहि य दुलहा ११ धम्मस्स साहओ अरहा १२ ।
एयाउ हुंति बारस जहक्कमं भावणीयाओ ॥५७३॥

'पढममणिच्चे'त्यादिगाथाद्वयम्, तत्र प्रथममनित्यभावना १, द्वितीया अशरणभावना २, तृतीया संसारभावना ३, चतुर्थी एकत्वभावना ४, पञ्चमी अन्यत्वभावना ५, षष्ठी अशुचित्वभावना ६, सप्तमी आश्रवभावना ७, अष्टमी संवरभावना ८, तथा नवमी निर्जराभावना ९, दशमी लोकस्वभाव-भावना १०, एकादशी बोधिदुर्लभत्वभावना ११, द्वादशी धर्मकथकोऽर्हतिति १२ । एतास्तु भावना द्वादश भवन्ति यथाक्रमं-भणितक्रमेण भावनीया-अहर्निशमभ्यसनीया इति ॥ एतासां च स्वरूपं किञ्चिन्निरूपयामः ।

* पृथ्व्य-प्काय-वायुतेजो-वनस्पति-त्रसानां षण्णामपि प्रतिलेखनाप्रमत्तो विराधको भणितः ॥२॥ १ अण्णत्तं-ता. ॥

तत्रैवमनित्यभावना—

ग्रस्यन्ते वज्रसाराङ्गास्तेऽप्यनित्यत्वरक्षसा । किं पुनः कदलीगर्भनिःसारानिह देहिनः ? ॥१॥
विषयसुखं दुग्धमिव स्वादयति जनो विडाल इव मुदितः । नोत्पाटितलकुटमिवोत्पश्यति यममहह किं कुर्मः ? ॥२॥
धराधरधुनीनीरपूरपारिप्लवं वपुः । जन्तूनां जीवितं वातधूतध्वजपटोपमम् ॥३॥
लावण्यं ललनालोकलोचनाञ्चलचञ्चलम् । यौवनं मत्तमातङ्गकर्णतालचलाचलम् ॥४॥
स्वाम्यं स्वप्नावलीसाम्यं चपलाचपलाः श्रियः । प्रेम द्वि-त्रिक्षणस्थेम, स्थिरत्वविमुखं सुखम् ॥५॥
सर्वेषामपि भावनां, भावयन्नित्यनित्यताम् । प्राणप्रियेऽपि पुत्रादौ, विपन्नेऽपि न शोचति ॥६॥
सर्ववस्तुषु नित्यत्वग्रहग्रस्तस्तु मूढधीः । जीर्णतार्णकुटीरेऽपि, भग्ने रोदित्यहर्निशम् ॥७॥
ततस्तृष्णाविनाशेन, निर्ममत्वविधायिनीम् । शुद्धधीर्भावयेन्नित्यमित्यनित्यत्वभावनाम् ॥८॥ ? ।

अथाशरणभावना—

पितुर्मातुर्भ्रातुस्तनय-दयितादेश्च पुरतः, प्रभूताऽऽधि-व्याधिव्रजनिगडिताः कर्मचरटैः ।
रटन्तः क्षिप्यन्ते यममुखगुहान्तस्तनुभृतो, हहा कष्टं लोकः शरणरहितः स्थास्यति कथम् ? ॥१॥
ये जानन्ति विचित्रशास्त्रविसरं ये मन्त्र-तन्त्रक्रियाप्रावीण्यं ग्रथयन्ति ये च दधति ज्योतिःकला कौशलम् ।
तेऽपि प्रेतपतेरमुष्य सकलत्रैलोक्यविध्वंसनव्यग्रस्य प्रतिकारकर्मणि न हि प्रागल्भ्यमाबिभ्रति ॥२॥
नानाशस्त्रपरिश्रमोद्भटभटैरावेष्टिताः सर्वतो, गत्युद्दाममदान्धसिन्धुरशतैः केनाप्यगम्याः क्वचित् ।
शक्र-श्रीपति-चक्रिणोऽपि सहसा कीनाशदासैर्बलादाकृष्टा यमवेश्म यान्ति हहहा निस्त्राणता प्राणिनाम् ॥३॥

उद्दंडं ननु दण्डसात्सुरगिरिं पृथ्वीं पृथुच्छत्रसात्, ये कर्तुं प्रभविष्णवः कृशमपि क्लेशं विनैवात्मनः ।
निःसामान्यबलप्रपञ्चचतुरास्तीर्थंकरास्तेऽप्यहो, नैवाशेषजनौघघस्मरमपाकर्तुं कृतान्तं क्षमाः ॥४॥
कलत्र-मित्र-पुत्रादिस्नेहग्रहनिवृत्तये । इति शुद्धमतिः कुर्यादशरण्यत्वभावनाम् ॥ ५ ॥ २ ।

अथ **संसारभावना**-

सुमतिरमतिः श्रीमानश्रीः सुखी सुखवर्जितः, सुतनुरतनुः स्वाम्यस्वामी प्रियः स्फुटमप्रियः ।
नृपतिरनृपः स्वर्गी तिर्यङ् नरोऽपि च नारकस्तदिति बहुधा नृत्यत्यस्मिन् भवी भवनाटके ॥१॥
बद्ध्वा पापमनेककल्मषमहारम्भादिभिः कारणैर्गत्वा नारकभूमिषूद्भटतमःसङ्घट्टनष्टाध्वसु ।
अङ्गच्छेदन-भेदन प्रदहन-क्लेशादिदुःखं महज्जीवो यल्लभते तदत्र गदितुं ब्रह्मापि जिह्माननः ॥२॥
मायाचर्यादिनिबन्धनैर्बहुविधैः प्राप्तस्तिरश्चां गतिं सिंह-व्याघ्र-मतङ्गजैण-वृषभ-च्छागादिरूपस्पृशाम् ।
क्षुत्तृष्णा-वध-बन्ध-ताडन-रुजावाहादिदुःखं सदा, यज्जीवः सहते न तत्कथयितुं केनाप्यहो शक्यते ॥ ३॥
खाद्या-ऽखाद्यविवेकशून्यमनसो निर्हीकताऽऽलिङ्गिताः, सेव्या-सेव्यविधौ समीकृतधियो निःशूकतावल्लभाः ।
तत्रानार्यनरा निरन्तरमहारम्भादिभिर्दुस्सहं क्लेशं सङ्कलयन्ति कर्म च महादुःखप्रदं [1]चिन्वते ॥४॥
मर्त्याः क्षत्रिय वाडवप्रभृतयो येऽप्यार्यदेशोद्भवास्तेऽप्यज्ञान-दरिद्रता-व्यसनिता-दौर्भाग्य-रोगादिभिः ।
अन्यप्रेषण-मानभञ्जन-जनावज्ञादिभिश्चानिशं दुःखं तद्विषहन्ति यत्कथयितुं शक्यं न कल्पैरपि ॥ ५ ॥
रम्भागर्भसमः सुखी शिखिशिखावर्णाभिरुच्चैरयःसूचीभिः प्रतिरोमभेदितवपुस्तारुण्यपुण्यः पुमान् ।

१ विन्वते — सं ॥

यद् दुःखं लभते तदष्टगुणितं स्त्रीकुक्षिमध्यस्थितौ, सम्पद्येत तदप्यनन्तगुणितं जन्मक्षणे प्राणिनाम् ॥६॥

बाल्ये मूत्र-पुरीष-धूलिलुठना-ऽज्ञानादिभिर्निन्दिता, तारुण्ये विभवार्जनेष्टविरहा-ऽनिष्टागमादिर्व्यथा ।
वृद्धत्वे तनुकम्पदृष्ट्यपटुता श्वासाद्यसुस्थात्मता, तत्का नाम दशाऽस्ति सा सुखमिह प्राप्नोति यस्यां जनः १ ॥७॥

सम्यग्दर्शनपालनादिभिरथ प्राप्ते भवे त्रैदशे, जीवाः शोक-विषाद-मत्सर-भय-स्वल्पर्धिकत्वादिभिः ।
ईर्ष्या-काम-मद-क्षुधाप्रभृतिभिश्चात्यन्तपीडादिताः, क्लेशेन क्षपयन्ति [1]दीनमनसो दीर्घं निजं जीवितम् ॥८॥

इत्थं शिवफलाधायिभववैराग्यवीरुधः । [2]सुधावृष्टिं सुधीः कुर्यादेनां संसारभावनाम् ॥ ६ ॥ ३ ।

अथैकत्वभावना–

उत्पद्यते जन्तुरिहैक एव, विपद्यते चैकक एव दुःखी ।
कर्मार्जयत्येककः एव चित्रमासेवते तत्फलमेक एव ॥ १ ॥

यज्जीवेन धनं स्वयं बहुविधैः कष्टैरिहोपार्ज्यते, तत्सम्भूय कलत्र-मित्र-तनय-भ्रात्रादिभिर्भुज्यते ।
तत्कर्मवशाच्च नारक-नर-स्वर्वासि-तिर्यग्भवेष्वेकः सैष सुदुःसहानि सहते दुःखान्यसंख्यान्यहो ॥ २ ॥

जीवो यस्य कृते भ्रमत्यनुदिशं दैन्यं समालम्बते, धर्माद् भ्रश्यति वञ्चयत्यतिहितान् न्यायादपक्रामति ।
देहः सोऽपि सहात्मना न पदमप्येकं परस्मिन् भवे, गच्छत्यस्य ततः कथं वदत भोः साहाय्यमाधास्यति ? ॥३॥

स्वार्थैकनिष्ठं स्वजन-स्वदेहमुख्यं ततः सर्वमवेत्य सम्यग् ।
सर्वत्र कल्याणनिमित्तमेकं धर्मं सहायं विदधीत धीमान् ॥४॥४ ।

१ दीनमनास-सं. ॥ २ सुधादृष्टिं-सं ॥

अथान्यत्वभावना-

जीवः कायमपि व्यपास्य यदहो लोकान्तरं याति तद्भिन्नोऽसौ वपुषोऽपि कैव हि कथा द्रव्यादि-वस्तुव्रजे ? । तस्माल्लिम्पति यस्तनुं मलयजैर्यो हन्ति दण्डादिभिर्यः पुष्णाति [1]धनादि यश्च हरते तत्रापि साम्यं श्रयेत् ॥ १ ॥

अन्यत्वभावनामेवं यः करोति महामतिः । तस्य सर्वस्वनाशेऽपि, न शोकांशोऽपि जायते ॥२॥ ५।

अथाशुचित्वभावना-

लवणाकरे पदार्थाः पतिता लवणं यथा भवन्तीह । काये तथा मलाः स्युस्तदसावशुचिः सदा कायः ॥१॥

कायः शोणित-शुक्रमीलनभवो गर्भे जरावेष्टितो, मात्रास्वादितखाद्य-पेयरसकैर्वृद्धिं क्रमात्प्रापितः । विलद्धातुसमाकुलः कृमिरुजागण्डूपदाद्यास्पदं कैर्मन्येत सुबुद्धिभिः शुचितया सर्वैर्मलैः कश्मलः ? ॥२॥

सुस्वादं शुभगन्धिमोदक-दधि क्षीरेक्षु-शाल्योदन द्राक्षा-पर्पटिकामृताघृतपूर-स्वर्गच्युता-ऽऽम्रादिकम् । भुक्तं यत्सहसैव यत्र मलतात्सम्पद्यते सर्वतस्तं कायं सकलाशुचिं शुचिमहो मोहान्धिता मन्वते ॥३॥

अम्भःकुम्भशतैर्वपुर्ननु बहिर्मुग्धाः शुचित्वं कियत्कालं लम्भयथोत्तमं परिमलं कस्तूरिकाद्यैस्तथा । विष्ठाकोष्ठकमेतदङ्गकमहो मध्ये [2]तु शौचं कथङ्कारं नेष्यथ सूत्रयिष्यथ कथङ्कारं च तत्सौरभम् ? ॥ ४ ॥

दिव्यामोदसमृद्धिवासितदिशः श्रीखण्ड-कस्तूरिका-कर्पूरा-ऽगुरु-कुङ्कुमप्रभृतयो भावा यदाश्लेषतः । दौर्गन्ध्यं दधति क्षणेन मलतां चाबिभ्रते सोऽप्यहो, देहः कैश्चन मन्यते शुचितया वैधेयतां पश्यत ॥५॥

१ धनादयश्च-सं. ॥ २ च-सं. ॥

इत्यशौचं शरीरस्य, विभाव्य परमार्थतः । सुमतिर्ममतां तत्र, न कुर्वीत कदाचन ॥ ६ ॥ ६ ।

अथाऽऽस्रवभावना–

मनो-वचो-वपुर्योगः, कर्म येनाशुभं शुभम् । भवितामास्रवन्त्येते, प्रोक्तास्तेनास्रवा जिनैः ॥ १ ॥
मैत्र्या सर्वेषु सत्त्वेषु, प्रमोदेन गुणाधिके । माध्यस्थ्येनाविनीतेषु, कृपया दुःखितेषु च ॥ २ ॥
सततं वासितं स्वान्तं, कस्यचित्पुण्यशालिनः । वितनोति शुभं कर्म, द्विचत्वारिंशदात्मकम् ॥ ३ ॥
रौद्रा-ऽऽर्त्तध्यान-मिथ्यात्व-कषाय-विषयैर्मनः । आक्रान्तमशुभं कर्म, विदधाति द्व्यशीतिधा ॥ ४ ॥
सर्वज्ञ-गुरु-सिद्धान्त-सङ्घसद्गुणवर्णकम् । ऋतं हितं च वचनं, कर्म सञ्चिनुते शुभम् ॥ ५ ॥
श्रीसङ्घ-गुरु-सर्वज्ञ धर्म-धार्मिकदूषकम् । उन्मार्गदेशि वचनमशुभं कर्म पुष्यति ॥ ६ ॥
देवार्चन-गुरुपास्ति-साधुविश्रामणादिकम् । वितन्वती सुगुप्ता च, तनुर्वितनुते शुभम् ॥ ७ ॥
मांसाशन-सुरापान-जन्तुघातन-चौरिकाः । पारदार्यादि कुर्वाणमशुभं कुरुते वपुः ॥ ८ ॥
एनामाश्रवभावनामविरतं यो भावयेद्भावतस्तस्यानर्थपरम्परैकजनकाद् दुष्टाश्रवौघात् मनः ।
व्यावृत्त्याखिलदुःखदावजलदे निःशेषशर्मावलीनिर्माण[1]प्रवणे शुभाश्रवगणे नित्यं रतिं पुष्यति ॥ ९ ॥ ७ ।

अथ संवरभावना–

आश्रवाणां निरोधो यः, संवरः स प्रकीर्तितः । सर्वतो देशतश्चेति, द्विधा स तु विभज्यते ॥ १ ॥
अयोगिकेवलिष्वेव, सर्वतः संवरो मतः । देशतः पुनरेक-द्विप्रभृत्याश्रवरोधिषु ॥ २ ॥

१ ०श्रवणे-स. ।।

प्रत्येकमपि स द्वेधा, द्रव्य-भावविभेदतः । यत्कर्मपुद्गलादानमात्मन्याश्रवतो भवेत् ॥ ३ ॥
एतस्य सर्व-देशाभ्यां, छेदनं द्रव्यसंवरः । भवहेतुक्रियायास्तु, त्यागोऽसौ भावसंवरः ॥ ४ ॥ युग्मम् ।
मिथ्यात्व-कषायादीनामाश्रवाणां मनीषिभिः । निरोधाय प्रयोक्तव्या, उपायाः प्रतिपन्थिनः ॥ ५ ॥
यथा-मिथ्यात्वमार्त्त-रौद्राख्यकुध्याने च सुधीर्जयेत् । दर्शनेनाकलङ्केन, शुभध्यानेन च क्रमात् ॥६॥
क्षान्त्या क्रोधं मृदुत्वेन, मानं मायामृजुत्वतः । सन्तोषेण तथा लोभं, निरुन्धीत महामतिः ॥ ७ ॥
शब्दादिविषयानिष्टानिष्टेष्वपि विमोहतः । राग-द्वेषप्रहाणेन, निराकुर्वीत कोविदः ॥ ८ ॥
य एतद्भावनासङ्गी, सौभाग्यं भजते नरः । एति स्वर्गा-ऽपवर्गश्रीरवश्यं तस्य वश्यताम् ॥९॥ ८ ।

अथ **निर्जराभावना**-

संसारहेतुभूताया, यः क्षयः कर्मसन्तते । निर्जरा सा पुनर्द्वेधा, सकामा-ऽकामभेदतः ॥ १ ॥
श्रमणेषु सकामा स्यादकामा शेषजन्तुषु । पाकः स्वत उपायाच्च, कर्मणां स्याद् यथाऽऽम्रवत् ॥ २ ॥
कर्मणां नः क्षयो भूयादित्याशयवतां सताम् । वितन्वतां तपस्यादि, सकामा शमिनां मता ॥ ३ ॥
एकेन्द्रियादिजन्तूनां, सज्ज्ञानरहितात्मनाम् । शीतोष्णवृष्टि दहन-च्छेद-भेदादिभिः सदा ॥ ४ ॥
कष्टं वेदयमानानां, यः शाटः कर्मणां भवेत् । अकामनिर्जरामेनामामनन्ति मनीषिणः ॥ ५ ॥[1] युग्मम् ।
तपःप्रभृतिभिर्द्धि, व्रजन्ती निर्जरा यतः । ममत्वं कर्म संसारं, हन्यात्तां भावयंस्ततः ॥ ६ ॥ ९ ।

अथ **लोकस्वभावभावना**-

[2]वैशाखस्थानस्थितकटिस्थकरयुगनराकृतिर्लोकः । भवति द्रव्यैः पूर्णः, स्थित्युत्पत्ति-व्ययाक्रान्तैः ॥ १ ॥

१ युग्मम्-सं. नास्ति ॥ २ इमाः ५६ गाथाः धर्मसंग्रहटीकायाम् [भा. २ / पृ. १३१ B तः] उद्धृताः सन्ति ॥

ऊर्द्ध्व-तिर्यगधोभेदैः, स त्रेधा जगदे जिनैः । रुचकादष्टप्रदेशान्मेरुमध्यव्यवस्थितात् ॥ २ ॥
नवयोजनशत्यूर्द्ध्वमधोभागेऽपि सा तथा । एतत्प्रमाणकस्तिर्यग्लोकश्चित्रपदार्थभृत् ॥ ३ ॥
ऊर्द्ध्वलोकस्तदुपरि, सप्तरज्जुप्रमाणकः । एतत्प्रमाणसंयुक्तश्चाधोलोकोऽपि कीर्तितः ॥ ४ ॥
रत्नप्रभाप्रभृतयः, पृथिव्यः सप्त वेष्टिताः । घनोदधि-घनवात-तनुवातैस्तमोघनाः ॥ ५ ॥
तृष्णा-क्षुधा-वधा-ऽऽघात-भेदन-च्छेदनादिभिः । दुःखानि नारकास्तत्र, वेदयन्ते निरन्तरम् ॥६॥
प्रथमा पृथिवी पिण्डे योजनानां सहस्रकाः । अशीतिर्लक्षमेकं च, तत्रोपरि सहस्रकम् ॥ ७ ॥
अधश्च मुक्त्वा पिण्डस्य, शेषस्याभ्यन्तरे पुनः । भवनाधिपदेवानां, भवनानि जगुर्जिनाः ॥८॥ युग्मम् ।
असुरा नागास्तडितः, सुपर्णा अग्नयोऽनिलाः । स्तनिताब्धिद्वीपदिशः, कुमारान्ता दशेति ते ॥ ९ ॥
व्यवस्थिताः पुनः सर्वे, दक्षिणोत्तरयोर्दिशोः । तत्रासुराणां चमरो, दक्षिणावासिनां विभुः ॥१०॥
उदीच्यानां बलिर्नागकुमारादेर्यथाक्रमम् । धरणो भूतानन्दश्च, हरिर्हरिसहस्तथा ॥ ११ ॥
वेणुदेवो वेणुदाली, चाग्निशिखाऽग्निमाणवौ । वेलम्बः प्रभञ्जनश्च, सुघोष-महाघोषकौ ॥ १२ ॥
जलकान्तो जलप्रभस्ततः पूर्णो वशिष्टकः । अमितो मितवाहनः, इन्द्रा ज्ञेया द्वयोर्दिशोः ॥ १३ ॥
अस्या एव पृथिव्या उपरितने मुक्तयोजनसहस्रे । योजनशतमध उपरि च मुक्त्वाऽष्टसु योजनशतेषु ॥१४॥
पिशाचाद्यष्टभेदानां, व्यन्तराणां तरस्विनाम् । नगराणि भवन्त्यत्र, दक्षिणोत्तरयोर्दिशोः ॥ १५ ॥
पिशाचा भूता यक्षाश्च, राक्षसाः किन्नरास्तथा । किम्पुरुषा महोरगा, गन्धर्वा इति तेऽष्टधा ॥ १६ ॥
दक्षिणोत्तरभागेन, तेषामपि च तद्युषाम् । द्वौ द्वाविन्द्रौ समाम्नातौ, यथासंख्यं सुबुद्धिभिः ॥१७॥

कालस्ततो महाकालः, [1]सुरूपः प्रतिरूपकः । पूर्णभद्रो माणिभद्रो, भीमो भीमो महादिकः ॥ १८॥
किन्नर-किम्पुरुषौ सत्पुरुष-महापुरुषनामकौ तदनु। अतिकाय-महाकायौ गीतरतिश्चैव गीतयशाः ॥१९॥
अस्या एव पृथिव्या उपरि च योजनशतं हि यन्मुक्तम्। तन्मध्यादध उपरि च योजनदशकं परित्यज्य ॥२०॥
मध्येऽशीताविह योजनेषु तिष्ठन्ति वनचरनिकायाः । अग्रज्ञप्तिकमुख्या अष्टावल्पर्धिकाः किञ्चित् ॥२१॥
अत्र प्रतिनिकायं च, द्वौ द्वाविन्द्रौ महाद्युती । दक्षिणोत्तरभागेन, विज्ञातव्यौ मनीषिभिः ॥ २२ ॥
योजनलक्षोन्नतिना स्थितेन मध्ये सुवर्णमयवपुषा । मेरुगिरिणा विशिष्टे जम्बूद्वीपे भवन्त्यत्र ॥२३॥
वर्षाणि भारतादीनि, सप्त वर्षधरास्तथा । पर्वता हिमवन्मुख्याः, षट् शाश्वतजिनालयाः ॥ २४ ॥
योजनलक्षप्रमिताजम्बूद्वीपात्परो द्विगुणमानः । लवणसमुद्रः परतस्तद्द्विगुणद्विगुणविस्ताराः ॥२५॥
बोद्धव्या धातकीखण्ड-कालोदाद्या असंख्यकाः। स्वयम्भूरमणान्ताश्च,द्वीपवारिधयः क्रमात् ॥२६॥ युग्मम्।
प्रत्येकरससम्पूर्णाश्चत्वारस्तोयराशयः । त्रयो जलरसा अन्ये, सर्वेऽपीक्षुरसाः स्मृताः ॥ २७ ॥
सुजातपरमद्रव्यहृद्यमद्यसमोदकः । वारुणीवरवार्धिः स्यात् , क्षीरोदजलधिः पुनः ॥ २८ ॥
सम्यक्क्वथितखण्डादिमुग्धदुग्धसमोदकः । घृतवरः सुतापितनव्यगव्यघृतोदकः ॥ २९ ॥
लवणाब्धिस्तु लवणास्वादपानीयपूरितः । कालोदः पुष्करवरः, स्वयम्भूरमणस्तथा ॥ ३० ॥
मेघोदकरसाः किन्तु, कालोदजलधेर्जलम् । कालं गुरुपरिणामं पुष्करोदजलं पुनः ॥ ३१ ॥
हितं लघुपरिणामं स्वच्छस्फटिकनिर्मलम् । स्वयम्भूरमणस्यापि, जलधेर्जलमीदृशम् ॥ ३२ ॥

१ 'सुरुपप्रतिरूपकः'–इति धर्मसङ्ग्रहटीकायाम् (भा. २। पृ. १३४ A) पाठः ॥

त्रिभागावर्तसुचतुर्जातकेक्षुरसोपमम् । शेषासङ्ख्यसमुद्राणां, नीरं निगदितं जिनैः ॥ ३३ ॥
समभूमितलादूर्ध्वं, योजने शतसप्तके । गते नवतिसंयुक्ते, ज्योतिषां स्यादधः[1]स्तलः ॥ ३४ ॥
तस्योपरि च दशसु, योजनेषु दिवाकरः । तदुपर्यशीतिसङ्ख्ययोजनेषु निशाकरः ॥ ३५ ॥
तस्योपरि च विंशत्यां, योजनेषु ग्रहादयः । स्यादेवं योजनशतं, ज्योतिर्लोको दशोत्तरम् ॥ ३६ ॥
जम्बूद्वीपे भ्रमन्तौ च, द्वौ चन्द्रौ द्वौ च भास्करौ । चत्वारो लवणाम्भोधौ, चन्द्राः सूर्याश्च कीर्तिताः ॥३७॥
धातकीखण्डके चन्द्राः, सूर्याश्च द्वादशैव हि । कालोदे द्विचत्वारिंशच्चन्द्राः सूर्याश्च कीर्तिताः ॥३८॥
पुष्करार्धे द्विसप्ततिश्चन्द्राः सूर्याश्च मानुषे । क्षेत्रे द्वात्रिंशमिन्दूनां सूर्याणां च शतं भवेत् ॥ ३९ ॥
मानुषोत्तरतः पञ्चाशद्योजनसहस्रकैः । [2]चन्द्रैरन्तरिताः सूर्याः, सूर्यैरन्तरिताश्च ते ॥ ४० ॥
मानुषक्षेत्रचन्द्रार्कप्रमाणार्धप्रमाणकाः । तत्क्षेत्रपरिधेर्[3]द्वृद्धया, [4]वृद्धिमन्तश्च सङ्ख्यया ॥ ४१ ॥
स्वयम्भूरमणं व्याप्य, घण्टाकारा असंख्यकाः । शुभलेश्या मन्दलेश्यास्तिष्ठन्ति सततं स्थिराः ॥४२॥
समभूमितलादूर्ध्वं, सार्धरज्जौ व्यवस्थितौ । कल्पावनल्पसम्पत्ती, सौधर्मेशाननामकौ ॥ ४३ ॥
सार्धरज्जुद्वये स्यातां, समानौ दक्षिणोत्तरौ । सनत्कुमार-माहेन्द्रौ, देवलोकौ मनोहरौ ॥ ४४ ॥
ऊर्ध्वलोकस्य मध्ये च, ब्रह्मलोकः प्रकीर्तितः । तदूर्ध्वं लान्तकः कल्पो, महाशुक्रस्ततः परम् ॥४५॥
देवलोकः सहस्रारोऽथाष्टमो रज्जुपञ्चके । एकेन्द्रौ चन्द्रवद् वृत्तावानत-प्राणतौ ततः ॥ ४६ ॥

१ स्तलम्–इति धर्मसं. टीकायां पाठः ॥ २ सूर्यैरन्तरिताश्चन्द्राश्चन्द्रैरन्तरिताश्च ते'– इति धर्मसङ्ग्रहटीकायां पाठः ॥
३ °चन्द्रार्के—सं. ॥ ४ 'वृद्धिमन्तः स्वसंख्यया'—इति धर्मसं. टीकायां पाठः ॥

रज्जुषट्के ततः स्यातामेकेन्द्रावारणा-ऽच्युतौ । चन्द्रवद्वर्तुलावेवं, कल्पा द्वादश कीर्तिताः ॥ ४७ ॥
ग्रैवेयकास्त्रयोऽधस्त्यास्त्रयो मध्यमकास्तथा । त्रयश्चोपरितनाः स्युरिति ग्रैवेयका नव ॥ ४८ ॥
अनुत्तरविमानानि, तदूर्द्ध्वं पञ्च तत्र च । प्राच्यां विजयमपाच्यां वैजयन्तं प्रचक्षते ॥ ४९ ॥
प्रतीच्यां तु जयन्ताख्यमुदीच्यामपराजितम् । सर्वार्थसिद्धं तन्मध्ये, सर्वोत्तममुदीरितम् ॥ ५० ॥
स्थिति-प्रभाव-लेश्याभिर्विशुद्ध्यवधिदीप्तिभीः । सुखादिभिश्च सौधर्माद्यावत्सर्वार्थसिद्धिकम् ॥ ५१ ॥
पूर्वपूर्वत्रिदशेभ्यस्तेऽधिका उत्तरोत्तरे । हीन-हीनतरा देह-गति-गर्व-परिग्रहैः ॥ ५२ ॥
घनोदधिप्रतिष्ठाना, विमानाः कल्पयोर्द्वयोः । त्रिषु वायुप्रतिष्ठानास्त्रिषु वायूदधिस्थिताः ॥ ५३ ॥
ते व्योमविहितस्थानाः, सर्वेऽप्युपरिवर्तिनः । इत्यूर्द्ध्वलोकविमानप्रतिष्ठानविधिः स्मृतः ॥ ५४ ॥
सर्वार्थद्विसाद् द्वादशयोजनेषु हिमोज्ज्वला । योजनपञ्चचत्वारिंशल्लक्षायामविस्तरा ॥ ५५ ॥
मध्येऽष्टयोजनपिण्डा, शुद्धस्फटिक[1]निर्मला । सिद्धशिलेषत्प्राग्भारा, प्रसिद्धा जिनशासने ॥ ५६ ॥
तस्या उपरि गव्यूतत्रितयेऽतिगते सति । तुर्यगव्यूतषड्भागे, स्थिताः सिद्धा निरामयाः ॥ ५७ ॥
अनन्तसुख-विज्ञान-वीर्य सद्दर्शनाः सदा । लोकान्तस्पर्शिनोऽन्योऽन्यावगाढाः शाश्वताश्च ते ॥ ५८ ॥
[2]एवं भव्यजनस्य लोकविषयामभ्यस्यतो भावनाम् , संसारैकनिबन्धने न विषयग्रामे मनो धावति ।
किन्त्वन्यान्यपदार्थभावनसमुन्मीलत्प्रबोधोद्धुरम् , धर्मध्यानविधाविह स्थिरतरं तज्जायते संततम् ॥५९॥१०।

१ निर्मिताः-जे. ॥ २ एतां-मु. । धर्मसंग्रहटीकायामपि [भा. २/पृ. १३५ A] एवं-इति पाठः ॥

अथ बोधिदुर्लभत्वभावना-

पृथ्वी-नीर-हुताश-वायु-तरुषु क्लिष्टैर्निजैः कर्मभिर्भ्राम्यन् भीमभवे ऽत्र पुद्गलपरावर्तानन्तानहो ।
जीवः काममकामनिर्जरतया सम्प्राप्य पुण्यं शुभम् , प्राप्नोति त्रसरूपतां कथमपि द्वि-त्रीन्द्रियाद्यामिह ॥१॥
आर्यक्षेत्र-सुजाति-सत्कुलवपुर्नीरोगतासम्पदो, राज्यं प्राज्यसुखं च कर्मलघुताहेतोरवाप्नोत्ययम् ।
तत्त्वातत्त्वविवेचनैककुशलां बोधिं न तु प्राप्तवान् , कुत्राप्यक्षयमोक्षसौख्यजननीं श्रीसर्वविद्देशिताम् ॥ २ ॥
बोधिर्लब्धः यदि भवेदेकदाऽप्यत्र जन्तुभिः । इयत्कालं न तेषां तद्भवे पर्यटनं भवेत् ॥ ३ ॥
द्रव्यचारित्रमप्येतैर्बहुशः समवाप्यत । सज्ज्ञानकारिणी क्वापि, न तु बोधिः कदाचन ॥ ४ ॥
येऽसिध्यन् ये च सिद्ध्यन्ति,ये सेत्स्यन्ति च केचन । ते सर्वे बोधिमाहात्म्यात्तस्माद्बोधिरुपास्यताम् ॥५॥११॥

अथ धर्मकथकोऽर्हन्निति भावना-

अर्हन्तः केवलालोकालोकितालोकलोककाः । यथार्थं धर्ममाख्यातुं पटिष्ठा न पुनः परे ॥ १ ॥
वीतरागा हि सर्वत्र, परार्थकरणोद्यताः । न कुत्राप्यनृतं ब्रूयुस्ततस्तद्धर्मसत्यता ॥ २ ॥
क्षान्त्यादिभेदैर्धर्मं च दशधा जगदुर्जिनाः । यं कुर्वन् विधिना जन्तुर्भवाब्धौ न निमज्जति ॥ ३ ॥
पूर्वा-ऽपरविरुद्धानि, हिंसादेः कारकाणि च । वचांसि चित्ररूपाणि, व्याकुर्वद्भिर्निजेच्छया ॥ ४ ॥
कुतीर्थिकैः प्रणीतस्य, सद्गतिप्रतिपन्थिनः । धर्मस्य सकलस्यापि, कथं स्वाख्यातता भवेत् ? ॥५॥
यच्च तत्समये क्वापि, दया-सत्यादिपोषणम् । दृश्यते तद्वचोमात्रं बुधैर्ज्ञेयं न तत्त्वतः ॥ ६ ॥

यत्प्रोद्दाममदान्धसिन्धुरघटं साम्राज्यमासाद्यते, यन्निःशेषजनप्रमोदजनकं सम्पद्यते वैभवम् ।
यत्पूर्णेन्दुसमद्युतिर्गुणगणः सम्प्राप्यते यत्परम्। सौभाग्यं च विजृम्भते तदखिलं धर्मस्य लीलायितम् ॥७॥
यच्च प्लावयति क्षितिं जलनिधिः कल्लोलमालाकुलो, यत्पृथ्वीमखिलां धिनोति सलिलासारेण धाराधरः ।
यच्चन्द्रोष्णरुची जगत्युदयतः सर्वान्धकारच्छिदे, तन्निःशेषमपि ध्रुवं विजयते धर्मस्य विस्फूर्जितम् ॥८॥
अबन्धूनां बन्धुः सुहृदसुहृदां सम्यगगदो, गदार्त्तिक्लान्तानां धनमधनभावार्तमनसाम् ।
अनाथानां नाथो गुणविरहितानां गुणनिधिः, जयत्येको धर्मः परमिह हितत्रातजनकः ॥ ९ ॥
अर्हता कथितो धर्मः, [1]सत्योऽयमिति भावयन्। सर्वसम्पत्करे धर्मे, धीमान् दृढतरो भवेत् ॥ १० ॥१२॥
एकामप्यमलामिमासु सततं यो भावयेद्भावनां भव्यः सोऽपि निहन्त्यशेषकलुषं दत्तासुखं देहिनाम् ।
यस्त्वभ्यस्तसमस्तजैनसमयस्तस्य द्वादशाप्यादरादभ्यस्येल्लभते स सौख्यमतुलं किं तत्र कौतूहलम् ? ॥१॥
॥५७२–५७३॥

अथ प्रतिमाः प्रतिपादयति—

[2]**मासाई सत्तंता ७ पढमा ८ बिइ ९ तइय [3]सत्तराइदिणा १० ।**
अहराइ ११ एगराई १२ भिक्खुपडिमाण बारसगं ॥ ५७४ ॥

---

१ पथ्योऽयमिति–कं. ॥ २ तुलना–दशाश्रुतस्कन्धसू. दशा ७, पृ. ४४ तः । धर्मसङ्ग्रहटीका भा. २/पृ. १३६ A तः ॥
३ सत्तरायदिणो–जे. । धर्मसंग्रहटीकायामपि [भा. २ /पृ. १३६] सत्तरायदिणो–इति पाठः ॥

पडिवज्जइ एयाओ संघयण-[1]धिईजुओ महासत्तो ।
पडिमाओ भावियप्पा सम्मं गुरुणा अणुन्नाओ ॥ ५७५ ॥
गच्छेचिय निम्माओ जा पुव्वा दस भवे असंपुण्णा ।
नवमस्स तइय वत्थुं होइ जहण्णो सुआभिगमो ॥ ५७६ ॥
वोसट्ठचत्तदेहो उवसग्गसहो जहेव जिणकप्पी ।
एसण अभिग्गहीया भत्तं च अलेवडं तस्स ॥ ५७७ ॥
गच्छा विणिक्खमित्ता पडिवज्जइ मासियं महापडिमं ।
[2]दत्तेगा भोयणस्सा पाणस्सवि [3]तत्थ एग भवे ॥ ५७८ ॥ [पञ्चाशक १८/३-७]
जत्थऽत्थमेइ सूरो न तओ ठाणा पयंपि [4]सचलइ ।
[5]नाएगराइवासी एगं च दुगं च अण्णाए ॥ ५७९ ॥
दुट्ठाण हत्थिमाईण नो भएणं पयंपि ओसरइ ।
[6]एमाइनियमसेवी विहरइ जाऽखण्डिओ मासो ॥ ५८० ॥

---

१ ०धिइजुओ-मु. ॥ २ दत्तेग भोयणस्सा व—वि. । भोयणस्स वि-पो. । दत्तेग भोयणस्स-इति पञ्चाशके [१८ । ७] पाठः । ३ एग जा मासं इति पञ्चाशकपाठः [१८/७] । एग जा मासा इति धर्मसंग्रहटीकायाम् (भाः २ । पृ. १३६ A) पाठः । ४ संचरइ इति पञ्चाशके १८ । ११ पाठः ॥ ५ ताएग० जे. ॥ ६ इयमाइ० जे.वि. पो. ॥

पच्छा गच्छमुवेई एव दुमासी तिमासि जा सत्त ।
नवरं दत्ती वड्ढइ जा सत्त उ सत्तमासीए ॥ ५८१ ॥
तत्तो य अट्ठमीया भवई इह पढम सत्तराइंदी ।
[1]तीइ चउत्थचउत्थेणऽपाणएणं अह विसेसो ॥ ५८२ ॥
उत्ताणगपासल्ली नेसज्जी वावि ठाण ठाइत्ता ।
[2]सहइ उस्सग्गे घोरे दिव्वाई तत्थ अविकपो ॥ ५८३ ॥
दोच्चावि [3]एरिसिचिय बहिया गामाइयाण नवरं तु ।
उक्कुड लगंडसाई दण्डायइउव्व ठाइत्ता ॥ ५८४ ॥
तच्चावि [4]एरिसिचिय नवरं [5]ठाणं तु तस्स गोदोही ।
वीरासणमहवावि [6]चिट्ठिज्जा अंबखुज्जो वा ॥ ५८५ ॥
एमेव अहोराई छट्ठं भत्तं अपाणगं नवरं ।
गाम नगराण बहिया वग्घारियपाणिए ठाणं ॥ ५८६ ॥
एमेव एगराई अट्ठमभत्तेण ठाण बाहिरओ ।
ईसीपब्भारगए अणिमिस[7]नयणेगदिट्ठीए ॥ ५८७ ॥

१ तीए—ता. वि. ॥ २ सहइ उस्सग्गे—मु. वि. ॥ ३. एरिसच्चिय—मु. वि. ॥ ४ एरिसच्चिय—मु. ॥ ५ ठाइत्तु तस्स—ता. ॥ ६ चीठाइज्जा अंबखुज्जो—जे. ॥ ७ °नयणेनदिट्ठीअ—ता. ॥

साहट्टु दोवि पाए वग्घारियपाणि ठायए ठाणं।
[1]वाघारियलंबियभुओ अंते य इमीइ लब्भित्ति ॥ ५८८ ॥

[2]**'मासाई सत्तंता'**गाहा, **'मासादयः'** मासप्रभृतयः **'सप्तान्ताः'** सप्तमासावसाना एकैकमास-वृद्ध्या सप्त प्रतिमा भवन्ति। तत्र मासः परिमाणमस्या मासिकी प्रथमा, एवं द्विमासिकी द्वितीया, त्रिमासिकी तृतीया, यावत् सप्तमासिकी सप्तमी। **'पढमा-बिइ-तइय-सत्तराइदिण'**त्ति सप्तानां प्रतिमाणामुपरि प्रथमा द्वितीया तृतीया च सप्त रात्रिदिनानि- [3]रात्रिन्दिवानि प्रमाणतो यस्यां सा तथा प्रतिमा भवति। तदभिलापश्चैवं-प्रथमा सप्तरात्रिन्दिवा, द्वितीया सप्तरात्रिन्दिवा, तृतीया सप्तरात्रिन्दिवा च. एताश्च तिस्रोऽपि क्रमेणाऽष्टमी नवमी दशमी चेति। **'अहराइ'**त्ति अहोरात्रं परिमाणमस्याः साऽहोरात्रिकी एकादशी प्रतिमा **'एगराइ'**त्ति एका रात्रिर्यस्यां सा एकरात्रिः, एकरात्रिरेवैकरात्रिकी द्वादशी प्रतिमा। इत्येवं **'भिक्षुप्रतिमाणां'** साधुप्रतिज्ञाविशेषाणां द्वादशकं [4]भवतीति॥ ५७४ ॥

अथ य एताः प्रतिपद्यते तमाह-**'पडिवज्जइ'** इत्यादिगाथात्रयम्, प्रतिपद्यते-अभ्युपगच्छत्येताः-अनन्तरोक्ताः प्रतिमाः, **संहनन-धृतियुतः'** तत्र संहननं-वज्रर्षभ[5]नाराचादित्रयादन्यतरत् एतद्युक्तो ह्यत्यन्तं परीषहसहनसमर्थो भवति। धृतिः-चित्तस्वास्थ्यम्, तद्युक्तश्च रत्यरतिभ्यां न बाध्यते। महा-

१ वाघारियलंबियभुओ-जे.॥ २ 'मासाई' त्यादि गाथापञ्चदशकं 'मासादयः'-मु.। तुलना-पञ्चाशकटीका पृ. २७८ तः॥ ३ रात्रिन्दिवानि-सं.॥ ४ संभवतीति-मु.॥ ५ ०नाराचादेरन्य० मु.। ०नाराचादित्रयरन्य०सं.॥ ०नाराचादेरादित्रयस्यान्य० इति पञ्चाशकटीकायाम् (पृ. २७८) पाठः॥

सत्त्वः-सात्त्विकः स इष्टानुकूल प्रतिकूलोपसर्गेषु हर्ष-विषादौ न विधत्ते। **'भावितात्मा'** सद्भावनाभावितान्तःकरण प्रतिमानुष्ठानेन वा भावितात्मा, तद्भावना च तुलनापञ्चकेन स्यात् , तद्यथा-

"* तवेण सत्तेण सुत्तेण एगत्तेण बलेण य। तुलणा पंचहा वुत्ता, पडिमं पडिवज्जओ ॥१॥" [पृ. क. भा. १३२८]

एतद्व्याख्या च [1]प्रागेवोक्ता।

कथं भावितात्मेत्याह-**'सम्यक्'** यथाऽऽगमम् , तथा **'गुरुणा'** आचार्येणानुज्ञातः-अनुमतः, अथ गुरुरेव प्रतिपत्ता तदा व्यवस्थापिताचार्येण गच्छेन वाऽनुमत इति ॥५७५॥

तथा [2]**'गच्छ एव'** साधुसमुदायमध्य एव तिष्ठन् , **'निर्मातः'** आहारादिविषये प्रतिमाकल्पपरिकर्मणि परिनिष्ठितः, आह च-

★पडिमाकप्पियतुल्लो गच्छे च्चिय कुणइ दुविहपरिकम्मं। आहारोवहिमाइसु तहेव पडिवज्जइ कप्पं ॥१॥

आहारादिप्रतिकर्म चाग्रेतनगाथायां कथयिष्यते। परिकर्मपरिमाणं चैवं-मासिक्यादिषु सप्तसु या यत्परिमाणा प्रतिमा तस्यास्तत्परिमाणमेव परिकर्म। तथा वर्षासु नैताः प्रतिपद्यते, न च परिकर्म करोति। तथा आद्यद्वयमेकत्रैव वर्षे, [3]तृतीय-चतुर्थ्यौ चैकैकस्मिन् वर्षे; अन्यासां तु तिसृणामन्यत्र वर्षे

* तपसा सत्त्वेन सूत्रेण एकत्वेन बलेन च । तुलना पञ्चधोक्ता प्रतिमां प्रतिपद्यमानस्य ॥ १ ॥ १ द्रष्टव्यम् ३२८ तमपृष्ठतः ॥ २ तुलना-पञ्चाशकटीका पृ. २७९ ॥ ★ प्रतिमाकल्पिकतुल्यो गच्छ एव करोति द्विविधपरिकर्म। आहारोपध्यादिषु तथैव प्रतिपद्यते कल्पम् ॥१॥ ३ त्रितीयचतुर्थ्यौ चैकस्मिन्नर्थे-जे. ॥

परिकर्म अन्यत्र वर्षे प्रतिपत्तिः । तदेवं नवभिर्वर्षैराद्याः सप्त समाप्यन्त इति । अथ तस्य कियान् श्रुताभिगमो भवतीत्याह–'जा पुव्वे'त्यादि, यावत्पूर्वाणि दश 'असम्पूर्णानि' किञ्चिदूनानि । सम्पूर्णदशपूर्वधरो हि अमोघवचनत्वाद्धर्मदेशनया भव्योपकारित्वेन तीर्थवृद्धिकारित्वात्प्रतिमादिकल्पं न प्रतिपद्यते । 'भवेत्' स्यात् श्रुताधिगम इति योगः, उत्कृष्टश्चायम् , जघन्यस्य वक्ष्यमाणत्वात् । अथ तमेवाह–नवमस्य पूर्वस्य–प्रत्याख्याननामकस्य तृतीयं वस्तु–आचाराख्यम् , तद्भागविशेषं यावदिति वर्तते स्यात् अस्य जघन्यः–अल्पीयान् श्रुताधिगमः–श्रुतज्ञानं सूत्रतोऽर्थतश्च । एतत्श्रुतविरहितो हि निरतिशयज्ञानत्वात्कालादि न जानातीति ॥४७६॥

तथा [1]व्युत्सृष्टः परिकर्माभावेन त्यक्तो ममत्वत्यागेन देहः–कायो येन सः । तथा 'उपसर्गसहो' दिव्य-मानुष तैरश्चोपद्रवसोढा, यथैव' यद्वदेव, 'जिनकल्पो' जिनकल्पिकः, तद्वदुपसर्गसह इत्यर्थः । 'एषणा' पिण्डग्रहणप्रकारः, सा च सप्तविधा–

● 'संसट्ठमसंसट्ठा उद्धड तह अप्पलेवडा चेव । उग्गहिया पग्गहिया उज्झियधम्मा य सत्तमिया ॥ १ ॥ इति वक्ष्यमाणस्वरूपा ।

'अभिगृहीता' अभिग्रहवती, अभिग्रहाश्चैवं–तासां सप्तानामेषणानां मध्ये आद्ययोर्द्वयोरग्रहणं पञ्चसु ग्रहणम् , पुनरपि विवक्षितदिवसे अन्त्यानां पञ्चानां मध्ये द्वयोरभिग्रहः–एकाभक्ते एका च पानके इति ।

१ तुलना–पञ्चाशकटीका पृ. २७६ B ॥

● असंसृष्टा संसृष्टा उद्धता तथाऽल्पलेपिका चैव । अवगृहीता प्रगृहीता उज्झितधर्मा च सप्तमी ॥

तथा भक्तं च–अन्नं पुनरलेपकृतम् अलेपकारकं वल्ल-चनकादि 'तस्य' प्रतिमां प्रतिपत्तुकामस्य परिकर्म कुर्वतः, चशब्दादुपधिश्चास्य स्वकीयैषणाद्वयलब्ध एव, तदभावे यथाकृतोऽप्युचितप्राप्तिं यावत्स्यात् ; जाते तूचिते तं व्युत्सृजति । उक्तं च–

*"उवगरणं सुद्धेसणमाणजुअं जमुचिअं सकप्पस्स । तं गिण्हइ तयभावे अहागडं जाव उचियं तु ॥१॥

[1]जाए उचिए य तयं वोसिरइ जहागडं विहाणेणं । इय आणानिरयस्सिह विन्नेयं तंपि तेण समं ॥२॥"

कल्पोचितं चोपधिमुत्पादयति स्वकीयैरेषणाद्वयेन, एतच्च एषणाचतुष्टयेऽन्तिमम् , एषणाचतुष्टयं पुनरिदं–[2]कार्पासिकाद्युद्दिष्टमेव वस्त्रं ग्रहीष्यामि १, प्रेक्षितमेव २, परिभुक्तप्रायमेवोत्तरीयादितया ३ तदप्युज्झितधर्मकमेवेति ४ ॥४७७॥

अथैवं कृतपरिकर्मा यत्करोति तदाह–'गच्छाधिणिक्खमित्ते' त्यादि गाथात्रयम् , [3]'गच्छात्' साधुसमूहाद्विनिष्क्रम्य–तं विमुच्येत्यर्थः । तत्र यद्याचार्यादिः प्रतिमाप्रतिपत्तौ तदा अल्पकालिकं साध्वन्तरे स्वपदनिक्षेपं कृत्वा शुभेषु द्रव्यादिषु शरत्काले सकलसाध्वामन्त्रणक्षामणपूर्वकम् । उक्तं च–

---

*उपकरणं शुद्धैषणामानयुतं यदुचितं स्वकल्पस्य । तत् गृह्णाति यथाकृतं तदभावे यावदुचितं तु ॥१॥ जाते उचिते च तत् व्युत्सृजति यथाकृतं विधानेन । इत्याज्ञानिरतस्येह विज्ञेयं तदपि तेन सदृशम् ॥२॥ १ जोए-इति पञ्चाशकटीकायाम् (पृ २८०) पाठः ॥ २ कार्पासिका० मु. । कोपासिका० सं. ॥ ३ तुलना-पञ्चाशकटीका पृ. २८०॥

● "खामेइ तओ संघं सबालवुड्ढं जहोचियं एवं । अच्चंतं संविग्गो पुव्वविरुद्धे विसेसेणं ॥१॥
जं किंचि पमाएणं न सुट्ठु मे वट्टियं मए पुव्विं । तं मे खामेमि अहं निस्सल्लो निक्कसाओत्ति ॥२॥"

[तुलना–पृ क.मा.१३६८]

प्रतिपद्यते–अभ्युपगच्छति **'मासिकीं'** मासप्रमाणाम्, **'महाप्रतिमां'** गुरुकप्रतिज्ञाम्, तत्र च दत्तिः–अविच्छिन्नदानरूपा, 'एका' एकैव, भोजनस्य–अन्नस्याज्ञातोञ्छरूपस्य उद्धृताद्युत्तरैषणापञ्चकोपात्तस्यालेपकारिणः कृपणादिभिरजिघृक्षितस्य एकस्वामिसत्कस्यैवा-ऽगुर्विणी बालवत्सा-पीयमानस्तनीभिः एलुकस्यान्तः पादमेकं विन्यस्यापरं बहिर्व्यवस्थाप्य दीयमानस्य, तथा **'पानस्यापि'** पानकाहारस्य चैकैव **'तत्र'** मासिक्यां प्रतिमायां दत्तिर्भवेदिति ॥५७८॥

तथा [1]**'यत्र'** जल-स्थल-दुर्गादौ, स्थितस्येति गम्यते, **'अस्तमेति'** पर्यन्तं याति, **'सूरो'** रविः, **'न'** नैव, 'ततः' तस्मात्स्थानाज्जलादेः, **'पदमपि'** पादप्रमाणमपि क्षेत्रमास्तां दूरम् **'सञ्चरति'** गच्छति, आदित्योदयं यावत् । तथा **'ज्ञातः'** [2]प्रतिमाप्रतिपन्नोऽयमित्येवं जनेनावसितः सन्नेकरात्रवासी–एकत्र ग्रामादावहोरात्रमेवावतिष्ठते, न त्वधिकमित्यर्थः । तथा **'अज्ञातो'** यत्र ग्रामादौ प्रतिमाप्रतिपन्नतया अविदितस्तत्र एकं वा–एकरात्रम्, द्विकं वा–रात्रिद्वयं वसति, न परत इति ॥५७९॥

● क्षमयति ततः सङ्घं सबालवृद्धं यथोचितं एवं । अत्यन्तं संविग्नः पूर्वविरुद्धान् विशेषेण ॥१॥
यत् किञ्चित् प्रमादेन न सुष्ठु मवतां वर्त्तितं मया पूर्वं । तद् भवतां क्षमयामि अहं निश्शल्यो निष्कषाय इति ॥२॥

१ तुलना-पञ्चाशकटीका पृ. २८१ ॥ २ प्रतिमाप्रतिमाप्रति० मु । तुलना-पञ्चाशकटीका पृ. १८० ॥

तथा 'दुष्टानां' मारकाणां हस्त्यादीनाम् 'आदिशब्दात्सिंहव्याघ्रादीनां च 'भयेन' मरणभीत्या 'पदमपि' पादविक्षेपमात्रमपि, किं पुनः दूरतः?, नैवापसरति-अपगच्छति। दुष्टो हि मारणार्थमागच्छन्नपसृतेऽपि साधौ हरितादि विराधयिष्यतीत्यतो नापसरति। अदुष्टस्त्वपसृते साधौ मार्गेणैव गच्छति ततो हरितादिविराधना न स्यादित्यदुष्टादपसरतीति। 'एवमादिनियमसेवी' एतत्प्रभृतिकाभिग्रहानुपालकः सन् आदिशब्दाच्छायाया उष्णम्, उष्णाच्छायायां च नोपसर्पतीत्याद्यभिग्रहो विहरति-ग्रामानुग्रामं सञ्चरति, यावदखण्डितः-परिपूर्णो मासो जात इति शेषः।

आदिशब्दादन्येऽपि बहवो नियमविशेषाः प्रतिपत्तव्याः। यथा [1]संस्तारकोपाश्रयादीनां याचनार्थम्, संशयितसूत्रा ऽर्थयोर्गृहादेर्वा प्रश्नार्थम्, तृण-काष्ठादिनामनुज्ञापनार्थम्, प्रश्नितानां सूत्रादीनां सकृद् द्विर्वा कथनार्थमेव चायं प्रतिमाप्रतिपन्नो वक्ति न तु भाषान्तरमिति। तथा आगन्तुकागार-विवृतगृह-वृक्षमूललक्षण एव वसतित्रये वसति न त्वन्यत्र। तत्र आगन्तुकागारं-यत्र कार्पटिकादय आगत्य वसन्ति। विवृतगृहं-यदधः कुड्यभावादुपरि चाच्छादनाभावादनावृतम्। वृक्षमूलं-करीरादितरुमूलं साधुवर्जनीयदोषरहितम्, उक्तं च-

★"जायण-पुच्छाऽणुन्नवण पुट्ठवागरण मासगो चेव। आगमण-विवड-गिहरुक्खमूलगावासयतिगोत्ति।१।

[पञ्चाशक १८-९]

---

१ तुलना-पञ्चाशकटीका पृ. २८१ B ॥ २ तुलना-पञ्चाशकटीका पृ. २८० तः ॥

★ याचना-पृच्छा-ऽनुज्ञापन-पृष्टव्याकरणमासक एव। आगमन-विवृतगृहवृक्षमूलत्रयावासक इति ॥१॥

[1]तथा वह्नेर्न बिभेति–प्रदीप्तादप्युपाश्रयान्न निर्गच्छति । अथ कश्चिद् वाह्वादौ गृहीत्वाऽऽकर्षति तदा निर्यात्यपि । तथा चरणप्रविष्टं दारुकण्टक[2]शर्करादिकं न स्फेटयति। अक्षिगतं रेणु-तृण-मलादिकं च नापनयति । तथा कर-चरण-मुखादिकमङ्गं प्रासुकजलेनापि न क्षालयति, तदन्यसाधवो हि पुष्टालम्बने [3]पादादि प्रक्षालयन्त्यपीति ॥५८०॥

'पच्छागगाहा' [4]पश्चात्–मासपूरणानन्तरम्, गच्छं–साधुसमूहमुपैति विभूत्या । तथाहि–गच्छस्थानासन्नग्रामे आगच्छत्यसौ । आचार्यास्तु तत्प्रवृत्तिमन्विच्छन्ति । ततो नृपादीनां निवेद्यते यथा 'परिपालितप्रतिमारूपमहातपाः साधुरत्रागतः' । ततो नृपादिलोकैः श्रमणसङ्घेन [5]चाभिनन्द्यमानस्तत्र [6]प्रवेक्ष्यते तपोबहुमानार्थम् तस्य तदन्येषां श्रद्धावृद्ध्यर्थं प्रवचनप्रभावनार्थं चेति । एवमाद्या उक्ता, शेषाः षडतिदिशन्नाह–'एवं' अनेनैव क्रमेण द्वैमासिकी, त्रैमासिकी, यावत्सप्तमप्रतिमा सप्तमासिकयन्ता । 'नवरं' केवलं प्रथमायाः–मासिक्याः प्रतिमायाः सकाशाद् द्वैमासिक्यादीनामयं विशेषः–यथा दत्तयस्तासु वर्धन्ते । तत्र द्वैमासिक्यां भक्तस्य पानस्य च प्रत्येकं दत्तिद्वयम् त्रैमासिक्यां भक्तस्य पानस्य च प्रत्येकं दत्तित्रयम् ; एवं यावत्सप्तमासिक्यां भक्तस्य पानस्य च सप्त सप्त दत्तय इति ॥५८१॥

अथाष्टमीमाह–'तत्तोय' इत्यादि गाथाद्वयम्, [7]ततश्च सप्तम्या अनन्तरमष्टमी प्रथमसप्तरात्रिन्दिवा

१ तुलना-पञ्चाशकटीका पृ.२८१ A ॥ २ कर्करा० सं. ॥ ३ पटादि-मु. । पदादि-सं. ॥ ४ तुलना-पञ्चाशकटीका पृ. २८१ B ॥ ५ चाभिनन्द्यमान० इति पञ्चाशकवृत्तौ [पृ. २८१ B] पाठः ॥ ६ प्रवेश्यते-इति पञ्चाशकवृत्तौ (पृ. २८१ B) पाठः ॥ ७ तुलना-पञ्चाशकवृत्तिः पृ.२८२ A । तत्त्वार्थ सूत्रस्य सिद्धसेनीयावृत्तिः द्रष्टव्या पृ. २०६ ॥

प्रतिमा भवति । 'इह' प्रक्रमे, तस्यां प्रथमसप्तरात्रिन्दिवायां चतुर्थचतुर्थेन-एकान्तरोपवासेन [1]आसितव्यमिति शेषः । 'अपानकेन' पानकाहाररहितेन चतुर्विधाहाररहितेनेत्यर्थः । 'अथे'त्ययम् उक्तो वक्ष्यमाणश्च 'विशेषो' भेदः प्राक्तनप्रतिमाभ्यः । इह च पारणके [2]आचामाम्लं कर्तव्यम्, दत्तिनियमस्तु नास्तीति ॥५८२॥

तथा [3]'उत्तानक' ऊर्द्ध्वमुखशयितः, 'पासल्ली' ति पार्श्वशयितः 'निसज्जी' ति निषद्यावान् [4]समपुततयोपविष्टः, 'वापी' ति विकल्पार्थः, 'स्थानम्' उक्तमेव कायचेष्टाविशेषरूपम्, 'स्थित्वा' कृत्वा ग्रामादिभ्यो बहिरिति शेषः, सहते क्षमते; 'उपसर्गान्' उपद्रवान् 'घोरान्' रौद्रान्, 'दिव्यादीन्' देवकृतादीन्, आदिशब्दान्मानुषतैरश्चादिग्रहः । 'तत्र' तस्यां प्रतिमायामविकम्पो-मनःशरीराभ्यामचल इति ॥५८३॥

नवमीमाह–'दोच्चावि' गाहा, [5]'द्वितीयाऽपि' द्वितीयसप्तरात्रिन्दिवाप्रतिमाऽपि, 'ईदृश्येव' प्रथमसप्तरात्रिन्दिवप्रतिमासदृश्येव, तपःपारणकसाधर्म्याद् ग्रामादिबहिर्वृत्तिसाधर्म्याच्च । अत एवाह–'बहिस्तादेव' बहिरेव 'ग्रामादीनां सन्निवेशविशेषाणाम्, नवरं–केवलमयं विशेषः । तुशब्दोऽवधारणे, स च योजित एव । 'उत्कटुको' भूमावन्यस्तपुततया उपविष्टः । तथा लगण्डं–दुःसंस्थितं काष्ठम्, तद्व-

१ आसितव्य० इति पञ्चाशकवृत्तौ (पृ.२८२०) पाठः ॥ २ आचाम्लं-मु. ॥B ३ तुलना-पञ्चाशकटीका पृ. २८२ ॥ ४ समपूत० इति पञ्चाशकवृत्तौ (पृ. २८२ ए) पाठः तुलना–बृ क. भा. टी. पृ. १५७१ ॥ ५ तुलना-पञ्चाशकटीका पृ. २८२ B ॥ ६ ग्रामादिसन्नि० मु. ॥

च्छेते य एवंशीलोऽसौ लगण्डशायी, [1]मस्तकपार्ष्णिकाभिरेव [2]पृष्ठदेशेनैव वा स्पृष्टभूभागः । तथा दण्डवद्—यष्टिवदायतो—दीर्घो दण्डायतः—पादप्रसारणेन भूमिन्यस्तायतशरीरः स एव दण्डायतकः, वाशब्दो विकल्पार्थः । स्थित्वा—अवस्थाय [3]दिव्याद्युपसर्गान् सहत इति प्रक्रमः ॥५८४॥

दशमीमाह—' [4]'तृतीयाऽपि' तृतीयसप्तरात्रिन्दिवप्रतिमाऽपि ईदृश्येव' उक्तस्वरूपैव तपःपारणकग्रामादिबहिर्वृत्तिसाधर्म्यात् [5]प्रथमसप्तरात्रिन्दिवप्रतिमातुल्यैवेत्यर्थः । 'नवरं' केवलम्, 'स्थानं' शरीरावस्थानम्, 'तस्य' प्रतिमाप्रतिपन्नगोदोहीति— [6]गोदोहिकसमाकारत्वाद्गोदोहिका गोदोहनप्रवृत्तस्येव पुतयोः पार्ष्णिभ्यां संयोगे अग्रपादतलाभ्यामवस्थानक्रियाः सा विधेयेति शेषः । तथा वीराणां—दृढसंहननानामासनं वीरासनम्, सिंहासनाद्यधिरूढस्य भूमिन्यस्तपादस्य सिंहासनाद्यपनयने सत्यचलितस्य तथैवावस्थानरूपम् तदपि स्थानम्, तस्येति प्रक्रमः । यद्वा वामपादो दक्षिणस्योरोरुपरिदक्षिणश्च पादो वामस्योरोरुपरि यत्र [7]क्रियते वामकरतलस्य चोपरि दक्षिणकरतलमुत्तानं नाभिलग्नं च यत्र विधीयते तद्वीरासनम्, 'अहवावि' त्ति अथवेति प्रकारान्तरोद्योतनार्थम्, अपिः समुच्चये 'तिष्ठेद्' अवतिष्ठेत्, 'आम्रकुब्जो' वा' आम्रफलवद्वक्राकारेणावस्थितः । एवमेतास्तिस्रोऽपि प्रथमसप्तरात्रिन्दिवाद्याः प्रतिमा एकविंशत्या दिवसैर्यान्तीति ॥५८५॥

---

१ मस्तकपार्ष्णिकादिभिरेव- वि. । पार्ष्णिकाभिरेव-इति पञ्चाशकवृत्तौ (पृ. २८२ B) पाठः ॥ २ पृष्ठप्रदेशेनैव-सं. ॥ ३ देवाद्यु०मु. ॥ ४ तुलना-पञ्चाशकवृत्तिः प. २८३ तः ॥ ५ ०प्रथमरात्रि० मु. ॥ ६ गोदोहक० मु. । तुलना-तत्त्वार्थसूत्रस्य सिद्धसेनीयावृत्तिः भा. २/प २०६ ॥ ७ क्रियते दक्षिणकरतलस्योपरिवामतलं वामकरतलस्य-मु. ॥

एकादशीमाह–**एमेव** गाहा, [1]'एवमेव' अनन्तरोक्तनीत्या अहोरात्रिकी प्रतिमा भवति। **नवरं**–केवलं **षष्ठं भक्तं**–भोजनं वर्जनीयतया यत्र तत् षष्ठभक्तम्–उपवासद्वयरूपं तपः। तत्र हयुपवासद्वये चत्वारि भक्तानि वर्ज्यन्ते। एकाशनेन च तदारभ्यते, तेनैव च निष्ठां यातीत्येवं षड्भक्तवर्जनरूपं तदिति। [2]'षष्ठमित्यत्र चानुस्वारोऽनागमिकः। **अपानकं**–पानकाहाररहितं तस्यां [3]विधेयमिति शेषः, तथा **ग्राम**–नगरेभ्यो बहिस्तात् **'व्याघारितपाणिके'** [4]प्रलम्बितभुजस्य स्थानम्–अवस्थानं भवति प्रतिमाप्रतिपन्नस्येति। इयं च अहोरात्रिकी प्रतिमा दिनत्रयेण याति अहोरात्रस्यान्ते षष्ठभक्तकरणात्, यदाह—

'अहोराइया तिहिं, पच्छा छट्ठं करेइ' त्ति ॥५८६॥

द्वादशीमाह **'एमेव'** गाहा, **'साहट्टु'** गाहा,– [5]एवमेव–अहोरात्रिकीवदेव च एकरात्रिकी प्रतिमा भवति। विशेषमाह–अष्टमभक्तेन उपवासत्रयरूपेण पानका-ऽऽहाररहितेन स्थानम्–अवस्थानं तत्कर्तुर्बहिस्तात् ग्रामादेः, तथाहि–ईषत्प्राग्भारगतः–ईषत्कुब्जो नद्यादिदुस्तटीस्थितो वाऽसौ स्यात्। तथाऽनिमिषनयनो–निर्निमेषनेत्रः, तथैकदृष्टिकः–एकपुद्गलगतदृष्टिर्यथास्थितगात्रो गुप्तसर्वेन्द्रिय इति ॥५८७॥

[6]**'साहट्टु'** त्ति संहृत्य द्वावपि, **'पादौ'** क्रमौ, जिनमुद्रया व्यवस्थाप्येत्यर्थः, व्याघारितपाणिः–वक्ष्यमाणार्थः, **'ठायए'** त्ति तिष्ठति करोति, **'स्थानं'** कायावस्थानविशेषम्। अथ 'वाघारियपाणि' त्ति

१ तुलना–पञ्चवस्तुटीका पृ. २८३ A ॥ २ तुलना–"षष्ठमित्यनुस्वारं (रः) छन्दोर्थ• (र्थः)" इति पञ्चाशकवृत्तौ [पृ. २८३A] पाठः ॥ ३ विधेयमिति-मु. ॥ ४ प्रलम्बभुजस्य-जे. ॥ ५ तुलना-पञ्चाशकवृत्तिः पृ. २८३ B ॥ ६ तुलना-पञ्चाशकवृत्तिः पृ.२८३B ॥

पदं सूत्रकृदेव व्याख्याति–'वाघारि'त्ति व्याघारितपाणिर्लम्बितभुजोऽवलम्बितबाहुरुच्यते । सम्यक् पालने चास्या यत् स्यात्तदाह–अन्ते च–सम्यक्पर्यन्तं नयने पुनरस्याः–एकरात्रिकीप्रतिमाया लब्धिः–लाभविशेषः स्यात् । आह च–

△ "एगराइयं च णं भिक्खुपडिमं सम्मं अणुपालेमाणस्स इमे तओ ठाणा [1]हियाए भवन्ति । तंजहा ओहिनाणे वा समुप्पज्जेज्जा, मणपज्जवनाणे वा समुप्पज्जेज्जा, केवलनाणे वा [2]असमुप्पण्णपुव्वे समुप्पज्जेज्जा" [दशाश्रुतस्कंध सू. पृ. ४७]

विराधने पुनः "❀ उम्मायं वा लभेज्जा, दीहकालियं वा रोगायंकं पाउणेज्जा, केवलिपन्नत्ताओ धम्माओ । भंसिज्जा"

इतिशब्दः समाप्तौ, इयं च प्रतिमा रात्रेरनन्तरमष्टमकरणाच्चतूरात्रिन्दिवमाना स्यात् । यदाह–

'–एगराइया चउहिं, पच्छा अट्ठमं करेइ' त्ति ।

अत्र च 'साहट्टु दोवि पाए वाघारियपाणि ठायए ठाणं । [3]वाघारियलंबियभुओ अंते य इमीय लद्धित्ति ॥१॥" इयं गाथा केषुचित्सूत्रपुस्तकेषु न दृश्यत इति ॥५८८॥

△ एकरात्रिकीं च भिक्षुप्रतिमां सम्यगनुपालयत इमानि त्रीणि स्थानानि हिताय भवन्ति, तद्यथा–अवधि-ज्ञानं वा समुत्पद्येत, मनः पर्यवज्ञानं वा समुत्पद्येत, असमुत्पन्नपूर्वं वा केवलज्ञानं समुत्पद्येत । १ हियाओ-इति पञ्चाशक वृत्तौ (२८३B) पाठः ॥ २ असमुप्पण्णपुव्वे - जे. नास्ति ॥ ❀ उन्मादं वा लभेत, दीर्घकालिं वा रोगातङ्कं प्राप्नुयात् केवलिप्रज्ञप्ता , धर्मात् भ्रश्यते । ३ वाघारिलंबियभुओ- सं.वि. ॥

अथेन्द्रियनिरोधमाह–

फासण १ रसणं २ घाणं ३ चक्खू ४ सोयंनि ५ इंदियाणेसिं ।
फास १ रस २ [1]गंध ३ वण्ण ४ सद्दा ५ विसया [2]विणिद्दिट्ठा ॥५८९॥

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं चेति इन्द्रियाणि पञ्च, स्पर्शो रसो गन्धो वर्णः शब्दश्चेति तेषामिन्द्रियाणां यथाक्रमं विषया विनिर्दिष्टाः, अत्र च गाथायां यद्यपीन्द्रियनिरोधवचनं नास्ति तथाऽपीन्द्रियनिरोधस्य प्रस्तुतत्वादेतेषु विषयेषु इन्द्रियाणामासक्तिर्वर्जनीयेत्यर्थो ज्ञेयः । अनियन्त्रितानि हीन्द्रियाणि पदे पदे क्लेशसागरे एव पातयन्ति, यदभ्यधायि—

"सक्तः शब्दे हरिणः स्पर्शे नागो रसे च वारिचरः । कृपणपतङ्गो रूपे [3]भ्रमरो गन्धेन च विनष्टः ॥१॥
[4]पञ्चसु सक्ताः पञ्च विनष्टा यत्रागृहीतपरमार्थाः । एकः पञ्चसु सक्तः प्रयाति भस्मान्ततां मूढः ॥२॥
तुरगैरिव तरलतरैर्दुर्दान्तैरिन्द्रियैः समाकृष्य । उन्मार्गे नीयन्ते तमोघने दुःखदे जीवाः ॥३॥
इन्द्रियाणां जये तस्माद्यत्नः कार्यः सुबुद्धिभिः । तज्जयो येन भविनां, परत्रेह च शर्मणे ॥४॥५८९॥

१ घाण-जे. ॥ २ विणिग्गञ्जा-जे. ॥ ३ भुजगो-जे. ॥
४ इयं गाथा योगशास्त्रवृत्तौ (४-२३) अपि उद्धृताऽस्ति ॥

अथ प्रतिलेखनामाह–

[1]पडिलेहणाण गोसा[2]वराण्हउग्घाडपोरिसीसु तिगं ।
तत्थ [3]पढमा अणुग्गय सूरे पडिक्कमणकरणाओ ॥५९०॥
[4]मुहपोत्ति १ चोलपट्टो २ कप्पतिगं ३–४–५ दो निसिज्ज ६-७ रयहरणं ८ ।
संथारु ९ त्तरपट्टो १० दस पेहाऽणुग्गए सूरे ॥५९१॥
उवगरणचउद्दसगं पडिलेहिज्जइ दिणस्स पहरतिगे ।
उग्घाडपोरिसीए उ पत्तनिज्जोगपडिलेहा ॥५९२॥
पडिलेहिऊण उवहिं गोसंमि पमज्जणा उ वसहीए ।
अवरण्हे पुण पढमं पमज्जणा तयणु पडिलेहा ।५९३॥ [पञ्चवस्तुकः २६३]
दोन्नि य पमज्जणाओ उडंमि वासासु तइय मज्झण्हे ।
वसहिं बहुसो [5]पमज्जण अहसंघट्टऽन्नहिं गच्छे ॥५९४॥

'पडिलेहणाण' गाहा, प्रतिदिवसं साधुजनस्य प्रतिलेखनानां त्रिकं–तिस्रः प्रतिलेखनाः कर्तव्या भवन्ति । तद्यथा–एका **गोस**' त्ति प्रभाते, द्वितीया 'अवरण्हे'त्ति अपराह्णे तृतीयप्रहरान्ते, तृतीया

१ इतः पूर्वं ता. प्रतौ "दिट्ठिपडिलेहमेगा, नवअक्खोडा नवेव पक्खोडा पुरमिल्ला छच्च भवे, मुहपुत्ती होइ पणुवीसा ॥ अथवा" इति अधिका गाथा विद्यते ॥ २ ०वरण्ह० जे. ता. ॥ A ३ पहाए-जे. ता. ॥ ४ मुहपुत्ति- ता. ॥ ५ उ-ता. ॥ ६ पमज्जइ-ता ॥

'उग्घाडपोरिसि'त्ति उद्घाटपौरुष्यां समयभाषया पादोनप्रहरे। तत्र तासु तिसृषु प्रतिलेखनासु मध्ये प्रथमा तावत् प्रतिपाद्यते–यथा प्रभाते [1]प्रतिक्रमणकरणादनन्तरम् अनुद्गते सूरे–सूर्योद्गमादर्वागमीषां दशानां स्थानानां प्रतिलेखना भवति ॥५९०॥

कानि पुनर्दश स्थानानीत्याह–'मुहपोत्ति'गाहा, मुखपोतिका १, चोलपट्टः २, कल्पत्रिकम्–एक ऊर्णामयो द्वौ सूत्रमयौ ३–४–५, द्वे निषद्ये रजोहरणस्य, एका सूत्रमयी अभ्यन्तरनिषद्या, द्वितीया बाह्या पादप्रोञ्छनरूपा ६-७, रजोहरणम् ८, संस्तारकः ९, उत्तरपट्टश्च १०, एतेषां दशानामपि स्थानानां 'प्रेक्षायां' प्रतिलेखनायां कृतायामुद्गच्छति सूरः। कोऽर्थः ?–एतेषु दशसु स्थानेषु प्रत्युपेक्षितेषु सत्सु यथा सूर्य उद्गच्छति तथा प्रतिलेखना कर्तव्येति। अन्ये त्वेकादश दण्डकमाहुः, यदुक्तं **निशीथचूर्णौ**–

'अन्ने भणंति–एक्कारसमो दंडओ' त्ति। [भा. २-पृ.१६४]

कल्पचूर्णावप्युक्तम्–'दंडओ एक्कारसमो' त्ति, शेषं च वसत्यादिकमुदिते एव सूर्ये प्रत्युपेक्ष्यते इति। इह च सूत्रे प्रत्युपेक्षणीयस्थानमानमेवोक्तम्, न तु प्रतिलेखनाक्रमः, तस्यागमेऽन्यथैवाभिधानात् तदुक्तं **निशीथचूर्णौ**–"उवहिंमि पच्चूसे पढमं मुहपोत्ति, तओ रयहरणं, तओ अंतोनिसिज्जा, तओ बाहिरनिसिज्जा, चोलपट्टो, कप्पउत्तरपट्टसंथारपट्टदंडगो य, एस कमो। अन्नहा उक्कमो। पुरिसेसु पुव्वं आयरियस्स, पच्छा परिणा, तओ गिलाण-सेहाइयाण, अन्नहा उक्कमो' [गाथा. १४३३, भा. २,पृ.१६६]त्ति।

१ प्रतिक्रमणकरणानन्तरं-मु.॥

अत्र 'परिणि' त्ति अनशनिन उपधिम्, आचार्योपधिप्रतिलेखनानन्तरं [1]प्रत्युपेक्षते, शेषं सुगमम् ॥५११॥

अथ द्वितीय-तृतीयप्रतिलेखनास्वरूपमाह–'उघगरण' गाहा दिनस्य प्रहरत्रिके अतिक्रान्ते सति उपकरणचतुर्दशकं स्थविरकल्पिकसत्कौधिकस्वरूपं प्रत्युपेक्षते । तत्र प्रथमं मुखवस्त्रिका, ततश्चोलपट्टः, ततो गोच्छकः, ततः पात्रप्रतिलेखनिका, ततः पात्रबन्धः, ततः पटलानि, ततो रजस्त्राणम्, ततः पात्रस्थापनम्, ततो मात्रकम्, ततः पतद्ग्रहः, ततो रजोहरणम्, ततः कल्पत्रिकमिति । उपलक्षणमेतत्, ततोऽन्योऽप्यौपग्रहिकोपधिः प्रत्युपेक्षणीय इति । तथा उद्घाटपौरुष्यां सप्तविधपात्रनिर्योगप्रत्युपेक्षा भवति । तत्रासने समुपविष्टः प्रथमं मुखवस्त्रिकां प्रत्युपेक्ष्य गोच्छकं प्रत्युपेक्षते, ततः पटलानि, ततः पात्रकेसरिकाम्, ततः पात्रबन्धम् ततो रजस्त्राणम्, ततः पात्रम्, ततः पात्रस्थापनमिति, प्रत्युपेक्षणविधिस्तु विस्तरभयान्न लिख्यते, तत ओघनिर्युक्तिपञ्चवस्तुकादेः स्वयमेवावसेयः ॥५१२॥

अत्रैव विशेषमाह–'पडिलेहिऊण' गाहा गोसे–प्रत्युषसि मुखवस्त्रिकादिलक्षणं पूर्वोक्तमुपधिं प्रत्युपेक्ष्य, तदनु वसतेः–यतिनिवासलक्षणाया उपयुक्तेन साधुना प्रमार्जना विधेया । अपराह्णे पुनः प्रथमं वसतेः प्रमार्जना पश्चात्प्रत्युपेक्षणा उपधेरिति ॥५१३॥

यत्रापि वसतेर्जीवसंसक्तिर्न भवति तत्रापि ऋतुबद्धे काले द्वे प्रमार्जने विधेये प्रत्युषसि अपराह्णे च; द्वौ वारौ वसतिरवश्यतया प्रमार्जनीयेति भावः 'वर्षासु' वर्षाकाले पुनस्तृतीयाऽपि वसतेः प्रमार्जना

---

१ प्रत्युपेक्षेत-सं. ॥

भवति, द्वे पूर्वोक्ते एव तृतीया तु मध्याह्ने भवति। तथा ऋतुबद्धे वर्षासु वा कुन्थुप्रभृतिभिः प्राणिभिः संसक्तौ सत्यां बहुशोऽपि वसतिं प्रमार्जयेत्, [1]चशब्दो विकल्पप्रदर्शनार्थः। विकल्पश्चायं—यदि संसक्ताऽपि वसतिः पूर्वोक्तप्रमार्जनाप्रमाणेनैवासंसक्ता भवति ततो नातिरिक्ता प्रमार्जना, नो चेत्तदा बहुशोऽपि प्रमार्जना कर्तव्या। अथ बहुशो वसतेः प्रमार्जने प्राणिनामतिसङ्क्षुब्धो भवति तदाऽन्यत्र—वसत्यन्तरे ग्रामान्तरे वा गच्छन्तीति ॥५९४॥

अथ गुप्तीगाह—

मणगुत्तिमाइयाओ गुत्तीओ तिन्नि हुंति नायव्वा ।
अकुसलनिवित्तिरूवा कुसलपवित्तिस्सरूवा य ॥५९५॥

'**मणगुत्ति**' गाहा, मनोगुप्त्यादयो—मनोगुप्ति-वाग्गुप्ति-कायगुप्तिलक्षणा गुप्तयस्तिस्रो भवन्ति ज्ञातव्याः, तासां स्वरूपमाह-'**अकुशलनिवृत्तिरूपा**' अकुशलानाम्-अशुभानां मनो-वचन-कायानां निवृत्तिः-निरोधस्तद्रूपाः, '**कुशलप्रवृत्तिस्वरूपाश्च**' कुशलानां—शुभानां मनो-वचन-कायानां प्रवृत्तिः—व्यापारणं तत्स्वरूपाश्च ता इति। अयमभिप्रायः—इह मनोगुप्तिस्त्रिधा- [2]आर्त्तरौद्रध्यानानुबन्धिकल्पनानिचयवियोगः प्रथमा, शास्त्रानुसारिणी परलोकसाधिका धर्मध्यानानुबन्धिनी माध्यस्थ्यपरिणतिर्द्वितीया, कुशला-ऽकुशल-मनोवृत्तिनिरोधेन योगनिरोधावस्थाभाविनी स्वात्मारामता तृतीयेति, वाग्गुप्तिर्द्विभेदा- [3]मुखनयन-भ्रूविकाराङ्गुल्याच्छोटनोद्भ्रामकासितहुंकृतलोष्टपणादीनामर्थसूचिकानां चेष्टानां परिहारेणाद्य मया न

१ वा शब्दो-जे. सं. ॥ २ तुलना-योगशास्त्रटीका १।४१ ॥ ३ तुलना-योगशास्त्रटीका १।४२॥

वक्तव्यमित्यभिग्रहकरणमेका वाग्गुप्तिः, चेष्टाविशेषेण हि निजप्रयोजनानि सूचयतो मौनकरणाभिग्रहो निष्फल एवेति, तथा वाचनप्रच्छनपरपृष्टार्थव्याकरणादिषु लोकागमाविरोधेन मुखपोतिकाच्छादितमुखकमलस्य भाषमाणस्यापि वाग्वृत्तेर्नियन्त्रणं द्वितीया वाग्गुप्तिः, आभ्यां भेदाभ्यां वाग्गुप्तेः सर्वथा वाग्निरोधः सम्यग्भाषणं च स्वरूपं प्रतिपादितं भवति, भाषासमितौ तु सम्यग्वाक्प्रवृत्तिरेवेति वाग्गुप्तिभाषासमित्योर्भेदः, यदाहुः

"समिओ नियमा गुत्तो गुत्तो समियत्तणंमि भयणिज्जो । कुसलवयमुदीरंतो जं वइगुत्तोवि समिओऽवि ॥'॥" [बृहत्कल्पभाष्य ४४५१, निशीथभाष्य ३७]

कायगुप्तिर्द्वेधा—चेष्टानिवृत्तिलक्षणा यथागमचेष्टानियमलक्षणा च, तत्र दिव्यमानुषाद्युपसर्गसद्भावेऽपि क्षुत्पिपासादिपरीषहादिसम्भवेऽपि च यत्कायोत्सर्गकरणादिना कायस्य निश्चलताकरणं सर्वयोगनिरोधावस्थायां च सर्वथा यत्कायचेष्टानिरोधनं सा प्रथमा कायगुप्तिः, तथा गुरुप्रच्छनशरीरसंस्तारकभूम्यादिप्रतिले-

---

१ अस्य क्षेमकीर्तिसूरिकृता व्याख्याः "इह समितयः प्रवीचाररूपा इष्यन्ते, गुप्तयस्तु प्रवीचारा-ऽप्रवीचारोभयस्वरूपाः । प्रविचारो नाम—कायिको वाचिको वा व्यापारः । ततो यः 'समितः' सम्यग्गमन-भाषणादि चेष्टायांप्रवृत्तः स नियमाद् 'गुप्तः' गुप्तियुक्तो मन्तव्यः, यस्तु गुप्तः स समितत्वे 'भक्तव्यः' विकल्पकीयः । तत्र समितः कथं नियमाद् गुप्तः ? इत्याह-कुशलां निरवद्यादिगुणोपेतां वाचमुदीरयन् यद् यस्माद् वाक्समितोऽपि गुप्तोऽपि । किमुक्तं भवति ? यः सम्यगनुविचिन्त्य निरवद्यां भाषां भाषते स भाषासमितोऽपि वाग्गुप्तोपि च भवति, गुप्तेः प्रवीचाररूपतयाऽभ्युपगमात् ; अतः समितो नियमाद् गुप्त इति ॥ ४४५१ ॥ इति बृ. क.भा.टीका पृ० १२०१ तः ॥

स्वनप्रमार्जनादिसमयोक्तक्रियाकलापपुरःसरं शयनादि साधुना विधेयम्, ततः शयनासननिक्षेपादानादिषु स्वच्छन्दचेष्टापरिहारेण नियता या कायचेष्टा सा द्वितीया कायगुप्तिरिति ॥५९५॥

इदानीमभिग्रहानाह—

दव्वे खित्ते काले भावे य अभिग्गहा विणिद्दिट्ठा ।
ते पुण अणेगभेया करणस्स इमं सरूवं तु ॥५९६॥

'दव्वे गाहा' द्रव्ये क्षेत्रे काले भावे वाऽभिग्रहा विनिर्दिष्टाः-कथिताः जिनैः, ते पुनः सर्वेऽप्यनेकभेदाः, यथा त्रैलोक्यस्वामिना श्रीमन्महावीरेण छद्मस्थचर्यायां विहरता कौशाम्ब्यां गृहीताः । तत्र द्रव्याभिग्रहो यद्यहं कुल्माषबाकुलान् सूर्पैककोणे स्थितान् लप्स्ये, तथा क्षेत्राभिग्रहो निगडनियन्त्रितचरणा यद्येकं पादमुद्दम्बरस्य मध्ये द्वितीयं च बहिस्तात् दात्री करिष्यति, तथा कालाभिग्रहो यदि दिवसद्वितीयपौरुष्याम् अतिक्रान्तायां दास्यति, तथा भावाभिग्रहो यदि मुण्डितशिरा रुदती सती सा दास्यति तदाऽहं भिक्षां गृहीष्यामि नान्यथेति । एवंविधाभिग्रहैर्भगवतः षण्मासाः पञ्चदिवसोनास्तपस्यतः सञ्जाताः इत्यनया दिशा द्रव्याद्यभिग्रहा विज्ञेयाः ॥

करणस्येदम्-उक्तप्रकारेण स्वरूपमिति, अस्यापि करणस्य सप्ततिभेदान् श्रीगुरवः कथयन्ति । ते चैवम्-आधाकर्मादयो द्विचत्वारिंशदपि दोषाः पिण्ड-शय्या-वस्त्र-पात्रलक्षणवस्तुचतुष्टयविषयत्वेन चत्वार एव गण्यन्ते । समितयः पञ्च, भावना द्वादश, प्रतिमा अपि द्वादश, इन्द्रियनिरोधाः पञ्च, प्रतिलेखनाः पञ्चविंशतिः, गुप्तयस्तिस्रः, अभिग्रहाश्चत्वार इति सर्वमीलने च सप्ततिः ॥

ननु चरण-करणयोः कः प्रतिविशेषः ?, उच्यते, नित्यानुष्ठानं चरणं यत्तु प्रयोजने आपन्ने क्रियते तत्करणमिति । तथा च व्रतादि सर्वकालमेव चर्यते, न पुनर्व्रतशून्यः कश्चित्काल इति । पिण्डविशुद्ध्यादयस्तु प्रयोजन एवापन्नेऽनुष्ठीयन्ते इति ॥५९६॥६७॥

सम्प्रति 'जङ्घा-विज्जाचारणगमणसत्ति' त्ति अष्टषष्टं द्वारमाह—

अइसयचरणसमत्था जंघा-विज्जाहिं चारणा मुणओ ।
जंघाहिं जाइ पढमो निस्सं काउं रविकरेऽवि ॥५९७॥
एगुप्पाएण गओ रुयगवरंमि [1]य तओ पडिनियत्तो ।
बीएणं [2]नंदीसरंमि एइ तइएण [3]समएणं ॥५९८॥
पढमेण पंडगवणं बीउप्पाएण नंदणं एइ ।
तइउप्पाएण तओ इह जंघाचारणो एइ ॥५९९॥
पढमेण माणुसोत्तरमगं तु नंदीसरं तु बीएणं ।
एइ तओ तइएणं कयचेइयवंदणो [4]इहयं ॥६००॥
पढमेण नंदणवणं बीउप्पाएण पंडगवणंमि ।
एइ इहं तइएणं जो विज्जाचारणो होइ ॥६०१॥

१ य-ता. नास्ति ॥ २ नंदीसरेइ होइ-ता. । नंदिसरंमि इइ-के. ॥ ३ छट्ठीए-ता. ॥ ४ समणो-ता. ॥

'अट्ठसये' त्यादिगाथापञ्चकम्, चरणं—गमनं तद्विद्यते येषां ते चारणाः, 'ज्योत्स्नादिभ्योऽण्' (पा०५-२-१३ वा०) इति मत्वर्थीयोऽण् प्रत्ययः। तत्र गमनमन्येषामपि मुनीनामस्ति ततो विशेषणान्यथानुपपत्त्या चरणमिह विशिष्टं गमनमागमनं चाभिगृह्यते। अत एवातिशायने मत्वर्थीयोऽयम्, यथा रूपवती कन्येत्यत्र। ततोऽतिशयचरणसमर्था—अतिशयगमनागमनलब्धिसम्पन्नाश्चारणाः। ते च द्विभेदाः—जङ्घाचारणा विद्याचारणाश्च। तत्र ये चारित्र-तपोविशेषप्रभावतः समुद्भूतगमनागमनविषयलब्धिसम्पन्नास्ते जङ्घाचारणाः। ये पुनर्विद्यावशतः समुत्पन्नगमनागमनलब्धयस्ते विद्याचारणाः। जङ्घाचारणा रुचकवरद्वीपं यावद्गन्तुं समर्थाः विद्याचारणाश्च नन्दीश्वरम्, तत्र जङ्घाचारणा यत्र कुत्रापि गन्तुमिच्छवस्तत्र रविकरानपि निश्रीकृत्य गच्छन्ति विद्याचारणास्त्वेवमेव ॥५९७॥

जङ्घाचारणश्च रुचकवरद्वीपं गच्छन्नेकेनैवोत्पातेन गच्छति, प्रतिनिवर्तमानस्त्वेकेनोत्पातेन नन्दीश्वरमायाति द्वितीयेन स्वस्थानमिति त्रय उत्पाताः ॥५९८॥

यदि पुनर्मेरुशिखरं जिगमिषुस्तदा प्रथमेनैवोत्पातेन पण्डकवनमधिरोहति, प्रतिनिवर्त्तमानस्त्वेकेनोत्पातेन नन्दनवनमागच्छति, द्वितीयेन स्वस्थानमिति, जङ्घाचारणो हि चारित्रातिशयप्रभावतो भवति। ततो लब्ध्युपजीवने औत्सुक्यभावतः प्रमादसम्भवाच्चारित्रातिशयनिबन्धना लब्धिरपहीयते। ततः प्रतिनिवर्तमानो द्वाभ्यामुत्पाताभ्यां स्वस्थानमायाति ॥५९९॥

विद्याचारणः पुनः प्रथमेनोत्पातेन मानुषोत्तरपर्वतं गच्छति, द्वितीयेन तु नन्दीश्वरम्, तत्र च गत्वा चैत्यानि वन्दते, ततः प्रतिनिवर्तमानस्त्वेकेनैवोत्पातेन स्वस्थानमायाति। तथा मेरुं गच्छन् प्रथमेनोत्पातेन

नन्दनवनं गच्छति द्वितीयेन पण्डकवनम्, तत्र चैत्यानि वंदित्वा ततः प्रतिनिवर्तमान एकेनैवोत्पातेन स्वस्थानमायाति ॥६००॥

विद्याचारणो हि विद्यावशात् भवति । विद्या च परिशील्यमाना स्फुटा स्फुटतरोपजायते, ततः प्रतिनिवर्त्तमानस्य शक्त्यतिशयसंभवात् एकेनैवोत्पातेन स्वस्थानागमनमिति । एतच्च चारणभेदद्वयमुपलक्षणम्, [1]अन्येऽपि बहवश्चारणा भवन्ति, तद्यथा—आकाशगामिनः पर्यङ्कासनसन्निविष्टाः कायोत्सर्गस्थिता वा पादोत्क्षेपनिक्षेपरहिता व्योमचारिणः । अपरे वापी-सरित्समुद्रादिषु जलमुपेत्याप्कायिकजीवानविराधयन्तो जले भूमाविव पादोत्क्षेपनिक्षेपकुशला जलचारणाः । अपरे भुव उपरि चतुरङ्गुलप्रमिते आकाशे जङ्घोत्क्षेपनिक्षेपनिपुणा जङ्घाचारणाः । अन्ये नानाद्रुम-लता-गुल्म-पुष्पाण्युपादाय पुष्पसूक्ष्मजीवानविराधयन्तः कुसुमदलपटलमवलम्बमानाः पुष्पचारणाः । अपरे चतुर्योजनशतोच्छ्रितस्य निषधस्य नीलस्य च गिरेष्टङ्कच्छिन्नां श्रेणिमुपादायोर्ध्वमधो वा पादपूर्वकं उत्तरणाऽवतरणनिपुणाः श्रेणिचारणाः । अन्येऽग्निशिखामुपादाय तेजस्कायिकानविराधयन्तः स्वयमदह्यमानाः पादविहारनिपुणा अग्निशिखाचारणाः । अपरे धूमवर्तिं तिरश्चीनामूर्द्ध्वगामिनीं वाऽऽलम्ब्यास्खलितगमनास्कन्दिनो धूमचारणाः । कुब्जवृक्षान्तरालभाविनभः-प्रदेशेषु कुब्ज वृक्षादिसम्बद्धमर्कटकतन्त्वालम्बनतः पादोत्क्षेपनिक्षेपक्षमा मर्कटकतन्तूनच्छिदन्तो यान्तो मर्कटकतन्तुचारणाः । चन्द्रा ऽर्कग्रह-नक्षत्राद्यन्यतमज्योतीरश्मिसम्बन्धेन भुवीव चरणचङ्क्रमणप्रवणा ज्योतीरश्मिचारणाः । प्रतिलोमानुलोमवृत्तिषु नानादिग्मुखोन्मुखेषु मारुतेषु तत्प्रदेशश्रेणिमुपादाय गतिमस्खलित-

१ तुलनार्थं विशेषार्थं द्रष्टव्या योगशास्त्रवृत्तिका ॥ १।९ ॥

क्रमविन्यासमास्कन्दन्तो वायुचारणाः । परे नीहारमवष्टभ्याप्कायिकजीवपीडामजनयन्तो गतिमसङ्गां कुर्वाणा नीहारचारणाः, एवमादयोऽन्येऽपि जलदचारणाऽवश्यायचारण-फलचारणादयो वक्तव्याः ॥६०१॥६८॥

इदानीं 'परिहारविसुद्धितवो' त्ति एकोनसप्ततितमं द्वारमाह–

[1]परिहारियाण उ तवो जहन्न मज्झो तहेव उक्कोसो ।
सीउण्हवासकाले भणिओ धीरेहिं पत्तेयं ॥६०२॥
तत्थ जहन्नो गिम्हे चउत्थ छट्ठं तु होइ मज्झिमओ ।
अट्ठममिह [2]मुक्कोसो एत्तो सिसिरे पवक्खामि ॥६०३॥
सिसिरे [3]तु जहन्न तवो छट्ठाई दसमचरमगो होइ ।
वासासु अट्ठमाई [4]बारसपज्जंतगो [5]नेओ ॥६०४॥
पारणगे आयाम पंचसु गहो दोसुऽभिग्गहो भिक्खे ।
कप्पट्ठियावि [6]पइदिण करेंति एमेव आयामं ॥६०५॥

१ 'एगो वायणायरियो चउरो तविणो तदणुचरा चउरो । मुणिनवगं निग्गच्छइ परिहारविसुद्धिचरणाय ॥१॥' इत्यविवृता गाथा क्वचिट्टीकापुस्तकादर्शे सोपयोगा च । इति मु. टि. । एतद् गाथानवकम् ६०२-६१० आवश्यक-हारिभद्र्यां (पृ. ११९ B), षडशीतिनाम्नः चतुर्थकर्मग्रन्थस्य देवेन्द्रसूरिविरचितस्वोपज्ञटीकायाम् (गाथा १२, पृ.१३१) अपि उपलभ्यते ॥२ उक्कोसो-इति कर्मग्रन्थ (दे). टीकायाम् (पृ.१३१) पाठः ॥ ३ उ जहन्नाई-इति आव. हारिभद्र्यां, कर्म-ग्रन्थ (दे.) टीकायाम् (पृ. १३१) च पाठः ॥ ४ चरिमो-ता. वि. । चरमो-जे. ॥ ५ होइ-जे. पो. वि. ॥ ६ पइदिणं-पो. वि.॥

एवं छम्मासतवं [1]चरिउं परिहारिया [2]अणुचरंति ।
अणुचरगे परिहारिय[3]परिट्ठिए जाव छम्मासा ॥६०६॥
कप्पट्ठिओऽवि एवं छम्मासतवं करेइ सेसा उ ।
अणुपरिहारियभावं वयंति कप्पट्ठियत्तं च ॥६०७॥
एवं सो अट्ठारसमासपमाणो य वन्निओ कप्पो ।
संखेवओ विसेसो विसेससुत्ताउ नायव्वो ॥६०८॥
[4]कप्पसम्मत्तीए तयं जिणकप्पं वा उविंति गच्छं वा ।
पडिवज्जमाणगा पुण जिणस्सगासे पवज्जंति ॥६०९॥
तित्थयरसमोवासेवगस्स पासे व [5]नो व अन्नस्स ।
एएसिं जं चरणं परिहारविसुद्धिगं तं तु ॥६१०॥

'परी'त्यादिगाथानवकम्, 'परिहाणं परिहारः-तपोविशेषस्तेन चरन्तीति पारिहारिकाः । ते [6]द्विविधा-निर्विशमानका निर्विष्टकायिकाश्च, तत्र निर्विशमानका-विवक्षिततपोविशेषासेवकाः, निर्विष्ट-

१ चरियं-ता. । २ अणु भवंति-ता. ॥ ३ पयट्ठिए-इति ता., प्रतौ कर्मग्रन्थ (दे.) टीकायां च पाठः पृ. १३१ ॥ ४ इतः पूर्वं ता. प्रतौ-"जम्मेण वीसवरिसो परियाएण गुणतीस वरिसो य । परिहारं पट्ठविउं कप्पइ मणुओ य एरिसओ ॥" इत्यधिका गाथा विद्यते ॥ ५ न उण-इति कर्मग्रन्थ (दे.) टीकायाम् [पृ. १३२] पाठः ॥ ६ तुलना कर्मग्रन्थटीका पृ. १३१ ॥ ७ द्विधा मु.॥

कायिकाः—आसेवितविवक्षिततपोविशेषाः, इह च नवको गणः—चत्वारो निर्विशमानकाश्चत्वारश्चानुचारिण एकः कल्पस्थितो वाचनाचार्यः, यद्यपि च सर्वेऽपि श्रुतातिशयसंपन्नास्तथापि कल्पत्वात्तेषामेकः कश्चित् कल्पस्थितोऽवस्थाप्यते । तेषां च परिहारिकाणां निर्विशमान-निर्विष्टकायिकानां तपस्त्रिधा—जघन्यं मध्यममुत्कृष्टं च, तच्च त्रिविधमपि शीतकाले उष्णकाले वर्षाकाले च प्रत्येकं भणितं श्रीरैः—तीर्थकृद्भिरिति ॥६०२।

तत्र ग्रीष्मकाले तप आह—'तत्र' तेषु त्रिषु कालेषु मध्ये ग्रीष्मे—उष्णकालेऽतिरूक्षत्वाज्जघन्यं तपश्चतुर्थम्—एक उपवासः, मध्यमं पुनः षष्टं—द्वावुपवासौ, अष्टमं—त्रय उपवासा उत्कृष्टं तपो भवति । तपः शब्दस्य सूत्रे सर्वत्र प्राकृतत्वात् पुंस्त्वम् । इत ऊर्द्ध्वं शिशिरे—शीतकाले तपः प्रवक्ष्यामि ॥६०३॥

तदेवाह—शिशिरे—शीतकाले ग्रीष्मतः किञ्चित्साधारणे पुनर्जघन्यादि—जघन्य-मध्यमोत्कृष्टं यथाक्रमं षष्ठादिदशमपर्यन्तं तपो भवति । कोऽर्थः ?—जघन्यं षष्ठम्, मध्यममष्टमम्, उत्कृष्टं दशममुपवासचतुष्टयलक्षणमिति । तथा वर्षासु साधारणे कालेऽष्टमादिद्वादशपर्यन्तं क्रमेण जघन्य-मध्यमोत्कृष्टं तपो ज्ञेयम् । कोऽर्थः? —जघन्यम् अष्टमम्, मध्यमं दशमम्, उत्कृष्टं च द्वादशमुपवासपञ्चकलक्षणं तप इति ॥६०४॥

पारणके त्रिष्वपि कालेषु—ग्रीष्म-शीत-वर्षालक्षणेषु तेषामाचाम्लं भवति । तथा संसृष्टादयः सप्त भिक्षा भवन्ति । तत्र पञ्चसु उत्तरासु—उद्धृतादिषु ग्रहो-ग्रहणम्, संसृष्टाऽसंसृष्टे आद्ये द्वे भिक्षे वर्जयित्वा उद्धृतादयः पञ्चैव ग्रहीतव्या इत्यर्थः । पुनरपि विवक्षितदिनेऽन्यासां पञ्चानां मध्ये द्वयोरभिग्रहः—अद्य मया द्वे एव विवक्षिते भिक्षे ग्राह्ये इत्येवंस्वरूपः । तत्राप्येका भक्ते एका च पानके इति । इदं चतुर्णां

पारिहारिकाणां तपः । ये तु कल्पस्थितादयः पञ्च एको वाचनाचार्यश्चत्वारश्चानुचारिणः, ते सर्वेऽपि एवमेव-पूर्वोक्तभिक्षाभिग्रहयुक्ताः सन्तः प्रतिदिनमाचाम्लं कुर्वन्तीति ॥६०५॥

एवं षण्मासान् तपश्चरित्वा पारिहारिका अनुचरन्ति—अनुचरा भवन्ति, वैयावृत्त्यकरा इत्यर्थः । ये चानुचरका आसन् ते पारिहारिकतपसि परि-सामस्त्येन स्थिता भवन्ति यावत् षण्मासाः । अयमर्थः—ये पूर्वमनुचारिण आसन् ते पूर्वोक्तप्रकारेणैव षण्मासान् यावत् निर्विशमानका भवन्ति, ये च पूर्वं तपः-प्रविष्टा आसन् तेऽनुचारिणो भवन्ति ॥६०६॥

मासद्वादशकानन्तरं कल्पस्थितोऽपि—वाचनाचार्योऽप्येवं-पूर्वोक्तन्यायेन षण्मासान् यावत् पारिहारिक-तपः करोति । शेषास्तु अष्टौ अनुपारिहारिकभावं—वैयावृत्त्यकरत्वं कल्पस्थितत्वं च वाचनाचार्यत्वं व्रजन्ति । शेषाणामष्टानां मध्ये सप्त वैयावृत्त्यकरा भवन्ति एकस्तु वाचनाचार्य इत्यर्थः ॥६०७॥

एवमसौ कल्पोऽष्टादशमासप्रमाणो वर्णितः सङ्क्षेपतः, यस्त्वत्र विशेषः कश्चित् स विशेषसूत्रात्[1] कल्पादेर्ज्ञातव्यः ॥६०८॥

कल्पसमाप्तौ च यत्कर्तव्यं तदाह—'कप्पसमत्तीए' इत्यादि गाथापूर्वार्द्धम्, कल्पस्य—पारिहारिका-नुष्ठानरूपस्य समाप्तौ 'तयं' ति तकं तमेव पारिहारिककल्पं जिनकल्पं वा उपयान्ति—प्रतिपद्यन्ते गच्छं वा अनुसरन्ति । परिहारविशुद्धिका हि द्विविधाः—इत्वरा यावत्कथिकाश्च, तत्र ये कल्पसमाप्त्यनन्तरं तमेव

१ बृहत्कल्पभाष्य (गाथा ६४४७ तः, पृ. १४२५तः) द्रष्टव्यम् ॥

कल्पं गच्छं वा समुपयान्ति ते इत्वराः, ये पुनः कल्पसमाप्त्यनन्तरमव्यवधानेन जिनकल्पं प्रतिपद्यन्ते ते यावत्कथिकाः । उक्तं च–

★ "इत्तरिय थेरकप्पे जिणकप्पे आवकहिय" त्ति, [तुलना-पञ्चवस्तुकः १५२४, बृ. क. भा. १४२६],

अत्र स्थविरकल्पग्रहणमुपलक्षणम्, स्वकल्पे चेति द्रष्टव्यम्, इह चेत्वराणां कल्पप्रभावादेव देव-मानुष-तिर्यग्योनिककृता उपसर्गाः सद्योघातिन आतङ्का अतीवाविषह्याश्च वेदना न प्रादुर्भवन्ति, यावत्कथिकानां तु सम्भवेयुरपि । ते हि जिनकल्पं प्रतिपत्स्यमाना जिनकल्पभावमनुविदधति । जिनकल्पिकानां चोपसर्गादयः सम्भवन्तीति, उक्तं च

卐 "इत्तरियाणुवसग्गा आयंका वेयणा य न हवंति । आवकहियाण भइया" [पञ्चवस्तुकः १५२६, बृ. क. भा. १४२८] इति ।

अथायं कल्पो यस्य समीपे प्रतिपद्यते तं सार्धगाथया प्राह–"पडिवज्जे"त्यादि प्रतिपद्यमानकाः–पारिहारिककल्पं प्रतिपत्तुकामाः पुनर्जिनसकाशे–तीर्थकरपार्श्वे प्रतिपद्यन्ते । तीर्थकरसमीपासेवकस्य वा पार्श्वे, येनैतत्तपस्तीर्थकरसमीपे प्रतिपन्नपूर्वं भवति तत्सकाशे वा प्रतिपद्यन्ते इत्यर्थः । एतद्द्वयं मुक्त्वा न पुनरन्यस्य पार्श्वे प्रतिपत्तिरिति । एतेषां यच्चरणं–चारित्रं तत्परिहारविशुद्धिकमभिधीयते । परिहारेण–तपोविशेषेण विशुद्धिः–निर्मलता यस्मिन् चारित्रे इति व्युत्पत्तेः ॥६०९-६१० ॥

★ इत्वराः स्थविरकल्पे यावत्कथिका जिनकल्पे ॥

卐 इत्वराणामुपसर्गा आतङ्का वेदनाश्च न भवन्ति । यावत्कथिकानां भाज्याः ॥

॥४९५॥

अथैते परिहारविशुद्धिकाः कस्मिन् क्षेत्र काले वा सम्भवन्ति ?, उच्यते, इह क्षेत्रादिनिरूपणार्थं [1]बहूनि द्वाराणि प्रवचने [2]निरूप्यन्ते अस्माभिस्तु ग्रन्थगौरवभीरुभिर्विनेयजनानुग्रहाय कानिचिद्दर्श्यन्ते-(ग्रन्थाग्रं ६०००) [3]तत्र क्षेत्रद्वारे द्विधा मार्गणा-जन्मतः सद्भावतश्च, तत्र यत्र क्षेत्रे जन्म तत्र जन्मतो मार्गणा, यत्र च कल्पं प्रतिपद्यते तत्र सद्भावतः, तत्र जन्मतः सद्भावतश्च पञ्चसु भरतेषु पञ्चसु चैरवतेषु प्राप्यन्ते नतु महाविदेहेषु, न चैतषां संहरणमस्ति येन जिनकल्पिका इव संहरणतः सर्वासु कर्मभूमिष्वकर्मभूमिषु वा प्राप्येरन् , उक्तं च-

● खेत्ते भरहेरवएसु होंति संहरणवज्जिया नियमा' [पञ्चवस्तुकः १५२९, तुलना-बृ.क. भा.१४३१] १।

[4]कालद्वारे अवसर्पिण्यां तृतीये चतुर्थे वाऽरके जन्म सद्भावः पञ्चमेऽपि, उत्सर्पिण्यां द्वितीये तृतीये चतुर्थे वा जन्म सद्भावः पुनस्तृतीये चतुर्थे वा, उक्तं च—

❀ ओसप्पिणीए दोसुं जम्मणाओ [5]तीसु संतिभावे य । उस्सप्पिणि विवरीओ जम्मओ संतिभावे य ॥१॥

[पञ्चवस्तुकः १४८७ बृ. क. भा. १४१६]

---

१ द्रष्टव्यः पञ्चवस्तुकः गाथा १५२७ तः ॥ २ प्ररूप्यन्ते-सं.। ३ तुलना-पञ्चवस्तुकः १४८५, कर्मग्रन्थ (दे.) टीका पृ. १३२ तः ॥ ● क्षेत्र भरतैरवतयोर्भवन्ति संहरणवर्जिता नियमात् ॥ ४ तुलना-आव. हारिभद्री पृ. ११२ तः, कर्मग्रन्थटीका देवेन्द्रसूरिरचिता पृ. १३२ तः ॥ ❀ अवसर्पिण्यां द्वयोर्जन्मनस्तिसृषु सद्भावे च । उत्सर्पिण्यां विपरीतो जन्मतः सद्भावतश्च ॥ ५ तिसु अ संतिभावेणं-इति पञ्चवस्तुके (गाथा १४८७) पाठः ॥

नोत्सर्पिण्यवसर्पिणीरूपे तु चतुर्थारकप्रतिभागकाले न सम्भवन्त्येव, महाविदेहक्षेत्रे तेषामसम्भवात् २ ।

तीर्थद्वारे परिहारविशुद्धिको नियमतस्तीर्थे प्रवर्तमान एव सम्भवति न तूच्छेदे नानुत्पत्त्या वा तदभावे जातिस्मरणादिना, उक्तं च—

^ "तित्थेत्ति नियमओ च्चिय होइ स तित्थंमि न उण तदभावे ।
विगएऽणुप्पण्णे वा जाईसरणाइएहिं तु ॥१॥" (पञ्चवस्तुकः १४९१) ३ ।

पर्यायद्वारे पर्यायो द्विधा—गृहस्थपर्यायो यतिपर्यायश्च, एकैकोऽपि द्विधा— [1]जघन्यत उत्कृष्टतश्च, तत्र गृहस्थपर्यायो [2]जघन्यत एकोनत्रिंशद्वर्षाणि यतिपर्यायो विंशतिः, द्वावपि चोत्कर्षतो देशोनपूर्वकोटीप्रमाणौ, उक्तं च पञ्चवस्तुके—

★ "एयस्स एस नेओ गिहिपरियाओ जहन्न गुणतीसा । जइपरियाओ वीसा दोसुवि उक्कोस देसूणा ॥१॥" [गाथा १४९४] यत्पुनरत्र सूत्रे—

[3]जम्मेण तीसवरिसो परियाएण गुणवीसवरिसो य ।
परिहारं पट्ठविउं कप्पइ मणुओ हु एरिसओ ॥१॥"

---

^ तीर्थे इति नियमत एव भवति स तीर्थे नतु तदभावे । विगतेऽनुत्पन्ने वा जातिस्मरणादिकैस्तु ॥१॥
१ जघन्य उत्कृष्टश्च-मु. वि. ॥ २ जघन्य एकोन० मु. वि. ॥ ★ एतस्यैष ज्ञेयो गृहिपर्यायो जघन्यत एकोनत्रिंशत्। यतिपर्यायो विंशतिः द्वयोरप्युत्कर्षतो देशोना (पूर्वकोटी) ॥१॥ ३ अत्रैव ४९२ तमपृष्ठे ४ टिप्पनकम् द्रष्टव्यम् ॥

[1]इत्युक्तं तदसङ्गतमिव लक्ष्यते । कल्पादिभिर्व्यभिचारात्, यदुक्तं कल्पभाष्ये—

● "गिहिपरियाए जहन्नओ [2]गुणतीसा । जइपरियाए वीसा दोसु उक्कोसदेसूणा ॥१॥" [बृ.क.भा. १४१९] ४ ।

आगमद्वारे अपूर्वमागमं स नाधीते, यस्मात्तं कल्पमधिकृत्य [3]प्रगृहीतोचितयोगाराधनत एव स कृतकृत्यतां भजते, पूर्वाधीतं [4]तु विस्रोतसिकाक्षयनिमित्तं नित्यमेवैकाग्रमनाः सम्यक्प्रायोऽनुस्मरति, आह च—

❀ "अपुव्वं नाहिज्जइ आगममेसो पडुच्च तं कप्पं । जमुचिय[5]पगहियजोगाराहणओ एस कयकिच्चो ॥१॥"

पुव्वाहीयं तु तयं पायं अणुसरइ निच्चमेवेसो । एगग्गमणो सम्मं विस्सोयसियाए खयहेऊ ॥२॥"

[पञ्चवस्तुकः १४९५-९६] ५ ।

वेदद्वारे प्रवृत्तिकाले वेदः पुरुषवेदो वा भवेन्नपुंसकवेदो वा, न स्त्रीवेदः, स्त्रियाः परिहारविशुद्धिकल्पप्रतिपत्त्यसम्भवात् । अतीतनयमधिकृत्य पुनः पूर्वप्रतिपन्नश्चिन्त्यमानः सवेदो वा भवेदवेदो वा, तत्र सवेदः श्रेणिप्रतिपत्त्यभावे उपशमश्रेणिप्रतिपत्तौ क्षपकश्रेणिप्रतिपत्तौ वा त्ववेदः, उक्तं च—

★ "वेदो पवित्तिकाले इत्थी [6]वज्जो उ होइ एगयरो । पुव्वपडिवन्नगो पुण होइ सवेदो अवेदो वा ॥१॥" ६ ।

---

१ इत्युक्तं-जे.नास्ति ॥ ● गृहिपर्याये जघन्यत एकोनत्रिंशत् । यतिपर्याये विंशतिः द्वयोरुत्कर्षतो देशोना ॥१॥

२ इगुत्तीसा-वि. ॥ ३ गृहीतो० मु. । कर्मग्रन्थ (दे०) टीकायामपि (पृ.१३२)प्रगृहीतो० इति पाठः ॥ ४ तु-मु. नास्ति ॥

❀ अपूर्वं नाधीते आगममेष प्रतीत्य तं कल्पं । यदुचितप्रगृहीतयोगाराधनात एष कृतकृत्यः ॥१॥
पूर्वाधीतं तु तत् प्रायोऽनुस्मरति नित्यमेवैषः । एकाग्रमनाः सम्यक् विस्रोतसिकायाः क्षयहेतुम् ॥२॥

५ ०पगट्ठिजोगा० इति पञ्चवस्तुके (१४९५) पाठः ॥

★ वेदः प्रवृत्तिकाले स्त्रीवर्जस्तु भवत्येकतरः । पूर्वप्रतिपन्नकः पुनर्भवे सवेदोऽवेदो वा ॥१॥ ६ उज्झो-सं. ॥

कल्पद्वारे स्थितकल्प एवायम्, नास्थितकल्पे, 'ठियकप्पंमि य नियमा' [पञ्चवस्तुकः १५३३] इति वचनात् ।

तत्र आचेलक्यादिषु दशस्वपि स्थानेषु ये स्थिताः साधवस्तत्कल्पः स्थितकल्प उच्यते । ये पुनश्चतुषु[*] शय्यातरपिण्डादिष्ववस्थितेषु कल्पेषु स्थिताः शेषेषु चाचेलक्यादिषु षट्सु अस्थितास्तत्कल्पोऽस्थितकल्पः ७।

लिङ्गद्वारे नियमतो द्विविधेऽपि लिङ्गे [1]भवति । तद्यथा—द्रव्यलिङ्गे भावलिङ्गे च, एकेनापि विना विवक्षित कल्पोचितसामाचार्ययोगात् ८ ।

[2]ध्यानद्वारे धर्मध्यानेन [3]प्रवर्धमानेन परिहारविशुद्धिकं कल्पं प्रतिपद्यते । पूर्वप्रतिपन्नः पुनरार्त्त-रौद्रयोरपि भवति, केवलं प्रायेण निरनुबन्धः ९ ।

गणनाद्वारे जघन्यतस्त्रयो गणाः प्रतिपद्यन्ते उत्कर्षतः शतसङ्ख्याः । पूर्वप्रतिपन्ना जघन्यत उत्कर्षतो वा शतशः । पुरुषगणनया जघन्यत प्रतिपद्यमानाः सप्तविंशतिः, उत्कर्षतः सहस्रम् । पूर्वप्रतिपन्नाः पुनर्जघन्यतः शतशः उत्कर्षतः सहस्रशः । आह च—

*"गणओ तिन्नेव गणा जहन्न पडिवत्ति सयस उक्कोसो । उक्कोस जहन्नेण य सयसोचिय पुव्वपडिवन्ना ॥१॥"

---

१ भवन्ति-मु. ॥ २ तुलना-झाणंमि वि धम्मेणं पडिवज्जइ सो पवड्ढमाणेणं । इअरे सुविसाणेसुं पुव्वपवण्णो ण पडिसिद्धो ॥" इति पञ्चवस्तुकः १५०५ ॥ ३ प्रवर्तमानेन-इति कर्मग्रन्थ (दे०) टीकायाम् [पृ.१३५] पाठः ॥

* गणतस्त्रय एव गणा जघन्या प्रतिपत्तिः शतश उत्कृष्टा । उत्कृष्टजघन्याभ्यां शतशः एव पूर्वप्रतिपन्नाः ॥१॥

● सत्तावीस जहन्ना सहस्समुक्कोसओ य पडिवत्ती । सयसो सहस्ससो वा पडिवन्ना जहन्न [1]उक्कोसा ॥२॥"
[पञ्चवस्तुकः १५३४-३५]

अन्यच्च यदा पूर्वप्रतिपन्नकल्पमध्यादेको निर्गच्छति अन्यः प्रविशति तदा न्यूनप्रक्षेपे प्रतिपत्तौ कदाचिदेकोऽपि भवति पृथक्त्वं वा[2] । पूर्वप्रतिपन्नोऽप्येवं भजनया कदाचिदेकः प्राप्यते पृथक्त्वं वा[3] । उक्तं च-
△ "पडिवज्जमाण भयणाए होज्ज एक्कोऽवि ऊनपक्खेवो । पुव्वपडिवन्नयावि य भइया एक्को पुहुत्तं वा ॥१॥"
[पञ्चवस्तुकः १५३६] १० ।

अभिग्रहद्वारे अभिग्रहाश्चतुर्विधाः-द्रव्याभिग्रहाः क्षेत्राभिग्रहाः कालाभिग्रहा भावाभिग्रहाश्च, तत्र परिहारविशुद्धिकस्यैतेऽभिग्रहा न भवन्ति, यस्मादेतस्य कल्प एव यथोक्तस्वरूपोऽभिग्रहो वर्तते । उक्तं च-
卐 "दव्वाईय अभिग्गह विचित्तरुवा न हुंति [4]पुण केई । एयस्स [5]जावकप्पो कप्पोच्चियऽभिग्गहो जेणं ॥१॥
एयम्मि गोयराई [6]नियमा नियमेण निरववादा य । तप्पालणं चिय परं एयस्स विसुद्धिठाणं तु ॥२॥"
[तुलना पञ्चवस्तुकः १५०९-१०] ११ ।

● सप्तविंशतिर्जघन्यं सहस्रमुत्कृष्टतश्च प्रतिपत्तिः । शतशः सहस्रशो वा प्रतिपन्ना जघन्या उत्कृष्टा ॥२॥ १ उक्कोसो-मु. ॥ २ च-सं. ॥ ३ च-सं. ॥ △ प्रतिपद्यमाना भजनया भवेत् एकोऽपि ऊनप्रक्षेपे पूर्वप्रतिपन्ना अपि च भक्ताः एक पृथक्त्वं वा ॥१॥ 卐 द्रव्यादिका अभिग्रहा विचित्ररूपा न भवन्ति न पुनः केचित् । एतस्य यावत् कल्पः कल्प एव येनाभिग्रहः ॥१॥ एतस्मिन् गोचरादिनियमा नियमेन निरपवादाश्च तत्पालनमेव परमेतस्य विशुद्धिस्थानम् ॥२॥ ४ इत्तरिया-इति पञ्चवस्तुके(गाथा १५०९)पाठः ॥ ५ आवकहिया इति पञ्चवस्तुके [गाथा १५०९]पाठः ॥ ६ णिअया-इति पञ्चवस्तुके[गाथा १५१०]पाठः ॥

प्रव्रज्याद्वारे नासावन्यं प्रव्राजयति कल्पस्थितिरियमितिकृत्वा । आह च-

* 'पव्वावेइ न एसो अन्नं कप्पट्ठिइत्ति काऊणं ।" इति उपदेशं पुनर्यथाशक्ति प्रयच्छति १२ ।

निष्प्रतिकर्मताद्वारे एष महात्मा निष्प्रतिकर्मशरीरोऽक्ष्णिमलादिकमपि न कदाचिदपनयति, न च प्राणान्तिकेऽपि समापतिते व्यसने अपवादपदमासेवते । उक्तं च-

● "निप्पडिकम्मसरीरो अच्छिमलाईवि नावणेइ सया । [1]पाणंतिएवि य तहा वसणंमि न वट्टए बीए ॥१॥
अप्पबहुत्तालोयणविसयाईओ उ होइ एसत्ति । अहवा सुहभावाओ बहुगंऽप्पेयं चिय इमस्स ॥२॥"
[पञ्चव० १५१९-२०] १३ ।

भिक्षाद्वारे [2]पथद्वारे च भिक्षा विहारक्रमश्चास्य तृतीयस्यां पौरुष्यां भवति । शेषासु च पौरुषीषु कायोत्सर्गः, निद्राऽपि चास्य स्वल्पा द्रष्टव्या । यदि पुनः कथमपि जङ्घाबलमस्य परिक्षीणं भवति [3]तथाप्येषोऽविहरन्नपि महाभागो नापवादपदमासेवते । किन्तु तत्रैव यथाकल्पमात्मीयं योगं विदधाति । उक्तं च-

---

* प्रव्राजयति नैवोऽन्यं कल्प स्थितिरितिकृत्वा ।

● निष्प्रतिकर्मशरीरोऽक्ष्णिमलाद्यपि नापयति सदा । प्राणान्तिकेऽपि च तथा व्यसने न वर्त्तते द्वितीये (अपवादे) ॥१॥
अल्पबहुत्वालोचनविषयातीतस्तु भवत्येष इति । अथवा शुभभावात् बहुकमप्येतदेवास्य ॥२॥

१ पाणंतियत्र तहा- जे. । पाणंतिएवि य महा- पो. वि. सं. । कर्मग्रन्थ (दे.) टीकायामपि (पृ. १३६) पाणंतिए वि य महा० इति पाठः ॥ २ पथिद्वारे-मु. ॥ ३ तथाप्येको० इति कर्मग्रन्थ (दे.) टीकायाम् (पृ. १३६) पाठः ॥

* "तइयाइ पोरसीए भिक्खाकालो य विहारकालो। सेसासु य उस्सग्गो पायं अप्पा य निद्दत्ति ॥१॥
जङ्घाबलंमि खीणे अविहरमाणोऽवि न वर[1]मावज्जे। तत्थेव अहाकप्पं कुणइ उ जोगं महाभागो ॥२॥
[पञ्चवस्तुकः १५२१-२२] १४, १५॥६१०॥६१॥

इदानीं 'अहालंद' त्ति सप्ततितमं द्वारमाह-

[2]लंदं तु होइ कालो सो पुण उक्कोस मज्झिम जहन्नो ।
उदउल्लकरो जावि[3]ह सुक्कइ सो होइ उ जहन्नो ॥६११॥
उक्कोस पुव्वकोडी मज्झे पुण होंति णेगठाणाइं ।
[4]एत्थ पुण पंचरत्तं उक्कोसं होइ अहलंदं ।६१२॥
जम्हा उ पंचरत्तं चरंति तम्हा उ [5]हुंतिऽहालंदी ।
पंचेव होइ [6]गच्छो तेसिं उक्कोसपरिमाणं ॥६१३॥
जा चेव य जिणकप्पे मेरा [7]सा चेव लंदियाणंपि ।

* तृतीयस्यां पौरुष्यां भिक्षाकालो विहारकालश्च शेषासु चोत्सर्गः प्रायोऽल्पा च निद्रेति ॥१॥
जङ्घाबले क्षीणे अविहरन्नपि न परं (अपवादं) आपद्यते। तत्रैव यथाकल्पं करोति योगं तु महाभागः ॥२॥

१ ०मावज्जो-पो.। णावज्जे-इति पञ्चवस्तुके (गाथा १५२२) पाठः॥ २ लंदो उ-इति बृहत्कल्पभाष्ये (गाथा १४३८) पाठः॥ ३ इत्थ-ता.॥ ४ हुतऽहालंदि-ता.। पञ्चवस्तुकेऽपि हुंतऽहालंदि इति पाठः॥ ५ गच्छे-ता.॥ ६ सच्चेव-इति पञ्च व० पाठः॥

नाणत्तं पुण सुत्ते [1]भिक्खायरि मासकप्पे य ॥६१४॥

[पञ्चवस्तुकः १५३८-४१, बृ.क. भा १४३९]

अहलंदिआण गच्छे अप्पडिबद्धाण जह जिणाणं तु ।
नवरं कालविसेसो उउवासे पणग चउमासो ॥६१५॥
गच्छे पडिबद्धाणं अहलंदीणं तु अह पुण विसेसो ।
[2]उग्गहो जो तेसिं तु [3]सो आयरियाण आभवइ ॥६१६॥
एगवसहीए पणगं लुव्वीहीओ य गामि कुव्वंति ।
दिवसे दिवसे अन्नं अडंति वीहीसु नियमेण ॥६१७॥
पडिबद्धा इयरेऽवि य[4] एक्केक्का ते जिणा य थेरा य ।
अत्थस्स उ [5]देसम्मि य असमत्ते तेसि पडिबंधो ॥६१८॥
[6]लग्गाइसु तूरंते तो [7]पडिवज्जित्तु खित्तबाहिठिया ।
गिण्हंति जं अगहियं तत्थ य गंतूण आयरिओ ॥६१९॥
तेसिं [8]तयं पयच्छइ [9]खित्तं इंताण तेसिमे दोसा ।

१ भिक्खायर० ता. । भिक्खाचरि इति पञ्चवस्तुके (गाथा १५४१) पाठः ॥ २ उग्गह-मु. ॥ ३ सो-वि. नास्ति ॥ ४ हु-ता. ॥ ५ देसम्मी असमत्ते-इति पञ्चवस्तुके (गाथा १५४२) बृहत्कल्पभाष्ये (गाथा १४४०) च पाठः ॥ ६ लग्गाइसुत्तरंते-वि. । पञ्चवस्तुके (गाथा १५४३) 'लग्गादि-सुत्तरंते' इति पाठः ॥ ७ पडिवज्जिइ खित्ति-जे. ॥ ८ पयं-जे. । पूयं-वि ॥ ९ खेत्तं-मु. ॥

वंदंतमवंदंते लोगंमि य होइ परिवाओ ॥६२०॥
न [1]तरेज्ज जई गंतुं आयरिओ [2]ताहे एइ सो चेव ।
[3]अंतरपल्लिं [4]पडिवसभ गामबहिं अण्णवसहिं वा ॥६२१॥
तीए य अपरिभोगे ते वंदंते न वंदई सो उ ।
तं घेत्तुं [5]अपडिबद्धा ताहि [6]जहीच्छाइ विहरंति ॥६२२॥

[पञ्चवस्तुकः १५४२-४६]

'लंद'मित्यादिगाथाद्वादशकम्, [7]लन्दं तु भवति कालः, समयपरिभाषया लन्दशब्देन कालो भण्यत इत्यर्थः । स पुनः कालस्त्रेधा–उत्कृष्टो मध्यमो जघन्यश्च । तत्र उदकार्द्रकरो यावताकालेन 'इह' सामान्येन लोके शुष्यति तावान् कालविशेषो भवति जघन्यः, अस्य चेह जघन्यत्वं प्रत्याख्यान नियम-विशेषादिषु विशेषत उपयोगित्वात्, अन्यथा अतिसूक्ष्मतरस्यापि समयादिलक्षणस्य सिद्धान्तोक्तस्य कालस्य सम्भवात् ॥६११॥

'उक्कोस' गाहा, उत्कृष्टः पूर्वकोटीप्रमाणः, अयमपि चारित्रकालमानमाश्रित्य उत्कृष्टः उक्तः, अन्यथा पल्योपमादिरूपस्यापि कालस्य सम्भवात्, मध्ये पुनर्भवन्त्यनेकानि स्थानानि वर्षादिभेदेन

१ तरिज्ज–ता. ॥ २ ताहि–ता.वि. ॥ ३ अंतरपल्ली–इति पञ्चव. पाठः ॥ ४ पडिवसभा–वि. ॥ ५ मपडिबद्धा–ता. ॥ ६ अहिच्छा–वि. ॥ ७ लन्दस्तु इति बृहत्कल्पटीकायाम् [पृ. ४२९] पाठः । तुलना-पञ्चवस्तुटीका पृ. २१९, बृहत्कल्पटीका पृ. ४२६ तः ॥ ८ जघन्यः- जे.नास्ति ॥

कालस्य, अत्र पुनर्यथालन्द[1]कल्पप्रक्रमे पञ्चरात्रं 'पर्ये'त्यागमानतिक्रमेण लन्दं-काल उत्कृष्टं भवति, तेनैवार्थोपयोगात् ॥६१२॥

यस्मात्पञ्चरात्रं चरन्ति पेटार्धपेटाद्यन्यतमायां वीथ्यां भैक्षनिमित्तं पञ्चरात्रिन्दिवान्यटन्ति तस्माद्भवन्ति यथालन्दिनः, विवक्षितयथालन्दभावात्, तथा पञ्चैव पुरुषा भवन्ति गच्छो-गणस्तेषां-यथालन्दिकानाम्, पञ्चको हि गणोऽमुं कल्पं प्रतिपद्यते इत्युत्कृष्टमेकैकस्य गणस्य पुरुषपरिमाणमेतदिति ॥६१३॥

अत्र बहुवक्तव्यत्वान्निरवशेषाभिधाने ग्रन्थगौरवप्रसक्त्या यथालन्दिककल्पस्यातिदेशमाह-यैव च जिनकल्पे-जिनकल्पविषया मेरा-मर्यादा पञ्चविधतुलनादिरूपा सैव च यथालन्दिकानामपि प्रायशः। नानात्वं-भेदः पुनर्जिनकल्पिकेभ्यो यथालन्दिकानां 'सूत्रे' सूत्रविषयं तथा भिक्षाचर्यायां मासकल्पे च। चकारात्प्रमाणविषयं चेति। ६१४॥

अथातिदेशपूर्वकमल्पवक्तव्यत्वात्प्रथमं मासकल्पनानात्वमेवाह-यथालन्दिका द्विविधाः-गच्छे प्रतिबद्धा अप्रतिबद्धाश्च, गच्छे च प्रतिबन्धोऽमीषां कारणतः किञ्चिदश्रुतस्यार्थस्य श्रवणार्थमिति मन्तव्यम्, ततो यथालन्दिकानां गच्छे अप्रतिबद्धानामुपलक्षणत्वात्प्रतिबद्धानां च 'तवेण सत्तेण' [बृ.क.भा.१३२८] इत्यादिभावनारूपा सर्वापि सामाचारी यथा जिनकल्पिकानां पूर्वमुक्ता तथैव समवसेया। नवरं-केवलं द्विविधानामपि यथालन्दिकानां जिनकल्पिकेभ्यः काले-कालविषये विशेषो-भेदो ज्ञातव्यः। तमेवाह-'उउ वासे पणग चउमासो' त्ति ऋतौ-ऋतुबद्धकाले वर्षे-वर्षाकाले च यथासङ्ख्यं दिनपञ्चकं मासचतु-

१ ०कस्यप्रक्रमे-सं. वि.॥

एवं चैकत्रावस्थानं भवति । [1]इयमत्र भावना—ऋतुबद्धे काले यथालन्दिकाः साधवो यदि वीस्तीर्णो ग्रामादिर्भवति तदा तं गृहपङ्क्तिरूपाभिः षड्भिर्वीथीभिः परिकल्प्य एकैकस्यां वीथ्यां पञ्च पञ्च दिवसानि भिक्षामटन्ति । तत्रैव च वसन्ति । एवं षड्भिर्वीथीभिरेकस्मिन् ग्रामे मासः परिपूर्णो भवति । तथाविधविस्तीर्णग्रामाभावे तु निकटतमेषु षट्सु गामेषु पञ्च पञ्च दिवसान् वसन्ति । उक्तं च **कल्पभाष्ये**—

[2]"एक्केकं पंचदिणे पण पणएण य निट्ठिओ मासो" ।

एतच्चूर्णिश्च—"अह एगो चेव गामो [3]सवियारोत्ति—वित्थिण्णो ता छ वीहीओ काउं एक्केक्कीए पंच पंच दिवसाणि हिंडन्ति, बीयाएवि पंच दिवसे जाव छट्ठीएवि पंच दिवसा, एवं एगगामे मासो भवइ, अह नत्थि एगो गामो सवियारो तो हवंतऽहालंदियाण छग्गामा खेत्तस्स परियंतेणं, तेसिं एक्केक्कं पंच दिवसाणि अच्छन्ति, एवं मासो विभज्जमाणो पणपणएण निट्ठिओ होइ" त्ति ॥६१५॥

अथ यथालन्दिकानामेव परम्परं भेदमाह—गच्छप्रतिबद्धानां पुनर्यथालन्दिकानां गच्छाप्रतिबद्धेभ्यः सकाशात् विशेषो-भेदो भवति । तमेवाह—तेषां गच्छप्रतिबद्धयथालन्दिकानां यः क्रोशपञ्चकलक्षणः क्षेत्रावग्रहः स आचार्याणामेव भवति । यस्याचार्यस्य निश्रया ते विहरन्ति तस्यैव स क्षेत्रावग्रहो भवतीति भावः, गच्छाप्रतिबद्धानां तु जिनकल्पिकवत् क्षेत्रावग्रहो नास्तीति ॥६१६॥

---

१ तुलना-बृ. क. भा. टीका पृ. ५८५॥ २ एक्केक्कं पंचदिणे पणएण-वि. । तुलना-"एक्को वा सवियारो, हवंतऽहालंदियाण छग्गामा । मासो विभज्जमाणो, पणगेण उ निट्ठिओ होइ ॥" इति बृ. क. भा. २०२२ ॥

३ 'सवियारी त्ति वित्थिन्नो' इति पाठः बृ. क. भा टीकायामुद्धृतः पृ. ५८५ ॥

अथ द्विविधानामपि यथालन्दिकानां भिक्षाचर्यानानात्वं विवक्षुराह–ऋतुबद्धे काले एकस्यां वसतौ 'पञ्चकं' पञ्च दिवसानि यावदवतिष्ठन्ते । वर्षासु पुनश्चतुरो मासान् यावदेकस्यां वसतौ तिष्ठन्ति । ग्रामे षड् वीथीः कुर्वन्ति । अयमर्थः–यथालन्दिका गृहपङ्क्तिरूपाभिः षड्भिर्वीथीभिर्ग्रामं परिकल्पयन्ति । एकैकस्यां च वीथ्यां पञ्च पञ्च दिवसानि भिक्षां पर्यटन्ति । तत्रैव च वसतिं विदधति । उक्तं च **पञ्चकल्पचूर्णौ**–

"छब्भागे गामो कीरइ, एगेगे पञ्चदिवसं भिक्खं हिंडंति, तत्थेव वसंति, वासासु एगत्थ चउमासो"त्ति, तासु च वीथीषु दिवसे दिवसे नियमतोऽन्यामन्यां भिक्षामटन्ति । उद्धृतादिभिक्षापञ्चकमध्यादेकस्मिन् दिवसे यां भिक्षामटन्ति न पुनर्द्वितीयेऽपि दिने तामेवाटन्ति [1]किन्त्वन्यामिति भावः । इत्थं तावदस्माभिर्व्याख्यातं सुधिया तु समयाविरोधेनान्यथाऽपि व्याख्येयमिति ॥६१७॥

अथ सूत्रनानात्वं निर्दिदिक्षुर्यथालन्दिकभेदानेवाह–यथालन्दिका द्विविधाः [2]गच्छप्रतिबद्धा इतरे च–गच्छाऽप्रतिबद्धाः । ते पुनरेकैकशो द्विभेदाः–जिनकल्पिकाः स्थविरकल्पिकाश्च, तत्र यथालन्दिककल्पपरिसमाप्त्यनन्तरं ये जिनकल्पं प्रतिपत्स्यन्ते ते जिनकल्पिकाः । ये तु स्थविरकल्पमेवाश्रयिष्यन्ति ते स्थविरकल्पिकाः । इह च ये गच्छे प्रतिबद्धास्तेषां प्रतिबन्धोऽनेन कारणेन भवति 'अत्थस्से'त्यादि, अर्थस्यैव न सूत्रस्य, देशः–एकदेशोऽद्याप्यसमाप्तो–न गुरुसमीपे परिपूर्णो गृहीत इति । तद्ग्रहणाय गच्छे प्रतिबन्धस्तेषाम् , तस्यावश्यं गुरुसमीपे ग्रहीष्यमाणत्वादिति ॥६१८॥

---

१ किन्त्वन्यामन्यामिति–ख. ॥ २ तुलना-बृ.क.भा.टी.पृ. ४३०॥

अथ परिपूर्णं सूत्रार्थं गुरुसमीपे गृहीत्वैव कथं कल्पं न प्रतिपद्यन्ते ? इत्याह- [1]लग्नादिषु त्वरमाणेषु–शुभेषु लग्न-योग-चन्द्रबलादिषु झगित्यागतेषु सत्सु अन्येषु च लग्नादिषु दूरकालवर्तिषु न तथाभव्येषु वाऽगृहीतपरिपूर्णसूत्रार्था अपि लग्नादिभव्यतया कल्पं प्रतिपद्यन्ते । ततः प्रतिपद्य तं कल्पं गच्छान्निर्गत्य गुर्वधिष्ठितात्क्षेत्राद् ग्रामनगरादेर्बहिर्दूरदेशे स्थिता विशिष्टतरनिष्ठुरनिखिलनिजानुष्ठाननिरता गृह्णन्ति यद्गृहीतम्- अवशीतमर्थजातम् ॥६१९॥

तत्र चायं विधिः–यदुत आचार्यः स्वयं तत्र गत्वा तेभ्यो यथालन्दिकेभ्यः 'तत्थं' ति तमर्थशेषं प्रयच्छति–ददाति । अथ ते [2]एवाचार्यसमीपमागत्य किमिति तमर्थशेषं न गृह्णन्तीत्याह–'खेत्तं इंताणे'-त्यादि, क्षेत्रमध्यं समागच्छतां तेषां–यथालन्दिकानामेते–वक्ष्यमाणा [3]दोषाः । तथाहि–वन्द्यमानेषु गच्छवासिषु साधुषु अवन्द्यमानेषु च [4]कल्पस्थितेषु लोकमध्ये परिवादो–निन्दा भवति । तथाहि–यथालन्दिकानां कल्पस्थित्यैव आचार्यं मुक्त्वा अन्यस्य साधोः प्रणामं कर्तुं न कल्पते । गच्छसाधवश्च महान्तोऽपि तान् वन्दन्ते । ते पुनर्न प्रतिवन्दन्ते । ततो लोको वदेद् यथा दुष्टशीला एते येन अन्यान् साधून् वन्द्यमानानपि न व्याहरन्ति न वन्दन्ते वा । गच्छसम्बन्धिसाधूनां वा उपरि भ्रष्टत्वाशङ्का भवेत् । अवश्यमेते दुःशीला निर्गुणाश्च येन न वन्दन्ते । आत्मार्थिका वा एते येन अप्रतिवन्द्यमानानपि वन्दन्ते इति ॥६२०॥

[5]अथ यदि जङ्घाबलक्षीणतया तत्सकाशं गन्तुं न तरेत्–यदि न शक्नुयादाचार्यस्तदा एति–आगच्छति, क्वेत्याह–अनन्तरपल्लीं–मूलक्षेत्रात्सार्धद्विगव्यूतस्थं ग्रामविशेषं यद्वा प्रतिवृषभग्रामान्–मूल-

१ तुलना-बृ.क.भा.टीका पृ. ४३०। 'लग्नादिषूत्तरत्सु सत्सु' इति पञ्चवस्तुकवृत्तौ [पृ. २१६ B] पाठः ॥ २ एवाचार्यस्य स० जे. ॥ ३ तुलना बृ.क.भा. टीका पृ. ५८३। ४ कल्पमध्यस्थितेषु-सं. ॥ ५ तुलना-बृ.क.भा. टीका पृ. ५८४॥

क्षेत्राद् द्विगव्यूतस्थान् भिक्षाचर्याग्रामान्, अथवा बहिर्मूलक्षेत्रात् मूलक्षेत्र एव वा अन्यवसतिं वाशब्दान्मूलवसतिमिति। इयमत्र भावना—यद्याचार्यो यथालन्दिकसमीपे गन्तुं न शक्नोति तदा यस्तेषां यथालन्दिकानां मध्ये धारणाकुशलः सोऽन्तरपल्लीमागच्छति। आचार्यस्तु तत्र गत्वाऽर्थं कथयति। अत्र पुनः साधुसङ्घाटको मूलक्षेत्राद्भक्तं पानं च गृहीत्वा आचार्याय ददाति। स्वयं चाचार्यः सन्ध्यासमये मूलक्षेत्रमायाति। अथान्तरपल्लीमागन्तुं न शक्नोति तदा अन्तरपल्ली-प्रतिवृषभग्रामयोरन्तराले गत्वाऽर्थं कथयति, तत्रापि गन्तुं शक्त्यभावे प्रतिवृषभग्रामे, तत्रापि गन्तुमशक्तौ प्रतिवृषभग्राम-मूलक्षेत्रयोरन्तराले, तत्रापि गन्तुमसामर्थ्ये मूलक्षेत्रस्यैव बहिर्विजने प्रदेशे, अथ तत्रापि गन्तुमसमर्थस्तदा मूलक्षेत्रमध्य एवान्यस्यां वसतौ गत्वा, तत्रापि गमनशक्त्यभावे मूलवसतावेव प्रच्छन्नम् आचार्यस्तस्मै यथालन्दिकायार्थशेषं प्रयच्छतीति। उक्तं च कल्पचूर्णौ—

[1]आयरिए सुत्तपोरिसिं अत्थपोरिसिं च गच्छे ठियाणं दाउं अहालंदियाणं सगासं गन्तुं अत्थं सारेइ, अह न तरइ दोवि पोरिसीओ दाउं गन्तुं तो सुत्तपोरिसिं दाउं वच्चइ, अत्थपोरिसिं च सीसेणं [2]देवावेइ, अथ सुत्तपोरिसिंपि दाउं गन्तुं न तरइ तो दोवि पोरिसीओ सीसेणं [3]देवावेइ, अप्पणा अहालंदिए वाएइ, जइ न सक्केइ आयरिओ खेत्तबहिं [4]अहालंदियसगासं गन्तुं ताहे जो तेसिं [5]अहालंदियाणं

१ 'तुलना अत्थं दो व अहाउं वच्चइ वायावए व अन्नेणं। संघाडो मग्गेणं, भत्तं पाणं च नेइ उ गुरूणं। अच्चुण्हं थेरा वा तो अंतरपल्लिए पइ॥ अंतर पडिवसभे वा, विइयंतर बाहि वसमगामस्स। अन्नवसहीए तीए, अपरिभोगम्मि वाएइ॥" इति बृ.क.भा. २०१८-२०॥ २ देवावेइ-वि.॥ ३ वायावेइ-सं.। दावावेइ-वि.॥ ४ अधालं० जे. ॥ ५ अधालं०जे.॥

धारणाकुसलो सो अंतरपल्लि आसन्नखेत्तबहिं एइ। आयरिया 'तत्थ गन्तु' अत्थं कहिंति। एत्थ पुण संघाडो भत्तपाणं गहाय आयरियस्स नेइ। गुरु य वेयालियं पडिएइत्ति। एवंपि असमत्थे गुरू अंतरपल्लियाए पडिवसभगामस्स य अंतरा वाएइत्ति। असइ पडिवसभे वाएइ। असइ पडिवसभस्स वसभगामस्स य अंतरा वाएइ। असइ वसभगामस्स बहियाए वाएइ। अतरंते सग्गामे अन्नाए वसहीए। अतरंते [1]एक्कवसहीए। तीए च अपरिभोगे ओवासे वाएइ" इत्यादि ॥६२१॥

'तीए च अपरिभोगे' त्ति तस्यां च–मूलवसतावपरिभोगे तथाविधजनानाकीर्णस्थाने तेभ्योऽर्थशेषं प्रयच्छतीति योगः। तत्र च ये गच्छसाधवो महान्तोऽपि ते यथालन्दिकं वन्दन्ते। स पुनर्यथालन्दिकस्तान्न वन्दत इति। एवं तमर्थशेषं [3]गृहीत्वा ततः परं निष्ठितप्रयोजनत्वाद्गच्छे अप्रतिबद्धाः सन्तो यथालन्दिकाः स्वेच्छया–स्वकल्पानुरूपं विहरन्ति–निजकल्पं परिपालयन्त इति ॥६२२॥

अथ जिनकल्पिकस्थविरकल्पिकभेदभिन्नानां परस्परं विशेषमाह—

जिणकप्पियावि तहियं किंचि तिगिच्छंपि ते न [4]कारेंति।
निप्पडिकम्मसरीरा अच्छिन्नमलंपि नऽवणिंति ॥६२३॥
थेराणं नाणत्तं [5]अतरंतं अप्पिणंति गच्छस्स।
तेऽवि य से फासुएणं [6]करेंति सव्वंपि परिकम्मं ॥६२४॥

१ तस्स-जे. ॥ २ एगवसहीए चेव अप० जे. ॥ ३ गृहीत्वा परिनिष्ठित० सं. ॥ ४ करेंति-ता.। 'करिंति'-इति पंचवस्तुके पाठः ॥ ५ अतरंते-इति पञ्चवस्तुके पाठः ॥ ६ करंति-ता.। करिंति-इतिपञ्चवस्तुके वृ.क. भाष्ये च पाठः ॥

[1]एक्केक्कपडिग्गहगा सप्पाउरणा [2]हवंति थेरा उ ।
जे [3]पुण सिं जिणकप्पे [4]भयएसिं वत्थपायाइं ॥६२५॥
[बृ. क. भा. १४४१-२]

गणमाणओ जहण्णा तिण्णि [5]गण सयग्गसो य उक्कोसा ।
[6]पुरिसपमाणे पनरस सस्सहस्सो चेव उक्कोसा ॥६२६॥

पडिवज्जमाणगा वा एक्काइ [7]हवेज्ज ऊणपक्खेवे ।
होंति जहण्णा एए सयग्गसो चेव उक्कोसा ॥६२७॥

पुव्वपडिवन्नगाणवि उक्कोसजहण्णसो[8] परीमाणं ।
कोडिपुहुत्तं भणियं होइ अहालंदियाणं तु ॥६२८॥
[पञ्चवस्तुकः १५४७-५२, बृ. क. भा. १४४३-५]

'जिणकप्पियाय' गाहा, जिनकल्पिकाश्च यथालन्दिकास्तदा-कल्पकाले मारणान्तिकेऽप्यातङ्के समुत्पन्ने न कामपि चिकित्सां ते कारयन्ति, [9]तथाकल्पस्थितेः, अपिच निष्प्रतिकर्मशरीराः-प्रतिकर्म-

१ एक्किक्कक० ता. । पञ्चवस्तुकेऽपि एक्किक्कक० इति पाठः ॥ २ भवंति-मु. । हुयंति-इति पञ्चवस्तुके बृ. क. भाष्येऽपि च पाठः ॥ ३ पुणऽमी-इति पञ्चवस्तुके पाठः ॥ ४ भेएसिं-जे. । भइएसिं-वि. । मय तेसिं इति पञ्चवस्तुके बृ.क.भाष्ये पाठः ॥ ५ गणा-मु. । पञ्चवस्तुके 'गणा'-इति, बृ. क. भाष्ये 'गण'-इति पाठः ॥ ६ पुरिसपमाणं-इति पञ्चवस्तुके पाठः ॥ ७ हविज्ज-इति ता. प्रतौ पञ्चवस्तुके च पाठः ॥ ८ ०ओ इति पञ्चवस्तुके पाठः ॥ ९ यथा० मु. । पञ्चवस्तुकटीकायामपि (पृ २२०A) तथा० इति पाठः ॥

रहितदेहास्ते भगवन्तः, तत आस्तां तावदन्यत्, अक्षिमलमपि नापनयन्त्यप्रमादातिशयादिति ॥६२३॥

'थेराणं' गाहा. स्थविरकल्पिकयथालन्दिकानां जिनकल्पिकयथालन्दिकेभ्यो नानात्वं—भेदः, यथा अशक्नुवन्तं व्याधिबाधितं सन्तं स्वसाधुमर्पयन्ति गच्छस्य—गच्छवासिसाधुसमूहस्य । स्वकीयपञ्चक-गणपरिपूरणार्थं च तस्य स्थाने विशिष्टधृतिसंहननादिसमन्वितमन्यं मुनिं स्वकल्पे प्रवेशयन्ति । तेऽपि च गच्छवासिनः साधवः 'से' त्ति तस्याशक्नुवतः प्रासुकेन—निरवद्येनान्नपानादिना कुर्वन्ति सर्वमपि परिकर्म—प्रतिजागरणमिति ॥६२४॥

किञ्च—'एक्केक्क' गाहा, स्थविराः—स्थविरकल्पिकयथालन्दिका अवश्यमेव एकैकपतद्ग्रहकाः—प्रत्येक-मेकैकपतद्ग्रहधारिणः, तथा सप्रावरणाश्च भवन्ति । ये पुनरेषां—यथालन्दिकानां मध्ये जिनकल्पे भविष्यन्ति जिनकल्पिकयथालन्दिका इत्यर्थः, भाज्ये तेषां वस्त्र-पात्रे—सप्रावरणा-ऽप्रावरण-पतद्ग्रहधारि-पाणिपात्रभेद-[1]भिन्नभाविजिनकल्पापेक्षया केषाञ्चिद्वस्त्रपात्रलक्षणमुपकरणं भवति केषांचिच्च नेत्यर्थः ॥६२५॥

अथ सामान्येन यथालन्दिकप्रमाणमाह—'गणमाणओ' गाहा, गणमानतो—गणमाश्रित्य जघन्यत-स्त्रयो गणाः प्रतिपद्यमानका भवन्ति । शताग्रशश्च—शतपृथक्त्वमुत्कृष्टतो गणमानम्, पुरुषप्रमाणं त्वेतेषां प्रतिपद्यमानकानां जघन्यतः पञ्चदश । पञ्चको हि गणोऽमुं कल्पं प्रतिपद्यते, गणाश्च जघन्यतस्त्रयः, ततः पञ्च त्रिभिर्गुणिताः पञ्चदश । [2]उत्कृष्टतः पुनः पुरुषप्रमाणं सहस्रशः—सहस्रपृथक्त्वम् ॥६२६॥

१ °भिन्ना भावि° मु. ॥ २ उत्कृष्टः पुनः-सं. ॥

पुरुषप्रमाणमेवाश्रित्य पुनर्विशेषमाह–'पडिवज्जमाण' गाहा, प्रतिपद्यमानका एते जघन्यत एकादयो वा भवेयुः न्यूनप्रक्षेपे सति । यथालन्दिककल्पे हि पञ्चमुनिमयो गच्छः । तत्र च यदा ग्लानत्वादिकारणवशतो गच्छसमर्पणादिना तेषां न्यूनता भवति तदैकादिकः साधुस्तं कल्पं प्रवेश्यते येन पञ्चको गच्छो भवति । एवं जघन्या एते प्रतिपद्यमानकाः । तथा शताग्रश उत्कृष्टाः प्रतिपद्यमानका एवेति ॥६२७॥

'पुव्वपडिवन्न' गाहा, पूर्वप्रतिपन्नानामपि सामान्येनोत्कृष्टतो जघन्यतश्च परिमाणं कोटिपृथक्त्वं भणितं भवति यथालन्दिकानाम् , उक्तं च कल्पचूर्णौ—

"पडिवज्जमाणगा जहण्णेणं तिन्नि गणा उक्कोसेणं सयपुहुत्तं [1]गणाणं, पुरिसपमाणेणं पडिवज्जमाणगा जहण्णेणं पन्नरस पुरिसा, उक्कोसेणं सहस्सपुहुत्तं, पुव्वपडिवन्नगाणं जहण्णेणं कोडिपुहुत्तं, उक्कोसेणवि कोडिपुहुत्त" मिति, केवलं जघन्यादुत्कृष्टं विशिष्टतरं ज्ञेयमिति ॥६२८॥७०॥

इदानीं 'निज्जामयाण अडयाल' त्ति एकसप्ततितमं द्वारमाह—

उव्वत्त १ दार २ संथार ३ कहग ४ वाईय ५ अग्गदारंमि ६ ।
भत्ते ७ पाण ८ वियारे ९-१० कहग ११ दिसा जे समत्था य १२ ॥६२९॥
एएसिं तु [2]पयाणं चउक्कगेणं गुणिज्जमाणाणं ।
निज्जामयाण संखा होइ जहासमयनिद्दिट्ठा ॥६३०॥

१ गणाणं मु. नास्ति ॥ २ पमाणं-ता.जे.वि. ॥

[1]उव्वत्तंति परावत्तयंति पडिचण्णअण्णसणं चउरो १ ।
तह चउरो अब्भंतर दुवारमूलंमि चिट्ठंति २ ॥ ६३१ ॥
संथारयसंथरया चउरो ३ चउरो कहिंति धम्मं से ४ ।
चउरो य [2]वाइणो ५ अग्गदारमूले मुणिचउक्कं ६ ॥ ६३२ ॥
चउरो भत्तं ७ चउरो य पाणियं तदुचियं निहालंति ८ ।
चउरो उच्चारं [3]परिट्ठवंति ९ चउरो य पासवणं १० ॥६३३॥
चउरो बाहिं धम्मं कहिंति ११ चउरो य चउसुवि दिसासु ।
चिट्ठंति १२ उवद्दवरक्खया [4]सहस्सजोहिणो मुणिणो ॥६३४॥
ते सव्वाभावे ता [5]कज्जा एक्केक्कगेण ऊणा जा ।
तप्पासट्ठिय एगो जलाइअण्णेसओ बीओ ॥६३५॥

'उव्वत्ते' त्यादिगाथाद्वयम्, निर्यामका–ग्लानप्रतिचारिणः, ते च पार्श्वस्था-ऽवसन्नत्वादिदोषदुष्टा अगीतार्थाश्च न कर्तव्याः किन्तु कालौचित्येन गीतार्थतादिगुणयुक्ता विशेषतो वैयावृत्यकरणोद्यताः । एते च उत्कर्षतो [6]ऽष्टचत्वारिंशद्भवन्ति । तद्यथा–'उव्वत्त'त्ति उद्वर्तनादिशरीरपरिचेष्टाकारिणः १, 'दार' त्ति अभ्यन्तरद्वारमूलस्थायिनः २, 'संथार' त्ति संस्तारककर्तारः ३, 'कहग' त्ति अनशनिनः पुरतो धर्मकथकाः ४,

१उव्वत्तयं-ता. ॥ २ वायणो से अग्गदारे मुणिचउक्कं-ता. । वायणो उग्गदारे मूल चउक्कं-वि ॥ ३ पुणठवंति-ता. ॥ ४ सहस्स जोहिणा-वि. ॥ ५ कुज्जा-मु. ॥ ६ ०ऽष्टा०जे. वि. ।

'वाइय' त्ति वादिनः ५, 'अग्गदारंमि'त्ति अग्रद्वारमूलावस्थायकाः ६, 'भत्त'त्ति तदुचितभक्तानयनयोग्याः ७, [1]'पाण' त्ति पानानयनयोग्याः ८, 'वियार' त्ति उच्चार-प्रश्रवणयोर्ग्रहणम्, ततः उच्चारपरिष्ठापकाः ९, प्रश्रवणपरिष्ठापकाश्च १०, 'कहग' त्ति' बहिर्धर्मकथकाः ११, 'दिसा जे समत्था य' त्ति दिशासु पूर्वाद्यासु चतसृष्वपि ये समर्थाः-सहस्रयोधिप्रभृतयः १२ ॥६२९॥

'एएसिं तु पयाणं' ति एतेषां पूर्वोक्तानां द्वादशानामपि पदानां प्रत्येकं साधुचतुष्टयसद्भावात् चतुष्केण गुण्यमानानां निर्यामकसङ्ख्या भवति यथा-येन प्रकारेण समये-सिद्धान्ते निर्दिष्टा-कथिता [2]अष्टचत्वारिंशल्लक्षणेत्यर्थः ।

अन्ये तु उच्चार-प्रश्रवणपरिष्ठापने मिलितेऽपि चतुरोऽभिधाय ततो दिक्षु प्रत्येकं द्वौ द्वाविंत्यष्टौ महायोधान्मन्यन्ते इत्येवमष्टचत्वारिंशतं प्रतिपादयन्तीति ॥६३०॥

अथ सूत्रकृदेवैतान् विवृणोति-'उव्वत्तंते'त्यादि गाथाचतुष्टयम्, इह च उत्सर्गतस्तावदनशनिना स्वयमेवोद्वर्त्तनादि विधेयम्। अथ न शक्नोति तदा तं प्रतिपन्नानशनं चत्वारः साधव उद्वर्तयन्ति परावर्त्तयन्ति च। उपलक्षणमेतत्, उत्थापनोपवेशन-बहिर्निर्गमना-ऽन्तःप्रवेशनोपधिप्रत्युपेक्षणादिकमपि तदीयं परिकर्म त एव कुर्वन्ति। तथा अभ्यन्तरद्वारमूले जनसम्मर्दरक्षणार्थं चत्वारः साधवस्तिष्ठन्ति। जनसम्मर्दे हि कदाचिदनशनिनोऽसमाधिरप्युत्पद्येत। तथा चत्वारस्तदनुकूलसुखस्पर्शाद्युपेतं समाधिसंवर्धनाय संस्तारकमास्तृणन्ति। तथा चत्वारः साधवो विशिष्टदेशनालब्धिसम्पन्नाः सततं कथयन्ति 'से' तस्य विदितवस्तु-

१ पानत्ति-मु. ॥ २ अष्टा० जे. ॥

तत्त्वस्यापि संवेगासमुल्लासकं धर्मम्, तथा तस्यानशनिनः प्रभावनामतिशायिनीं श्रावकलोकैः क्रियमाणां दृष्ट्वा केचिद् दुरात्मानस्तामसहमानाः [1]सर्वज्ञमतनिराकरणाय वाददानायोपतिष्ठन्ते, ततस्तेषां तिरस्करणाय वादिनो–वावदूकाश्चत्वारः प्रमाणप्रविणाः प्रगुणीभूतास्तिष्ठन्ति । तथाऽग्रद्वारमूले प्रत्यनीकादिप्रवेशरक्षार्थं मुनिचतुष्कं–चत्वारः साधवः सामर्थ्योपेतास्तिष्ठन्ति । तथा प्रत्याख्यातेऽप्याहारे परीषहपीडितो यद्यसौ कथमप्याहारमभिलषति तदा मा कथञ्चिदसौ प्रत्यनीकदेवताधिष्ठितो याचते इति परीक्षार्थं प्रथमतस्तावत्पृच्छ्यते यथा–कस्त्वं गीतार्थो वा अगीतार्थो वा ?, [2]प्रतिपन्नानशन एवमेव वा ? इदानीं दिनं वर्तते रात्रिर्वेत्यादि । एवं च पृष्टे यद्यसौ प्रस्तुतं वक्ति तदा ज्ञायते न देवताधिष्ठितः किन्तु परीषहपीडित इति ज्ञात्वा समाधिसम्पादनाय किञ्चिदाहारो दीयते । ततस्तद्बलेन परीषहान् पराभूय प्रस्तुतपारगामी भवति । अथ वेदनार्दित आहारं न करोति तदाऽऽर्त्तध्यानोपगतस्तिर्यक्षु भवनपतिव्यन्तरेषु वा समुत्पद्येत । प्रत्यनीकेषु च भवनपति-व्यन्तरेषूत्पन्नः कोपवशात्कदाचित्पार्श्वात्ययतीनामुपद्रवमपि कुर्यादिति, ततश्चत्वारो मुनयस्तस्यानशनिन उचितं–योग्यम् आहारं **'निभालयन्ति'** गवेषयन्ति । तथा चत्वारो देहदाह्युपशमसमर्थं पानीयमन्वेषयन्ति । तथा चत्वार उच्चारं–पुरीषं परिष्ठापयन्ति–परित्यजन्ति । तथा चत्वारः प्रश्रवणं–मूत्रं परिष्ठापयन्ति । तथा चत्वारो बहिर्भागे जनानां पुरतश्चेतश्चमत्कारकारिणं मनोहारिणं धर्मं कथयन्ति । तथा चत्वारश्चतसृष्वपि दिक्षु क्षुद्रोपद्रवरक्षकाः सहस्रयोधिनो–महामल्ला मुनयस्तिष्ठन्ति । क्षुद्रोपद्रवनिवारणार्थमेकैकश्चतसृष्वपि दिक्षु तिष्ठतीत्यर्थः ॥६३१-६३४॥

१ सर्वज्ञमति० जे. ॥ २ प्रतिपन्नाशन-मु. ॥

अथैते परिपूर्णा यदा न प्राप्यन्ते तदा किमित्याह–ते–निर्यामकाः सर्वेषामष्टचत्वारिंशत्सङ्घयानामभावे एकैकहान्या तावत्कार्या यावज्जघन्यतोऽवश्यं द्वौ निर्यामकौ । तत्रैकस्तत्पार्श्वस्थितः–तस्य-प्रतिपन्नानशनस्य सर्वदैव समीपावस्थायी । द्वितीयस्तु जलाद्यन्वेषको भक्तपानाद्यानयनार्थं पर्यटतीति । एकेन पुननिर्यामकेन न कर्तव्यैवानशनप्रतिपत्तिः । यदुक्तम्–

□ 'एगो जइ निज्जवगो अप्पा चत्तो परो पवयणं च । सेसाणमभावेऽवि हु ता बीओऽवस्स कायव्वो ॥१॥ त्ति ॥ ६३५ ॥७१॥

इदानीं [1]पणवीसं भावणाओ [2]सुहाओ' इति द्वारप्रतितमं द्वारमाह—

[3]इरियासमिए सया जए १ उवेह भुंजेज्ज व पाण-भोयणं २ ।
आयाणनिक्खेवदुगुंछ ३ संजए समाहिए संजयए मणो ४ वई ५ ॥६३६॥
अहस्ससच्चे ६ अणुवीय भासए ७, जे कोह ८ लोह ९ भय १० मेव वज्जए ।
से दीहरायं [4]समुपेहिया [5]सया, मुणी हु मोसंपरिवज्जए [6]सिया ॥६३७॥

□ यदि को निर्यामकस्तर्हि आत्मा त्यक्तः परः प्रवचनं च । तस्मात् शेषाणामभावेऽपि चावश्यं द्वितीयः कर्त्तव्यः (निर्यामकः) ॥

१ पणवीसं-मु. ॥ २ सुहाओ-मु.नास्ति ॥ ३ गाथापञ्चकमिदं [६३६-४०] आव.हारिभद्रयाम् [पृ.६५८] अपि उपलभ्यते ॥ ४ समुप्पेहिया-वि. । ५ सिया-इति ता. प्रतौ आव. हारिभद्रयां (पृ. ६५८) च पाठः ॥ ६ सया-इति ता. प्रतौ आव. हारिभद्रयां च पाठः ।

सयमेव उ उग्गहजायणे ११ घडे मइमं [1]निसम्मा १२ सइ भिक्खु उग्गहं १३ ।
अणुन्नविय [2]भुंजीय पाण-भोयणं १४ जाइत्ता साहम्मियाण [3]उग्गहं १५ ॥६३८॥
आहारगुत्ते १६ [4]अविभूसियप्पा १७ [5]इत्थिं न निज्झाय १८ न संथवेज्जा १९ ।
बुडे मुणी खुड्डकहं न कुज्जा २० धम्माणुपेही संधए बंभचेरं ॥६३९॥
जे सद्द २१ रूव २२ रस २३ गंधमागए २४, फासे य संपप्प मणुण्ण-पावए २४ ।
गेहिं पओसं न करेज्ज [6]पंडिए, से होइ [7]दंते विरए अकिंचणे ॥६४०॥

'ईरियासमिए' इत्यादि वृत्तपञ्चकम्, प्राणातिपाता[8]दिनिवृत्तिलक्षणमहाव्रतानां दार्ढ्योपादनार्थं भाव्यन्ते–अभ्यस्यन्ते इति [9]भावनाः । अनभ्यस्यमानाभिर्भावनाभिरनभ्यस्यमानविद्यावन्मलीमसी भवन्ति महाव्रतानीति । ताश्च प्रतिमहाव्रतं पञ्च पञ्च भवन्ति । तत्र प्रथममहाव्रतस्य ताः कथ्यन्ते । [10]ईरणं ईर्या–गमनं तत्र समितः–उपयुक्तः । असमितो हि प्राणिनो हिंस्यादिति प्रथमा भावना १ । तथा सदा–सर्वकालं 'यतः' सम्यगुपयुक्तः सन् 'उवेह' त्ति अवलोक्य भुञ्जीत वाशब्दाद् गृह्णीत वा पान-भोजनम् । अयमर्थः–प्रतिगृहं पात्रमध्यपतितः पिण्डश्चक्षुराद्युपयुक्तेन तत्समुत्थागन्तुकसत्त्वरक्षणार्थं प्रत्यवेक्षणीयः । आगत्य च वसतौ पुनः प्रकाशवति प्रदेशे स्थित्वा सुप्रत्यवेक्षितं पान-भोजनं विधाय

१ निसंसा-वि. ॥ २ भुंजिय-वि. ॥ ३ भोयणं-जे. । भोयणा-वि. । भोयण-सं ॥ ४ अविभा० जे. ॥ ५ इत्थी-मु. । इत्थं-जे. ॥ ६ पिंडए जे. वि. ॥ ७ दंभे विरए-वि. । दंति रए-जे. ॥ ८ °दिवृ० सं. ॥ ९ तुलना–तत्त्वार्थ सिद्धसेनीय-वृत्तिः ७/३, योगशास्त्रटीका १/२६ तः, धर्मसङ्ग्रहटीका भा.२, पृ. १२५ तः ॥ १० तुलना–आव. हा. पृ. ६५८ तः ॥

प्रकाशप्रदेशावस्थितेन भोक्तव्यम् । अनवलोक्य भुञ्जानस्य हि प्राणिहिंसा सम्भवतीति द्वितीया २ । तथा 'आदान-निक्षेपौ' पात्रादेर्ग्रहणमोक्षावागमप्रतिषिद्धौ 'जुगुप्सति' न करोतीति आदाननिक्षेप-जुगुप्सकः । आगमानुसारेण प्रत्यवेक्षणप्रमार्जनपूर्वमुपयुक्तः सन्नुपधेरादान-निक्षेपौ करोतीत्यर्थः । [1]अजुगुप्सको हि सत्त्वव्यापादनं विदध्यादिति तृतीया ३ । तथा 'संयतः' साधुः 'समाहितः' समाधानपरः सन् 'संयतते' प्रवर्तयत्यदुष्टं मनः, दुष्टं हि मनः क्रियमाणं कायसंलीनतादिकेऽपि सति कर्मबन्धाय सम्पद्यते । [2]श्रूयते हि प्रसन्नचन्द्रो राजर्षिर्मनो[3]गुप्त्याऽभाविताऽहिंसाव्रतो हिंसामकुर्वन्नपि सप्तमनरकपृथ्वीयोग्यं कर्म निर्मितवानिति चतुर्थी ४ । एवं वाचमप्यदुष्टां प्रवर्तयेत्, दुष्टां प्रवर्तयन् जीवान् विनाशयेदिति पञ्चमी ५ । [4]तत्त्वार्थे तु अस्याः स्थाने एषणासमितिलक्षणा भावना भणिता, इति प्रथमव्रतभावनाः पञ्च ॥६३६॥

अथ द्वितीयमहाव्रतभावना भण्यन्ते—अत्र अहास्यात्—हास्यपरिहारात् 'सत्यः' सत्यवाक्, हास्येन ह्यनृतमपि ब्रूयादिति प्रथमा १ । तथा 'अनुविचिन्त्य' सम्यग्ज्ञानपूर्वकं पर्यालोच्य 'भाषको' वक्ता । अनालोचितभाषी हि कदाचिन्मृषाऽप्यभिदधीत । ततश्चात्मनो वैरपीडादयः सत्त्वोपघातश्च भवेदिति द्वितीया २ । तथा यः क्रोधं लोभं भयमेव वा वर्जयेत्—परिहरेत् स एव मुनिर्दीर्घरात्रं—मोक्षं 'समुपेक्षिता' सामीप्येन मोक्षावलोकनशीलः सन् 'सदा' सर्वकालं हु—निश्चयेन 'मोसं' ति अनुस्वारस्यालाक्षणि-

१ जुगु० जे ॥ २ तुलना-योगशास्त्रटीका १ । २६ ॥ ३ °गुप्त्य० मु. ॥
४ द्रष्टव्यं तत्त्वार्थभाष्यम् (७ । ३) । योगशास्त्रटीका [१/२६] अपि द्रष्टव्या ॥

कत्वान्मृषापरिवर्जकः 'सिया' स्यात् । अयमर्थः—क्रोधपरवशो हि वक्ता स्वपरनिरपेक्षो यत्किञ्चनभाषी मृषाऽपि भाषेत, अतः क्रोधस्य निवृत्तिरनुत्पादो वा श्रेयानिति तृतीया ३ । तथा लोभाभिभूतचित्तोऽप्यस्यर्थमर्थकाङ्क्षया कूटसाक्षित्वादिना वितथभाषी भवति, अतः सत्यव्रतमनुपालयता लोभः प्रत्याख्येय इति चतुर्थी ४ । तथा भयार्त्तः [1]निजप्राणादिरक्षणेच्छया सत्यवादितां [2]व्यभिचरति ततो निर्भयवासनाऽऽधानमात्मनि [3]विधेयमिति पञ्चमी ५ । इति द्वितीयमहाव्रतभावनाः पञ्च ॥६३७॥

अथ तृतीयमहाव्रतभावनाः प्रोच्यन्ते, तत्र स्वयमेव—आत्मनैव न तु परमुखेन साधुः प्रभुं प्रभुसन्दिष्टं वा सम्यक्परिज्ञाय अवग्रहस्य—देवेन्द्र-राज-गृहपति-शय्यातर-साधर्मिकभेदभिन्नस्य याचने—[4]याच्ञायां प्रवर्तते । परमुखेन हि याचने [5]ऽस्वामियाचने च परस्परविरोधेन च अकाण्डघाटनादयोऽदत्तपरिभोगादयश्च दोषा इति प्रथमा १ । तथा तत्रैवानुज्ञापितावग्रहे तृणादिग्रहणार्थं मतिमान् घटेत—चेष्टेत निशम्य—आकर्ण्यावग्रहप्रदातुस्तृणाद्यनुज्ञावचनम्, अन्यथा तददत्तं स्यादिति द्वितीया २ । तथा 'सदा, सर्वकालं भिक्षुरवग्रहं स्पष्टमर्यादया याचेत । अयमर्थः—सकृदनेऽपि स्वामिनाऽवग्रहे भूयो भूयोऽवग्रहयाचनं कर्तव्यम् । पूर्वलब्धेऽवग्रहे [6]ग्लानाद्यवस्थायां मूत्रपुरीषोत्सर्ग-पात्रकरचरण[7]प्रक्षालनस्थानानि दायकचित्त-

१ प्राणादि० जे. । योगशास्त्रवृत्तौ (१/२७) अपि प्राणादि० इति पाठः ॥ २ व्यभिभरति-मु. ॥
३ निधे० जे. ॥ ४ याञ्चायां-मु. ॥ ५ तुलना-तत्त्वार्थ० सिद्ध० ७ । ३७, योगशास्त्रवृत्तिः १/२८-२९ ॥
६ ग्लानाद्यवस्थासु मूत्र०-इति तत्त्वार्थ० सिद्ध० भा. २, पृ. ४६ । ग्लानाद्यवस्थामूत्र० इति योगशास्त्रवृत्तौ (१ । २८-२९) पाठः ॥ ७ ०प्रक्षालने० सं. पो. ॥

पीडापरिहारार्थं याचनीयानीति तृतीया ३ । तथाऽनुज्ञाप्य गुरुमन्यं वा भुञ्जीत पानभोजनम् । अयमर्थः—सूत्रोक्तेन विधिना प्रासुकमेषणीयं लब्धमालोचनापूर्वं गुरवे निवेद्य गुरुणाऽनुज्ञातो मण्डल्यामेकको वाऽश्नीयात् । उपलक्षणमेतत्, अन्यदपि यत्किञ्चिदौधिकौपग्रहिकमेदमुपकरणं धर्मसाधनं तत्सर्वं गुरुणाऽनुज्ञातमेव भोक्तव्यम्, अन्यथाऽदत्तमेव परिभुक्तं स्यादिति चतुर्थी ४ । तथा समानो धर्मः सधर्मस्तेन चरन्तीति साधर्मिकाः—प्रतिपन्नैकशासनाः संविग्नाः साधवः, तेषां पूर्वपरिगृहीतक्षेत्राणामवग्रहं मासादि-कालमानेन पञ्चक्रोशादिक्षेत्ररूपं याचित्वा स्थानादि कार्यम्, तदनुज्ञातं हि तत्र उपाश्रयादि समस्तं गृह्णीयात्, अन्यथा चौर्यं स्यादिति पञ्चमी ५ । एताः तृतीयव्रतभावनाः पञ्च ॥६३८॥

इदानीं चतुर्थव्रतभावनाः प्रतिपाद्यन्ते—तत्र आहारे गुप्तः स्यात् न पुनः स्निग्धमतिमात्रं भुञ्जीत । यतो निरन्तरबृंह्यस्निग्धमधुररसप्रीणितः प्रधानधातुपरिपोषणेन वेदोदयादब्रह्मापि सेवेत । अतिमात्राहारस्य तु न केवलं ब्रह्मव्रतविलोपविधायित्वाद्दुर्जनं कायक्लेशकारित्वादपीति प्रथमा १ । तथा अविभूषितात्मा—विभूषा-विरहितः, देहस्नान-विलेपनादिविविधविभूषानिरतो हि नितान्तमुद्रिक्तचित्ततया ब्रह्मविराधकः स्यादिति द्वितीया २ । तथा स्त्रियं न निरीक्षेत, तदव्यतिरेकात्तदङ्गान्यपि वदन-स्तनप्रभृतीनि सस्पृहं न प्रेक्षेत । निरन्तरमनुपमवनितावयवविलोकने हि ब्रह्मबाधासम्भव इति तृतीया ३ । तथा स्त्रियं न संस्तुवीत-स्त्रिभिः सह परिचयं न कुर्यात् तत्संसक्तवसति-तदुपभुक्तशयनासनादिसेवनेन । अन्यथा ब्रह्मव्रतभङ्गः स्यादिति चतुर्थी ४ । तथा बुद्धः—अवगततत्त्वो [1]मुनिः—साधुः क्षुद्राम्—अप्रशस्यां ब्रह्मचर्यप्रस्तावात् स्त्रीविषयां कथां

१ मुनिः क्षुद्रां-मु. ॥

न कुर्यात् । तत्कथाऽऽसक्तस्य हि मानसोन्मादः सम्पद्येत इति पञ्चमी ५ । एताभिः पञ्चभिर्भावनाभिर्भावितान्तःकरणो धर्मानुप्रेक्षी—धर्मसेवनतत्परः साधुः सन्धत्ते—सम्यक्पुष्टिं नयति ब्रह्मचर्यमिति चतुर्थमहाव्रतभावनाः ॥६३९॥

अथ पञ्चमव्रतभावना निगद्यन्ते—तत्र यः साधुः शब्द-रूप-रस-गन्धान् आगतान्—इन्द्रियविषयीभूतान्, मकारोऽयमलाक्षणिकः, स्पर्शांश्च सम्प्राप्य—समासाद्य मनोज्ञान्—मनोहारिणः पापकान्—विरूपान् इष्टाननिष्टांश्चेत्यर्थः, गृद्धिम्—अभिष्वङ्गलक्षणां प्रद्वेषं च—अप्रीतिलक्षणं यथाक्रमं न कुर्यात्, पण्डितो—विदिततत्त्वः सन्, स दान्तो जितेन्द्रियो विरतः—सर्वसावद्ययोगेभ्यो भवत्यकिञ्चनः—किञ्चन बाह्या-ऽभ्यन्तरपरिग्रहभूतं नास्यास्तीतिव्युत्पत्त्या परिग्रहविरतिव्रतवानित्यर्थः । अन्यथा शब्दादिषु मूर्च्छादिमद्भावात् पञ्चमव्रतविराधना स्यादिति पञ्चसु विषयेष्वभिष्वङ्ग-प्रद्वेषवर्जनात् पञ्चमव्रतस्य पञ्च भावनाः । मिलितास्तु पञ्चविंशतिरिति । एताश्च [1]**समवायाङ्गतत्त्वार्थादिषु** किञ्चिदन्यथाऽपि दृश्यन्ते इति ॥६४०॥७२॥

इदानीं '**असुहाओ** [2]**पणवीसं**' ति त्रिसप्ततितमं द्वारमाह—

[3]कंदप्प १ देवकिब्विस २ अभिओगा ३ [4]आसुरी ४ य सम्मोहा ।
एसा हु अप्पसत्था पंचविहा भावणा तत्थ ॥६४१॥

---

१ समवायाङ्गसूत्रस्य २५ तमसमवाये, तत्त्वार्थसूत्रस्य(७३)भाष्ये इति ज्ञेयम् ॥ २ पणवीसं-मु.।
३ तुलनार्थं विशेषार्थं दृश्यताम् पञ्चवस्तुकः १६२८, १६३०, १६३६, १६४२, १६४९, १६५५; बृहत्कल्प. भाष्य १२९३, १२९४,१३०२, १३०८, १३१४, १३२१। स्थानाङ्गसूत्रम् सू. ३५४॥ ४ आसुरा-इति बृ.क.भाष्ये (१२९३), पञ्चवस्तुके (१६२८), स्थानाङ्गवृत्तौ (पृ.२७५A)च पाठः ॥

कंदप्पे १ कुक्कुइए २ दोसीलत्ते य ३ हासकरणे ४ य ।
परविम्हियजणणेऽवि य ५ कंदप्पोऽणेगहा तह य ॥६४२॥
सुनयनाण १ केवलीणं २ धम्मायरियाण[1] ३ संघ ४ साहूणं ।
माई अवण्णवाई किब्विसियं भावणं कुणइ ॥६४३॥
[2]कोउय १ भूईकम्मे २ पसिणेहिं ३ तह य पसिणपसिणेहिं[3] ४ ।
तहय निमित्तेणं ५ चिय पंचवियप्पा भवे सा य ॥६४४॥
सइविग्गहसीलत्तं १ संसत्ततवो २ निमित्तकहणं च ३ ।
निक्किवयावि य ४ अवरा पंचमगं निरणुकंपत्तं ५ ॥६४५॥
उम्मग्गदेसणा १ मग्गदूसणं २ मग्गविपडि[4]वत्ती य ३ ।
मोहो य ४ मोहजणणं ५ एवं सा हवइ पंचविहा ॥६४६॥

'कंदप्पे' गाहा 'कन्दर्पः-कामस्तत्प्रधाना निरन्तरं नर्मादिनिरततया विटप्राया देवविशेषाः कन्दर्पास्तेषामियं कान्दर्पी। एवं देवानां मध्ये किल्बिषाः-पापा अत एवास्पृश्यादिधर्मका देवाश्च ते किल्बिषाश्चेति वा देवकिल्बिषास्तेषामियं [6]दैवकिल्बिषी । आ—समन्तात् आभिमुख्येन [7]युज्यन्ते—प्रेष्यकर्मणि व्यापार्यन्ते

१ ०य-जे. ॥ २ कोई य- जे. ॥ ३ ०ण-ता. ॥ ४ ०वित्ति-मु. ॥ ५ आद्धारं तुलना-बृ.क. भा. टीका पृ. ३९९ तः; पञ्चवस्तुकटीका पृ. २३० तः ॥ ६ किल्बिषी-मु. । देवकिल्बिषी-जे. ॥ ७ [वा] युज्यन्ते-इति बृ. क. भा. वृत्तौ (पृ.३९९) पाठः ॥

इत्याभियोग्याः-किङ्करस्थानीया देवविशेषास्तेषामियमाभियोगी। असुरा-भुवनवासिदेवविशेषास्तेषामियमासुरी। संमुह्यन्तीति सम्मोहा-मूढात्मानो देवविशेषास्तेषामियं सम्मोही। एषा हु-स्फुटं 'पञ्चविधा' पञ्चप्रकारा 'अप्रशस्ता' सङ्क्लिष्टा भावना तत्तत्स्वभावाभ्यासरूपा भणितेति शेषः, आसां च मध्ये संयतोऽपि सन् यो यस्यां भावनायां वर्तते कथञ्चिद्बाधमान्द्यात् स तद्विधेष्वेव-कन्दर्पादिप्रकारेषु देवेषु गच्छति चारित्र-लेशप्रभावात्। । उक्तं च—

△'जो संजओऽवि एयासु अप्पसत्थासु वट्टइ कहिंचि। सो तव्विहेसु गच्छइ सुरेसु भइओ चरणहीणो ॥१॥'

[पञ्चवस्तुकः १६२६, तुलना-बृ.क.भा. १२९४]

अत्र 'भइओ चरणहीणो' त्ति यः पुनः सर्वथापि चारित्ररहितः स भाज्यो-विकल्पनीयः, कदाचित्त-द्विधेष्वेव सुरेषूत्पद्यते कदाचिच्च नारक-तिर्यक्कुमानुषेष्विति ॥६४१॥

एताश्च पञ्चापि भावनाः प्रत्येकं पञ्चविधाः, तत्र प्रथमं पञ्चविधां कन्दर्पभावनामाह-'कंदप्पे'त्यादि, कन्दर्पे कौकुच्ये दुःशीलत्वे हास्यकारणे परविस्मयजननेऽपि च विषये भवति कन्दर्पः-कन्दर्पविषया भावना कान्दर्पिकी इत्यर्थः। 'अनेकविधा' पञ्चप्रकारा, तत्र उच्चैःस्वरेण हसनम्, तथा परस्परं परिहासः तथा गुर्वादिनाऽपि सह निष्ठुरवक्रोक्त्यादयः स्वेच्छालापाः, तथा कामकथाकथनं तथा एवं चैवं च कुर्विति विधानद्वारेण कामोपदेशः, तथा कामविषया प्रशंसा च कन्दर्पशब्देनोच्यते। [1]यदुक्तम्-

△ यः संयतोऽपि एतासु अप्रशस्तासु वर्तते कथंचित्। स तद्विधेषु गच्छति सुरेषु भक्तश्रमणहीनः ॥१॥

१ तदुक्तम्-मु. ॥

'●कहकहकहस्स हसणं कंदप्पो अणिहुया य संलावा । कंदप्पकहाकहणं कंदप्पुवएस संसा य ॥१॥'

[पञ्चवस्तुकः १६३१, बृ. क. भा. १२९६]

तथा कुकुचो–'भण्डचेष्टा तस्य भावः कौकुच्यम् , तद् द्वेधा–कायकौकुच्यं वाकौकुच्यं च । तत्र कायकौकुच्यं यत्स्वयमहसन्नेव भ्रू नयनादिभिर्देहावयवैर्हासकारकैस्तथा तथा चेष्टां करोति यथा परो हसतीति । यदुक्तम्—

'★भ्रुम-नयण-वयण-दसणच्छएहिं कर-चरण-कण्णमाईहिं । तं तं करेइ जह हस्सए परो अत्तणा अहसं ॥१॥'

[बृ. क. भा. १२९७]

वाकौकुच्यं तु यत्परिहासप्रधानैस्तैस्तैर्वचनजातैर्विविधजीवविरुतैर्मुखातोद्यवादितया च परं हासयतीति । यदुक्तम्–

"※ वाया कुक्कुइओ पुण तं जंपइ जेण हस्सए अन्नो । नाणाविहजीवरुए कुव्वइ मुहतूरए चेव ॥१॥

[बृ. क. भा. १२९८]

तथा दुष्टं शीलं–स्वभावो यस्य स दुःशीलः तद्भावो दुःशीलत्वम् , तत्र यत्सम्भ्रमावेशवशादपर्यालोच्य द्रुतं द्रुतं भाषते यच्च शरत्काले दर्पोद्धुरप्रधानबलीवर्द इव द्रुतं द्रुतं गच्छति, यच्च सर्वत्रासमीक्षितं कार्यं द्रुतं द्रुतं करोति, यच्च स्वभावस्थितोऽपि तीव्रोद्रेकवशादर्षेण स्फुटतीव स्फुटति च एतद् दुःशीलत्वम् । यदुक्तम्–

● कहकहकहेति हसनं कन्दर्पैः अनिभृताश्च संलापाः । कन्दर्पकथाकथनं कन्दर्पोपदेशः कन्दर्पप्रशंसा च ॥ १ ॥
१ भाण्ड–मु. । भण्डचेष्टः–पी. ॥
★ भ्रू-नयन-वदन-दशनच्छदैः कर-चरण-कर्णादिभिः । तत्तत् करोति यथा परो हसति आत्मनाऽहसन् ॥ १ ॥
※ वाक्कौत्कुचिकः पुनस्तत् जल्पति येन हसति अन्यः । नानाविधजीवरुतानि मुखतुर्याणि च करोति ॥ १ ॥

"●भासइ दुयं दुयं गच्छइ य दरिओव्व [1]गोविसो सरए। सव्वदुयदुयकारी फुडइ व ठिओ वि दप्पेणं ॥१॥"
[पञ्चवस्तुकः १६३३, बृ. क. भा. १२९९]

तथा [2]भण्ड इव परेषां छिद्राणि–विरूपवेष-भाषा[3]विषयाणि निरन्तरमन्वेषयन् विचित्रैस्तादृशैरेव वेष-वचनैर्यद् द्रष्टृणामात्मनश्च हासं जनयति तद् हास्यकारणम् यदुक्तम्—

"★वेस-वयणेहिं हासं जणयंतो अप्पणो परेसिं च। अह हासणो त्ति भन्नइ घयणोव्व छलं नियच्छन्तो॥१॥
[पञ्चवस्तुकः १६३४, बृ. क. भा. १३००]

'घयणो'त्ति [4]भण्डः ।

तथा इन्द्रजालप्रभृतिभिः कुतूहलैः प्रहेलिका-कुहेटिकादिभिश्च तथाविधग्राम्यलोकप्रसिद्धैर्यत्स्वयमविस्मयमानो बालिशप्रायस्य जनस्य मनोविभ्रममुत्पादयति तत्परविस्मयजननम् यदुक्तम्—

△सुरजालमाइएहिं तु विम्हयं कुणइ तव्विहजणस्स । तेसु न विम्हयइ सयं आहट्ट-कुहेडएहिं च ॥१॥"
[पञ्चवस्तुकः १६३५, बृ. क. भा. १३०१]

अत्र 'आहट्ट' त्ति प्रहेलिका, कुहेडकः—आभाणकप्रायः प्रसिद्ध एव ॥६४२॥

● भाषते द्रुतं द्रुतं गच्छति च दृप्तो गोवृषः शरदि । सर्वद्रुतद्रुतकारी स्थितोऽपि दर्पेण स्फुटतीव ॥ १ ॥ १ गोव सो-मु. । पञ्चवस्तुके बृ. क. भाष्येऽपि च गोविसो-इति पाठः ॥ २ भाण्ड-मु. ॥ ३ विपर्ययाणि-इति बृ.क. भा. वृत्तौ (पृ. ४००) पाठः ॥ ४ माण्डः-मु. ॥

★वेष-वचनाभ्यां हास्यमात्मनः परेषां च जनयन् । अथ हास्यकारक इति भण्यते भण्ड इव छलं पश्यन् ॥१॥

△ तद्विधजनस्येन्द्रजालादिभिर्विस्मयं करोति । तेषु न स्वयं विस्मयते प्रहेलिका-कुहेडकैः ॥१॥

अथ दैवकिल्बिषीं भावनां पञ्चविधामाह–'सुये'त्यादि, श्रुतज्ञानस्य–द्वादशाङ्गीरूपस्य केवलिनां-केवलज्ञानवतां धर्माचार्याणां-धर्मोपदेष्टृणां सङ्घस्य-साधु-साध्वी-श्रावक-श्राविकासमुदायरूपस्य साधूनां–यतीनाम् अवर्णवादी मायी च–स्वशक्तिनिगूहनादिना मायावान् [1]दैवकिल्बिषीं भावनां करोति। तत्र अवर्णः–अश्लाघा असद्दोषोद्घट्टनमितियावत् । स चैवं श्रुतज्ञानस्य–पृथिव्यादयः कायाः [2]षड्जीवनिकायामपि व्यावर्ण्यन्ते [3]शस्त्रपरिज्ञाध्ययनादिष्वपि बहुशस्त एव । एवं व्रतान्यपि–प्राणातिपातनिवृत्त्यादीनि तान्येव पुनः पुनस्तेषु तेषु सूत्रेषु प्रतिपाद्यन्ते । तथा त एव प्रमादा–मद्यादयः अप्रमादाश्च–तद्विपक्षभूता भूयो भूयश्च तत्र तत्र कथ्यन्ते। न पुनरधिकं किञ्चिदपीति पुनरुक्तदोषः। अन्यच्च मोक्षार्थं घटयितव्यमितिकृत्वा किं सूत्रे सूर्यप्रज्ञप्त्यादिना ज्योतिःशास्त्रेण ?, तथा मोक्षार्थमभ्युद्यतानां यतीनां किं योनिप्राभृतोपनिबन्धेन ?, भवहेतुत्वाज्ज्योतिष-योनिप्राभृतप्रभृतीनामिति। उक्तं च—

"★काया वया य तेच्चिय ते चेव पमाय अप्पमाया य। मोक्खाहिगारियाणं जोइसजोणीहिं किं कज्जं ?॥१॥"

[पञ्चवस्तुकः १६३७, बृ. क. भा. १३०३]

केवलिनामवर्णवादो यथा–किमेषां ज्ञानदर्शनोपयोगौ क्रमेण भवत उत युगपत् ?, तत्र यदि क्रमेणेति पक्षः कक्षीक्रियते तदा ज्ञानकाले न दर्शनम्, दर्शनकाले च न ज्ञानमिति परस्परावरणतैव प्राप्ता।

---

१ देव० मु. ॥ २ दशवैकालिकसूत्रस्य चतुर्थे अध्ययने इति ज्ञेयम् ॥ ३ आचाराङ्गसूत्रस्य प्रथमे अध्ययने इति ज्ञेयम् ॥
★ कायाः व्रतानि च तान्येव त एव प्रमादा अप्रमादाश्च। मोक्षाधिकारिणां ज्योतिषयोनिभिः किं कार्यम् ?॥१॥

अथ युगपदिति द्वितीयः पक्षः सोऽप्ययुक्तः, यत एककालत्वाद् द्वयोरप्येकताऽऽपत्तिः प्राप्नोति । उक्तं च—

"★ 'एगंतरसमुप्पाए अन्नोऽन्नावरणया दुवेण्हंपि । केवलदंसण-णाणाणमेगकाले य एगत्तं ॥१॥"

[बृ. क. भा. १३०४]

धर्माचार्याणामवर्णवादो यथा—न शोभनैतेषां जातिः, नैते लोकव्यवहारकुशलाः, न चैते औचित्यं विदन्तीत्यादि विविधं गुरून् प्रति भाषते । न चैतेषां विनयवृत्त्या वर्तते । तथा अहितशिछद्राण्यन्वेषयन् सर्वसमक्षं गुरूणामेवासतोऽपि दोषान् वदति । सर्वदैव च तेषां प्रतिकूलतामाचरतीति । उक्तं च—

●"जच्चाईहिं अवण्णं विभासइ वट्टइ न यावि उववाए । अहिओ छिद्दप्पेही पगासवाई अणणुकूलो ॥१॥'

[पञ्चवस्तुकः १६३६, बृ. क. भा. १३०५]

सङ्घस्यावर्णवादो यथा—बहवश्च पशु-शृगालादीनां सङ्घाः तत्कोऽयमिह सङ्घो भवतामाराध्य इत्यादि वदति । साधूनामवर्णवादो यथा—नामी साधवः परस्परमपि सहन्ते अत एव देशान्तरं परस्परस्पर्धया परिभ्रमन्ति, अन्यथा एकत्रैव संहत्या तिष्ठेयुः । तथा मायावितया सर्वदैव लोकावर्जनाय मन्दगामिनः । महतोऽपि च प्रति प्रकृत्यैव निष्ठुरा । तदैव रुष्टास्तदैव तुष्टाश्च । तथा गृहिभ्यस्तैस्तैश्चाटुवचनैरात्मानं रोचयन्ति । सर्वदा सर्ववस्तुसञ्चयपराश्च । उक्तं च—

★ एकतरसमुत्पादे अन्योऽन्यावरणता द्वयोरपि । केवलज्ञान-दर्शनयोः एककाले एकत्वम् ॥१॥

● जात्यादिविभिन्नवर्णं विभाषते न चाप्युपपाते वर्त्तते । अहितशिछद्रप्रेक्षी प्रकाशवाद्यननुकूलः ॥१॥

१ एगतर० मु. पो. वि. । बृ.क. भाष्येऽपि एगंतर० इति पाठः ॥

●"अविसहणाऽतुरियगई अण्णाणुवत्ती य अवि गुरूणंपि । खणमित्तपीइरोसा गिहिवच्छलगा य संचइगा॥१॥ [पञ्चवस्तुकः १६४०, बृ. क. भा. १३०६]

अन्यैरप्युक्तम्-

"अनित्यनाशब्दमुदाहरन्ति, भग्नां च तुम्बीं परिशोचयन्ति ।
यथा तथाऽन्यं च विकत्थयन्ति, हरीतकीं नैव परित्यजन्ति ॥१॥"

"अन्यत्र तु 'सव्वसाहूणं' ति पठित्वा 'मायी' ति भिन्नैव पञ्चमी भावना प्रतिपादिता । यथा-

∞ "गूहइ आयसहावं छायइ य गुणे परस्स संतेवि । चोरोव्व सव्वसंकी गुढायारो हवइ माई ॥१॥" ॥६४३॥ [पञ्चवस्तुकः १६४१, तुलना बृ. क. भा. १३०७]

अथ आभियोगीं भावनां पञ्चभेदामाह-'कोउये'त्यादि. अत्र सप्तमी तृतीयार्थे, ततः कौतुकेन १ भूतिकर्मणा २ प्रश्नेन ३ प्रश्नाप्रश्नेन ४ निमित्तेन ५ च पञ्चविकल्पा-पञ्चभेदा भवेत् सा च-आभियोगिकी भावना । तत्र बालादीनां रक्षादिकरणनिमित्तं स्नपन करभ्रमणाभिमन्त्रण-[५]धुकरणधूपदानादि यत्क्रियते तत्कौतुकम् । उक्तं च-

● अविसहणा अत्वरितगतयः गुरूणामप्यननुवृत्त्यः । क्षणमात्रप्रीतिरोषाः गृहिवत्सलकाश्च संचयिकाः ॥१॥

∞ गूहते आत्मस्वभावं परस्य च सतोऽपि गुणान् छादयति । चौर इव सर्वशङ्की गूढाचारो भवति मायी ॥१॥

१ ०वित्ती-इति मुद्रिते पञ्चवस्तुके च पाठः । ०वत्ती इति बृ. क. भाष्ये पाठः ॥ २ ०पियरोसा-वि. ॥

३ गिहिवच्छलगाइ सं-इति वि. पो. प्रत्योः बृ. क. भाष्ये च पाठः । गिहिवच्छलगा य सं० इति पञ्चवस्तुकेऽपि पाठः ॥ ४ पञ्चवस्तुके (गा. १६३६) बृ. क. भाष्ये (गाथा १३०२) इति ज्ञेयम् ॥ ५ धुकधुकरण० जे. ॥

*"विण्हवण-होम-सिरपरिरया य खारडहणाइं[1] धूवे य। असरिसवेसग्गहणं अवतासण [2]उत्थुभणबंधा॥१॥"
[पञ्चवस्तुकः १६४३, बृ. क. भा. १३०६]

तथा [2]वसति-शरीर-भाण्डकरक्षार्थं भस्मसूत्रादिना यत्परिवेष्टनकरणं तद् भूतिकर्म। उक्तं च—

●"भूईए मट्टियाइ व सुत्तेण व होइ भूइकम्मं तु। वसही-सरीर-भंडयरक्खा अभिओगमाईया॥१॥"
[पञ्चव० १६४४, बृ. भा. १३१०]

तथा यत्परस्य पार्श्वे लाभा-ऽलाभादि पृच्छ्यते स्वयं वा अङ्गुष्ठदर्पणखड्गतोयादिषु दृश्यते स प्रश्नः। उक्तं च—

★"पण्हो य होइ पसिणं जं पासइ वा सयं तु तं पसिणं। [3]अंगुट्ठछिट्ठ-पए दप्पण-असि-तोय-कुड्डाई॥१॥"
[पञ्चव० १६४५, बृ. क. भा. १३११]

तथा स्वप्ने स्वयं विद्यया कथितं घण्टिकाधवतीर्णदेवतया वा कथितं सत् यदन्यस्मै शुभा-ऽशुभ-

---

* अपि स्नपन-होम शिरः परिरयाश्च क्षारदहनानि धूपश्च। असदृशवेषग्रहणम् अवत्रासनम्, अवस्तोभनम् बन्धः॥१॥
१ ०उच्छुभण० मु.। ०उउवभण०जे.। वछुभणा०पो.। पञ्चवस्तुके-थंभणं—इति पाठः। बृ. क. भाष्ये ०उत्थुभण० इति पाठः॥ २ च सति-मु.॥
● भूत्या मृत्तिकया वा सूत्रेण वा भवति भूतिकर्म तु। वसति-शरीर-भाण्डरक्षा अभियोगादिकाश्च॥१॥
★प्रश्नश्च भवति प्रच्छनं यत् पश्यति वा स्वयं तु स प्रश्नः। अङ्गुष्ठोच्छिष्टपदे दर्पण-ऽसि-तोय-कुड्यादिषु॥१॥
३ अंगुट्ठ वच्चिचट्ठपए-पो.। अंगुठ्ठविठपए-वि.। अंगुट्ठुच्छिट्ठपए इति पञ्चवस्तुके पाठः॥

जीवितमरणादि परिकथयति स प्रश्नाप्रश्नः । उक्तं च–

●"पसिणापसिणं सुमिणे [1]विज्जासिट्ठं कहेइ अन्नस्स । अहवा आइंखणिया घंटियसिट्ठं परिकहेइ ॥१॥"

[पञ्चव० १६४६, बृ. क. भा. १३१२]

तथा निमित्तम्–अतीता-ऽनागत-वर्तमानवस्तुपरिज्ञानहेतुर्ज्ञानविशेषः, उक्तं च—

"△तिविहं होइ निमित्तं तीय-पडुप्पण-ऽनागयं चेव । तेण विणा उ न नेयं नज्जइ तेणं निमित्तंतु ॥१॥"

[बृ. क. भा. १३१३]

एतानि च कौतुक-भूतिकर्मादीनि गौरवादिनिमित्तं कुर्वाणः साधुरभियोग[2]निमित्तं कर्म बध्नाति । अपवादपदेन तु गौरवरहितः सन्नतिशयज्ञाने सति निःस्पृहवृत्त्या यदा करोति तदाऽसौ आराधक एव उच्चं च गोत्रं बध्नातीति तीर्थोन्नतिकरणात् । उक्तं च–

"❀एयाणि गारवट्ठा कुणमाणो अभियोगियं बंधे । बीयं गारवरहिओ कुव्वइ आराहगुच्चं च ॥१॥

[पञ्चव० १६४८, बृ. क. भा. १३१४] ॥६४४॥

अथ आसुरीं भावनां पञ्चभेदामाह– **सई**त्यादि, सदा विग्रहशीलत्वं १ संसक्ततपः २ निमित्त-कथनं च ३ निष्कृपताऽपि चापरा ४ पञ्चमकं च निरनुकम्पत्व ५ मिति । तत्र **'सदा'** सर्वकालं **'विग्रह-**

● प्रश्नाप्रश्नः स्वप्ने विद्याशिष्टं अन्यस्मै कथयति । अथवा क्षणिकाघण्टिकाशिष्टं परिकथयति ॥१॥ १ विज्जासिद्धं-जे. ॥
△ त्रिविधं भवति निमित्तमतीतं वर्त्तमानमनागतं चैव । तेन विना तु न ज्ञेयं ज्ञायते तेन निमित्तं तु ॥१॥ २ °निर्वृत्तं-मु ॥
❀ एतानि गौरवार्थं कुर्वन् आभियोगिकं बध्नाति । द्वितीयं पदं गौरवरहितः करोति आराधक उच्चैर्गोत्रं च ॥१॥

शीलत्वं' पश्चादननुतापितया श्रमणादावपि प्रसत्यप्राप्त्या च विरोधानुबन्धः । यदाह–

△ "निच्चं विग्गहसीलो काऊण य णाणुतप्पई पच्छा । न य खामिओ पसीयइ सपक्खपरपक्खओ वावि ॥१॥"

[बृ. क. भा. १३१६, तुलना–पञ्चव० १६५०]

तथा संसक्तस्य–आहारोपधिशय्यादिषु सदा प्रतिबद्धभावस्य आहारद्यर्थमेव च तपः–अनशनादितप-श्चरणं संसक्ततपः । यदाह–

"* आहारउवहिसेज्जासु जस्स भावो उ निच्चसंसत्तो । भावोवहओ कुणइ व तवोवहाणं तदट्ठाए ॥१॥"

[पञ्चव० १६५१, तुलना बृ. क. भा. १३१७]

तथा त्रैकालिकस्य लाभाऽलाभ-सुख-दुःख जीवित मरणविषयस्य निमित्तस्य कथनम्–अभिमाना-भिनिवेशाद्वथाकरणम् । यदाह–

● "तिविहनिमित्तं एक्केक्क छव्विहं जं तु वन्नियं पुव्वं । अभिमाणाभिनिवेसा वागरियं आसुरं कुणइ ॥१॥"

[पञ्चव० १६५२, बृ. क.भा.१३१८]

तथा स्थावरादिसत्त्वेष्वजीवप्रतिपत्त्या गतघृणः कार्यान्तरव्यासक्तः सन् गमना-ऽऽसनादि यः करोति, कृत्वा च नानुतप्यते केनचिदुक्तः सन् स निष्कृपः, तद्भावो निष्कृपता । 'यदाह–

△ नित्यं विग्रहशीलः कृत्वा च पश्चान्नानुतप्यते न च श्रमितः प्रसीदति स्वपक्षपरपक्षतो वाऽपि ॥१॥ * आहारोपधि शय्यासु यस्य तु भावो नित्यं संसक्तः । उपहतभावो वा करोति तपउपधानं तदर्थाय ॥१॥ ● त्रिविध निमित्तमेकैकं षड्विधं यत्तु पूर्वं वर्णितम् । अभिमानादभिनिवेशाच्च व्याकृतमासुरी करोति ॥१॥ १ यदाहुः मु. ॥

"△ [1]चंकमणाई सत्तो सुनिक्किवो थावराइसत्तेसु । काउं च नाणुतप्पइ एरिसओ निक्किवो होइ ॥१॥"
[पञ्चव० १६५३, बृ. क. भा. १३१९]

तथा यः कृपापात्रं कुतश्चिद्धेतोः कम्पमानमपि परं दृष्ट्वा क्रूरतया कठिनभावः सन् नानुकम्पाभाग्भवति स निरनुकम्पः [2]तस्य भावो निरनुकम्पत्वम्, यदाह–

★"जो उ परं कंपंतं दट्ठुण न कंपए कढिणभावो । एसो य निरणुकंपो पन्नत्तो वीयरागेहिं ॥१॥"
[पञ्चव० १६५४, तुलना बृ. क. भा. १३२०] ॥६४५॥

अथ सांमोहीं भावनां पञ्चविधामाह–'उम्मग्गे'त्यादि, उन्मार्गदेशना १ मार्गदूषणं २ मार्गविप्रतिपत्तिः ३ मोहः ४ मोहजननं च ५ एवं सा सांमोहीभावना भवति पञ्चविधा । तत्र पारमार्थिकानि ज्ञानादीन्यदूषयन्नेव तद्विपरीतं धर्ममार्गं यदुद्दिशति सा उन्मार्गदेशना । आह च–

"नाणादि अदूसितो तव्विवरीयं तु उवदीसइ मग्गं । उम्मग्गदेसगो एस आय अहिओ परेसिं च ॥१॥"
[बृ. क. भा. १३२२, तुलना पञ्चव० १६५६]

तथा पारमार्थिकं ज्ञान-दर्शन-चारित्रलक्षणं भावमार्गं तत्प्रतिपन्नांश्च साधून् पण्डितमानी स्वमनीषानिर्मितैर्जातिदूषणैर्यद् दूषयति तन्मार्गदूषणम् । आह च–

△ चङ्क्रमणादिषु सक्तः सुनिष्कृपः स्थावरादिसत्त्वेषु । कृत्वा च नानुतप्यते ईदृशो निष्कृपो भवति ॥१॥
१ चंकमणाईसु सत्तो-मु.। पञ्चवस्तुके बृ. क. भाष्येऽपि च चंकमणाई सत्तो इति पाठः ॥ २ तदनुभावो-जे. ॥
★ यस्तु परं कम्पमानं दृष्ट्वा नानुकम्पते कठिनभावः । एष च निरनुकम्पः प्रज्ञप्तो वीतरागैः ॥१॥
● ज्ञानादि अदूषयन् तद्विपरीतं तु देशयति मार्गम् । उन्मार्गदेशक एष आत्मनोऽहितः परेषां च ॥१॥

●"नाणाइतिहाभग्गं दूसइ जो जे य मग्गपडिवन्ना ।
अबुहो जाईए खलु भणइ सो मग्गदूसत्ति ॥१॥"
[पञ्चव० १६५७, तु.-बृ. क. भा. १३२३]

तथा तमेव ज्ञानादिमार्गमसद्दूषणैर्दूषयित्वा जमालिवदेशत उन्मार्गं यत्प्रतिपद्यते सा मार्गविप्रतिपत्तिः । आह च–

❀"जो पुण तदेव मग्गं दूसित्ता अपंडिओ सतक्काए ।
उम्मग्गं पडिवज्जइ विप्पडिवण्णो स मग्गस्स ॥१॥"
[पञ्चव० १६५८, तु.-बृ. क. भा. १३२४]

तथा निकाममुपहतमतिः सन्नतिगहनेषु ज्ञानादिविचारेषु यन्मुह्यति यच्च परतीर्थिकसम्बन्धिनीं नानाविधां समृद्धिमालोक्य मुह्यति स संमोहः । आह च–

卐"तह तह उवहयमइओ मुज्झइ नाण-चरणंतरालेसु । इड्ढीओ य बहुविहा दट्ठुं जत्तो तओ मोहो ॥१॥"
[पञ्चव० १६५९, तु.-बृ. क. भा. १३२५]

तथा स्वभावेन कपटेन वा दर्शनान्तरेषु परस्य मोहमुत्पादयति तन्मोहजननम् । आह च–

● ज्ञानादिं त्रिधामार्गं दूषयति यः ये च मार्गप्रतिपन्नाः(तान्) अबुधो जात्याभणति स खलु मार्गदूषक इति भण्यते॥१॥
❀ यः पुनस्तमेव मार्गं दूषयित्वाऽपण्डितः स्वतर्केण । उन्मार्गं प्रतिपद्यते स मार्गात् विप्रतिपन्नः ॥१॥
卐 तथा तथा उपहतमतिकः ज्ञानचरणान्तरालेषु मुह्यति बहुविधा ऋद्धीश्च दृष्ट्वा यतः ततो मोहः ॥१॥

★"जो पुण मोहेइ परं सब्भावेणं च कइयवेणं वा । संमोहभावणं सो पकरेइ अबोहिलाभाय ॥१॥"
[बृ. क. भा. १३२६, तु.-पञ्चव० १६६०]

एताश्च पञ्चविंशतिरपि भावनाः सम्यक्चारित्रविघ्नविधायित्वादशुभा इति यतिभिः परिहर्तव्याः । यदुक्तम्-

❖"एयाओ विसेसेणं परिहरइ चरणविग्घभूयाओ । एयनिरोहाउ च्चिय सम्मं चरणंपि पावंति ॥२॥"
[पञ्चव० १६६२] त्ति ॥६४६॥७३॥

इदानीं **'संखा महव्वयाणं'** ति चतुःसप्ततं द्वारमाह-

पंचवओ खलु धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स ।
मज्झिमयाण जिणाणं [1]चउव्वओ होइ विन्नेओ ॥६४७॥ [पञ्चाशक १७ । २६]

'पञ्चवओ' गाहा, पञ्चव्रतः खलु-प्राणातिपात-मृषावादा-ऽदत्तादाना-ऽब्रह्म-परिग्रहविरतिलक्षण-पञ्चमहाव्रत एव धर्मः-चारित्रधर्मः पूर्वस्य च-प्रथमस्य च ऋषभजिनस्य [2]पश्चिमस्य च-चरमस्य वर्धमानजिनस्य मुनीनामिति शेषः । मध्यमकानाम्-अजितनाथादीनां पार्श्वनाथान्तानां द्वाविंशतेर्जिनानां सम्बन्धिसाधूनां चतुर्व्रतः-चतुर्यामो भवति विज्ञेयः ।

★यो मोहयति पुनः परान् सद्भावेन कैतवेन वा । स सम्मोहीभावनां प्रकरोति अबोधिलाभाय ॥१॥
❖एता विशेषेण परिहरति चरणविघ्नभूताः । एतन्निरोधादेव सम्यक् चरणमपि प्राप्नुवन्ति ॥१॥
१ चउव्विहो-मु. । चउव्वतो-इति पञ्चाशके पाठः ॥ २ पश्चिमजिनस्य-जे. ॥

इह हि तत्तत्कालस्वभावादेव त्रिविधाः पुरुषा भवन्ति–ऋजुजडा वक्रजडा ऋजुप्रज्ञाश्च । तत ऋजवः–शाठ्यरहितास्ते च ते जडाश्च–तथाविधोहापोहव्यपोहादुक्तमात्रार्थग्राहिण ऋजुजडाः–केऽपि प्रथमतीर्थकरसाधवः, । ते च नटावलोकनज्ञातेन ज्ञातव्याः । तथाहि–किल केचित् प्रथमतीर्थकरसाधवो विचारगोचराच्चिरेण वसतावागताः, पृष्टाश्च गुरुभिः–किमिति भोश्चिराद्यूयमागताः ?, ते च ऋजुत्वादवोचन्–यथा नटं नृत्यन्तमालोकयन्तो वयमस्थाम । ततो गुरुस्तानन्वशात्–यदुतरागादिनिबन्धनं नटनृत्तावलोकनं मा पुनर्भवन्तो व्यधुः । तेऽपि तथैव गुरूणां गिरं प्रतिपेदिरे । अपरेद्युश्च तथैव ते गुरुपृष्टा व्यजिज्ञपन्–यथा नटीं नृत्यन्तीं पश्यन्तः स्थिताः । गुरुभिर्भणितं–ननु पूर्वमेव निषिद्धा यूयम्, अथ ते ऋजुजडत्वादूचुः–नटनृत्तनिरीक्षणं भवद्भिः प्रत्यषिद्धयत न नटीनृत्तनिरीक्षणमिति । नटे हि निषिद्धे रागनिमित्तत्वान्नटी निषिद्धैवेति प्रत्येतुं तैर्न शक्तिमिति ते ऋजुजडाः ।

तथा वक्रजडाः–शठत्व-मुग्धत्वधर्मद्वययुक्ताः, केचिच्चरमतीर्थकरसाधवः । तेऽप्येवमेव नटदृष्टान्तेनावगन्तव्याः । नवरं ते तथैव गुरुभिर्निवारिताः पुनरन्यदा नटीनिरीक्षणं कृत्वा चिरादागताः पृष्टाश्च वक्रजडत्वादुदरबाधाद्यसदुत्तराणि वितेरुः । निर्बन्धेन च गुरुभिः पृष्टा अस्माभिर्नटी निरीक्षितेत्युक्तवन्तः । सुतरामुपालब्धाश्च सन्तो जडत्वात्कथितवन्तो–यथा नट एव न द्रष्टव्य इत्यस्माभिरधिगतमासीदिति ।

तथा आर्जवयुक्ताः प्रज्ञावन्तश्च ऋजुप्रज्ञा मध्यमद्वाविंशतिजिनसाधवो महाविदेहव्रतिनश्च, तेऽपि तथैव नटोदाहरणादेव प्रतिपत्तव्याः, ते हि किल तथैव नटनिरीक्षणं [1]प्रति प्रतिषिद्धाः प्राज्ञत्वात्स्वयं

१ प्रति सिद्धा सं. ॥

विमृश्य रागादिहेतुतया नटीनिरीक्षणमपि परिहृतवन्तः । ततश्च मध्यमजिनसाधव ऋजुत्वेन यथोपदिष्टानुपालनात् प्राज्ञत्वेनोपदेशमात्रादप्यशेषहेयार्थोद्यूहनेन तत्परिहारसमर्थत्वाच्च सुखप्रतिबोध्याः । अतो न अपरिगृहीतायाः स्त्रियः परिभोगः स्यादिति परिग्रहविरमणेनैव मैथुनविरतिं प्रतिपद्यन्ते इत्यतस्तेषां परमार्थतः पञ्चयामोऽपि चतुर्यामः । प्रथमजिनसाधूनां तु ऋजुजडत्वेन बहुधा बहुभिश्चोपदेशैः समस्तहेयार्थज्ञानसम्भवात् चरमजिनसाधूनां च वक्रजडत्वात्तेन व्याजेन हेयार्थसेवासम्भवात्परिग्रहविरतिव्रतेनैव मैथुनविरतिव्रतं सङ्गृहीतमिति न प्रतिपत्तिः, ततः पञ्चयाम एव तेषां धर्म इति ॥६४७॥ ७४॥

इदानीं '[1]किइकम्माण य दिणे संख' त्ति पञ्चसप्ततं द्वारमाह–

चत्तारि पडिक्कमणे किइकम्मा तिण्णि हुंति सज्झाए ।
पुव्वण्हे अवरण्हे किइकम्मा चउदस हवंति ॥६४८॥

'चत्तारि' गाहा, चत्वारि प्रतिक्रमणे कृतिकर्माणि–वन्दनकानि भवन्ति । तत्र [2]आलोचनवन्दनकं प्रथमम् , क्षामणकवन्दनकं द्वितीयम् , आचार्यप्रभृतिसर्वसङ्घस्य [3]क्षमणपूर्वमाश्रयणाय वन्दनकं तृतीयम् , प्रत्याख्यानवन्दनकं चतुर्थम् । तथा स्वाध्याये त्रीणि वन्दनकानि । तत्र स्वाध्यायप्रस्थापने एकं वन्दनम् , स्वाध्यायप्रवेदने द्वितीयम् , स्वाध्यायकरणानन्तरं च तृतीयम् । एवं पूर्वाह्णे–प्रत्युषसि सप्त वन्दनकानि अपराह्णेऽप्येतान्येव सप्त । कालग्रहणोद्देश-समुद्देशा-ऽनुज्ञादिवन्दनकानां स्वाध्यायवन्दनेष्वेवान्तर्भावात् ।

१ किति० जे. । किय० ता. ॥ २ आलोचने-सं. ॥ ३ समणे-सं. ॥

तदेवमेतानि ध्रुवाणि कृतिकर्माणि प्रतिदिवसं चतुर्दश भवन्ति अभक्तार्थिकस्य, भक्तार्थिकस्य तु अपराह्णे प्रत्याख्यानवन्दनेनाभ्यधिकानीति ॥ ६४८ ॥ ७५ ॥

सम्प्रति 'खेत्ते चारित्ताणं संख'त्ति षट्सप्ततितमं द्वारमाह—

तिण्णि य चारित्ताइं बावीसजिणाण एरवयभरहे ।
तह पञ्चविदेहेसुं बीयं तइयं च नवि होइ ॥६४९॥

'तिन्नि य' गाहा, त्रीण्येव चारित्राणि- सामायिक-सूक्ष्मसम्पराय-यथाख्यातलक्षणानि पञ्चसु भरतेषु पञ्चसु चैरवतेषु प्रथम चरमवर्जितानां द्वाविंशतेर्मध्यमजिनानां काले, तथा पञ्चस्वपि महाविदेहेषु साधूनां भवन्ति । द्वितीयं-छेदोपस्थापनीयम्, तृतीयं च-परिहारविशुद्धिकं कदाचनापि न भवतीति । प्रथमचरमतीर्थकरयोश्च भरतैरवतेषु पञ्चापि सामायिकादीनि चारित्राणि भवन्तीत्यर्थादुक्तं भवतीति ॥ ६४९ ॥ ७६ ॥

इदानीं 'ठियकप्पो'त्ति सप्तसप्ततं द्वारमाह—

सिज्जायरपिंडंमि य १ चाउज्जामे य २ पुरिस[1]जेट्ठे य ३ ।
किइकम्मस्स य करणे ४ [2]ठियकप्पो मज्झिमाणं तु ॥ ६५० ॥

[बृ. क. भा. ६३६१, पञ्चाशक १७।१०]

१ °जिट्ठे-मु. ॥ २ ठिइ० मु. ॥

'सेज्जायर' गाहा, इह कल्पः—साधुसमाचारः स च सामान्येन दशधा [1]यथा—

"आचेलुक्कु १ द्देसिय २ सेज्जायर ३ रायपिंड ४ किइकम्मे ५ ।
वय ६ [2]जिट्ठ ७ पडिक्कमणे ८ मासं ९ पज्जोसवणकप्पो १० ॥१॥ [पंचाशकप्र० १७।६, बृ. क. भा. ६३६४]

एष च दशविधोऽपि सततासेवनेन प्रथम-चरमजिनसाधूनामवस्थितः कल्पः, मध्यमजिनसाधूनां चतुर्षु स्थानेषु स्थितत्वात् षट्सु चास्थितत्वाद्दशस्थानकापेक्षयाऽनवस्थितः कल्पः । उक्तं च—

★"ठिय अट्ठियओ य कप्पो आचेलुक्काइएसु ठाणेसु ।
सव्वेसु ठिया पढमो चउ ठिय छसु अट्ठिया बीओ ॥ १ ॥

तथा मध्यमजिनसाधूनामपि चतुर्षु स्थानेषु सदैवावस्थितत्वेन षट्सु च स्थानेषु कादाचित्कावस्थानेन स्थितोऽस्थितश्च द्विधा कल्पः सम्भवति । तत्र तेषां स्थितकल्पस्तावदुच्यते शय्यातरपिण्डे-वक्ष्यमाणस्वरूपे तथा चतुर्णां यामानां—व्रतानां समाहारश्चतुर्यामं तदेव चातुर्यामम् तत्र, तथा पुरुष एव ज्येष्ठो—रत्नाधिकः पुरुषज्येष्ठस्तत्र, तथा कृतिकर्मणो—वन्दनकस्य करणे—विधाने स्थितः अवस्थितः कल्पो- मर्यादा मध्यमानां-मध्यमद्वाविंशतिसाधूनां तुशब्दान्महाविदेहसाधूनां च । एतदुक्तं भवति—मध्यमजिनसाधवो [3]महाविदेहसाधवश्च प्रथम-चरमजिनसाधुवदवश्यमेव शय्यातरपिण्डं परिहरन्ति, तथा परिग्रहविरमणान्तर्भूतमैथुनविरतिव्रतत्वेन सर्वदैव चतुर्यामं धर्मं मन्यन्ते, तथा प्रथम-पश्चिमजिनसाधूनां महाव्रतारो-

★ स्थितोऽस्थितश्च कल्प आचेलक्यादिकेषु स्थानेषु सर्वेषु स्थिताः प्रथमः चतुर्षु स्थिताः षट्स्वस्थिता द्वितीयः ॥१॥

१ यथा-मु. नास्ति ॥ २ जेट्ठ-जे. ॥ ३ महाविदेहजिनसाधवश्च-जे. ॥

पणलक्षणया उपस्थापनया यथा ज्येष्ठत्वं तद्वन्मध्यमजिनसाधूनामपि सर्वेषां प्रव्रज्यया ज्येष्ठत्वं सर्वदैव ज्ञेयम्, [1]तथा अभ्युत्थानलक्षणं द्वादशावर्त्तादिरूपं च द्विविधमपि कृतिकर्म साधुभिः साध्वीभिश्च यथा-पर्यायवृद्धि विधेयं साध्व्यश्च पर्यायज्येष्ठा अपि अद्यदिनदीक्षितैरपि साधुभिर्न वन्दनीयाः, पुरुषप्रधानत्वाद् धर्मस्य अनेकदोषसम्भवाच्च । ते चामी—

★"तुच्छत्तणेण गव्वो जायइ न य संकए परिभवेणं ।
अन्नोवि होज्ज दोसो थियासु माहुज्जाहिज्जसु ॥१॥"

स्त्रीषु [2]**माधुर्यहार्यासु**' माधुर्येण—कोमलवचनेन हर्त्तुं शक्यास्वित्यर्थः । तदेवमेतानि चत्वार्यपि स्थानानि सर्वेषामपि साधूनां नित्यमवस्थितानीति स्थितकल्पः ॥६५०॥ ७७ ॥

इदानीं '**अट्ठियकप्पो**' त्ति अष्टासप्ततं द्वारमाह—

[3]आचेलक्कु १ देसिय २ पडिक्कमणे ३ रायपिंड ४ मासेसु ५ ।
पज्जुसणाकप्पंमि य ६ अट्ठियकप्पो मुणेयव्वो ॥६५१॥
[4]आचेलक्को धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स ।
मज्झिमगाण जिणाणं होइ सचेलो [5]वा ॥६५२॥

★ तुच्छत्वेन गर्वो जायते न च शङ्कते परिभवे । अन्योऽपि भवेद्दोषः स्त्रीषु माधुर्यहार्यासु ॥१॥

१ तुलना—पञ्चाशक प्र० १७।२३,२४ ॥ २ माधुर्यैहार्यासुस्वित्यर्थः-जे. । माधुर्यशक्यासु हार्यास्वित्यर्थः-सं. ॥
३ आचेलुक्कु ता. ॥ ४ आचेलुक्को-ता ॥ ५ य-इति पञ्चाशके पाठः ॥

मज्झिमगाणं तु इमं कडं जमुद्दिस्स तस्स चेवत्ति ।
नो कप्पइ [1]सेसाणं तु कप्पइ तं एस मेरत्ति ॥६५३॥
सपडिक्कमणो धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स ।
मज्झिमयाण जिणाणं कारणजाए पडिक्कमणं॥६५४॥ [पञ्चा.प्र.१७।८,१२,१६,३२]
असणाइचउक्कं वत्थपत्तकंबलयपाय[2]पुंछणए ।
निवपिंडंमि न [3]कप्पति पुरिमअंतिमजिणजईणं ॥६५५ ।
पुरिमेयरतित्थकराण मासकप्पो ठिओ विणिद्दिट्ठो ।
मज्झिमगाण जिणाणं अट्ठियओ एस विण्णेओ ॥६५६॥[4]
पज्जोसवणाकप्पो [5]एवं पुरिमेयराइभेएणं ।
उक्कोसेयरभेओ सो नवरं होइ विन्नेओ ॥६५७॥
चाउम्मासुक्कोसो सत्तरि राइंदिया जहन्नो उ ।
थेराण जिणाणं पुण नियमा उक्कोसओ चेव ॥६५८॥ [पञ्चा.प्र. १७ । ३७-३८-३९]

'आचेलक्कु' गाहा, आचेलक्ये औद्देशिके प्रतिक्रमणे राजपिंडे मासकल्पे पर्युषणाकल्पे च

१ सेसाण- इति पञ्चाशके पाठः ॥ २ °पुंछणयं-ता ॥ ३ कप्पति-मु. ॥ ४ एताः ६५१, ६५२-३, ६५५-६ गाथाः कल्पसमर्थनेऽपि उपलभ्यन्ते, दृश्यतां कल्पसूत्रम् (संपा. देवेन्द्रमुनिः) टिप्पन पृ. ४ तः ॥ ५ चेवं-मु. । पेवं- इति पञ्चाशके पाठः ॥

सततसेवनीयत्वाभावान्मध्यमजिनसाधूनामस्थितकल्पो ज्ञातव्यः । ते ह्येतानि स्थानानि कदाचिदेव पालयन्तीति ॥६५१॥

तत्र आचेलक्यस्वरूपं तावदाह–'आचे' इत्यादि, अविद्यमानं [1]नञः कुत्सार्थत्वात् कुत्सितं वा चेलं यस्यासावचेलकस्तद्भाव आचेलक्यम् , तद्योगाद्धर्मोऽपि चारित्रलक्षण आचेलक्यः । स पूर्वस्य च–युगादिदेवस्य पश्चिमस्य च–श्रीमहावीरजिनस्य सम्बन्धिसाधूनां भवति । अयमत्र भावार्थः– [2]अचेला द्विधा–अविद्यमानवस्त्रा विद्यमानवस्त्राश्च । तत्र तीर्थकरा अविद्यमानवस्त्राः सन्तोऽचेला भवन्ति पुरुहूतोपनीतदेवदूष्यागमानन्तरम् , तीर्थकरव्यतिरिक्तास्तु साधवो विद्यमानैरपि वस्त्रैरचेलाः, [3]स्वल्पमूल्यश्वेतखण्डितवस्त्राश्रयणात् । दृश्यते च लोके विवक्षितवस्त्राभावे सचेलत्वेऽपि विशिष्टार्थाप्रसाधकत्वेनासत्त्वाविशेषादचेलव्यवहारः । यथा काचित्पुरन्ध्री परिजीर्णशाटिकापरिधाना तन्तुवायमाह–नग्नाऽहं देहि मे शाटिकामिति । मध्यमकानां पुनर्द्वाविंशतेर्जिनानां सम्बन्धिसाधूनां भवति–स्यात्सचेलः–सवस्त्रोऽचेलो वा–निर्वस्त्रो धर्मः कुतः ?–तेषामृजुप्राज्ञत्वान्महामूल्यपञ्चवर्णानामितरेषां च वस्त्राणां परिभोगानुज्ञानात् प्रथम-पश्चिमजिनसाधूनां तु ऋजुजडत्वेन वक्रजडत्वेन च महाधनादिवस्त्राणामननुज्ञानात् । श्वेतखण्डितादीनामेवचानुज्ञानादचेलक इति ॥६५२॥

'उद्देसिअ' त्ति व्याख्यायते–'**मज्झिमे**त्यादि, उद्देशेन–साधुसङ्कल्पेन निर्वृत्तमौद्देशिकम्–आधा-

---

१ नञ् कुत्सार्थे कुत्सितं–मु. ॥ २ तुलना–पञ्चवस्तुकः १७।११, बृ.क.भा. ६३६५ ॥
३ तुलना–पञ्चव० टीका १७।१२, बृ.क.भा.टी गा. ६३६६ ॥

कर्म अत्र स्थिता-ऽस्थितकल्पविचारे विवक्षितं ततो मध्यमजिनसाधूनामिदम्—औद्देशिकं यमेव—साध्वादिकमुद्दिश्य कृतं-निर्वर्तितं तस्यैव न कल्पते । इतिः वाक्यसमाप्तौ, शेषाणां तु—उद्दिष्टसाधुभ्योऽन्येषां तदौद्देशिकं ग्रहीतुं कल्पते । कस्मादेवमित्याह— 'एषा' अनन्तरोक्ता 'मेर'त्ति मर्यादा ऋजुप्राज्ञसाधून् प्रज्ञापनीयलोकांश्चाधिकृत्य जिनैः कृतेतिकृत्वा । प्रथम-पश्चिमजिननीर्थे तु यमुद्दिश्य कृतमाधाकर्म तत्तस्यापि न कल्पते शेषसाधूनामपीति ॥६५३॥

'पडिक्कमण' त्ति [1]प्रतन्यते- **सपडि**' इत्यादि, सप्रतिक्रमणः-उभयकालं षड्विधावश्यककरणयुक्तो धर्मः चारित्रधर्मः, पूर्वस्य च पश्चिमस्य च जिनस्य संबन्धिसाधूनाम् । मध्यमजिनसाधूनां तु कारणे-प्रतिक्रमणविशोधनीयातिचाररूपे जाते—समुत्पन्ने सति प्रतिक्रमणं कर्तव्यम् । कारणाभावे सर्वदाऽपि ते न प्रतिक्रामन्ति । अयमभिप्रायः—प्रथम-पश्चिमजिनसाधूनामतिचारो भवतु वा मा वा तथाऽप्यवश्यतया प्रभाते प्रदोषे च षड्विधाऽऽवश्यकप्रतिक्रमणं [2]गमनागमननद्यवतारादिषु च नियमेनेर्यापथिकाप्रतिक्रमणं कर्तव्यम्, ऋजुजड-वक्रजडतया तेषामुपकारित्वात् । [3]मध्यमजिनमुनीनां पुनः प्रायेणातीचार एव न सम्भवति ऋजुप्रज्ञत्वात्तेषाम्, अथ कथञ्चित्कदाचनापि सम्भवति तदा तत्क्षणादेव रोगचिकित्सोदाहरणेन प्रतिक्रमणमुक्तरूपं कुर्वन्ति । यथा हि जातमात्र एव रोगे चिकित्सा क्रियमाणा सुखावहा भवति, एवं तत्काल एवातीचारविशुद्धये विधीयमानं प्रतिक्रमणमपीति ॥६५४॥

---

१ प्रतन्यते-सप्रतिक्रमणः 'सपडि' इत्यादि, उभयकालं-मु. । तुलना-पञ्चाशकटीका १७।३२ ॥
२ तुलना-पञ्चाशकप्र. १७।३२ ॥ ३ तुलना—पञ्चाशकप्र. १७।३१ ॥

'रायपिंड' त्ति व्याख्यानयन्नाह–**'असणे'**त्यादि, अशनादिचतुष्कम्–अशन-पान-खादिम-स्वादिम-रूपा आहाराश्चत्वारः वस्त्रं पात्रं कम्बलं पादप्रोञ्छनकं चेत्येतान्यष्टौ **'नृपपिण्डे'** नृपपिण्डविषये चक्रवर्त्यादिसत्कानीत्यर्थः, प्रथमा-ऽन्तिमजिनयतीनां न कल्पन्ते, अनेकदोषसम्भवात् । [1]तथाहि-राजकुले भिक्षार्थं व्रजतां यतीनामनवरतमस्तोकराजकुललोकनिर्गमप्रवेशादिभिः संमर्दादमङ्गलबुद्ध्या वा पात्रभङ्गदेहघातादयः सम्भवन्ति । चौरहेरिकघातकादिसम्भावनया राजकोपात्कुलगणसङ्घाद्युपघातश्च लोकमध्ये च गर्हा यथा अहो राजप्रतिग्रहमेते गर्हणीयमपि न परित्यजन्ति । गर्हणीयता च तस्य स्मार्तैरेवमुच्यते –

"राजप्रतिग्रहदग्धानां, ब्राह्मणानां युधिष्ठिर ! । स्विन्नभाजनमिव बीजानां, पुनर्जन्म न विद्यते ॥१॥"

मध्यमजिनसाधूनां पुनर्नृपपिण्डः कल्पतेऽपि, ते हि ऋजुप्रज्ञत्वाद्विशेषतोऽप्रमादित्वेनोक्तदोषपरिहारप्रभविष्णवो भवन्ति । इतरे तु ऋजुजडवक्रजडत्वेन न तथेति ॥६५५॥

'मास'त्ति प्रकटयन्नाह–**'पुरी'**त्यादि, पूर्वेतरतीर्थकराणां प्रथम-पश्चिमजिनसाधूनां मासकल्पः–एकत्र मासवस्थितिरूपः समाचारः स्थितः–अवस्थितो निर्दिष्टः-कथितः, तेषां मासकल्पाभावेऽनेकदोषसम्भवात् । उक्तं च–"पडिबंधो लहुयत्तं न जणुवयारो न देसविन्नाणं । नाणाराहणमेए दोसा अविहारपक्खंमि ॥१॥"

[पञ्चाशक प्र० १७।३६]

अन्या [2]व्याख्या-प्रतिबन्धः- [3]शय्या-शय्यातरादिवस्तुष्वभिष्वङ्गो भवति । तथा लघुत्वं-लाघवम्, एते हि

१ तुलना–पञ्चाशकटीका १७।२१, बृ. क. भा. टी. पृ. १६८७ ॥ २ तुल्यप्रायं पञ्चाशकप्र.टीका १७।३६ ॥ ३ शय्यतरा० इति पञ्चाशकवृत्तौ पाठः ॥

स्वगृहं परित्यज्य गृहान्तरादिषु व्यासक्ता एवं लोकसम्भावनोत्पादनात्, तथा न जनोपकारो—न विविध-देशस्थितभव्यजनानामुपदेशदानादिभिर्गुणः कृतो भवति, अथवा न देशान्तरस्थितसुविहितजनस्योपचारो—वन्दनादिपूजा, जनेभ्यो वा सकाशादुपचारो न लब्धो भवति. सुविहितजनव्यवहारो वा न परिपालितः स्यात्। तथा न—नैव देशेषु—विविधमण्डलेषु सञ्चरतां विज्ञानं विचित्रलोकलोकोत्तरव्यवहारपरिज्ञानम्, तथा -न नैव आज्ञाराधनम् आगमोक्तार्थानुपालनम् आगमोद्यमः—

* "मुत्तूण मासकप्पं अन्नो सुत्तंमि नत्थि [1]विहारो।' [पञ्चवस्तुकः ८९६]

एते—अनन्तरोक्ता दोषाः—दूषणान्यविहारपक्षे मासकल्पेन विहाराभ्युपगमाभावे इति। अथ कदाचिद् दुर्भिक्षादिकालदोष-संयमानुगुण्यादिक्षेत्रदोष-शरीरानुकूलभक्तलाभादिद्रव्यदोष-ग्लानत्वज्ञानहान्यादिभावदोषवशतो यद्यप्येष मासकल्पो न बहिर्वृत्त्या क्रियते तथाप्यवश्यम्भावेन भावतो वसतिसंस्तारकव्यत्यया-दिभिः क्रियमाणत्वादवस्थितः, यदुक्तम्—

★ कालाइदोसओ जइ न दव्वओ एस कीरई नियमा। भावेण उ कायव्वो संथारगवच्चयाईहिं ॥१॥"

मध्यमजिनसाधूनां पुनरस्थितकः—अनवस्थितः एषः—मासकल्पो विज्ञेयो-ज्ञातव्यः, ऋजुप्रज्ञत्वेन तेषाम-धिकावस्थानेऽपि पूर्वोक्तदोषासम्भवात्। उक्तं च—

---

१ य—मु.। पञ्चाशकवृत्तावपि(१७।३६)'उ'इति पाठः॥

* मुक्त्वा मासकल्पं नास्त्यन्यः सूत्रे विहारः

★ कालादिदोषतो यदि न द्रव्यत एष क्रियते। भावेन तु नियमात् संस्तारकव्यत्ययादिभिः कर्त्तव्यः॥ १॥

"●दोसासइ मज्झिमगा अच्छंति उ जाव पुव्वकोडीवि । विहरंति य वासासुवि अकद्दमे पाणरहिए य ॥१॥
भिन्नंपि मासकप्पं करंति तणुयंपि कारणं पप्प । जिणकप्पियावि एवं एमेव महाविदेहेसुं ॥२॥
[बृ. क. भा. ६४३५-३६]

'पज्जोसवण'त्ति व्याख्यानयन्नाह-'पज्जो' इत्यादि, परि-सर्वथा वसनम्-एकत्र निवासो निरुक्त-विधिना पर्युषणा, तद्रूपः कल्पः [1]पर्युषणाकल्पः न्यूनोदरताकरणं विकृतिनिष्कारणपरिहारः पीठ-फलकादि-संस्तारकादानम्, उच्चारादिमात्रकसङ्ग्रहणं लोचकरणं शैक्षाप्रव्राजनं प्राग्गृहीतानां भस्म-डगलकादीनां परि-त्यजनम् इतरेषां ग्रहणं द्विगुणवर्षोपग्रहोपकरणधरणम् अभिनवोपकरणाग्रहणं सक्रोशयोजनात्परतो गमन-वर्जनमित्यादिको वर्षाकालसमाचार इत्यर्थः । सोऽपि न केवलं मासकल्प एव, एवम्-उक्तक्रमेण, तमेवाह -पूर्वेतरादिभेदेन आदिमा-ऽन्तिम-मध्यमसाधुविशेषेण । अयमर्थः-प्रथम-पश्चिमजिनयतीनां पर्युषणाकल्पोऽव-स्थितो मध्यमजिनमुनीनां त्वनवस्थित इति । अत्रैव विशेषमाह-उत्कर्षेतरभेदः -उत्कृष्ट-जघन्यभेदः स पर्यु-षणाकल्पः । नवरं-केवलं भवति स्याद्विज्ञेयः-अवसेय इति ॥६५७॥

एतावेव भेदौ व्याचष्टे- [2]"चाउम्मास" गाहा, चतुर्णां मासानां समाहारश्चतुर्मासं तदेव चातुर्मासं तद्यावदुत्कर्षः-उत्कृष्टः पर्युषणाकल्पः, आषाढपूर्णिमायाः कार्तिकपूर्णिमां यावदित्यर्थः । जघन्यः पुनः

● दोसेष्वसत्सु मध्यमास्तिष्ठन्ति यावत् पूर्वकोटीमपि । विहरन्ति वर्षास्वपि च अकर्दमे प्राणरहिते च ॥१॥
मासकल्पमपूर्णमपि कुर्वन्ति तनुकमपि कारणं प्राप्य । जिनकल्पिका अप्येवं एवमेव महाविदेहेषु ॥२॥
१ न्यूनोदरताकल्पः-सं. ॥ २ 'चाउ०' चतुर्णां-मु. ।

सम्प्रति रात्रिन्दिवानि–अहोरात्राणि भाद्रशुक्लपञ्चम्याः कार्तिकपूर्णिमां यावदित्यर्थः । केषामयं पर्युषणाकल्प इत्याह–स्थविराणां–प्रथम-पश्चिमजिनसम्बन्धिस्थविरकल्पिकसाधूनाम् , जिनानां पुनः–पूर्वान्तिमतीर्थकृज्जिनकल्पिकानाम् , नियमात्–निश्चयेन उत्कृष्ट एव–मासचतुष्टयप्रमाण एव पर्युषणाकल्पः, निरपवादत्वात्तेषामिति ॥६५८॥

इदानीं "चेइयपंचग" त्ति एकोनाशीतितमं द्वारमाह—

भत्ती १ मंगलचेइय २ निस्सकड ३ अनिस्सकड[2]चेइयं ४ चावि ।
सासयचेइय ५ पंचममुवइट्ठं जिणवरिंदेहिं ॥६५९॥
[3]गिहि जिणपडिमाए भत्तिचेइयं १ उत्तरंगघडियंमि ।
जिणबिंबे मंगलचेइयंति २ समयन्नुणो विंति ॥६६०॥
निस्सकडं जं गच्छस्स संतियं तदियरं अनिस्सकडं ४ ।
सिद्धायययणं च ५ इमं चेइयपणगं विणिद्दिट्ठं ॥६६१॥
[4]नीयाइं सुरलोए भत्तिकयाइं च अरहमाईहिं ।
निस्सानिस्सकयाइं मंगलकयमुत्तरंगंमि ॥६६२॥

१ 'चेइय'त्ति-मु. ॥ २ ० चेइए-जे. ॥ ३ जिणगिहिपडिमाउ-ता. । गिह जिणपडिमाए- जे. ॥
४ इतः पूर्वं ता. जे प्रत्योः अथवा- इत्यधिकः पाठः विद्यते ॥

बारत्तयस्स पुत्तो पडिमं कासीय [1]चेइए रम्मे ।
तत्थ य थली अहेसी साहम्मियचेइयं तं तु ॥६६३॥ [बृ.क.भा. १७७५]

'भत्ती०' गाथापञ्चकम्, चैत्यशब्दस्य प्रत्येकमभिसम्बन्धाद्भक्तिचैत्यं मङ्गलचैत्यं निश्राकृतं चैत्य-मनिश्राकृतं चैत्यं शाश्वतचैत्यं च पञ्चममुपदिष्टं—नामतः कथितं जिनवरेन्द्रैरिति ॥६५९॥

एतान्येव व्याचष्टे—'**गिही**'त्यादि गाथाद्वयम्, गृहे जिनप्रतिमायां यथोक्तलक्षणाद्युपेतायां प्रति-दिनं त्रिकालं पूजावन्दनाद्यर्थं कारितायां भक्तिचैत्यम् । तथा उत्तरङ्गस्य [2]गृहद्वारोपरिवरिवर्तितिर्यक्काष्ठस्य मध्यभागे घटिते—निष्पादिते जिनबिम्बे मङ्गलचैत्यमिति '**समयज्ञाः**' सिद्धान्तवेदिनो '**ब्रुवते**' वदन्ति । [3]**मथुरायां** हि नगर्यां गृहे कृते मङ्गलनिमित्तमुत्तरङ्गेषु प्रथममर्हत्प्रतिमाः प्रतिष्ठाप्यन्ते, अन्यथा तद् गृहं पतति । तथा चावोचाम **स्तुतिषु**—

△"जंमि सिरिपासपडिमं संतिकए करइ पडिगिहदुवारे ।
अज्जवि जणो पुरिं तं महुरमधन्ना न पेच्छंति ॥१॥"

तथा '**निश्राकृतं**' यद्यच्छस्य कस्यापि सत्कं स एव गच्छस्तत्र प्रतिष्ठादिप्रयोजनेष्वधिक्रियते, अन्यः पुनस्तत्र किञ्चित्प्रतिष्ठादिकं कर्तुं न लभते इत्यर्थः । तथा '**तदियरं**' ति तस्मात्—निश्राकृतादितरत्—अनि-

यस्यां श्रीपार्श्वप्रतिमां शान्तिकृते करोति प्रतिगृहे द्वारि । अद्यापि जनः तां पुरीं मथुरामधन्या न प्रेक्षन्ते ॥१॥
१ चेइयदुरम्मि-इति बृ.क. भाष्ये पाठः ॥ २ ०परिवर्ति० सं० ॥ ३ तुलना-बृ.क. भा. टीका गाथा १७७६ ॥

श्राकृतम्, यत्र सर्वेऽपि गच्छाः प्रतिष्ठाप्रव्राजनकमालारोपणादीनि प्रयोजनानि कुर्वते इति। तथा 'सिद्धायतनं च' शाश्वतजिनायतनं च, इदं चैत्यपञ्चकं 'विनिर्दिष्टं' विशेषेण कथितमिति ॥६६०-६६१॥

अथवाऽन्येन प्रकारेण पञ्च चैत्यानि दर्शयति, तत्राह—'नंदीसरे' इत्यादिगाथाद्वयम्, 'नित्यानि शाश्वतानि चैत्यानि, तानि च 'सुरलोके' देवभूमौ, 'उपलक्षणत्वान्मेरुशिखरे कूट-नन्दीश्वर-रुचकवरादिषु च भवन्ति तथा भक्तिकृतानि भरतादिभिः कारितानि, मकारोऽयमलाक्षणिकः। तानि च निश्राकृतानि अनिश्राकृतानि चेति द्वेधा। तथा मङ्गलार्थं कृतं मङ्गलकृतं चैत्यं मथुरादिपुरीषु उत्तरङ्गप्रतिष्ठापितम्। तथा वारत्तकमुनेः पुत्रो 'रम्ये' रमणीये 'चैत्ये' देवगृहे 'प्रतिमां' तस्यैव वारत्तकमुनेः प्रतिकृतिमकार्षीत्। तत्र च स्थलीति रूढिरभूत्। तत्तु साधर्मिकचैत्यमिति। भावार्थस्तु कथानकादवसेयः। तच्चेदम्—

वारत्तकं नगरम्। अभयसेनो राजा, तस्य च वारत्तको नाम मन्त्री। एकदा च धर्मघोषनामा मुनिर्भिक्षार्थं तस्य गेहं प्रविष्टः। तद्भार्या च तस्मै भिक्षादानाय घृतखण्डसम्मिश्रपायसपरिपूर्णं पात्रमुत्पाटितवती, अत्रान्तरे च कथमपि ततः खण्डसम्मिश्रो घृतबिन्दुर्भूमौ पतितः। ततः स महात्मा धर्मघोषमुनिर्भगवदुपदिष्टभिक्षाग्रहणविधिविधानविहितोद्यमश्छर्दितदोषदुष्टेयं भिक्षा तस्मान्न कल्पते ममेति मनसि विचिन्त्य भिक्षामगृहीत्वा गृहान्निर्जगाम। वारत्तकमन्त्रिणा च मत्तवारणोपविष्टेन दृष्टो भगवान्निर्गच्छन्। चिन्तितं च—किमनेन मुनिना मदीया भिक्षा न गृहीतेति ?, एवं च यावच्चिन्तयति तावत्तं भूमौ निपतितं खण्डयुक्तघृतबिन्दुं मक्षिकाः समेत्याशिश्रियन्, तासां च भक्षणाय प्रधाविता गृहगोधिका, तस्या अपि वधाय प्रधावितः सरटः, तस्यापि च भक्षणाय प्रधावति स्म मार्जारी, तस्या अपि वधाय प्रधावितः प्राघूर्णकः श्वा, तस्यापि

च वधाय प्रतिद्वन्द्वी प्रधावितोऽन्यो वास्तव्यः श्वा, ततो द्वयोरपि तयोः शुनोरभूदन्योऽन्यं युद्धं निजनिज-शुनकपराभवपीडया च प्रधावितयोर्द्वयोरपि तत्स्वामिनोरभूत्परस्परं लकुटालकुटि महायुद्धम्, दृष्टं चैतत्सर्व-मपि वास्तव्यमन्त्रिणा, परिभावितं च घृतादेर्बिन्दुमात्रेऽपि भूमौ पतिते यत एवंविधाऽधिकरणप्रवृत्तिः, अत एवाधिकरणभीरुर्भगवान् [1]भिक्षां न गृहीतवान्, अहो सुदृष्टो भगवता धर्मः, को हि नाम भगवन्तं वीतराग-मन्तरेणैवमनपायं धर्ममुपदेष्टुमलंभविष्णुः ? ततो ममापि स एव देवता सदुपदेशमेवानुष्ठानमनुष्ठातुमुचितमिति विचिन्त्य संसारसुखविमुखः शुभध्यानोपगतः सञ्जातजातिस्मरणो देवताऽर्पितसाधुलिङ्गो दीर्घकालं संयममनु-पाल्य केवलज्ञानमासादितवान् । कालक्रमेण च सिद्धः, ततस्तत्पुत्रेण स्नेहापूरितमानसेन देवगृहं कारयित्वा रजोहरणमुखपोत्तिकापरिग्रहधारिणी पितृप्रतिमा तत्र स्थापिता, सत्रशाला च तत्र प्रवर्तिता, सा च साधर्मिकस्थलीति सिद्धान्ते भण्यते ॥६६२-६६३॥७९॥

इदानीं [2]'पुत्थगपंचगं' ति अशीतितमं द्वारमाह—

[3]गंडी १ कच्छवि २ मुट्ठी ३ संपुडफलए ४ तहा छिवाडी य ५ ।
एयं पोत्थयपणगं चक्खाणमिणं भवे तस्स ॥६६४॥
[4]बाहल्लपुहुत्तेहिं गंडीपोत्थो उ तुल्लगो [5]दीहो १ ।
कच्छवि अंते तणुओ मज्झे पिहुलो [6]मुणेयव्वो ॥६६५॥

१ भिक्षां न गृहीतवान्-मु. नास्ति ॥ २ पोत्थय० ता. ॥ ३ तुलना—स्थानाङ्गसूत्रवृत्तिः सू. ३१०, बृ.क.भा.टीका ३८२२, दशवै. हारि. वृत्तिः पृ. २५, आव. हारि. वृत्तिः पृ. ६५२ । विशेषार्थं द्रष्टव्यः जैन चित्रकल्पद्रुमः पृ. २२ तः ॥ ४ आहुल्ल० इति बृ.क. भाष्यवृत्तौ (पृ. १०५४) पाठः ॥ ५ मणिओ-ता. ॥ ६ सुविन्नेओ-ता ॥

चउरंगुलदीहो वा वट्टागिइ मुट्ठिपुत्थगो अहवा ।
चउरंगुलदीहो च्चिय चउरंसो होइ विन्नेओ ॥६६६॥
संपुडगो दुगमाई फलगा बोच्छं छिवाडिमित्ताहे ।
तणुपत्तूसियरूवो होइ छिवाडी वुहा बेंति ॥६६७॥
दीहो वा हस्सो वा जो पिहुलो होइ अप्पबाहल्लो ।
तं मुणियसमयसारा छिवाडपोत्थं भणंतीह ॥६६८॥

'गंडी०' गाथापञ्चकम्, गण्डीपुस्तकं कच्छपीपुस्तकं [1]मुष्टिपुस्तकं संपुटफलकपुस्तकं [2]छेदपाटी-पुस्तकं च, एतत्पुस्तकपञ्चकं च ज्ञातव्यमिति शेषः। तस्य च-पुस्तकपञ्चकस्य इदं-वक्ष्यमाणं व्याख्यानं भवेदिति ॥६६४॥

तदेवाह- बाहल्ले'त्यादि गाथाचतुष्टयम्, बाहल्यं-पिण्डः; पृथुत्वं-विस्तरः, ताभ्यां तुल्यः-समानश्चतुरस्रो दीर्घश्च गण्डीपुस्तको ज्ञेयः। तथा कच्छपीपुस्तक उभयपार्श्वयोरन्ते-पर्यन्तभागे तनुकः-सूक्ष्मो मध्यभागे च पृथुलो-विस्तृतोऽल्पबाहल्यो ज्ञातव्यः। तथा चतुरङ्गुलः-अङ्गुलचतुष्टयप्रमाणः प्राकृतत्वात् सेर्लोपः, दीर्घो वा-आयतो वृत्ताकृतिः-वर्तुलाकारो मुष्टिपुस्तकः, अथवा चतुरङ्गुलदीर्घ एव-अङ्गुलचतुष्कायाम एव चतुरस्रः-चतुष्कोणो मुष्टि पुस्तको भवति विज्ञेयः। तथा सम्पुटफलकपुस्तको यत्र

१ मुष्टिकापुस्तकं- मु.॥ २ छेदपाटि० मु.। जैन चित्रकल्पद्रुमः पृ. २२, टि. २६ द्रष्टव्यम् ॥

[1]द्यादीनि उभयोः पार्श्वयोः फलकानि-पृष्ठकानि भवन्ति, वणिग्जनस्य उद्धार-निक्षेपाद्याधारः सम्पुट-कारूप्य उपकरणविशेष इति भावः । इदानीं वक्ष्ये छेदपाटीपुस्तकम् , यथा तनुभिः-स्तोकैः पत्रैरुच्छ्रितरूपः किञ्चिदुन्नतो भवति छेदपाटीपुस्तक इति बुधा ब्रुवते । लक्षणान्तरमाह–दीर्घो वा–महान् ह्रस्वो वा–लघुः पृथुलो–विस्तृतोऽल्प[2]बाहल्यश्च–स्वल्पपिण्डो भवति तं ज्ञातसमयमाराच्छेदपाटीपुस्तकं भणन्तीह–शासने । न चैतत्स्वमनीषिकया व्याख्यायते, यदुक्तं नीशीथचूर्णौ–

'दीहो बाहल्लपुहुत्तेण तुल्लो चतुरस्सो गंडीपुत्थगो, अंते तणुओ मज्झे पिहुलो अप्पबाहल्लो कच्छभी, चतुरङ्गुलो दीहो वा वृत्ताकृति मुट्ठीपुत्थगो, अहवा चतुरङ्गुलदीहो चउरस्सो मुट्ठिपुत्थगो, दुगाइफलगा संपुडगं, दीहो ह्रस्सो वा पिहुलो अप्पबाहल्लो छिवाडी, अहवा तणुपत्तेहिं उस्सिओ छिवाडी'' त्ति [गाथा ४०००, भा. ३ । पृ. ३२० तः] ॥६६५-६६८॥८०॥

इदानीं 'दंडपंचगं' ति एकाशीतितमं द्वारमाह—

लट्ठी १ तहा विलट्ठी २ दंडो य ३ विदंडओ य ४ नाली अ ५ ।
भणिय दंडयपणगं वक्खाणमिणं भवे तस्स ॥ ६६९ ॥
लट्ठी आयपमाणा विलट्ठी चउरंगुलेण परिहीणा ।
दंडो बाहुपमाणो विदंडओ कक्खमित्तो उ ॥ ६७० ॥ [ओघनि. ७३०]

१ द्यादीनि फलकानि भवन्ति-जे. स. वि. ॥ २ °बाहुल्य० जे. ॥

लट्ठीए चउरंगुल समूसिया दंडपंचगे नाली ।
नइपमुहजलुत्तारे तीए थग्घिज्जए सलिलं ॥ ६७१ ॥
वज्झइ लट्ठीए जवणिया विलट्ठीए कत्थइ दुवारं ।
घट्टिज्जइ ओवस्सयतणयं तेणाइरक्खट्ठा ॥ ६७२ ॥
जलणद्धरिल [1]उ दंडो विदंडओ चिप्पए वरिसयाले ।
जं सो लहुओ निज्जइ कप्पंतरिओ जलभएणं ॥ ६७३ ॥
विसमाइ वड्ढमाणाइं दस य पव्वाइं एगवन्नाइं ।
दंडेसु अपोल्लाइं सुहाइं सेसाइं असुहाइं ॥ ६७४ ॥

'लट्ठी०' गाथाषट्कम् यष्टिस्तथा वियष्टिस्तथा दण्डस्तथा विदण्डस्तथा नालिका एतद्दण्डपञ्चकं भणितं तीर्थकरगणधरैः । तस्य च—दण्डपञ्चकस्य इदं वक्ष्यमाणस्वरूपं व्याख्यानं भवेत् ॥६६९॥

एतदेवाह—'लट्ठी' इत्यादि, सार्धगाथा, यष्टिरात्मप्रमाणः-सार्धहस्तत्रयमानः । वियष्टिर्यष्टेः सकाशाच्चतुर्भिरङ्गुलैः परिहीनो—न्यूनो भवति । दण्डो बाहुप्रमाणः—स्कन्धप्रदेशप्रमाणः । [2]विदण्डकः कक्षामात्रकः—कक्षाप्रमाणः । नालिका यष्टेः सकाशाच्चतुरङ्गुलमुच्छ्रिता—आत्मप्रमाणाच्चतुर्भिरङ्गुलैरतिरिक्ता षोडशाङ्गुलाधिकहस्तत्रयमानेत्यर्थः । दण्डपञ्चके—दण्डपञ्चकमध्ये नाली नाम दण्डः [3]पञ्चमक इति ॥

१ य—ता. ॥ २ विदण्डः—मु. ॥ ३ पञ्चम—मु. ॥

इदानीमेतेषां पञ्चानामपि दण्डानां प्रयोजनं प्रतिपिपादयिषुरानुपूर्व्या अपि व्याख्याङ्गत्वात्प्रथमं नालिकायाः प्रयोजनमाह—'**नइपमुहजलुत्तारे तीए थग्घिज्जए सलिलं ।**' नदीप्रमुखजलोत्तारे—नदी-ह्रदादिकमुत्तरीतुमनोभिर्मुनिभिस्तया नालिकया स्ताघ्यते—सलिलम् , इदं गाधमगाधं वा इति परिमीयते ॥६७०-६७१ ॥

अथ यष्ट्यादीनां प्रयोजनमाह—'**यज्झइ**' इत्यादिगाथाद्वयम् ; यष्ट्या—यष्टिदण्डकेन उपाश्रये भोजनादिवेलायां सागारिकादिरक्षणार्थं यवनिका—तिरस्करिणी बध्यते । तथा वियष्ट्या—वियष्टिदण्डकेन कुत्रापि प्रत्यन्तग्रामादौ तस्करादिरक्षणार्थमुपाश्रयसत्कं द्वारं घट्ट्यते—आहन्यते, येन खाट्कारश्रवणात् तस्कर-शुनकादयो नश्यन्तीति । तथा ऋतुबद्धे काले भिक्षाभ्रमणादिवेलायां दण्डको गृह्यते, तेन हि प्रद्विष्टानां द्विपदानां मनुष्यादीनां चतुष्पदानां गवाश्वादीनां [1]बहुपदानां शरभादीनां निवारणं क्रियते । दुर्गस्थानेषु च व्याघ्रचौरादिभये ग्रहणं भवति । वृद्धस्य च अवष्टम्भनहेतुर्भवतीत्यादिप्रयोजनम् । [2]तथा वर्षाकाले विदण्डको गृह्यते । यद्-यस्मात्स लघुको भवति ततः कल्पान्तरितः—कल्पस्याभ्यन्तरे कृतः सुखेनैव नीयते । जलभयेन यथाऽप्कायेन न स्पृश्यन्त इति ॥ ६७२-६७३ ॥

इदानीमेतेषां दण्डानां शुभाशुभस्वरूपप्रतिपादनायाह—'**विसे**'त्यादि, पूर्वोक्तेषु पञ्चसु दण्डकेषु पर्वाणि—ग्रन्थिमध्यानि एवंविधानि शुभानि भवन्तीति सम्बन्धः । तत्र विषमाणि—एक-त्रि-पंच-सप्त-नव-

१ बहुपदानां—जे. नास्ति ॥ २ तथा—मु. नास्ति ॥

रूपाणि, तथा दश च–दशसङ्ख्यानि, तथा वर्धमानानि–उपर्युपरि प्रवर्धमानमानानि, तथा एकवर्णानि–न पुनश्चित्रलकानि, तथा 'अपोल्लाइ'' अशुषिराणि निबिडानीत्यर्थः, एवंविधविशेषणविशिष्टपर्वोपेताः स्निग्धवर्णा मसृणा वर्तुलाश्च दण्डका यतिजनस्य प्रशस्ता इति भावः। 'सेसाइं असुहाइं'ति शेषाणि–पूर्वोक्तविशेषणविपरीतस्वरूपाणि पर्वाणि अशुभानि-अप्रशस्तानीति। एकादिपर्वाणां च शुभाशुभफलमित्थमोघनिर्युक्तावुक्तम्, यथा—

'एगपव्वं पसंसंति, दुपव्वा कलहकारिया। तिपव्वा लाभसंपन्ना, चउपव्वा मारणंतिया ॥ १ ॥
पंचपव्वा य जा लट्ठी, पंथे कलहनिवारिणी। छप्पव्वाए य आयंको, सत्तपव्वा निरोगिया ॥ २ ॥
अट्ठपव्वा असंपत्ती, नवपव्वा जमकारिया। दसपव्वा उ जा लट्ठी, तहियं सव्वसंपया ॥३॥[गा.७३१-२,७३४]
इति ॥६७४॥ ८१ ॥

इदानीं 'तणपणग' ति द्व्यशीतितमं द्वारमाह–

[1]'तणपणगं पुण भणियं जिणेहिं जियरागदोसमोहेहिं ।
साली १ वीहिय २ कोद्दव ३ रालय ४ रन्ने तणाइं[2] च ५ ॥६७५॥

'तणपणगं' गाहा, तृणपञ्चकं पुनर्भणितं जिनैर्जितराग-द्वेष-मोहैर्यथा शालि-व्रीहिक-कोद्रव-रालकसम्बन्धीनि तृणानि–पलालप्रायाणि अरण्ये–अरण्यविषयाणि च, [2]तत्र शालयः–कलमशालिप्रभृतयः,

१ तुलना–स्थानाङ्गवृत्तिः सू. ३१०, आव. हारि. वृत्तिः पृ. ६५२, निशीथभाष्यं गाथा ४०००. बृ. क. भा. ३८२२ ॥
२ तत्र च–सं. ॥

व्रीहयः—षष्टिकादयः, कोद्रवो—धान्यविशेषः प्रतीतः, रालकः—कङ्गुविशेषः, अरण्यतृणानि -श्यामाकप्रमुखानि ॥६७५॥८२॥

इदानीं 'चम्मपंचगं' ति त्र्यशीतितमं द्वारमाह—

[1]अय १ एल २ [2]गावि ३ महिसी ४ मिगाणमजिणं च ५ पंचमं होइ ।
तलिगा १ खल्लग २ [3]वद्धे ३ कोसग ४ कित्ती य ५ बीयं तु ॥६७६॥ [निशीथभाष्य४००३]

'अय-एल' गाहा, अजाः—छगलिकाः, एडका—अजविशेषाः, गावो महिष्यश्च प्रतीताः, मृगा -हरिणाः, एतेषां सम्बन्धीनि पंच अजिनानि—चर्माणि भवन्ति । अथवा द्वितीयादेशेन—इदं चर्मपञ्चकम्, यथा—तलिग'त्ति उपानहस्ताश्च एकतलिकाः, तदभावे यावच्चतुस्तलिका अपि गृह्यन्ते, अचक्षुर्विषये रात्रौ गम्यमाने सार्थवशादिवापि मार्गं मुक्त्वा उन्मार्गेण गम्यमाने स्तेन-श्वापदादिभयेन वा त्वरितं गम्यमाने कण्टकादिसंरक्षणार्थमेताः पादयोः क्रियन्ते । यद्वा कश्चित्सुकुमारपादत्वाद्वन्तुमसमर्थो भवति ततः सोऽपि गृह्णातीति । तथा खल्लकानि-पादत्राणानि, यस्य हि पादौ विचर्चिकावातेन स्फुटितौ भवतः स मार्गे गच्छन् तृणादिभिर्दूयते, यद्वा कस्यचित्सुकुमारपादत्वात् शीतेन पाष्ण्यादिप्रदेशेषु विपादिकाः स्फुटन्ति ततस्तद्रक्षणार्थं तानि पादयोः परिधीयन्ते । तथा 'वद्धे' त्ति [4]वर्धास्ते च त्रुटितोपानहादिसन्धानार्थं

१ तुलना—स्थानाङ्गवृत्तिः सू. ३१०, आव. हारि. वृत्तिः पृ. ६५२ ॥ २ गावो—मु. ।
३ बज्झो इति स्थानाङ्गवृत्तौ [सू. ३१०] पाठः । बज्झो-इति आव०हारिभद्र्यां [पृ. ६५२] पाठः । बज्झे—इति निशीथभाष्ये गा. ४००३ पाठः ॥ ४ तुलना—व्यवहारभाष्यवृत्तिः उ. ८।१८ ॥

गृह्यन्ते, तथा [1]कोशकः—चर्ममय उपकरणविशेषः । यदि हि कस्यचित्पादनखाः पाषाणादिषु प्रतिस्खलिता भज्यन्ते तदा तेषु कोशकेष्वङ्गुल्योऽङ्गुष्ठो वा क्षिप्यन्ते, अथवा नखरदनिकाधारः कोशकः । तथा कृत्तिः—मार्गे दावानलभयाद्गच्छे यच्चर्म ध्रियते यत्र वा प्रचुरः सचित्तपृथिवीकायो भवति तत्र पृथिवीकाययतनार्थं कृत्तिमास्तीर्य अवस्थानादि क्रियते, यद्वा कदाचित्तस्करैर्मुषिता भवेयुस्ततोऽन्यप्रावरणाभावे तामपि प्रावृण्वन्तीत्येतद् द्वितीयं यतिजनयोग्यं चर्मपञ्चकं भवति ॥६७६॥ ८३॥

इदानीं 'दूसपंचगं' ति चतुरशीतितमं द्वारमाह—

[2]अप्पडिलेहियदूसे तूली १ उवहाणगं च २ नायव्वं ।
गंडुवहाणा ३ ऽऽलिंगिणि ४ मसूरए ५ चेव पोत्तमए ॥६७७॥
पल्हवि १ कोयवि २ पावार ३ नवयए ४ तह य दाढिगाली य ५ ।
दुप्पडिलेहियदूसे एयं [3]बीयं भवे पणगं ॥६७८॥ [निशीथभाष्य ४००१-२]
पल्हवि हत्थुत्थरणं कोयवओ रूयपूरिओ पडओ ।
दढगाली धोयपोत्ती सेस पसिद्धा भवे भेया ॥६७९॥
खरडो १ तह [4]वोरुडी २ सलोमपडओ ३ तहा हवइ जीणं ४ ।
सदसं वत्थं ५ पल्हविपमुहाणमिमे उ पज्जाया ॥६८०॥

१ तुलना—व्यवहारभाष्यवृत्तिः उ. ८ । ६८ ॥ २ तुलना—आव.हारिभद्री पृ. ६५२, स्थानाङ्गवृत्तिः सू. ३१० ॥
३ बिइयं-जे । बितियं—इति निशीथभाष्ये पाठः ॥ ४ वूरुट्टी जे. ॥

'अप्पे' त्यादिगाथाचतुष्कम्, दूष्यं-वस्त्रम्, तद् द्विविधम्-अप्रत्युपेक्षं दुष्प्रत्युपेक्षं च। तत्र यत्सर्वथाऽपि न प्रत्युपेक्षितुं शक्यते तदप्रत्युपेक्षम्, यच्च सम्यक् न शक्यते प्रत्युपेक्षितुं तद् दुष्प्रत्युपेक्षम्। तत्र अप्रत्युपेक्षितदूष्यपञ्चकं यथा-तूली-सुसंस्कृतरूतभृतोऽर्कतूलादिभृतो वा विस्तीर्णः शयनीयविशेषः। तथा उपधानकं-हंसरोमादिपूर्णमुच्छीर्षकम्। तथा उपाधानकस्योपरि कपोलप्रदेशे या दीयते सा गण्डोपधानिका गल्लमसूरिकेत्यर्थः। तथा जानु-कूर्परादिषु या दीयते सा आलिङ्गिनी। तथा वस्त्रकृतं चर्मकृतं [1]वा वृत्तं बूर्यादिपूर्णमासनं मसूरकः। एतानि सर्वाण्यपि पोतमयानि-वस्त्रमयानि प्रायेणेति ॥६७७॥

अथ दुष्प्रत्युपेक्षितपञ्चकमाह-पल्हवि:, कोयवि:, प्रावारकः, नवतकं तथा दढगालिअ, एतद् दुष्प्रत्युपेक्षितदूष्यविषयं द्वितीयं पञ्चकं भवेत् ॥६७८॥

अथैतदेव व्याख्यानयन्नाह-पल्हवि:-हस्त्यास्तरणम्, हस्तिनः पृष्ठे यदास्तीर्यते खरड इत्यर्थः। ये चान्ये आस्तरकादयोऽल्परोमयुक्ता बहुरोमयुक्ता वा ते सर्वेऽप्यत्रान्तर्भवन्ति। यदुक्तं **निशीथचूर्णौ**-

"जे य बड्डअत्थरगाइच्चाई माणभेआ मद्दुरोमा उल्लुतरोमा वा ते सव्वे इत्थ निवयंति" त्ति।

[तुलना-नि. चू. गाथा ४००२]

'**बड्डुअत्थरगाइ**' त्ति यः किल उष्ट्रोपरि न्यस्यते। तथा कोयविको-रूतपूरितः पटः, [2]बुरुडीति यदुच्यते। ये चान्ये उल्वणरोमाणो नेपालकम्बलप्रभृतयस्ते सर्वे अत्रान्तर्भवन्ति। उक्तं च—

१ वा वृत्तं बूर्यादि० स.पो.। च व्यावृत्तं बूर्यादिपूर्णं० वि.। "बूर्यादिपूर्णं चक्कल-गद्दिकादि" इति बृ.क.भा. वृत्तौ [पृ. १०२४] पाठः॥ २ बूरठी-वि.। बुरुडी-पो.॥

"जे अन्ने एवमाइभेआ उव्वणरोमा कंबलगाइआ ते सव्वे इत्थ निवयंति" त्ति ।

[तुलना–नि. चू. भा. ३ । पृ.३२१]

तथा दृढगालिधौंतपोतिका ब्राह्मणानां सम्बन्धि सदृशं परिधानवस्त्रमित्यर्थः । ये चान्ये द्विसरसूत्र-पटीप्रभृतयो भेदास्ते सर्वेऽत्र निपतन्ति । उक्तं च–

"विरलिमाई भूरिमेआ सव्वे इत्थ निवयंति"] निशीथचूर्णिः, गाथा ४००२] त्ति । विरलिमाइत्ति–दोरियाप्रमुखाः, शेषौ च–प्रावार-नवतकलक्षणौ प्रसिद्धावेव भेदौ । तत्र प्रावारः–सलोमकः पटः, स च माणिकीप्रभृतिकाः, [1]अन्ये तु प्रावारको–बृहत्कम्बलः परियच्छिर्वेत्याहुः, नवतं च–जीर्णमिति ॥६७९॥

अथ पल्हविप्रमुखाणां पञ्चनामपि सुखावबोधार्थं क्रमेण पर्यायानाह–'खरे' त्यादि, इयं च व्याख्याताथा ॥६८०॥ ८४॥

इदानीं 'पञ्च अवग्गहभेय'त्ति पञ्चाशीतितमं द्वारमाह–

देविंद १ राय २ [2]गिहवइ ३ सागरि ४ साहम्मि ५ उग्गहे पंच ।
अणुजाणाविय साहूण कप्पए सव्वया वसिउं ॥६८१॥
अणुजाणावेयव्वो जईहिं दाहिणदिसाहिवो इंदो १ ।
भरहंमि भरहराया २ जं सो छक्खंडमहिनाहो ॥६८२॥

१ बृ.क. भाष्यवृत्तौ (पृ. १०५५) द्रष्टव्या ॥ २ गह० जे. ॥

तह [1]गिहवईवि देसस्स नायगो ३ [2]सागरित्ति सेज्जवई ४ ।
साहम्मिओ य सूरो जंमि पुरे विहियवरिसालो ५ ॥६८३॥
तप्पडिबद्धं तं जाव [3]दोण्णि मासे अओ जईण सया ।
अणणुन्नाए पंचहिवि उग्गहे कप्पइ न ठाउं ॥६८४॥

'देविंदे' त्यादिगाथाचतुष्कम्, देवेन्द्र-राज-गृहपति-सागारिक-साधर्मिकाणां सम्बन्धिनः पञ्चावग्रहाः—आभवनव्यवहारा भवन्ति । ततस्ताननुज्ञाप्य साधूनां—व्रतिनां कल्पते सर्वदा वस्तुं—वासं कर्तुम्, नान्यथेति ॥ ६८१ ॥

एतदेव व्यक्तं व्याचष्टे—'अणुजाणावेयव्वो' इत्यादिगाथात्रयम्, इह लोकमध्यवर्तिनो मेरुमहामहीधरस्य बहुमध्यभागे ऊर्द्ध्वा-ऽधःप्रतररूपा तिर्यक् च एकप्रादेशिकी श्रेणिरस्ति । तया च सर्वोऽपि लोको द्विधाकृतो—दक्षिणार्धमुत्तरार्धं च । तत्र दक्षिणार्धं शक्रस्याभवति, उत्तरार्धं च ईशानस्य । ततो दक्षिणार्धवर्तिभिर्यतिभिर्दक्षिणदिशाया—दक्षिणलोकार्धस्याधिपतिरिन्द्रः शक्राभिधोऽनुज्ञापयितव्यः, उत्तरार्धवर्तिव्रतिभिस्तु ईशानेन्द्रः १ । तथा चक्रवर्त्यादयो राजानो यावन्मात्रस्य क्षेत्रस्य प्रभवन्ति तावत्प्रमाणं क्षेत्रं राजावग्रहः । तत्र तिर्यग् मागधादिषु तीर्थेषु यावच्चक्रवर्तिनः शरो व्रजति ऊर्द्ध्वमपि क्षुल्लहिमवद्गिरौ चतुःषष्टिसूत्रादेशेन द्विसप्ततिं वा योजनानि यावत् । उक्तं च कल्पचूर्णौ—

१ गाह० जे. ला. ॥ २ सागारियत्ति-ला. ॥ ३ दोहि- जे. । दोहिं-ला. ॥ ४ तुलना- बृ.क.भा. टीका पृ. २०० ल: ॥

'उड्ढं जाव सरो चेव चुल्लहिमवंतकुमारस्स मेराए वच्चति चउसट्ठिं जोयणाणि सुत्ताएसेण बावत्तरिं' [बृ.क.भा. १७५, पृ. २०१ टि. ३] ति,

अधस्तु गर्ता-ऽवटादिषु । ततो भरतक्षेत्रे भरतश्चक्री यतिभिरनुज्ञापयितव्यः । यद्-यस्मात्कारणात् स षट्खण्डमहीनाथः । उपलक्षणमेतत् ततः स्वस्वकाले सगरादयोऽप्यनुज्ञापयितव्याः । एवमैरवतादिष्वपि निजनिजचक्रवर्तिनः २ । तथा गृहपतिः-देशस्य-मण्डलस्य नायकः-अधिपतिः, तदवग्रहे-तदधिष्ठित-मण्डलरूपे बसद्भिः सोऽप्यनुज्ञापयितव्यः ३ । तथा सागारिकः-शय्यापतिर्वसतिस्वामीत्यर्थः तमप्यनुज्ञाप्य [1]वृति-वरण्डकादिपरिक्षिप्तगृहादिरूपे तदवग्रहे स्थातव्यम् , एष च तिर्यक् विज्ञेयः । अधस्तु द्वयोरपि गृहपति-सागारिकयोर्वापी-कूप-भूमिगृहादिपर्यन्तः । ऊर्द्धं पुनः पर्वत-पादपादिशिखरान्तोऽवग्रह इति ४ । तथा समानो धर्मः सधर्मस्तेन चरतीति साधर्मिकः सूरिः-आचार्यः, उपलक्षणत्वादुपाध्यायादिश्च । ततः स आचार्यादिर्यस्मिन् पुरे-नगरे विहितवर्षाकालः-कृतचतुर्मासकस्तन्नगरं गव्यूतपञ्चकादर्वाक् तस्याचार्यादेः प्रतिबद्धं तदवग्रह इत्यर्थः । अयं च क्षेत्रतः, कालतस्तु वर्षाकालानन्तरमपि द्वौ मासौ, एते पञ्च अवग्रहाः । अतः पञ्चभिरेतैर्देवेन्द्रादिभिरननुज्ञाते अवग्रहे यतीनां सदा-सर्वकालं न कल्पते स्थातुम्-अवस्थानम् कर्तुमिति, अत्र चोत्तरोत्तरेणावग्रहेण पूर्वः पूर्वो बाधितो बोद्धव्यः, यथा राजावग्रहेण देवेन्द्रावग्रहो बाधितः, तथाहि-राजावग्रहे राज्ञ एव प्राधान्यम् , न देवेन्द्रस्य, ततस्तत्र राजैवानुज्ञापयितव्यो न तु देवेन्द्र इति । एवं राजावग्रहमपि गृहपत्यवग्रहो बाधते, तमपि सागारिकावग्रहः, तमपि साधर्मिकावग्रह इति ॥६८२-६८४॥८५॥

१ वृत्तिवरण्ड० मु. ॥

इदानीं 'परीसह' त्ति षडशीतं द्वारमाह–

[1]खुहा १ पिवासा २ सी ३ उण्हं ४, दंसा ५ चेला ६ रइ ७ त्थिओ ८ ।
चरिया ९ निसीहिया १० सेज्जा ११, अक्कोस १२ वह १३ जायणा १४ ॥६८५॥
अलाभ १५ रोग १६ तणफासा १७, मल १८ सक्कार १९ परीसहा ।
पन्ना २० अन्नाण २१ सम्मत्तं २२, इइ बावीसं परीसहा ॥६८६॥
दंसणमोहे दंसणपरीसहो पन्नऽनाण पढमंमि ।
चरमेऽलाभपरीसह सत्तेव चरित्तमोहम्मि ॥६८७॥
अक्कोस अरइ इत्थी निसीहियाऽचेल जायणा चेव ।
सक्कारपुरक्कारे एक्कारस वेयणिज्जंमि ॥६८८॥
[2]पंचेव आणुपुव्वी चरिया ६ सेज्जा ७ तहेव जल्ले य ८ ।
वह ९ रोग १० तणफासा ११ सेसेसु नत्थि अवयारो ॥६८९॥
बावीसं बायरसंपराय चउदस य सुहुमरायम्मि ।
छउमत्थवीयरागे चउदस एक्कारस जणंमि ॥६९०॥
वीसं उक्कोसपए वट्टंति जहन्नओ य एक्को य ।
सीओसिणचरियनिसीहिया य जुगवं न वट्टंति ॥६९१॥ [तु. उत्तरा.नि.८२]

१ तुलना-आवश्यक हारि. वृत्तिः पृ.६५६ तः । उत्तराध्ययन सू. अ. २ ॥
२ तुलना-भगवती सू. ८।८। सू. ३४३ । उत्तराध्ययनसू.नि. २।७८ ॥

'**खुहे**' त्यादिगाथासप्तकम् , [1]'मार्गाच्यवनार्थं निर्जरार्थं च परि-सामस्त्येन सह्यन्त इति परीषहाः । तत्र मार्गाच्यवनार्थं दर्शनपरीषहः प्रज्ञापरीषहश्च, शेषा विंशतिर्निर्जरार्थम् , एते च द्वाविंशतिसङ्ख्याः क्षुत्पिपासा-शीतोष्ण-दंशा-ऽचेला-ऽरति-स्त्री-चर्या-नैषेधिकी-शय्या-ऽऽक्रोश-वध-याच्ञा-ऽलाभ-रोग-तृणस्पर्श-मल-सत्कार-प्रज्ञा-ऽज्ञानसम्यक्त्वानि । अमीषां च यथाक्रमं सङ्क्षेपतोऽयमर्थः- [2]क्षुद्वेदनामुदितामशेषवेदनातिशायिनीं सम्यग्विषहमाणस्य [3]जठरान्त्रविदाहिनीमागमविहितेन भक्तेन शमयतोऽनेषणीयं च परिहरतः क्षुत्परीषहविजयो भवति । अनेषणीयग्रहणे तु न विजितः स्यात् क्षुत्परीषहः । अयं चाशेषपरीषहाणां मध्येऽतिदुस्सह इत्यादावुपन्यस्तः १ ।

तदनु बुभुक्षापीडितस्य तदुपशमनायोच्च-नीचेषु गृहेषु हिण्डमानस्य श्रमवशात् तृष्णा जायते । ततः पिपासापरीषहो द्वितीयस्थाने । एवमग्रेतनपरीषहाणामप्युत्तरोत्तरभणने कारणं ज्ञातव्यमिति । तत्र पातुमिच्छा-पिपासा, सैवात्यन्त[4]व्याकुलीकरणहेतुरपि शीतलजलाद्यप्रार्थनतः परिषह्यमाणा पिपासापरीषहः । एषणीयभावे तु प्राणिदयालुना समग्रमनेषणीयं परिहरता शरीरस्थितिः कार्या २ ।

तथा '**इयैङ्क्ता**'दित्यस्य गत्यर्थत्वात् कर्तरि क्तः । ततो 'द्रवमूर्तिस्पर्शयोः श्य' [पा०६-१-२४]

---

१ तुलना-तत्त्वार्थसू. ९।८॥ २ तुलना-आवश्यकहारिभद्रीवृत्तिः पृ.६५७ तः । तत्त्वार्थसिद्धसेनीयावृत्तिः ९।९ ॥ ३ जठरान्तर्विदाहिनो० मु. । जठराग्निदाहिनी-सि. । तत्त्वार्थ. सिद्ध०वृत्तौ (९।९), आव० हारि.वृत्तौ (पृ०६५७) अपि जठरान्त्रवि० इति पाठः ॥ ४ व्याकुलातीकरण० सं. ॥

इति सम्प्रसारणे स्पर्शवाचित्वाच्च श्योऽस्पर्शे [पा० ८-२-४७] इति नत्वाभावे शीतं–शिशिरस्पर्शः, तदेव परीषहः शीतपरीषहः । शीते बहुत्यपि पतति जीर्णवसनः परित्राणवर्जितो नाकल्प्यानि वासांसि गृह्णाति । शीतत्राणाय आगमोक्तेन विधिना एषणीयमेव कल्पादि गवेषयेत् परिभुञ्जीत वा । नापि शीतार्तो ज्वलनं ज्वालयेत् अन्यज्वालितं वा न सेवेत एवमनुतिष्ठता शीतपरीषहजयः कृतो भवति ३ ।

तथा 'उष दाहे' इत्यस्य उणादिनक्प्रत्ययान्तस्योष्णं–निदाघादितापात्मकं तदभितप्तशिलादिरूपं च तदेव परीषह उष्णपरीषहः । उष्णतप्तोऽपि न जलावगाहनस्नानव्यजनवातादिकं वाञ्छेत । न चातपत्राद्युष्णत्राणायाददीत, किन्तूष्णमापतितं सम्यक्सहेत । एवमनुतिष्ठतोष्णपरीषहजयः कृतो भवति ४ ।

तथा दशन्ति–भक्षयन्ति इति पचाद्यचि दंशाः, मशक-यूका-मत्कुणादिक्षुद्रसत्वोपलक्षणमेतत्, त एव परीषहो दंशपरीषहः । दंश-मशकादिभिर्दश्यमानोऽपि न ततः स्थानादपगच्छेत, न च तदपनयनार्थं धूमादिना यतेत, नापि व्यजनादिना तन्निवारयेदित्येवं दंशादिपरीषहजयः कृतः स्यात् । एवमन्यत्रापि क्रिया योज्या ५ ।

तथा चेलस्याभावोऽचेल जिनकल्पिकादीनाम्, अन्येषां तु यतीनां भिन्नं स्फुटितमल्पमूल्यं च चेलमप्यचेलमुच्यते । यथा कुत्सितं शीलमशीलमिति । तदेव परीषहोऽचेलपरीषहः । अमहामूल्यानि खण्डितानि मलिनानि च वासांसि साधुर्धारयेत् । न च तथाविधवस्त्रः सन् मम प्राक्परिगृहीतं वस्त्रं नास्ति नापि तथाविधो दातेति दैन्यं गच्छेत् । अन्यलाभमसम्भावनया प्रमुदितमानसश्च न भवेदिति ६ ।

तथा रमणं रतिः–संयमविषया धृतिस्तद्विपरीता त्वरतिः, सैव परीषहोऽरतिपरीषहः, विहरतस्तिष्ठतो वा यद्यरतिरुत्पद्यते तत्रोत्पन्नयारतिनाऽपि सम्यग्धर्मारामरतेनैव भवितव्यम् ७ ।

तथा स्त्यायतेः स्तृणातेर्वा ग्रटि टिष्वान् ङीपि स्त्री, सैव तद्गतरागहेतुगतिविभ्रमेङ्गिताकारविलोकनेऽपि 'त्वङ्क्षिर-मांस-मेद-स्नाय्वस्थि-सिराव्रणैः सुदुर्गन्धि । कृष्ण-नयन-जघन-वदनोरुमूर्च्छितो मन्यते रूपम् ॥१॥ तथा—निष्ठीवनं जुगुप्सन्यधरस्थं पिबति मोहितः प्रमदम् । कृष्णजघनपरिश्रावं नेच्छति तन्मोहितो भजते ॥२॥'

इत्यादितत्स्वरूपपरिभावनातः परिषह्यमाणत्वात्परीषहः स्त्रीपरीषहः । अयमर्थः—न स्त्रीणामङ्गप्रत्यङ्गस्थानहसितललितविभ्रमाद्याक्षिप्तानाक्षेपकारिणीश्चेष्टाश्चिन्तयेत् । न जातुचिच्चक्षुरपि तत्र निक्षिपेत् मोक्षमार्गार्गलासु ललनासु कामबुद्ध्येति ८ ।

तथा चरणं चर्या द्रव्यतो ग्रामानुग्रामविहरणात्मिका, भावतस्त्वेकस्थानमधितिष्ठतोऽन्यप्रतिबद्धता, सैव परीषहश्चर्यापरीषहः । [1]वर्जितालम्यो ग्राम-नगर-कुलादिष्वनियतवसतिर्नियमत्वात्प्रतिमासं चर्यामाचरेदिति ९ ।

तथा निषेधनं निषेधः—पापकर्मणो गमनादिक्रियायाश्च प्रतिषेधः, स प्रयोजनं यस्याः सा नैषेधिकी शून्यागार-श्मशानादिका स्वाध्यायादिभूमिः सैव परीषहो नैषेधिकीपरिषहः । [2]अन्यत्र तु निषद्यैवं पठ्यते, तत्र निषीदन्त्यस्यामिति निषद्या—स्थानं स्त्री-पशु-पण्डकविवर्जितं तत्र इष्टानिष्टोपसर्गान् अनुद्विग्नः सम्यक्सहेत १० ।

तथा शेरतेऽस्यामिति शय्या—उपाश्रयः संस्तारको वा, सैव परीषहः शय्यापरीषहः, सम-विषमभूमिकं

१ वर्जिता•इति लक्ष्यार्थसिद्धौ [२।३] पाठः ॥ २ लक्ष्यार्थसूत्रादिषु [९/९] इति ध्येयम् ॥

[1]पांशूत्करप्रचुरमतिशिशिरं बहुधर्मकं वा उपाश्रयं वा मृदुकठिनादिभेदेनोच्चावचं संस्तारकं वा प्राप्य न कदाचिदप्युद्विजेत् ११।

तथा आक्रोशनमाक्रोशः—अनिष्टवचनम्, स एव परीषहः आक्रोशपरीषहः, तद्यदि सत्यं तर्हि कः कोपः? शिक्षयति हि मामयमुपकारी, न पुनरेवं करिष्यामीति। अनृतं चेत् सुतरां कोपो न कर्तव्यः। उक्तं च-"आक्रुष्टेन मतिमता तत्त्वार्थविचारणे मतिः कार्या। यदि सत्यं कः कोपः? स्यादनृतं किमिह कोपेन? ॥१॥" इत्यादि परिभाव्य न कोपं कुर्यात् १२।

तथा हननं वधः-ताडनं स एव परीषहो वधपरीषहः, परैर्हि दुरात्मकैः पाणि-पार्ष्णि-लत्ता कशादिभिः प्रद्वेषादितस्ताडनं क्रियमाणं सम्यक्सहेत। न पुनः कोपकलुषितान्तःकरणो भवेत्। चिन्तयेच्च-अन्यदेवेदं शरीरमात्मनः पुद्गलसंहतिरूपम्। आत्मा पुनर्न शक्यत एव ध्वंसयितुम्, अतः स्वकृतफलमुपनतमिदं ममेति १३।

तथा याचनं [2]याच्ञा प्रार्थनेत्यर्थः, सैव परीषहो [3]याच्ञापरीषहः। भिक्षोर्हि वस्त्रपात्रान्नपानप्रतिश्रयादि परत एव सर्वमपि लभ्यम्, शालीनतया च यद्यपि [4]याच्ञां कर्तुं न शक्नोति तथापि त्रपामपहाय प्रागल्भ्यभाजा सञ्जाते कार्ये स्वधर्मकायपरिपालनाय याचनमवश्यं कार्यमिति १४।

तथा लम्भनं लाभो न लाभोऽलाभः-अभिलषितविषयाप्राप्तिः स एव परीषहोऽलाभपरीषहः। याचनीयालाभेऽपि—

१ पांसू-इति पो. वि. प्रत्योः तत्त्वार्थे. सि. वृत्तौ (९।९) च पाठः॥
२ याञ्चा-मु.॥ ३ याञ्चा० मु.॥ ४ याञ्चां-मु.॥

卐 बहु परघरे अत्थि, विविहं खाइम-साइमं । न तत्थ पंडिओ कुप्पे, इच्छा दिज्ज परो न वा ॥१॥
[दशवै.५/२/२७]

इत्यादि परिभाव्य प्रसन्नचेतसा अविकृतवदनेन च भवितव्यम् १५ ।

तथा रोगः–कण्डू-ज्वरादिरूपः, स एव परीषहो रोगपरीषहः । ज्वर-कास-श्वासादिके सत्यपि न गच्छ-निर्गता जिनकल्पिकादयश्चिकित्साविधापने प्रवर्तन्ते, किन्तु सम्यगेव तदधिसहन्ते स्वकर्मणः फलमिदमु-दितमिति चिन्तयन्तः । गच्छवासिनस्त्वल्पबहुत्वालोचनया सम्यग् सहन्ते प्रवचनोक्तेन वा विधिना चिकित्सामपि कारयन्तीति १६ ।

तथा तरन्तीति तृणानि, औणादिको नक् ह्रस्वत्वं च, तेषां स्पर्शस्तृणस्पर्शः, स एव परीषहस्तृण-स्पर्शपरीषहः । अशुषिरतृणस्य हि दर्भादेः परिभोगोऽनुज्ञातो गच्छनिर्गतानां [1]गच्छवासिनां च यतीनाम्, तत्र येषां शयनमनुज्ञातं निष्पन्नानां ते तान् दर्भान् भूमावीषदार्द्रतादियुक्तायामास्तीर्य संस्तारोत्तरपट्टकौ च दर्भाणामुपरि विधाय शेरते । चौरापहृतोपकरणो वा अत्यन्तजीर्णत्वात्प्रतनुसंस्तारकपट्टको वा तदुपरि शेते । तत्र च शयानस्य यद्यपि कठिनतीक्ष्णाग्रभागैस्तृणैरत्यन्तपीडा समुपजायते तथापि परुषदर्भादितृण-स्पर्शं सम्यक् सहेतेति १७ ।

तथा मलः–प्रस्वेदजलसम्पर्कतः कठिनीभूतं रजः, स एव परीषहो मलपरीषहः । मलो हि वपुषि

卐 "बहु परगृहे अस्ति, विविधं खाद्य-स्वाद्यं । न तत्र पण्डितः कुप्येत्, इच्छा परो दद्यात् न वा ॥१॥"
१ गच्छनिवासिनां–जे. ॥

स्थिरतां गतो ग्रीष्मोष्मसन्तापजनितघर्मजलार्द्रतां प्राप्तो दुर्गन्धिघर्महान्तमुद्वेगमापादयति। तदपनयनाय न कदाचिदभिषेकाद्यभिलाषं कुर्यादिति १८।

तथा सत्कारो-भक्तपानाऽऽवस्त्रपात्रप्रदान-वन्दना-ऽभ्युत्थाना-ऽऽसनसम्पादन-सद्भूतगुणोत्कीर्तनादि-रूपा प्रतिपत्तिः, स एव परीषहः सत्कारपरीषहः। सत्कारं हि परस्माज्जायमानं दृष्ट्वा नोत्कर्षाद्याकुलं चेतः कुर्यात् असत्कारितो वा न प्रद्वेषं व्रजेत् १९।

तथा प्रज्ञायतेऽनया वस्तुतत्त्वमिति प्रज्ञा-बुद्ध्यतिशयः, स एव परीषहः प्रज्ञापरीषहः। मनोज्ञप्रज्ञा-प्राग्भारप्राप्तौ हि न गर्वमुद्वहेत्। प्रज्ञाप्रतिपक्षेणाप्यबुद्धिकत्वेन परीषहो भवति, नाहं किञ्चिज्ज्ञाने मूर्खोऽहं सर्वैः परिभूत इत्येवं परितापमुपागतस्य कर्मविपाकोऽयमिति मत्वा तदकरणात्तत्परीषहजयः २०।

तथा ज्ञायते वस्तुतत्त्वमनेनेति ज्ञानं-श्रुताख्यं तदभावोऽज्ञानम्, स एव परीषहोऽज्ञानपरीषहः। आगमशून्योऽहमिति न मनसि खेदं विदध्यात्। एतत्प्रतिपक्षेणापि ज्ञानेन परीषहो भवति। ततः समग्रश्रुतपारगोऽहमिति नोत्सेकं गच्छेदिति २१।

तथा सम्यक्त्वं-सम्यग्दर्शनं तदेव क्रियादिवादिनां विचित्रमतश्रवणेऽपि सम्यक् परिषह्यमाणं निश्चलचित्ततया धार्यमाणं परीषहः सम्यक्त्वपरीषहः। आवश्यके तु असम्यक्त्वपरीषह इति पठितम्, तत्र चैवं व्याख्या-"सर्वपापस्थानेभ्यो विरतः प्रकृष्टतपोऽनुष्ठायी निस्सङ्कश्चाहं तथापि धर्माधर्मात्मदेवनारकादिभावान्न प्रेक्षे ततो मृषा समस्तमेवेदमिति असम्यक्त्वपरीषहः। तत्रैवमालोचयेत्-धर्मा-

ऽधर्मौ पुण्य-पापलक्षणौ यदि कर्मरूपौ पुद्गलात्मकौ ततस्तयोः कार्यदर्शनादनुमानसमधिगम्यत्वम् । अथ क्षमा-क्रोधादिकौ धर्मा-ऽधर्मौ ततः [1]स्वानुभवत्वादात्मपरिणामरूपत्वात्प्रत्यक्षविरोधः, देवास्त्वत्यन्तसुखासक्त-स्वान्मनुष्यलोके च कार्यस्याभावाद् दुष्षमानुभावाच्च न दर्शनगोचरमायान्ति, [2]नारकाः पुनर्निरन्तरमेवाति-तीव्रवेदनार्त्ताः पूर्वकृतदुष्कर्मोदयनिगडबन्धनवशीकृतत्वादस्वतन्त्राः कथमिह समायान्तीत्यादि परिभावय-तोऽसम्यक्त्वपरीषहजयो भवतीति २२ ।" [तुलना–आव. हारिभद्री वृत्तिः पृ. ६५८]

इतिशब्द इयत्ताप्रदर्शनार्थः, एते क्षुदादयः सम्यक्त्वान्ता द्वाविंशतिरिति न न्यूनाधिकाः परीषहा भवन्तीति ।

सम्प्रत्येतेषां द्वाविंशतेरपि परीषहाणां समवतारश्चिन्त्यते–स च द्वेधा–प्रकृतिसमवतारो गुणस्थानक-समवतारश्च, तत्र प्रकृतिसमवतारे ज्ञानावरण-वेदनीय-मोहनीया-ऽन्तरायलक्षणासु चतसृषु प्रकृतिषु द्वाविंशति रपि परीषहाः समवतरन्ति ॥६८५-६८६ ॥

तत्र [3]च यस्य यत्रावतारस्तमाह–'दंसणे'त्यादिगाथात्रयम् , मोहनीयं द्विधा–चारित्रमोहनीयं दर्श-नमोहनीयं च, तत्र दर्शनमोहे–मिथ्यात्वादित्रयलक्षणे दर्शनपरीषहः–सम्यक्त्वपरिषह एकोऽवतरति, तदुदये तस्य भावात् । तथा [4]"पन्नऽनाण"त्ति प्राकृतत्वेन प्रथमाद्विवचनलोपात् [5]प्रज्ञा-ऽज्ञाने–प्रज्ञापरीषहोऽज्ञान-

१ स्वानुभवादा० मु. । आव० हारि० वृत्तौ [पृ.६५८] अपि स्वानुभवत्वादा० इति पाठः ॥ २ नारकास्तुनि० पो. वि. ॥ ३ द्रष्टव्यम् भगवतीसूत्रम् ८।८।सू. ३४३ ॥ ४ पन्नाणाणत्ति-सं. ॥ ५ तुलना-तत्त्वार्थसू-९।१३ तः ॥

परीषहश्च प्रथमे–ज्ञानावरणकर्मण्यवतरतः, तत्क्षयोपशमोदयाभ्यामनयोः सद्भावात् । तथा चरमे–अन्तराय-कर्मणि अलाभपरीषहोऽवतरति, लाभान्तरायोदयनिबन्धनत्वादलाभस्य ॥६८७॥

तथा चारित्रमोहे–चारित्रमोहनीयनाम्नि मोहनीयभेदे आक्रोश-अरति-स्त्री-नैषेधिक्यचेल-याच्ञा-सत्कारपुरस्कारलक्षणाः सप्तैव परीषहा अवतरन्ति । अयमर्थः–क्रोधोदयादाक्रोशपरीषहः, अरतिमोहनीयो-दयादरतिपरीषहः, पुंवेदोदयात्स्त्रीपरीषहः, भयकर्मोदयान्नैषेधिकीपरीषहः, जुगुप्सोदयादचेलपरीषहः, मानो-दयाद्याच्ञापरीषहः, लोभोदयात्सत्कारपरीषह इति । अत्र च सत्कारो–वस्त्रादिभिः पूजनम्, पुरस्कारः-अभ्युत्थानादिप्रतिपत्तिः, यद्वा सत्कारेण पुरस्कारः–पुरस्करणं ततस्तावेव स एव वा परीषहः सत्कारपुर-स्कारपरीषह इति । तथा एकादश परीषहा वेदनीयेऽवतरन्ति, तदुदयाद्भवन्तीतीत्यर्थः ॥६८८॥

ते चैते 'पञ्चेव आणुपुव्वि'त्ति पञ्चैव–पञ्चसङ्ख्या एव, ते च क्वचिदनानुपूर्व्या अपि व्याख्याङ्गत्वा तयाऽपि स्युरित्याह–आनुपूर्व्या–परिपाट्या क्षुत्पिपासा-शीतोष्ण-दंशमशकाख्या इतियावत् तथा चर्या शय्या । जल्ले य' त्ति जल्लो–मलः, वधो रोगस्तृणस्पर्शश्चेत्येकादश । शेषेषु–पूर्वोक्तकर्मचतुष्टयव्यति-रिक्तेषु दर्शनावरणा ऽऽयुर्नामगोत्राख्येषु कर्मसु नास्ति परीषहाणामवतारः–अन्तर्भावः, तदुदये परीषहाणा-मसम्भवात् ॥६८९॥

[1]अधुना गुणस्थानकसमवतारमाह–'बाविसं' गाहा, द्वाविंशतिरित्यपिशब्दस्य लुप्तनिर्दिष्टत्वाद्

१ तुलना-तत्त्वार्थे सू.९।१०-१२॥

द्वाविंशतिरपि परीषहा बादरसम्परायनाम्नि गुणस्थानके । कोऽर्थः ?–अनिवृत्तिबादरसम्परायं नवमगुणस्थानं यावत् सर्वेऽपि परीषहाः सम्भवन्तीति । तथा चतुर्दश चशब्दस्यैवकारार्थत्वाच्चतुर्दशसङ्ख्या एव–क्षुत्पिपासा-शीतोष्ण-दंश-मशक-चर्याशय्या-वधा ऽलाभ-रोग-तृणस्पर्श-मल-प्रज्ञा-ऽज्ञानरूपाः परीषहाः [1]सूक्ष्मरागे-सूक्ष्मसम्परायनाम्नि दशमगुणस्थानके उदयमासादयन्ति । मोहनीयस्य क्षपितत्वेन उपशमितत्वेन वा सप्तानां चारित्रमोहनीयप्रतिबद्धानां दर्शनमोहनीयप्रतिबद्धस्य चैकस्य तत्रासम्भवादिति भावः । तथा छद्म–आवरणं तत्र स्थितश्छद्मस्थः, वीतः–अपगतो रागः समस्तमोहोपशमात्सकलमोहक्षयाच्च यस्य स तथा ततः कर्मधारयः, छद्मस्थवीतरागशब्देन उपशान्तमोह-क्षीणमोहलक्षणं गुणस्थानकद्वयं परिगृह्यते । तत्रापि उक्तरूपा एव चतुर्दश परीषहा सम्भवन्तीति । तथा जिने–सयोगिकेवल्ययोगिकेवलिलक्षणे त्रयोदश-चतुर्दशगुणस्थानकद्वये परीषहकारणभूतस्य वेदनीयस्यैव सद्भावात्तत्प्रतिबद्धा एव एकादश परीषहाः सम्भवन्ति । उक्तं च–

"क्षुत्पिपासा च शीतोष्णे, दंशाश्चर्या वधो मलः ।
शय्या रोगतृणस्पर्शौ, जिने वेद्यस्य सम्भवात् ॥१॥' इति ॥६९०॥

नन्वेते परीषहा एकस्मिन् काले उत्कृष्टतो जघन्यतश्च एकस्मिन् प्राणिनि कियन्तः प्राप्यन्ते ? तत्राह–'वीसं' गाहा,विंशतिरुत्कृष्टपदे चिन्त्यमाने परीषहा वर्तन्ते ? युगपदेकत्र प्राणिनि, जघन्यतश्च-जघन्यपदमाश्रित्य एक एव परीषहः । ननूत्कृष्टपदे किं न द्वाविंशतिरपि परीषहा एकत्र वर्तन्ते ? इत्याह–शीतोष्णे

१ सूक्ष्मराग-मु. । सूक्ष्मसंपराये सूक्ष्मरागे-वि. । सूक्ष्मसंपराये-सि. ॥

चर्या-[1]नैषेधिक्यौ च युगपद्-एककालमेकत्र न वर्तेते-न सम्भवतः, परस्परपरिहारस्थितिलक्षणत्वादमीषाम् । तथाहि-न शीतमुष्णेन सह भवति,नोष्णं शीतेन सह,न चर्यायां नैषेधिकी,न च नैषेधिक्यां सत्यां चर्येति ।

अतो यौगपद्येनामीषामसम्भवाद् द्वयोरभावोत्कृष्टतोऽपि द्वाविंशतिरेकदा परीषहा वर्तन्त इति । [2]ननु नैषेधिकीवत्कथं शय्यापि चर्यया सह न विरुध्यते ? अत्रोच्यते, निरोधबाधादितस्त्वङ्गनिकादेरपि तत्र सम्भवात् , नैषेधिकी तु स्वाध्यायादिनां भूमिष्वेव प्रायः स्थिरतायामेवानुज्ञाता इति तस्या एव चर्यया विरोध इति । [3]तत्त्वार्थे तु उत्कृष्टतोऽप्येकोनविंशतिरेवोक्ताः, चर्या-शय्या-निषद्यादीनामेकस्य सम्भवे द्वयोरभावात् ।

तथाहि-"चर्यायां सत्यां निषद्या शय्ये न स्तः । निषद्यायां तु शय्या-चर्ये शय्यायां पुनर्निषद्या-चर्ये न भवत इति" [तुलना-तत्त्वार्थसू सिद्धसेनीया वृत्तिः ९/१७] ॥६९१॥८६॥

इदानीं 'मंडली सत्त' त्ति सप्ताशीतं द्वारमाह—

सुत्ते १ अत्थे २ भोयण ३ काले ४ आवस्सए य ५ सज्झाए ६ ।
संथारे ७ चेव तहा सत्तेया मंडली जइणो ॥६९२॥

'सुत्ते' गाहा, सूत्रे-सूत्रविषयेऽर्थे-अर्थविषये भोजने काले-कालग्रहे आवश्यके-प्रतिक्रमणे स्वाध्यायप्रस्थापने संस्तारके चैव सप्तैता मण्डल्यो यतेः । एतासु चैकैकेनाचाम्लेन प्रवेष्टुं लभ्यते नान्य थेति ॥६९२॥८७॥

१ निषेधिक्यौ-मु. ॥ २ तुलना-भगवतीसूत्रवृत्तिः प.३६१ ॥ ३ द्रष्टव्यं तत्त्वार्थसूत्रम् ९।१७ ॥

इदानीं 'दसठाणववच्छेओ' त्ति अष्टाशीतं द्वारमाह—

मण १ परमोहि २ पुलाए ३ आहारग ४ खवग ५ उवसमे ६ कप्पे ७ ।
संयमतिय ८ केवल ९ सिज्झणा य जंबुंमि वोच्छिन्ना ॥६९३॥ [विचारसार ४९१]

'मण' गाहा, पदैकदेशेऽपि पदसमुदायदर्शनात् [1]मनःपर्यायज्ञानम् , तथा परमः—प्रकृष्टस्तदुत्पत्ता-ववश्यमेव केवलज्ञानलाभादवधिः—मूर्त्तद्रव्यपरिच्छेदी ज्ञानविशेषः परमावधिः, स च क्षेत्रतोऽलोकेऽपि लोकप्रमाणासङ्ख्ये यखण्डविषयः, कालतस्तु असङ्ख्यं योत्सर्पिण्यवसर्पिणीविषयः । तथा पुलाकलब्धिस्तथा आहारकशरीरलब्धिस्तथा क्षपकश्रेणिस्तथोपशमश्रेणिस्तथा कल्पो—जिनकल्पः, तथा संयमत्रिकं-परिहार-विशुद्धि-सूक्ष्मसम्पराय-यथाख्यातलक्षणचारित्रत्रयम् । तथा केवलं-केवलज्ञानं तथा सेधना—सिद्धिगमनम् , इत्येते दश पदार्था जम्बूस्वामिनि व्यवच्छिन्नाः—जम्बूस्वाम्यनन्तरमेतेषामभाव इत्यर्थः । इह च केवलिग्रह-णेन सिज्झणाग्रहणेन वाऽऽगते यदुभयोरुपादानं तद् यः केवली स नियमान्सिद्ध्यति, यश्च सिद्ध्यति स नियमात् केवली सन्निति ख्यापनार्थम् । तथा प्रथमसंहननं—वज्रर्षभनाराचं प्रथमं संस्थानं—समचतुरस्रम् । यश्चान्तर्मुहूर्तेन चतुर्दशानामपि पूर्वाणामुपयोगोऽनुप्रेक्षणम् , एते त्रयोऽप्यर्था अपश्चिमे चतुर्दशपूर्वधरे स्थूलभद्रस्वामिनि व्यवच्छिन्नाः । उक्तं च—

□"संघयणं संठाणं च पढमगं जो य पुव्वउवओगो । एए तिन्निवि अत्था वोच्छिन्ना थूलभद्दंमि॥१॥"॥६९३॥८८॥

१ मनःपर्यय० मु. ॥ □ प्रथमकं संहननं संस्थानं यश्च पूर्वोपयोगः एते त्रयोऽप्यर्था व्यवच्छिन्नाः स्थूलभद्रे ॥१॥

इदानीं 'खवगसेढी' त्ति एकोननवतितमं द्वारमाह–

अणमिच्छमीससम्मं अट्ठ नपुंसित्थीवेयछक्कं च ।
[1]पुंवेयं च [2]खवेइ कोहाईएवि संलजणे ॥६९४॥ [आव.नि.१२१]
कोहो माणो माया लोहोऽणंताणुबंधिणो [3]चउरो ।
खविऊण खवइ सहो मिच्छं मीसं च सम्मत्तं ॥६९५॥
अप्पच्चक्खाणे चउरो पच्चक्खाणे य सममवि खवेइ ।
तयणु नपुंसगइत्थीवेयजुगं खविय खवइ समं ॥६९६॥
हासरइअरइपुंवेयसोयभयजुयदुगुंछ सत्त इमा ।
नह संजलणं कोहं माणं मायं च लोभं च ।६९७॥
तो किट्टीकयअस्संखलोहखंडाइं खविय मोहखया ।
पावइ लोयालोयप्पयासयं केवलं नाणं ॥६९८॥
नवरं इत्थी खवगा नपुंसगं खविय थीवेयं ।
हासाइछगं खविउं खवइ सवेयं नरो खवगो ॥६९९॥

'अणमिच्छ' गाहा. इह क्षपकश्रेणिप्रतिपन्नः पुमान् वर्षाष्टकस्योपरि वर्तमानो वज्रर्षभनाराचसंहननी शुद्धध्यानार्पितमना अविरत-देशविरत-प्रमत्ता-ऽप्रमत्तसंयतानामन्यतमः, केवलं यद्यप्रमत्तसंयतः पूर्वविच्चाहिं

१ पुमवेयं–ता. ॥ २ खवेई–जे. ॥ ३ मणिया–ता. ॥

[1]शुक्लध्यानोपगतः, शेषस्तु सर्वोऽपि धर्मध्यानोपगतः। तत्र प्रथमतोऽनन्तानुबन्धिनां विसंयोजनाऽभिधीयते–इह श्रेणिमप्रतिपद्यमाना अपि अविरताश्चतुर्गतिका अपि क्षायोपशमिकसम्यग्दृष्टयो देशविरतास्तिर्यञ्चो मनुष्या वा सर्वविरतास्तु मनुष्या एव सर्वाभिः पर्याप्तिभिः पर्याप्ता यथासम्भवं विशुद्धया परिणमन्तोऽनन्तानुबन्धिनां क्षपणार्थं यथाप्रवृत्तकरणा-ऽपूर्वकरणाऽनिवृत्तिकरणाख्यानि त्रीणि करणानि कुर्वन्ति । करणवक्तव्यता च सर्वाऽपि [2]कर्मप्रकृत्यादिभ्योऽवसेया ।

अनिवृत्तिकरणं च प्राप्तः सन् अनन्तानुबन्धिनां स्थितिं कर्मप्रकृत्यभिहितस्वरूपेणोद्वलनासङ्क्रमेणाधस्तादावलिकामात्रं मुक्त्वा उपरि निरवशेषाननन्तानुबन्धिनो विनाशयति । आवलिकामात्रं तु स्तिबुकसङ्क्रमेण वेद्यमानासु प्रकृतिषु सङ्क्रमयति । तदेवं क्षपितानन्तानुबन्धिचतुष्को दर्शनमोहक्षपणार्थं यथाप्रवृत्त्यादीनि त्रीणि करणानि करोति । अनिवृत्तिकरणाद्धायां च वर्तमानो दर्शनत्रिकस्य स्थितिसत्कर्म तावदुद्वलनासङ्क्रमेणोद्वलयति यावत्पल्योपमासङ्ख्येयभागमात्रमवतिष्ठते । ततो मिथ्यात्वदलिकं सम्यक्त्व-मिश्रयोः प्रक्षिपति, तच्चैवं–प्रथमसमये स्तोकम्, द्वितीयसमये ततोऽसङ्ख्येयगुणम्, एवं यावदन्तर्मुहूर्तचरमसमये आवलिकागतं मुक्त्वा शेषं द्विचरमसमयसङ्क्रमितदलिकादसङ्ख्येयगुणं सङ्क्रमयति । आवलिकागतं तु स्तिबुकसङ्क्रमेण सम्यक्त्वे प्रक्षिपति । एवं मिथ्यात्वं क्षपितम् । ततोऽन्तर्मुहूर्तेन सम्यग्मिथ्यात्वमप्यनेनैव क्रमेण सम्यक्त्वे प्रक्षिपति । ततः सम्यग्मिथ्यात्वमपि क्षपितम्, ततः

१ मतान्तरदर्शनार्थं द्रष्टव्या 'क्षपकश्रेढी' पृ. १२ तः ॥ २ कर्मप्रकृतौ उपशमनाकरणे गाथा ६ तः द्रष्टव्यम् ॥

सम्यक्त्वमपवर्तयितुं तथा लग्नो यथाऽन्तर्मुहूर्तेन तदप्यन्तर्मुहूर्तमात्रस्थितिकं जातम्, तच्च क्रमेणानुभूयमानमनुभूयमानं सत् समयाधिकावलिकाशेषं जातम् । ततोऽनन्तरसमये तस्योदीरणाव्यवच्छेदः । ततो विपाकानुभवेनैव केवलेन वेदयति यावच्चरमसमयः । ततोऽनन्तरसमयेऽसौ क्षायिकसम्यग्दृष्टिर्जायते ।

इह[1] यदि बद्धायुः क्षपकश्रेणिमारभते अनन्तानुबन्धिक्षयानन्तरं च मरणसम्भवतो व्युपरमते, ततः कदाचिन्मिथ्यात्वोदयाद्भूयोऽप्यनन्तानुबन्धिन उपचिनोति, तद्बीजस्य मिथ्यात्वस्याविनाशात् । क्षीणमिथ्यादर्शनस्तु नोपचिनोति बीजाभावात्, क्षीणसप्तकस्त्वप्रतिपतितपरिणामोऽवश्यं त्रिदशेषूत्पद्यते । प्रतिपतितपरिणामस्तु नानामतिसम्भवाद्यथापरिणामं सर्वगतिभाग्भवति । बद्धायुष्कोऽपि यदि तदानीं कालं न करोति तथापि सप्तके क्षीणे नियमादवतिष्ठते, न तु चारित्रमोहक्षपणाय यत्नमादधाति ।

अथ क्षीणसप्तको गत्यन्तरं सङ्क्रामन् कतितमे भवे मोक्षमुपयाति ?, उच्यते, तृतीये चतुर्थे वा भवे, तथाहि--यदि देवगतिं नरकगतिं वा सङ्क्रामति तदा देवभवान्तरितो नरकभवान्तरितो वा तृतीयभवे मोक्षं याति । अथ तिर्यक्षु मनुष्येषु वा समुत्पद्यते तर्हि सोऽवश्यमसंख्येयवर्षायुष्केषु, मध्ये गच्छति न सङ्ख्येयवर्षायुष्केषु, ततस्तद्भवानन्तरं देवभवे देवभवाच्च च्युत्वा मनुष्यभवे ततो मोक्षं यातीति चतुर्थे भवे मोक्षगमनम् । तथा क्षीणसप्तकः पूर्वबद्धायुष्कोऽपि यदि तदानीं कालं न करोति तर्हि कश्चिद्वैमानिकेष्वेव बद्धायुष्कश्चारित्रमोहनीयोपशमार्थमपि यतते, न शेषभवेषु बद्धायुष्कः ।

१ तुलना-सप्ततिकाटीका पृ. २०६ B तः गाथा ६६, आवश्यकमलय. वृत्तिः गाथा १२१, पृ. १२६ A तः ॥

[1]ननु यदि दर्शनत्रिकमपि क्षयमुपगतं तर्हि किमसौ सम्यग्दृष्टिरुतासम्यग्दृष्टिः ? उच्यते, सम्यग्दृष्टिः, सम्यग्दर्शनाभावे सम्यग्दृष्टित्वमनुपपन्नमिति चेत्, तदसत्, इह निर्मदनीकृतकोद्रवकल्पा अपगतमिथ्यात्वभावा मिथ्यात्वपुद्गला एव यत्सम्यग्दर्शनं तदेव क्षीणं यत्पुनरात्मपरिणतिस्वभावं तत्त्वार्थश्रद्धानलक्षणं सम्यग्दर्शनं तत्र क्षीणम्, अपि च-नदीव श्लक्ष्णगुप्राभ्रपटलविगमे मनुष्यदृष्टिरिव विशुद्धतरस्वरूपं भवति।

[2]यदि पुनरबद्धायुः क्षपकश्रेणिमारभते ततः सप्तके क्षीणे नियमादनुपरतपरिणाम एव चारित्रमोहनीयक्षपणाय यत्नमारभते। चारित्रमोहनीयं च क्षपयितुं यतमानो यथाप्रवृत्तादीनि त्रीणि करणानि करोति। तद्यथा—यथाप्रवृत्तकरणमप्रमत्तगुणस्थानके अपूर्वकरणमपूर्वकरणगुणस्थानके अनिवृत्तिकरणमनिवृत्तिबादरसम्परायगुणस्थानके। तत्रापूर्वकरणे स्थितिघातादिभिरप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकं तथा क्षपयति स्म यथाऽनिवृत्तिकरणाद्धाप्रथमसमये तत्पल्योपमासङ्ख्येयभागमात्रस्थितिकं जातम्, अनिवृत्तिकरणाद्धायाश्च [3]सङ्ख्येयेषु भागेषु गतेषु सत्सु [4]स्त्यानर्द्धित्रिकनरकतिर्यग्गतिनरकतिर्यगानुपूर्व्येकद्वित्रिचतुरिन्द्रियजातिस्थावरातपोद्योतसूक्ष्मसाधारणानां षोडशप्रकृतीनामुद्वलनासङ्क्रमेणोद्वल्यमानानां पल्योपमासङ्ख्येयभागमात्रा स्थितिर्जाता। ततो बद्धयमानासु प्रकृतिषु तानि षोडशापि कर्माणि गुणसङ्क्रमेण प्रतिसमयं प्रक्षिप्यमाणानि निःशेषतोऽपि क्षीणानि भवन्ति। इहाप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकं

१ तुलना-आवश्यकमलय-वृत्तिः गाथा १२१, पृ. १२६A तः॥ २ तुलना-सप्ततिकाटीका गाथा ६६; पृ. २०७A तः॥ ३ असङ्ख्येयेषु-इति कर्मप्रकृतियशोविजयवृत्तौ पाठः, गा. ५५, पृ. ३०१A॥ ४ अत्र आवश्यकनिर्युक्तौ [गा. १९२-३) अपर्याप्तनामनामा प्रकृतिरपि अधिका दृश्यते। विशेषार्थं द्रष्टव्या 'खवगसेढी' पृ. ६२ तः॥

पूर्वमेव क्षपयितुमारब्धं परं तन्नाद्यापि क्षीणम् केवलमपान्तराल एव पूर्वोक्तं प्रकृतिषोडशकं क्षपितम्, पश्चात्तदपि 'कषायाष्टकमन्तर्मुहूर्तेन क्षपयतीत्येष सूत्रादेशः ।

अन्ये त्वाहुः—षोडश कर्माण्येव पूर्वं क्षपयितुमारभते केवलमपान्तरालेऽष्टौ कषायान् क्षपयति पश्चात् षोडश कर्माणीति, ततोऽन्तर्मुहूर्तेन नवानां नोकषायाणां चतुर्णां च सञ्ज्वलनानामन्तरकरणं करोति । स्थापना,—△/△, तच्च कृत्वा नपुंसकवेददलिकमुपरितनस्थितिगतमुद्वलनविधिना क्षपयितुमारभते. तच्चान्तर्मुहूर्तेन पल्योपमासङ्ख्येयभागमात्रं जातम्, ततः प्रभृति वक्ष्यमानासु प्रकृतिषु गुणसङ्क्रमेण तद्दलिकं प्रक्षिपति, तच्चैवं प्रक्षिप्यमाणमन्तर्मुहूर्तेन निःशेषं क्षीणम्, अधस्तनस्थितिदलिकं च यदि नपुंसकवेदेन क्षपकश्रेणिमारूढस्ततोऽनुभवतः क्षपयति अन्यथा त्वावलिकामात्रं तद्भवति तच्च वेद्यमानासु प्रकृतिषु स्तिबुकसङ्क्रमेण सङ्क्रमयति तदेवं क्षपितो नपुंसकवेदः, ततोऽन्तर्मुहूर्तेन स्त्रीवेदोऽप्यनेनैव क्रमेण क्षिप्यते, ततः षट् नोकषायान् युगपत्क्षपयितुमारभते, ततः प्रभृति च तेषामुपरितनस्थितिगतं दलिकं न पुरुषवेदे सङ्क्रमयति, किन्तु सञ्ज्वलनक्रोध एव । एतेऽपि च पूर्वोक्तविधिना क्षिप्यमाणा अन्तर्मुहूर्तेन निःशेषाः क्षीणाः, तत्समयमेव च पुंवेदस्य बन्धोदयोदीरणाव्यवच्छेदः समयोनावलिकाद्विकबद्धं मुक्त्वा शेषदलिकक्षयश्च, ततोऽसावित्दानीमवेदको जातः । क्रोधं च वेदयतः [2]सतस्तस्याः क्रोधाद्धायास्त्रयो विभागा भवन्ति, तद्यथा—अश्वकर्णकरणाद्धा किट्टिकरणाद्धा किट्टिवेदनाद्धा च । तत्राश्वकर्ण-

१ कषाय अष्टकं मुहूर्तमात्रेण-इति कर्मप्रकृतेर्यशोविजयवृत्तौ पाठः प. ३०१ A ॥ २ सतस्तस्य-मु. ॥

करणाद्धायां वर्तमानः प्रतिसमयमनन्तान्यपूर्वस्पर्धकानि चतुर्णामपि सञ्ज्वलनानामन्तरकरणादुपरितनस्थितौ करोति ।

अथ [1]किमिदं स्पर्धकमिति ?, उच्यते, इह तावदनन्तानन्तैः परमाणुभिर्निष्पन्नान् स्कन्धान् जीवः कर्मतया गृह्णाति, तत्र चैकैकस्मिन् स्कन्धे यः सर्वजघन्यरसः परमाणुस्तस्यापि रसः केवलिप्रज्ञया छिद्यमानः सर्वजीवेभ्योऽनन्तगुणान् रसभागान् प्रयच्छति । अपरस्तानप्येकाधिकान्, अन्यस्तु द्व्यधिकान्, एवमेकोत्तरयावृद्ध्या तावन्नेयं [2]यावदन्यः परमाणुरभव्यानन्तगुणान् सिद्धानन्तभागेनाधिकान् रसभागान् प्रयच्छति, तत्र जघन्यरसा ये केचन परमाणवस्तेषां समुदायः समानजातीयत्वादेका वर्गणेत्युच्यते । अन्येषां त्वेकाधिकरसभागयुक्तानां समुदायो द्वितीया वर्गणा, अपरेषां तु द्व्यधिकरसभागयुक्तानां समुदायस्तृतीया वर्गणा, एवमनया दिशा एकैकरसभागवृद्धानामणूनां समुदायरूपा वर्गणाः सिद्धानन्तभागकल्पा अभव्यानन्तगुणा वाच्याः । एतासां च समुदायः स्पर्धकमित्युच्यते । स्पर्धन्त इवोत्तरोत्तरवृद्ध्या परमाणुवर्गणा अत्रेतिकृत्वा । इत ऊर्द्ध्वमेकोत्तरया निरन्तरया वृद्ध्या प्रवर्धमानो रसो न लभ्यते किन्तु सर्वजीवानन्तगुणैरेव रसभागैः, ततस्तेनैव क्रमेण ततः प्रभृति द्वितीयं स्पर्धकमारभ्यते, एवमेव च तृतीयम्, एवं तावद्वाच्यं यावदनन्तानि स्पर्धकानि[3] एतेभ्य एव चेदानीं प्रथमादिवर्गणा गृहीत्वा विशुद्धिप्रकर्षवशाद-

१ तुलना-सप्ततिकाटीका गाथा ६५, पत्र २०४A तः ॥ २ यावदन्य० मु. । यावदन्यः परमाणुरभव्यानन्तगुणेन-पो.वि. । यावदन्यः (न्त्यः) इति सप्ततिकावृत्तौ (प.२०४B) पाठः ॥ ३ इतोऽग्रे-"एतानि च पूर्वं कृतत्वात् पूर्वस्पर्धकान्यभिधीयन्ते तत" इत्यधिकः पाठः सप्ततिकाटीकायां (प.२०४ B) दृश्यते ॥

नन्तगुणहीनरसाः कृत्वा पूर्ववत्स्पर्धकानि करोति, न चैवंभूतानि पूर्वं कदाचनापि कृतानि ततोऽपूर्वाणीत्युच्यन्ते।

[1]अन्यां चाश्वकर्णकरणाद्धायां वर्तमानः पुंवेदं समयोनावलिकाद्विकेन क्रोधे गुणसङ्क्रमेण सङ्क्रमयन् चरमसमये सर्वसङ्क्रमेण सङ्क्रमयति, तदेवं क्षीणः पुंवेदः। अश्वकर्णकरणाद्धायां च समाप्तायां किट्टिकरणाद्धायां च वर्तमानश्चतुर्णामपि सञ्ज्वलनानामुपरितनस्थितिदलिकस्य किट्टीः करोति, किट्टयो नाम [2]पूर्वस्पर्धकापूर्वस्पर्धकेभ्यः प्रथमादिवर्गणा गृहीत्वा विशुद्धिप्रकर्षवशादत्यन्तहीनरसाः कृत्वा तासामेकोत्तरवृद्धित्यागेन बृहदन्तरालतया व्यवस्थापनम्, यथा यासामेव वर्गणानामसत्कल्पनयाऽनुभागभागानां शतमेकोत्तरादि वाऽऽसीत् तासामेव [3]विशुद्धिप्रकर्षवशादनुभागभागानां दशकस्य पञ्चदशकादेश्च व्यवस्थापनमिति। एताश्च किट्टयः परमार्थतोऽनन्ता अपि स्थूलजातिभेदापेक्षया द्वादश कल्प्यन्ते। एकै-(ग्रन्थाग्रं ७०००) कस्य कषायस्य तिस्रस्तिस्रः। तद्यथा-प्रथमा, द्वितीया, तृतीया च। एवं क्रोधेन क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यम्, यदा तु मानेन प्रतिपद्यते तदा उद्वलनविधिना क्रोधे क्षपिते सति शेषाणां त्रयाणां पूर्वक्रमेण नव किट्टीः करोति। मायया चेत्प्रतिपन्नस्तर्हि क्रोध-मानयोरुद्वलनविधिना क्षपितयोः सतोः शेषद्विकस्य पूर्वक्रमेण षट् किट्टीः करोति। यदि पुनर्लोभेन प्रतिपद्यते तत उद्वलनविधिना क्रोधादित्रिके क्षपिते सति लोभस्य किट्टित्रिकं करोति। एष किट्टीकरणविधिः।

१ तुलना-सप्ततिकावृत्ति. गा-६६, पृ.२०८॥ २ पूर्वस्पर्धकेभ्यः-मु.। सप्ततिकावृत्तावपि (गा.६५, प. २०४ B) पूर्वस्पर्धकापूर्वस्पर्धकेभ्यः- इति पाठः॥ ३ विशुद्धिवशाद० सं.॥

किट्टीकरणाद्धायां निष्ठितायां क्रोधेन प्रतिप्रस्नः सन् क्रोधस्य प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति [1]वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । ततोऽनन्तरसमये द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । तिसृष्वपि चामूषु [2]किट्टिवेदनाद्धासूपरितनस्थितिगतं दलिकं गुणसङ्क्रमेणापि प्रतिसमयमसङ्ख्येयगुणवृद्धिलक्षणेन सञ्ज्वलने माने प्रक्षिपति । तृतीयकिट्टिवेदनाद्धायाश्चरमसमये सञ्ज्वलनक्रोधस्य बन्धोदयोदीरणानां युगपद् व्यवच्छेदः, सत्कर्मापि च तस्य समयोनावलिकाद्विकबद्धं [3]मुक्त्वाऽन्यन्नास्ति सर्वस्य माने प्रक्षिप्तत्वात्, ततो मानस्य प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावदन्तर्मुहूर्तम्, क्रोधस्यापि च बन्धादौ व्यवच्छिन्ने सति तस्य दलिकं समयोनावलिकाद्विकेन [4]माने गुणसङ्क्रमेण सङ्क्रमयन् चरमसमये सर्वं सङ्क्रमयति । मानस्यापि च प्रथमकिट्टिदलिकं प्रथमस्थितीकृतं वेद्यमानं समयाधिकावलिकाशेषं जातम्, ततो मानस्य द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च समयाधिकावलिकामात्रं शेषः । ततस्तृतीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत् समयाधिकावलिकामात्रं शेषः । तस्मिन्नेव च समये मानस्य बन्धोदयोदीरणानां युगपद्व्यवच्छेदः, सत्कर्मापि च तस्य समयोनावलिकाद्विकबद्धमेव, शेषस्य क्रोधशेषस्येव माने मायायां प्रक्षिप्तत्वात् । ततो मायायाः प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथम-

१ वेदयति-वि. ॥ २ किट्टिवेदनाद्धासुप० मु. । सप्ततिकावृत्तौ [प. २०८ B] अपि किट्टिवेदनाद्धासूप० इति पाठः ॥ ३ मुक्त्वा अन्यथा सर्वस्य-सं. ॥ ४ मानगुण० मु. ॥

स्थितिं करोति वेदयते च तावद्यावदन्तर्मुहूर्तमात्रम्, सञ्ज्वलनमानस्य च बन्धादौ व्यवच्छिन्ने सति तस्य दलिकं समयोनावलिकाद्विकेन गुणसङ्क्रमेण मायायां सर्वं प्रक्षिपति, मायाया अपि च प्रथमकिट्टिदलिकं द्वितीयस्थितिगतं प्रथमस्थितीकृतं वेद्यमानं समयाधिकावलिकाशेषं जातम्, ततो मायाया द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत् समयाधिकावलिकामात्रं शेषः। ततस्तृतीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः। तस्मिन्नेव च समये मायायाः बन्धोदयोदीरणानां युगपद्व्यवच्छेदः, सत्कर्मापि च तस्याः समयोनावलिकाद्विकबद्धमात्रमेव, शेषस्य गुणसङ्क्रमेण लोभे प्रक्षिप्तत्वात्। ततो लोभस्य प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावदन्तर्मुहूर्तम्, सञ्ज्वलनमायायाश्च बन्धादौ व्यवच्छिन्ने सति तस्या दलिकं समयोनावलिकाद्विकेन गुणसङ्क्रमेण लोभे सर्वं सङ्क्रमयति, सञ्ज्वलनलोभस्य च प्रथमकिट्टिदलिकं प्रथमस्थितीकृतं वेद्यमानं समयाधिकावलिकामात्रं शेषं जातम्, ततो लोभस्य द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च, तां च वेदयमानस्तृतीयकिट्टिदलिकं गृहीत्वा सूक्ष्मकिट्टीः करोति तावद्यावद् द्वितीयकिट्टिदलिकस्य [1]प्रथमस्थितीकृतस्य समयाधिकावलिकामात्रं शेषः, तस्मिन्नेव च समये सञ्ज्वलनलोभस्य बन्धव्यवच्छेदो बादरकषायोदयोदीरणाव्यवच्छेदोऽनिवृत्तिबादरसम्परायगुणस्थानककालव्यवच्छेदश्च युगपज्जायते। ततः सूक्ष्मकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च, तदानीमसौ सूक्ष्मसम्पराय उच्यते। पूर्वोक्ताश्चावलिकास्तृतीय-

१ प्रथमस्थिति० मु०॥

किट्टिगताः शेषीभूताः सर्वा अपि वेद्यमानासु परप्रकृतिषु स्तिबुकसङ्क्रमेण सङ्क्रमयति, प्रथमद्वितीयकिट्टिगताश्च यथास्वं द्वितीयतृतीयकिट्टयन्तर्गता वेद्यन्ते, सूक्ष्मसम्परायश्च लोभस्य सूक्ष्मकिट्टीर्वेदयमानः सूक्ष्मकिट्टिदलिकं समयोनावलिकाद्विकबद्धं च प्रतिसमयं स्थितिघातादिभिस्तावत्क्षपयति यावत्सूक्ष्मसम्परायाद्धायाः सङ्ख्ये या भागा गता भवन्ति एकोऽवशिष्यते । ततस्तस्मिन् सङ्ख्ये य भागे सञ्ज्वलनलोभं सर्वापवर्तनयाऽपवर्त्य सूक्ष्मसम्परायाद्धासमं करोति । सा च सूक्ष्मसम्परायाद्धा अद्याप्यन्तर्मुहूर्तमाना, ततः प्रभृति च मोहस्य स्थितिघातादयो निवृत्ताः, शेषकर्मणां तु प्रवर्तन्त एव । तां च लोभस्यापवर्तितां स्थितिमुदयोदीरणाभ्यां वेदयमानस्तावद्गतो यावत्समयाधिकावलिकामात्रं शेषः, तत उदीरणा स्थिता । तत उदयेनैव केवलेन तां वेदयते यावच्चरमसमयः । तस्मिंश्च चरमसमये ज्ञानावरणपञ्चकदर्शनावरणचतुष्कयशःकीर्त्युच्चैर्गोत्रान्तरायपञ्चकरूपाणां षोडशकर्मणां बन्धव्यवच्छेदः मोहनीयस्योदयसत्ताव्यवच्छेदश्च भवति । ततोऽसौ क्षीणकषायो जायते, तस्य च शेषकर्मणां स्थितिघातादयः पूर्ववत्प्रवर्तन्ते यावत्क्षीणकषायाद्धायाः सङ्ख्ये या भागा गता भवन्ति, एकः सङ्ख्ये यो भागोऽवतिष्ठते, तस्मिंश्च ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयनिद्राद्विकरूपाणां षोडशकर्मणां स्थितिसत्कर्म सर्वापवर्तनयाऽपवर्त्य क्षीणकषायाद्धासमं करोति । केवलं निद्राद्विकस्य स्वस्वरूपापेक्षया समयन्यूनं सामान्यतः कर्मरूपतया तु तुल्यम्, सा च क्षीणकषायाद्धा अद्याप्यन्तर्मुहूर्त्तमाना, ततः प्रभृति च तेषां स्थितिघातादयः स्थिताः । शेषाणां तु भवन्त्येव, तानि च षोडश कर्माणि निद्राद्विकहीनानि उदयोदीरणाभ्यां वेदयमानस्तावद्गतो यावत्समयाधिकावलिकामात्रं शेषः, तत उदीरणा निवृत्ता, तत आवलिकामात्रं यावदुदयेनैव केवलेन तानि वेदयते यावत्क्षीणकषायाद्धाया

द्विचरमसमयः, तस्मिंश्च द्विचरमसमये निद्राद्विकं स्वरूपसत्तापेक्षया क्षीणम्, चतुर्दशानां च प्रकृतीनां चरमसमये क्षयः, ततोऽनन्तरसमये केवली जायत इति ॥६९४॥

अथैनां गाथां प्रतिपदं स्वयमेव सूत्रकृद्व्याख्याति—**'कोहो'** इत्यादि गाथाद्वयम्, क्रोधो मानो माया लोभ इत्येतानन्तानुबन्धिनश्चतुरः कषायान् युगपत्क्षपयित्वा **'संढो'** त्ति नपुंसकः श्रेणिप्रतिपन्नो मिथ्यात्वं मिश्रं सम्यक्त्वं च क्रमेणान्तर्मुहूर्तेन क्षपयति, सर्वत्रापि च क्षपणाकालोऽन्तर्मुहूर्तमानः, श्रेणि-परिसमाप्तिकालोऽप्यन्तर्मुहूर्तमात्र एव, अन्तर्मुहूर्तानामसङ्ख्येयभेदत्वात् ॥६९५॥

ततोऽप्रत्याख्यानप्रत्याख्यानावरणान् अष्टौ कषायान् **'सममपि'** युगपदेव क्षपयति, तदनु नपुंसक-स्त्रीवेदद्विकं युगपत्क्षपयति, स्त्रीवेदनपुंसकवेदक्षयसमकालमेव च पुंवेदस्य बन्धो व्यवच्छिद्यते, तच्च क्षपयित्वाऽनन्तरं क्षपयति समं—युगपदेव इमा वक्ष्यमाणाः सप्त प्रकृतीः ॥६९६॥

ता एवाह—**'हासे'**त्यादि, हास्य-रत्यरति-पुंवेद-शोक-भय-जुगुप्साख्या इमाः सप्त, तदनन्तरं सञ्ज्व-लनक्रोधम्, ततः सञ्ज्वलनं मानम्, ततः सञ्ज्वलनां मायाम्, ततः सञ्ज्वलनं लोभं च क्षपयतीति योगः, लोभस्य त्वयं विशेषः ॥६९७॥

'लो किट्टी' गाहा, श्लक्ष्णीकृतानि ततो—मायाक्षपणानन्तरं लोभस्य खण्डान्यसङ्ख्येयानि किट्टी-कृतानि क्षपयित्वा सकलमोहक्षयात्प्राप्नोति लोकालोकप्रकाशकं केवलज्ञानमिति। इदं च लोभकिट्टिकरणं लोभेन श्रेणिं प्रतिपन्नस्य द्रष्टव्यम्, यदा तु क्रोधेन श्रेणिं प्रतिपद्यते तदा क्रोधादीनां चतुर्णामपि किट्टीः करोति, मानेन तु मानादीनां त्रयाणाम्, मायया च मायालोभयोः किट्टीकरणं ज्ञेयमिति ॥६९८॥

अयं च क्षपणाक्रमः सूत्रे नपुंसकं क्षपकमाश्रित्योक्तः, यदा तु स्त्री प्रारम्भिका तदाऽयं विशेषः—'नवर' मित्यादि, नवरं—केवलं स्त्री क्षपिका पूर्वं नपुंसकवेदं क्षपयति, ततः स्त्रीवेदम्, स्त्रीवेदक्षयसमकालमेव च पुंवेदस्य बन्धव्यवच्छेदः। ततोऽवेदकः पूर्वोक्ताः पुंवेदहास्यादिषट्करूपाः सप्त प्रकृतीर्युगपत्क्षपयति, शेषं तथैव। यदा तु पुरुषः प्रतिपत्ता भवति तदा पूर्वं नपुंसकवेदम्, ततः स्त्रीवेदम्, ततो हास्यादिषट्कं क्षपयित्वा पश्चात्स्ववेदं—पुंवेदं क्षपयति, शेषं तथैवेति ॥६९९॥८९॥

सम्प्रति 'उवसमसेढि' त्ति नवतितमं द्वारमाह—

अणदंसनपुंसित्थीवेयछक्कं च पुरिसवेयं च ।
दो दो एगंतरिए सरिसे सरिसं उवसमेइ ॥७००॥ [आव. नि. ११६]
कोहं माणं मायं लोभमणंताणुबंधमुवसमइ ।
मिच्छत्त-मिस्स-सम्मत्तरूवपुंजत्तयं तयणु ॥७०१॥
इत्थि-नपुंसगवेए तत्तो हासाइछक्कमेयं तु ।
हासो रई य अरई य सोगो य भयं दुगुंछा य ॥७०२॥
तो पुंवेयं तत्तो अप्पच्चक्खाणपच्चक्खाणा य ।
आवरणकोहजुयलं पसमइसंजलणकोहंपि ॥७०३॥
एयक्कमेण तिन्निवि माणे माया उ लोह तियगंपि ।
नवरं संजलणाभिहलोहतिभागे इय विसेसो ॥७०४॥

संखेयाइं किट्टीकयाइं खंडाइं पसमइ कमेणं ।
पुणरवि चरिमं खंडं असंखखंडाइं काऊण ॥७०५॥
अणुसमयं एक्केक्कं उवसामइ इह हि सत्तगोवसमे ।
होइ अपुव्वो तत्तो अनियट्टी होई नवुमाई ॥७०६॥
पसमंतो जा सखेयलोह[1]खडाइं [2]चरिमखंडस्स ।
संखाईए खंडे पसमंतो सुहुमराओ सो ॥७०७॥
इय मोहोवसमम्मि कयम्मि उवसंतमोहगुणठाणं ।
सव्वट्ठसिद्धिहेउं संजायइ वीयरायाणं ॥७०८॥

'अण' गाहा. इहोपशमश्रेणिप्रारम्भकोऽप्रमत्तसंयत एव, उपशमश्रेणिपर्यवसाने त्वप्रमत्तसंयत-प्रमत्तसंयत-देशविरता-ऽविरतानामन्यतमोभवति । अन्येत्वाहुः-अविरतदेशविरतप्रमत्ताप्रमत्तसंयतानामन्यतमोऽनन्तानुबन्धिनः कषायानुपशमयति, दर्शनत्रिकादिकं तु संयमे एव वर्तमानः । [3]तत्र प्रथममनन्तानुबन्धिनामुपशमनाऽभिधीयते, अविरतादीनामन्यतमोऽन्यतमस्मिन् योगे वर्तमानस्तेजःपद्मशुक्ललेश्यान्यतमलेश्यायुक्तः साकारोपयोगयुक्तोऽन्तःसागरोपमकोटीकोटीस्थितिसत्कर्मा करणकालात् पूर्वमप्यन्तर्मुहूर्तं यावद्विशुद्ध्यमानचित्तसन्ततिरवतिष्ठते, तथाऽवतिष्ठमानश्च परावर्तमानाः प्रकृतीः शुभा एव बध्नाति नाशुभाः । प्रतिसमयं चाशुभानां कर्मणामनुभागमनन्तगुणहान्या करोति शुभानां चानन्तगुणवृद्ध्या ।

१ ०खंडाओ-मु० ॥ २ चरम० ता. ॥ ३ द्रष्टव्या सप्ततिकाटीका गाथा ६५ तः पृ. १९८A तः ॥

स्थितिबन्धेऽपि च 'पूर्णे पूर्णे सत्यन्यं स्थितिबन्धं पूर्वपूर्वस्थितिबन्धापेक्षया पल्योपमासङ्ख्येयभागहीनं करोति, पूर्णे चान्तर्मुहूर्ते क्रमेण यथाप्रवृत्तकरणापूर्वकरणानिवृत्तिकरणाख्यानि प्रत्येक[2]मान्तर्मौहूर्तिकानि त्रीणि करणानि करोति । चतुर्थी तूपशान्ताद्धाम्, करणवक्तव्यता च सर्वाऽपि कर्मप्रकृतेरवसेया ।

[3]अनिवृत्तिकरणाद्धायाश्च सङ्ख्येयेषु भागेषु गतेषु एकस्मिन् भागेऽवतिष्ठमानेऽनन्तानुबन्धिनामधस्तादावलिकामात्रं मुक्त्वाऽन्तर्मुहूर्तमानमन्तरकरणमन्तर्मुहूर्तेन करोति । अन्तरकरणदलिकं चोत्कीर्यमाणं बध्यमानासु परप्रकृतिषु प्रक्षिपति, प्रथमस्थित्यावलिकागतं च दलिकं स्तिबुकसङ्क्रमेण वेद्यमानासु परप्रकृतिषु प्रक्षिपति, अन्तरकरणे च कृते द्वितीयसमयेऽनन्तानुबन्धिनामुपरितनस्थितिदलिकमुपशमयितुमारभते । तद्यथा—प्रथमसमये स्तोकम्, द्वितीयसमये ततोऽसंख्यातगुणम्, तृतीयसमयेऽपि ततोऽसङ्ख्येयगुणम्, यावदन्तर्मुहूर्तेन साकल्यतोऽनन्तानुबन्धिन उपशमिता भवन्ति । उपशमिता नाम यथा रेणुनिकरः सलिलबिन्दुनिवहैरभिषिक्त्याभिषिच्य द्रुघणादिभिर्निकुट्टितो निस्पन्दो भवति, तथा कर्मरेणुनिकरोऽपि विशुद्धिवारिपूरेण परिषिच्य परिषिच्या[4]निवृत्तिकरणरूपद्रुघण[5]निःकुट्टितः सङ्क्रमणोदयोदीरणानिधत्तनिकाचनाकरणानामयोग्यो भवति ।

[6]अन्ये तु अनन्तानुबन्धिनामुपशमनां न मन्यन्ते, किन्तु विसंयोजनां क्षपणाम्, सा च प्रागेवोक्ता ।

सम्प्रति दर्शनत्रिकस्योपशमना भण्यते—इह क्षायोपशमिकसम्यग्दृष्टिः संयमे वर्तमानोऽन्तर्मुहूर्तेन

१ पूर्णे सत्यन्यं-मु. ॥ २ ०मान्तर्मुहूर्तिकानि-मु. ॥ ३ तुलना-सप्ततिकाटीका पृ. २००A तः ॥ ४ ०निर्वृत्ति० मु. ॥ ५ ०निकुट्टितः-मु. ॥ ६ कर्मप्रकृतौ [उपशमना०गा०३१] पञ्चसङ्ग्रहवृत्तौ [उपशमना०गा०३४] अपि उपशमना न दृश्यते ॥

दर्शनत्रिकमुपशमयति, उपशमयंश्च पूर्वोक्तकरणत्रयनिर्वर्तनेन विशुद्धया वर्धमानोऽ[1]निवृत्तिकरणाद्धाया [2]सङ्ख्येयेषु भागेषु गतेषु अन्तरकरणं करोति, तच्च कुर्वन् सम्यक्त्वस्य प्रथमस्थितिमन्तर्मुहूर्तमानां स्थापयति, मिथ्यात्वमिश्रयोश्चावलिकामात्रम्, उत्कीर्यमाणं च दलिकं त्रयाणामपि सम्यक्त्वस्य प्रथमस्थितौ प्रक्षिपति, मिथ्यात्वमिश्रयोः प्रथमस्थितिदलिकं सम्यक्त्वस्य प्रथमस्थितिदलिकमध्ये स्तिबुकसङ्क्रमेण सङ्क्रमयति, सम्यक्त्वस्य पुनः प्रथमस्थितौ विपाकानुभवतः क्रमेण क्षीणायामुपशमसम्यग्दृष्टिर्भवति । उपरितनदलिकस्य चोपशमना त्रयाणामपि मिथ्यात्वादीनामनन्तानुबन्धिनामुपरितनस्थितिदलिकस्येत्यवसेया । एवमुपशान्तदर्शनत्रिकः प्रमत्ताप्रमत्तपरिवृत्तिशतानि कृत्वा चारित्रमोहमुपशमयितुकामः पुनरपि यथाप्रवृत्तादीनि त्रीणि करणानि करोति । केवलमिह यथाप्रवृत्तकरणमप्रमत्तगुणस्थाने अपूर्वकरणं चापूर्वकरणगुणस्थाने, अपूर्वकरणे च स्थितिघातादिभिर्विशुद्ध्य ततोऽनन्तरसमयेऽनिवृत्तिकरणे प्रविशति, अनिवृत्तिकरणाद्धायाश्च सङ्ख्येयेषु भागेषु गतेषु दर्शनसप्तकवर्जितानामेकविंशतेर्मोहनीयप्रकृतीनामन्तरकरणं करोति । तत्र यस्य वेदस्य सञ्ज्वलनस्य च उदयोऽस्ति तयोः स्वोदयकालमाकानां प्रथमस्थितिं करोति, शेषाणां त्वेकादशकषायाणामष्टानां च नोकषायाणामावलिकामात्रम्, वेदत्रिकसञ्ज्वलनचतुष्कोदयकालमानम् अन्तर[3]करणगतदलिकप्रक्षेपस्वरूपं च ग्रन्थविस्तरभयान्न लिख्यते ।

१ ०निर्वृत्ति० मु० ॥ २ असङ्ख्येयेषु-मु० ॥
३ अन्तरकरणगतदलिकप्रक्षेपस्वरूपदर्शनार्थं द्रष्टव्या सप्ततिकाटीका पृ० २०२ तः ॥

अन्तरकरणं च कृत्वा ततो नपुंसकवेदमन्तर्मुहूर्तेनोपशमयति । तथाहि–प्रथमसमये स्तोकम्, द्वितीयसमये ततोऽसङ्ख्येयगुणम्, एवं च प्रतिसमयमसङ्ख्येयगुणं तावदुपशमयति यावच्चरमसमयः । परप्रकृतिषु प्रतिसमयमुपशमितदलिकापेक्षया तावदसङ्ख्येयगुणं प्रक्षिपति यावद् द्विचरमसमयः, चरमसमये तूपशम्यमानं दलिकं परप्रकृतिषु सङ्क्रम्यमाणदलिकापेक्षयाऽसङ्ख्येयगुणं द्रष्टव्यम् । उपशान्ते च नपुंसकवेदे स्त्रीवेदं प्रागुक्तविधिनाऽन्तर्मुहूर्तेनोपशमयति । ततोऽन्तर्मुहूर्तेन हास्यादिषट्कम्, तस्मिंश्चोपशान्ते तत्समयमेव पुरुषवेदस्य बन्धोदयोदीरणाव्यवच्छेदः, ततः समयोनावलिकाद्विकेन सकलमपि पुंवेदमुपशमयति । ततो युगपदन्तर्मुहूर्तमात्रेणाप्रत्याख्यानप्रत्याख्यानावरणक्रोधौ, तदुपशान्तौ च तत्समयमेव सञ्ज्वलनक्रोधस्य बन्धोदयोदीरणाव्यवच्छेदः, ततः समयोनावलिकाद्विकेन सञ्ज्वलनक्रोधमुपशमयति । ततोऽन्तर्मुहूर्तेनाप्रत्याख्यानप्रत्याख्यानावरणौ मानौ युगपदुपशमयति, तदुपशान्तौ च तत्समयमेव सञ्ज्वलनमानस्य बन्धोदयोदीरणाव्यवच्छेदः, ततः समयोनावलिकाद्विकेन सञ्ज्वलनमानमुपशमयति । ततो युगपदन्तर्मुहूर्तेनाप्रत्याख्यानप्रत्याख्यानावरणमाये उपशमयति, तदुपशान्तौ च तत्समयमेव सञ्ज्वलनमायाया बन्धोदयोदीरणाव्यवच्छेदः, ततोऽसौ लोभवेदको जातः ।

लोभवेदनाद्धायाश्च त्रयो विभागास्तद्यथा–अश्वकर्णकरणाद्धा किट्टिकरणाद्धा किट्टिवेदनाद्धा च । तत्रावेदयोर्द्वयोस्त्रिभागयोर्वर्तमानः सञ्ज्वलनलोभस्य द्वितीयस्थितेः सकाशाद्दलिकमाकृष्य प्रथमस्थितिं करोति वेदयते च । अश्वकर्णकरणाद्धायां च वर्तमानः प्रथमसमय एव त्रीनपि लोभानप्रत्याख्यानप्रत्याख्यानावरणसञ्ज्वलनरूपान् युगपदुपशमयितुमारभते, विशुद्ध्या वर्धमानश्चापूर्वाणि स्पर्धकानि करोति, अपूर्वस्पर्धकशब्दार्थश्च

प्रागेवोक्तः, सञ्ज्वलनमायायाश्च बन्धादौ व्यवच्छिन्ने सति ततः समयोनावलिकाद्विकेन सञ्ज्वलनमायामुपशमयति, एवमश्वकर्णकरणाद्धायां गतायां किट्टिकरणाद्धायां प्रविशति। तत्र च पूर्वस्पर्धकेभ्योऽपूर्वस्पर्धकेभ्यश्च द्वितीयस्थितिगतं दलिकं गृहीत्वा प्रतिसमयमनन्ताः किट्टीः करोति। [1]किट्टिकरणाद्धायाश्चरमसमये युगपदप्रत्याख्यानप्रत्याख्यानावरणलोभावुपशमयति, तदुपशान्तौ च तत्समयमेव सञ्ज्वलनलोभबन्धव्यवच्छेदो बादरसञ्ज्वलनलोभोदयोदीरणाव्यवच्छेदश्च, ततोऽसौ सूक्ष्मसम्परायो भवति। तदा चोपरितनस्थितेः सकाशात्कतिपयाः किट्टीः समाकृष्य प्रथमस्थितिं सूक्ष्मसम्परायाद्धातुल्यां करोति वेदयते च। सूक्ष्मसम्परायाद्धा चान्तर्मुहूर्तमाना, शेषं च सूक्ष्मं किट्टीकृतं दलिकं समयोनावलिकाद्विकबद्धं चोपशमयति, सूक्ष्मसम्परायाद्धायाश्च चरमसमये सञ्ज्वलनलोभ उपशान्तो भवति। ततोऽनन्तरसमयेऽसावुपशान्तमोहो भवति। स च जघन्येनैकसमयमुत्कर्षतोऽन्तर्मुहूर्तं यावल्लभ्यते। तत ऊर्द्ध्वं नियमादसौ प्रतिपतति।

प्रतिपातश्च द्विधा—भवक्षयेण अद्धाक्षयेण च। तत्र भवक्षयो म्रियमाणस्य, अद्धाक्षय उपशान्ताद्धायां समाप्तायाम्। अद्धाक्षयेण च प्रतिपतन् यथैवारूढस्तथैव प्रतिपतति। यत्र यत्र बन्धोदयौ व्यवच्छिन्नस्तत्र तत्र प्रतिपतता सता तेन ते अद्धाक्षयेण आरभ्यन्ते इति यावत्, प्रतिपतंश्च तावत्प्रतिपतति यावत्प्रमत्तसंयतगुणस्थानकम्, कश्चित्पुनस्ततोऽप्यधस्तनं गुणस्थानकद्विकं याति, कोऽपि सासादनभावमपि।

यः पुनर्भवक्षयेण प्रतिपतति स नियमाद[1]नुत्तरविमानवासिषूत्पद्यते, उत्पन्नश्च प्रथमसमय एव

१ तुलना-सप्ततिकाटीका गा. ६५, पृ.२०५८ तः॥ २ कर्मप्रकृतौ तु उवसमसम्मत्तद्धा अतो आउक्खया धुवं देवो। तिसु आउगेसु बद्धेसु जेण सेढिं न आरुहइ॥" (उपशमना० गा. ६३)। इति केवला देवगतिरेव दर्शिता, पञ्चसङ्ग्रहे [उपशमना. गा.९ प] अपि एवमेव। द्रष्टव्यं तत्त्वार्थभाष्यम् (९।४६)॥

सर्वाण्यपि बन्धनादीनि करणानि प्रवर्तयतीत्येष विशेषः। उत्कर्षतश्चैकस्मिन् भवे द्वौ वारावुपशमश्रेणिं प्रतिपद्यते, यश्च द्वौ वारावुपशमश्रेणिं प्रतिपद्यते तस्य नियमात्तस्मिन् भवे क्षपकश्रेण्यभावः, यः पुनरेकवारं प्रतिपद्यते तस्य क्षपकश्रेणिर्भवेदपीत्येष कार्मग्रन्थिकाभिप्रायः। आगमाभिप्रायेण त्वेकस्मिन् भवे एकामेव श्रेणिं प्रतिपद्यते, तदुक्तम्--

"मोहोपशम एकस्मिन्, भवे द्विः स्यादसन्ततः। यस्मिन् भवे तूपशमः, क्षयो मोहस्य तत्र न ॥" इति।

[1]ननूपशमश्रेणिमविरतादय एवारभन्ते, ते च यथासंभवं सम्यग्मिथ्यात्वानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणानामुपशमाद्भवन्ति अन्यथा तेषामुदये सम्यक्त्वादिलाभायोगात् ततः कथमिदानीं तेषामुपशमो भण्यते ?, तदसत्, पूर्वं हि तेषां क्षयोपशम एवासीत्, नोपशमस्तत इदानीमुपशमः क्रियते। ननु क्षयोपशमोऽप्युदिते कर्मांशे क्षीणेऽनुदिते चोपशान्ते भवति उपशमोऽपि चेत्थंभूत एव, ततः कोऽनयोर्विशेषः ? येनैवमुच्यते-पूर्वं क्षयोपशम आसीन्नोपशम इति, सत्यम्, इह क्षयोपशमे तदावारकस्य कर्मणः प्रदेशतोऽनुभवोऽस्ति उपशमे तु नेति विशेषः।

ननु यदि सत्यपि क्षयोपशमे मिथ्यात्वानन्तानुबन्ध्यादिकषायाणां प्रदेशानुभवोऽस्ति तर्हि कथं न सम्यक्त्वादिगुणविघातो भवति ?, तदुदये ह्यवश्यं सम्यक्त्वादिलाभः सन्नप्यपगच्छति यथा सासादनसम्यग्दृष्टेरिति, नैष दोषः, प्रदेशानुभवस्य मन्दानुभावत्वात्, मन्दानुभावो ह्युदयो न स्वावार्यगुणविघातमाधातुमलम्, यथा चतुर्ज्ञानिनो मतिज्ञानावरणादीनां विपाकतोऽप्युदयः। तथाहि-मतिज्ञानावरणादिकं

१ तुलना- आव.मलयवृत्तिः गा. ११६ प. १२४A तः॥

कर्म ध्रुवोदयं ध्रुवोदयत्वाच्चावश्यं विपाकतोऽनुभवनीयं, विपाकानुभवापेक्षयैव ध्रुवोदयत्वाभिधानात् , अथ च तत्सकलचतुर्ज्ञानिनो न मत्यादिज्ञानविघातकृद्भवति, तदुदयस्य मन्दानुभावत्वात् , तद्यदि विपाकतोऽप्यनुभूयमानं मन्दानुभावोदयत्वान्न स्वावार्यगुणविघातकृत् प्रजायते, ततः प्रदेशतोऽनुभूयमानमनन्तानुबन्ध्यादि सुतरां न भविष्यति, तदुदयस्यातीव मन्दानुभावत्वादिति ।

अथ गाथाक्षरार्थः कथ्यते-एकदेशेन समुदायोपचारात् 'अण' त्ति अनन्तानुबन्धिनः क्रोधमानमायालोभान् उपशमयति, इयं च क्रिया सर्वत्र योज्या, ततो दर्शनं दर्शस्तत् त्रिविधं मिथ्यात्वमिश्रसम्यक्त्वस्वरूपं पुञ्जत्रयं ततो नपुंसकवेदं ततः स्त्रीवेदं ततो हास्यादिषट्कं-हास्यरत्यरतिशोकभयजुगुप्सालक्षणं ततः पुरुषवेदं ततो द्वौ द्वौ क्रोधाद्यौ एकान्तरितौ-सञ्ज्वलनक्रोधाद्यन्तरितौ सदृशौ-क्रोधादित्वेन तुल्यौ सदृशं-तुल्यं युगपदिति भावः । अयमर्थः-अप्रत्याख्यानप्रत्याख्यानावरणक्रोधयुगलं युगपत् प्रशमयति, ततः सञ्ज्वलनक्रोधमित्यादि ॥७००॥

अथैनां गाथां स्वयमेव सूत्रकृद्व्याख्याति-'कोहं' गाहा, गतार्था, 'इत्थी' गाहा सुगमा, नवरं दर्शनत्रयोपशमानन्तरं नपुंसकवेदस्त्रीवेदौ युगपदुपशमयति, अयं च नपुंसकवेदेन श्रेणिं प्रतिपन्नस्य क्रम उक्तः । इहायं सम्प्रदायः-[1] स्त्रीवेदेन पुरुषवेदेन वा उपशमश्रेणिं प्रतिपद्यमानो यस्मिन् स्थाने नपुंसकवेदमुपशमयति तद्दूरं यावन्नपुंसकवेदेनापि श्रेणिं प्रतिपन्नः सन् नपुंसकवेदमेव केवलमुपशमयति, तत ऊर्ध्वं पुनर्नपुंसकवेदं स्त्रीवेदं च युगपदुपशमयितुं लग्नः, स च तावद्गतो यावन्नपुंसकवेदोदयाद्व्याया द्विच-

१ तुलना- कर्मप्रकृतिमलय. वृत्तिः गा. ६५, प. १८२ B तः ॥

रमसमयः, तस्मिंश्च समये स्त्रीवेदः उपशान्तः, नपुंसकवेदस्य च एका समयमात्रा उदयस्थितिर्वर्तते, शेषं सर्वमुपशान्तम्, तस्यामप्युदयस्थितावतिक्रान्तायामवेदको भवति, ततः पुरुषवेदादिकाः सप्त प्रकृतीर्युगपदुपशमयितुं यतते, शेषं तथैव। यदा तु स्त्रीवेदेन श्रेणिं प्रतिपद्यते तदा प्रथमतो नपुंसकवेदमुपशमयति, पश्चात् स्त्रीवेदम्, तं च तावदुपशमयति यावत्स्वोदयस्य द्विचरमसमयः, तस्मिंश्च समये एकां चरमसमयमात्रामुदयस्थितिं वर्जयित्वा शेषं सकलमपि स्त्रीवेदस्य सत्कं दलिकमुपशमितम्, ततश्चरमसमये गतेऽवेदका सती पुरुषवेदहास्यादिषट्करूपाः सप्त प्रकृतीर्युगपदुपशमयति, शेषं तथैव। पुरुषवेदेन पुनः श्रेणिं प्रतिपद्यमानस्य स्वरूपं प्रथमगाथायामेवोक्तम् ॥७०१-७०२॥

'तो पुंवेयं' गाहा, उत्तानार्था, 'एयक्कमेण' गाहा, अनेनैव क्रोधोपशमक्रमेण त्रीनप्यप्रत्याख्यानप्रत्याख्यानावरणसञ्ज्वलनाख्यान्मानान् तिस्रश्च माया लोभत्रिकं च प्रशमयतीति योगः। नवरं—केवलं सञ्ज्वलनाभिधलोभस्य त्रिभागे किट्टिवेदनाद्धालक्षणे लोभे इति—वक्ष्यमाणो विशेषः, तमेवाह—

'संखेयाइं' इत्यादि, गाथाचतुष्टयम्, किट्टीकृतानि—श्लक्ष्णीकृतानि सञ्ज्वलनलोभखण्डानि संख्यातानि क्रमेणानुसमयं प्रशमयति, चरमं च खण्डं पुनरप्यसंख्येयानि खण्डानि कृत्वाऽनुसमयमेकैकमुपशमयति ॥७०३-७०४-७०५॥

इदानीं याः प्रकृतीरुपशमयन् येषु गुणस्थानकेषु वर्तते तदाह—'इह ही' त्यादि, इह हि श्रेणिप्रतिपत्ताऽनन्तानुबन्धिचतुष्कदर्शनत्रिकरूपसप्तकोपशमे कृते सति भवत्यपूर्वः—अपूर्वकरणगुणस्थानके वर्तत इत्यर्थः। ततः परं 'नपुमाइ' त्ति 'नपुंसकवेदादिप्रकृतीः प्रशमयन् यावत्संख्येयानि बादरलोभखण्डानि

प्रशमयति तावदनिवृत्तिबादरो भवति, अनिवृत्तिबादरगुणस्थाने वर्तते इत्यर्थः। तदनु चरमस्य सूक्ष्म-किट्टीकृतखण्डस्य सङ्ख्यातीतानि-असङ्ख्येयानि खण्डानि प्रशमयन् सूक्ष्मसम्परायगुणस्थानके भवति। इत्येवं मोहनीयोपशमे कृते सति उपशान्तमोहगुणस्थानं भवति, तच्च सर्वार्थसिद्धिहेतुः सञ्जायते वीतरागाणामप्रतिपतितभावानामिति शेष इति। ७०६ ७०७ ७०८॥१०॥

इदानीं 'थंडिल्लाण चउवीस उ सहस्से' त्ति द्वारमेकनवतितममाह—

[1]अणावायमसंलोए १, परस्साणुवघायए २।
समे ३ अज्झुसिरे यावि ४, अचिरकालकयंमि ५ य ॥७०९॥
वित्थिन्ने ६ दूरमोगाढे ७, नासन्ने ८ बिलवज्जिए ९।
तसपाणबीयरहिए १०, उच्चाराईणि वोसिरे ॥७१०॥

[पञ्चवस्तुकः ३९९-४००, बृ. क. भा. ४४३-४, ओघनि. ३१३-४]

'अणावाए' त्यादि श्लोकद्वयम्, अनापातमसंलोकं १ परस्य अनौपघातिकं २ समम् ३ अशुषिरम् ४ अचिरकालकृतं ५ विस्तीर्णं ६ दूरमवगाढम् ७ अनासन्नं ८ बिलवर्जितं ९ त्रस-प्राण-बीज-रहितं १० यत्स्थण्डिलं तत्र उच्चारादीनि—पुरीषप्रश्रवणप्रभृतीनि व्युत्सृजेत्। तत्र परस्येत्युभयत्र सम्बन्धात् न विद्यते आपातः—अभ्यागमः परस्य—अन्यस्य स्वपक्षस्य परपक्षस्य वा यस्मिन् स्थण्डिले तदनापातम्। न विद्यते संलोको—दर्शनं वृक्षादिच्छन्नत्वाद्यत्र परस्य तदसंलोकम्। अत्र च [2]चतुर्भङ्गी। तद्यथा—अनापात-

१ अणावाए असंलोए—जे. ता. ॥ २ तुलना—पञ्चवस्तुकः ४०६ तः, बृ. क. भा. ४१६ तः ॥

मसंलोकमिति प्रथमो भङ्गः, अनापातं संलोकवदिति द्वितीयः, आपातवदसंलोकमिति तृतीयः, आपातवत् संलोकवच्चेति चतुर्थः। अमीषां चतुर्णां भङ्गानां मध्ये प्रथमो भङ्गोऽनुज्ञातः, शेषास्तु प्रतिषिद्धाः। इह च चरमभङ्गव्याख्याने अन्ये विधिप्रतिषेधरूपाः सुज्ञाना भवन्तीति चरमभङ्गस्यैव स्वरूपं निरुप्यते—तत्र आपातवत्स्थण्डिलं द्विविधं ज्ञातव्यम्, तद्यथा—स्वपक्षापातवत् परपक्षापातवच्च। स्वपक्षः—संयतवर्गः परपक्षो—गृहस्थादिः। स्वपक्षापातवदपि द्विविधं—संयतापातवत् संयत्यापातवच्च। संयता अपि द्विविधाः—संविज्ञा असंविज्ञाश्च। संविज्ञा—उद्यतविहारिणः, असंविज्ञाः—शिथिलाः पार्श्वस्थादयः। संविज्ञा अपि द्विविधाः—मनोज्ञा अमनोज्ञाश्च। मनोज्ञा—एकसामाचारिकाः, अमनोज्ञाश्च—विभिन्नसामाचारिकाः। असंविज्ञा अपि द्विविधाः—संविज्ञपाक्षिका असंविज्ञपाक्षिकाश्च, संविज्ञपाक्षिका—निजानुष्ठाननिन्दिनो यथोक्तसुसाधुसमाचारप्ररूपकाः, असंविज्ञपाक्षिका निर्धर्माणः सुसाधुजुगुप्सकाः उक्तं च—

'तत्थाययं दुविहं सपक्खपरपक्खओ य नायव्वं। दुविहं होइ सपक्खे संजय तह संजईणं च ॥१॥
संविग्गमसंविग्गा संविग्गमणुन्न एयरा चेव। असंविग्गावि दुविहा तप्पक्खिय एयरा चेव ॥२॥

[पञ्चवस्तुकः ४०७-८, ओघनि. २१६,२१८, बृ. क. भा. ४२०-१]

परपक्षापातवदपि स्थण्डिलं द्विविधं—मनुष्यापातवत्, तिर्यगापातवच्च। एकैकमपि त्रिविधं—पुरुषापातवत्, स्त्र्यापातवन्नपुंसकापातवच्च। तत्र मानुषपुरुषापातवत् त्रिविधं—दण्डिकपुरुषापातवत् कौटुम्बिकपुरुषापातवत् प्राकृतपुरुषापातवच्च, दण्डिका—राजकुलानुगताः, कौटुम्बिकाः—शेषा महर्द्धिकाः, इतरे—प्राकृताः। ते च त्रयोऽपि प्रत्येकं द्विविधाः—शौचवादिनोऽशौचवादिनश्च। एवं स्त्र्यापातवन्नपुंसकापातवच्च प्रत्येकं

प्रथमतो दण्डिकादिभेदतस्त्रिविधम् ततः शौचवाद्यशौचवादिभेदतः पुनरेकैकं द्विविधमवसेयम् । उक्तं च—
"परपक्खेऽवि य दुविहं माणुसतेरिच्छगं च नायव्वं । एक्केक्कंपि 'य तिविहं पुरिसित्थिनपुंसकं चेव ॥१॥
पुरिसावायं तिविहं दण्डियकोडुंबिए य पागइए । ते सोयऽसोयवाई एमेव नपुंसइत्थीसु ॥२॥"
[पञ्चवस्तुकः ४०९-१०, बृ. क. भा. ४२२-३, ओघ. नि. २९९–३००]

अथ तिर्यगापातवत् कथ्यते—तत्र तिर्यञ्चो द्विविधाः—दृप्ता अदृप्ताश्च । दृप्ता-दर्पवन्तः अदृप्ता—शान्ताः, तेऽपि प्रत्येकं त्रिविधाः—जघन्या उत्कृष्टा मध्यमाश्च । जघन्या मूल्यमङ्गीकृत्य एडकादयः, उत्कृष्टा हस्त्यादयः, मध्यमा महीषादयः । एते किल पुरुषा उक्ताः, एवमेव स्त्री-नपुंसका अपि वक्तव्याः । नवरं ते दृप्ता अदृप्ताश्च प्रत्येकं द्विधा विज्ञेयाः । तद्यथा—जुगुप्सिता अजुगुप्सिताश्च । जुगुप्सिता गर्दभ्यादयः, इतरेऽजुगुप्सिताः । उक्तं च—
"दित्तमदित्ता तिरिया जहन्नउक्कोसमज्झिमा तिविहा । एमेव थीनपुंसा दुगुंछिअदुगुंछिया नवरं ॥१॥"
[बृ.क. भा. ४२४, तुलना-पञ्चवस्तुकः ४१२, ओघनि. ३०२]

उक्तमापातवत्स्थण्डिलम् संलोकवत्पुनर्मनुष्येष्वेव द्रष्टव्यम् । ते च मनुष्यास्त्रिविधाः—तद्यथा-पुरुषाः स्त्रियो नपुंसकाश्च । एकैके प्रत्येकं त्रिविधाः प्राकृताः कौटुम्बिका दण्डिकाश्च । ते पुनरेकैके द्विविधाः—शौचवादिनोऽशौचवादिनश्च । उक्तं च—

१ ख-मु. ॥

" [1]आलोगो मणुएसुं पुरिसित्थी-नपुंसगाण बोद्धव्वो ।
[2]पागडकुंडुबिंदंडिय असोय तह मोयवाईणं ॥१॥"

तत्रैवमापात-संलोकौ चरमभङ्गे [3]तृतीये आपातो, द्वितीये संलोक उक्तभेदप्रभेदयुक्तः ।

[4]इदानीमेतेषु स्थण्डिलेषु गमने दोषाः प्रतिपाद्यन्ते—तत्र स्वपक्षसंयतसंविग्नामनोज्ञानामापाते सति न गन्तव्यम् , अधिकरणदोषसम्भवात् । तथाहि—आचार्याणां परस्परं विभिन्नाः सामाचार्यः, ततोऽमनोज्ञानां सामाचारीवितथाचरणदर्शने सति शैक्षाणां स्वसामाचारीपक्षपातेन नैषा सामाचारीति कलहः स्यात् । असंविग्नानामपि पार्श्वस्थादीनामापाते न गन्तव्यम् । ते हि प्रचुरेण पानीयेन पुनःप्रक्षालनं कुर्वन्ति । ततस्तेषां कुशीलानां प्रचुरवारिणा पुनर्निर्लेपकरणं दृष्ट्वा शैक्षकाणां शौचवादिनां मन्दधर्माणां च एतेऽपि प्रव्रजिता एवेति त्वरमेते इत्यनुकूलतया तेषां समीपे गमनं स्यात् । मनोज्ञानामापातेऽपि गमनं कर्तव्यम् । संयत्यापातस्तु सर्वथाऽपि परिहर्तव्य इति स्वपक्षापातदोषाः । परपक्षापातेऽपि यदि पुरुषापातं स्थण्डिलं व्रजति तदा नियमतोऽतिप्रचुरमनाविलं च जलं नेतव्यम् । अन्यथाऽत्यल्पे कलुषे वा सर्वथा पानीयाभावे वा यदि गतो भवेत्ततस्ते दृष्ट्वा अशुचयोऽमी इत्यवर्णवादं विदध्युः । मा कोऽप्यमीषामशुचीनामन्न-पानादि दद्यादिति भिक्षाप्रतिषेधं वा कुर्युः । अभिनवप्रवृत्तस्य च कस्यचित् श्रावकस्य विपरिणामो

१ गाथा इयं बृ. क. भा. वृत्तौ [गाथा ४२४ पृ. १२३] अपि उपलभ्यते ॥ २ पागय-सं. । पागड-इति बृ. क. भा. वृत्तौ पृ. १२३ ॥ ३'द्वितीये आपातः, तृतीये संलोकः'—इति बृ. क. भा. वृत्तौ (पृ. १२३)पाठः ॥ ४ तुलना—सटीकपञ्चवस्तुकः ४१३ तः, बृ. क. भाष्यं सटीकम् ४३० तः ॥

वा भवेदिति । स्त्री-नपुंसकापाते पुनरात्मनि परे तदुभयस्मिन् वा शङ्कादयो दोषा भवन्ति । तत्रात्मनि साधुः शङ्काविषयीक्रियते, यथा एष किमप्युद्भ्रामयति, [1]परे स्त्री नपुंसको वा शङ्क्यते यदेते पापकर्माण एनं साधुं कामयन्ते इति । तदुभयस्मिन् यथा द्वावप्येतौ परस्परमत्र मैथुनार्थमागतौ । तथा स्त्र्यापाते नपुंसकापाते वा स साधुरात्म-परोभयसमुत्थेन दोषेन स्त्रिया षण्ढकेन वा सार्धं मैथुनं कुर्यात् , तत्र च केनचिदागारिकेण दृष्ट्वा राजकुलादिष्वाकृष्येत ततः प्रवचनस्योड्डाह इत्यादि । इत्तिर्यगापातेन शृङ्गादि-ताडनमारणादयो दोषाः । गर्हिततिर्यक्-स्त्री-नपुंसकापाते पुनर्जनस्य मैथुनशङ्का स्यात् , कदाचिच्च प्रति-सेवनामपि कुर्यादिति ।

उक्ता आपाते दोषाः, एवमेव संलोकेऽपि तिर्यग्योनिकान् वर्जयित्वा मनुष्येषु द्रष्टव्याः । तिरश्चां हि संलोके नास्ति कश्चिदनन्तरोदितो दोषः । मनुष्याणां पुनः स्त्री-पुरुष-नपुंसकानां संलोके ये आपाते दोषा उक्तास्त एव वेदितव्याः । अथ कदाचिदात्म-परोभयसमुत्था मैथुनदोषा न भवेयुस्तथाप्यमी सम्भाव्यन्ते—[2]यथा केचिदेवमादुर्यदुत यत्रैव दिशा उच्चारार्थमस्माकं युवतिवर्गो व्रजति तत्रैव दिशा एतेऽपि प्रव्रजिता व्रजन्ति । तन्नूनमस्मदीयां कामपि कामिनीं कामयमाना दत्तसङ्केता वा तदालोके तिष्ठन्ति । तथा नपुंसकः स्त्री वा स्वभावतो वातदोषेण वा विकृतं मागारिकं दृष्ट्वा तद्विषयाभिलाषमूर्च्छामापन्ना तं साधुमुपसर्गयेत् । तस्मात् त्रयाणामपि संलोको वर्जनीयः । तदेवं चरमभङ्गे आपात-संलोकदोषाः, तृतीये

१ परे:-इति बृ. क. भा. वृत्तौ (गा ४३२, पृ.१२६) पाठः ॥ २ तुलना-पञ्चवस्तुकः ४१४, बृ. क. भा. ४३४ ॥

आपातदोषाः, द्वितीये च संलोकदोषा भवन्ति । प्रथमे पुनः स्थण्डिले ते द्वयेऽप्यापातसंलोकदोषा न संति ततस्तत्र गमनं कर्तव्यम् । उक्तं च—

"आवायदोस तइए बीए संलोगओ भवे दोसा । ते दोवि नत्थि पढमे तहिं गमणं भणियविहिणा उ ॥१॥" [पञ्चवस्तुकः ४१८, तुलना- बृ. क. भा. ४३७]

[1]तथा उपघातः—उड्डाहादि प्रयोजनमस्य तदौपघातिकं स्थण्डिलम् । तत् त्रिविधम्-आत्मौपघातिकं प्रवचनौपघातिकं संयमौपघातिकं च । तत्रात्मौपघातिकमारामादि, तत्र हि संज्ञां व्युत्सृजतो यतेस्तत्स्वामिनः सकाशात् पिट्टनादिप्रसङ्गः । प्रवचनौपघातिकं पुरीषस्थानम् । तद्धिजुगुप्सितमशुच्यात्मकत्वात्, ततस्तत्रसंज्ञाव्युत्सर्गे इदृशा एते इति प्रवचनोपघातः स्यात् । संयमौपघातिकमङ्गारादिदाहस्थानम् । तत्र हि संज्ञाव्युत्सर्जने तेऽन्यारम्भिणोऽन्यत्रास्थण्डिलेऽग्निप्रज्वालनादि कुर्वन्ति त्यजन्ति वा तां संज्ञामस्थण्डिले ततश्च संयमोपघात इति । यतश्चैते दोषा भवन्त्यतोऽनौपघातिके स्थण्डिले व्युत्सर्जनीयम् । एवमन्यत्रापि भावनीयम् २ ।

तथा समम्—अविषमम् [2]विषमे हि व्युत्सृजतो यतेः पतनं स्यात् तत्र चात्मविराधना । पुरीषं प्रश्रवणं वा [3]प्रलोठत् षट्कायानुपमर्दयतीति संयमविराधना च ३ ।

तथा 'अज्झुषिरं' यत्तृणादिच्छन्नं न भवति । [4]शुषिरे हि संज्ञादि व्युत्सृजतो वृश्चिक-दन्दशूकादिदशनेनात्मनो विराधना पुरीषप्रश्रवणाक्रमणेन च त्रस-स्थावरप्राणि[5]प्रणाशनतः संयमविराधना ४ ।

१ तुलना-पञ्चवस्तुकः ४१६, बृ. क.भा.व ४४६ ॥ २ तुलना-पञ्चवस्तुकः ४२०, बृ. क.भा. ॥४४७॥
३ प्रलोटत्-इति बृ. क. भा. वृत्तौ (गा.४४७) पाठः ॥ ४ ज्झुषिरे-खि.॥ ५ प्रणाशतः-सं. ॥

तथा अचिरकालकृतं–स्वल्पकालनिर्वृष्टम् । अयमर्थः– [1]यानि स्थण्डिलानि यस्मिन् ऋतावग्नि-प्रज्वालनादिभिः कारणैरचित्तानि कृतानि तस्मिन्नेव ऋतौ तान्यचिरकालकृतानि भवन्ति । यथा हेमन्ते कृतानि हेमन्त एव अचिरकालकृतानि, ऋत्वन्तरव्यवहितानि तु चिरकालकृतानि । ततः सचित्तत्वान्मिश्रीभूतत्वाद्वा अस्थण्डिलानि तानीति । यत्र पुनरेकं वर्षाकालं [2]सधनो ग्राम उषितस्तत्र द्वादश वर्षाणि यावत्स्थण्डिलं भवति, ततः परमस्थण्डिलम् ५ ।

तथा [3]विस्तीर्णं–महत् , तत् त्रिधा–जघन्यं मध्यममुत्कृष्टं च । तत्र जघन्यमायामविष्कम्भाभ्यां हस्तप्रमाणम् । उत्कृष्टं द्वादश योजनानि, तच्च चक्रवर्तिस्कन्धावारनिवेशे समवसेयम् । शेषं तु मध्यममिति ६ ।

तथा दूरमवगाढ-गम्भीरम् , यत्राधस्ताच्चत्वार्यङ्गुलान्यग्नितापादिना अचित्ता भूमिस्तज्जघन्यम् । यस्य पुनरधस्तात्पञ्चाङ्गुलप्रभृतिकं तदुत्कृष्टं दूरमवगाढम् । [4]अत्र च वृद्धसम्प्रदायः–'चउरङ्गुलोगाढे सव्वा वोसिरिज्जइ न काइ य' त्ति ७ ।

तथा अनासन्नम्–आरामादेर्नातिसमीपस्थम् , इह किल आसन्नं द्विविधं–द्रव्यासन्नं भावासन्नं च । तत्र द्रव्यासन्नं देवकुल-हर्म्य ग्रामा-ऽऽराम-ग्राम-क्षेत्र-मार्गादीनां निकटम् । तत्र च द्वौ दोषौ–संयमोपघात आत्मोपघातश्च । तथाहि–स देवकुलादिस्वामी तत्साधुभ्युत्सृष्टं पुरीषं केनचित्कर्मकरेणान्यत्र त्याजयति, ततस्तत्प्रदेशविलेपने हस्तप्रक्षालने च संयमोपघातः, आत्मोपघातश्च स गृहाद्यधिपतिः प्रद्विष्टः सन्

१ तुलना-पञ्चवस्तुकः ४२१, ब. क. भा. ४४८। २ सगोधनो-इति बृ. क. भा. वृत्तौ (गा.४४८)पाठः। साधनो सं.वि.॥ ३ तुलना-पञ्चवस्तुकः ४२२, ब. क. भा. ४४६ ॥ ४ तुलना-पञ्चवस्तुकवृत्तिः गा. ४२२ ॥

कदाचित्ताडयतीति । [1]भावासन्नं नाम तावत्तिष्ठति यावत्संज्ञा मनाग् नागच्छति, ततस्त्वरितं गच्छन् केनचिद्भूतेन भावासन्नतामुपगम्य धर्मप्रच्छनादिव्याजेनार्धपथ एव धृतः, ततश्च तस्य पुरीषवेगं धारयत आत्मविराधना, मरणस्य ग्लानत्वस्य वाऽवश्यम्भावात्, अनधिसहेन च सता तेन लोकपुरतोऽस्थाने संज्ञाव्युत्सर्गे पुनर्जङ्घादिलेपने वा प्रवचनविराधना । संयमोपघातादि तत्रैवाप्रत्युपेक्षितस्थण्डिले व्युत्सृजतो भवतीति ८ ।

तथा बिलवर्जितं-भूमिरन्ध्रादिरहितम् , [2]बिलयुक्ते हि स्थण्डिले संज्ञां व्युत्सृजतो यदा बिले प्रविशन्त्या संज्ञया प्रश्रवणेन च तद्गताः पिपीलिकाप्रभृतयः प्राणिनो व्यापाद्यन्ते तदा संयमविराधना सर्पादिभक्षणे चात्मविराधना ९ ।

तथा त्रसप्राण बीजरहितं-स्थावर-जङ्गमजन्तुजातवियुक्तम् , तद्युक्ते हि स्थण्डिले संज्ञाव्युत्सर्गं कुर्वाणस्य साधोर्द्वौ दोषौ-संयमविराधना आत्मविराधना च । तत्र त्रसेषु बीजेषु च प्राणव्यपरोपणात् संयमविराधना सुप्रतीता । त्रसेष्वात्मविराधना तेभ्यो भक्षणाद्युपद्रवसम्भवात् , बीजेष्वात्मविराधना

---

१ तुलना- "अत्र वृद्धवादः- भावासन्नं नाम ताव अच्छइ जाव आगाढं जायं, ताहे धाइउं पवत्तो, अण्णेहिं विज्जाइएहिं दिट्ठो, ताहे ते हसंति, पुरओ आगया वंदंति धम्मं च पुच्छंति, जदि करेइ ताहे मरइ, अन्तरा वोसिरइ ताहे-च्चुट्ठाहो, चउत्थरसियं वा परिमियं नीयं, अहवा जा सा जतणा तं न करेइ, अंतरा अथंडिले वोसिरिज्जा, एस भावासण्णो, तओ दोसत्ति गाथार्थः ।" इति पञ्चवस्तुकवृत्तिः गा. ४२३ ॥

२ तुलना- पञ्चवस्तुकः ४२४, बृ. क. भा. ४५१ ॥

अतितीक्ष्णगोक्षुरकादिबीजानां पादेषु [1]लगनतः पादप्रलोठनेन पतनतो वेति १० ।

[2]अमीषां चानन्तरोदितानां दशानां पदानामेक-द्वि-त्रि-चतुः-पञ्च-षट्-सप्ता-ऽष्ट-नव-दशकैः संयोगाः कर्तव्याः । तेषु च भङ्गाः सर्वसङ्ख्यया चतुर्विंशत्यधिकं सहस्रम् । अथ कस्मिन् संयोगे कियन्तो भङ्गकाः ?, उच्यन्ते, इह भङ्गानामानयनार्थमियं करणगाथा –

"उभयमुहं रासिदुगं हेट्ठिल्लाणंतरेण भय पढमं । लद्धहरामिविभत्ते तस्सुवरि गुणित्तु संजोगा ॥१॥"

अस्या अक्षरगमनिका–इह दशानां पदानां द्व्यादिसंयोगभङ्गा आनेतुमभिप्रेतास्ततस्तावत्प्रमाणौ द्वौ राशी उभयमुखौ स्थाप्येते । किमुक्तं भवति ?–एककादीन् दशकपर्यन्तानङ्कान् पूर्वानुपूर्व्योपरि स्थापयित्वा तेषामधस्तात् पश्चानुपूर्व्या भूय एककादयो दशकपर्यन्ता अङ्काः स्थापनीयाः । [3]स्थापना चेयम्—

१	२	३	४	५	६	७	८	९	१०
१०	९	८	७	६	५	४	३	२	१
१	१०	४५	१२०	२१०	२५२	२१०	१२०	४५	१०

अत्राधस्तनराशिपर्यन्तवर्तिन एककस्योपरि यो दशकस्ते एककसंयोगे दश भङ्गा द्रष्टव्याः । न च तत्र करणगाथाया व्यापारो, द्व्यादिसंयोगभङ्गानयनायैव तस्याः प्रवृत्तत्वात् । ततोऽधस्तनराशिपर्यन्त-

१ लग्नतः-(लगनतः) इति ब्र. क. भा. वृत्तौ (गा० ४५१) पाठः ॥ २ तुलना-पञ्चवस्तुकः ४०१ तः. ब्र. क. भा. वृत्तिः गा-४४५ ॥

३ स्थापनायां ज्ञे. प्रतौ प्रथम-द्वीतीयपङ्क्त्योर्व्यत्ययः,तृतीया पङ्क्तिर्नास्ति । सि.वि. प्रत्योरपि तृतीया पङ्क्तिर्नास्ति ॥

वर्तिन एककस्थानन्तरेण द्विकलक्षणेनोपरितनराशौ पश्चानुपूर्व्या प्रथममङ्कं दशकरूपं भजेत्, तस्य भागाकारं कुर्यात् , ततो लब्धाःपञ्च,यतो दश द्विधा विभक्ताः पञ्चैव भवन्ति। "लब्धहरासिविभत्ते" त्ति अधोराशिना द्विकलक्षणे नोपरितने प्रथमे अङ्के दशकलक्षणे विभक्ते सति लब्धेन अङ्केन पञ्चकेन तस्य द्विकलक्षणस्योपरितनमङ्कं नवकलक्षणं गुणयेत्–ताडयेत्, जाताः पञ्चचत्वारिंशत् , इत्थं च गुणयित्वा संयोगाः–संयोगभङ्गा वाच्याः । यथा द्विकसंयोगे भङ्गाः पञ्चचत्वारिंशदिति । ततो भूयोऽपि त्रिकसंयोगभङ्गानयनाय प्रथमपादरहिता करणगाथा व्यापार्यते । यथाऽधस्तनराशिस्थितेन द्विकादनन्तरेण त्रिकेणोपरितनराशिव्यवस्थितं त्रिकोपरितनाष्टकरूपाङ्कापेक्षयाऽऽद्यं पञ्चचत्वारिंशल्लक्षणमङ्कं भजेत् , ततो लब्धाः पञ्चदश, यतः पञ्चचत्वारिंशत् त्रिधा विभक्ताः पञ्चदशैव भवन्ति । तैश्चाधोराशिनोपरितने अङ्के विभक्ते लब्धैः पञ्चदशभिस्त्रिकलक्षणस्याङ्कस्योपरितनमष्टकलक्षणमङ्कं गुणयेत्, गुणिते च सति जातं विंशत्युत्तरं शतम्। एतावन्तस्त्रिकसंयोगे भङ्गाः । पुनश्चाधस्तनराशिस्थितेन त्रिकादनन्तरेण चतुष्केणोपरितनराशिस्थितं चतुष्कोपरितनसप्तकरूपाङ्कापेक्षया प्रथमं विंशत्युत्तरशतलक्षणमङ्कं भजेत् , लब्धा त्रिंशत्, यतो विंशत्युत्तरं शतं चतुर्भिर्भक्तं त्रिंशदेव भवति, तया च त्रिंशता चतुष्कस्योपरि यः सप्तकः स गुण्यते, जाते द्वे शते दशोत्तरे, एतावन्तश्चतुष्ककसंयोगे भङ्गाः । एवं पञ्चकादिसंयोगेष्वपि भङ्गा आनेतव्याः, यावदङ्कसंयोगे एको भङ्गः । एवं चैककसंयोगे दश भङ्गाः, द्विकसंयोगे पञ्चचत्वारिंशत्, त्रिकसंयोगे विंशं शतम्, चतुष्कसंयोगे द्वे शते दशोत्तरे, पञ्चकसंयोगे द्वे शते द्विपञ्चाशदधिके, षट्कसंयोगे द्वे शते

दशोत्तरे, सप्तकसंयोगे विंशं शतम्, अष्टकसंयोगे पञ्चचत्वारिंशत्, नवकसंयोगे दश, दशकसंयोगे एकः, सर्वमीलने च त्रयोविंशत्युत्तरं सहस्रमशुद्धभङ्गानां भवति। चतुर्विंशस्तु शुद्धो भङ्गो यद्यपि करणेन नागच्छति तथाप्येतन्मध्ये तं प्रक्षिप्य भङ्गसङ्ख्या पूरणीया। यतः सर्वभङ्गप्रसारे क्रियमाणे पर्यन्ते शुद्धभङ्गस्या[1]गतेः। उक्तं च—

"दस पणयाल विसोत्तरसयं च दोसय दसुत्तरा दो य। बावन्न दो दसुत्तर विसुत्तरं पञ्च चत्ता य ॥१॥
दस एक्को य कमेणं भङ्गा [2]एगाइचारणा एसुं। सुद्धेण समं मिलिया भङ्गसहस्सं चउव्वीसं ॥२॥"
[पञ्चवस्तुकः ४०४-५] ॥७१०॥ ९१॥

इदानीं 'पुव्वाणं नामाइ' नवमद्वारमुच्यते इत्यधिकारमुद्घाटयन्नाह' [3]चउदसवि' त्ति द्विनवतं द्वारमाह—

[4]उप्पायं पढमं पुण एक्कारसकोडिपयपमाणेणं ।
बीयं [5]अग्गेणीयं छन्नउई लक्खपयसंखं ॥७११॥
विरियप्पवायपुव्वं सत्तरिपयलक्खलक्खियं [6]तइयं ।
अत्थिणत्थिपवायं सट्ठीलक्खा [7]चउत्थं तु ॥७१२॥
नाणप्पवायनामं एयं एगूणकोडिपयसंखं ।
सच्चप्पवायपुव्वं छप्पयअहिएगकोडीए ॥७१३॥

१ गतिः-मु.॥ २ एगादि० मु.। एगाइ० इति पञ्चवस्तुकेऽपि पाठः॥ ३ चउदसवि-ता. नास्ति॥ ४ उप्पाइं-जे.॥ ५ अग्गाणीयं-मु.। समवायाङ्गसूत्रेऽपि (सम० १४७) अग्गेणीयं-इति पाठः॥ ६ तईयं-जे.॥ ७ य चउत्थं-ता.॥

आयप्पवायपुव्वं [1]पयाण कोडी उ हुंति छत्तीसं ।
[2]समयप्पवायगवरं [3]असीई [4]लक्ख पयकोडी ॥७१४॥
नवमं पच्चक्खाणं लक्खा चुलसी पयाण परिमाणं ।
[5]विजणप्पवाय पनरस सहस्स एक्कारस उ कोडी ॥७१५॥
छव्वीसं कोडीओ पयाण पुव्वं अवंझणामंमि ।
छप्पन्न लक्ख अहिया पयाण कोडी उ पाणाउ ॥७१६॥
किरियाविसालपुव्वं नव कोडीओ पयाण तेरसमं ।
अद्धत्तेरसकोडी चउदसमे बिंदुसारम्मि ॥७१७॥
पढमं आयारंगं अट्ठारस पयसहस्सपरिमाणं ।
एवं [6]सेसंगाणि वि दुगुणादुगुणप्पमाणाइं [7] ॥७१८॥

'उप्पाये'त्यादि[8]गाथाष्टकम्, [9]यत्रोत्पादमङ्गीकृत्य सर्वद्रव्य-पर्यायाणां प्ररूपणा कृता तदुत्पाद-पूर्वं प्रथमम् । तच्च पदप्रमाणेन- [10]पदसङ्ख्यामाश्रित्यैकादशकोटिप्रमाणम् । प्रथमपूर्वे एकादश पदानां

१ पयाणु-जे. ॥ २ कम्मयप्पवाय० जे. ॥ ३ असिइ-ता. जे. ॥ ४ लक्खहिए-ता. । लक्खहिय-जे. ॥ ५ विज्जप्पवाय-मु. ॥ ६ सेसंगाणवि-मु. ॥ ७ ०गाथासप्तकं-सं. ॥ ८ तुलना-समवायाङ्गवृत्तिः मू. १४७, प. १३१ ॥ ९ समवायाङ्गवृत्ति-[प. १३१]नन्दिवृत्ति [सू. १०६] हरिवंशपुराण [१० । ७५] कषायपाहुड [१।१]गोम्मटसारजी. मूल [३६५] इत्यादि ग्रन्थेषु एककोटिप्रमाणं दर्शितमस्ति । विशेषार्थं द्रष्टव्यः जैनेन्द्र सिद्धान्त कोशः भा. ४ । पृ. ७० ॥

कोटय इत्यर्थः । इह यत्रार्थोपलब्धिस्तत्पदमित्यादिपदलक्षणसद्भावेऽपि तथाविधसम्प्रदायाभावात्तस्य प्रमाणं न सम्यगवगम्यत इति । तथा यत्र सर्वेषां द्रव्याणां पर्यायाणां जीवविशेषाणां चाग्रं-परिमाणं वर्ण्यते तदग्रायणीयं द्वितीयं पूर्वम् । अग्रं-परिमाणं तस्य अयनं-गमनं परिच्छेद इत्यर्थः तस्मै हितमग्रायणीयमिति व्युत्पत्तेः । तस्य पदपरिमाणं षण्णवतिर्लक्षाणि ॥७११॥

तथा यत्र जीवानां सकर्मेतराणामजीवानां च वीर्यं प्रोच्यते-प्ररूप्यते तद्वीर्यप्रवादं तृतीयं पूर्वम्, तस्य पदपरिमाणं सप्ततिर्लक्षाणि । तथा यल्लोकेऽस्ति वस्तु धर्मास्तिकायादि यच्च नास्ति खरशृङ्गादि, अथवा स्याद्वादाभिप्रायेण सर्वं वस्तु स्वरूपेणास्ति परूपेण नास्तीत्येवं यत्र प्रोच्यते तदस्तिनास्तिप्रवादं चतुर्थम्, तदपि पदपरिमाणतः षष्टिर्लक्षाणि ॥७१२॥

तथा यत्र ज्ञानं मत्यादिकं पञ्चविधं स्वरूपभेदप्रभेदादिभिः प्रोच्यते तत् ज्ञानप्रवादं नाम पञ्चमं पूर्वम्, एतच्च पदपरिमाणमाश्रित्यैकेन पदेन न्यूना एका कोटिः । तथा सत्यं-संयमः सत्यवचनं वा तद्यत्र समेदं सप्रतिपक्षं च प्रोच्यते तत् सत्यप्रवादं षष्ठं पूर्वम् तस्य पदपरिमाणं षड्भिः पदैरधिका एका कोटिः ॥७१३॥

तथा यत्रात्मा-जीवोऽनेकनयैः प्रोच्यते तदात्मप्रवादं सप्तमं पूर्वम्, तस्य पदपरिमाणं षड्विंशत्कोटयः । तथा समयः-सिद्धान्तार्थः स चात्र कर्मरूपो गृह्यते, ततः कर्मस्वरूपं यत्र प्ररूप्यते तत् समयप्रवादं वरं-प्रधानमष्टमं पूर्वम् । अन्यत्र तु कर्मप्रवादमित्युच्यते, तत्रापि कर्म-ज्ञानावरणादिकमष्टविधं प्रकृति-स्थित्यनुभाग-प्रदेशादिभिर्भेदैरन्यैश्चोत्तरोत्तरभेदैर्यत्र प्रोच्यते तत्कर्मप्रवादं पूर्वम्, तस्य पदपरिमाणमेका [1]कोटिरशीतिश्च लक्षाणि ॥७१४॥

१ दिगम्बरसम्परानुसारेण एका कोटिरशीतिश्च सहस्राणि । द्रष्टव्यः जै. सि. को. भा. ४/पृ. ७० ॥

तथा यत्र सर्वप्रत्याख्यानस्वरूपं सप्रभेदं प्रोच्यते तत् प्रत्याख्यानप्रवादं नवमम् , तस्य पदानां परिमाणं चतुरशीतिर्लक्षाः । तथा यत्रनेकविधा विद्यातिशयाः साधनानुकूल्येन सिद्धिप्रकर्षेण वर्ण्यन्ते तद्विद्यानुप्रवादं दशमम् , तस्य पदपरिमाणमेकादश कोटयः पञ्चदश च सहस्राणि ॥७१५॥

तथाऽवन्ध्यनामधेयमेकादशं पूर्वम् । वन्ध्यं नाम निष्फलम् , न वन्ध्यम् अवन्ध्यं सफलमित्यर्थः । तत्र हि सर्वे ज्ञान-तपःसंयोगाः शुभफलेन सफला वर्ण्यन्ते, अप्रशस्ताश्च प्रमादादिकाः सर्वे अशुभफला वर्ण्यन्ते अतोऽवन्ध्यम् । अन्ये तु कल्याणमित्याहुः,अर्थस्तु तत्रापि स एव, तस्मिंश्च पदपरिमाणं षड्विंशतिकोटयः । तथा यत्र प्राणा जीवाः पञ्चेन्द्रियत्रिविधबलोच्छ्वासनिःश्वासरूपा वा आयुश्चानेकधा वर्ण्यते तत् प्राणायुर्द्वादशं पूर्वम् , तत्र पदपरिमाणमेका [1]कोटिः षट्पञ्चाशच्च लक्षाः ॥७१६॥

तथा यत्र क्रियाः–कायिक्यादिका विशाला–विस्तीर्णाः सभेदत्वादभिधीयन्ते तत् क्रियाविशालं त्रयोदशं पूर्वम् , तत्र पदपरिमाणं नव कोटयः । तथा बिन्दुसारमिति लोकशब्दोऽत्र लुप्तो द्रष्टव्यः, ततश्च लोके–जगति श्रुतलोके वाऽक्षरस्योपरि बिन्दुरिव सारं–सर्वोत्तमं सर्वाक्षरसन्निपातलब्धिहेतुत्वाल्लोकबिन्दुसारम् , तत्परिमाणमर्धत्रयोदशपदकोट्य इति ।

[2]**समवायांगटीकायां** तु पदपरिमाणविषये किंचिदन्यथात्वमपि दृश्यन्ते इति ॥७१७॥

[3]ननु पूर्वाणीति कः शब्दार्थ ?, उच्यते, यस्मात्तीर्थङ्करस्तीर्थप्रवर्तनाकाले गणधराणां सर्वसूत्राधार-

१ दिगम्बरपरम्परानुसारेण त्रयोदश कोटयः जै. सि. को. भा. ४/पृ. १७० ॥
२ १३१ तमपत्रे इति ज्ञेयम् ॥ ३ तुलना समवायाङ्गटीका पत्र १३० तः ॥

स्वेन पूर्वं पूर्वगतसूत्रार्थं भाषते तस्मात् पूर्वाणीति भणितानि । गणधराः पुनः श्रुतरचनां विदधाना आचारादिक्रमेण रचयन्ति स्थापयन्ति च । मतान्तरेण तु पूर्वगतः सूत्रार्थः पूर्वमर्हता भाषितो गणधरैरपि पूर्वगतं श्रुतमेव पूर्वं रचितं पश्चादाचारादिकम् । नन्वेवं यदाचारनिर्युक्तावुक्तम्–'सव्वेसिं आयारो' [गा.८] इत्यादि तत्कथम् ?, उच्यते तत्र स्थापनामाश्रित्य तथोक्तम् , इह तु अक्षररचनामधिकृत्य भणितं पूर्वं पूर्वाणि कृतानीति ।

अथ पदमङ्गव्याप्तावाचारादीनामप्यङ्गानां पदसङ्ख्यामाह–'पढमं' इत्यादिगाथा, प्रथममाचाराङ्गमष्टादशपदसहस्रप्रमाणम् , एवम्–अनेनैव प्रकारेण सूत्रकृदङ्गस्थानाङ्गप्रभृतीनि [1]शेषाङ्गान्यपि द्विगुणद्विगुणपदप्रमाणानि । तथाहि–सूत्रकृदङ्गं षट्त्रिंशत्पदसहस्रम् , स्थानाङ्गं द्विसप्ततिपदसहस्रम् , एवमुत्तरोत्तराणामपि समवायादीनामङ्गानां क्रमेण द्विगुणता पदानां प्रतिपत्तव्या । यावद्विपाकश्रुते एकादशे अङ्गे पदपरिमाणमेका कोटी चतुरशीतिर्लक्षाः द्वात्रिंशच्च सहस्राणीति । ननु पूर्वं तावत् पूर्वाणि भगवद्भिर्गणभृद्भिः क्रमेण ग्रथ्यन्ते पूर्वं करणात्पूर्वाणीति पूर्वसूरिप्रदर्शितव्युत्पत्तिश्रवणात् , पूर्वेषु च सकलस्यापि वाङ्मयस्यावतारः, न खलु तदस्ति यत्पूर्वेषु नाभिहितम् । ततः किं शेषाङ्गविरचनेनाङ्गबाह्यविरचनेन वा ?, उच्यते, इह विचित्रा जगति प्राणिनः, तत्र ये दुर्मेधसस्ते पूर्वाणि नाध्येतुमीशते, पूर्वाणामतिगम्भीरार्थत्वात् , स्त्रीणां च पूर्वाध्ययनेऽनधिकार एव, तासां तुच्छत्वादिदोषबहुलत्वात् । उक्तं च–

१ दिगम्बरग्रन्थेषु तु अन्यथात्वमपि दृश्यते । विशेषार्थं द्रष्टव्यः जै. सि. को. भा. ४/पृ. ६६ ॥

△"तुच्छा गारवकलिया चलिंदिया दुब्बला य धीईए। इह अतिससज्झयणा भूयावाओ य नो थीणं ॥१॥"

अत्रातिशेषाध्ययनानि-उत्थानश्रुतादीनि विविधविशिष्टातिशयसम्पन्नानि शास्त्राणि, भूतवादो-दृष्टिवादः। ततो दुर्मेधसां स्त्रीणां चानुग्रहाय शेषाङ्गानामङ्गबाह्यस्य च विरचनमिति ॥७१८॥९२॥

इदानीं 'निग्गंथ' त्ति त्रिनवतं द्वारमाह-

पच नियंठा भणिया पुलाय १ बउसा २ कुसील ३ निग्गंथा ४।
होइ सिणाओ य ५ तहा एक्केक्को सो भवे दुविहो ॥७१९॥ [पञ्चनि. प्र.४]
गंथो मिच्छत्तधणाइओ मओ जे य निग्गया तत्तो।
ते निग्गंथा वुत्ता तेसि पुलाओ भवे पढमो ॥७२०॥
मिच्छत्तं वेयतियं हासाई छक्कगं च नायव्वं।
कोहाईण चउक्कं चउदस अब्भिंतरा [1]गंथा ॥७२१॥
खेत्तं वत्थुं धणधन्नसंचओ मित्तनाइसंजोगो।
जाणसयणासणाणि य दासा दासीउ कुवियं च ॥७२२॥
धन्नमसारं भन्नइ पुलायसद्देण तेण जस्स समं।
चरणं सो हु पुलाओ लद्धीसेवाहि सो य दुहा ॥७२३॥

△ तुच्छा गौरवकलिताश्चलेन्द्रिया धृत्या च दुर्बला इतिहेतोरतिशायीन्यध्ययनानि भूतवादश्च न स्त्रीणाम ॥१॥
१ गंथी-इति धर्मसं. वृत्तौ [मा. २। प. १५२] पाठः॥

उवगरणसरीरेसु बउसो [1]दुविहोवि होइ पंचविहो ।
आभोग १ अणाभोए २ संवुड ३ असंवुडे ४ सुहुमे ५ ॥७२४॥
आसेवणा कसाए दुहा कुसीलो दुहावि पंचविहो ।
नाणे १ दंसण २ चरणे ३ तवे ४ य अहसुहुमए ५ चेव ॥७२५॥
उवसामगो १ य खवगो २ दुहा नियंठो दुहावि पंचविहो ।
पढमसमओ १ अपढमो २ [2]चरम ३ अचरमो ४ अहासुहुमो ५ ॥७२६॥
[पञ्चनि. प्र. ५, १३, २३,२६]

पाविज्जइ अट्ठसयं खवगाणुवसामगाण चउपन्ना ।
उक्कोसओ जहन्नेणेक्को व दुगं व तिगमहवा ॥७२७॥
सुहझाणजलविसुद्धो कम्ममलावेक्खया सिणाओत्ति ।
दुविहो य सो सजोगी तहा अजोगी विणिद्दिट्ठो ॥७२८॥
मूलुत्तरगुणविसया पडिसेवा सेवए पुलाए य ।
उत्तरगुणेसु बउसो सेसा पडिसेवणारहिया ॥७२९॥ [पञ्चनि. प्र. ३२,४१]
निग्गंथसिणायाणं पुलायसहियाण तिण्ह वोच्छेओ ।
समणा बउसकुसीला जा तित्थं ताव होहिंति ॥७३०॥

१ दुविहो दुहावि पंचविहो-ता. ॥ २ चरिम अचरिमो-ता. ॥

'पंचे'त्यादिगाथाद्वादशकम् , ग्रन्थादान्तरान्मिथ्यात्वादेर्बाह्याच्च धर्मोपकरणवर्जधनादेर्निर्गता निर्ग्रन्थाः—साधवः । ते पञ्चविधा उक्ताः, यथा—पुलाको बकुशः कुशीलो निर्ग्रन्थः स्नातकश्चेति । एतेषां च पुलाकादीनां [1]सर्वेषां सामान्यतश्चारित्रसद्भावेऽपि मोहनीयकर्मक्षयोपशमादिवैचित्र्याद्भेदोऽवगन्तव्यः । एकैकोऽपि स पुलाकादिर्द्विविधो भवेत् , द्वैविध्यं च सूत्रकृदेवाग्रे प्रकटयिष्यति ॥७१९॥

अथ सूत्रकार एव निर्ग्रन्थशब्दव्युत्पत्तिमाह—**'गंथो'** गाहा, ग्रथ्यते—बध्यते कषायवशगेनात्मनेति ग्रन्थः, यद्वा ग्रथ्नाति—बध्नात्यात्मानं कर्मणेति ग्रन्थः, स द्विभेदः—आभ्यन्तरो बाह्यश्च, तत्राभ्यन्तरो मिथ्यात्वादिश्चतुर्दशविधः बाह्यश्च धनादिको दशविधो **'मतः'** कथितः, तस्माच्च द्विभेदादपि ग्रन्थाद् ये निर्गतास्ते निर्ग्रन्था **'उक्ताः'** भणिताः, **'तेषां'** निर्ग्रन्थानां पञ्चभेदानां मध्ये पुलाकः प्रथमो भवेत् ॥७२०॥

अथ चतुर्दशविधाभ्यन्तरग्रन्थप्रतिपादनामाह—**'मिच्छत्तं'** गाहा, मिथ्यात्वं—तत्त्वार्थाश्रद्धानम् , वेदत्रिकं—पुं-स्त्री-नपुंसकवेदलक्षणम् , हास्यादिषट्कं च—हास्य-रत्यरति-भय-शोक-जुगुप्सालक्षणं ज्ञातव्यम् , तत्र हास्यं—विस्मयादिषु वक्त्रविकाशात्मकम् , रतिः—असंयमे प्रीतिः, अरतिः—संयमेऽप्रीतिः, उक्तं च—

△"अरई य संजमम्मी होइ रईऽसंजमे यावि" [ ] त्ति ।

भयम्—इहलोकादिसप्तधा, शोकः—इष्टवियोगान्मानसं दुःखम् , जुगुप्सा—अस्नानादिमलिनतनुमुनिहीलना, तथा चाह—

१ तुलना—धर्मसंग्रहटीका भा. २ । प. १५२ A ॥ △ अरतिश्च संयमे भवति रतिरसंयमेचापि ॥

* "अण्हाणमाइएहिं साहुं तु दुगुंछई दुगुंछ" त्ति"

तथा क्रोधादीनां चतुष्कं—क्रोध-मान-माया-लोभलक्षणम्, एते चतुर्दश आभ्यन्तरा ग्रन्थाः ॥७२१॥

अथ बाह्यं ग्रन्थमाह—क्षेत्रं—सेत्वादि, वास्तु—खातादि, धनं च—हिरण्यादि, धान्यं च—शाल्यादि, तयोः सञ्चयो—राशिर्धन-धान्यसञ्चयः, मित्राणि च—सहवर्धितादीनि, ज्ञातयश्च—स्वजनास्तैः संयोगः—सम्बन्धो मित्रज्ञातिसंयोगः, यानानि च—शिबिकादीनि, शयनानि च—पल्यङ्कादीनि, आसनानि च—सिंहासनादीनि, यान-शयना-ऽऽसनानि, चः समुच्चये, दासा—अङ्कपतिताः, दास्योऽपितथाविधा एव, कुप्यं च—विविधगृहोपस्करात्मकम्, अत्र च धन-धान्यसञ्चयो मित्र-ज्ञातिसंयोगश्चेति द्वौ, शेषाश्चाष्टेति दशविधो बाह्यग्रन्थः ॥७२२॥

अथ पुलाकादीन् व्याचिख्यासुः प्रथमं पुलाकव्याख्यानमाह—'धन्नमसारं' गाहा, पुलाकशब्देनासारं—निःसारं धान्यं तण्डुलकणशून्यं पलञ्जिरूपं भण्यते, तेन पुलाकेन समं—सदृशं यस्य साधोश्चरणं—चारित्रं भवति स पुलाकः, पुलाक इव पुलाक इतिकृत्वा । अयमर्थः— [1]तपः-श्रुतहेतुकायाः सङ्घादिप्रयोजने सबलवाहनस्य चक्रवर्त्यादेरपि [2]चूर्णने समर्थाया लब्धेरुपजीवनेन ज्ञानाद्यतिचारासेवनेन वा सकलसंयमसारगलनात् पलञ्जिवन्निःसारो यः स पुलाकः । [3]स च द्विधा—लब्ध्या सेवया च, लब्धिपुलाकः सेवापुलाकश्चेत्यर्थः । तत्र लब्धिपुलाको देवेन्द्रर्द्धिसमसमृद्धिको लब्धिविशेषयुक्तः, यदाह—

* अस्नानादिभिः साधुं जुगुप्सते जुगुप्सेति । १ तुलना—स्थानाङ्गवृत्तिः प. ३३६, धर्मसं. टी. भा. २ । प. १५१ तः ॥ २ चूर्णनसम० इति सं. प्रतौ धर्मसं. वृत्तौ (भा. २। प.१५२) च पाठः ॥ ३ तुलना—भगवतीसूत्रवृत्तिः पत्र ८६२ सू. ७५१ ॥

△ "संघाइयाण कज्जे चुण्णेज्जा चक्कवट्टिभावं वा। तीए लद्धीए जुओ लद्धिपुलाओ मुणेयव्वो ॥१॥" [पञ्चनिर्ग्रन्थी प्र. गाथा ७]

अन्ये त्वाहुः—आसेवनतो यो ज्ञानपुलाकस्तस्येयमीदृशी लब्धिः, स एव च लब्धिपुलाको न तद्व्यतिरिक्तः कश्चिदपर इति। आसेवापुलाकस्तु पञ्चविधः—ज्ञानपुलाकः, दर्शनपुलाकः, चारित्रपुलाकः, लिङ्गपुलाकः, यथासूक्ष्मपुलाकश्च। तत्र स्खलितमिलितादिभिरतिचारैर्ज्ञानमाश्रित्यात्मानमसारं कुर्वन् ज्ञानपुलाकः, एवं कुदृष्टिसंस्तवादिभिर्दर्शनपुलाकः, मूलोत्तरगुणप्रतिषेवणया चारित्रविराधनतश्चरणपुलाकः, यथोक्तलिङ्गाधिकग्रहणान्निष्कारणान्यलिङ्गकरणाद्वा लिङ्गपुलाकः, किञ्चित्प्रमादान्मनसाऽकल्प्यग्रहणाद्वा यथासूक्ष्मपुलाकः। अन्यत्र पुनरेवमुक्तम्—

"आहासुहुमो य एएसु चेव चउसुवि जो थोवथोवं विराहेइ" [ ] त्ति ॥७२३॥

अथ बकुशमाह—'उवगरण' गाहा, [1]बकुशः शबलः कर्बुर इति पर्यायाः। एवम्भूतश्च सातिचारत्वात् संयमोऽत्राभिप्रेतः, ततश्च बकुशसंयमयोगात्साधुरपि बकुशः, सातिचारत्वाच्छुद्धयशुद्धि-व्यतिकीर्णचरण इत्यर्थः। स द्विविधः—उपकरणविषये शरीरविषये च, उपकरणबकुशः [2]शरीरबकुशश्चेति

△ संघादिकानां कार्ये चूर्णयति चक्रवर्त्तिनमपि यया। तया लब्ध्याया युतो लब्धिपुलाको ज्ञातव्यः ॥१॥

१ तुलना-पञ्चनिर्ग्रन्थी प्रकरणम् गाथा १२-२२ स्थानाङ्गवृत्तिः पृ. ३३६; तत्त्वार्थ. सिद्ध० वृत्ति ९।४८। धर्मसं. वृत्तिः, भा. २। प. १५२ ॥ २ शारीर० इति तत्त्वार्थसिद्ध. वृत्तौ (९।४८) पाठः ॥

भावः । तत्राकाल एव प्रक्षालितचोल[1]पट्टकान्तरकल्पादिश्वोक्षवासःप्रियः पात्रदण्डकाद्यपि विभूषार्थं तैल-मात्रयोज्ज्वलीकृत्य धारयन्नुपकरणबकुशः । तथाऽनागुप्तव्यतिरेकेण कर-चरण-वदनप्रक्षालनमक्षिकर्णनासिका-द्यवयवेभ्योऽपि दृषिकामलाद्यपनयनम्, [2]दन्तपवनकरणम्, केशसंस्कारं च देहविभूषार्थमाचरन् शरीरबकुशः ।

अयं च द्विविधोऽपि सामान्यतः पञ्चविधः, तद्यथा—आभोगबकुशः अनाभोगबकुशः, संवृतबकुशः, असंवृतबकुशः सूक्ष्मबकुशश्च । अत्राभोगः—साधूनामकृत्यमेतच्छरीरोपकरणविभूषणमित्येवम्भूतं ज्ञानं तत्प्र-धानो बकुश आभोगबकुशः । शरीरोपकरणविभूषयोः सहसाकारी अनाभोगबकुशः । संवृतो—गुप्तो लोके अविज्ञातदोषः संवृतबकुशः । प्रकटकारी तु असंवृतबकुशः । मूलोत्तरगुणाश्रितं वा संवृता-ऽसंवृतत्वम् । किञ्चित्प्रमादी नेत्रमलाद्यपनयनात् सूक्ष्मबकुशः । एते च बकुशाः सामान्येन ऋद्धियशस्कामाः सातगौरवाश्रिताः अविविक्तपरिवाराः छेदयोग्यशबलचारित्रयुक्ता अवगन्तव्याः । तत्र ऋद्धिः—प्रचुरवस्त्र-पात्रादिप्राप्तिः, यशश्च—गुणवन्तो विशिष्टाः साधव इत्यादिप्रवादरूपख्यातिगुणस्तत्कामाः—तदभिलाषिणः । सातं-सुखं तत्र गौरवम्—आदरस्तदाश्रिताः, नातीवाहोरात्राभ्यन्तरानुष्ठेयासु क्रियास्वभ्युद्यता इति भावः । अविविक्तः—असंयमादपृथग्भूतः समुद्रफेनादिना निघृष्टजङ्घस्तैलादिना विहितशरीरमृजः कर्तरिकाकल्पितकेशः, स परिवारो येषां तेऽविविक्तपरिवाराः । छेदयोग्यं—सर्वदेशच्छेदार्हं शबलम्—अतिचारकर्बुरं यच्चारित्रं तेन युक्ताः छेदयोग्यशबलचारित्रयुक्ताः ॥७२४॥

---

१ ०पट्टकोत्तरकल्पादि० सं. ॥ २ दन्तपवनमक्षणं केश० सं. । दन्तपवनम(अ)क्षणं-इति तत्त्वार्थसि. वृत्तौ (९ । ४८) पाठः । दन्तपावनलक्षणं-इति स्थानाङ्गवृत्तौ (प. ४४५) पाठः ॥

अथ कुशीलमाह–'आसेवणा' गाहा, [1]मूलोत्तरगुणविराधनात् सञ्ज्वलनकषायोदयाद्वा कुत्सितं शीलं–चारित्रं यस्य स कुशीलः । स च द्विधा–आसेवनाकुशीलः कषायकुशीलश्च । आसेवना–संयमस्य विपरीताऽऽराधना तया कुशील आसेवनाकुशीलः । कषायैः–सञ्ज्वलनक्रोधाद्युदयलक्षणैः कुशीलः कषाय-कुशीलः । द्विविधोऽपि कुशीलः पञ्चविधो–ज्ञान-दर्शन-चरण-तपो-यथासूक्ष्मभेदात् । अयमर्थः–प्रतिसेवना-कुशीलः पञ्चविधो ज्ञान-दर्शन-चारित्र-तपःप्रतिसेवकः सूक्ष्मप्रतिसेवकश्च । तत्र ज्ञानदर्शन-चारित्रतपांस्युप-जीवन् तत्प्रतिसेवक उच्यते । [2]अन्ये तु तपःस्थाने लिङ्गं पठन्ति, एष एव शोभनस्तपस्वीत्यादिप्रशंसया यस्तुष्यति स सूक्ष्मप्रतिसेवकः, कषायकुशीलोऽपि पञ्चविधो–ज्ञान-दर्शन-चारित्र-तपःकषायकुशीलः सूक्ष्म-कषायकुशीलश्च तत्र ज्ञान-दर्शन-तपांसि सञ्ज्वलनक्रोधकषायाद्युपयुक्तो यः स्वस्वविषये व्यापारयति स तत्तत्कषायकुशीलः उच्यते । कषायाविष्ट एव यः कस्यापि शापं प्रयच्छति स चारित्रकषायकुशीलः । मनसा तु क्रोधादीन् कुर्वन् सूक्ष्मकषायकुशीलः । अथवा सञ्ज्वलनक्रोधादिकषायाविष्ट एव ज्ञान-दर्शन-चारित्र-तपांसि यो विराधयति–अतीचारमलिनानि करोति स ज्ञानादिकषायकुशीलः । सूक्ष्मकषायकुशीलस्तु तथैवेति[3] ॥७२५॥

अथ निर्ग्रन्थमाह–'उवसामगो य' गाहा, [4]निर्गतो मोहनीयकर्मलक्षणात् ग्रन्थादिति निर्ग्रन्थः ।

१ तुलना–पञ्चनिर्ग्रन्थी प्र. २२-२८, तत्त्वार्थसिद्ध. वृत्तिः (९ । ४८), स्थानाङ्गवृत्तिः (प. ३३६ तः) ॥
२ तुलना–पञ्चनि. प्र. २८ । स्थानाङ्गवृत्तौ (प. ३३७ A) 'ज्ञान-दर्शन-चारित्र-लिङ्गानि'–इति पाठः ॥
३ विशेषार्थं द्रष्टव्या स्थानाङ्गवृत्तिः प. ३३७ ॥
४ तुलना–पञ्चनि. प्र. २९-३१, स्थानाङ्गवृत्तिः प. ३३६, धर्मसं. वृत्तिः मा. २ । प. १५३ ॥

स द्विधा–उपशान्तमोहः क्षीणमोहश्च । सूत्रे च 'वर्तमानसामीप्ये वर्तमानवद्वा' इति न्यायादतीतकालाभिधानेऽपि 'उवसामगो य खवगो' त्ति वार्तमानिको वुण्प्रत्ययः, उक्तं च–

"सो उवसंतकसाओ खीणकसाओ व" [ ] त्ति ।

तत्र उपशान्तः–उपशमं नीतो विद्यमान एव सङ्क्रमणोद्वर्तनादिकरणायोग्यत्वेन व्यवस्थापितो मोहो–मोहनीयं कर्म येन स उपशान्तमोहः । तथा क्षीणो मोहो यस्य स क्षीणमोहः, सूक्ष्मसम्परायावस्थायां सञ्ज्वलनलोभमपि निःशेषं क्षपयित्वा सर्वथा मोहनीयकर्माभावं प्रतिपन्न इत्यर्थः । स द्विविधोऽपि प्रत्येकं पञ्चविधस्तद्यथा–प्रथमसमयनिर्ग्रन्थोऽप्रथमसमयनिर्ग्रन्थश्चरमसमयनिर्ग्रन्थोऽचरमसमयनिर्ग्रन्थो यथा सूक्ष्मनिर्ग्रन्थश्चेति । तत्रान्तर्मुहूर्तप्रमाणे निर्ग्रन्थकालसमयराशौ प्रथमसमये निर्ग्रन्थत्वं प्रतिपद्यमानः प्रथमसमयनिर्ग्रन्थः १, अन्यसमयेषु च वर्तमानोऽप्रथमसमयनिर्ग्रन्थः २, पूर्वानुपूर्व्या व्यपदिश्यते, तथा चरमे–अन्तिमे समये वर्तमानश्चरमसमयनिर्ग्रन्थः ३, शेषेषु पुनर्वर्तमानोऽचरमसमयनिर्ग्रन्थः पश्चानुपूर्व्या निर्दिश्यते, यथासूक्ष्मनिर्ग्रन्थः पुनः सामान्येन प्रथमादिसमयाविवक्षया सर्वेषु समयेषु वर्तमानो यथासूक्ष्मनिर्ग्रन्थः पञ्चम इति विवक्षया भेद एषामिति ॥७२६॥

अथैते उपशान्तमोहाः क्षीणमोहाश्च निर्ग्रन्था एकस्मिन् समये यावन्तः प्राप्यन्ते तदाह–'पावित्रज्जइ' गाहा, एकस्मिन् समये प्रवेशमङ्गीकृत्य प्राप्यतेऽष्टोत्तरशतं क्षपकाणां–क्षीणमोहानाम् , उपशामकानाम्-उपशान्तमोहानां पुनश्चतुष्पञ्चाशत् । इदं च उत्कर्षतः, जघन्येन तु क्षीणमोहा उपशान्तमोहाश्च एको वा द्वौ वा त्रयो वा प्राप्यन्ते । अयमभिप्रायः–क्षीणमोहास्तावत्कदाचिद्भवन्ति कदाचिन्न भवन्ति, क्षपकश्रेणेरुत्कर्षतः

षण्मासमानस्यान्तरस्य सद्भावान्निरन्तरमसम्भवात्। ततो यदा भवन्ति तदा युगपदेकसमये क्षपकश्रेण्यां जघन्यत एकादयः, उत्कृष्टतोऽष्टोत्तरशतप्रमाणा एव प्रविशन्ति नाधिकाः । एतच्च सूत्रे युगपदेकसमयप्रविष्टानङ्गीकृत्योक्तम् , नानासमयप्रविष्टानङ्गीकृत्य पुनरुत्कृष्टतः शतपृथक्त्वम् , तथाहि—अन्तर्मुहूर्तस्वरूपे क्षपकश्रेणिकाले एकस्मिन् समये युगपदेवैकादयो यावदुत्कृष्टतोऽष्टोत्तरशतप्रमाणा जीवा मोहक्षपणाय प्रविष्टाः, अन्यस्मिन्नपि समये एतावन्तोऽपरस्मिन्नपि च समये एतावन्तः प्रविष्टाः, एवं नानासमयप्रविष्टान् सर्वानप्यङ्गीकृत्य सर्वस्मिन्नप्यन्तर्मुहूर्तप्रमाणे क्षपकश्रेणिकाले सामान्येन पञ्चदशस्वपि कर्मभूमिषु कदाचिच्छतपृथक्त्वं क्षीणमोहानां प्राप्यते । ततः परं क्षपकश्रेणेरपि निरन्तरमभावात् ।

आह—नन्वन्तर्मुहूर्तमानेऽपि क्षपकश्रेणिकालेऽसंख्याताः समयाः प्राप्यन्ते, तत्र च प्रतिसमयं यद्येकैकः प्रविशति तथाप्यसंख्येया भवन्ति किं पुनरष्टोत्तरशतप्रवेशे इति ?, अत्रोच्यते, स्यादेवं यदि प्रतिसमयमसङ्ख्यातेष्वपि समयेष्वेवं तत्प्रवेशः स्यात् , एतच्च नास्ति । केषुचिदेव समयेष्वेवं तत्प्रवेशसम्भवात् तथैवातिशायिभिर्दृष्टत्वाद्भोगभूमजमनुष्याणामपि चासङ्ख्यातानामसम्भवाद्विशेषतस्तु चारित्रिणाम् , न च गर्भजमनुष्यं चारित्रिणं मुक्त्वाऽन्यः क्षपकश्रेणिं प्रतिपद्यत इति ।

तथा उपशान्तमोहा अपि कदाचिद्भवन्ति कदाचिन्न भवन्ति । उपशमश्रेणेरुत्कर्षतो वर्षपृथक्त्वप्रमाणस्यान्तरस्यापि सद्भावात् । तत्र च यदा भवन्त्यमी तदा जघन्यत एकादय उत्कर्षतस्तु चतुष्पञ्चाशत्प्रमाणा एव जीवा एकस्मिन् समये उपशमश्रेणिं प्रतिपद्यन्ते नाधिकाः । नानासमयप्रविष्टाः पुनरुत्कृष्टतः सङ्ख्याताः, एतदुक्तं भवति—अन्तर्मुहूर्तलक्षणे उपशमश्रेणिकाले एकस्मिन् समये युगपदेव एकादयो यावदुत्कृष्टतश्चतु-

पञ्चाशत् प्रविष्टाः, अन्यस्मिन्नपि समये एतावन्तः अपरस्मिन्नपि समये एतावन्तः प्रविष्टाः । एवं नानासमयप्रविष्टान् सर्वानप्यङ्गीकृत्य सर्वस्मिन्नप्यन्तर्मुहूर्तमाने उपशमश्रेणिकाले सामान्येन सर्वस्मिन्नपि मनुष्यक्षेत्रे कदाचिदुत्कृष्टतः सङ्ख्याता उपशान्तमोहाः प्राप्यन्ते । ततः परमुपशमश्रेणेर्निरन्तरमभावात् । असङ्ख्येयाः कथममी न प्राप्यन्ते ? इत्याद्याक्षेपपरिहारौ पूर्ववद्वाच्याविति ॥७२७॥

अथ स्नातकमाह—'**सुहझाण**' गाहा, शुभं—प्रशस्तं ध्यानं— [1]शुक्लध्यानलक्षणम्, तदेव कर्ममलापेक्षया—घातिकर्ममलपटलप्रक्षालनापेक्षया जलं—सलिलम्, तेन विशुद्धो—निर्मलः स्नातक इति भण्यते । क्षालितसकलघातिकर्ममलपटलत्वात् स्नात इव स्नातः, स एव स्नातकः केवलीत्यर्थः । स च द्विविधो निर्दिष्टः—सयोगी अयोगी च, तत्र मनोवाक्कायव्यापारवान् सयोगी, सर्वथा समुच्छिन्नमनो-वाक्कायव्यापारस्त्वयोगी । एतेषां च पुलाकादीनां व्याख्याप्रज्ञप्तौ 'पन्नवणवेय' [शतक २५, उ.६, सू.७५१] इत्यादिग्रन्थोक्तैः षट्त्रिंशता द्वारैर्विचारोऽस्ति ॥७२८॥

तत्र बहुतरोपयोगित्वात् शेषद्वारोपलक्षणार्थं प्रतिसेवनाद्वारमाह—'**मूलुत्तरगुण**' गाहा, मूलगुणाः—प्राणातिपातनिवृत्त्यादयः, उत्तरगुणाः—पिण्डविशुद्ध्यादयः, तद्विषया 'प्रतिसेवा' सेवा—सम्यगाराधना तत्प्रतिपक्षस्तु प्रतिसेवा विराधनेत्यर्थः । '**सेवए**'त्ति सूचकत्वात्सूत्रस्य प्रतिसेवना कुशीले पुलाके च । अयमर्थः—पुलाकप्रतिसेवना कुशीलप्रतिसेवना, मूलगुणानामुत्तरगुणानां चान्यतमस्य विराधना । **तत्त्वार्थभाष्ये** तु—"प्रतिसेवना पञ्चानां मूलगुणानां रात्रिभोजनविरतिषष्ठानां पराभियोगाद् बलात्कारेणा-

१ तुलना—धर्मसं. वृत्तिः भा २ । पृ. १५३ ॥

न्यतमं प्रतिसेवमानः पुलाको भवति, मैथुनमेवेत्येके, ... प्रतिसेवनाकुशीलो मूलगुणानविराधयन्नुत्तरगुणेषु काञ्चिद्विराधनां प्रतिसेवते" [अध्याय ९ । सू. ४६] इत्युक्तम् ।

तथा उत्तरगुणेषु प्रतिसेवको बकुशः, उत्तरगुणानामेव विराधको न मूलगुणानामित्यर्थः । शेषास्तु कषायकुशीलनिर्ग्रन्थस्नातकाः प्रतिसेवनारहिताः, मूलगुणानामुत्तरगुणानां च अविराधका एवेति भावः । अत्र च यत्पुलाकादीनां मूलोत्तरगुणविराधकत्वेऽपि निर्ग्रन्थत्वमुक्तं तज्जघन्यजघन्यतरोत्कृष्टोत्कृष्टतरादिभेदतः संयमस्थानानामसङ्ख्येयतया तदात्मकतया च चारित्रपरिणतेरिति भावनीयम् , चारित्रपर्याया अपि चामीषां पञ्चानामपि प्रत्येकमनन्ताः । यत उक्तम्—

"पुलागस्स णं भंते ! केवइया चरित्तपज्जवा पन्नत्ता ?, गोयमा ! अणंता चरित्तपज्जवा पन्नत्ता, एवं जाव सिणायस्स" [ ] त्ति ॥७२९॥

अथैते पुलाकादयः पञ्चापि कियन्तं कालं यावत्प्राप्यन्ते ?, तत्राह—**'निग्गंथ-सिणायाणं'** गाहा, निर्ग्रन्थ-स्नातकानां पुलाकसहितानां त्रयाणामपि निर्ग्रन्थभेदानां व्यवच्छेदः—अभावो **'मणपरमोहिपुलाए'** [गा. ६९३] इत्यादिवचनात् जम्बूस्वामिनोऽनन्तरमेते त्रयोऽपि न जाता इत्यर्थः । बकुश-कुशीललक्षणाः पुनः श्रमणाः—साधवो यावत्तीर्थं तावद्भविष्यन्ति । 'बकुसकुसीलेहिं वट्टए तित्थं' [ ] इति वचनात् ॥७३०॥९३॥

इदानीं 'समण' त्ति चतुर्नवतं द्वारमाह—

[1]निग्गंथ १ सक्क २ [2]तावस ३ गेरुय ४ आजीव ५ पंचहा समणा ।
तम्मि निग्गंथा ते जे जिणसासणभवा मुणिणो ॥७३१॥
सक्का य सुगयसीसा जे जडिला ते उ तावसा गीया ।
जे धाउरत्तवत्था तिदंडिणो गेरुया ते उ ॥७३२॥
जे गोसालगमयमणुसरंति भन्नंति ते उ आजीवा ।
समणत्तणेण भुवणे पंचवि पत्ता पसिद्धिमिमे ॥७३३॥

'निग्गंथे' त्यादिगाथात्रयम्, निर्ग्रन्थाः शाक्यास्तापसा गैरुका आजीवाश्च पञ्चधा—पञ्चभेदाः श्रमणा भवन्ति । 'तंमि' त्ति प्राकृतत्वादेकवचनम् । ततस्तेषु— [3]निर्ग्रन्थादिषु मध्ये निर्ग्रन्थास्ते भण्यन्ते ये जिनशासनभवाः—प्रतिपन्नपारमेश्वरप्रवचनाः मुनयः—साधवः । तथा शाक्याः सुगतशिष्या—बौद्धा इत्यर्थः । ये च जटिला—जटाधारिणो वनवासिपाखण्डिनस्ते तापसा गीताः—कथिताः । ये धातुरक्त-वस्त्रास्त्रिदण्डिनस्ते तु गैरुकाः परिव्राजका इत्यर्थः । तथा ये गोशालकमतमनुसरन्ति भण्यन्ते ते तु आजीवका इति । एते पञ्चापि श्रमणत्वेन भुवने प्रसिद्धिं प्राप्ता इति ॥७३१॥७३२॥७३३॥९४॥

१ तुलना—पिण्डनिर्युक्तिः ४४५ ॥ २ गेरुय तावस—जे. ॥
३ श्रिमणेषु—मु. । निर्ग्रन्थानां—सं. ॥

इदानीं 'गासेसणाण पणगं' ति पञ्चनवतं द्वारमाह पणगं–

[2]संजोयणा १ पमाणे २ इंगाले ३ धूम ४ कारणे ५ चेव ।
उवगरणभत्तपाणे सबाहिरऽब्भंतरा पढमा ॥७३४॥ [पञ्चाशक प्र० १३।४८]

[3]कुक्कुडिअंडयमेत्ता कवला बत्तीस भोयणपमाणे ।
[4]राएणाऽऽसायंतो संगारं करइ सचरित्तं ॥७३५॥

भुंजंतो अमणुन्नं दोसेण सधूमगं कुणइ चरणं ।
वेयण आयंकप्पमुहकारणा छच्च पत्तेयं ॥७३६॥

वेयण १ वेयावच्चे २ इरियट्ठाए य ३ संजमट्ठाए ४ ।
तह पाणवत्तियाए ५ छट्ठं पुण धम्मचिंताए ६ ॥७३७॥

आयंके १ उवसग्गे २ तितिक्खया बंभचेरगुत्तीसु ३ ।
पाणिदया ४ तवहेऊ ५ सरीरवोच्छेयणट्ठाए ॥७३८॥ [पिण्डनि. ६६२-६६६]

'संजोयणे' ति गाथापूर्वार्धम्, संयोजना, प्रमाणम्, अङ्गारः धूमः, कारणं चेति पञ्च ग्रासैषणा-दोषाः । ग्रासो-भोजनम्, तद्विषया एषणा-शुद्धाऽशुद्धपर्यालोचनं ग्रासैषणा, तस्या दोषा ग्रासैषणा दोषाः । तत्र प्रथमं संयोजनामाह–'उवगरणे'त्यादि उत्तरार्धम्, 'पढम' त्ति दोषपञ्चकापेक्षया प्रथमा–आद्या संयोजनेत्यर्थः । संयोजनं संयोजना–उत्कर्षतोत्पादनार्थं द्रव्यस्य द्रव्यान्तरेण मीलनम्, सा

१ 'गासेसण' त्ति-मु. ॥ २ द्रष्टव्यं भगवतीसूत्रम् सू० २६८ ॥ ३ कुक्कुडि अंडयमाणा-ता० ॥ ४ रागेणा० जे. ॥

द्विधा भवति–[1]उपकरणविषया, भक्तपानविषया च । पुनरेकैका द्विधा–सबाह्या-ऽभ्यन्तरा-बाह्याभ्यन्तरभेद-युक्ता, बाह्या अभ्यन्तरा चेत्यर्थः ।

तत्र उपकरणविषया बाह्या संयोजना–यथा कश्चित्साधुः कुत्रापि गृहे भव्यं चोलपट्टादिकं प्राप्य पुनरन्यत्र विभूषार्थं तदुचितं पटीप्रभृतिकं मार्गयित्वा वसतेर्बहिरेव प्रावृणोतीति । अभ्यन्तरा वसतौ निर्मलं चोलपट्टादिकं परिधाय विभूषानिमित्तं तदनुरूपां निर्मलामेव नर्मादिपटीं परिदधातीति ।

तथा भिक्षार्थं हिण्डमानः सन् [2]क्षीरादिकमनुकूलद्रव्यैः खण्डादिभिः सह रसगृद्ध्या रसविशेषोत्पाद-नाय बहिरेव संयोजयतीत्येषा बाह्या भक्तपानविषया संयोजना । अभ्यन्तरा पुनर्यद्वसतावागत्य भोजन-वेलायां संयोजयतीति । सा च त्रिधा–पात्रकविषया, कवलविषया, मुखविषया च । तत्र भोजनसमये यत्पायसादि येन खण्डादिना रोचते तद्रसगृद्ध्या तेनैव सहैकस्मिन्नेव पात्रे संयोज्य स्थापयतीति प्रथमा । यदा तु हस्तगतमेव कवलतया उत्पाटितं सुकुमारिकादिकं खण्डादिना सह संयोजयति तदा द्वितीया । यदा पुनर्मण्डकादिकं मुखे प्रक्षिप्य पश्चाद् गुडादिकं प्रक्षिपति तदा तृतीयेति ।

[3]अपवादश्चात्र–एकैकं साधुसङ्घाटकं प्रति प्रचुरघृतादिप्राप्तौ सत्यां भोजनानन्तरं यदि कथमपि कियदप्युद्धरितं भवति तदा तदुद्धरितघृतादिनिर्गमनार्थं खण्डादिभिरपि तस्य संयोजनं न दोषाय । उद्धरितं हि घृतादि न खण्डादिकमन्तरेण मण्डकादिभिरपि सह भोक्तुं शक्यते प्रायस्तृप्तत्वात् । न च परिष्ठापनं

१ तुलना–पञ्चाशकवृत्तिः १३।४८ ॥
२ तुलना–सटीका पिण्डनिर्युक्तिः ६३७ । पिण्डविशुद्धिवृत्तिः ९४ ॥ ३ तुलना–सटीका पिण्डनिर्युक्तिः ६४०-१ ॥

भुक्तम्, तृतीयदिवसे निग्रन्थत्वात् यद्यपि निर्याप्तिकादिप्रत्याख्यानसम्भवात्। तथा यदवग्रहीतायां यद्वा मक्तभोजिनः श्वानाद्यवलोकितस्य मुक्तोचितस्य यावत्प्रादेर्वा मातृपितृभ्यां मयोगर्भितहारेणापि सम्यगशनितस्य ऊनकस्य वा निशि यावत्पुनरपि मध्योदना कल्पत एवेति ॥७३४॥

इदानीं प्रमाणमाह—'कुक्कुडि' इत्यादि गाथापूर्वार्धम्, 'कुक्कुट्यण्डकमात्राः कवला द्वात्रिंशत्-द्वात्रिंशत्प्रमाणे इति। 'तत्र कुक्कुटी द्विधा-द्रव्यकुक्कुटी भावकुक्कुटी च। तत्र भावतः पुरुषस्यैव कुक्कुटी मन्तव्यखण्डकम्। तत्रापि-योनेर्मुखस्य च निष्पत्तिमात्रात् यः कवलो मुखे प्रविशति एतत्प्रमाणं कवलस्य। अथवा कुक्कुटी-पक्षिणी तस्या अण्डकं प्रमाणं कवलस्य। तथा यावन्मात्रेणाहारेण मुखेन न न्यूनं नाप्यत्याधानमुदरं भवति तृतीय विहिता सम्पद्यते ज्ञान-दर्शन-चारित्राणां च वृद्धिरुपजायते तावन्मात्रं आहारो भावकुक्कुटी, तस्य द्वात्रिंशत्तमो भागोऽण्डकम्, एतत्प्रमाणं कवलस्य। तदो द्वात्रिंशत्कवलाः पुरुषस्याहारप्रमाणम्, स्त्रियास्तु अष्टाविंशतिः, नपुंसकस्य पुनश्चतुर्विंशतिः। उक्तं च मण्डलप्रकारिके—

"बत्तीसं किर कवला पुरिसस्स आहारो अट्ठावीसं इत्थियाए चउवीसं पंडगस्स" त्ति।

अविरुद्धमप्येतत् अवीर्यमाणः सन् व्यायते श्रमनाय मृन्मये चेति। यदप्यवादि—

★ "अवहूयं अवहूओ अप्पमाणेण भोयणं भुत्तं। हादेज्ज व वामेज्ज व मारेज्ज व तं अवीरियं ॥१॥" [पिण्डनि. ६२६] इति।

---

१ कुक्कुं० मु० प्रत्यन्तरेषु पिण्डनि. वृत्तावपि कुक्कुः इति पाठः॥ २ भुक्त-पिण्डनिर्युक्तिटीका ६२९॥
★ अवहृतमवहृत अतिप्रमाणेन भोजनं भुक्तं हादेद्वा वामयेद्वा मारयेद्वा तदवीर्यमाणम् ॥१॥

इदानीमङ्गारदोषमाह– "रागेण" इत्यादि उत्तरार्धम्, रागेण–अन्नस्य तदातुर्वा प्रशंसारूपेणास्वादयन्–अभ्यवहरन्– प्रासुकमप्याहारं करोति स्वचारित्रं साङ्गारम्, चरणेन्धनस्याङ्गारभूतत्वात्। [२]अयमत्र भावार्थः–इह द्विधा अङ्गाराः–द्रव्यतो भावतश्च। तत्र द्रव्यतः कृशानुदग्धाः खदिरादिवनस्पतिविशेषाः, भावतो रागाग्निना निर्दग्धं चरणेन्धनम्, ततो यथा दग्धमिन्धनं भूमे गते सति अङ्गार इत्युच्यते, एवमिहापि चरणेन्धनं रागाग्निना निर्दग्धं सदङ्गारक इत्युच्यते। ततश्च भोजनगतविशिष्टगन्धरसास्वादवशेन सञ्जाततद्विषयमूर्च्छस्य सतोऽहो सुमृष्टमहो! सुसंभृतमहो! स्निग्धं सुपक्वं सुरसं चेत्येवं प्रशंसातः सहाङ्गारेण यद्वर्तते तत्साङ्गारमिति ॥७३५॥

इदानीं धूमदोषमाह–'भुंजंतो' इत्यादि गाथापूर्वार्धम्, द्वेषेण–अन्नस्य तदायकस्य वा निन्दात्मकेन अमनोज्ञम्–अमधुरमाहारं भुञ्जानश्चरणं–चारित्रं सधूमकं करोति। निन्दात्मककलुषभावस्वरूपधूमसम्मिश्रत्वात्। अत्राप्ययं भावार्थः–[३]इह द्विविधो धूमस्तद्यथा–द्रव्यतो भावतश्च, तत्र द्रव्यतोऽर्धदग्धानां काष्ठानां सम्बन्धी, भावतो द्वेषाग्निना दह्यमानस्य चरणेन्धनस्य सम्बन्धी कलुषभावो निन्दात्मकः। ततो यथाऽङ्गारत्वमप्राप्तं ज्वलदिन्धनं सधूममुच्यते। एवं द्वेषाग्निना दह्यमानं चरणेन्धनमपि सधूमम्, ततश्च भोजनगतविरूपरसगन्धास्वादतो जाततद्विषयव्यलीकचित्तस्य सतोऽहो विरूपं क्वथितमपक्वमसंस्कृतमलवणं चेति निन्दावशाद्धूमेन सह यद्वर्तते तत्सधूमं चारित्रमिति ॥

१ रागेण–सं. ॥ २ तुलना–पिण्डनिर्युक्तिटीका ६५५ तः ॥ ३ तुलना–पिण्डनिर्युक्तिटीका ६५५ ॥

अधुना कारणमाह–'वेयण' त्याद्युत्तरार्धम् , वेदनातङ्कप्रमुखानि षट् कारणानि प्रत्येकं भोजने अभोजने च ज्ञेयानि । पुंस्त्वं च प्राकृतत्वात् । अयमर्थः–वेदनादिभिः षड्भिः कारणैर्भोजनं कुर्वाणः, आतङ्कप्रमुखैश्च षड्भिः कारणैर्भोजनमकुर्वाणस्तीर्थकृदाज्ञां नातिक्रामति पुष्टकारणत्वात् । अन्यथा त्वतिक्रामत्येव रागादिभावादिति ॥७३६॥

तत्र वेदनादीनि षट् भोजनकारणानि तावदाह–'वेयण' गाहा, इह पदैकदेशे पदसमुदायोपचारात् सुब्व्यत्ययाच्च 'वेयण' त्ति क्षुद्वेदनोपशमाय भुञ्जीतेति सर्वत्र क्रियासम्बन्धः । बुभुक्षा हि न शक्यते सोढुम् बुभुक्षायाः सर्ववेदनातिशायित्वात् उक्तं च–△ 'छुहासमा वेयणा नत्थि'त्ति ।[पिण्डनि. गा.६६५]

तथा वैयावृत्त्यकरणाय, बुभुक्षितो हि गुर्वादीनां न शक्नोति वैयावृत्त्यं कर्तुम् , तथा ईर्येति–ईर्यासमितिः, सैव निर्जरार्थिभिरभ्यर्ध्यमानतयाऽर्थस्तस्मै, बुभुक्षापीडितस्य हि चक्षुर्भ्यामपश्यतः कथमिव ईर्यासमितिपरिपालनं स्यात् ?, तथा संयमार्थाय, क्षुधार्त्तो हि न प्रेक्षोत्प्रेक्षाप्रमार्जनादिलक्षणं संयमं विधातुमलम् , अतः संयमाभिवृद्ध्यर्थम् , तथा प्राणा–उच्छ्वासादयो बलं वा प्राणास्तेषां तस्य वा वृत्तिः–पालनं तदर्थं प्राणसंधारणार्थमित्यर्थः, यद्वा प्राणप्रत्ययं–जीवितनिमित्तम् , अविधिना ह्यात्मनोऽपि प्राणोपक्रमे हिंसा स्यात् । अत एवोक्तम्—

△ क्षुधासमा वेदना नास्ति ॥

१ पिण्डनिर्युक्तिवृत्तौ (गा. ६६५) सम्पूर्णा गाथा इत्थं दृश्यते–"पंथसमा नत्थि जरा, दारिद्दसमो य परिभवो नत्थि । मरणसमं नत्थि भयं, छुहासमा वेयणा नत्थि ॥"

●'भावियजिणवयणाणं ममत्तरहियाण नत्थि हु विसेसो । अप्पाणंमि परंमि य तो वज्जे पीडमुभओवि ॥१॥'

षष्ठं पुनरिदं कारणं–यदुत 'धर्मचिन्तायै' धर्मचिन्ता–धर्मध्यानचिन्ता श्रुतधर्मचिन्ता वा ग्रन्थपरावर्तनचिन्तनवाचनादिरूपा । इयं ह्युभयरूपाऽपि बुभुक्षाऽऽकुलितचेतसो न स्यादार्त्तध्यानसम्भवादिति । इह च यद्यपि वेदनोपशमादीनां शाब्द्या वृत्त्या तदुपलक्षितभोजनफलत्वेन प्रतीतिः, तथापि तैर्विना तन्निषेधसूचनादार्थ्या वृत्त्या कारणत्वमेवैषामुपदर्शितं भवति । अत एव षष्ठमित्यत्र कारणमेव सम्बन्धितम् ॥७३७॥

अथातङ्कादीनि षडेषामोजनकारणान्याह—**'आयंके'** गाहा, आतङ्के–ज्वरादौ रोगे समुत्पन्ने सति न भुञ्जीत, उपवासान् कुर्वतो हि प्रायेण ज्वरादयस्त्रुटयन्ति । उक्तं च–

"बलावरोधि निर्दिष्टं, ज्वरादौ लङ्घनं हितम् । ऋतेऽनिलश्रमक्रोधशोककामक्षतज्वरान् ॥१॥"

तथोपसर्गे देव-मनुष्य-तिर्यक्कृते सञ्जाते सति तितिक्षया हेतुभूतया उपसर्गसहनार्थमित्यर्थः । उपसर्गश्च अनुकूल-प्रतिकूलभेदाद् द्विविधः । तत्र माता-पितृ-कलत्रादिस्वजनकृतोऽनुकूलः, ते हि स्नेहादिना प्रव्रज्यामोचनार्थं कदाचिदुपतिष्ठन्ते, तत्रोपसर्गोऽयमिति मत्वा नाश्नीयात् । यतस्तमुपवासान् कुर्वन्तं वीक्ष्य तन्निश्चयावगमनान्मरणादिभयाद्वा मुञ्चन्तीति । प्रतिकूलोपसर्गश्च कुपितराजादिकृतः, तत्रापि न भुञ्जीत, विहितोपवासं हि साधुं समीक्ष्य राजादयोऽपि प्रायेण सञ्जातदया मुञ्चन्तीति । तथा ब्रह्मचर्यगुप्तिषु–ब्रह्मचर्यगुप्तिनिमित्तं मैथुनव्रतसंरक्षणार्थमित्यर्थः । उपवासान् हि विदधतः कामः कामं दूरमपक्रामति, यदुक्तम्–

'विषया विनिवर्तन्ते, निराहारस्य देहिनः ।' [ ] इति ।

●भावितजिनवचनानां ममत्वरहितानां नास्त्येव विशेषः । आत्मनि परस्मिन्नपि च ततो वर्जयेत् पीडामुभयोरपि ॥

तथा 'पाणिदयातवहेउ' त्ति प्राणिदयाहेतोः-जीवदयारक्षणार्थम् , जलवृष्टौ महिकापाते सचित्तरजःपातादौ प्रभूतसूक्ष्ममण्डूकिका-मसिका-कोद्रविकादिसत्त्वसंसक्तायां वा भूमौ प्राणिदयानिमित्तमटनं परिहरन् न भुञ्जीत । तथा तपोहेतोः-तपःकरणनिमित्तम् , एक-द्वि-त्र्याद्युपवासकरणेन षण्मासान्तं यावत्तपः कुर्वतो न भोजनसम्भवः । तथा शरीरस्य व्यवच्छेदः-परिहारस्तदर्थं च । इह हि शिष्यनिष्पादनादिसकलकर्तव्यताऽनन्तरं पाश्चात्ये वयसि संलेखनाकरणेन यावज्जीवानशनप्रत्याख्यानकरणयोग्यमात्मानं कृत्वा भोजनं परिहरेत् नान्यथा । शिष्यनिष्पादनाद्यभावे प्रथमे द्वितीये वा वयसि शरीरपरित्यागार्थमनशनप्रत्याख्यानकरणे जिनाज्ञाभङ्गप्रसङ्गात् संलेखनामन्तरेणार्त्तध्यानादिसम्भवाच्च यदुक्तम्—

●"देहम्मि असंलिहिए सहसा धाऊहिं खिज्जमाणाहिं । जायइ अट्टज्झाणं सरीरिणो चरिमसमयम्मि ॥१॥" [पञ्चवस्तुकः १५७१] इत्यादि, कारणत्वभावना चामीषां प्राग्वत् ॥७३८॥९५॥

इदानीं **पिंडे पाणे य एसणासत्तगं**'त्ति षष्ठवतं द्वारमाह-

[1]संसट्ठ १ मसंसट्ठा २ उद्धड ३ तह [2]अप्पलेविया ४ चेव ।
उग्गहिया ५ पग्गहिया ६ उज्झियधम्मा ७ य सत्तमिया ॥७३९॥
तंमि य संसट्ठा [3]हत्थमत्थएहिं इमा पढम भिक्खा १ ।
तव्विवरीया बीया भिक्खा गिण्हंतगस्स भवे २ ॥७४०॥

● देहेऽसंलिखिते सहसा धातुभिः क्षीयमाणैः । जायते आर्त्तध्यानं शरीरिणश्चरमसमये ॥१॥

१ तुलना-आव. हारिभद्री पृ. ५७२ ॥ २ अप्पलेवडा-ता. ॥ ३ हत्थमत्तए णिमा-जे. । हत्थमत्तए इमा-ता. ॥

नियजोएणं भोयणजायं उद्धरियमुद्धडा भिक्खा ३ ।
सा अप्पलेविया जा निल्लेवा वज्जणगाई ४ ॥७४१॥
भोयणकाले निहिया सरावपमुहेसु होइ उग्गहिया ५ ।
पग्गहिया जं दाउं भुत्तुं व करेण असणाई ६ ॥७४२॥
भोयणजायं जं लुडुणारिहं नेहयंति दुपयाई ।
अद्धचत्तं वा सा उज्झियधम्मा भवे भिक्खा ॥७४३॥
पाणेसणावि एवं नवरि चउत्थीए होइ नाणत्तं ।
'सावोरागामाइ' 'जमलेवाढाति समयुत्ती ॥७४४॥

'संसट्ठे'त्यादिगाथाषट्कम् , पिण्डः-सिद्धान्तभाषया भक्तमुच्यते, तस्य एषणा-ग्रहणप्रकारः पिण्डैषणा । सा च सप्तविधा, तद्यथा-असंसृष्टा १, संसृष्टा २, उद्धृता ३ तथा अल्पलेपिका ४ चैव अवगृहीता ५, प्रगृहीता ६, उज्झितधर्मा च सप्तमिका । अत्र च उत्तरोत्तरस्या अतिविशुद्धत्वात् इत्थं क्रम-निर्देशो द्रष्टव्यः । यत्पुनः सूत्रे संसृष्टायाः पूर्वमुपादानं तद्गाथाभङ्गभयादिति । इह च द्वये साधवो-गच्छान्तर्गता गच्छनिर्गताश्च, तत्र गच्छान्तर्गतानामेताः सप्तापि ग्रहीतुमनुज्ञाताः, गच्छनिर्गतानां पुनराद्ययो-र्द्वयोरग्रहः पञ्चस्वभिग्रहः ॥७३९॥

१ सोवीरागामाई-जे.सं. ॥ २ जमलेवाढाति-जे. ॥

अथैताः स्वयमेव व्याचष्टे–'तंमी'त्यादिगाथाचतुष्टयम् , 'तंमि' त्ति प्राकृतत्वात्तासु भिक्षासु मध्ये संसृष्टा हस्त-मात्रकाभ्यां भवति । कोऽर्थः ?–संसृष्टेन–तक्र-तीमनादिना खरण्टितेन हस्तेन संसृष्टेनैव च मात्रकेण–करोटिकादिना गृह्णतः साधोः संसृष्टा नाम भिक्षा भवति । इयं च द्वितीयाऽपि मूलगाथोक्तक्रमापेक्षया प्रथमा । अत्र च संसृष्टा-संसृष्ट-सावशेष-निरवशेषद्रव्यैरष्टौ भङ्गाः । तेषु चाष्टमो भङ्गः संसृष्टो हस्तः संसृष्टं मात्रं सावशेषं द्रव्यमित्येष गच्छनिर्गतानामपि कल्पते । शेषास्तु भङ्गा गच्छान्तर्गतानां सूत्रार्थहान्यादिकं कारणमाश्रित्य कल्पन्त इति । तथा तद्विपरीता–संसृष्टाख्यभिक्षाविपरीता द्वितीया असंसृष्टा नाम भिक्षा भवति । असंसृष्टेन हस्तेन असंसृष्टेन च मात्रकेण भिक्षां गृह्णतः साधोरसंसृष्टेत्यर्थः । अत्र चासंसृष्टो हस्तोऽसंसृष्टं च मात्रं द्रव्यं पुनः सावशेषं वा स्यान्निरवशेषं वा । तत्र निरवशेषे पश्चात्कर्मदोषः, तथापि गच्छस्य बालाद्याकुलत्वात्तन्निषेधो नास्ति अत एव सूत्रे तच्चिन्ता न कृता ॥७४०॥

तथा निजयोगेन–आत्मव्यापारेणैव भोजनजातं मूलस्थाल्यादेः सकाशादन्यत्र स्थाल्यादावुद्धृतम् , तच्च साधोर्गृह्णत उद्धृता तृतीया भिक्षा भवति । तथा सा अल्पलेपिका नाम चतुर्थी भिक्षा या निर्लेपा वल्ल-चणकादिः, आदिशब्दात्पृथुकादिपरिग्रहः । अत्र चाल्पशब्दोऽभाववाचकः, ततोऽल्पलेपा निर्लेपा नीरसेत्यर्थः । यद्वाऽल्पः–स्तोको लेपः पश्चात्कर्मादिजनितः कर्मसम्बन्धो वा यस्यां सा अल्पलेपा । उक्तं च आचाराङ्गे—

'अस्सिं खलु पडिग्गहियंसि अप्पे पच्छाकम्मे अप्पे पज्जवजाए त्ति' । [श्रुतस्कन्ध २।१।१।११]

अत्र च–पृथुकादिके गृहीतेऽप्यल्पं पश्चात्कर्मादि तथा अल्पं पर्यायजातम् । अल्पं तुषादि त्यजनीयमित्यर्थः ॥७४१॥

तथा भोजनसमये निहितं–निक्षिप्तं शरावप्रकुण्डेषु-शरावकांस्यपात्रादिषु भाजनेषु भोक्तुकामस्य ढौकितं यद्भोजनजातं कूरादिकं तद् गृह्णतो यतेरवगृहीता पञ्चमी भिक्षा भवति। अत्र च दात्रा कदाचित्पूर्वमेव उदकेन हस्तो मात्रकं वा धौतं स्यात्ततो यदि परिणतः पाण्यादिषूदकलेपस्तदा कल्पते अन्यथा तु निषेधः। तथा भोजनवेलायां भोक्तुकामाय दातुमभ्युद्यतेन परिवेषकेण पिठरकादेरुद्धृत्य चट्टुकादिना उत्क्षिप्तं परेण च न गृहीतं प्रव्रजिताय दापितं यद्वा भोक्त्रा स्वयं भोक्तुं करेण–निजहस्तेन यद् गृहीतमशनादि तद् गृह्णतो यतेः प्रगृहीता नाम षष्ठी भिक्षा भवति ॥७४२॥

तथा यद्भोजनजातममनोज्ञत्वादिना कारणेन परित्यागार्हम्, अन्ये च द्विपदादयो ब्राह्मण-श्रमणाऽतिथि-कार्पटिकादयो न ईहन्ते–नावकाङ्क्षन्ति तद् अर्धत्यक्तं वा गृह्णतः साधोरुज्झितधर्मा नाम सप्तमी भिक्षा भवेदिति। आसु च सप्तस्वपि पिण्डैषणासु संसृष्टाद्यष्टभङ्गी भणनीया, नवरं चतुर्थ्यां नानात्वम्, तस्या अलेपत्वात्संसृष्टाद्यभाव इति ॥७४३॥

अथ पानैषणासप्तकमाह–'पाणेसणा' गाहा, पानैषणाऽप्येवमेव संसृष्टादिका सप्तविधा ज्ञेया। नवरं केवलं चतुर्थ्यामल्पलेपायां भवति नानात्वं–भेदः, यद्–यस्मात् सौवीरायामादि–काञ्जिका-ऽवस्रावणादि आदिशब्दादुष्णोदक-तण्डुलोदकादि चालेपकृदिति **'समयोक्तिः'** सिद्धान्तभणितिः। शेषं तु ईक्षुरस-द्राक्षा-पानका-म्लिकापानकादि लेपकृत् तद्धि पीयमानं यतेः कर्मलेपं करोति ॥७४४॥६६॥

इदानीं **'भिक्खायरियावीहोणमट्ठगं'**ति सप्तनवतं द्वारमाह—

उज्जु १ गंतुं पच्चागइया २ गोमुत्तिया ३ पयंगविही ४ ।
पेडा य ५ अद्धपेडा ६ अब्भिंतर ७ बाहिसंबुक्का ८ ॥७४५॥ [पञ्चव. ३००]

ठाणा उज्जुगईए भिक्खंतो जाइ वलइ अनडंतो ।
पढमाए १ बीयाए पविसिय निस्सरइ भिक्खंतो २ ॥७४६॥
वामाओ दाहिणगिहे भिक्खिज्जइ दाहिणाओ वामंमि ।
जोए सा गोमुत्ती ३ अड्ढवियड्ढा पयंगविही ४ ॥७४७॥
चउदिसि सेणीभमणे मज्झे मुक्कंमि भन्नए पेडा ५ ।
दिसिदुग[1]संबद्धसेणिभिक्खणे अद्धपेडत्ति ६ ॥७४८॥
अब्भिंतरसंबुक्का जोए भमिरो बहिं विणिस्सरइ ७ ।
बहिसंबुक्का भन्नइ एयं विवरीयभिक्खाए ८ ॥७४९॥

'उज्जु'मित्यादिगाथापञ्चकम्, भिक्षाचर्याविषया वीथयो-मार्गविशेषा भिक्षाचर्यावीथयः, ताश्च अष्टौ यथा-ऋज्वी १, गत्वा प्रत्यागतिः २, गोमूत्रिका ३, पतङ्गवीथिः ४, पेटा ५, अर्धपेटा ६, अभ्यन्तरबहिसंबुक्क'त्ति शम्बूकशब्दस्य प्रत्येकमभिसम्बन्धादभ्यन्तरशम्बूका ७, बहिः शम्बूका ८ च ॥७४५॥

तत्रैताः क्रमेण व्याचष्टे-'ठाणे'त्यादि, प्रथमायां वीथ्यां कश्चिद्यतिः स्वस्थानात्-निजवसतेः ऋजुगत्या-प्राञ्जलपथेन समश्रेणिव्यवस्थितगृहपङ्क्तौ भिक्षां भ्रमन् याति यावत्पङ्क्तेश्चरमं गृहम्, ततो-

१ ०संबद्धं सेणि० ता. ॥

ऽनटन्–भिक्षामगृह्णन् ऋजुगत्या तथैव वलति–निवर्तते । द्वितीयायां–गत्वाप्रत्यागतिकायां भ्रमन्–भिक्षां गृह्णन् समस्थितगृहपङ्क्तौ प्रविश्य द्वितीयपङ्क्तौ भिक्षमाण एव निःसरति–प्रत्यागच्छति । कोऽर्थः?–[1]उपाश्रयान्निर्गतः सन्नेकस्यां गृहपङ्क्तौ भिक्षमाणः क्षेत्रपर्यन्तं गत्वा प्रत्यागच्छन् पुनर्द्वितीयायां गृहपङ्क्तौ यस्यां भिक्षते सा गत्वाप्रत्यागतिका, गत्वा [2]प्रत्यागतिर्यस्यामिति च विग्रहः । अन्ये तु ऋज्वीविपर्ययेण गत्वाप्रत्यागतिकां व्याख्यानयन्तीति ॥७४६॥

तथा वामाद्–वामगृहाद्दक्षिणगृहे दक्षिणगृहाच्च वामगृहे यस्यां भिक्षते सा गोमूत्रिका । गोः–वलीवर्दस्तस्य मूत्रणं गोमूत्रिका WW तद्वद्या सा तथा । इयं हि परस्परामिमुखगृहपङ्क्त्योरेकस्यां गत्वा पुनरितरस्यां पुनस्तस्यां पुनरितरस्यां पुनस्तस्यामेवेत्येवं क्रमेण भावनीया । तथा अर्दवितर्दा–अनियता भिक्षा'पतङ्गवीथिः' पतङ्गः–शलभस्तस्य वीथिका–मार्गस्तद्वद्या सा तथा । पतङ्गगतिर्हि अनियतक्रमा भवति एवं या अनाश्रितक्रमा सा पतङ्गवीथिकेति ।

तथा पेटा–वंशदलमयं वस्त्रादिस्थानं जनप्रतीतम् , सा च चतुरस्रा भवति, ततश्च साधुरभिग्रहविशेषाद्यस्यां चर्यायां ग्रामादिक्षेत्रं पेटावच्चतुरस्रं विभज्य मध्यवर्तीनि च गृहाणि मुक्त्वा चतसृष्वपि दिक्षु समश्रेण्या भिक्षां भ्रमति सा पेटेति भण्यते । तथा दिग्द्वयसम्बद्धयोर्गृहश्रेण्योर्भिक्षणेऽर्धपेटेति । पेटार्धसमानसंस्थानगृहश्रेणिभिक्षणेऽर्धपेटेति भावः ॥७४८॥

तथा [3]शम्बूकः–शङ्खस्तद्वत् शङ्खभ्रमिवदित्यर्थः या वीथिः सा शम्बूका । इयं च द्वेधा–अभ्यन्तर-

१ तुलना–स्थानाङ्गवृत्तिः सू. ५१४, प. ३६६ ॥ २ प्रत्यागतं–इति स्थानाङ्गवृत्तौ [प. ३६६] पाठः ॥ ३ तुलना–'संबुक्का-

शम्बूका बहिःशम्बूका च, तत्र यस्यां क्षेत्रमध्यभागात् शङ्खवृत्तत्वगत्या भिक्षां भ्रमन् बहिर्विनिःसरति-क्षेत्र-बहिर्भागमागच्छति सा अभ्यन्तरशम्बूका, तथा बहिःशम्बूका भण्यते एतस्या-अभ्यन्तरशम्बूकाया विपरीतभिक्षया-विपरीतभिक्षणेन, यस्यां बहिर्भागात्तथैव भिक्षामटन् मध्यभागमायाति सा बहिःशम्बूकेति भावः, उक्तं च—

"अब्भिंतरसंबुक्का बाहिरसंबुक्का य, तत्थ अब्भिंतरसंबुकाए संखनाभिखेत्तोवमाए आगिइए अंतो आढवइ बाहिरओ संनियट्टइ, इयरीए विवज्जओ" [तुलना- पञ्चव. वृत्तिः ३००] त्ति ।

[1]अन्ये तु अभ्यन्तरशम्बूकाबहिःशम्बूकयोः परस्परं लक्षणविपर्ययमाहुः । **पञ्चाशकवृत्तौ**— तु

[2]"शम्बूकवृत्ता—शङ्खवद्वृत्ततागमनं, सा च द्विविधा—प्रदक्षिणतोऽप्रदक्षिणतश्चे" [१८।८] त्युक्तम् । इह च गत्वाप्रत्यागतिकायां ऋजव्याः प्रक्षेपात् शम्बूकाया एकत्वविवक्षणाच्च षडेव वीथयो [3]ग्रन्थान्तरे प्रतिपादिता इति ॥७४१॥९७॥

इति प्रथमखण्डमेकगाथासहितं ९ सहस्ररूपम् ॥

वट्टं'ति शम्बूकः शङ्कस्तस्यावर्त्तः शम्बूकावर्त्तस्तद्वदावर्तो यस्यां सा शम्बूकावर्त्ता ।' इति उत्तराध्ययनवृत्तिः, ३०।१९ प. ६०५ B ॥

१ स्थानाङ्गवृत्तौ [प. ३६६] अपि लक्षणविपर्यासो दृश्यते ॥ २ शम्बूकावृत्ता-मु. । संबुक्कवृत्ता-इति पञ्चाशकवृत्तौ [प. २८०] पाठः ॥ ३ पञ्चाशकवृत्ति [१८। ८] स्थानाङ्गसूत्रादिषु [सू.५१६] इति ध्येयम् । उत्तराध्ययनशान्ति-सूरिवृत्तिः प. ३०५, ३०७ द्रष्टव्या ॥

इति श्रीप्रवचनसारोद्धारवृत्तौ प्रथमः खण्डः

प्रकाशितसाहित्यसूचि

१ खवगसेढी	२१)
बंधविहाण महाशास्त्र ४ खण्ड	
२ मूलपयडिबंधो-	३०)
३ उत्तर "	२५)
४ " " भुयस्कारादिबंध	३०)
५ मूलपयडिठिइबंधो	२१)
६ उत्तर " "	२५)
७ मूलपयडिरसबंधो	२५)
८ उत्तर " "	२५)
९ " " भुयस्कारादिबंध	३५)
१० मूलपयडिपएसबंधो	२५)
११ उत्तर " " १	३०)
१२ " " २	३०)
१३ पसत्थी पूर्वार्ध	३०)
१४ " उत्तरार्ध	३०)
१५ खवगसेढी मूलानुवाद	२)२५
१६ कायस्थितिप्रकरणम्	२)

१ सचूर्णि-बंधशतकटीप्पनकम् (प्रत)	१६)
२ " " पुस्तक	१४)
३ चत्वार: प्राचीना: कर्मग्रन्था	२५)
४ " " " सप्ततिकादिसह	४०)
५ सप्ततिका-सूक्ष्मार्थविचारसारप्रकरण	२०)
६ षडशीति चतुर्थकर्मग्रन्थ:	१५)
७ सप्ततिका-षष्ठकर्मग्रन्थ-	१५)
८ नव्या: चत्वार: कर्मग्रन्था	३०)
९ पञ्चसंघट्टो कर्मग्रन्थो	३०)
१० बावसंग्रह	१०)
११ स्याद्वादरहस्य (टीकात्रय)	२०)
१२ शतार्थवीथी	३)
१३ प्राचीनकर्मग्रन्थ षट्कमूलभाष्यादिगाथा	९)
१४ सूक्ष्मार्थविचारसार प्रकरणम्	१५)
१५ उपमितिभवप्रपञ्चाकथा-उत्तरार्ध	३०)
१६ प्रवचनसारोद्धार (प्रथमखण्ड)	४०)
१७ सचूर्णिकर्मप्रकृतिटीप्पनकम्	५०)